
Kendriya Sanskrit Vidyapeetha
LIBRARY
TIRUPATI

Author *Cl. No.*

Title *Acc No.*

If the book is not returned on or before the date last mentioned an over - due charge of **5 Paise** per book per day will be collected.

Due date of return	Due date of return	Due date of return	Due date of return



No. 3.]

THE

VIZIANAGRAM SANSKRIT SERIES

UNDER THE SUPERINTENDENCE OF

ARTHUR VENIS M. A. OXON.

PRINCIPAL, SANSKRIT COLLEGE, BENARES.

THE

PAÑCHAPÂDIKÂ

OF

PADMAPÂDA

EDITED BY

RÂMASÂSTRÎ BHÂGAVATÂCHÂRYA,

ASSISTANT PROFESSOR, SANSKRIT COLLEGE, BENARES.

VOL. II. PART I.

SANSKRIT TEXT.

(ALL RIGHTS RESERVED.) Registered under Act XXV of 1867.

PRINTED, PUBLISHED AND SOLD BY

E. J. LAZARUS & Co., BENARES.


MAY BE HAD FROM GANESH DAS AND CO., CHOWK, BENARES:
JAYESTHARAM MUKUNDJI AND CO., BOMBAY:
OTTO HARRASSOWITZ, LEIPZIG: LUZAC AND CO., LONDON.

1891.

पञ्चपादिका ।

V. A VENKATESWARA AIYAR

श्रीपद्मपादाचार्यविरचिता ।



काशीस्थराजकीयसंस्कृतपाठशालायामध्यापकेन
श्रीरामशास्त्रिभागवताचार्येण संशोधिता ।



काश्याम् ।

ई॰ जे॰ लाजरसकम्पन्याख्येन स्वमुद्रालये मुद्रिता ।

संवत् १९४८ ।

R66,5 x1,1,1
M91

4021

PREFACE.

The so called Pa*ñ*chapâdikâ of Padmapâda, the oldest of the commentaries on *Ś*aṅkara's *Ś*ârîrakabhâshya, is a fragment of a fragment. Its title would imply that the work treated of the first five pâdas of the Bhâshya; but, as a matter of fact, all the MSS. hitherto examined of it and its related glosses* end abruptly with the *chatuḥsûtrî i. e.* Adhy I. pâda 1, sû. 1-4. The fragmentary condition of the MSS. has not been satisfactorily explained. Beyond all doubt Padmapâda intended a complete treatise. See below, p. 29, ll 3, 4: 'svâvasara eva &c.,' which refers to Adhy. II, 2, 32: and p. 33. ll 12, 13: 'tathaika &c.,' referring to III. 3, 53: and p. 75. ll 16, 17, where further general indications are given. But neither in these contexts, nor in the usual lengthy discussion of *maṅgalâcharaṇa* (where, perhaps, it would have been more appropriate) is any explanation offered by the gloss writers as to the incompleteness of their original. Vidyâraṇya also furnishes no clue in his Vivaraṇaprameyasaṅgraha.† We are thus thrown back on what seems to be the later and doubtful testimony of one Mâdhava,‡ who in his *Ś*aṅ-

* The Pa*ñ*chapâdikâvivaraṇa, Tattvadîpana and Bhâvaprakâśikâ. An edition of the former work, with extracts from the latter, now appears in this Series.

† Will appear shortly.

‡ As against the identification of this Mâdhava with the renowned Vidyâraṇya, see Burnell's Vaṃśabrâhmaṇa pref. p. xx and note. K. T. Telang discusses the historical value of the two *Ś*aṅkaravijayas in Ind. Antiq. Vol. V. pp. 287 *et seq.* He writes (*ibid* p. 293):—'A work on *Ś*aṅkara's victories is ascribed to another of *Ś*aṅkara's pupils—Chidvilâsa—who, I take it, is identical with Chitsukha. Not having access to the work, I am unable to say whether it was really written by a pupil of *Ś*aṅkara's, or whether the author was one of the "ancient poets" to whom Mâdhava refers. Nevertheless, the fact that it is attributed to Chitsukha induces me to express the hope that somebody may undertake to edit and publish it.' I regret having failed to procure a MS. of Chidvilâsa's *Ś*aṅkaravijaya. However, I may remark that this Chidvilâsa or Chitsukha (even if the names be taken as identical), a pupil of *Ś*aṅkarâchârya, cannot, though Telang's last sentence seems to imply that he may, be identical with the Chitsukha who wrote the well known Chitsukhî. For the Chitsukhî frequently quotes from the Nyâyakandalî of *Ś*rîdhara (*vide* Pandit, New Series Vol. V. pp. 335, 399, *et passim*), and must therefore be later than 991 A. D., the date of the Kandalî, cf. Bühler, Bo. R. A. S. Journal, 1877, p. 76.

karavijaya industriously recites the story of the Pañchapâdî. To enable the reader to judge for himself the outlines are here given.

Sureśvarâchârya, one of Śaṅkara's pupils, seeks and receives permission to write a vârttika on the master's Bhâshya. [xiii. śl. 1-3]. Other disciples secretly approach the master and express their disapproval of Sureśvara's attempt, on the ground of his being devoted to karmakâṇḍa and, therefore, unfitted for the task of commenting on jñânakâṇḍa. They ask that another disciple Padmapâda, whose sannyâsin name is Sanandana, may be entrusted with the task. [śl. 5-21]. Permission is granted. But Padmapâda must not write a vârttika to which Sureśvara is pledged. [śl. 43]. Sureśvara is told in private of the objections brought against him. Urged by the master to write an original work on Vedânta, he produces the Naishkarmyasiddhi * : not, however, without giving vent to a curse on any future commentary, 'which shall never pass current in the world.' [śl. 44-53]. Padmapâda writes a ṭîkâ 'the former portion of which is known as the Pañchapâdikâ, and the latter portion as the Vṛitti.' [śl. 70-71] † The master consoles Sureśvara. Of Padmapâda's work, five pâdas—in fact, only the portion on the first four sûtras shall be known in time to come. Reappearing in this world as Vâchaspati, ‡ Sureśvara shall write a complete and lasting ṭîkâ. [śl. 72-73]. Padmapâda's ṭîkâ is burnt in his uncle's house. [xiv. śl. 160]. Śaṅkara recites it from memory, while the delighted Padmapâda writes it down. [śl. 167-170].

We need not entirely discredit the above story. The jealousy of fellow disciples, or the accident of fire, might well injure or destroy a book. But there is a decidedly suspicious ring about the curse of Sureśvara and the prophecy of Śaṅkara. Further, against śl. 70-71 we must balance the (fact already noticed) that

* Sureśvara nowhere mentions these circumstances.

† "यत्पूर्वभागः किल पञ्चपादिका तच्छेषगा वृत्तिरिति प्रथीयसी" ॥

‡ "वाचस्पतित्वमधिगम्य वसु धरायाम्" । 'Vâchaspatitva' may of course imply nothing more than mastery of style or language; but the personal reference to Vâchaspati, the writer of the Bhâmatî, would be irresistible to Mâdhava, the self-styled *navakâlidâsa* (cf. K. T. Telang, Ind. Antiq. Vol. I. p. 299).

the gloss writers, and Vidyâraṇya, do not even hint at the work having ever existed in a complete form. Their silence may not be conclusive; but it becomes all the harder to explain on the assumption that the Mâdhavîyaśaṅkaravijaya furnishes an authentic and well known history of the Paṅchapâdikâ.

Our text is based on 4 MSS.: (*a*) No. 208, Benares Sanskrit College Catalogue, not dated, accurate; (*b*) No. 195, Ben. Sans. Coll. Cat. not dated, but older than (*a*), accurate; (*c*) lent by Mahâmahopâdhyâya Gaṅgâdhara Śâstrî, not dated, but a copy of the Vivaraṇa in the same hand bears date Samvat 1822: both copies have evidently been revised by a pandit; (*d*) lent by Pandit Vibhavarâma of Benares, not dated, this too has been carefully revised by a pandit, who has appended occasional notes in the margin.

The Paṅchapâdikâ is a marked instance of a book more known than read. Though constantly quoted as the Ṭîkâ κατ' ἐξοχήν in later polemical works, the book itself is now rarely studied, having been supplanted by the Bhâmatî and the other commentaries on the Bhâshya. But as a full and, in some respects, original exposition of that Vedânta crux, adhyâsa (see appended notice in Sanskrit), our work has merits of its own which, together with its historical interest, will, it is hoped, justify its publication for the first time. A closer discussion of its contents is reserved for the introduction to the English translation now being prepared.

॥ भूमिका ॥

अथेयं पञ्चपादिका श्रीमद्भगवच्छङ्कराचार्यपादप्रणीतब्रह्मसूत्रभाष्यस्य व्याख्या तत एव साक्षादधिगतसकलवेदान्ततत्त्वेन तच्छिष्यमुख्येन श्रीपद्मपादाचार्येण विरचिता गभीरार्थपरिपूरिता जिज्ञासुजनोपयोगाय प्रकाश्यते । अस्याः किल पञ्चैव पादाः प्रचरेयुस्तत्रापि आद्या चतुःसूत्रीव प्रसिध्येदिति भगवता शङ्करभगवत्पादेन रचयिता ऽभिदधइति वर्णयन्ति स्म शङ्करदिग्विजये माधवाचार्याः । तदादेशानुसारेणैव चिरमन्विष्यमाणापि चतुःसूत्रीतो नाधिकासावुपलभ्यते व्याख्या चास्या विवरणनाम्नी तावत्येव । अस्यां च प्रथमसूत्रे चत्वारि वर्णकानि द्वितीये चैकं तृतीये द्वे चतुर्थे च द्वे इत्येवं नव वर्णकानि विषयभेदेन तत्तद्विषयोपयुक्तविविधयुक्तिसंसक्तानि विहितानि सुखप्रतिपत्तये ग्रन्थकृता ।

अयं च पद्मपादाचार्यो विष्णुवतारो विमलनामकब्राह्मणपुत्रः शङ्करदिग्विजये स.३–श्लो २ अस्यैवारुणावतारत्वमिति ३–६ मतान्तरत्वेन पूर्वोक्त्या तद्विरोधपरिहारश्च तत्रैव टीकायाम् । अस्यैव भगवता शङ्कराचार्येण चतुर्थाश्रमं प्रापितस्य सनन्दननामलाभ इति ६–१४ अस्याचार्यमुख्यशिष्यत्वमिति ६–६६ अयं चाचार्यात्त्रिवारं भाष्यमपठदिति ६–६८ तस्यैवाचार्यस्य गङ्गापारादाहूतस्य गङ्गयाविर्भावितेषु पद्मेषु पादविन्यासपूर्वकमागतस्योपदर्शितप्रभावेण पद्मपादनामलाभ इति ६–७१ अयमेव सुरेश्वराचार्येण ब्रह्मसूत्रभाष्ये विधित्सितं वार्तिकमनिच्छद्भिः शिष्यैरर्थितेन गुरुणोक्तो ब्रह्मसूत्रभाष्ये टीकां कृतवान् इति १३–५=७३ अयं च तीर्थयात्रासमये स्वमातुलगृहे निहितस्वकृतपुस्तको ऽसूयया स्वगृहेण सह दाहिते तस्मिन्नाचार्येण सदयं पञ्चपादिकां यथापूर्वानुपूर्वीकां ग्राहित इति १४–१=६६ काश्मीरमण्डले शारदापीठमारुरुक्षत आचार्यस्य हस्तावलम्बं चक्रइति १६–८२ एवमाचार्यप्रत्यासन्नतमो महाप्रभावश्चायम् ॥

अत्रोपलभ्यमानानां बहूनां विषयाणां भामतीरत्नप्रभादौ संवादे ऽपि भगवतः पद्मपादाचार्यस्य भाष्यकारसमानकालीनत्वात्तदुत्तरकालीनत्वाच्चान्येषां व्याख्याकृतां प्रथममनेनैवोहिता उपपत्तयो ऽन्यैः संगृहीता इत्यत्र न

कस्यापि विमतेरवकाशः । नानाशास्त्रीयविषयग्रथनं युक्तिगाढत्वमुपपादनप्रौढिश्चाच न कस्य सूक्ष्मदृशः श्लाघागोचरः । अस्मादेव प्रबन्धात् स्वस्वमतिसंमानितेषु संगृहीतेष्वपि व्याख्याकृद्भिर्विषयेषु प्रसिद्धेष्वपि सन्ति भूयांसस्तादृशा विषया ये विहायामुं प्रबन्धं नान्यत्रोपलभ्यन्ते तथा विशदरूपेण यत्प्रकाशनफलकोयं चिराद्वेदान्तरसिकैरन्विष्यमाणस्य प्रबन्धरत्नस्य मुद्रणप्रयासो निराकुर्यात् पिष्टपेषणधियं परीक्षकाणाम् । तथा हि । प्रथमे वर्णके अविरोधात्पूर्वं समन्वयप्रदर्शने उपपत्तिस्तमःप्रकाशयोर्विरोधस्य स्वरूपप्रदर्शनं नैमित्तिकस्यापि व्यवहारस्य नैसर्गिकत्वोपपादनमध्यासस्य सद्भावात्पार्थक्येन संभवप्रदर्शने बीजमध्यासस्य स्मृतित्वनिराकरणावसरे स्मरणाभिमानप्रमोषस्यानुपपत्तिप्रदर्शनं निरधिष्ठानभ्रमनिराकरणमात्मनः स्वयंप्रकाशत्वेपि तत्राविद्यासंभवोहमिति प्रतीतेर्देहेन्द्रियाद्यविविक्तात्ममात्रविषयकत्वोपपादनमर्थक्रियाकारित्वरूपसत्तानिरास इत्यादयः । द्वितीयवर्णके धर्मजिज्ञासाप्रतिज्ञानात्पृथक् ब्रह्मजिज्ञासारम्भप्रतिज्ञायामभ्यधिकाशङ्का तन्निराकरणं तत्प्रसङ्गागताश्च विषयाः । तृतीयवर्णके च ब्रह्मज्ञानस्य शास्त्रप्रयोजनत्वे आक्षेपप्रकारस्तन्निराकरणं तत्प्रसङ्गेन वेदाध्ययनविधावर्थावबोधस्याधिकारहेतुत्वाभावे ऽध्ययने प्रवृत्त्यनुपपत्तिशङ्का तस्य सविस्तरं निराकरणमित्यादयः । चतुर्थवर्णके ऽपि आत्मस्वरूपविप्रतिपत्तिनिरूपणावसरे विप्रतिपत्तिबीजानि चेतनस्य भोक्तृत्वानुपपत्तौ युक्तिः शरीरे भोगासंभवोपपादनशैलीत्यादयः । अष्टमवर्णके तृतीयसूत्रोदाहृतश्रुतिव्यतिरिक्तश्रुत्युदाहरणे भाष्यकृतस्तात्पर्यनिरूपणम् । नवमे वर्णके च श्रवणादीनां स्वरूपनिरूपणं स्वरूपपराणामपि वेदान्तानां प्रामाण्ये शास्त्रकारान्तरानुमतिप्रदर्शनमित्यादयो ये व्याख्यान्तरेषु सूचिता अपि प्रतिपादनशैलीवैलक्षण्येन युक्तिभेदैश्चेतद्व्याख्यैकपर्यालोचनावधारणीया इति निश्चेष्यन्ते सकलमिमं प्रबन्धं सावधानं विचारयद्भिः शास्त्ररसिकैः । संस्कृतप्रौढप्रबन्धसकलतात्पर्यावगमसामर्थ्यविकलानां च विचिन्वतां प्राचीनविद्वद्दूहितान् विषयान् प्रमोदयिता कृत्स्नार्थावेदनेन नातिचिरात् काशीसंस्कृतपाठशालाप्रधानाध्यक्षश्रीमदार्धरत्रेनिससाहिबैर्महता परिश्रमेण निर्मितमवतरणम् । तदेवं चिराद्विपश्चिद्भिरन्विष्यमाणः प्रौढतमो ऽयं प्रबन्धः प्रमोदयतु दर्शनदर्शनलालसास्पृहणीयचेतसः सचेतस इति शुभम् ॥

अथ शुद्धिपत्रम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१०	शीर्षके	अन्तस्त्वोक्तिः	अन्तस्त्वोक्तिः
"	२	निदश	निदर्श
"	११	ज्ञाप्यते नेदं	ज्ञाप्यतो नेदं
११	२४	तस्यैव	तस्यैव
१२	१४	बीजाङ्कुरा	बीजाङ्कुरा
"	२३	कूटस्य	कूटस्य
१३	१७	लोकिक	लौकिक
"	२०	सम्यक्ज्ञानं	सम्यग्ज्ञानम्
१६	१६	न व	नव
१७	२	किं वृत्तस्य	किंवृत्तस्य
"	२२	रूपत्वे नात्म	रूपत्वेनात्म
२१	४	पद्मपराग	पद्मराग
२२	१६	रस्त्यत्राह	रस्ति । अत्राह
२४	२०	विषयताफल	विषयता फल
२५	शीर्षके	नीलादि	नीलादि
२६	१७	दमल्लक्षण	दसल्लक्षण
"	२०	ज्ञानाजन	ज्ञानजन
२७	२१	त्येा	त्येवा
३०	११	अथैवि	अथावि
३३	१३	करणारम्भे	करणारम्भे
३४	१६	सर्वर्था	सर्वथा
३५	११	क्रशत्वादा	क्रशत्वादी
३६	३	मिथ्यागेा-	मिथ्या गेा-
३७	२२	आत्मैकत्व	आत्मैकत्व-
३८	१३	विपर्यय	विपर्य
"	१४	बेाध्यते । तत्र	बेाध्यते तत्र
३६	११	द्वै	द्वै
४०	३	सारिता ऽविद्या	सारिताऽविद्या
"	१४	रूपप	रूप
४१		शीर्षके निवृत्तिं	निवृत्ति
४२	२७	हुकल्पे	ऽकल्पे
४३	११	र्था	र्था–
४४	६	शब्दे-	शब्दो
"	२४	मर्थनकं	मनर्थकं
४६	६	शेषताकृतं	शेषता । कृतं
४८	१	किमपरमम	किमपरम
"	१६	वेदार्थो ऽस्ति	वेदार्थोऽस्ति
"	"	जैमनिना ।	जैमिनिना न्यायान्तर
"	२४	प्रामा	प्रमा
४६	५	ध्यनय	ध्ययन
५१	५	काय	कार्य
५७	४	त्वासिद्धेः ।	त्वासिद्धेः विधितो
"	२५	उपसर्येरिति	उपसर्पेदिति
५८	५	भवति । यदि	भवति यदि
"	८	ऽपेक्षितव्यः	ऽपेक्षितव्यः
"	१६,२०	तादर्थ्यविगमा·	तादर्थ्याऽवगमा-
"	"	चित्रे	चित्रश्रे
"	२४	जिज्ञायाः	जिज्ञासायाः
५६	३	शब्दापादान	शब्दोपादान
६०	१	ष्ठानान्तर्यं	ष्ठानानन्तर्यं
"	१३	सर्वषां	सर्वेषां
६२	१	निश्रेयस	निश्रेयस
"	२	स्वसंविद्यः	स्वसंवेद्यः
"	८	वैलक्षण्यं	वैलक्षण्यम्
६३	६	चित्वा	चिट्वा
"	१५	अतः शब्दो	अतःशब्दो
६४	१५	व्यस्ययतः	व्यस्य यतः
"	२०	तत्कर्तृकताज्ञान	तत्कर्तृकता ज्ञान
६६	१०	भवति	भवति ।
"	१२	जिज्ञासेति ।	जिज्ञासेति
"	१३	प्रदर्शनार्थं	प्रदर्शनार्थम् ।
६७	५	सितत्वम् ।	सितव्यम् ।
"	"	क्रिया नियतापि	क्रियानियतापि
"	२०	कर्तव्यतामीम	कर्तव्यता मीम
"	८	कस्मात्	कस्मात् ।
६८	६	तदर्थो	तदर्थो
६६	१६	पत्तता	पत्तज्ञा
७०	३	निदिष्टेः	निर्दिष्टे
७१	२२	सिद्धस्य	सिद्धस्य ।
"	२५	स्तोति	स्मोति
७४	२२	हं विषय	हंविषय
७५	१७	विचार्य-	विचार्य
७७	८	मुपचक्रम	मुपक्रम
"	१४	अनेन कर्तृ	अनेककर्तृ
७८	११	जन्मे	जन्म
८१	१	ह्विषा	विषया
"	१६	निर्णये	निर्णय-
८२	४	कल्पम् प्रत्यय	कल्पप्रत्यय

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
"	८	त्वाच्च	त्वाच्च ।
८३	१६	वस्तुत्य	वस्तुन्य
"	१८	र्थाबोध	र्थबोध
"	२०	इत्येत	इत्यत
८४	२०	दानि	दीनि
८५	१	सिद्धर्थ	सिद्धार्थ
८७	२३	मानम् ।	मानम्
८८	३	पर्ययव	पर्यव
"	६	विधायत	विधीयत
"	१०	गतर्म	गत्कर्म
८६	८	क्रियाते	क्रियातो
"	"	त्प्रीति	प्रीति
"	१६	नित्यत्व	नित्यत्वे
८६	१८	न वर्त्तन्त	नावर्तन्त
"	२४	दशन	दर्शन
६०	८	मोक्षंन	मोक्षं न
"	२५	संपादादिरूपेहा	संपदादिरूपे ही
६१	१	नरुप	निरुप
"	६	पत्यु	पत्यु

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
"	७	ततज्	तज्
"	"	तद धि	तदधि
"	१२	ानरा	निरा
"	१६	भेदे	भेदो
"	२४	दिना ।	दिना
६२	१४	व्यांक्त	व्यक्ति
"	२४	तद् द्वारेण	तद्द्वारेण
६४	६	त्यर्हं	त्यर्हं
"	१२	तथा प्र	तथाप्र
"	१८	त्तरम् ।	त्तरम्
६५	५	शून्ने	शून्ये
६६	१३	तद्भ	तद्भू
६७	२	ऽस्ति क्रिया	ऽस्तिक्रिया
"	३	र्भवन्तिपर	र्भवन्तीपर
"	"	मत	मतं
"	२१	दिवनज	दिव नज
६६	६	वात्तत्	वात्तत्·
"	१५	दादिद्वि	दादिवद्वि
१००	४	अतः स ।	अतः स

इति ।

V.A.VENKATESWARA AIYAR

वर्णक्रमानुसारिसूचीपत्रम्।

	पृष्ठे पङ्क्तौ
अथातो धर्मजिज्ञासेति न सर्वो वेदार्थो विचारणीयत्वेन प्रतिज्ञातः किन्तु कार्यात्मक एव	४८ । २
अध्यस्तरजतं मायिकं न पारमार्थिकम्	१० । ५
अध्यासः ६ । २४, ३० । ७, ३४ । २०	
अध्यासभाष्यप्रतिपाद्यम्	१ । १२
अध्यासभाष्यमावश्यकम्	१ । १७
अध्यासलक्षणावाक्यस्य स्थूलव्याख्या	४ । ५
अध्यासलक्षणवाक्यार्थविचारः	६ । २४
अध्यासलक्षणस्याव्याप्तिशङ्कानिरासः	१० । १३
अध्यासलक्षणात्पृथक् तत्स्वरूपसंभवोपन्यासस्याऽवश्यकतोक्तिः ...	६ । १
अध्यासव्यवहारस्याऽनादिपरम्परासिद्धत्वम्	२४ । ११
अध्याससाधनम्	५ । २३
अध्यासस्य स्मृतित्वनिराकरणम्	७ । २०
अध्यासस्य स्मृतित्वशङ्का	७ । ६
अध्यासस्याऽहंममरूपतानिरूपणम्	५ । ६
अध्यासस्वरूपे मतान्तरोपन्यासः	११ । १८
अध्यासाक्षेपवाक्यव्याख्यानम्	६ । १७
अध्यासो लोकानुभवसाक्षिकः	१३ । १८
अनिर्धार्यप्रवृत्तौ महानर्थापत्तिः	७५ । १८
अनृतम्	४ । १३
अविद्या	३० । ७
अविद्यात्मकबन्धनिवृत्तिस्तत्त्वज्ञानात्	४१ । १
अविद्याध्यासः	३० । ५
अविद्यापनयनातिरेकेण मोक्षे नान्यदपेक्षणीयम् ...	६० । ७
अविद्याप्रयुक्तशरीरसंबन्धव्यपगमे निवर्त्तत एव सुखदुःखानुभवः	६८ । १८
अविद्यासाधकश्रुत्यर्थापत्त्योः प्रमाणान्तरेणाऽविरोधोपपादनम्	१५ । ७
अशरीरः	८६ । ३
अहंप्रत्ययी	३५ । १६
अहमर्थस्याऽऽत्मन इदमनिदमात्मकत्वादिविचारः ...	१८ । १
अहमितिप्रतीतेः स्थायिविषयावगाहित्वम्	२५ । १
अहमितिप्रत्ययो देहादिव्यतिरिक्तभोक्तृविषयकः ...	१५ । १५
आत्मनश्चिन्मात्रमेव पारमार्थिकं रूपं भोक्तृत्वादि त्वौपाधिकम्	१६ । १३
आत्मनोऽन्तःकरणोपरागनिमित्तमहंकर्तृत्वं मिथ्यैव ...	२० । ११
आत्मनोऽविषयत्वेनाध्यासायोग्यताशङ्काया निरासः ...	१७ । २
आत्मनो देहादिव्यतिरिक्तत्वेनोपपादनम्	७३ । १२
आत्मब्रह्मैक्यमतोपन्यासः	७५ । १
आत्मविप्रतिपत्तिमध्ये ईश्वरोपदर्शनस्यौचित्योक्तिः ...	७४ । १८
आत्मविषये नानाविधविप्रतिपत्तिकारणोक्तिः ...	७५ ८
आत्महननम्	७५ । २३
आत्मा	७२ । १६

	पृष्ठे	पङ्क्तौ
आत्मान्तःकरणयोरन्योन्याध्यासः	३५ ।	१०
आत्मैकत्वसाक्षात्कारे ऽध्यासस्य समूलोच्छेदात्संसारविनिवृत्तिः ...	३६ ।	२५
आम्नायस्य क्रियार्थत्वादित्यादि कर्मकाण्डमात्रविषयं न तु निरर्गलम्	६५ ।	६
इदं रजतमितिज्ञानस्यालम्बनविचारः	८ ।	१४
इन्द्रियात्मवादोपन्यासः	७२ ।	२१
ईश्वराभिध्यानतो मलापगमशङ्का	६२ ।	१७
औपनिषदः	६४ ।	२०
औपनिषदपुरुषस्याऽनन्यशेषता	६४ ।	१६
क्रियापर्यवसाय्येव वाक्यमिति प्रातिपदिकार्थमात्रे प्रथमां स्मरतः पाणिनिमुनेर्नानुमतम्	६७ ।	१
क्षणिकविज्ञानात्मवादोपन्यासः	७३ ।	१
जगज्जन्माद्युपलक्षितं ब्रह्म	७६ ।	११
जगन्मिथ्या न त्वलीकम्	९३ ।	१
जन्मन आदित्वोपपत्तिः	७६ ।	१६
जन्मादिपदस्य व्याख्या	७६ ।	१५
जन्मादिपदेन श्रौता जन्मस्थितिभङ्गा गृह्यन्ते न तु अस्ति भवतीत्यादयो नैरुक्ताः	७७ ।	२४
जन्मादिपदेन श्रौतानां ग्रहणे सूत्रस्यार्थवत्तोपपादनम् ...	७८ ।	६
जन्मादिसूत्रवाक्यार्थोपन्यासः	७७ ।	७
जन्मादिसूत्रविषयवाक्यम्	८१ ।	१
जन्मादिसूत्रस्य स्वतन्त्रानुमानपरत्वप्रतिषेधः	७६ ।	३
जन्मादिसूत्रे अस्येतिपदस्यार्थः	७६ ।	२४
जन्मादिसूत्रेणैव युक्तिरप्युपदर्शिता ब्रह्मणि	७८ ।	१६
जन्मादिसूत्रे यतःशब्दार्थः	७७ ।	५
जिज्ञासासूत्रे अतःशब्दार्थविचारः	६३ ।	१५
जिज्ञासासूत्रे अथशब्दार्थविचारः	५२ ।	१
जिज्ञासासूत्रे जिज्ञासाशब्दार्थपूर्वपक्षः	५२ ।	२
जिज्ञासासूत्रे जिज्ञासाशब्दार्थसिद्धान्तः	५२ ।	१७
जिज्ञासासूत्रे साधनचतुष्टयसंपत्त्यानन्तर्यमथशब्देनोच्यते ...	६२ ।	२१
जीवः	३६ ।	२०
जीवस्य ब्रह्मात्मकत्वमविद्याच्छत्रप्रकाशम्	१४ ।	२१
तत्त्वमसीत्यादीनां निरंशे वस्तुनि पर्यवसानम् ...	६६ ।	२३
तर्कस्वरूपतदुपयोगनिरूपणम्	३६ ।	१५
दर्पणमुखप्रतिबिम्बदृष्टान्ततात्पर्यादिविचारः ...	२१ ।	२२
दर्शनादिविधिवाक्यानि न विधयः किन्तु प्ररोचनार्था अर्थवादाः ...	६३ ।	१८
दर्शनादिविधीनामर्थवादत्वोपपादनम्	६४ ।	१
दर्शनोद्देश्यकध्यानविधिनिरासः	८७ ।	२४
देहादिव्यतिरिक्तभोक्तात्मवादोपन्यासः	७३ ।	७
नञर्थविचारः	६७ ।	१०
नामादिषु ब्रह्मदृष्टिर्मानसी क्रिया न तु ज्ञानम् ...	११ ।	८
निदिध्यासनम्	६३ ।	२४
निरधिष्ठानकाध्यासवादापवादः	१२ ।	८
नेतिनेतीतिनिषेध आत्मावधिकः	६५ ।	१
पुरोऽवस्थितापरोक्षवस्तुन्येवाध्यास इति नायं नियमः ...	२६ ।	२२
पूर्वमीमांसायां धर्मविचारप्रतिज्ञयैव ब्रह्मविचारस्याऽपि कृतत्वाऽपार्थ्य ब्रह्मजिज्ञासेत्याक्षेपः	४२ ।	१

	पृष्ठे	पङ्क्तौ
पूर्वमीमांसारम्भभाष्यादिपर्यालोचनयैव लभ्यते अथातो धर्मजिज्ञासेति कर्मका-		
ण्डमात्रविचारप्रतिज्ञेति	४८	४
प्रत्यगात्मनः स्वतःसिद्धरूपत्वादधिष्ठानत्वोपपत्तिः ...	२६	५
प्रत्यगात्मा	३५	२३
प्रपञ्चातिरिक्तब्रह्मप्राप्त्यर्थोपासनविधिनिरासः ...	८८	१७
प्रमातृत्वादिव्यवहारो ब्रह्मज्ञानात्प्रागबाधितत्वात्प्रामाणिकः ...	१००	१३
प्रयोजनविषयत्वे कीदृशस्य वस्तुनो भवतः	६७	२०
प्राचीनकारिकाणां स्वार्थे प्रमाणदानम्	१००	२
बाधः सर्वः सावधिक एव	१२	१८
बाधप्रत्ययस्वरूपनिरूपणम्	३८	१२
बिम्बप्रतिबिम्बविषयकविचारः	२२	२१
ब्रह्मजिज्ञासापदे समासविचारः	६४	११
ब्रह्मजिज्ञासाया अनारम्भणीयत्वाक्षेपपरिहारः ...	४८	२
ब्रह्मजिज्ञासाया अनारम्भणीयताशङ्का	४३	५
ब्रह्मजिज्ञासाया अनारम्भणीयताशङ्का प्रकारान्तरेण ...	४४	१
ब्रह्मजिज्ञासाया आरम्भणीयता एकदेशिमतेन ...	४२	३
ब्रह्मजिज्ञासाया आरम्भविषयकशङ्कासमाधयः ...	४४	७
ब्रह्मजिज्ञासायां न कर्मावबोधानन्तर्यम्	५८	१८
ब्रह्मजिज्ञासाया विषयप्रयोजनसम्बन्धाक्षेपः	६७	१
ब्रह्मजिज्ञासाशब्दार्थशङ्कासमाधयः	५३	१
ब्रह्मज्ञानफलविचारः	३७	१७
ब्रह्मज्ञानं विना नैवाध्यासनिवृत्तिः	३६	२०
ब्रह्मज्ञानात्प्रागेव विधिविधेयत्वादिव्यवहारः	१००	१
ब्रह्मज्ञानादविद्यानिवृत्त्युपपादनम्	३७	७
ब्रह्मणः प्रसिद्धत्वाच्छास्त्रविचार्यतासिद्धिः	७०	५
ब्रह्मणः सर्वात्मत्वादेव नाऽप्रसिद्धिः	७१	२०
ब्रह्मणः सामान्यतःसिद्धत्वेऽपि विशेषतोनानाविप्रतिपत्तिग्रस्तत्वादस्त्येव मीमां-		
सनीयता	७२	२
ब्रह्मणः सिद्धस्वरूपत्वे ऽपि शास्त्रसमधिगम्यत्वम् ...	८४	२०
ब्रह्मणः सिद्धार्थपरवाक्यवेद्यता ... —	८५	१६
ब्रह्मणः स्वरूपलक्षणसूचनम्	८१	१६
ब्रह्मणि जीवाध्यासकारणनिरूपणम्	१४	७
ब्रह्मणि युक्तेरिवानुभवस्याप्यवकाशः	७६	२२
ब्रह्मणि वेदान्तानां समन्वयः	८४	३
ब्रह्मणो ऽनुभवार्हत्वेऽपि शास्त्रप्रमाणकत्वम्	८०	१५
ब्रह्मणो ज्ञानाविषयत्वेऽपि तत्रास्त्येव ज्ञानोपयोगः ...	६३	३
ब्रह्मणो वेदप्रमाणकत्वम्	८२	१५
ब्रह्मप्रभवत्वं वेदानाम्	८२	१
ब्रह्मशब्दव्युत्पत्तिपर्यालोचनेनैव देशतः कालतो वस्तुतश्च निरवच्छिन्नोऽर्थः		
प्रतीयते	७०	२३
ब्रह्मशब्दार्थनिर्द्धारणोपायनिरूपणम्	७०	६
ब्रह्मशब्दार्थविचारः	७०	२३
ब्रह्मात्मैकत्वज्ञानं न संपदादिरूपम्	६०	१३
भावानां स्थायित्वेऽप्यर्थक्रियाकारित्वोपपत्तिः	२७	२
मङ्गलसद्भावो भाष्येऽर्थतः	३	१

	पृष्ठे पङ्क्तौ
मङ्गलाचरणम्	१ । १
मङ्गलाननुष्ठानाक्षेपो भाष्यविषयः	२ । १८
मनश्चात्मवादिमतोपदर्शनम्	७२ । २५
मननम्	६३ । २२
मनुष्योऽहमितिप्रतीतेर्गौणत्वनिरासः	१६ । १३
मिथ्या	४ । ६
मिथ्याज्ञानम्	६ । १७
मोक्षः क्रियासाध्यश्चेत्तार्थवादैर्नित्यतासिद्धिः	८६ । १४
मोक्षस्य श्रुतितो न्यायतश्च नित्यत्वसिद्धेर्न क्रियासाध्यता ...	८८ । २४
योगमतसिद्धात्मप्रदर्शनम्	७४ । ११
रजताध्याससामग्र्युपपादनम्	६ । ६
रजताध्यासे शुक्ते रजताकारपरिणामनिरासः	८ । २०
वर्णकम् –१	४१
वर्णकम् –२	५१
वर्णकम् –३	६७
वर्णकम् –४	७६
वर्णकम् –५	८१
वर्णकम् –६	८२
वर्णकम् –७	८३
वर्णकम् –८	८६
वर्णकम् –६	९०७
विकारादिचतुष्टयक्रियाफलरहितो मोक्षः	६३ । २
विदिक्रियाकर्मत्वेन ब्रह्म न वेदान्तसिद्धम्	६१ । १०
विद्या	३० । ८
विधिनिरपेक्षशास्त्रप्रतिपाद्यता ब्रह्मणः	६६ । ६
विधिविषयतयैव ब्रह्म वेदान्तैः प्रतिपाद्यत इति शङ्का ...	८६ । २०
विधिविषयता न ब्रह्मणः	८७ । ११
विरोधः	३ । ६,१४
विषयः	१७ । ६
विषयविषयिणोः परस्परानात्मतालक्षणो विरोधः ...	३ । १४
विषयविषयिणोर्विरोधः कः	३ । ८
विषयी	१७ । १०
वेदान्तप्रतिपाद्यवस्तुनिरूपणम्	४० । ११
वेदान्तानां स्वप्रामाण्यसिद्धये न चतुरादिसंवादोऽपेक्षणीयः ...	८५ । १०
वेदान्तैर्ब्रह्मज्ञाने सिद्धे मीमांसायाः क उपयोगः	६८ । १६
वेदान्तैर्ब्रह्मनिश्चये जननीये मीमांसायाः सहकारित्वम् ...	६६ । १६
शाब्दज्ञानातिरिक्तज्ञानविधेयतानिराकरणम्	८८ । ८
शारीरकः	६३ । २१
शास्त्रकृद्गौरवमात्राच्च शास्त्रे प्रवृत्तिसिद्धिः	६७ । १६
शास्त्रस्यारभणीयतोपसंहारः	७६ । १
शुक्तिचन्द्रद्वयोदाहरणतात्पर्यम्	१४ । २
श्रवणम्	४० । १३
सत्यम्	४ । १३
संपत्	६० । १५

	पृष्ठे पङ्क्तौ
समन्वयः	८४ । ५
समन्वयसूत्रे पूर्वोदाहरणविलक्षणोदाहरणदानतात्पर्यम् ...	८४ । १५
संविद्ब्रह्मतयोरन्योन्याश्रितत्वनिरासः	१२ । ११
सांख्यमतसिद्धात्मनिरूपणम्	७४ । ५
सूत्रम्	४१ । १३
सोपुप्तार्थपरामर्शविचारः	१६ । २१
स्फटिकलौहित्यविचारः	३१ । १
स्मृतिरूपत्वखण्डनमध्यासस्य	१३ । १०
स्वस्मिन्पुत्राद्यध्यासस्य मुख्यत्वनिरूपणम्	३४ । २४
स्वप्नार्थ आभ्यन्तरो न बाह्यः	१० । २०
स्वोक्ताध्यासलक्षणस्य निरवद्यत्वम्	११ । १६



V. A. VENKATESWARA AIYAR

पञ्चपादिका

अनाद्यानन्दकूटस्यज्ञानानन्तसदात्मने ।
अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नमः ॥ १ ॥

नमः श्रुतिशिरःपद्मषण्डमार्त्तण्डमूर्त्तये ।
बादरायणसञ्ज्ञाय मुनये शमवेश्मने ॥ २ ॥

नमाम्यभोगिपरिवारसम्पदं निरस्तभूतिमनुमार्द्धविग्रहम् ।
अनुग्रयमुन्मृदितकाललाञ्छनं विना विनायकमपूर्वशङ्करम् ॥ ३ ॥

यद्वक्त्रमानससरःप्रतिलब्धजन्मभाष्यारविन्दमकरन्दरसं पिबन्ति ।
प्रत्याशमुन्मुखविनीतविनेयभृङ्गास्तान् भाष्यवित्तकगुरून् प्रणमामि मूर्द्ध्ना ॥४॥

पदादिवृत्तभारेण गरिमाणं बिभर्त्ति यत् ।
भाष्यं प्रसन्नगम्भीरं तद्व्याख्यां श्रद्धया ऽऽरभे ॥ ५ ॥

युष्मदस्मत्प्रत्ययगोचरयोरित्याद्यहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार इत्यन्तं भाष्यम् अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इत्यनेन भाष्येण पर्यवस्यच्छास्त्रस्य विषयः प्रयोजनं चार्थात् प्रथमसूत्रेण* सूचिते इति प्रतिपादयति । यतश्च तस्माद् ब्रह्म जिज्ञासितव्यमित्यादिभाष्ये स्पष्टतरं प्रदर्शयिष्यामः ।

अत्राह । यद्येवमेतावदेवास्तु भाष्यम् अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति † तत्रानर्थहेतोः प्रहाणाय इति प्रयोजननिर्देशः आत्मैकत्वविद्याप्रतिपत्तय इति विषयप्रदर्शनम् किमनेन युष्मदस्मदित्यादिनाऽहं मनुष्य इति देहेन्द्रियादिष्वहंममेदमित्यभिमानात्मकस्य लोकव्यवहारस्य अविद्यानि ‡ मित्तत्वप्रदर्शनपरेण भाष्येण । उच्यते । ब्रह्मज्ञानं हि सूचितमनर्थहेतुनिबर्हणम् । अनर्थश्च प्रमातृत्वप्रमुखं कर्तृत्वभोक्तृत्वम् तदयदि वस्तुकृतम् न ज्ञानेन निबर्हणीयम् यतो ज्ञान-

* सूत्रिते इति २ पु० ।
† अत्रेति ३ पु० ।
‡ निमित्तत्वेत्युपकल्पितमास्ते २ पु० ।

मज्ञानस्यैव निवर्तकम् तदपि कर्तृत्वभोक्तृत्वमज्ञानहेतुकं स्यात्ततो ब्रह्मज्ञानमनर्थहेतुनिबर्हणमुच्यमानमुपपद्येत *। तेन सूचकारेणैव ब्रह्मज्ञानमनर्थहेतुनिबर्हणं सूचयता अविद्याहेतुकं † कर्तृत्वभोक्तृत्वं प्रदर्शितं भवति । अतस्तत्प्रदर्शनद्वारेण सूचार्थोपपत्त्युपयोगितया सकलतन्त्रोपोद्घातः प्रयोजनमस्य भाष्यस्य । तथा चास्य शास्त्रस्य ऐदम्पर्यं सुखैकतानसदात्मककूटस्थचैतन्यैकरसता संसारित्वाभिमतस्यात्मनः पारमार्थिकं स्वरूपमिति वेदान्ताः पर्यवस्यन्तीति प्रतिपादितम् । तच्चाहं कर्ता सुखी दुःखीति प्रत्यक्षाभिपतेन अबाधितकल्पेनावभासेन विरुद्ध्यते । अतस्तद्विरोधपरिहारार्थं ब्रह्मस्वरूपविपरीतरूपमविद्यानिर्मितमात्मन इति यावन्न प्रतिपाद्यते ‡ तावज्जरद्गवादिवाक्यवदनर्थकं प्रतिभाति § अतस्तन्निवृत्त्यर्थमविद्याविलसितमब्रह्मस्व ‖ रूपत्व¶मात्मन इति प्रतिपादयितव्यम् । वक्ष्यति चैतदविरोधलक्षणे जीवप्रक्रियायां सूचकारस्तद्गुणसारत्वादित्यादिना ।

यद्येवमेतदेव प्रथममस्तु । मैवम् अर्थविशेषोपपत्तेः । अर्थविशेषे हि समन्वये प्रदर्शिते तद्विरोधाशङ्कायां तन्निराकरणमुपपद्यते । अप्र ** दर्शिते पुनः समन्वयविशेषे तद्विरोधाशङ्का तन्निराकरणञ्च निर्विषयं स्यात् । भाष्यकारस्तु तत्सिद्धमेवादिसूत्रेण सामर्थ्यबलेन †† सूचितं सुखप्रतिपत्त्यर्थं वर्णयति इति न दोषः ॥

ननु च ग्रन्थकरणादिकार्यारम्भे कार्यानुरूपमिष्टदेवतापूजानमस्कारेण बुद्धिसन्निधापिताथवृद्धादिशब्दैर्दध्यादिदर्शनेन वा कृतमङ्गलाः शिष्टाः ‡‡ प्रवर्तन्ते शिष्टाचारश्च नः प्रमाणम् । प्रसिद्धं च मङ्गलाचरणस्य विघ्नोपशमनं प्रयोजनम् । महति च निःश्रेयसप्रयोजने §§ ग्रन्थमारभमाणस्य विघ्नबाहुल्यं सम्भाव्यते प्रसिद्धञ्च श्रेयांसि बहुविघ्नानीति । विज्ञायते ||| च तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विदुरिति येषां च यन्न प्रियं ते तद्विघ्नन्तीति प्रसिद्धं लोके । तत्कथमुल्लङ्घ्य शिष्टाचारमकृतमङ्गल एव ¶¶ विश्रब्धं भाष्यकारः प्रववृते ।

* उपपद्यते–इति २ पु· । † कप्रत्ययो नास्ति १ पु· । ‡ प्रदर्श्यते–इति २ पु· ।
§ अतः शब्दो नास्ति २ पु· । ‖ स्वशब्दो नास्ति २ पु· । स्वरूपमिति ३ पु· ।
¶ त्वप्रत्ययोनास्ति १ पु· । ** प्रशब्दो नास्ति २ पु· । †† सूचितमिति ३ पु· ।
‡‡ प्रवर्त्तन्ते शिष्टा इति १ पु· । §§ मोक्षरूपप्रयोजननिमित्तमित्यर्थः ।
||| तस्मादित्यादिश्रुतितोऽपि विशेषेण ज्ञायते न केवलं लोकत एव संभाव्यत इति भावः ।
¶¶ विश्रब्धमिति २ पु· ।

उच्यते । युष्मदस्मदित्यादि तद्धर्माणामपि सुतरामितरेतरभावानुपरित्यन्तमेव * भाष्यम् । अस्य चायमर्थः सर्वोपप्लवरहितो विज्ञानः प्रत्यगर्थ इति तत्कथञ्चन परमार्थत एवम्भूते वस्तुनि रूपान्तरवदवेो मिथ्येति कथयितुं तदन्यपरादेव भाष्यवाक्यान्निरस्तसमस्तोपप्लवं चैतन्यस्वभावमात्मानं प्रतिपद्यमानस्य कुतो विप्लोपप्लवसम्भवः । तस्मादयमीः प्राचारप्रतिपालने † भाष्यकारः ‡ ॥ विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभयोरितरेतरभावानुपपत्तौ सिद्धायामिति ।

कोऽयं विरोधः कीदृशो वा इतरेतरभावोऽभिप्रेतो यस्यानुपपत्तेस्तमःप्रकाशवदिति निदर्शनम् । यदि तावत् सहानवस्थानलक्षणो विरोधः ततः § प्रकाशभावे तमसो भावानुपपत्तिः । तदसत् । दृश्यते हि मन्दप्रदीपे वेश्मन्यस्पष्टं रूपदर्शनमितरत्र च स्पष्टम् । तेन ज्ञायते मन्दप्रदीपे वेश्मनि ॥ प्रकाशोऽपीषदनुवृत्तिरिति । तथा छायायामपि औष्ण्यं तारतम्येनोपलभ्यमानम् आतपस्यापि तत्रावस्थानं सूचयति । एतेन शीतोष्णयोरपि युगपदुपलब्धेः सहावस्थानमुक्तं वेदितव्यम् । उच्यते । परस्परानात्मतालक्षणो विरोधः । जातिव्यक्त्योरिव परमार्थतः परस्परसम्भेदः सम्भवतीत्यर्थः । तेन इतरेतरभावस्य इतरेतरसम्भेदात्मकत्वस्यानुपपत्तिः । कथम् । स्वतस्तावद्विषयिश्चिदेकरसत्वान्न युष्मदंशसम्भवः । अपरिणामित्वान्निरञ्जनत्वाच्च न परतः । विषयस्यापि न स्वतश्चित्सम्भवः समत्वाद् विषयत्वहानेः । न परतश्चितेरत्यसङ्क्रमत्वात् । तद्धर्माणामपि सुतरामिति । एवं स्थिते स्वाश्रयमतिरिच्य वर्तमाणामन्यत्र भावानुपपत्तिः सुप्रसिद्धा इति दर्शयति । इतिशब्दो हेत्वर्थः । यस्मादेवमुक्तेन न्यायेनेतरेतरभावासम्भवो ऽतो ऽस्मत्प्रत्ययगोचरे विषयिणि तदात्मके इत्यस्मत्प्रत्यये योऽनिदमंशश्चिदेकरसः तस्मिंस्तद्बलनिर्भासितया लक्षणतो युष्मदर्थस्य मनुष्याभिमानस्य सम्भेद इवावभासः स एवाध्यासः । तद्धर्माणाञ्चेति । यद्यपि विषयाध्यासे तद्धर्माणामप्यर्थसिद्धो ऽध्यास्तथापि विनापि विषयाध्यासेन तद्धर्माध्यासो बधिरादिषु श्रोत्रादिधर्मेषु

* मङ्गलवाक्यमितिशेषः मङ्गलत्वमेवोपपादयति अस्येत्यादिना ।
+ परिपालनइति २ पु० । ‡ भगवान्भाष्यकार इति ३ पु० कृतमस्ति ।
§ प्रकाशस्येति २ पु० । ॥ वेश्मनीति ३ पु० नास्ति ।

४ अध्यासाक्षेपनिरूपणम् । लोकव्यवहारस्य नैमित्तिकत्वेऽपि नैसर्गिकत्वयुक्तिः ।

विद्यते इति पृथग्धर्मग्रहणम् । तद्विपर्ययेण विषयिणस्तद्धर्माणाञ्चेति । चैतन्यस्य तद्धर्माणां चेत्यर्थः । ननु विषयिणश्चिदेकरसस्य कुतो धर्मा ये विषये ऽध्यस्येरन् । उच्यते । आनन्दो विषयानुभवो नित्यत्वमिति सन्ति धर्माः अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते इति न दोषः ।

अध्यासो नाम अतद्रूपे तद्रूपावभासः स मिथ्येति भवितुं युक्तमिति । मिथ्याशब्दो ह्यर्थो ऽपह्नववचनो ऽनिर्वचनीयतावचनश्च । अत्र* अयमपह्नववचनः मिथ्येति भवितुं युक्तम् अभाव एवाध्यासस्य युक्त इत्यर्थः । यद्यप्येवं तथापि नैसर्गिकः प्रत्यक्चैतन्यसत्तामात्रानुबन्धी अयम् युष्मदस्मदोरितरेतराध्यासात्मको ऽहमिदं ममेदमिति लोकव्यवहारः । तेन यथास्मदर्थस्य सद्भावो नोपालम्भमर्हति एवमध्यासस्यापि इत्यभिप्रायः † । लोक इति मनुष्यो ऽहमित्यभिमन्यमानः प्राणिनिकाय उच्यते । व्यवहरणं व्यवहारः लोक इति व्यवहारो लोकव्यवहारः मनुष्योऽहमित्यभिमान इत्यर्थः । सत्यानृते मिथुनीकृत्येति । सत्यमनिदं चैतन्यम् अनृतं युष्मदर्थः स्वरूपतोप्यध्यस्तस्वरूपत्वात् । अध्यस्य मिथुनीकृत्येति च क्त्वाप्रत्ययो न पूर्वकालत्वमन्यत्वं च लोकव्यवहारादङ्गीकृत्य प्रयुक्तः भुक्त्वा व्रजतीतिवत्क्रियान्तरानुपादानात् । अध्यस्य नैसर्गिकोऽयं लोकव्यवहार इति स्वरूपमात्रपर्यवसानात् । उपसंहारे चै‡वमनादिरनन्तो नैसर्गिको ऽध्यास इति तावन्मात्रोपसंहारात् । अतश्चैतन्यं पुरुषस्य स्वरूपमितिवद्व्यपदेशमात्रं द्रष्टव्यम् । मिथ्याज्ञाननिमित्त इति । मिथ्या च तदज्ञानं च मिथ्याज्ञानम् । मिथ्येति अनिर्वचनीयता उच्यते अज्ञानमिति च जडात्मिका ऽविद्याशक्तिः ज्ञानपर्युदासेनोच्यते । तन्निमित्तः तदुपादान इत्यर्थः ।

कथं पुन§ र्नैमित्तिकव्यवहारस्य नैसर्गिकत्वम् । अत्रोच्यते । अवश्यमेषा अविद्याशक्तिर्बाह्याध्यात्मिकेषु वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या अन्यथा मिथ्यार्थावभासानुपपत्तेः । सा च न जडेषु वस्तुषु तत्स्वरूपावभासं प्रतिबध्नाति प्रमाणवैकल्यादेव तदग्रहणसिद्धेः । रजतप्रति-

* अत्रेति पुस्तकान्तरे नास्ति । † इत्यभिप्राये लोक इतीति ३ पु० ।

‡ चैवमयमनादिरिति २ पु० ।

§ नैमित्तिकस्य लोकव्यवहारस्येति २, ३ पु० पाठः ।

भासात् प्रागूर्द्धं च सत्यामपि तस्यां स्वरूपग्रहणदर्शनात् । अतस्तच्च * रूपान्तरावभासहेतुरेव केवलम् । प्रत्यगात्मनि तु चितिस्वभावत्वात्स्वयम्प्रकाशमाने ब्रह्मस्वरूपानवभासस्य अनन्यनिमित्तत्वात् तद्गतनिसर्गसिद्धाऽविद्याशक्तिप्रतिबन्धादेव तस्य अनवभासः । अतः सा प्रत्यक्चिति ब्रह्मस्वरूपावभासं प्रतिबध्नाति अहङ्काराद्यतद्रूपप्रतिभासनिमित्तं च भवति सुषुप्त्यादौ चाहङ्कारादिविक्षेपसंस्कारमात्रशेषं स्थित्वा पुनरुद्भवतीति । अतो नैसर्गिकोऽप्यहङ्काराममकारात्मको मनुष्याद्यभिमानो लोकव्यवहारो मिथ्याज्ञाननिमित्त उच्यते न पुनरागन्तुकत्वेन । तेन † नैसर्गिकत्वं नैमित्तिकत्वेन न विरुध्यते ।

‡ अन्योन्यधर्मांश्चेति । पृथग्धर्मग्रहणं धर्ममात्रस्यापि कस्यचिदध्यास इति दर्शयितुम् । इतरेतराविवेकेनेति । एकतापत्त्यैवेत्यर्थः । कस्य धर्मिणः कथं कुत्र § चाध्यासो धर्ममात्रस्य वा क्वाध्यास इति भाष्यकारः स्वयमेव वक्ष्यति । अहमिदं ममेदमित्यध्यासस्य स्वरूपं दर्शयति । अहमिति तावत्प्रथमोऽध्यासः । ननु अहमिति निरंशं चैतन्यमात्रं प्रतिभासते नांशान्तरमध्यस्तमनध्यस्तं वा । यथा अध्यस्तांशान्तर्भावस्तथा दर्शयिष्यामः ।× ननु इदमित्यहङ्कर्त्तुर्भोगसाधनं ‖ कार्यकरणसङ्घातो ऽवभासते ममेदमिति चाहङ्कर्त्रा स्वत्वेन तस्य सम्बन्धः तच्च न किञ्चिदध्यस्तमिह दृश्यते । उच्यते । यदैवाहङ्कर्त्ता अध्यासात्मकस्तदैव तदुपकरणस्यापि तदात्मकत्वसिद्धिः । न हि स्वप्नावाप्तराज्याभिषेकस्य माहेन्द्रजालनिर्मितस्य वा राज्ञो राज्योपकरणं परमार्थसद्भवति । एवमहङ्कर्तृत्वप्रमुखः क्रियाकारकफलात्मको लोकव्यवहारो ऽध्यस्तो नित्यशुद्धबुद्धमुक्तस्वभावे आत्मनि अतस्तादृग्ब्रह्मात्मानुभवपर्यन्ताज्ज्ञानादनर्थहेतोरध्यासस्य निवृत्तिरुपपद्यते इति तदर्थविषयवेदान्तमीमांसारम्भ उपपद्यते ।

आह कोऽयमध्यासो नाम ¶ त्याद्यारभ्य अध्याससिद्धिपरं भाष्यम् । तत्रापि कथम्पुनरविद्यावद्विषयाणीत्यतः प्रागध्यासस्वरूपतत्सम्भावनाय

* स्वरूपेति पुस्तकान्तरे ।
† नैसर्गिकनैमित्तिकत्वे न विरुध्येते इति पुस्तकान्तरपाठः ।
‡ अन्योन्यं धर्मांश्चेतीति ३ पु० । § वाध्यास इति पु० ।
‖ कार्यकारणसंघातइति २ पु० । ¶ इत्याद्यध्यासेति पु० ।

६ अध्याससंभावनास्वतन्त्रोक्तियुक्तिः । अध्यासस्य स्मृतित्वाभावनिरूपणम् ।

तदादि * तत्सद्भावनिर्णयार्थमिति विभागः । यद्येवं † तत्स्वरूपतत्सम्भावनोपन्यासः पृथग्न कर्त्तव्यः । न हि अनिर्ज्ञातरूपमसम्भाव्यमानं च निर्णीयते चेति दुःसम्पादं विशेषतोऽध्यक्षानुभवनिर्णये । उच्यते । न देहे ‡ न्द्रियादिष्वहंममाभिमानवत एव प्रमातृत्वप्रदर्शनमात्रेण तस्य अध्यासात्मकता सिद्धयति । तत्कस्य हेतोः । लोके शुक्तिरजतद्विचन्द्रादिवदध्यासानुभवाभावात् । बाधे हि सति स भवति नेह स विद्यते । तस्मादध्यासस्य लक्षणमभिधाय तल्लक्षणव्याप्तस्य सद्भावः कथनीयः ।

नन्वेवमपि तल्लक्षणस्य वस्तुनः सद्भावमात्रमिह कथनीयम् । न हि यच्च यस्य सद्भावः प्रमाणतः प्रतिपन्नस्तत्रैव तस्य असम्भावनाशङ्का येन तद्विनिवृत्तये तत्सम्भावनाऽपरा कथ्येत । सत्यमेवम् । विषयविशेषस्तु प्रयत्नेन अन्विच्छद्भिरपि अनुपलभ्यमानकारणदोषे विज्ञाने ऽवभासमानोऽपि पूर्वप्रवृत्तेन सकललोकव्यापिना निश्चितेन प्रमाणेनासम्भाव्यमानतया अपोद्यमानो दृश्यते तद्यथौत्पातिकः सवितरि § शुषिर्यथा वा माद्देन्द्रजालकुशलेन प्रासादादेर्निगरणमेवमविषये ऽसङ्गे केनचिदपि गुणादिना अध्यासहेतुना रहिते निष्कलङ्कचैतन्यतया अन्यगतस्याप्यध्यासस्यापनोदनसमर्थेऽध्यासावगमेऽविभाव्यमानकारण ‖ दोषो विभ्रम इत्याशङ्क्येत तन्मा शङ्कीति सद्भावातिरेकेण सम्भवोऽपि पृथक् कथनीयः । तदुच्यते । आह कोऽयमध्यासो नामेति किं वृत्तस्य प्रश्ने ¶ आक्षेपे च प्रयोगदर्शनादुभयस्य चेह सम्भवात् तन्त्रेण वाक्यमुच्चरितम्** । तत्रापि †† प्रथमं प्रश्नस्य प्रतिवचनं स्वरूपमाख्याय पुन ‡‡ स्तस्यैव सम्भवमाक्षिप्य प्रतिविधत्ते । तत्रैवम्भूते विषये श्रोतॄणां सुखप्रबोधार्थं व्याचक्षाणाः प्रतिवादिनं तत्रस्थमिव समुत्थाप्य तेनाक्षिप्तमनेन पृष्टमिति मत्वा प्रत्युक्तम् पुनरसौ स्वाभिप्रायं विवृणोतीति आक्षेपमवतार्य प्रतिविधानं प्रतिपद्यन्ते । सर्वत्रैवंविधे ग्रन्थसन्निवेशे एष एव व्याख्याप्रकारः ।

स्मृतिरूपः परत्र पूर्वदृष्टावभास इति प्रश्नवाक्यस्थितमध्यासमुद्दिश्य लक्षणमभिधीयते । तत्र परत्रेत्युक्तेऽर्थात्परस्य अवभासमानता सिद्धा । तस्य विशेषणं स्मृतिरूपत्वम् । स्मर्यते इति स्मृतिः असञ्ज्ञायामप्यकर्त्तरि कारके

* तदादि सर्वं तदिति पुस्तकान्तरे । † तद्रूपेति पु· । ‡ न देहादिष्विति ३ पु· ।
§ सुषिरिति २ पु· । ‖ दोषोऽयीति पु· । ¶ प्रश्ने क्षेपे चेति पु· ।
** उच्चारितमिति १ पु· । †† प्रथममिति पुस्तकान्तरे नास्ति । ‡‡ तस्येहेति २ पु· ।

घटादीनां प्रयोगदर्शनात् । स्मर्यमाणरूपमिव रूपमस्य न पुनः स्मर्यत एव स्पष्टं पुरोऽवस्थितत्वावभासनात् * । पूर्वदृष्टावभास इत्युपपत्तिः स्मृतिरूपत्वे । न हि पूर्वम् † दृष्टरजतस्य ‡ शुक्तिसम्प्रयोगे रजतमवभासते । यतोऽर्थान्तद्विषयस्य अवभासस्यापि इदमेव § लक्षणमुक्तं भवति । कथम् । तदुच्यते । स्मृते रूपमिव रूपमस्य न पुनः स्मृतिरेव पूर्वप्रमाणविषयविशेषस्य तथानवभासकत्वात् । कथं पुनः स्मृतिरूपत्वम् । पूर्वप्रमाणद्वारसमुत्थत्वात् । न हि असम्प्रयुक्तावभासिनः पूर्वप्रवृत्ततद्विषयप्रमाणद्वारसमुत्थत्वमन्तरेण समुद्भवः सम्भवति ।

अपर आह ननु अन्यसम्प्रयुक्ते चक्षुषि अन्यविषयज्ञानं ‖ स्मृतिरेव । प्रमोषस्तु स्मरणाभिमानस्येन्द्रियादीनां ज्ञानकारणानां केनचिदेव ¶ दोषविशेषेण कस्यचिदेवार्थविशेषस्य स्मृतिसमुद्बोधः क्रियते सम्प्रयुक्तस्य च दोषेण विशेषप्रतिभासहेतुत्वं करणस्य विहन्यते । तेन दर्शनस्मरणयोर्निरन्तरोत्पन्नयोः ** करणदोषादेव विवेकानवधारणाद् दूरस्थयोरिव वनस्पत्योरनुत्पन्नएवैक †† त्वावभास उत्पन्नभ्रमः । ननु अनास्वादिततिक्तरसस्यापि बालकस्य ‡‡ पित्तदोषान्मधुरे तिक्तावभासः कथं स्मरणं स्यात् । उच्यते । जन्मान्तरानुभूतत्वात् । अन्यथाऽननुभूतत्वाविशेषेऽत्यन्तमसन्नेव कश्चित्सप्रमो रसः किमिति नावभासेत । तस्मात्पित्तमेव मधुरायग्रहणे तिक्तस्मृतौ तत्प्रमोषे च हेतुः । कार्यगम्यत्वाद्धेतुभावस्य । एतेन अन्यसम्प्रयोगेऽन्य §§ विषयस्य ज्ञानस्य स्मृतित्वतत्प्रमोषौ सर्वत्र व्याख्यातौ द्रष्टव्यौ ।

उच्यते । कोऽयं स्मरणाभिमानो नाम । न तावत् ज्ञानानुविद्धतया ग्रहणम् । न ह्यतिवृत्तस्य ज्ञानस्य ग्राह्यविशेषणतया विषयभावः । तस्माच्छुद्धमेवार्थं स्मृतिरवभासयति न ज्ञानानुविद्धम् । तथा च पदात्पदार्थस्मृतौ न दृष्टो ज्ञानसम्भेदः ज्ञानस्यापि शब्दार्थत्वप्रसङ्गात् । तथेष्टभूभागविषया स्मृतिः स सेव्य इति ‖‖ ग्राह्यमात्रावस्था न ज्ञानपरामर्शिनी । अपि च । भूयस्यो

* अत्रभासादिति २ पु· । † पुंस इति शेषः । ‡ शुक्तिकेति पु· ।
§ लक्षणमित्युक्तमिति २ पु· । ‖ अन्यविषयं विज्ञानमिति २ पु· ।
¶ एवमिति २ पु· । ** कारणेति २ पु· । †† अनुत्पन्ने एकैकत्वावभास इति ३ पु· ।
‡‡ कप्रत्ययो नास्ति २ पु· । §§ अन्यविषयज्ञानस्य स्मृतितत्प्रमोषाविति १, ३ पु· ।
‖‖ ग्राह्यमात्रावस्थां न ज्ञानपरामर्शनी इति क्वचित् ।

मुकुलीभावदर्शनात्तथेहापि स्यात् । न । तथा सति तद्वदेव पूर्वावस्थापरिणाम-बुद्धिः स्यात् न बाधप्रतीतिः स्यात् * । अथ पुनर्दुष्टकारणजन्यायाः प्रतीतेरेव रजतोत्पाद इति मन्येत । एतदपि † न सम्यगिव । कथम् । यस्याः प्रतीतेस्त-दुत्पादस्तस्यास्तावन्न तदालम्बनं पूर्वोत्तरभावेन भिन्नकालत्वात् । न प्रतीत्य-न्तरस्य पुरुषान्तरप्रतीतेरपि तत्प्रसङ्गात् । ननु किमिति पुरुषान्तरप्रतीतेरपि तत्प्रसङ्गो ‡ दुष्टसामग्रीजन्मनो हि प्रतीतेस्तदालम्बनम् । मैवम् । प्रतीत्यन्त-रस्यापि तद्विधस्य रजतान्तरोत्पादनेनैव उपयुक्तत्वात् प्रथमप्रत्ययवत् । अतो ऽनुत्पन्नसममेव स्यात् । तद्वेवं पारिशेष्यात्स्मृतिप्रमोष एवावतिष्ठत § ।

ननु स्मृतेः प्रमोषो न सम्भवति इत्युक्तम् । तथा च तन्त्रान्तरीया आहुः ‖ अनुभूतविषयाऽसम्प्रमोषा स्मृतिरिति । का तर्हि ¶ गतिः शुक्ति-सम्प्रयोगे रजतावभासस्य । उच्यते । नेन्द्रियजज्ञानात्संस्कारजं स्मरणं पृथ-गेव स्मरणाभिमानशून्यं समुत्पन्नं किन्तु एकमेव संस्कारसहितादिन्द्रियात् । कथमेतत् । उच्यते । कारणदोषः कार्यविशेषे तस्य शक्तिं निरुन्धन्नेव संस्कार-विशेषमप्युद्बोधयति । कार्यगम्यत्वात्कारणदोषशक्तेः । अतः संस्कारदुष्टकारण-संवलितैका सामग्री । सा चैकमेव ज्ञानमेकफलं जनयति । तस्य च दोषो-त्थापितसंस्कारविशेषसहितसामग्रीसमुत्पन्नज्ञानस्योचितमेव शुक्तिगतमिथ्या-रजतमालम्बनमवभासते । तेन मिथ्यालम्बनं ज्ञानं मिथ्याज्ञानं न स्वतो ज्ञानस्य मिथ्यात्वमस्ति बाधाभावात् । भिन्नजातीयज्ञानहेतुसामग्र्योः ** कथ-मेकज्ञानोत्पादनमिति चेन्नैष दोषः । दृश्यते हि लिङ्गज्ञा †† नसंस्कारयोः सम्भूय लिङ्गिज्ञानोत्पादनं प्रत्यभिज्ञानोत्पादनञ्च अत्रसंस्कारयोरुभय-त्रापि स्मृतिगर्भमेकमेव प्रमाणज्ञानम् । संस्कारानुद्बोधे तदभावात् । तस्मा-ल्लिङ्गदर्शनमेव सम्बन्धज्ञानसंस्कारमुद्बोध्य तत्सहितं लिङ्गिज्ञानं जनयतीति

* स्यादिति नास्ति २, ३ पु· । † तदपीति २ पु· ।

‡ नदिति नास्ति २ पु· । § अवतिष्ठते-इति २, ३ पु· ।

‖ अनुभूतविषयासम्प्रमोषः स्मृतिरिति पातञ्जलसूत्रपाठः, एवमनुभूतौ या विषयौ वृत्ति-तदारूढार्थौ तयोरसम्प्रमोषो ऽस्तेयमनपहरणं धर्मधर्म्यभेदात्तद्वती तदुभयविषयिणीति यावदिति तद्वार्त्तिकञ्च । परन्तु त्रिष्वपि एतत्पुस्तकेषु अनुभूतविषयासम्प्रमोषा-इति पाठस्तत्रानुभूतवि-षययोरसम्प्रमोषो यस्यामिति बहुव्रीहिविशेषणं द्रष्टव्यम् ।

¶ तर्हिस्थाने पुनरिति २ पु· । ** सामग्र्याः कथमेकज्ञानोत्पादकत्वमिति २ पु· ।

†† ज्ञानेति २ पु· नास्ति ।

R66.5x1,1,1
A691 M91

वक्तव्यम् । अयमेव च न्यायः प्रत्यभिज्ञाने * ऽपि । न पुनर्ज्ञानद्वये प्रमाणमस्ति । तथा भिन्नजातीयज्ञानहेतुभ्यो नीलादिभ्य एकं चित्रज्ञानं निदर्शनीयम् । तच्च लैङ्गिकज्ञानप्रत्यभिज्ञाचित्रज्ञानानामदुष्टकारणारब्धत्वाद् यथार्थमेवावभासः इह तु कारणदोषादतथाभूतार्थावभास इति विशेषः । एवञ्च सति नानुभवविरोधः प्रतिभासमानस्य रजतस्यैवावलम्बनत्वात् । अतो मायामयं रजतम् । अथ पुनः पारमार्थिकं स्यात् सर्वैरेव † गृह्येत । यतो न हि पारमार्थिकं रजतं कारणदोषं स्वज्ञानोत्पत्तावपेक्षते । यद्यपेक्षेत तदा ‡ तदभावे न तच्च ज्ञानोत्पत्तिरालोकाभाव इव रूपे । मायामात्वे तु मन्त्राद्युपहतचक्षुष इव दोषोपहृ § तज्ज्ञानकारणा एव पश्यन्तीति युक्तम् । किञ्च । नेदं रजतमिति बाधो ऽपि मायामयत्वमेव सूचयति । कथम् । तेन हि तस्य निरुपाख्यतापादनपूर्वकं मिथ्यात्वं ज्ञाप्यते । नेदं रजतं मिथ्यैवाभासिष्टेति । नच तत् केनचिदूपेण रूपवत्त्वे ऽवकल्पते सम्प्रयुक्तशुक्तिवन्नि ‖ रस्यमानविषयज्ञानवच्च । ननु न व्यापकमिदं लक्षणम् स्वप्नशोकादावसम्भवात् । न हि स्वप्नशोकादौ केनचित्सम्प्रयोगो ऽस्ति येन परत्र परावभासः स्यात् । अत एव वासनातिरिक्तकारणाभावात् स्मृतिरेव न स्मृतिरूपता । अत्रोच्यते । न तावत् स्मृतित्वमस्त्यऽपरोक्षा ¶ र्थावभासनात् । ननु स्मृतिरूपत्वमपि नास्ति पूर्वप्रमाणसंस्कारमात्रजन्यत्वात् । अत्रोच्यते । उक्तमेतत्पूर्वप्रमाणविषयावभासित्वमात्रं स्मृतेः स्वरूपमिति । तदिह निद्रादिदोषोपप्लुतं मनो ऽदृष्टादिसमुद्बोधितसंस्कारविशेष ** सहकार्यनुरूपं मिथ्यार्थविषयं ज्ञानमुत्पादयति तस्य च तदवच्छिन्नापरोक्षचैतन्यस्याविद्याशक्तिरालम्बनतया विवर्तते । नन्वेवं सत्यऽन्तरेव स्वप्नार्थप्रतिभासः स्यात् । को वा ब्रूते नान्तरिति । ननु विच्छिन्नदेशो ऽनुभूयते स्वप्नेपि जागरणइव न तदन्तर †† नुभवाश्रयत्वे स्वप्नार्थस्योपपद्यते । ननु देशो ऽपि तादृश एव कुतस्तत्सम्बन्धाद्विच्छेदो ऽवभासते अयमपि तर्ह्यपरो दोषः । नैष ‡‡ दोषो जागरणे ऽपि प्रमाणज्ञानादन्तरपरोक्षानु-

* प्रत्यभिज्ञाज्ञानेऽपीति २ पु० ।
† तच्छब्दोऽत्राधिकः २ पु० ।
‡ तदा शब्दो नास्ति २ पु० ।
§ दोषोपहृतेति २ पु० ।
‖ निरस्यमानविषयकेति १ पु० ।
¶ ०र्थप्रतिभासनादिति २ पु० ।
** सहकार्यानुरूपमिति २ पु० ।
†† अनुभावाश्रयत्वे-इति १ पु० ।
‡‡ न दोष इति २ पु० ।

भवान्न विषयस्था ऽपरोक्षता भिद्यते। एकरूपप्रकाशनात्। अतो ऽन्तरपरोक्षानुभवावगुण्ठित एव जागरणे ऽप्यर्थो ऽनुभूयते ऽन्यथा जड़स्य प्रकाशानुपपत्तेः। यथा तमसा ऽवगुण्ठितो घटः प्रदीपप्रभावगुण्ठनमन्तरेण न प्रकाशीभवत्येवम्। यः पुनर्विच्छेदावभासः स जागरे ऽपि मायाविजृम्भितः सर्वस्य प्रपञ्चजातस्य चैतन्यैकाश्रयत्वात्तस्य च निरंशस्य प्रदेशभेदाभावात्। प्रपञ्चभेदेनैव हि तत्कल्पितावच्छेदं सदवच्छिन्नमिव बहिरिवान्तरिव * प्रकाशते। अथवा दिगाकाशौ मनोमात्रगोचरौ सर्वत्राध्यासाधारौ विद्येते इति न परत्रेति विरुध्यते। कथं तर्हि नामादिषु ब्रह्माध्यासः। किमत्र कथम्। न तत्र कारणदोषो नापि मिथ्यार्थावभासः। सत्यम्। अत एव चोदनावशादिच्छातो ऽनुष्ठेयत्वान्मानसी क्रियैषा न ज्ञानम्। ज्ञानस्य हि† दुष्टकारणजन्यस्य विषयो मिथ्यार्थः। न हि ज्ञानमिच्छातो जनयितुं निवर्तयितुं वा ‡ शक्यं § कारणैकायत्तत्वादिच्छानुप्रवेशानुपपत्तेः। ननु स्मृतिज्ञानमाभोगेन जन्यमानं मनोनिरोधेन च निरुध्यमानं दृश्यते। सत्यम्। न स्मृत्युत्पत्तिनिरोधयोस्तयोर्व्यापारः किन्तु कारणव्यापारे तत्प्रतिबन्धे च चक्षुष इवो॥न्मीलननिमीलने न पुनर्ज्ञानोत्पत्तौ व्यापार इच्छायाः। तस्माद् ब्रह्मदृष्टिः केवला ऽध्यस्यते चोदनावशात्फलायैव मातृबुद्धिरिव रागनिवृत्तये ¶ परयोषिति। तदेवमनवद्यमध्यासस्य लक्षणं स्मृतिरूपः परत्र पूर्वदृष्टावभास इति॥

तं केचिदित्यादिनाऽध्यासस्वरूपे मतान्तरमुपन्यस्यति स्वमतपरिशुद्धये। कथमन्यत्र शुक्तिका ** दावन्यधर्मस्यार्थान्तरस्य रजतादेर्ज्ञानाकारस्य बहिष्ठस्यैव वा ऽध्यास इति वदन्ति। के चित्तु यत्र यदध्यासस्तद्विवेकाग्रहणनिबन्धनो भ्रम इति। यत्र यस्याध्यासस्तयोर्विवेकस्याग्रहणात्तन्निबन्धनो ऽयमेकत्वभ्रम इति वदन्तीत्यनुषङ्गः। अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते इति। यत्र शुक्तिकादौ यस्य रजतादेरध्यासस्तस्यैव शुक्तिशकलादेर्विपरीतधर्मत्वस्य रजतादिरूपत्वस्य कल्पनामविद्यमानस्यैवावभासमानतामाचक्षते सर्वथापि त्विति स्वमतानुसारित्वं

* अन्तरिव चेति २ पु.। † हि शब्दो नास्ति २ पु.। ‡ वा स्थाने च शब्दः २ पु.।
§ स्वकारणेति २ पु.। ‖ उन्मीलने निमीलने इति २ पु.।
¶ रागविनिवृत्तये इति पाठान्तरम्। ** शुक्तिशकलादाविति ३ पु.।

सर्वेषां कल्पनाप्रकाराणां दर्शयति अन्यस्यान्यधर्मावभासित्वं नाम लक्षणम् परचेत्युक्ते ऽर्थात्परावभासः सिद्ध इति यदवादिष्म तन्न व्यभिचरति । कथम् । पूर्वस्मिन् कल्पे ज्ञानाकारस्य बहिस्थस्य वा शुक्तिधर्मत्वा * वभासनान्न व्यभिचारः । द्वितीये ऽपि शुक्तिरजतयोः पृथक् सतोरपृथगवभासो † ऽभिमानात् । तृतीये ऽपि शुक्तिशकलस्य रजतरूपप्रतिभासनात् पूर्वदृष्टत्वस्मृतिरूपत्वयोः सर्वत्राव्यभिचाराच्च ‡ विवाद इत्यभिप्रायः । तच्च स्मृतिरूपः पूर्वदृष्टावभास इत्येतावति लक्षणे निरधिष्ठानाध्यासवादिपक्षे ऽपि निरुपपत्तिके § लक्षणव्याप्तिः स्यादिति तन्निवृत्तये परचेत्युच्यते । कथं निरुपपत्तिको ऽयं पक्षः । न हि निरधिष्ठानो ऽध्यासो दृष्टपूर्वः संभवी वा ‖ । ननु केशोण्डुकाद्यवभासो निरधिष्ठानो दृष्टः । न । तस्यापि तेजोवयवाधिष्ठानत्वात् ।

ननु रजते संवित् संविदि रजतमिति परस्पराधिष्ठानो भविष्यति बीजाङ्कुरादिवत् । नैतत्सारम् । न तत्र यतो बीजाद्यो ऽङ्कुरस्तत एव तद्बीजमपि त्वङ्कुरान्तरात् इह पुनर्यस्यां संविदि यद्रजतमवभासते तयोरेवेतरेतराध्यासस्ततो दुर्घटमेतत् । बीजाङ्कुरादिष्वपि न बीजाङ्कुरान्तरपरम्परामात्रेणाऽभिमतवस्तुसिद्धिः प्रतीतितो वस्तुतश्चानिवृत्ताकाङ्क्षत्वात् तथा च कुत इदमेवमिति पर्यनुयोगे दृष्टत्वादेवमिति ¶ तत्र च दूरं वा परिधाव्य ** स्यातव्यमन्यथा हेतुपरम्परामेवावलम्ब्य क्व चिदप्यनवतिष्ठमानो नानवस्थादोषमतिवर्तेत †† । अपि च । न क्व चिन्निरवधिको नेत्येव बाधावगमो दृष्टः यत्राप्यनुमानादाप्तवचनाद्वा न सर्प इत्येवावगमस्तत्रापि किं पुनरिदमित्यपेक्षादर्शनात्पुरो ऽवस्थितं वस्तुमात्रमवधिर्विद्यते प्रधानादिष्वपि जगत्कारणे त्रिगुणत्वादिबाधो ऽधिगता ‡‡ वधिरेव । अथवा सर्वलोकसाक्षिकमेतत् §§ केशोण्डुकादावपि तद्बाधे तदनुषङ्ग एव बोधे बाध्यते न बोधः । अतस्तदवधिः सर्वस्य बाधस्तेन तन्मात्रस्य बाधाभावात्स्वतश्च विशेषानुपलब्धेः कूटस्थापरोक्षैकरसचैतन्यावधिः सर्वस्य बाधः । नाप्यध्यस्तमप्यसदेव । तथात्वे प्रतिभासायोगात् ।

* बहिस्थस्येवाशुक्तिकाधर्मत्वेति २ पु· । † अवभासाभिमानादिति २ पु· ।
‡ अव्यभिचारे नेति २ पु· । § निरुपपत्तिका लक्षणव्याप्तिरिति २ पु· ।
‖ सम्भवी वेति २ पु· नास्ति । ¶ तत्रैवेति २ पु· । ** अवस्थातव्यमिति २ पु· ।
†† अतिवर्त्तते इति २, ३ पु· । ‡‡ अवगतावधिरेवेति २ पु· ।
§§ केशोण्डुकादाविति २ पु· ।

ननु सर्वमेवेदमसदिति भवतो मतम् । क एवमाह अनिर्वचनीयानाद्यविद्यात्मकमित्युद्घोषितमस्माभिः । अथ पुनर्विद्योदये ऽविद्याया निरूपाख्यतामङ्गीकृत्यासत्त्वमुच्येत काममभिधीयताम् । तथाच बाधकज्ञानं नेदं रजतमिति वि * शिष्टदेशकालसम्बद्धं रजतं † विलोपयदेवोदेति न देशान्तरसम्बन्धमापादयति तथानवगमात् । तथाच दूरवर्त्तिनीं ‡ रज्जुं सर्पं मन्यमानस्तन्निकटवर्त्तिना ऽऽप्तेन नायं सर्प इत्युक्ते सर्पाभावमात्रं प्रतिपद्यते न तस्य देशान्तरवर्तित्वम् । तत्प्रतिपत्तावसामर्थ्याद्वाक्यस्य । नार्थापत्त्या । इह भग्नघटाभाववत्तावन्मात्रेणापि § तत्सिद्धेः । यचापि सर्पबाधपूर्वको रज्जुविधिरज्ञजन्यस्तादृशवाक्यजन्यो वा तचापि स एव न्यायस्तथा ऽनवगमात्तदेवं न क्व चिन्निरधिष्ठानो ऽध्यासस्तस्मात्साधूक्तं परचेति ।

यद्येवं परच पूर्वदृष्टावभास इत्येतावदस्तु लक्षणं तथाविधस्य स्मृतिरूपत्वाव्यभिचारात् । सत्यमर्थलभ्यस्य स्मृतित्वमेव स्यान्न स्मृतिरूपत्वम् । नच स्मृतिविषयस्याध्यासत्वमित्युक्तम् । यद्येवमेतावदस्तु लक्षणं परच स्मृतिरूपावभास इति । तच परचेत्युक्ते ऽर्थलभ्यस्य परावभासस्य स्मृतिरूपत्वं विशेषणम् । न हि परस्यासंयुक्तस्य पूर्वदृष्टत्वाभावे स्मृतिरूपत्वसम्भवः । ॥ सत्यम् । विस्पष्टार्थं पूर्वदृष्टग्रहणमिति यथान्यासमेव लक्षणमस्तु । तथा च लोके ऽनुभवइत्युदाहरणद्वयेन ¶ लौकिकसिद्धमेवेदमध्यासस्य स्वरूपं लक्षितं किमत्र युक्त्येति कथयति शुक्तिका हि रजतवदवभासत इति ।

ननु न शुक्तिका प्रतिभासते रजतमेव प्रतिभासते तेन ** शुक्तिकेति रजतवदिति चोभयं नोपपद्यते । उच्यते । शुक्तिकायग्रहणमुपरितनसम्यक्ज्ञानसिद्धं परमार्थतः शुक्तिकात्वमपेक्ष्य, वतियग्रहणं तु संप्रयुक्तस्यारजत †† स्वरूपस्य मिथ्यारजतसम्भेद इवाव ‡‡ भासनमङ्गीकृत्य,मिथ्यात्वमपि रजतस्यागन्तुकदोषनिमित्तत्वादनन्तरबाधदर्शनाच्च कथ्यते न पुनः परमार्थाभिमतादृजतादन्यत्वमाश्रित्य, तचासंप्रयुक्तत्वाद्रजतस्य नेदन्तावभासस्तद्गतः किन्तु

* विशिष्टदेशसम्बन्धमिति २ पु· । † विलापयदिति २ पु· ।
‡ दूरवर्त्तिनो रज्जुमिति २ पु· । § तन्मात्रेणापि तत्सिद्धिरिति २ ३ पु· ।
॥ सत्यमेवेति ३ पु· । ¶ लौकिकसिद्धमिति १ पु· ।
** शुक्तिको रजतवदितीति–इति २ पु· । †† स्वशब्दो नास्ति २ पु·
‡‡ अवभासमिति २ पु· ।

संप्रयुक्तगत एवापरोक्षावभासस्तु संस्कारजन्मनोपि रजतोल्लेखस्य दोषबलादिन्द्रियजज्ञानान्तर्भावाच्चेति द्रष्टव्यम् । तच्च शुक्तिकोदाहरणेन संप्रयुक्तस्यानात्मा रजतमिति * दर्शितम् । निरञ्जनस्य चैतन्यस्यास्मदर्थे ऽनिदमंशस्यानात्मा तदवभास्यत्वेन युष्मदर्थल † क्षणापन्नो ऽहंकारो ऽध्यस्त इति ‡ प्रदर्शनार्थम् । द्विचन्द्रोदाहरणेन जीवेश्वरयोर्जीवानां चानात्मरूपो भेदावभास इति दर्शितम् ।

ननु बहिरर्थे कारणदोषो ऽर्थगतः सादृश्यादिरिन्द्रियगतश्च तिमिरादिरुपलभ्यते तन्निमित्तश्चार्थस्य सांशत्वादंशान्तरावग्रहे ऽप्यंशान्तरप्रतिबन्धो युज्येत § न त्विह कारणान्तरायत्ता सिद्धिर्येन तद्दोषादनवभासो ऽपि स्यान्निरंशस्य चैतन्यस्य ‖ स्वयंज्योतिषस्तदयोगात् । ननु ब्रह्मस्वरूपमनवभासमानमस्त्येव न तदनवभासनाज्जीवेऽनवभासविपर्यासो भवतः । न हि शुक्तेरग्रहणात्स्थाणाव ¶ ऽग्रहणं विपर्यासो वा । ननु न ब्रह्मणोन्यो जीवो ऽनेन जीवेनात्मनेतिश्रुतेरतस्तदग्रहणमात्मन एव ** तत् । एवं तर्हि सुतरामविद्यायास्तच्चासम्भवस्तस्य विद्यात्मकत्वात्तस्य भासा सर्वमिदं भातीति †† तच्चैतन्यनैव सर्वस्य भासमानत्वात् ‡‡ । उच्यते । विद्यत एवाचाप्यग्रहणाविद्यात्मको दोषः प्रकाशस्याच्छादकः । कथं गम्यते । श्रुतेस्तदर्थापत्तेश्च । श्रुतिस्तावदनृतेन हि प्रत्यूढा अनीशया शोचति मुह्यमान इत्येवमाद्या । तदर्थापत्तिरपि विद्यैव सर्वत्र श्रुतिषु ब्रह्मविषया मोक्षाय निवेद्यते । तेनार्थादिदमवगम्यते जीवस्य ब्रह्म §§ स्वरूपता ||| नवगमो ऽविद्यात्मको बन्धो निसर्गत एवास्तीति ।

ननु न जीवो ब्रह्मणो ऽन्य इत्युक्तम् । बाढम् । अत एवाऽर्थाज्जीवे ब्रह्मस्वरूपप्रकाशाच्छादिका ऽविद्या कल्प्यते ऽन्यथापरमार्थतस्तत्स्वरूपत्वे तदवबोधेपि यदि नित्यसिद्धः स्यात्तदा तादात्म्योपदेशो व्यर्थः स्यात् अतो

* निदर्शितमिति २ पु० । † लक्षणोपपच इति २ पु० ।
‡ प्रशब्दो नास्ति २ पु० । § युज्यते इति १ पु० उपकल्पितमास्ते ।
‖ चैतन्यस्येति २ पु० नास्ति । ¶ स्थाणवग्रहणमिति क्वचित् ।
** तदिति २ पुस्तके लिखितमपि क्लिष्टम् । †† विभातीति २ पु० ।
‡‡ भास्यमानत्वादिति २ पु० । §§ स्वेति २ पु० नास्ति ।
||| अनवगमाविद्यात्मक इति २ पु० ।

ऽनादिसिद्धाविद्यावच्छिन्नानन्तजीवनिर्भासास्पदमेकरसं ब्रह्मेति श्रुतिस्मृति *-न्यायकोविदैरभ्युपगन्तव्यम् । तथा च स्मृतिः । प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपीति † क्षेत्रक्षेत्रज्ञत्वनि ‡ मितामनादिसिद्धामविद्यां प्रकृतिशब्देनाह मायां तु प्रकृतिं विद्यादिति श्रुतेरतो मायावच्छिन्न § रूपत्वादनन्यदपि ब्रह्मरूपमात्मनो न वेत्ति । तथा चोक्तम् । अनादिमायया सुप्तो यदा जीवः प्रबुद्धते । अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदेति ।

ननु प्रमाणान्तरविरोधे ‖ सति श्रुतिस्तदर्थापत्तिर्वा नाविद्यां निवेदयितुमलम् । किं तत्प्रमाणं येन सह विरोधः । निरंशस्य स्वयंज्योतिषः स्वरूपानवभासानुपपत्तिः । ननु भोक्तुः कार्यकारणसंघाताद्व्यावृत्तता स्वयंज्योतिषो ऽपि न प्रकाशते । ननु न भोक्ता स्वयंज्योतिः किं त्वहंप्रत्ययेनावभास्यते । यथा स्वयंप्रकाशमानता ऽहङ्कारो न प्रत्ययस्तथा वक्ष्यते ।

कथं पुनर्भोक्ता स्वयंज्योतिः कार्यकारणसंघाताद्व्यावृत्तो न प्रकाशते मनुष्योहमितिमिथ्यैवैकताभिमानात् । ननु गौणो ऽयं न मिथ्या । यथा न गौणस्तथा भाष्यकार ¶ एव वक्ष्यति ** ।

नन्वहमिति यदि देहसमानाधिकरणः प्रत्ययो न तर्हि तद्व्यतिरिक्त आत्मा सिध्यति अन्यस्य तथाग्राहिणः प्रत्ययस्याभावादागमानुमानयोरपि तद्विरोधे प्रमाणत्वायोगात् । मिथ्यात्वात्तस्य न विरोध इति चेत् कुतस्तर्हि मिथ्यात्वम् आगमादनुमानाद्वा । अन्यथावगमादिति चेत् । मैवम् । अन्योन्याश्रयता तथा स्यात् आगमानुमानयोः प्रवृत्तौ तन्मिथ्यात्वं तन्मिथ्यात्वे तयोः प्रवृत्तिरिति । तस्माद्देहादिव्यतिरिक्तविषय एवायमहङ्कार इत्यात्मवादिभिरभ्युपेयम् । अन्यथा ऽऽत्मसिद्धिर †† प्रामाणिकी स्यादतो गौणो मनुष्यत्वाभिमानः । उच्यते । यद्यपि देहादिव्यतिरिक्तभोक्तृविषय एवायमहङ्कारस्तथापि तथा ऽनध्यवसायात्तद्धर्मानात्मन्यध्यस्यति दृश्यते च स्वरूपेणावभास्यमाने ऽपि वस्त्वन्तरभेदानध्यवसायात्तत्सम्भेदेनावभासः । यथैकस्मिन्नप्यकारे ह्रस्वादिसम्भेदः ।

* तच्चायेति २ पु· । † क्षेत्रेति २ पु· नास्ति । ‡ निमित्तामित्यन्यत्र १ पाठः ।
§ स्वशब्दो ऽधिकः २ पु· । ‖ प्रमाणविरोधे श्रुतीति २, ३ पु· । ¶ भाष्यएवेति २, ३ पु· ।
** वक्ष्यतेति २,३ पु· । †† अप्रमाणिकीति १, २ च पु· ।

अथ पुनरेकान्ततो भिन्न एव देहादेरहङ्कर्ता ऽवभासेत * रसादिव गन्यः । ततस्तत्सद्भावे न विप्रतिपत्तिरिति तत्सिद्धये जिज्ञासा नावकल्पेत † जिज्ञासोत्तरकालं तर्हि गौण एव युक्तः । कथम् । जिज्ञासा नाम युक्त्यनुसन्धानम् । न हि युक्तिः पृथग् ज्ञानान्तरजननी किन्तु सिद्धस्यैवाहंप्रत्ययस्य विषयविवेचिनी ‡ । तस्माद्विविक्तविषयत्वाद्व्यतिरिक्तात्मानुभवपर्यन्त एवाहंकारो जिज्ञासोत्तरकालं युक्तः । न युक्तः अकारइव ह्रस्वत्वाभिमानः । ननु तत्रापि कथम् । अनुभव एव । एव § महङ्कारेऽपि समानश्चर्चः । नन्वनुभवस्तर्कबलाद्यथावभासिन्यकारे सम्भवति ह्रस्वादेः पृथक्सतस्तथानवगमात् । तन्न । एकस्य पृथक्के ऽप्यर्थादितरस्यापि पृथक्कात् ।

ननु महदेतदिन्द्रजालं यत्तर्कानुगृहीतात्प्रमाणाद्यथायथमसाधारणरूपयोरेवावभासमानयोरेकत्वावगमो न गौण इति । बाढम् । इन्द्रजालमेवैतदविद्याकृतत्वात्तथाह्यहंप्रत्ययस्य स्वविषयप्रतिष्ठितस्यैव सतस्तदेकप्रतिष्ठिताप्रतिबन्धकृदनाद्यविद्याकृतं देहादिप्रतिष्ठितत्वमपि दृष्टम् । अतो देहादिविषयत्वाविरोधि स्वविषयप्रतिष्ठत्वमहंप्रत्ययस्याऽतो युक्त्या विषयविवेचने ऽपि स्वविषयोपदर्शनेन तत्प्रतिष्ठत्वमात्रं कृतं नाधिकमादर्शितम् । स्वविषयप्रतिष्ठत्वं च देहादिष्वहं ‖ ममाभिमानेन न विरुध्यत इत्युक्तमतो न्यायतो विषयविवेचनादूर्ध्वमपि न प्रागवस्थातो विशिष्यते ऽहंप्रत्ययस्तेन न कदाचिदपि मनुष्यो ऽहमिति प्रत्ययो गौणः । ¶ तदेवं स्वयंज्योतिष एव सतो जीवस्य कार्य ** करणसङ्घातव्यतिरिक्ततायास्तथा †† ऽनवभासदर्शनान्मनुष्योहमिति चाध्यासोपलब्धे ‡‡ ब्रह्मात्मैकत्वस्यापि तत्स्वरूपस्यानवभासनं पूर्वकालकोटिरहितप्रकाशाच्छादितमोनिमित्तं श्रुतितदर्थापत्तिसमर्पितं तन्निमित्ता §§ हंकाराध्यासश्च सम्भाव्यते ऽनादित्वाच्च ||| पूर्वदृष्टत्वं स्मृतिरूपत्वं च पृथग्भोक्तृविषयानुभवफलाभावाद्भोक्तृचैतन्यसंवलितैकानुभवफलत्वाच्च परच परावभास-

* अवभासते–इति २ पु· । † अवकल्प्यते–इति २ पु· । ‡ विवेचनीति २ पु· ।
§ अहंकारो ऽपि समानचर्च इति १ पु· । ‖ अहंमानेनेति २ पु· ।
¶ यदेवमिति २ पु· । ** कारणव्यतिरिक्ततायाः इति २पु· ।
†† अनवभासनादित्युपकल्पितं १ पु· । ‡‡ एवं ब्रह्मेति १ पु· ब्रह्मात्मकत्वस्येति २ पु· ।
§§ अहंकाराद्यध्यासश्चेति २ पु· ।
||| सदापूर्वदृष्टत्वमिति २ पु· १ पुस्तके तु सदाशब्दः सत्रपि चिह्नेोऽस्ति ।

स्याऽन्योन्यसम्भेदस्य विद्यमानत्वादध्यासलक्षणव्याप्तिरिहाप्युपपद्यते । को-ऽयमध्यासो नामेति । किं वृत्तस्य प्रश्नेऽक्षेपे च समानवर्त्तनो विशेषानुप-लब्धेः पृष्टमनेनेति मत्वा ऽध्यासस्वरूपे ऽभिहिते पुनराक्षिप्तं मयेत्यभिप्रायं विवृणोति कथं पुनः प्रत्यगात्मन्यविषये ऽध्यासो विषय * तद्धर्माणामिति । बाढमेवंलक्षणो ऽध्यासः स चेह न सम्भवति । कथम् । यतः सर्वो हि पुरो ऽवस्थिते विषये विषयान्तरमध्यस्यति युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनो ऽविषयत्वं ब्रवीषि नह्यविषये ऽध्यासो दृष्टपूर्वः सम्भवी वा । उच्यते । न तावदयमेकान्तेनाविषयः अस्मत्प्रत्ययविषयत्वात् ।

ननु विषयिणश्चिदात्मनः कथं विषयभावः पराग्भावेनेदन्तासमुल्लेख्यो हि विषयो नाम भवति तद्विपरीत्येन प्रत्यग्रूपेणानिदंप्रकाशो विषयी तत्कथ-मेकस्य निरंशस्य विरुद्धांशद्वयसंनिवेशः । अत्रोच्यते । अस्मत्प्रत्ययत्वाभि-मतो ऽहंकारः । स चेदमनिदंरूपवस्तुगर्भः सर्वलोकसाक्षिकः । तमवहित † चेतस्तया निपुणतरमभिवीक्ष्य रूपकपरीक्षकवत् स्वानुभवमऽप्रच्छादयन्तो वदन्तु भवन्तः परीक्षकाः किमुक्तलक्षणो न वेति ‡ ।

ननु किमत्र वदितव्यमसम्भिन्नेदंरूप एवाहमित्यनुभवः । कथम् । प्रमातृप्रमेयप्रमितयस्तावदपरोक्षाः । प्रमेयं कर्मत्वेनापरोक्षम् प्रमातृप्रमितौ पुनर-परोक्षे एव केवलं न कर्मतया प्रमितिरनुभवः स्वयंप्रकाशः प्रमाणफलं तद्व-लेनेतरत्प्रकाशते प्रमाणं तु प्रमातृव्यापारः फललिङ्गो नित्यानुमेयस्तत्राह-मिदं जानामीति प्रमातुर्ज्ञानव्यापारः कर्मविषयो नात्मविषयः । आत्मा तु विषयानुभवादेव निमितादहमिति फले विषये चानुसन्धीयते ।

ननु नायं विषयानुभवनिमित्तोऽहमुल्लेखः किं त्वन्य एवात्ममात्र-विषयो ऽहमिति प्रत्ययः । तस्मिंश्च द्रव्य § स्वरूपत्वे नात्मनः प्रमेयत्वं ज्ञातृत्वेन प्रमातृत्वमिति प्रमातृप्रमेय ‖ निर्भासरूपत्वादहंप्रत्ययस्य ग्राह्यग्रा-हकरूप आत्मा तस्मादिदमनिदंरूपः प्रमेयांशस्येदं ¶ रूपत्वात्, अनिदं-रूपत्वात् प्रमात्रंशस्य । नैतदुक्तम् । अनंशत्वादपरिणामित्वाच्चात्मनः ।

* तदिति २ पु॰ नास्ति ।
† चेतस्कृतयेत्यपरत्र १ पाठः ।
‡ नेतीति ३ पु॰ ।
§ स्वशब्दो नास्ति १, २ पु॰ ।
‖ प्रतिभासेति २ पु॰ कल्पितमास्ते ।
¶ रूपवत्त्वादिति २ पु॰ ।

प्रमेयस्य चेदंरूपतया परायूपत्वादनात्मत्वात्तस्मान्नीलादिज्ञानफलमनुभवः स्वयंप्रकाशमानो ग्राह्यमिदंतया ग्राहकं * चानिदन्तया ऽवभासयति ग्रहणं चानुमापयतीति युक्तम् । अतो नेदमंशो ऽहंकारो युज्यते । उच्यते । तर्हेदं भवान् प्रष्टव्यः किमात्मा चैतन्यप्रकाशो ऽनुभवो जडप्रकाश उत सोपि चैतन्यप्रकाशः अथवा स एव चैतन्यप्रकाश आत्मा जडस्वरूप † इति । तत्र न तावत्प्रथमः कल्पः । जडस्वरूपे † प्रमाणफले विश्वस्यानवभासप्रसङ्गात् । मैवम् । प्रमाता चेतनस्तद्भूतेन प्रदीपेनेव विषयमिदन्तया ऽऽत्मानं चानिदन्तया चेतयत इति न विश्वस्यानवभासप्रसङ्गः । तन्न । स्वयं चैतन्यस्वभावो ऽपि सन् ‡ विषयप्रमाणेनाचेतनेनानुगृहीतः प्रकाशत इति नैतत्साधु § लक्ष्यते । किं च । प्रमाणफलेन चेत् प्रदीपेनेव विषयमात्मानं च चेतयते तदा चेतयतिक्रियानवस्थाप्रसङ्गः ।

द्वितीये ‖ कल्पे ¶ आत्मापि स्वयमेव प्रकाशेत किमिति विषयानुभवमपेक्षेत । अथ चैतन्यस्वभावत्वेपि नात्मा स्वयंप्रकाशः । ** विशेषे हेतुर्वाच्यः । न हि चैतन्यस्वभावः सन् स्वयंपरोक्षो ऽन्यतो ऽपरोक्ष इति युज्यते । किं च । समत्वान्नेतरेतरापेक्षत्वं प्रकाशने प्रदीपयोरिव । तृतीये ऽपि †† कल्पे ऽनिच्छतोप्यात्मैव चितिप्रकाश आपद्यते न तदरिक्ततथाविधफलसद्भावे प्रमाणमस्ति । कथम् । प्रमाणजन्यश्चेदनुभवस्तथा सति स्वगतेन विशेषेण प्रतिविषयं पृथक् पृथगवभासेत सर्वानुभवानुगतं च गोत्ववदनुभवत्वमपरमीक्ष्येत ‡‡ । न च नीलानुभवः पीतानुभव इति विषयविशेषपरामर्शशून्यः स्वगतो विशेषो लक्ष्यते ।

ननु विनष्टाविनष्टत्वेन विशेषः सिध्यति । सिध्येद्यदि विनष्टाविनष्टता सिध्येत् । सा च जन्यत्वे सति तस्यां च सिद्धायां जन्यत्वमिति परस्परायत्त §§ स्थितित्वेनैकमपि न सिध्येत् । एतेनातिसादृश्यादनुभवभेदो न विभाव्यत इति प्रत्युक्तम् भेदासिद्धेः । न हि चित्प्रकाशस्य स्वगतो भेदो न प्रकाशते

* च शब्दो नास्ति २ पु. । † स्वशब्दो नास्ति २,३ पु. ।
‡ विषयप्रमाणेनेत्यस्य स्थाने विषयप्रवणेनेति कल्पितं २ पु. ।
§ न साधु–इति २ पु. । ‖ अपिशब्दो ऽत्राधिकः २ पु. ।
¶ विकल्पे इति १ पाठान्तरम् । ** विशेषहेतुरिति २ पु. । †† विकल्पे इति १ पु. ।
‡‡ ईक्षेतेति २ पु. । §§ स्थितित्वे नैकमपि सिध्येदिति २ पु. ।

इति युक्तिमत् येन तदप्रकाशनात्सादृश्यनिबन्धनो विभ्रमः स्यात् । न च यथा जीवस्य स्वयंज्योतिषोऽपि स्वरूपमेव सद् ब्रह्मरूपत्वं न प्रकाशते तद्वत्स्यादिति युक्तम् । अभिहितं तत्राप्रकाशने प्रमाणम् इह तन्नास्ति । नहि सामान्यतोदृष्टमनुभवविरोधे युक्तिविरोधे च समुत्तिष्ठति दर्शिते चानुभवयुक्ती । तस्मात् चित्स्वभाव एवात्मा तेन तेन प्रमेयभेदेनोपधीयमानोऽनुभवाभिधानीयकं लभते ऽविद्यातेापाधिरात्मादिशब्दैरभिधीयते ऽवधीरित-* वनाभिधाननिमित्तैकदेशावस्थाना इव वृत्ता वृत्तादिशब्दैरित्यभ्युपगन्तव्यम् । बाढम् । अत एव विषयानुभवनिमित्तोऽनिदमात्मको ऽहङ्कारो वर्ण्यते । सत्यमेवम् । किन्तु तथा सति सुषुप्ते ऽप्य † हमित्युल्लेखः स्यात् । कथम् । नीलानुषङ्गो यश्चैतन्यस्य स ‡ नीलाभोगो नासावहमुल्लेखार्हः अहमित्यात्मावभासते तत्र यदि नाम सुषुप्ते विषयानुषङ्गाभावादिदं जानामीति विषयतदनुभवपरामर्शो § नास्ति मा भूत् अहमित्यात्ममात्रपरामर्शः किमिति न भवेत् ।

नन्वहमिति भोक्तृत्वं प्रतिभासते तदभावे कथं तथा प्रतिभासः । नैतत्सारम् । समुत्कालितोपाधिविशेषं चैतन्यमात्रमस्मदर्थस्ततः सर्वदा ऽहमिति स्यान्नैतच्छक्यमुपाधि ‖ परामर्शेन चैतन्यमहमित्युल्लिख्यते इति वक्तुम् । तत्परामर्शो हि तत्सिद्धिनिमित्तो न स्वरूपसिद्धिहेतुः ¶ स्वमाहात्म्येनैव तु स्वरूपसिद्धिः ततश्च विषयोपरागानुभवात्मत्व ** शून्यः स्वरूपतो ऽहमिति सुषुप्ते ऽप्यवभासेत दृशिरूपत्वाविशेषात् । भवत्येवेति चेन्न । तथा सति स्मर्यत ह्यस्तन इवाहङ्कारः । अविनाशिनः संस्कारस्याभावान्न स्मर्यते इति चेत् । ह्यस्तनो ऽपि न स्मर्यत ।

नन्वस्त्येव सुषुप्ते ऽहमुल्लेखः सुखमहमस्वाप्समिति सुषुप्तोत्थितस्य स्वापसुखानुभवपरामर्शदर्शनात् नात्मनो ऽन्यस्य तत्रानुभवः सम्भवति । सत्यमस्ति । न तत्स्वापे सुखानुभवसंस्कारजं स्मरणं किं तर्हि सुखावमर्शो दुःखाभावनिमित्तः । कथम् । स्वप्ने तावदस्त्येव दुःखानुभवः । सुषुप्ते तु तदभावात्सुखव्यपदेशः । तदभावश्च करणव्यापारोपरमात् । यदि पुनः सुषुप्तः सुख-

* वनाभिधेयनिमित्तेति ३ पु· ।
‡ सनीलभाग इति २ पु· ।
‖ परामर्शे चैतन्यमिति २ पु· ।
** त्वशब्दो नास्ति २ पु· ।
† अहमुल्लेखइति २ पु· ।
§ नास्तीति २ पु· नास्ति ।
¶ स्वमहात्म्येनेति १ पु· ।

मिति च तद्विषयं स्मरणं स्या * त्तदा विशेषतः स्मर्येत न च तदस्ति । व्यपदेशो ऽपि सुखं सुप्तो न किंचिन्मया चेतितमिति हि दृश्यते । यत्पुनः सुप्तोत्थितस्याङ्गलाघवेन्द्रियप्रसादादिना सुखानुभवोन्नयनमिति । तदसत् । अनुभूतं चेत्सुखं स्मर्येत न तच्च लिङ्गेन प्रयोजनम् । यदेवं सुप्तोत्थितस्य कथं कस्यचिदङ्गलाघवं कस्य चिन्नेति । उच्यते । जागरणे कार्यकरणानि श्राम्यन्ति तदपनुत्तये व्यापारोपरमः स्वापः तच्च यदि सम्यग् व्यापारोपरम † स्तदाङ्गानि लघूनीतरथा गुरूणीति । तदेवं नायं नीलादिप्रत्ययादन्य एवात्मविषयो ऽहंप्रत्ययो नापि विषयानुभवादेवाहमुल्लेखः । तस्माद् ब्रह्मविदामेकपुण्डरीकस्य लोकानुग्रहैकरसतया सम्यग्ज्ञानप्रवर्तनप्रयोजनकृतशरीरपरिग्रहस्य भगवतो भाष्यकारस्य मतमागमयितव्यम् ।

तदुच्यते । येयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपमव्याकृतमविद्या माया प्रकृतिरग्रहणमव्यक्तं तमः कारणं लयः शक्तिर्महासुप्तिर्निद्रा चरमाकाशमिति च तच्च तच्च बहुधा गीयते चैतन्यस्य स्वत एवाव ‡ स्थितलक्षणब्रह्म §-स्वरूपतावभासं प्रतिबध्य जीवत्वापादिका ऽविद्याकर्मपूर्वप्रज्ञासंस्कारचित्तभित्तिः सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्ररूपस्थितिरनादिरविद्या । तस्याः परमेश्वराधिष्ठितत्वलब्धपरिणामविशेषो विज्ञानक्रियाशक्तिद्वयाश्रयः कर्तृत्वभोक्तृत्वैकाधारः कूटस्थचैतन्यसंवलनसंजातज्योतिः स्वयं प्रकाशमानो ऽपरोक्षो ऽहङ्कारो यत्सम्भेदात्कूटस्थचैतन्यो ऽनिदमंश आत्मधातुरपि मिथ्यैव भोक्तेति प्रसिद्धिमुपगतः । स च सुषुप्ते समुत्खातनिखिलपरिणामायामविद्यायां कृतस्थः । न चैवं मन्तव्यम् आश्रितपरिणतिभेदतयैवाहंकारस्य निर्भासे ऽनन्तर्भूतैव तन्निमित्तमिति तथा सत्यऽपाकृताहंकृतिसंसर्गो भोक्तृत्वादिस्तद्विशेषः केवलमिदन्तयैवावभासेत न च तथा समस्ति । स च परिणामविशेषो ऽनिदञ्चिदात्मनो बुद्ध्या निष्कृष्य वेदान्तवादिभिरन्तःकरणं मनो बुद्धिरहमित्ययीति च विज्ञानशक्तिविशेषमाश्रित्य व्यपदिश्यते परिस्पन्दशक्त्या च प्राण इति । तेनान्तःकरणोपरागनिमित्तं मिथ्यैवाहंकर्तृत्वमात्मनः स्फटिकमणेरिवो ‖ पधाननिमित्तो लोहितिमा । कथं पुनः स्फटिके

* तथेति १ पु० । † तदङ्गानीति १ पु०, तदा लघूनीति २ पु० ।
‡ अवशब्दो नास्ति १, २ पु० । § स्वशब्दो नास्ति २ पु० ।
‖ उपाधिनिमित्त इति २ पु० ।

लोहितिम्नो मिथ्यात्वम् । उच्यते । यदि स्फटिक * प्रतिस्फालिता † नायनरश्मयो जपाकुसुममुपसर्पेयुस्तदा विशिष्टसंनिवेशं तदेव लोहितं ग्राहयेयुः । न हि रूपमात्रनिष्ठश्चाक्षुषः प्रत्ययो दृष्टपूर्वैः नापि स्वाश्रयमनाकर्षद्रूपमात्रं प्रतिविम्बितं क्वचिदुपलब्धपूर्वम् । नन्वभिजातस्यैव पद्मरागादिमणेर्जपाकुसुमादेरपि प्रभा विद्यते तया व्याप्तत्वात् स्फटिको ऽपि लोहित इवावभासते । तथापि स्वयमलोहितो मिथ्यैव लोहित इत्यापद्येत । अथ प्रभैव लोहिता ऽवभासते न स्फटिक इति । शैक्ल्यमपि तर्हि स्फटिके प्रकाशेत । ‡ अथ प्रभया ऽपसारितं तदिति चेत् । स तर्हि नीरूपः कथं चाक्षुषः स्यात् । न § च रूपिद्रव्य ‖संयोगात् । वायोरपि तथात्वप्रसङ्गात् । न प्रभानिमित्तं लौहित्यं तच्चोत्पन्नम् उत्तरकालमपि तथारूपप्रसङ्गात् । अभ्युपगम्य प्रभामिदमुक्तम् । यथा पद्मरागादिप्रभा निराश्रया ऽप्युन्मुखोपलभ्यते न ¶ तथा जपाकुसुमादेः । तदेवं स्फटिकमणावुपधानोपराग इव चिदात्मन्य ** प्यहङ्कारोपरागस्ततः सम्भिन्नोभयरूपत्वाद्ग्रन्थिरिव भवतीत्यहङ्कारो ग्रन्थिरिति गीयते । तच्च जडरूपत्वादुपरक्तस्य न तद्बलादुपरागस्य साक्षाद्द्रष्टुश्चिद्रूपस्य पुनरुपरागस्तद्विषयव्यापारविरहिणो ऽपि तद्बलात्प्रकाशते । तेन लक्षणत इदमंशः कथ्यते न व्यवहारतः । व्यवहारतः पुनर्यदुपरागादनिदमात्मनो ऽहंकर्तृत्वं मिथ्या तदात्मनस्तद्व्यापारेण व्याप्रियमाणस्यैव व्यापारपूर्वको यस्य परिच्छेदः स एवेदमात्मको विषयोऽत एवाहमित्यसम्भिन्नेदमात्मको ऽव †† भास इति विभ्रमः केषांचित् ‡‡ दृष्टश्च लक्षणतस्तद्व्यवहारार्हो ऽपि तमननुपतन् । तद्यथाङ्कुरादिफलपर्यन्तो वृक्षविकारो मृत्परिणामपरम्परापरिनिष्पन्नो ऽपि घटव §§ ल्मीकवन्न मृन्मयव्यवहारमनुपतति । व्युत्पन्नमतयस्तु तद्व्यवहारमपि नातीवोल्बणं मन्यन्ते । अत एव निपुणतरमभिवीक्ष्य रूपकपरीक्षकवदहङ्कारं निरूपयतां सम्भिन्नेदंरूपः स इत्यभिहितम् । यत्पुनर्दर्पणजलादिषु मुखचन्द्रादि ||| प्रतिविम्बोदाहरणं तदहङ्कर्तुरनिदमंशो विम्बादिव प्रतिविम्बं न ब्रह्मणो वस्त्वन्तरं

* प्रतिफलिता इति ३ पु· । † नायना रश्मय इति १ पु· । ‡ अथेति २,३ पु· नास्ति ।
§ च शब्दो नास्ति १ पु· । ‖ द्रव्येति २,३ पु· नास्ति । ¶ नशब्दोनास्ति ३ पु· ।
** अपिशब्दो नास्ति १ पु· । †† अवभासत इति २ पु· । ‡‡ दृष्ट इत्यधिकं ३ पु· ।
§§ वल्मीकादिवदिति २ पु· । ||| प्रतीति २ पु· नास्ति ।

किं तु तदेव तत्पृथगवभासविपर्यय * स्वरूपतामात्रं मिथ्येति दर्शयितुम् । कथं पुनस्तदेव । तदेक † स्वलक्षणतावगमात् । तथाच यथा बहिःस्थितो देवदत्तो यत्स्वलक्षणः प्रतिपन्नस्तत्स्वलक्षण एव वेश्मान्तःप्रविष्टोऽपि प्रतीयते तथा दर्पणतलस्थितोऽपि न तद्वस्त्वन्तरत्वे युज्यते । अपिच । अर्थाद्वस्त्वन्तरत्वे सत्याऽऽदर्श एव विम्बसन्निधावेव तदाकारगर्भितः परिणत इति वाच्यम् विरुद्धपरिमाणत्वात्संश्लेषाभावाच्च प्रतिमुद्रेव विम्बलाञ्छितत्वानुपपत्तेः । तथा सति विम्बसन्निधिलब्धपरिणतिरादर्शस्तदपाये ऽपि ‡ तथैवावतिष्ठेत । न खलु संवेष्टितः कटो निमित्तलब्धप्रसारणपरिणतिर्निमित्तापगमे तत्क्षणमेव संवेष्टते यथा तथा स्यादिति मन्तव्यम् । यतश्चिरकालसंवेष्टनाहितसंस्कारस्तच्च पुनः § संवेष्टनिमित्तम् । तथा च यावत्संस्कारक्षयं प्रसारणनिमित्तानुवृत्तौ पुनः संवेष्टनोपजनः । एवं ‖ चिरकालसन्निहितविम्बनिमित्ततदाकारपरिणति ¶ रादर्शस्तथैव तदपायेऽपि यावदायुरवतिष्ठेत न ** च तथोपलभ्यते । यः पुनः कमलमुकुलस्य विकासपरिणतिहेतोः सावित्रस्य †† तेजसो दीर्घकालानुवृत्तस्यापि विगमे तत्समकालं पुनर्मुकुलीभावः स प्रथमतरमुकुल ‡‡ हेतुपार्थिवाप्यावयवव्यापारनिमित्तस्तदुपरमे जीर्णस्य पुनर्मुकुलतानुपलब्धेर्नादर्शे पुनस्तथा पूर्वरूपपरिणामहेतुरस्त्यचाह भवतु न वस्त्वन्तरम् तदेव तदिति तु न क्षम्यते शुक्तिकारजतस्य मिथ्यारूपस्यापि सत्यरजतैकरूपावभासित्वदर्शनात् । मैवम् । तच्च हि बाधदर्शनान् मिथ्याभावो नेह स बाधो दृश्यते । यत्पुनर्दर्पणापगमे तदपगमो न स बाधो दर्पणेऽपि तत्प्रसङ्गात् ।

ननु तत्त्वमसिवाक्याद् बाधो दृश्यते । मैवम् । तच्च तत्त्वमिति विम्बस्थानीयब्रह्म §§ स्वरूपता प्रतिविम्बस्थानीयस्य जीवस्योपदिश्यते ऽन्यथा न तत्त्वमसीति स्यात् किन्तु न त्वमसीति भवेन्न रजतमस्तीतिवत् । किं च । शास्त्रीयोऽपि व्यवहारः प्रतिविम्बस्य पारमार्थिकमेव विम्बैकरूपत्वं

* स्वेति नास्ति २ पु० ।
† स्वलक्षणत्वावगमादिति २ पु० ।
‡ तथैवेति २ पु० नास्ति ।
§ संवेष्टने-इति २ पु० ।
‖ चिरकालमिति २ पु० ।
¶ तदपायेऽप्यादर्शस्तथैव यावदायुरिति २ पु० ।
** चेति २ पु० नास्ति ।
†† सावित्रतेजस इति २ पु० ।
‡‡ मुकुलभावेति २ पु० ।
§§ स्वेतिशब्दो नास्ति २ पु० ।

दर्शयति "नेत्रेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन । नोपरक्तं न वारिस्थं न मध्यं नभसो गतमिति । यस्तु मन्यते न पराक्प्रवणप्रवृत्तनायनरश्मिभिर्बिम्बमेव भिन्नदेशस्थं गृह्यते किन्तु दर्पणप्र * तिस्फालितैः परावृत्य प्रत्यङ्मुखैः स्वदेशस्थमेव बिम्बं गृह्यत इति तमनुभव एव निराकरोतीति न पराक्रम्यते । कथं पुनः † परिच्छिन्नमेकमेकस्वभावं विच्छिन्नदेशद्वये सर्वात्मना ऽवभासमानमुभयच पारमार्थिकं भवति । न वयं विच्छेदावभासं पारमार्थिकं ब्रूमः किं त्वेकत्वम् । विच्छेदस्तु मायाविजृम्भितः । न हि मायायामसम्भावनीयं नाम । असम्भावनीयावभासचतुरा हि सा ।

ननु सत्येव बिम्बैकतावगमे प्रतिबिम्बस्य तद्गतो विच्छेदादिमिथ्यावभासस्तथा ब्रह्मैकतावगमे ऽपि जीवस्य विच्छेदादिर्मिथ्यावभासो न निवर्तितुमर्हति । उच्यते । देवदत्तस्याचेतनांशस्यैव ‡ प्रतिबिम्बत्वात्सचेतनांशस्यैव वा § प्रतिबिम्बत्वे प्रतिबिम्बहेतोः श्यामादिधर्मेणेव जाड्येनाप्यास्कन्दितत्वान्न तत्प्रतिबिम्बं बिम्बैकरूपतामात्मतो जानात्यचेतनत्वात् । तथा चानुभवो न बिम्बचेष्टया ‖ विना प्रतिबिम्बं चेष्टते । यस्य हि भ्रान्तिरात्मनि परत्र वा समुत्पन्ना तद्गतेनैव सम्यग्ज्ञानेन सा निवर्तते यस्तु जानीते देवदत्तः प्रतिबिम्बस्यात्मनो ऽभिन्नत्वं न स तद्गतेन दोषेण संस्पृश्यते नाऽपि ज्ञानमात्रात्प्रतिबिम्बस्य निवृत्तिस्तद्धेतोर्दर्पणादेः परमार्थिकत्वात् । जीवः पुनः प्रतिबिम्बकल्पः सर्वेषां नः प्रत्यक्षश्चिदूपो नान्तःकरणजाड्येनास्कन्दितः । स चाहंक ¶ र्तृत्वमात्मनो रूपं मन्यते न बिम्बकल्पब्रह्मैकरूपतामतो युक्तस्तदूपावगमे मि **थ्यात्वापगमः । ननु तच विभ्राम्यतो विभ्रमहेतुर्दर्पणालक्तकादिपरमार्थवस्तु संनिहितमस्ति न तथेह किञ्चित्सर्वचैव चिद्विलक्षणे विभ्रमविलासाभिमानिन इति मा भूदाशङ्केति रज्जुसर्पमुदाहरन्ति ।

ननु तचापि यदि नामेदानीमसन्निहितः सर्पस्तथापि पूर्वनिर्वृत्ततदनुभवसंस्कारः समस्त्येव । बाढम् । इहाप्यहङ्कर्तृतातत्संस्कारयोर्बीजाङ्कुरयोरिवानादेः कार्यकारणभावस्य वक्ष्यमाणत्वात्संस्कारो विभ्रमहेतुर्विद्यते । तच

* प्रतिस्फलितैरिति २ पु., प्रतिफलितैरिति ३ पु. । † परिच्छिन्नदेशमिति २ पु. ।
‡ प्रतिविम्बितत्वादिति २ पु. । § प्रतिविम्बितत्वे इति २ पु. ।
‖ न बिम्बचेष्टां विनेति ३ पु. । ¶ कर्तृत्वमेवात्मन इति २ पु. ।
** मिथ्यापगम इत्युपकल्पितं २ पु. ।

यद्यप्यनिर्वचनीयतयैवारुणादिना स्फटिकादेः सावयवत्वेन सम्भेदयोग्यस्याप्यसम्भेदा * वभासः सिद्धस्तथापि तदासङ्गीव स्फटिकप्रतिबिम्बमुत्प्रेक्षते रज्ज्वां पुनः सर्पबुद्धिरेव न तत्सम्भिन्नत्वमसम्भिन्नत्वं वा तस्यां तेना ऽसङ्गो नहि सज्जते † असङ्गो ह्ययं पुरुष इत्यादिश्रुतिसमर्पिता ऽसङ्गता ऽऽत्मनो न स्पष्टं ‡ दर्शितेति तदर्थं घटाकाशोदाहरणम् । तच्च हि तत्परामर्शादृते न भेदरूपकार्यसमाख्याः स्वगता दृश्यन्ते । एतच्च सर्वमुदाहरणजातं श्रुतितन्न्यायानुभवसिद्धस्य तदसम्भावनापरिहाराय बुद्धिसाम्यार्थं च न वस्तुन एव साक्षात्सिद्धये । तदेवं यद्यपि चैतन्यैकरसो ऽनिदमात्मकत्वादविषयस्तथाप्यहङ्कारे व्यवहारयोग्यो भवतीति गौण्या वृत्त्या ऽस्मत्प्रत्ययविषयतोच्यते प्रमेयस्य § व्यवहारयोग्यत्वाव्यभिचारात् ।

ननु व्यवहारयोग्यत्वे ऽध्यासो ऽध्यासपरिनिष्पन्नाहम्प्रत्ययबलाद्व्यवहारयोग्यत्वमिति प्राग्प्रमितरेतराश्रयत्वम् । नाऽनादित्वेन प्रत्युक्तत्वात् । तच्चैवम्भूतस्याहङ्कर्तुरिदमंशस्य ज्ञानसंशब्दितो व्यापारविशेषः सकर्मत्वात्कर्मकारकाभिमुखं स्वाश्रये किञ्चिदवस्थाविशेषमादधाति स्वाश्रयविकारहेतुत्वात्क्रियायाः । स च प्राप्तिक्रियाहितकर्तृस्थविशेषवत्कर्मसम्ब ‖ न्धो ज्ञातुर्ज्ञेयसम्बन्ध इति गीयते । तेन विषयविशेषसम्बद्धुमेवान्तःकरणं चैतन्यस्यावच्छेदकं कर्मकारकमपि प्रधानक्रियासिद्धौ स्वव्यापाराविष्टं चैतन्यविवर्तत्वात्प्रधानक्रियाहितप्रमाचवस्थाविशेषावच्छिन्नापरोक्षतैकरूपामपरोक्षतामभिव्यनक्ति ततश्चात्मनो ऽन्तःकरणा ¶ वस्थाविशेषोपाधिजनितो विशेषो विषयानुभवसंशब्दितो विषयस्यापरोक्षैकरसः फलमिति क्रियैकविषयताफलस्य युज्यते । एवं चाहङ्कर्ता स्वांशचैतन्यबलेन व्यापाराविष्टतया च प्रमातेति बुद्धिस्थमर्थं पुरुषश्चेतयत इत्युच्यते । तच्च प्रमातुः स्वयंज्योतिषो विषयसम्बन्धसञ्जातविशेषो ऽनुभवो ऽपरोक्षतया सर्वान् प्रत्यऽविशिष्टोऽपि कारकाणां सम्भूय प्रधानक्रियासाधनत्वाद्येन सह साधनं तन्निष्ठ एव नान्यच्च कर्मकारकमपि येन सह साधनं तस्यैवापरोक्षम् गन्तृसम्बन्ध इव ग्रामस्य ।

* अवगम इति २ पु· ।
† सज्यत इति क्वचित् ।
‡ उपेत्यधिकं २ पु· ।
§ चशब्दो ऽत्राधिकः २ पु· ।
‖ सम्बन्धादिति २ पु· ।
¶ अन्तःकरणस्यावस्थाविशेष इति पुस्तकान्तरे ।

ननु नीलादिविषयेऽपि चेदपरोक्षस्वभावो नीलात्मिका संविदित्युक्तं स्यात् । अतः स एव * माहायानिकपक्षः समर्थितः । मैवम् । परस्परव्यावृत्तौ नीलपीतावबभासेते अपरोक्षता तु न तथा एकरूपावगमाद्विच्छेदावभासेऽप्यतो न तत्स्वभावा । यदि स्यात्तद्वदेव व्यावृत्तस्वभावता ऽप्यवभासेत । न तथा ।

किंच । तैरपि नीलात्मकसंविदो ऽन्य एव परागव्यावृत्तो ऽपरोक्षः प्रत्यगवभासः स्वरूपमात्रे पर्यवसितो विकल्प उपेयते प्रतीयते च नीलसंवित् † प्रत्यग्व्यावृत्तेदन्तया ‡ ग्राह्यरूपा ततश्च वस्तुद्वयं ग्राह्यग्राहकरूपमितरेतरव्यावृत्तं सिद्धम् । नैतत् । द्वयोरपि स्वरूपमात्रनिष्ठयोः कुतो विषयविषयिभावः । कथं पुनरिदमहं जानामीति तयोर्ग्राह्यग्राहकतावभासः । नायं तदवभासः किन्त्वहमिति इदमिति जानामीति च परस्पर § व्यावृत्ताः विकल्पा एते । कथं पुनस्तेषु कटाक्षेणाप्य ‖ न्योन्यमनीक्षमाणेष्वयं सम्बन्धावगमः । तद्वासनासमेतसमनन्तरप्रत्ययसमुत्थं सङ्कलनात्मकं प्रत्ययान्तरमेतन्नेह सम्बन्धावगमः । किं पुनरेवमनुभवानारूढामेव प्रक्रियां विरचयति भवान् । क्षणविध्वंसिनः क्रियानुपपत्तेः । स्थायित्वे हि सत्यऽहमुल्लेख्यस्य स्थायिनैव नीलादिना क्रियानिमित्तः सम्बन्धस्ततश्च क्रियानिमित्तेव नीलादेरप्यपरोक्षता स्यात् न च स्थायित्वमस्ति । यदेवमहमिति संविदः प्रतिक्षणं स्वलक्षणभेदेन भाव्यम् । स किं विद्यते नवेति स्वसंविदमगृह्यमाने ¶ रेवाभिधीयताम् । अथात्यन्तसादृश्यान्न ** भेदो ऽवभासत इति संविदो ऽपि चेत् स्वरूपं नावभासते आयातमान्ध्यम †† शेषजगतः ।

अपि च । तदूपप्रतिभासे सादृश्यकल्पना प्रमाणविरुद्धा ‡‡ निष्प्रमाणिका च । तदूपप्रतीतेर्व्यामोहत्वान्न प्रमाणविरुद्धता §§ नाप्यप्रामाणिकता निर्बीजभ्रान्त्ययोगादिति चेत् नेतरेतराश्रयत्वात् । ||| सिद्धे व्यामोहे सादृश्यसिद्धिः

* महायानिकेति १ पु॰, अतस्त्वयैव महायानिकेति ३ पु॰ ।
† अत्र तुशब्दोऽधिकः २ पु॰ । ‡ ग्राह्यैकरूपेति २ पु॰ । § व्यावृत्त्येति २ पु॰
‖ अन्योन्यमीक्षमाणेष्विति १ पु॰, अन्योन्यमनिरीक्षमाणेष्विति ३ पु॰ ।
¶ एवकारो नास्ति १, २ पु॰ ।
** न भेदोऽवभासत इति संविदोऽपि स्वरूपं नावभासेत आयातमिति ३ पु॰ ।
†† अशेषस्येति २, ३ पु॰ ।
‡‡ निःप्रमाणकी चेति १ पु॰, निष्प्रामाणिकी चेति ३ पु॰ ।
§§ नाप्यप्रमाणिकत्वं चेति १ पु॰, नाप्रामाणिकतेति २ पु॰ ।
||| सिद्धे व्यामोहत्वे-इत्युपकल्पितं ३ पु॰ ।

प्रमाणविरोधाभावात्प्रमाणसद्भावाच्च । सिद्धे च सादृश्ये * तन्निमित्ता † व्यामोहसिद्धिः । स्यादेतत् । अव्यामोहे ऽपि तुल्यमेतत् । सिद्धे हि सादृश्यकल्पनाया ‡ अप्रामाणिकत्वे प्रमाणविरोधे च तद्रूपप्रतीतेरव्यामोहत्वम् अव्यामोहत्वे चास्याः सादृश्यकल्पनायाः निष्प्रमाणकत्वं प्रमाणविरोधश्च । नैतत् । स्वारसिकं हि प्रामाण्यं प्रतीतेरनपेक्षम् । तथा च तत्प्रामाण्यात्सादृश्यकल्पना § निष्प्रामाणिकी प्रमाणविरुद्धा च । न तु सादृश्यकल्पना स्वतःसिद्धा येन प्रामाण्यप्रावहेदप्रामाण्यपूर्विकैव सा । अथान्ते क्षयदर्शनादादौ क्षयानुमानम् अतो भिन्नत्वात्सादृश्यकल्पनेति । आदौ सत्तादर्शनादन्तेऽपि सा किं नानुमीयते । क्षयानुभवविरोधादिति चेत् इहापि तद्रूपस || त्वानुभवविरोधः । न ह्युभयोरनुभवयोः कश्चिद्विशेषः ।

अथ मन्येत यो ऽसौ स्थिरत्वेनाभिमतो ऽहमुल्लेखः स किं कांचिदर्थक्रियां कुर्याद्वा न वा । यदि न कुर्यादसल्लक्षणप्राप्तेर्न परमार्थवस्तु । अथ कुर्यात् न तर्हि स्थायी । स्थायिनो ऽर्थक्रियाऽयोगात् । कथमयोगः । इत्थमयोगः । स तां कुर्वन् क्रमेण ¶ कुर्याद्योगपद्येन वा । न तावत्क्रमेण । पूर्वोत्तरकालयोस्तस्य विशेषाभावे ऽपि किमिति पूर्वस्मिन्नेव काले उत्तरकालभाविनीमपि न कुर्यात् । नापि यौगपद्येन । यावज्जीवकृत्यमेकस्मिन्नेव क्षणे कृतमित्युत्तरकाले तद्विरहादसल्लक्षणप्राप्तेः । अतो ऽर्थक्रियाकारित्वादेव न स्थायी । तेन प्रतिक्षणं भिन्नेष्वहमुल्लेखेषु तद्बुद्धिः सादृश्यनिबन्धनेति । उच्यते । अथ केयमर्थक्रिया यदभावादसल्लक्षण ** त्वप्राप्तिः । स्वविषयज्ञानजननम् । प्राप्तं तर्हि सर्वासामेव संविदां स्वसंविदितरूपत्वेन स्वविषयज्ञानाजननादसल्लक्षणत्वम् । न सन्तानान्तरे ऽपि तज्जननम् अनैन्द्रियकत्वात् अनुमाने ऽप्यर्थजन्यत्वाभावा ††त्सार्वज्ञ्येऽपि न साक्षात्स्वसंविदं जनयति संसारसंविदेकरूपत्वप्रसङ्गात् अतद्रूपत्वे तद्विषयत्वायोगात् । अथ क्षणान्तरोत्पादो ऽर्थक्रिया । चरमक्षणस्यासल्लक्षणत्वप्रसङ्गः । न च सर्वज्ञज्ञानजननेनार्थवत्त्वम् । चरमत्वानुपपत्तेः

* तन्निमित्तव्यामोहेति २ पु· ।
† व्यामोहत्वेत्युपकल्पितं ३ पु· ।
‡ अप्रमाणकत्वे–इति २ पु· ।
§ निःप्रमाणिकेति २ पु· ।
|| सत्तानुभवेति २ पु· ।
¶ क्रमेण वा कुर्यादिति २ पु· ।
** त्वशब्दोनास्ति २ पु· ।
†† न सार्वज्ञेऽपि साक्षादिति २ पु·, न सार्वज्ञेऽपि ज्ञाने साक्षादिति ३ पु· ।

मुक्त्यभावप्रसङ्गात् । न च संवित्संविदो विषयः संविदात्मना भेदाभावात्प्रदीपस्येव प्रदीपान्तरम् । किञ्च । नार्थक्रियातः सत्त्वं भवति स्वकारणनिष्पन्नस्य कार्यजननात् । अतः प्रतीतिर्वक्तव्या । तच तस्या * न्यतः सत्त्वप्रतीतिस्तस्या अप्यन्यत इत्यनवस्थानान्न क्वचित्सत्तावगम इति शून्यं जगदभविष्यत् । ननु स्वज्ञानार्थक्रियायाः स्वयंसिद्धत्वान्नानवस्था । न तर्ह्यर्थक्रियातः सत्तावगमः । न हि स्वरूपमेव स्वस्यार्थक्रिया ।

यत्पुनः क्रमेणार्थक्रिया न युज्यते पूर्वोत्तरकालयोस्तस्य † विशेषाभावादिति । नैष दोषः । स्थायिनो ऽपि कारणस्य सहकारिसव्यपेक्षस्य जनकत्वात् विशेषाभावादित्ययुक्तम् । अथ कारणस्यान्यापेक्षा न युक्ता अकारणस्याऽपि नतरामित्यसहकारि विश्वं स्यात् । अथाकारणं कारणोत्पत्तयेऽपेक्षत इति चेत् अथ तत्कारणस्य कारणम ‡ कारणं वा । कारणं चेन्नापेक्षितुमर्हति अकारणं चेन्नतराम् । अथ नापेक्षा हेतूनां सहकारिणीति ब्रूयाद्दूर्शनेन बाध्येत । दृष्टं हि सहकार्यपेक्षत्वं हेतूनाम् । तस्माद्यथैव हेतोर्हेतुत्वं सति कार्ये केनाप्यतर्कणीयेन क्रमेण ज्ञायते सत्येव हेतौ कार्यस्य दर्शनात्तथा समेतसहकारिण्येव दर्शनात्सहकार्यपेक्षस्य तद्विज्ञेयम् ।

यस्तु मन्यते सहकारिजनितविशेषो हेतुः कार्यं जनयति अन्यथा ऽनुपकारिणो ऽपेक्षायोगादिति । स वक्तव्यो विशेषस्य स हेतुरहेतुर्वा । अहेतुश्चेद्विशेषोत्पत्तौ ना § पेक्ष्येत तच केवला एव सहकारिणो विशेषमुत्पादयेयुस्ततश्च कार्यं स्यात् । अथ हेतुः सहकारिभिरजनितविशेषस्तमेव कथं कुर्याद् विशेषस्य वा जननेऽनवस्था । अथ मतम् । न सर्वं कार्यं सहकारिभिरजनितात्मभेदहेतुजन्यम् समग्रेषु हेतुषु तावत्येवाभवदङ्कुरादि तथा किञ्चि ‖ त्सन्निहितसहकारिहेतुजन्यं यथा ऽक्षेपकारीन्द्रियादिज्ञानम् । तचाद्यो विशेषः सहकारिसन्निधानमाचलभ्यः अक्षेपकारीन्द्रियादिज्ञानवदिति नानवस्था । अनुपकुर्वन्नपि तर्हि सहकार्यपे ¶ क्ष्येत न हि तच हेतोः सहकारिभ्य आत्मभेदः । मानुप-

* अपिशब्दोऽधिकः २ पु० । † विशेषस्याभावादिति २ पु० ।
‡ अथाऽकारणमिति २ पु० । § अपेक्षेतेति २ पु० ।
‖ तुशब्दो ऽधिकः २ पु० । ¶ अपेक्ष्यते–इत्युपकल्पितं २ पु० ।

कुर्व * न्नपेक्ष्यते ऽतिप्रसङ्गात् स्वरूपे तु नोपकारोति किन्तु कार्ये तत्सिद्धेस्तन्नान्तरीयकत्वात् । नित्यो ऽपि तर्ह्यनाधेयातिशयो भावः कार्यसिद्धये क्षणिक इव सहकारिणमपेक्षत इति किन्नाभ्युपेयते । यथैव क्षणिको भावः सहकारिसमवधान एव कार्यं जनयति सामग्रीसाध्यत्वान्तथा नित्यो ऽपि स्वरूपानुपयोगित्वे ऽपि सहकारिसमवधानं कार्योपयोगादपेक्षेत । अथ मतं क्षणिकोऽपि नैवापेक्षते ऽन्यज्जनकस्य स्वयमन्यापेक्षानुपपत्तेः । कार्यं तु यदन्यसन्निधौ भवति तत्तस्यान्यसन्निधावेव भावादन्यथा चाभावान्नित्यस्य तु जनकस्य सर्वदा † जननप्रसङ्गः । को हेतुरन्यापेक्षायाः । क्षणिकस्तु यो जनको भावः स न पुरस्तान्न पश्चादिति न ‡ पूर्वोत्तरकालयोः कार्योत्पादः ।

इदमयुक्तम् वर्त्तते । किमत्रायुक्तम् । सति नियमे § ऽपि निरपेक्षत्वम् । तथाहि । यः कश्चित् कस्यचित् क्वचिन्नियमः स ‖ तदपेक्षाप्रभावितः अनपेक्षत्वे नियमानुपपत्तेः । एवं हि कार्यकारणभावसिद्धिः । कार्यार्थिभिश्च विशिष्टानां हेतूनामुपादानम् तच्च यदि न क्षणिकं कारणं सहकारिणमपेक्षते नापि तत्कार्यं कथं ¶ नियमः । तथाहि । हेतुपरम्पराप्रतिबन्धान्न हेतुः स्वरूपे सहकारिणमपेक्षते न कार्यं स्वयंजननशक्तेः । नापि कार्यम् एकस्यापि शक्तिमत्त्वेन प्रसह्यजननात्तच्च सहकारिसन्निधिनियमो ऽनर्थकः स्यात् । काकतालीयमुच्यते । तथाच कार्यकारणव्यवहाराः सर्वे एवोत्सीदेयुः । तस्मात् क्षणिकस्यापि भावस्य स्वयंजनकस्य स्वरूपानुपयोगिन्यपि सहकारिणि कार्यसिद्धये ऽपेक्षा वाच्या कार्यस्यैव वा सामग्रीसाध्यत्वात्तच्च नियमात् तथा नित्येपीति न विशेषं पश्यामः ।

तदेवमहंकर्तुः ** सदैकरूपावगमात्स्थायित्वे ऽप्यर्थक्रियासम्भवान्न नीलस्य स्वगतापरोक्षत्व †† मात्रेण ‡‡ माहायानिकपक्षः समर्थ्यते । किन्तु ग्राहकस्याहङ्कर्तुरात्मनः स्थायिनो ऽभावे । स चैकरूपो ऽनुभवादुक्तिबलाच्च प्रसाधितः । ननु नानुमेयादिष्वपरोक्षता दृश्यते । उच्यते । नानुमेयादिष्व-

* अपेक्षते–इति ३ पु· ।
‡ नः–इति २ पु· ।
‖ तदपेक्षः प्रभावितइत्युपकल्पित ३ पु· ।
** सदैकरूपत्वावगमादिति २ पु· ।
‡‡ महायानिकेति १ पु· ।
† जननप्रसङ्गात् को हेतुरिति ३ पु·
§ अपिशब्दो नास्ति ३ पु· ।
¶ कथं सन्निधिनियम इति २ पु· ।
†† त्वशब्दो नास्ति २ पु· ।

परोक्षत्वं स्वज्ञानोत्पत्तावव्यापृतत्वात् । लिङ्गादीनामेव कुतश्चित्सम्बन्धविशेषाद्विशिष्टैकार्थज्ञानहेतुत्वात् । प्रमेयस्य ‖ स्वज्ञानोत्पत्तिहेतुत्वे प्रमाणाभावात् । अलं प्रसङ्गागतप्रपञ्चेन स्वावसर एवैतत्सुगतमतपरीक्षायां निपुणतर ¶ म्प्रपञ्चयिष्यामः ।

तदेवमहङ्कारग्रन्थिरस्मच्छ * ब्दसंशब्दितः प्रत्ययश्चासावादर्श इव प्रतिबिम्बस्यानिदञ्चित्सम्बलितत्वेन तस्याभिव्यक्तिहेतुत्वात् । अतस्तस्य विषयत्वद्भवतीत्युपचारेणानिदञ्चिदात्मधातुरस्मत्प्रत्ययविषय उच्यते । स पुनरेषम्भूतो जाग्रत्स्वप्नयोरहमुल्लेखरूपेण सुषुप्ते † तत्संस्काररञ्जितायहणाविद्याप्रतिबद्धप्रकाशत्वेन च गतागतमाचरन् संसारी जीवो विज्ञानघनो विज्ञानात्मा प्राज्ञः शरीरी शारीर आत्मा सम्प्रसादः पुरुषः प्रत्यागात्मा कर्ता भोक्ता चेत्यज्ञ इति च श्रुतिस्मृतिप्रवादेषु गीयते । किञ्च । न केवलमस्मत्प्रत्ययविषयत्वादध्यासार्हः अपरोक्षत्वाच्च । तत्साधनार्थमाह प्रत्यगात्मप्रसिद्धेरिति । न ह्यात्मन्य ऽप्रसिद्धे स्वपरसंवेद्ययोर्विशेषः । न च संवेद्यज्ञानेनैव तत्सिद्धिरकर्मकारकत्वादतिप्रसङ्गात् । न च ज्ञानान्तरेण । भिन्नकालत्वे संवेद्यसम्बन्धानवगमात्स्वपरसंवेद्याविशेषात् । न ह्येककालं विरुद्धविषयद्वय ‡ ग्राहिज्ञानद्वयोत्पादः । न हि देवदत्तस्याग्रपृष्ठदेशस्थितार्थव्यापिगमनक्रियाद्वयावेशो युगपद्दृश्यते । आह । माभूच्चलनात्मकं क्रियाद्वयं युगपत् परिणामात्मकं तु भवत्येव । मैवम् । परिस्पन्दात्मकमपि भवत्यऽविरुद्धं यथा गायन् गच्छतीति । परिणामात्मकमपि न भवति विरुद्धम् यथा यौवनस्थाविरहेतुः । तस्मात्प्रत्यगात्मा स्वयंप्रसिद्धः सर्वस्य हानोपादानावधिः स्वयमहेयो ऽनुपादेयः स्वमहिम्नैवापरोक्षत्वादध्यासयोग्यः ॥

ननु न क्वचिदपरोक्षमाचेऽध्यासो § दृष्टपूर्वः सर्वत्वाक्षिसम्प्रयोगितया पुरोवस्थितापरोक्ष एव दृश्यते इत्याशङ्क्याह न चायमस्ति नियम इति । अप्रत्यक्षे ऽपि ह्याकाश इति परोक्ष इत्यर्थः । अथवा अक्षव्यापारमन्तरेणाप्य-

* प्रदर्शयिष्याम इति ३ पु· ।
† तुशब्दोऽत्राधिकः ३ पु· ।
‡ विषयग्राहीति १ पु· ।
§ पूर्वशब्दो नास्ति २ पु· ।
‖ प्रमेयस्य चेति २ पु· ।
¶ शब्देति नास्ति २ पु· ।

परोक्ष आकाशे बाला अयथार्थदर्शिन* स्तलमिन्द्रनीलतमालपत्रसदृशं मलिनताञ्च धूमादिकमन्यत्र नीलोत्पलसमानवर्णतादाऽध्यस्यन्ति एवमविरुद्ध इति सम्भावनां निगमयति । यथा ऽऽकाशस्याक्षव्यापारमन्तराप्यपरोक्षता तथा दर्शयिष्यामः ।

ननु ब्रह्मविद्यामनर्थहेतु† निबर्हणीं प्रतिजानता ऽविद्यानर्थहेतुः सूचिता । ततः सैव कर्तृत्वाद्यनर्थबीजमुपदर्शनीया किमिदमध्यासः प्रपञ्च्यते इत्याशङ्क्याह तमेतमेवंलक्षणमध्यासं पण्डिताः प्रमाणकुशला अविद्येति मन्यन्ते तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः । अध्यस्तादतद्रूपसंविलयनं कुर्वद्वस्तुस्वरूपं रज्जुरेवेत्यवधारयद् विज्ञानं विद्येति प्रसिद्धमेव लोके ब्रह्मविदो वदन्ति । यद्येवमध्यास इति प्रक्रम्य पुनस्तस्याविद्याभिधानव्याख्याने यत्नगौरवाद्वरमविद्येत्येवोपक्रमः कृतः । नैतत्सारम् अथौवद्येत्येवोच्यमाने आच्छादकत्वं नाम यत्तस्यास्तत्त्वं तदेवाऽभिहितं स्यान्नातद्रूपावभासितया ऽनर्थहेतुत्वम् अतो ऽतद्रूपावभासित्वमध्यासशब्देन प्रकृतोपयोगितयोपक्षिप्य पुनस्तस्याविद्याशब्दतया विद्यामाचा ‡ पनोदनार्हत्वं दर्शनीयम् तदेतदाह यच्च यदध्यासस्तत्कृतेन दोषेण गुणेन वा ऽणुमात्रेणाऽपि स न सम्बध्यत इत्यवास्तवमनर्थं दर्शयति । वास्तवत्वे हि न ज्ञानमात्रात्तद्विगम इति प्रतिज्ञा हीयेत ।

एवम् तावदुष्मदस्मदित्यादिना मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति § नैसर्गिको ऽयं लोकव्यवहार इत्यन्तेन भाष्येण सिद्धवदुपन्यस्तमात्मानात्मनोरितरेतरविषयमविद्याख्यमध्यासं साधयिषुस्तस्य लक्षणमभिधाय तत्सम्भवं चात्मनि दर्शयित्वा पुन ‖ स्तच्च सद्भावनिश्चयमुपपत्तित उपपादयितुमिच्छन्नाह तमेतमविद्याख्यमात्मनात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः लौकिकाः ¶ वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणीति । मोक्षपरत्वं च शास्त्रस्य

* तलमिन्द्रनीलमातपत्रसदृशं मलितां च धूमादि अन्यच्च नीलोत्पलसमानवर्णतामप्यध्यस्यन्तीति २ पु· ।

† निबर्हणीमिति ३ पु· । † अन्तरेणेति २ पु· ।

‡ अथनोदार्हत्वमिति ९, २ पु· । § नैसर्गिको योऽयमिति ३ पु· ।

‖ पुनस्तत्सद्भावनिश्चयमिति २ पु· । ¶ वैदिकाश्चेति नास्ति ३ पु· ।

विधिप्रतिषेधविरहिततयोपादानपरित्यागशून्यत्वात्स्वरूपमात्रनिष्ठत्वमङ्गीकृत्य पृथक् क्रियते । कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति । बाढमुक्तलक्षणाविद्या प्रत्यग्दृश्यपि सम्भवेन्नैतावता तत्स*म्भवः सिध्यति तेन निदर्शनीयः सः । प्रमातारमाश्रयन्ति प्रमाणानि तेन प्रमाता प्रमाणानामाश्रयो नाविद्यावान् अनुपयोगादित्यभिप्रायः । अथवा । कथमविद्यावद्विषयाणि प्रत्यक्षादीनि शास्त्राणि † च प्रमाणानीति सम्बन्धः । अविद्यावद्विषयत्वे सत्यऽऽश्रयदोषानुगमादप्रमाणान्येव स्युरित्याक्षेपः । उच्यते । देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरिति भाष्यकारस्य वस्तुसंग्रहवाक्यम् अस्यैव प्रपञ्चो नहीन्द्रियाण्यनुपादाये‡त्यादिः । न हि देहेन्द्रियादिष्वहंममाभिमानहीनस्य सुषुप्तस्य प्रमातृत्वं दृश्यते । यतो देहे ऽहमभिमानः इन्द्रियादिषु ममाभिमानः आदिशब्देन बाह्याद्यवयवग्रहणम् । देहशब्देन सशिरस्को मनुष्य§त्वादिजातिसम्भिन्नो ऽवयव्यभिमतो न शरीरमात्रम् देहो ऽहमिति प्रतीत्यऽभावात्सर्वो हि मनुष्यो ऽहं देवो ऽहमिति जातिविशेषैकाधिकरणे‖ चैतन्ये एव¶ प्रवर्तते इति स्वसात्त्विकमेतन्न स्वत्वेन संबन्धिना मनुष्यावयविना तदनुस्यूतेन वा चक्षुरादिना प्रमात्रादिव्यवहारः सिध्यति । भृत्यादिमनुष्यावयविनापि प्रसङ्गात् ।

अपर आह । आत्मेच्छानुविधायित्वं कार्यं** कारणसंघातस्यात्मना सम्बन्धस्तस्यापि तस्य यष्टेष्टविनियोजकत्वं तेन सम्बन्धस्तत आत्मनः प्रमात्रादिकः सर्वः क्रियाकारकफलव्यवहारस्तथा चोत्तिष्ठामीति इच्छयोत्तिष्ठत्युपविशति च । नच भृत्यादिषु तदस्ति । तेन तच्च प्रमात्रादिव्यवहाराभावो न मिथ्या मुख्याभिमानाभावादिति । नैतत् संविदि बहुमानवतो युक्तम् । तथाहि । मनुष्योऽहमिति स्वसात्त्विका संवित् न मे मनुष्य इति । गौणीति चेद्भवानेवाच††प्रमाणम् । अपि‡‡ च । इच्छापि परिणामविशेषः स कथमपरिणामिन आत्मनः स्यात् परिणाम्यन्तःकरणसम्वलिताऽहङ्कर्तृ-

* तत्सद्भाव इति २ पु० ।
† च शब्दो नास्ति ३ पु० ।
‡ इत्यादि-इति १, ३ पु० ।
§ त्वप्रत्ययो नास्ति १, २ पु० ।
‖ समासो २ पु० ।
¶ प्रवृत्त इति ३ पु० ।
** करणेति २ पु० ।
†† भवानेव प्रमाणमिति २ पुस्तके
‡‡ अपि चेदिच्छापीति १ पु० ।

त्वमन्तरेण । तथा चानुभवो ऽहमुत्तिष्ठामीति इच्छयोत्तिष्ठत्युपविशति च । तस्माद्यत्किञ्चिदेतत् । अतः स्वयमसङ्गस्याविकारिणोऽविद्याध्यासमन्तरेण न प्रमातृत्वमु * पपद्यते । तेन यद्यपि प्रमातृत्वशक्तिसन्मात्रं प्रमाणप्रवृत्तौ निमित्तम् । तदेव त्वविद्याध्यासविलसितमित्यविद्यावद्विषयता प्रमाणाना † मुच्यते । तथा निरपेक्षाणां स्वसामर्थ्येनार्थसिद्धिं विदधतां बाधानुपलब्धेः प्रामाण्यमविद्यावद्विषयत्वं च विधिमुखेापदर्शितं न नेति शक्यमपह्नोतुम् । दोषस्त्वागन्तुक एव मिथ्यात्वे हेतुर्न नैसर्गिकस्तथोपलब्धेः । न च सर्वसाधारणे नैसर्गिके दोषबुद्धिस्तथाहि क्षुत्पिपासोपजनिते सन्तापे शश्वदनुवर्तमाने जाठराग्निकृतविकारे ऽन्नपाननिष्यन्दे वा न रोगबुद्धिर्जनस्य । मुहूर्त्तमात्रपरिवर्त्तिनि मन्दे ज्वरे प्रतिश्याये वाऽल्पकफप्रसूतावपि रोगबुद्धिरनैसर्गिकत्वात् । अनैसर्गिकं च दोषमभिप्रत्योक्तं यस्य च दुष्टं करणं यच्च मिथ्येति प्रत्ययः स एवासमीचीनः ‡ प्रत्ययो नान्य इति ।

इतश्चैतदेवं पश्वादिभिश्चाविशेषात् । तथाच पश्वादयः प्रमातृत्वादिव्यवहारकाले प्रवृत्तिनिवृत्त्योदासीन्यं भजमानाः कार्यकारणसंघात एवाहंमानं कुर्वन्तीति प्रसिद्धं लोके । तदेकरूपयेागत्वेमा हि मनुष्या जन्मत एव पश्वादिभ्यो ऽधिकतरविवेकमतयः शास्त्राधेयसाम्परायिक § मतिसामर्थ्या अपि अतस्तदेकरूपकार्यदर्शना ‖ त्कार्यकारणसंघातेऽप्यात्माभिमानः समानो युक्तः । ननु पश्वादीनामपि कार्य ¶ कारणसंघातेऽहङ्कारानु ** बन्ध इति कुतो ऽवसीयते येन †† सिद्धवदभिधीयते । उच्यते । प्रौढमतिभ्य एव प्रत्यक्षादिवृत्तकुशलैरात्मा व्युत्पाद्यते ऽन्यथा तदनर्थकत्वप्रसङ्गात् एवमेव प्रमाणविचारविरहं सर्वः ‡‡ संप्रतिपद्येत ॥

ननु गोपालाङ्गनादयः प्रमाणविरहमेव वर्त्तमानदेहपातेपि स्थायिनं भोक्तारं मन्यमानास्तदर्थमाचरन्ति । न । तदभिज्ञव्यवहारमात्रप्रमाणक §§ त्वात् । तथाच ते पृष्टाः कः परलोकसम्बन्धीति न विद्मो विशेषतः प्रसिद्धो लोके

* उपलभ्यत इति २ पु० ।
‡ प्रत्यय इति नास्ति २ पु० ।
‖ कार्यकारणेऽपीति २ पु० ।
** अनुसम्बन्धइति २ पु० ।
‡‡ प्रतिपद्यते इति २ पु० ।
† प्रमाणानामित्युच्यत इति १ पु० ।
§ मतिसमर्था अपीति ३ पु० ।
¶ करणेति २ पु० ।
†† प्रशब्दोऽधिकः २ पु० ।
§§ कप्रत्ययो नास्ति २ पु० ।

इति प्रतिब्रुवन्ति । तस्मादुक्तमुक्तम् । पश्वादीनां च प्रसिद्धो ऽविवेकपूर्वकः प्रत्यक्षादिव्यवहारस्तत्सामान्यदर्शनाद् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति । एवं तावत्प्रत्यक्षादीनि प्रमाणानि चक्षुरादिसाधनानि तानि च नाधिष्ठानशून्यानि व्याप्रियन्ते अधिष्ठानं च देहो न तेनानध्यस्तात्मभावेनासङ्गस्याविकारिणश्चैतन्यैकरसस्यात्मनः प्रमातृत्वमुपपद्यत इत्यनुभवारूढमविद्यावद्विषयत्वं प्रत्यक्षादीनामुपदिश्य पश्वादिव्यवहारसाम्येन कार्यतो ऽप्यापाद्य शास्त्रं पुनः प्रतिपन्नात्मविषयमेव तेन न तत्राध्यासपूर्विका प्रवृत्तिरिति विशेषमाशङ्क्य तस्याप्यविद्यावद्विषयत्वप्रदर्शनायाह शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा ऽऽत्मनः परलोकसम्बन्धमधिक्रियते इति ।

ननु फलनैयमिकनैमित्तिकप्रायश्चित्तचोदना वर्तमानशरीरपातादूर्ध्वकालस्थायिनं भोक्तारमन्तरेणापि प्रमाणतामश्नुवत एव । यथा चैतदेवं तथैक आत्मानः शरीरे ऽभावादित्यधिकरणारम्भे दर्शयिष्यामः । सत्यमेवम् । तथापि सकलशास्त्र * पर्यालोचनापरिनिष्पन्नं † प्रामाणिकमर्थमङ्गीकृत्याह ‡ भाष्यकारः । तथाच विधिवृत्तमीमांसाभाष्यकारो ऽप्युत्सूत्रमेवा § त्मसिद्धौ पराक्रान्तवान् । तत्कस्य हेतोः । धर्मजिज्ञासेति कार्यार्थविचारं प्रतिज्ञाय तदवगमस्य प्रामाण्ये ऽनपेक्षत्वं कारणमनुसरता सूत्रकारेण विशेषाभावात्स्वरूपनिष्ठानामपि वाक्यानां प्रामाण्यमनुस्मृतं ‖ मन्यते तथा चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवञ्जातीयकमर्थं शक्नोत्यवगमयितुमिति वदंश्चोदनाशेषत्वेनापि स्वरूपावगमे ऽनपेक्षत्वमविशिष्टमवगच्छतीत्यवगम्यते । स च स्वरूपावगमः कस्मिन् कथं ¶ वेति धर्ममात्रविचारं प्रतिज्ञाय तत्रैव प्रयतमानेन भगवता जैमिना न मीमांसितमुपयोगाभावाद्भगवांस्तु पुनर्बादरायणः पृथग् ** विचारं प्रतिज्ञाय व्यचीचरत् समन्वयलक्षणेन । तच्च च देहान्तरोपभोग्यः स्वर्गः स्यास्यति । तच्च सर्वं कार्यकारणसंघातादन्येन भोक्त्रा विना न सिध्यति । तत्सिद्धिश्च नागममात्रायत्ता । प्रमाणान्तरगोचरस्य तदभावे तद्विरोधे वा

* पर्यालोचनया परिनिष्पन्नमिति ३ पु० ।
† समासो ऽत्र २ पु० ।
‡ भगवानित्यधिकं ३ पु० ।
§ आत्मसिद्धौ-इति ३ पु० ।
‖ अनुस्मृतमिति २ पु० । ¶ चेतीति २ पु० । ** पृथक्तद्विचारमिति २ पु० ।

शिलाप्लवनवाक्यवदप्रामाण्यप्रसङ्गात् । अतस्तत्सिद्धौ पराक्रान्तवान् । तेन सत्यं विनापि तेन सिध्येत्प्रामाण्यम् । अस्ति तु तत्तस्मिन् विद्यमाने न तेन विना प्रामाण्यं सिध्यति फलादिचोदनानामिति मत्वा ऽऽह शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः परलोकसंबन्धमधिक्रियते इति तथापि न वेदान्तवेद्यमिति ।

किं तदित्यत आह असंसार्यात्मतत्त्वं न तदधिकारेऽपेक्ष्यतेऽनुपयोगादधिकारविरोधाच्च । अशनायाद्यतीतमित्य ऽसंसार्यात्मतत्त्वं दर्शयति । अशनायाद्युपप्लुतो हि * सर्वो जन्तुः स्वास्थ्यमलभमानः प्रवर्त्तते तदपाये स्वास्थ्ये स्थितो न किंचिदुपादेयं हेयं वा पश्यति । अपेतब्रह्मक्षत्रादिभेदमिति प्रपञ्चशून्यमेकरसं दर्शयति । प्राक् च तथाभूतात्मविज्ञानात्प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्त्तत इति । तत्त्वमसीतिवाक्यार्थावगमादऽर्वागऽविद्याकृतं † संसारमहमुल्लेखमाश्रित्य प्रवर्त्तमानं शास्त्रं नाऽविद्यावद् ‡ विषयत्वमतिवर्त्तते । तस्माद्युक्तमुक्तं प्रत्यक्षादीनां प्रमाणानां शास्त्रस्य चाविद्यावद्विषयत्वम् ।

तदेव दर्शयति । तथाहि । ब्राह्मणो यजेतेत्यादीनि शास्त्राण्यात्मन्यतदध्यासमाश्रित्य प्रवर्त्तन्ते । वर्णवयोध्यासः अष्टवर्षं ब्राह्मणमुपनयीतेत्यादिः § । आश्रमाध्यासो न ह वै स्नात्वा भिक्षेतेति । अवस्थाध्यासो यो ज्योगामयावी स्यात्स एतामिष्टिं निर्वपेदिति । आदिशब्देन यावज्जीवं जुहुयादिति जीवनाध्यासः । एवमध्याससद्भावं प्रसाध्य स्मृतिरूप इत्यादिना सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरतीत्यन्तेन भाष्येण लक्षितं निरुपचरितमतदारोपम् अध्यासो नामातस्मिँस्तद्बुद्धिरित्यवोचामेति परामृशति । कस्य युष्मदर्थस्य कस्मिन्नस्मदर्थे तद्विपर्ययेण चाध्यास इति विवेकतः प्रदर्शयितुमतस्मिन्नऽयुष्मदर्थेऽनिदंचिति तद्बुद्धिर्युष्मदर्थावभास इत्यर्थः । तदाह तद्यथा पुत्रभार्यादिष्वित्यादि ।

ननु प्रणव एव विस्वरो नहि पुत्रादीनां वैकल्यं साकल्यं वा ऽऽत्मनि मुख्यमध्यस्यति मुख्यो ह्यतदारोपो दर्शयितुं प्रारब्धः । सत्यम् । स

* सर्व इति २ पुस्तके नास्ति ।
† अविद्याकृतं रसान्तरमिति २ पु॰ पाठः ।
‡ मत्वुपप्रत्ययो नास्ति १ पु॰ ।
§ आदिशब्दो नास्ति २ पु॰ ।

एव * निदर्श्यते । कथम् । तद्यथा बालके प्रातिवेश्यमात्रसंबन्धिना केनचिद्वस्त्रालङ्कारादिना पूजिते निरुपचरितमात्मानमेव पूजितं मन्यते पिता । पूजयितापि पितरमेवा † पूपुजमिति मन्यते । यतो न बालकस्य पूजित ‡ त्वाभिमानोऽव्यक्तत्वात् । तथैव राजानमुपहन्तुकामो ऽनन्तरो विजिगीषुस्तद्राष्ट्रे ग्राममात्रमप्युपहत्य तमेवोपघ्नन्तमात्मानं मन्यते सो ऽप्युपहतोस्मीति संतप्यते । तदेवं प्रसिद्धव्यतिरेकस्यात्मनि मुख्य एवाध्यासो दृष्टः किमु वक्तव्यं कृशस्थूलाद्यभिमानस्य मुख्यत्वमिति कथयितुमाह अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यतीति । बाह्येषु पुत्रादिषु पूजादेर्धर्ममात्रस्यैव युष्मदर्थस्याध्यासः ।

अस्मदर्थश्चाहंप्रत्ययिसम्भिन्न एवानिदंचिदंशो विषयो न पुनः शुद्ध एवाहंप्रत्ययिन इवाध्यासेऽध्यासान्तरानास्कन्दितस्तथा देहधर्मान् कृशत्वादानिति धर्मिणो ऽपि धर्मशब्दस्तु मनुष्यत्वादिधर्मसमवायिन एवाध्यासो न देहोऽहमिति कथयितुं तन्निमित्तश्च शास्त्रेणेतश्चेतश्च नियमः क्रियते तथेन्द्रियधर्मान्मूकत्वादीनिति धर्ममात्रं तथान्तःकरणधर्मान् कामादीनिति धर्मग्रहणमन्तःकरणमित्यहंप्रत्ययिनो विज्ञानशक्तिभागो ऽभिधीयते तस्य धर्माः कामादयः । एवमहंप्रत्ययिनमिति धर्मिग्रहणम् । प्रत्ययाः कामादयो ऽस्येति प्रत्ययी अहं चासौ प्रत्ययी चेत्यहंप्रत्ययी तमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्येति स्वशब्देनाहङ्कारग्रन्थिः संसारनृत्यशालामूलस्तम्भो ऽभिधीयते । तस्य प्रचारः कामसङ्कल्पकर्तृत्वादिरनेकविधः परिणामो यन्निमित्तं ब्रह्मादिस्थावरान्तेषु प्रदीप्तशिरा इव परवशो जन्तुर्बम्भ्रमीति ।

तं प्रचारमशेषमसङ्गितया ऽविकारित्वेन च हानोपादानशून्यः साक्षादव्यवधानमवभासयति § चितिधातुः स एव देहादिष्विदन्तया बहिर्भावमापद्यमानेषु ‖ प्रातिलोम्येनाञ्चतीवो ¶ पलभ्यते इति प्रत्यगुच्यते आत्मा च निरुपचरितस्वरूपत्वात् । तचाध्यस्य तं च प्रत्यगात्मानमिति । यदि युष्मदर्थस्यैव प्रत्यगात्मनि अध्यासः स्यात् प्रत्यगात्मा न प्रकाशेत न हि शुक्तौ रजताध्यासे शुक्तिः प्रकाशते प्रकाशते चेह चैतन्यमहङ्कारादौ तथा यदि चैतन्यस्यैवाहङ्का-

* निर्दिश्यते इति २ पु० । † अपुपूजमिति २ पु० । ‡ पूजिताभिमान इति २ पु० ।
§ चिद्धातुरिति २ पु० । ‖ प्रतिलोम्येनेति २ पु० । ¶ उपलभ्यते–इति २ पु० ।

 आत्मान्तःकरणयोरन्योन्याध्यासः । ब्रह्मज्ञानं विनाऽध्यासस्यानन्तत्वम् ।

रादावध्यासो भवेत्तदा नाहङ्कारप्रमुखः प्रपञ्चः प्रकाशेत तदुभयं मा भूदित्यनुभवमेवानुसरन्नाह तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यतीति । नाच विवदितव्यमितरेतराध्यासे पृथगवभासनान्न मिथ्यागौरणोऽयमिति तथानुभवाभावान्मुख्या * भिमानः । नहि दृष्टेऽनुपपन्नं नाम ।

नन्वन्तःकरण एव प्रत्यगात्मनः शुद्धस्याध्यासोऽन्यच्च पुनश्चैतन्याध्यास † परिनिष्पन्नापरोक्ष्यमन्तःकरणमेवाध्यस्यते अत एव तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तमित्युक्तम् । अन्यथा चैतन्यमाचैकरसस्य कुतो धर्मा ये ऽध्यस्येरन् । सत्यमाह भवान् अपि त्वन्यचान्तःकरणं सचित्कमेवाध्यस्यमानं यचाऽध्यस्यते तस्यैवात्मनः ‡ कार्यकरत्वमापाद्य स्वयमविद्यमानमिव तिरस्कृतं तिष्ठति चिद्रूपमेव सर्वचाध्यासे स्वतः परतो वा न विशिष्यते तेनोच्यते तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यतीति । अत एव बुद्ध्यादिष्वेव चिद्रूपमनुस्यूतमुत्प्रेक्षमाणा बुद्धिमनःप्राणेन्द्रियशरीरेष्वे § कैकस्मिँश्चेतनत्वेनाहङ्कर्तृत्वं योजयन्तो भ्राम्यन्ति । एवमयमनादिरनन्तो नैसर्गिको ऽध्यास इति निगमयति ।

ननूपन्यासकाले नैसर्गिको ऽयं लोकव्यवहार इति ‖ लोकव्यवहारो नैसर्गिक उक्तः कथमिहाध्यासो निगम्यते ऽनादिरिति चाधिकावापः । अचोच्यते । तचापि प्रत्यगात्मन्यहङ्कारा ¶ ध्यास एव नैसर्गिको लोकव्यवहारो ऽभिप्रेतः । स च प्रत्यगात्मा ऽनादिसिद्धस्तस्मिन् नैसर्गिकस्यानादित्वमर्थसिद्धमतः प्रक्रमानुरूपमेव निगमनं नचाधिकावापः ।

ननु भवेदनादिः । अनन्तः कथम् । यदि स्यात्तत्प्रहाणाय कथं वेदान्ता आरभ्यन्ते । अन्तवत्त्वेपि तर्हि कथं ** स्वतो ऽन्यतो वा तत्सिद्धेस्तस्मादनन्तस्य प्रहाणाय †† वेदान्ता आरभ्यन्त इत्युक्तेऽर्थादेष एव प्रहाणहेतुरसत्यस्मिन्ननन्त इति निश्चीयते । मिथ्याप्रत्यय ‡‡ रूपइति रूपग्रहणं लक्षणतस्तथा रूप्यते न व्यवहारत इति दर्शयितुम् । कर्तृत्वभोक्तृत्वप्रवर्तन इति अनर्थहेतुत्वं

* अभिमानादिति ३ पु० ।
‡ कार्यकरणत्वमिति क्वचित् ।
‖ नैसर्गिको लोकव्यवहार इति ३ पु० ।
** स्वतो वा परतो वेति २ पु० ।
‡‡ रूपमितीति २ पु० ।
† परिनिष्पन्नापरोक्षमिति १, २ पु० ।
§ एवशब्दोऽन्याधिकः २ पु० ।
¶ आदिशब्दोऽन्याधिकः २ पु० ।
†† कथमित्यधिकमत्र १, ३ पु० ।

दर्शयति हेयतासिद्धये तेन कर्तुर्भोक्तुश्च सतो * मिथ्याज्ञानं दोषप्रवर्तनमिति येषां मतं तन्निराकृतं भवति । सर्वलोकप्रत्यक्ष इति । देहेन्द्रियादिष्वहंममाभिमानहीनस्येत्युपन्यस्य नहीन्द्रियाण्यनुपादायेत्यादिना यो ऽनुभवो मिथ्यात्वसिद्धये ऽनुस्मृतस्तं निगमयति ।

एवं तावत्सूचणार्थौ † पात्तयोर्विषयप्रयोजनयोः सिद्धये जीवस्या ऽब्रह्मस्वरूपत्वमध्यासात्मकमुपदर्श्यास्यानर्थहेतोः प्रहाणायेति प्रयोजनं निर्दिशति । हेतोः प्रहाण्या हि हेतुमतः प्रहाणिरात्यन्तिकी यतः । नन्वनर्थहेतुरध्यासो ऽनादिः स कथं प्रहीयते । तथा हि ‡ मनुष्यादिजातिविशेषमाचाध्यासस्ततो विविक्ते ऽपि न्यायतो ऽहंप्रत्यये ऽनादित्वात्पूर्ववद § ऽविकलो वर्तते । नायं दोषः । तत्त्वमसीत्यादिवाक्याद्ब्रह्म ‖ रूपावगाहि ¶ ज्ञानान्तरोत्पत्तेरिष्टत्वात् । तद्धि ब्रह्मणो ऽवच्छिद्यैव चैतन्यस्य ब्रह्मरूपत्वप्रच्छादनेन जीवरूपत्वापादिकामनादिसिद्धामविद्यामहङ्कारादिविक्षेपहेतुं निराकुर्वदेवोत्पद्यते । ततः कारणनिवृत्तौ तत्कार्यमहमिति जीवे भोक्तृत्व ** रूपता सपरिकरा निवर्तते इति युज्यते । अहंप्रत्ययः पुनरनादिसिद्धो ऽनादिसिद्धेनैव कार्य †† करणमात्रेण सहभावादविरोधान्न स्वरूपविवेकमात्रेण निवर्तते । नापि ‡‡ ज्ञानान्तरसमुत्पन्नमिति विशेषः ।

ननु निरतिशयानन्दं ब्रह्म श्रूयते ब्रह्मावाप्तिसाधनं च ब्रह्मविद्या स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतिभ्यस्तस्मान्निरतिशयसुखावाप्तये इति वक्तव्यम् । किमिदमुच्यते ऽनर्थहेतोः प्रहाणायेति । ननु चानर्थस्यापि समूलस्य प्रहाणं श्रूयते ब्रह्मविद्याफलम् । तरति शोकमात्मवित् । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमान §§ मेति वीतशोक इति च उभयं तर्हि वक्तव्यं श्रूयमाणत्वात् पुरुषार्थत्वाच्च । न वक्तव्यम् । कथम् । आत्मैकत्वविद्याप्रतिपत्तय इत्यात्मनो जीवस्य ||| ब्रह्मात्मकता शास्त्रस्य विषयस्तेनानन्दात्मक ¶¶ ब्रह्मस्व ** रूपताप्राप्तिर्जीवस्य विषयतयैव संवृता न च सा

* जीवस्येत्यधिकं ३ पु० । † अर्थादुपात्तयोरिति २ पु० । ‡ मनुष्यत्वादीति २, ३ पु० ।
§ अविचलइति २ पु० । ‖ ब्रह्मरूपतावगाहीति २ पु० । ¶ विशब्दोऽत्राधिकः २ पु० ।
** त्वप्रत्ययो नास्ति २ पु० । †† कारणेति ३ पु० । ‡‡ ज्ञानान्तरमुत्पन्नमिति २ पु० ।
§§ इतिस्थाने इतिशब्दः २, ३ पु० । ||| ब्रह्मात्मैकतेति ३ पु० ।
¶¶ कप्रत्ययो नास्ति २ पु० । ** स्वशब्दो नास्ति २ पु० ।

विषयाद्बहिर्येन पृथङ्निर्देशार्हो स्यात्समूलाऽनर्थहानिस्तु बहिः शास्त्रविषयाद् * ब्रह्मात्मरूपात् । अनर्थहेतुप्रहाणमपि † तर्हि न पृथङ्निर्देष्टव्यम् । यतः । सर्वेषु वेदान्तेष्वलौकिकत्वाद् ब्रह्मणस्तत्प्रतिपादनपूर्वकमेव जीवस्य तदूपता प्रतिपाद्यते । तद्यथा सदेव सोम्येदमग्र आसीदित्युपक्रम्य तदात्म्यमिदं सर्वन्तत्सत्यम् स आत्मेत्यवसानं निरस्त ‡ समस्तप्रपञ्चं वस्तु तत्पदाभिधेयं समर्पयदेकं वाक्यम् तथा सति तादृशेन तत्पदार्थेन संसृज्यमानस्त्वंपदार्थः पराकृत्यैव निर्लेपमनर्थहेतुमग्रहणमन्यथाग्रहणं च तथा निश्चीयते इति । यद्येवं ब्रह्मात्मावगतिनान्तरीयकमनर्थहेतोरविद्यायाः प्रहाणं न शब्दस्य तच्च व्यापारस्तेन पृथङ्निर्दिश्यते । युक्तं चैतत् । न हि विपर्यासगृहीतं वस्तु तन्निरासादृते तत्त्वतो निर्णेतुं शक्यम् । तस्मात् पूर्वावसितमतद्धर्मं निरस्यदेव तत्त्वावद्योतिवाक्यं तत्त्वमवसाययति ।

ननु च नञादेर्निरासकृतो निरस्यमानवाचिनश्च पदस्याश्रवणात्कथं तन्नि § रस्यदेवेति । उच्यते । नेदं रजतमिति यच्च विपर्ययासमाचं निरस्यते न वस्तुतत्त्वमवबोध्यते । तच्च तथा भवतु । इह पुनर्विज्ञानमेव तादृशमुत्पन्नं यद्विरोधिनिराकरणमन्तरेण न स्वार्थं साधयितुमलम्तुलोन्नमनव्यापार ‖ इवानमननान्तरीयकः । तथाह्युन्नमनव्यापारः स्वविषयस्य ¶ तुलाद्रव्यस्योर्ध्वदेशसम्बन्धं न साधयितुमलं तत्कालमेव तस्याधोदेशसम्बन्धमनापाद्य । न चोन्नमनकारकस्य हस्तप्रयत्नादेरामनने ऽपि कारकत्वम् । प्रसिद्ध्यभावादनुभवविरोधाच्च । तदेवं विपर्यासगृहीते वस्तुनि तत्त्वावद्योतिशब्दनिमित्त आत्मनो ज्ञानव्यापारो नाहं कर्ता ब्रह्माहमिति ग्राहयति । नेदं रजतं शुक्तिकेयमिति यथा । तस्माच्छुक्तिकेयमित्येव निराकाङ्क्षं वाक्यं नेदं रजतमित्यनुवादः । अत एवाख्यातपदस्य वाक्यत्वे क्रियाज्ञानादेव तत्साधनमाचे ऽपि प्रतीतिसिद्धिः । पदान्तराणि नियमायानुवादाय वेति न्यायविदः । तथाचाहु** - र्यजतिचोदना द्रव्यदेवताक्रियासमुदाये कृतार्थत्वादिति ।

* ब्रह्मात्मतास्वरूपादिति ३ पु· । † न तर्हीति ३ पु· ।
‡ समस्तेति नास्ति १, २ पु· । § निरस्यदुच्यते–इति १ पु· ।
‖ इवावनमनेति ३ पु· । ¶ तुलेति २ पु· न दृश्यते ।
** यजतिचोदना द्रव्यं देवताक्रियासमुदाय इति ३ पु· ।

अपरे तु यज्ञं व्याख्यास्यामो द्रव्यं देवता त्याग इति । कथं क्रियामाचष्वाचिनो द्रव्यदेवताभिधानं नान्तरीयकं तद्विषयज्ञाननिमित्तत्वं विहाय प्रत्यक्षबाधस्याप्ययमेव प्रकारोऽसंप्रयुक्तविषयत्वाद्बाधस्य । तदेवमशाब्दमविद्याविलयं मन्वानः श्रुतिन्यायकोविदो भगवान् भाष्यकारो विषयात्पृथङ् निर्दिशत्यस्यानर्थहेतोः प्रहाणायेति चतुर्थीप्रयोगोऽपि विद्यासामर्थ्यसिद्धिमभिप्रेत्य न तदर्थमुपादनं प्रयोजनत्वं च पुरुषाकाङ्क्षया एवास्तु । न हि विद्या गवादिवत्तटस्था सिध्यति येनाप्रिः पृथगुपादीयेत । सा हि * वेदित्राश्रया वेदं तस्मै प्रकाशयन्त्येवोदेति । सत्यमेवमन्यच । प्रकृते पुनर्विषये विद्योदितापि न प्रतिष्ठां लभते असम्भावना † विपरीतभावनाभिभूतविषयत्वात् । तथा च लोके यस्मिन् देशे काले चेदं वस्तु स्वरूपत एव न सम्भवतीति दृढभावितम् यदि ‡ तत्कथंचिद्दैववशादुपलभ्येत तदा स्वयमीक्षमाणोऽपि तावन्नाध्यवस्यति यावत् तत्सम्भवं नानुसरति । तेन सम्यग्ज्ञानमपि स्वविषयेऽप्रतिष्ठितमनवाप्रमिव भवति । § तेन तत्स्वरूपप्रतिष्ठायै तर्कं सहायीकरोति । अत एव प्रमाणानामनुग्राहकस्तर्क इति तर्कविदः ।

अथ कोयं तर्को नाम । युक्तिः । ननु पर्याय एषः । स्वरूपमभिधीयताम् । इदमुच्यते । प्रमाणशक्तिविषयतत्सम्भवासम्भवपरिच्छेदात्मा प्रत्ययः । नन्वेवं तर्कसापेक्षं स्वमर्थं साधयतोऽनपेक्षत्वहानेरप्रामाण्यं स्यात् । न स्यात्स्वमहिम्नैव विषयाध्यवसायहेतुत्वात् । क्व तर्हि तर्कस्योपयोगः । विषयासम्भवाशङ्कायां ‖ तथानुभवफलानुत्पत्तौ तत्सम्भवप्रदर्शनमुखेन फलप्रतिबन्धविगमे । तथा च तत्त्वमसिवाक्ये त्वंपदार्थौ जीवस्तत्पदार्थब्रह्मस्वरूपतामात्मनोऽसम्भावयन् विपरीतं च रूपं मन्वानः समुत्पन्नेऽपि ज्ञाने तावन्नाध्यवस्यति यावत्तर्केण विरोधमपनीय तद्रूपतामात्मनो न सम्भावयति । ततः प्राग् विद्योदितापि वाक्यादनवाप्रैव भवति । अवाप्रिप्रकारश्च वेदान्तेष्वेव निर्दिष्टः । साक्षादनुभवफलोद्देशेन तेनोच्यते विद्याप्रतिपत्तये इति ।

नन्वात्मैकत्वविद्याप्रतिपत्तिर्नानर्थहेतुप्रहाणाय ¶ प्रभवति । तथाहि ।

* वेदित्रा श्रुत्येति ९, २ पु० ।
† विपरीतसंभावनेति क्वचित् ।
‡ तदिति नास्ति ३ पु० ।
§ तेन स्वप्रतिष्ठायै–इति ३ पु० ।
‖ शङ्कयेति २ पु० ।
¶ प्रहाणाय भवतीति २ पु० ।

जीवस्य कार्य * कारणसंघातादन्यत्वप्रतिपत्तेर्ब्रह्मस्वरूपताप्रतिपत्तिर्न विशिष्यते उभयचाप्यहङ्कारग्रन्थेर्मनुष्याभिमानपर्यन्तस्याविकलमनुवर्तमानत्वात् । उच्यते । भवतु तत्राविद्याया अनिवर्तितत्वात्तदिह पुनरपसारिता ऽविद्यादोषं ब्रह्मात्मज्ञानमुदयमासादयत्कथं तन्निमित्तं मोक्षादिग्रन्थिप्रवाहं नापनयति । नहि जीवस्य ब्रह्मात्मावगमस्तद्विषयानवगममऽबाधमान उदेति ॥

ननु ब्रह्मज्ञानादग्रहणापाये तन्निमित्तस्याहङ्कारग्रन्थेस्तत्कालमेवाभावः प्रसज्येत । न । संस्कारादप्यग्रहणानुवृत्तेः सम्भवाद् भयानुवृत्तिवत् । तथाहि । सम्यग्ज्ञानान्निवृत्तमपि भयं स्वसंस्कारादनुवर्तते कम्पादिनिमित्तं च भवति । तथा ऽग्रहणमपि स्वसंस्कारादनुवर्ततेऽहङ्कारग्रन्थेश्च निमित्तं भवतीति न किञ्चिदनुपपन्नमस्ति ।

ननु न सर्वे वेदान्ता विद्यार्थमेवारभ्यन्ते तदेकदेशः क्रममुक्तिफलायैश्वर्यायाभ्युदयार्थं कर्मसमृद्धये चोपासनानि विविधान्युपदिशन्नुपलभ्यते । सत्यम् । उपासनाकर्म तु ब्रह्म तच्चापावृताशेषप्रपञ्चं जीवस्य निजं रूपमिति निरूपयितुमखिलप्रपञ्चजन्मादिहेतुतया प्रथमं सर्वात्मकं सर्वज्ञं सर्वशक्ति च ब्रह्म लक्षितमस्यां चावस्थायामनपाकृत्यैव ब्रह्मणि प्रपञ्चं तेनतेन प्रपञ्चेनोपधीयमानं ब्रह्म तस्मै तस्मै फलायो † पास्यत्वेन विधीयते दर्शपूर्णमासार्थाप्रणयनमिव गोदोहनोपरक्तं पशुभ्यस्तस्मात्तदर्थोपजीवित्वादितरस्यात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति न विरुध्यते ।

नन्वब्रह्मोपासनान्यपि वेदान्तेषु दृश्यन्ते प्राणादिविषयाणि । सत्यम् । तान्यपि कार्यब्रह्मावाप्तिक्रमेण मुक्तिफलान्येव । वक्ष्यत्येतत्सूचकारः कार्यात्यये तदध्यक्षेण सहातः परमभिधानादिति । यथा चायमर्थः सर्वेषां वेदान्तानाम् तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्याम इति प्रतिज्ञातेर्थे वेदान्तानां तात्पर्यमुपदर्शयितुं समन्वयसूचप्रमुखैः सूचवाक्यैर्ग्रथितो न्याय इति दर्शयति । शरीरमेव शरीरकं शरीरके भवः शारीरको जीवः । तमधिकृत्य कृतो ग्रन्थः शारीरकः । तदिह वेदान्तानां जीवस्य सत्त्वमधिकृत्य प्रवृत्तानां ब्रह्मरूपतायां पर्यवसानमिति कथयितुं प्रणीतानां शारीरकं ‡ जीवतत्त्वमधिकृत्य कृतत्वमस्तीति शारीरकाभिधानम् । मुमुक्षुत्वे सत्यनन्तरं ब्रह्म-

* करणेति ३ पु० । † उपास्यमानत्वेनेति १ पु० । ‡ जीवतत्त्वमिति ३ पु० ।

ज्ञानं कर्तव्यमिति यद्यप्येतावान्सूचस्य श्रोतो ऽर्थस्तथा ऽप्या * र्थाद् ब्रह्मज्ञानस्य मोक्षः प्रयोजनं निर्दिष्टं भवति । तथाहि । पुरुषार्थवस्तुकामनानन्तरं यच्च प्रवृत्तिरुपदिश्यते तस्य तत्साधनत्वमप्यर्थान्निर्दिष्टं प्रतीयते । तथा सति कुतस्तन्मोक्षसाधनं ब्रह्मज्ञानं भवतीत्यपेक्षायामर्थादस्माच्छास्त्राद्भवतीति शास्त्रस्य ब्रह्मज्ञानं विषयो निर्दिष्टः । तदेवं मुमुक्षुत्वानन्तरं ब्रह्मज्ञानकर्तव्यतोपदेशमुखेन वेदान्तानां विषयप्रयोजननिर्देशे † ऽप्यर्थं सूचस्य व्यापारं दर्शयित्वा तदपेक्षितमप्यर्थात् ‡ सूचितमविद्यात्मकबन्धमुपवर्ण्य प्रतिज्ञातार्थसिद्धये हेत्वाकाङ्क्षाया § मस्मिन्नेव तं प्रदर्शयिष्याम इति व्याख्येयत्व ‖ मुपक्षिप्य व्याख्यातुकामः प्रथमं तावत्प्रयोजनविषययोरुपादाने निमित्तमाह वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येद ¶ मादिमसूत्रम् अथातो ब्रह्मजिज्ञासेति । अयमस्यार्थः । शास्त्रस्यादिरयम् । आदौ च प्रवृत्त्यङ्गतया प्रयोजनं विषयश्च ** दर्शनीयः । सूत्रं चैतत् अतो यः कश्चिदर्थः शब्दसामर्थ्येनार्थबलाद्वा †† उत्प्रेक्षितः ‡‡ स सर्वस्तदर्थ एवेति भवत्ययमर्थकलापः तन्महिमाधिगतः । एवं सूचस्यादित्वेन कारणेन सूचतया च विषयप्रयोजनं तत्सिद्धिकरं चा §§ विद्याख्यं बन्धं तत्सामर्थ्यावगतमापाद्य तच्च सूचसामर्थ्यं दर्शयितुं प्रतिपदं व्याख्यामारभते ॥

॥ इति प्रथमवर्णकम् ॥



* अर्थादिति क्वचित् । † अर्थात् सूत्रस्येति १, ३ पु० । ‡ सूचितमिति २ पु० ।
§ अस्मिन्नेव शास्त्रे इति २, ३ पु० । ‖ उत्प्रेक्ष्येति १, ३ पु० । ¶ आदिमं सूत्रमिति ३ पु० ।
** प्रदर्शनीय इति ३ पु० । †† उत्प्रेक्ष्यत इति ३ पु० ।
‡‡ सशब्दोऽत्र पुस्तकत्रयेऽपि नोपलभ्यते । §§ अविद्यात्मकं बन्धमिति ३ पु० ।

सिद्धैव ननु ब्रह्मजिज्ञासा अथातो धर्मजिज्ञासेति सकलवेदार्थविचारस्योदितत्वात् ब्रह्मज्ञानस्य च चोदनालक्षणत्वेन धर्मस्वरूपत्वात् । अतः सिद्धैव ब्रह्मजिज्ञासापि अभ्यधिकाशङ्काभावादिति । अत्र केचिदभ्यधिकाशङ्कां दर्शयन्तो ब्रह्मजिज्ञासां पृथगारभन्ते । कोयमत्राभ्यधिका शङ्का । चोदनालक्षणोर्थो धर्म इति ब्रुवता विधेः प्रामाण्यं दर्शितम् । अत्र केषुचिद्वाक्येषु विधिरेव न श्रूयते सदेव * सोम्येदमग्र आसीदित्येवमादिषु । यत्रापि विधिः श्रूयते आत्मा वा अरे द्रष्टव्यः तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति । तत्र यद्यपि कृत्या अविशेषेण विधौ स्मर्यन्ते तथापि यो भावाभिधायी † तव्यप्रत्ययः स क्रियाप्रधानत्वात् क्रियायां पुरुषं नियोक्तुं शक्नोति । यत्र पुनः कर्म प्राधान्येनोच्यते तत्र द्रव्ये गुणभूतां क्रियां ‡ कार्यान्तरसम्बन्धित्वेन विधातुं न शक्नोति । द्रव्यपरत्वे चानुत्पाद्यत्वादविकार्यत्वादनाप्यत्वादसंस्कार्यत्वात् संस्कृतस्य च कार्यान्तरे उपयोगाभावादसंस्कार्यत्वम् । अत आत्मानमुपासीतेत्यात्मन ईप्सिततमत्वं न सम्भवति । अथ पुनर्विपरीतो गुणप्रधानभावः सक्तुन्यायेन § कल्प्येत । तत्रापि न ज्ञायते किं तदुपासनं कथं चात्मना तत्क्रियत इति । अथ ज्ञायते ज्ञानमुपासनम् आत्मा च विषयभावेन त ‖ न्निर्वर्तयतीति । एवं तर्हि तदेवायातं ज्ञानेना ¶ त्माप्यत इति । तच्च कृतकरणमनर्थकम् नित्याप्तत्वादात्मनः । संस्कार्य्यत्वे चोपयोगाभाव उक्तः । अतो विध्यभावादविचारितार्था वेदान्ता इति धर्मजिज्ञासानन्तरं स्नाने प्राप्ते इदमारभ्यते अथातो ब्रह्मजिज्ञासेति । अनन्तरं ब्रह्म जिज्ञासितव्यं न स्नातव्यमित्यभिप्रायः । कर्माभिधायिनोऽपि **कृत्यप्रत्ययान्नियोगसंप्रत्ययान्न नियोक्तृत्वं निराकर्तुं शक्यते कटस्त्वया कर्तव्यो ग्रामस्त्वया गन्तव्य इतिवत् । यत्तूक्तम् । द्रव्यपरत्वे प्रयोजनाभावादानर्थक्यं नियोगस्येति । तदसत् । अविद्योच्छेदस्योपलभ्यमानत्वादविद्या च संसारहेतुभूता ।

अपरे पुनरेवमारभन्ते । ब्रह्मणि †† प्रत्यक्षादिप्रत्ययान्तराणामसंभवात्परिनिष्पन्ने वस्तुनि प्रतिपत्तिहेतुतया सम्भावितसामर्थ्यानामप्याम्नायस्य पुनः

* सौम्येदमित्येवं सर्वत्र पाठस्त्वेऽपि सोम्येदमिति ग्रौतः पाठः ।

† तव्येति नास्ति ३ पु० । ‡ क्रियां नेत्येवमयमो नकारः पूर्वमस्ति ३ पु० । कुकल्पेतेति ९, २ पु० ।

‖ निवर्त्तयतीति १ पु० । ¶ आत्मा प्राप्यत इति २ पु० ।

** तव्यप्रत्ययादिति २ पु० । †† प्रत्यक्षादीति २, ३ पु० नास्ति ।

कार्यविषयतया सुतरामसंभवं मन्वानस्य भवति संकर्षपर्यन्ते वेदार्थविचारावसानमिति बुद्धिस्तन्निरासार्थं पुनः प्रतिज्ञातमिहापि सर्वेष्वेवात्मज्ञानविधानेषु कार्यनिष्ठतां वर्णयन्ति समाम् । तत्त्वावबोधश्च * कार्यमधिकारिनियोगविषयतयाऽवगमादिति । ततस्तद्विचारार्थं शास्त्रमारब्धव्यमिति ।

अत्रोच्यते । नारब्धव्यम् गतार्थत्वात् । कथम् । यस्तावत्प्रथम आरम्भप्रकारः कर्मणि † कृत्यप्रत्ययेन नियोगसंप्रत्यय इति तत्स्वयमेव विधायकत्वं दर्शितम् प्रसिद्धं चैतत् स्वाध्यायो ऽध्येतव्य इत्येवमादीनां विधायकत्वम् । ‡ नचाशङ्काकारणं किञ्चित् । ननु चतुर्विधस्यापि क्रियाफलस्यात्मन्यसंभव उक्तः । यद्येवं सत्कुन्यायो भविष्यति । तदपि न । § आत्मविषयज्ञानस्य नित्यसिद्धत्वादित्युक्तम् । सिद्धस्यैव पुनरभ्यासो विधिनिमित्त उपासनाख्यो भविष्यति अभ्युदयफले हिरण्यधारणवत् । ननु न विधानतो ऽप्यात्मविषयज्ञानसन्तानः कर्तव्यः । स तु नित्यमात्मनि जायतः सिद्धः । एवं तर्ह्यर्थो ‖ विरुद्धेषु कालेष्वात्मन्येव चेतःसमाधानं भविष्यति । यत्पुनरात्मज्ञानादविद्योच्छेदस्तदुच्छेदात्संसारनिवृत्तिः फलमित्युपन्यस्तम् । तदसत् । अहमित्यात्मानं नित्यमेव जानाति सर्वो लोकः न च संसारो निवृत्तः । अथ पुनरहंप्रत्ययावसेयादन्यदेवात्मरूपं परावृतभोक्तृभोक्तव्यभोगग्रन्थि ज्ञेयत्वेनात्मज्ञानविधिना ज्ञाप्यत इति । तदसत् । विधिर्हि सामान्यतःसिद्धस्य क्रियात्मनो विशेषसिद्धौ प्रभवति नात्यन्तमसिद्धसद्भावे । तद्यदि नाम ज्ञानं लोके ¶ सिद्धं तथापि निरस्तप्रपञ्चात्म ** विषयमसिद्धम् आकाशमुष्टिहननवन्न विधातुं शक्यम् । अथ तादृगात्मज्ञानं सिद्धं किं विधिना । यदपि मतान्तरं प्रत्यक्षादेरगोचरत्वाच्छास्त्रस्य च कार्यार्थत्वात्संकर्षपर्यन्त एव विचारे वेदार्थपरिसमाप्तौ प्राप्तायां वेदान्तेष्वपि कार्यनिष्ठता समाना । ब्रह्मतत्त्वावबोधश्च कार्यम् अधिकारिनियोगविषयतया ऽवगमात् । अतस्तद्विचाराय शारीरकारम्भ इति । तदप्युक्तेन न्यायेन ब्रह्मावगमस्य सिद्धत्वे ऽसिद्धत्वे च कार्यत्वासंभवेन प्रत्यु-

* कार्योऽधिकारीति ३ पु० ।
† कृत्यप्रत्ययेनेति १ पु०, कृत्यप्रत्ययेन न नियोगेति ३ पु० शोधितमस्ति ।
‡ नात्र शङ्काकारणमिति २ पु० ।
§ आत्मन्यविषय ज्ञानस्येति १ पु०, आत्मविषयस्य ज्ञानस्येति ३ पु० ।
‖ अर्थाविरोधिष्यिति ३ पु० । ¶ लोकप्रसिद्धमिति २ पु०, लोके प्रसिद्धमिति ३ पु० ।
** आत्मविषयकमिति ३ पु० ।

क्तम् । अपरं मतम् । सत्यं कार्यविषयो वेदो न तु तावन्मात्रे । तस्मिन् सति योऽर्थोऽवगम्यते स वेदार्थः यथा रूपे सति चक्षुषः प्रवृत्तिः न च रूपमात्रं चक्षुषो विषयः किंतु तस्मिन्सति द्रव्यमपि । एवमिहापि वस्तुतत्त्वमपि * विषयः । † कथम् । तदुच्यते । इदं सर्वं यदयमात्मेति न तावत्सर्वात्मरूपतात्मन उपदिश्यते यदि सर्वरूपता ऽऽत्मन उपदिश्येत ततः सर्वस्याचेतनत्वात् तद्रूपत्वे बोद्धृत्वहानौ बोधकत्वं शब्दस्य हीयेत । अतः सर्वस्यात्मस्वभावता विधीयते ऽनात्मस्वभावविलयेन हि वस्तुनो ऽवगतिर्दृष्टा । नन्वत्र विधिर्न श्रूयते । एवं तर्हि कल्प्यतां विधिः । किं प्रतीते विध्यर्थं विधिः कल्प्यते उताप्रतीत इति । यदि प्रतीते कल्प्यते कल्पनावैयर्थ्यम् । अर्थप्रतीत्यर्थं हि शब्दोमृग्यते प्रतीते ऽर्थे शब्दं कल्पयता किं कृतं स्यात् । अथाप्रतीत एव विध्यर्थं विधिं कल्पयित्वा ततो ऽर्थः प्रतिपत्तव्य इत्यपूर्वं प्रमाणकौशलम् । नन्वश्रूयमाणविधि ‡ ष्वपि तस्मात्पूषा प्रपिष्टभागो ऽदन्तको हीत्यादिषु विधिः कल्पितः । सत्यम् । युक्तं तत्र पूष्णः पिष्टद्रव्यसम्बन्धः समासाभिहितो न सिद्धो न वर्तते नापि कुतश्चिद्भविष्यतीति प्रमाणाभावात् । नाऽपि विधिना केनचित्पदैकवाक्यता येन वपोत्खननादिवत्कथंचिदालम्बनं कल्प्येत । अतो निरालम्बनत्वपरिहाराय § कार्यपरता कल्प्यत इति ।

न ‖ न्वत्राप्यात्मपदं चेतनस्य भोक्तुर्वाचकम् सच नियोज्यत्वान्नियोगमाक्षिपति । नैतत्सारम् । नियोगो हि पुरुषविशेषमनाश्रित्यानुपलब्धो लोके तमाक्षिपेत् विश्वजिदादिषु । पुरुषः ¶ पुनः किं नियोगमन्तरेण नोपलब्धो लोके येन विधिकल्पना भवेत् । अथापि भवतु नाम विधिः नासौ धातुना विना केवलो लभ्यते । धातुनैव सह ** कल्प्यते । कोसौ धातुः । यदि तावत्कर्तव्यमिति तत्रानात्मस्वभावता न निवृत्ता प्रपञ्चस्य । यथा ऽमी पिष्टपिण्डाः सिंहाः क्रियन्तामिति पिष्टस्वभावता †† न निवृत्ता । इतिकर्तव्यता चानिर्दिष्टा तत्र साकाङ्क्षं वचनमर्थनकं स्यात् । अथ ज्ञातव्य इत्यध्याहियेत । एवमपि स एव दोषः अनात्मस्वभावता न निवृत्तेति अशक्यार्थोपदेशश्च ।

* तत्त्वमपि वेदस्य विषय इति पाठो २ पुस्तके । † कथं तत् उच्यते-इति १, २ पु० ।
‡ विधिकेष्वपीति ३ पु० । § कार्यता कल्प्यत इति २, ३ पु० । ‖ नन्विहापीति ३ पु० ।
¶ पुनरिति नास्ति ३ पु० । ** कल्प्यतामिति ३ पु० । †† न निवृत्तेति पुनर्नास्ति ३ पु० ।

नहि वस्तु वस्त्वन्तरात्मना ज्ञातुं शक्यते । एवं तर्हि ज्ञातव्य इत्य * ध्याहृियेत । तच्च † धात्वर्थानुवादः प्रत्ययो विधायकः । कुतःप्राप्तेरनुवादः । अभिधानत ‡ इति ब्रूमः । एवं तर्हि विधानमनर्थकं स्वाध्यायकाल एव निष्पन्नत्वाज्ज्ञानस्य पुनः कर्तव्यतया चोद्यते यथा मन्त्रेषु प्रयोगवचनस्तच्च विधायक इतीहापि प्रयोगवचनो विधायकः ।

ननु मन्त्रेषु स्वार्थस्यान्यतःसिद्धत्वात्प्रत्ययपरत्वं युज्यते इह तु स्वार्थविधिपराणां शब्दानां प्रत्ययपरत्वं विरुध्यते । नैष दोषः । अन्यार्थमपि कृतमन्यार्थं भवति । तद्यथा शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते उपस्पृश्यते च । एवमिहापि । यथा § पदार्थानां विधायकः शब्दः क्रमस्यापि ‖ विधायकः । एवं स्वार्थस्य विधायकः शब्दः प्रत्ययस्यापि वि ¶ धायको भविष्यति । तदेतदनिरूपितमिव दृश्यते । कथम् । मन्त्राः ** स्वाध्यायविधिनोपादापिताश्चार्थस्यान्यतःसिद्धत्वात् तं प्रमातुमशक्नुवन्तः प्रमाणत्वात् प्रच्युताः व्रीह्यादिवत्प्रमेयतामापन्नाः श्रुत्यादिप्रमाणैर्युक्तम् यद्विनियुञ्ज्येरन् । विनियुक्ताश्चाऽनुष्ठेयस्यानुष्ठानकाले स्मृत्यपेक्षस्य स्मारकतया गृह्णेरन्निति । इह त्विदं सर्वं यदयमात्मेति यत्पदसमन्वयनिमित्तं सर्वस्यात्मस्वभावतायाहिविज्ञानं तत्स्वविषयस्यान्यतो ऽसिद्धत्वात्प्रमेयप †† रत्वान्न विधेर्विषयः । अथ विधेर्विषयो न प्रमेयमवगमयितु ‡‡ मलम् । न §§ च युगपदुभयं सम्भवति वैरूप्यप्रसङ्गात् ।

नन्वेवं सति गुणकर्मणां सर्वेच विधानं निराकृतं स्यात् । न निराकृतं स्यात् । यच्च प्रमाणान्तरसिद्धं गुणकर्मणः कर्मकारकं तच्च तस्योत्पत्त्याद्य ||| न्यतमफलं तद्विधीयते । यच्च पुनः ¶¶ प्रमाणान्तरादसिद्धो ज्ञानस्य कर्मभूतो विषयः स तेनैव प्रमीयमाणो न सिद्धवदुद्देश्यः येन तदुद्देशेन तच्चातिशयाधानाय ज्ञानं विधीयते । तस्मादच्च युगपदुभयासम्भवाद्भवत्येव वैरूप्यप्रसङ्गः । न च स एव समन्वयः स्वावयवाद्विधेर्विभक्तः कार्यक्षमः अवान्तर-

* अध्याहृियते–इति ३ पु· । † धात्वर्थोऽनुवाद इति ३ पु· ।
‡ इतिस्थाने एवशब्दः १, २ पु· । § अत्र 'वा' शब्दोऽधिकः ३ पु· ।
‖ विधायकइति पुनर्नास्ति ३ पु· । ¶ विधायकइति २, ३ पु· नास्ति ।
** स्वाध्यायाध्ययनविधीति २, ३ पु· । †† प्रमेयपरं न विधिविषय इति २, ३ पु· ।
‡‡ अलंस्थाने क्षममस्ति ३ । §§ चो नास्ति ३ पु· ।
||| अन्यतमत् फलमिति ३ पु· पाठस्तु न युक्तः । ¶¶ प्रमेणान्तरासिद्ध इति ३ पु· ।

वाक्यस्य प्रमाणत्वायोगात् । अथार्थवादपदानामिव परस्परतः संसृज्य कञ्चिदर्थमवबोध्य विधिसम्बन्धमनुभवेदित्यभिप्रायः । तदसत् । युक्तमर्थवादपदानि स्वार्थफलरहितानि तच्च पर्यवसानाभावात्फलवदङ्गतामश्नुवीरन्निति । इह पुनरपरामृष्टविधिः पदसमन्वयः स्वार्थमवगमयन्निरस्तनिखिलप्रपञ्चावग्रहमपास्तातिशया * नन्दनित्यानुभवैकरसं शिवमद्वैतमात्मतत्त्वमवगमयेत्तच्च कुतो विधिशेषताकृतं कृत्यं प्राप्तं प्रापणीयम् । आत्मलाभान्न परं † विधीयत इति स्मृतेः । अथ पुनः शाब्दज्ञानान्न तथा ऽनुभवः । तेन साक्षात्करणाय विधिरिति । किं तज्ज्ञानमनुभवाय विधीयते प्रत्यक्षादीनां तावदगोचरः न चक्षुषा गृह्यत इत्यादिमन्त्रवर्णात् । शाब्दं च नेष्यते भवता । सत्यम् । न ‡ शाब्दज्ञानं विधिविकलमनुभवायालम् विहितं त्वनुभवहेतुरिति । तदयुक्तम् । यत्तावत्स्वाध्यायाध्ययनविधियाहितात्पदसमन्वयात्स्वभावतःसमुत्पन्नं तत्तावन्न विधीयते प्रमेयपरतया विधिविषयत्वानुपपत्तेरित्युक्तम् । अथ पुनस्तदेव ज्ञानं सन्तनुयादिति विधीयते । तत्कथं लभ्यते उपास्तिध्यायत्योर्ज्ञानसन्तानवाचिनोरन्यतरस्याप्युपादानमन्तरेण । नापि ज्ञानेनैव स्वसन्तानो लक्ष्यते । साहचर्यादव्यभिचरितसम्बन्धाभावात् । नाप्यभ्यासात् साक्षाद्भावः सिद्धः । नापि श्रूयते येन तदुद्देशेन ज्ञानसन्तानो विधीयेत । ननु किमत्र श्रवणेन स्वयमेव § साक्षात्कारकरणाय पुरुषार्थत्वादभिमुखः पुरुषः सिद्धश्च ज्ञानाभ्यासः शास्त्रश्रवणादौ साक्षात्करणे ‖ हेतुः । यद्येवं किं विधिना । स्वयमेव पुरुषार्थे निर्ज्ञाते हेतौ प्रवर्तते । यत् पुनर्निदर्शनम् शाल्यर्थे कुल्याः प्रणीयन्ते इति । युक्तम् तच्च प्रत्यक्षत उभयार्थतायां उपलभ्यमानत्वात् । इह पुनर्न्यायतः प्रतिपत्तव्यम् । स च न्यायो ¶ युगपन्न सम्भवतीत्युक्तम् । यदपीदमुक्तम् ** पदार्थानां विधायकः शब्दः क्रमस्यापि विधायकः । एवमैकात्म्यस्य प्रतिपादकः समन्वयो विधिविषयमपि ज्ञापयिष्यतीति । तदप्यपेशलम् । यत्तावत्प्रत्येकं प्रयाजादिविधयस्तैः पुनर्न तेषामेव विधानम् । नाऽपि ते क्रमशब्दाभिधेयाः । प्रयोगवचनो ऽपि

* आनन्दानन्यानुभवेति ३ पु· । † विद्यते इति २ पु· । ‡ शाब्दं ज्ञानमिति ३ पु· ।
§ साक्षात्करणायेति ३ पु· । ‖ साक्षात्कारणे इति १ पु· ।
¶ न युगपदिति ३ पु· ।
** अत्र यथाशब्दोऽधिकः क्रतोऽस्ति ३ पु· ।

प्रयुञ्जानस्तानेव प्रयुङ्क्ते * न क्रम इत्युक्तम् । नच क्रमो नामैकान्ततो नास्त्येव । तद्बुद्धिशब्दयोर्निरालम्बनत्वप्रसङ्गात् । तच क्रमो नाम वस्तुभूतो धर्मो विद्यत एव † त एव केनचिदुपाधिना वनवत्क्रमबुद्धिशब्दालम्बनं भवेयुः । स्मृति ‡ विज्ञानमेव वा ऽनुष्ठानकाले यथोपलब्धि पदार्थान् परामृशेत् सर्वथास्ति तावदेकैकपदार्थालम्बनज्ञानातिरिक्तं ज्ञानान्तरम् । तच्चैकत्वात् कर्तुरनेकत्वाच्च पदार्थानां युगपदनुष्ठानासम्भवादपेक्षितं सन्निहितं च प्रयोगवचनेन गृह्यत इति युक्तम् । न तथेह ज्ञानद्वयमस्ति । यदैकात्म्ये विधिविषयत्वे च वर्तेत । तस्मादिह विधेयाभावाद्विधानाश्रवणादध्याहारे च प्रमाणाभावान्न प्रयोगवचनेोस्ति यो मन्त्राणामिव ज्ञानस्यापि पुनः प्रयोगं § विधास्यते । तस्मादसदेतत् कार्यविषयोऽपि वेदो वस्तुतत्त्वमवबोधयतीति । यत् पुनर्निदर्शनं चक्षू रूपे सति द्रव्यमपि बोधयत्येवं कार्ये सति तत्त्वमपि वेदो ‖ ऽवगमयतीति । युक्तं तच यद्यदवबोधयति चक्षुस्तच स्वतन्त्रमेव प्रमाणम् इह पुनर्यच तात्पर्यं तस्य प्रमेयता न यद्यत्प्रतीयते तस्य तस्येति वैषम्यम् । आह । मा भूज्ज्ञानद्वयम् योयमाभिधानिकः प्रत्ययः स विधिविषय एव ¶ भवतु तस्मिन् विहितेऽर्थात्सर्वस्यात्मस्वभावता सिध्यति सविषयत्वादवगमस्य । एवमप्यऽविवक्षितो ऽर्थः शब्दाद्विवक्षितस्त्वर्थादिति शोभतेतरां वाक्यार्थ ** वित्ता । नच नियोगतः प्रतिपत्तिविधिर्वास्तवं संसर्गं †† गमयति भवन्ति हि परिकल्पितविषया अपि प्रतिपत्तयश्चोदनालक्षणाः फलवत्यो वाचं धेनुमुपासीतेत्येवमाद्याः । यत्तदेवाच युक्तम् अतत्परस्य प्रत्यक्षादिविरोधे ‡‡ तथाध्यवसायहेतुत्वायोगात् । तस्मात्कार्यनिष्ठे वेदे वस्तुतत्त्वसिद्धिर्मनोरथ एव । अतो ऽहंप्रत्ययावसेय एवात्मा न तस्य शब्दावसेयमतीन्द्रियं रूपान्तरमस्ति शब्दस्य तच सामर्थ्याभावात् । एवं च सत्ययमात्मा ब्रह्म एष त आत्मान्तर्याम्यमृत इति ब्रह्मान्तर्याम्यादिशब्दा अहंप्रत्ययावसेय एवात्मनि कथंचिद्वर्तन्ते । तेन स आत्मा तत्त्वमसीति विद्यमानैरारोपितैश्च गुणैरात्मोपासनं मोक्षफलं च विधीयत इति युक्तम् । अतः कार्यानुरक्तस्य वेदार्थस्य सम्भवात्तस्य च सर्वा-

* न ते क्रमइति ३ पु० । † त एव वेति । ‡ विशब्दो नास्ति ३ पु० ।
§ परस्मैपदं ३ पु० । ‖ अवशब्दो नास्ति ३ पु० । ¶ भवतीति ३ पु० ।
** चिन्तेति २ पु० । †† अवशब्दोऽधिकः ३ पु० । ‡‡ तथाविधाध्यवसायेतिपश्चात्कृतम् ३ पु० ।

त्मना विचारितत्वात् किमपरममवशिष्टं यद् ब्रह्म जिज्ञासारम्भं प्रयुञ्जीत ।

उच्यते । स्यादेतदेवम् यदि सर्व एव वेदार्थो विचार्यत्वेनाथातो धर्मजिज्ञासेति उपक्रान्तो विचारितश्च स्यात् यावता कार्यनिष्ठ एव वेदभागो विचारितो न वस्तुतत्त्वनिष्ठः । तथा हि । शास्त्रारम्भो व्याख्यातृभिरेवं निरूपितः । कथम् । धर्मो नाम कश्चित्साधयितुः कालान्तरे श्रेयःसाधनो लोकाख्यप्रमाणाभासोत्थेन ज्ञानेन सामान्यतो विषयीकृतः तद्विशेषं प्रति विप्रतिपन्नाः परीक्षकाः । केचिदग्निहोत्रादिकं धर्ममाचक्षते केचिच्चैत्यवन्दनादिकम् । तच्च अग्निहोत्रादिलक्षण एव धर्मोऽभिप्रेतो न तत्प्रतिपादकानां वेदवाक्यानां विचारावसरो नापि विवक्षितार्थत्वम् । अतश्चैत्यवन्दनादीनामेवान्यतमो धर्मस्तत्प्रतिपादकानां बुद्धादिवाक्यानामेवा * न्यतमद्विचार्यं न वा तदपि । नहि पौरुषेये वाक्ये शब्दशक्त्यनुसारेणार्थोऽपि तु तेन विवक्षित इत्येवमाशङ्क्य ते धर्माय वेदवाक्यानि विचारयिष्यँस्तदर्थविवक्षाविचारावसरप्रदर्शनार्थमथातोधर्मजिज्ञासेति सूचयामास जैमिनिः । वेदमधीत्यानन्तरं धर्मजिज्ञासा कर्तव्या न स्नानं गुरुकुलनिवृत्तिरूपमिति दर्शयितुमिति । एवं स्थिते शास्त्रारम्भे न सर्ववेदार्थविषयं शास्त्रमिति प्रतीतिः किन्तु धर्मोतिरिक्तोऽपि सिद्धरूपो वेदार्थोऽस्ति स च पर्युदस्तो जैमिनिना । न्यायान्तरविषयत्वादिति गम्यते । तत्कथं यत्तावदिदम् उच्यते धर्मो नाम लोकप्रवादात्सामान्यतः सिद्धस्तस्य स्वरूपप्रमाणयोर्विप्रतिपत्तावग्निहोत्रादिरपि वेदार्थो धर्मतया विचारपदवीमुपारोहति यतस्तस्यापि विचारावसरो विद्यते तेन विवक्षितोऽसौ न चाध्ययनमात्रात् कृतकृत्यता अतोध्ययनानन्तरं न गुरुकुलान्निवर्तितव्यम् किन्तु † वेदार्थो धर्मः किं वान्य एवेति जिज्ञासामर्हतीति वदितुं धर्मग्रहणं युक्तम् । अथातो धर्मजिज्ञासेति न वेदार्थजिज्ञासेति यतो न वेदार्थतया ‡ ज्ञाने प्रवृत्तिर्यत्पुनर्धर्मस्य स्वरूपप्रमाणकथनाय द्वितीयं सूत्रं तद्वेदप्रामाणको धर्म इति स्यात् । किमिदं चोदनालक्षण इति तन्नूनं § न सर्वो वेदो धर्म एव कार्यात्मके पर्यवस्यति कश्चिदस्य भागः कार्यता ‖ शून्ये वस्तुतत्वेपि वर्तत इति मन्यते ।

* अन्यतमद्विचार्यमिति त्रिष्वपि पुस्तकेष्वस्ति· अन्यतमं विचार्यमिति तु न्याय्यम् ।
† तदर्थो धर्म इति ३ पु· । ‡ धर्मज्ञाने इति पश्चात्कृतम् ३ पु· ।
§ नशब्दोऽत्र नास्ति ९ पु·। ‖ शून्य एव वस्तुनि–इति ३ पु· ।

ननु चोदनाग्रहणस्यान्यदेव प्रयोजनम् चुद प्रेरण इति * प्रेरणाकर्मणश्चोदनेति रूपम् । ततः प्रेरणात्मको विधिरपुरुषार्थं प्रेरयितुमशक्नुवन् पदान्तराभिहितमपि स्वर्गादिकं भावनाकर्मतामापादयति एकपदोपादानात्संनिहित † तरं धात्वर्थं विहायेति कथयितु ‡ मिति । नैतत्सारम् । अध्ययनविधिरध्ययने माणवकं प्रेरयन्नध्ययनस्य पुरुषार्थरूपार्थावबोधकत्वमनापाद्य न शक्नोति प्रेरयितुम् पारम्पर्येणाप्य ऽपुरुषार्थे विधेरपर्यवसानात् । अतस्तदर्थं न चोदनाग्रहणम् वेदग्रहणेनापि तत्सिद्धेः । अपि च वेदग्रहणमेव युक्तम् असन्देहाच्चोदनाग्रहणे § हि सन्देहः स्यात् लोकेऽपि विद्यमानत्वात् । अथ वेदाधिकरणे ‖ वेदाँश्चैके सन्निकर्षमिति विशेषाभिधानाद् वैदिकत्वसिद्धिरिति । सोऽयमाऽऽभाणको लोके पिण्डमुत्सृज्य करं लेढीति सूचकारस्याप्यकौशलं ¶ प्रदर्शितं स्यात् । अतश्चोदनाग्रहणादऽचोदनात्मकोऽपि वेदभागोऽभिप्रेत इति गम्यते येन वेदार्थमात्रस्य धर्मत्वं मा भूदिति चोदनेत्यवोचत् । तदेवं सूचकार एव स्वशास्त्रविषयातिरिक्तं वेदभागमविचारितमसूसुचत् । ननु दृष्टो हि तस्यार्थः कर्मावबोधनं** तद्भूतानां †† क्रियार्थेन समाम्नायः आम्नायस्य क्रियार्थत्वादिति च सर्वस्य कार्यार्थत्वं दर्शितम् । सत्यम् । तत्प्रक्रमबलात्तन्निष्ठे वेदभाग इति गम्यते न सर्वत्र । अपिच । ‡‡ दृष्टो हि तस्यार्थः कर्मावबोधनमिति न सर्वस्य कर्मावबोधनमर्थ उच्यते । कथम् । वेदाध्ययनानन्तरं स्नानविधायकमाम्नायमुपलभ्य वेदस्यानर्थकत्व आशङ्किते अतिक्रमिष्याम इममाम्नायम् अनतिक्रामन्तो वेदमर्थवन्तं सन्तमनर्थकमवकल्पयेम दृष्टो हि तस्यार्थः कर्मावबोधनमित्यर्थसद्भावः प्रदर्शितो नार्थान्तरासद्भावः । सोयमयोगव्यवच्छेदो नान्ययोगव्यवच्छेदः । कर्मशब्देन §§ धर्म एव कार्यत्वादभिहितः । यतस्तदवबोधप्रवृत्तौ वेदस्यार्थवत्त्वं मृगयते किं वेदस्यार्थो विद्यते न वा स च धर्मत्वेनावगन्तुं शक्यते ‖‖ न वेति । तस्मान्न कर्मावबोधनमेव ¶¶ वेदार्थोऽभिप्रेतो भाष्यकृतः । यत्पुनरास्ना-

* प्रेरणाकर्मणा इति ३ पु· । † तरपः स्थाने तमप् ३ पु· । ‡ इतिशब्दो नास्ति ३ पु· ।
§ अपिशब्दो ऽधिकः १, २ पु· । ‖ वेदाश्चैके- इति १ पु· । ¶ प्रशब्दो नास्ति ३ पु· ।
** नामेति पश्चात्पूरितम् ३ पु· । †† क्रियार्थे-इति १ पु· । ‡‡ दृढो हि इति १ पु· ।
§§ चशब्दोऽत्राधिकः ३ पु· । ‖‖ नवेति नास्ति ३ पु· । ¶¶ वेदस्याभिप्रेतमिति ३ पु· ।

यस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति । तच्च यद्यानर्थक्यमर्थाभावः । तदसत् । यत एव * मेवम्भूता † र्थमनुवदन्तीति ‡ दर्शितो ऽर्थः । अथ निष्प्रयोजनत्वम् § । स्वाध्यायाध्ययनविधिर्निष्प्रयोजनमक्षरमात्रमपि ‖ न ग्राहयतीति भवतु सोरोदीदित्यादीनामपुरुषार्थप्रतिपादकत्वादेकवाक्यत्वात् पृथक्कार्यकल्पनानुपपत्तेः ¶ कल्पयितुं चाशक्यत्वात् । यानि पुनरपास्ताशेषाशिवमात्मानमनुभवपर्यन्तमवबोधयन्ति वाक्यानि तान्य ऽनवद्यप्रयोजनत्वाद्भवन्ति ** तरामेव प्रयोजनवन्ति । अतः स्वयमपुरुषार्थत्वात्तदर्थोपकारितया कथञ्चित् †† पुरुषार्थस्तावकत्वेन प्रयोजनवत्त्वमुक्तम् न सर्वस्यैवाक्रियार्थत्वेनानर्थक्यमाशङ्क्य क्रियार्थत्वेनार्थवत्त्वमुक्तम् । तथा च तद्विधान्येव तच्च वाक्यान्युदाहृतानि । यदपि केचिच्छास्त्रप्रस्थानमन्यथा वर्णयन्ति । न हि किलैवं शास्त्रं प्रस्थितम् किं वेदलक्षणो धर्म उत बुद्धवाक्यादिलक्षण इति । किं तर्ह्यधीतवेदस्य यो ऽर्थो ‡‡ वगतस्तत्रैव विप्रतिपत्तयः सन्ति किमयमसावुतायमिति त §§ न्निराकरणार्थः शास्त्रारम्भ इति । तत्रापि न निखिलवेदार्थविचारप्रतीतिः । ‖‖ तत्कथम् । तथा सति अथातो वेदार्थजिज्ञासेति स्यात् । यतो न धर्म इति कृत्वा विचारः किन्तु वेदार्थ इति । सत्यम् । तथापि शास्त्रकाराणां पुरुषार्थसिद्ध्यर्थं शास्त्रप्रणयनम् ततश्च पुरुषार्थ ¶¶ कथनार्थे धर्मग्रहणमिति । एवम् तर्हि धर्म इत्येव कृत्वा विचारो भवतु तस्य पुरुषार्थत्वात्संदिग्धत्वाच्च । तथा चोत्तरमपि सूत्रमनुगुणं भवति चोदनालक्षणोर्थो धर्म इति धर्मस्वरूपविप्रतिपत्तिनिरासपरम् । इतरथा वेदार्थविप्रतिपत्तौ तन्निरासार्थं चोदनालक्षणो वेदार्थ इति स्यात् । यतो न धर्मग्रहणे सति वेदार्थविप्रतिपत्तिः शक्या निराकर्तुम् । कथम् । यत्तावच्चोदनालक्षणो योऽर्थः स धर्म इति धर्मत्वं ज्ञाप्येत *** तदा स एव वेदार्थो नान्य इति न लभ्यते । अथ पुनः स धर्म इति नामनामिसम्बन्धो विधीयते । तदप्रक्रान्तम् निष्प्रयोजनम् अति-

* एवंस्थाने एवशब्दः ३ पु० । † भूतमर्थमिति ३ पु० ।
‡ प्रदर्शित इति ३ पु० । § निष्प्रयोजनत्वं व्याख्यायेतेति २ पु० ।
‖ नेत्यत्र नास्ति किन्तु पूर्वत्र ३ पु० । ¶ कल्पयितुमशक्यत्वादिति १, २ पु० ।
** अतितरामिति ३ पु० । †† पुरुषार्थेति नास्ति ३ पु० । ‡‡ योऽर्थावगम इति ३ पु० ।
§§ तन्निरासार्थ इति ३ पु० । ‖‖ तदिति नास्ति ३ पु० ।
¶¶ रूपार्थेति अधिकम् ३ पु० । *** तदानेति क्वचित् ।

प्रसङ्गश्चा * ऽऽपद्येत । अथापि कथंचिद्धर्मशब्देन वेदार्थ एवोच्यत इति कल्प्येत । तथा सति चोदनालक्षणो वेदार्थो नार्थवादादिलक्षण इति † सिद्ध-प्रमाण्यवेदार्थविचारो ऽयं स्यात् उत्तरलक्षणवत् । तचानन्तरं प्रामाण्यप्रति-पादनं न युज्येत । वृत्तं प्रमाणलक्षणमिति च मन्त्रार्थवादेषु ‡ कार्यार्थत्वे विप्रतिपत्तिर्न स्यात्सा चोत्तरचैव निरस्यते । अतः पूर्वोक्तेन न्यायेन काय-निष्ठ एव वेदभागो विचार्यतया प्रक्रान्तो विचारितश्च न वस्तुनिष्ठ इत्यतो वस्तुतत्त्वनिष्ठं वेदभागं विचारयितुमिदमारभ्यते अथातो ब्रह्मजिज्ञासेति ॥

॥ § इति द्वितीयवर्णकं समाप्तम् ॥



* चशब्दो नास्ति १ पु० । † सिद्धप्रमाणवेदेति १ पु० ।

‡ चशब्दः पुनः ३ पु० ।

§ इति वाक्यवृत्तिकायां द्वितीयवर्णकम्-इति ३ पु० ।

तत्राथशब्द आनन्तर्यार्थः परिगृह्यते नाधिकारार्थः । ब्रह्मजिज्ञासाया ऽनधिकार्यत्वादित्यादिभाष्यम् तज्जिज्ञासाशब्दस्यावयवार्थेनार्थवत्त्वे युज्यते । अधिक्रियायोग्यस्य ब्रह्मणस्तज्ज्ञानस्य * वा प्राधान्येनानिर्देशात् प्रधानस्य चे † च्छाया अनधिकार्यत्वात् । अयन्तु जिज्ञासाशब्दो विचारवचनो मीमांसापरपर्यायः प्रयुक्तो ऽभियुक्तैः इदमतो ‡ जिज्ञासन्ते किं क्रतुगुणकमुपासनं स्वामिकर्म उतर्त्विक्कर्मेति । इदन्तु जिज्ञास्यम् किं § नु खल्विमो ‖ तप्यतापकावेकस्यात्मनो भेदावुत जात्यन्तरमिति । धर्ममीमांसाभाष्यकारो ऽपि संघातमेव प्रयुङ्क्ते धर्मं जिज्ञासितुमिच्छेदिति । संघातवाच्यत्वाद्विचारस्य अन्यथैवमवक्ष्यत् धर्मं ज्ञातुमिच्छेदिति । अत एव धर्माय जिज्ञासा धर्मजिज्ञासेति संघातस्यार्थवत्त्वमङ्गीकृत्य चतुर्थीसमासो दर्शितः ¶ तदनुसारेण चैतानि भाष्याणि एवं** वेदवाक्यान्येवैभिर्विचार्यन्ते वेदवाक्यानि विचारयितव्यानि कथं वेदवाक्यानि विचारयेदिति च । पुनश्च क्रत्वर्थपुरुषार्थयोर्जिज्ञासा क्रत्वर्थपुरुषार्था जिज्ञास्यते इति । इहापि भाष्यकारो वक्ष्यति तस्माद् ब्रह्म जिज्ञासितव्यमिति । पुनश्च वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना †† प्रस्तूयत इति । अतः संघातस्यार्थवत्त्वादधिकारार्थता युज्यते । शास्त्रवचनो हि जिज्ञासाशब्दः । तेन ब्रह्मजिज्ञासा ऽधिकृता वेदितव्येति ।

उच्यते । नायं जिज्ञासाशब्दः परित्यक्तावयवार्थः केवलमीमांसापर्यायः प्रयुज्यमानो दृश्यते । नापि स्मरणमस्ति । न चावयवार्थेनार्थवत्त्वे सम्भवति समुदायस्यार्थान्तरकल्पना युक्ता । ननु ‡‡ न वयं कल्पयामः दर्शितः शिष्टप्रयोगः । न । तस्यान्यथासिद्धत्वात् । कथमन्यथासिद्धत्वम् । अन्तर्णीतविचारार्थत्वाज्जिज्ञासाशब्दस्य । तथा हि । विचारपूर्वकसाध्यज्ञानविषयेच्छा जिज्ञासाशब्दात्प्रतीयते नोपदेशमात्रसाध्यज्ञानविषया । एवं प्रयोगप्रत्यययोर्दर्शनात् तेन जिज्ञासाशब्दस्यावयवार्थेनार्थवत्त्वादुक्तमुक्तम् ब्रह्मजिज्ञासाया अनधिकार्यत्वादिति ।

* वाशब्दो नास्ति १, २ पु० । † चशब्दो नास्ति १, २ पु० ।
‡ जिज्ञास्यत इति ३ पु० । § नुशब्दो नास्ति १, २ पु० ।
‖ तप्यतपकाविति १, २ पु० । ¶ समासो नास्ति १, २ पु० ।
** वाक्यान्येभिर्विचार्यन्ते इति २ पु० । †† प्रसूयत इति १ पु० । ‡‡ नशब्दो नास्ति १, २ पु० ।

नन्वेवमपि कुत एतत् । अन्तर्णीतं विचारमाश्रित्य शब्दतो गुणत्वे ऽप्यर्थलक्षणेन प्राधान्येन ब्रह्मतज्ज्ञानयोरधिकारयोग्यत्वाच्चाधिक्रियमाणत्वमङ्गीकृत्याधिकारार्थत्वं किमिति न गृह्यते येन शब्दलक्षणेन प्राधान्येनेच्छाया अनधिकार्यत्वादानन्तर्यार्थत्वमेव परिगृह्यत इति । उच्यते । शास्त्रस्यानारम्भप्रसङ्गादऽधिकारार्थत्वानुपपत्तेः । अधिकारार्थत्वे ह्यप्रयोजनं शास्त्रं काकदन्तपरीक्षावदनारभ्यं स्यात् । तच्च कस्याधिकार * उच्येत ।

ननु ब्रह्मज्ञानं प्रयोजनम् तदर्थः शास्त्रारम्भः । न । ब्रह्मज्ञाने ऽर्थित्वानुपपत्तेः । ब्रह्मज्ञानाद्धि मनसो ऽपि वियोगान्निखिलविषयानुषङ्गनिवृत्तिः श्रूयते । सा च सार्वभौमोपक्रमं ब्रह्मलोकावसानमुत्कृष्टोत्कृष्टसुखं श्रूयमाणं सोपायं निवर्तयति । अतो ब्रह्मज्ञानादुद्विजते लोकः कुत † स्तच्च प्रवृत्तिः । नन्वानन्दरूपतापि ब्रह्मज्ञानादाप्यते अतस्तदर्थी प्रवर्तते तच्च । मैवम् । न हि ब्रह्मानन्दो ऽननुभूतपूर्वो ऽनुभूतभोग्यसुखाभिलाषं मन्दीकर्तुमुत्सहते येन ‡ तदुज्झित्वा ब्रह्मज्ञाने प्रवर्तेत । ननु परितृप्त § रूपतापि ब्रह्मज्ञानात् । अतः परितृप्तः किं कामयते अतृप्तिनिमित्तकत्वात्कामस्य । तथा च श्रुतिः ‖ आप्तकामः आत्मकामः । स्मृतिरपि आत्मलाभान्नपरं विद्यते एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारतेति । ¶ न । तृप्तेरेवोद्वेगदर्शनाद्विषयविच्छेदात्मिकायाः । तथा च वक्तारो भवन्ति । अहो कष्टं किमिति सृष्टिरेवं न बभूव यत् सर्वदैव भोक्तुं सामर्थ्यमऽतृप्तिर्भोग्यानां चाचष्ट इति । रागिगीतं श्लोकमप्युदाहरन्ति ** अपि वृन्दावने शून्ये शृगालत्वं स इच्छति । नतु निर्विषयं मोक्षं कदाचिदपि गौतमेति । मा भूद् ब्रह्मज्ञानार्थिता वेदार्थत्वादेव ब्रह्मज्ञानं कर्तव्यम् स्वाध्यायाध्ययनस्यार्थावबोधफलकत्वात् । स्यादेतदेवम् यद्यर्थावबोधफला ऽध्ययनक्रिया स्यात् । सा ह्यधीयमानाऽवाप्तिफलत्वादन्तरग्रहणान्ता । †† अथान्तरग्रहणं

* उच्यते इति ३ पु० ।
† तत्रेति २ पु० नास्ति ।
‡ तद्धित्वेति १, २ पु० ।
§ रूपशब्दो नास्ति ३ पु० ।
‖ आत्मकाम आप्तकाम इतीति ३ पु० ।
¶ न शब्दः १, २ पु० ।

** वरं वृन्दावनेऽरण्ये शृगालत्वं व्रजाम्यहम् । न तु वैशेषिकीं मुक्तिं कदाचिदपि गौतमेति ग्रन्थान्तरेषूपलभ्यते पाठः ।

†† अथान्तरग्रहणान्तेति १ पु०, पुनर्भवति ।

निष्प्रयोजनमिति न तच्च पर्यवसानं विधेः । भवतु तर्हि सत्कूनां गतिः । तदपि न । अक्षरेभ्यः प्रयोजनवदर्थावबोधदर्शनात् । न तर्हि निष्प्रयोजनान्यक्षराणि । अतस्तत्पर्यन्तमध्ययनं न निष्फलम् । अतो ऽक्षरग्रहणादेव नियोगसिद्धेः फलप्रयुक्त एवार्थावबोधः । अपिच । अक्षरग्रहणान्तो विधिर्निष्प्रयोजन इति न सर्वत्र प्रयोजनवदर्थावबोधपर्यन्तता कल्पयितुमपि शक्यते । तत्रावश्यं कल्पनीया ऽक्षरग्रहणान्तता । तद्यथा राजन्यस्य सत्रवैश्यस्तोमबृहस्पतिसवानामाम्नानं वैश्यस्य चाश्वमेधराजसूयसत्राणां पाठः । न च तेषामनध्ययनमेव । स्वाध्यायशब्देन सकलवेदवाचिना ऽध्ययनस्य विहितत्वात् । ननु चाश्रूयमाणाधिकारो ऽध्ययनविधिः दृष्टश्चाक्षरग्रहणे ऽर्थावबोधः स कल्पनामधिकारस्य निरुन्धन् स्वयमधिकारस्य हेतुः संपद्यते । दृष्टाधिकारेषु प्रत्यक्षतस्तदुपलब्ध्यावधिकारसिद्धिः । अतो ऽर्थावबोधपर्यन्तः स्वाध्यायाध्ययननियोगः । तेन नियोगसिद्ध्यर्थमेव सकलवेदार्थविचारः ।

अत्रोच्यते । भवेदध्ययनविधेरर्थावबोधः प्रयोजनम् । नाधिकारहेतुता अध्ययनात्प्रागसिद्धत्वात् । प्राक् चाधिकारज्ञानेन प्रयोजनम् । अतो न विधेर्दृष्टाधिकारत्वेनार्थावबोधसिद्धिः । यद्येवमधिकाराश्रवणादर्थावबोधे च प्रतिपत्तकल्पनानुपपत्तेः तस्य चाधिकारहेतुत्वानभ्युपगमादप्रवृत्तिरेवाध्ययने प्राप्ता ।

अत्र केचिदाहुः । आचार्यकरणविधिप्रयुक्तस्याध्ययनस्यानुष्ठानमाधानस्येव कामश्रुतिप्रयुक्तस्येति । तदयुक्तमित्यपरे । कथम् । अष्टवर्षं ब्राह्मणमुपनयीतेति यद्ययमाचार्यस्य नियोगः । माणवको न नियुक्तो भवति । अनियुक्तस्य च स्वाध्यायाध्ययने प्रवृत्तिर्न सम्भवति । किंचान्यत् । आचार्यकरणविधिरनित्यः ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहा इति वृत्त्यर्थो ऽधिकारः । अतः स्वेच्छातः प्रवृत्तिः । उपनयनाख्यस्तु संस्कारो नित्यः । अकरणे दोषश्रवणात् अत ऊर्ध्वं त्रयो ऽप्येते यथाकालमसंस्कृताः । सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥ नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् । ब्राह्मान् यौनांश्च संबन्धानाचरेद् ब्राह्मणः क्वचिदिति । संस्कारश्च स्वाध्यायाध्ययनार्थः एवं च स्वाध्यायाध्ययनमपि नित्यम् । तथा च निन्दाश्रवणम् अश्रोत्रिया अननुवाक्या अनग्नयः शूद्रसधर्माणो भवन्तीति । एवं चेत् कथं नित्यमनित्येन

प्रयुज्यत इति वाच्यम् । ननु कथमाचार्यकरणविधिरनित्यः । यावत्पुरुषं वृत्त्यर्थो हि सः । नहि कश्चिद्विना धनेन जीविष्यति । तथाचोक्तम् । जीविष्यति विना धनेनेत्यनुपन्नमिति । अतः सर्वेषां सर्वदा समीहितफलः सन् कथमनित्यः स्यात् । भवेदेवं नित्यता फलवशेन न शब्दात् । तथाहि । फलस्य नित्यसमीहितत्वादवश्यकर्त्तव्यता वास्तवी । तत्रासति शब्दव्यापारे इच्छातः कर्तव्यताप्रतिपत्तिः स्यान्न कर्तव्यताप्रतिपत्तेरिच्छा । शाब्दीं हि नित्यकर्तव्यताप्रतिपत्तौ शब्दस्य सर्वदा सर्वान् प्रत्येकरूपत्वादिच्छापि तद्वशवर्तिनी तथैव स्यात् । औचित्यादिभावे ऽपि कस्यचित्कथंचित् क्वचित् कदाचिदिच्छायाः । प्रमाणतस्तावन्नित्यः । तेन नित्येन तथाविधमेव प्रयुज्यत इति न नित्यानित्यसंयोगविरोधः । फलवशात्तत्कर्तव्यताप्रतिपत्तौ यद्यपि नित्याभिलषितं फलम् तथाप्युपायान्तरादपि तत्सिद्धेः तदेकोपायत्वे ऽप्यालस्यादाऽऽयासासहिष्णुतया वा कामस्य कुण्ठीभावे न कर्तव्यतायाः प्रतिपत्तिरित्यनित्यत्वे सति न तेन नित्यस्य प्रयोज्यत्वमुपपद्यते ।

ननु पितुः पुत्रोत्पादनविधिरनुशासनपर्यन्तः श्रूयते तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासतीति । अतः पुत्रोत्पादनस्य नित्यत्वात्तस्य चानुशासनपर्यन्तत्वात्तदाङ्गित्वाच्चोपनयनाध्ययनयोः कथमाचार्यकरणविधिरनित्यः स्यात् । कथं वा ऽध्ययनस्यार्थावबोधपर्यन्तता न भवेत् । उच्यते । नानेन पुत्रानुशासनं विधीयते पुत्रोत्पादनविधिशेषत्वेन स्वतन्त्रमेव वा । किन्तु सम्प्रतिकर्मविधिशेषो ऽयमर्थवादः तेनैकवाक्यत्वात् । अतो यथाप्राप्तमनुशासनमनुवदति । किं तदनुशासनम् कथं वा तत्प्राप्तवदनूद्यते । उच्यते । नित्यस्य पुत्रोत्पादनविधेः प्रयोजनं यत् पितॄणां लुप्तपिण्डोदकक्रियाणां नरकपातश्रवणात् पितृपिण्डोदकक्रियाद्यनुष्ठानेन नरकपातत्राणम् । न च शास्त्रीयेण परिज्ञानेन विना तदनुष्ठानं सम्भवति । तेन पित्रा नित्यमात्मनः पुत्रोत्पादनाधिकारं परिसमापयितुं पुत्रस्यावश्यकर्तव्यार्थविषयं गर्भाष्टवर्षेण ब्राह्मणेन त्वयोपनयनाख्यः संस्कारः कारयितव्यो यः स्वाध्याध्ययनार्थो विहित इति यदनुशासनम् तदिहानूद्यते तस्मादेनमनुशासतीति । तथा च लिङ्गम् । श्वेतकेतुर्हा ऽऽरुणेय आस तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै * सो-

* सोम्येति १, ३ पु०, श्रोतस्तु सोम्येत्येव पाठः ।

म्यास्मत्कुलीनो ऽननूच्य ब्रह्मबन्धुरिव भवतीति । तदेवमनित्येनाचार्यकरणविधिना कथं नित्यं प्रयुज्यत इति वाच्यम् । किंच । आचार्ये प्रेते आचार्यान्तरकरणं न प्राप्नोति । नह्यधिकारी प्रतिनिधीयते नाप्यधिकारः । अधिकारी स्वाधिकारसिद्ध्यर्थं साधनान्तर * मेषे साधनान्तरं † प्रतिनिधाय स्वाधिकारं निर्वर्तयतीति युक्तम् । एवमेषा बहुदोषा कल्पना दृश्यते । तस्मान्माणवकस्येष नियोगः । कथं गुणकर्तृव्यापारसंबद्धो विधिः प्रधानकर्तृस्थो भवति । यथैतया ग्रामकामं याजयेदिति ग्रामकामस्य यागो विधीयते गुणकर्तृव्यापारः प्राप्तो ऽनूद्यते तस्य याजनस्य वृत्त्यर्थत्वात् । एवमिहापि गुणकर्तृव्यापारो वृत्त्यर्थत्वेन प्राप्तो ऽनूद्यते ।

अत्रैके प्रत्यवतिष्ठन्ते । युक्तं याजयेदिति प्रधानकर्तृव्यापाराभिधायिनो यजतेः परस्य गुणकर्तृव्यापाराभिधायिनः शब्दान्तरस्य णिच उपादानात् तस्य चाविधेयत्वात् प्रधानकर्तृव्यापारस्याभिधानम् । इह पुनरेको नयतिर्माणवकस्य व्यापारं ब्रूयादाचार्यस्य वा । न ‡ तावन्माणवकस्य नयत्यर्थे कर्तृत्वम् । कर्मकारकत्वात्तस्य । अतो ऽनभिधेयव्यापारः § कथं ‖ नियुज्येत । न हि परव्यापारे परो नियोक्तुं शक्यते स्वव्यापारे हि पुरुषस्य नियोगः । तस्मान्नैष माणवकस्य नियोगः । तदेवमाचार्यकरणविधिप्रयुक्तत्वादध्ययनस्य नाचाधिकारचिन्तया मनः खेदयितव्यमिति । उच्यते । माणवकस्यैवायं नियोगः नाचार्यस्येह किञ्चिद्विधेयमस्ति । कथं यावत्तादुपनयीतेत्यस्याभिधानतो न्यायतश्च निरूप्यमाणोऽर्थ एतावान् प्रतीयते आत्मानमाचार्यं कर्तुं कञ्चिदात्मसमीपमानीयाध्यापयेदिति । एतच्च सर्वं वृत्त्यर्थत्वेन ब्राह्मणस्यान्यत एव प्राप्तम् नाच विधातव्यम् । तच्च कमऽध्यापयेदिति विशेषाकाङ्क्षायां ब्राह्मणमष्टवर्षमिति विशेषस्य विधायकमेतत्स्यात् । तच्च च प्राप्ते व्यापारे ऽर्थद्वयविधानमेकस्मिन्वाक्ये न शक्यते वक्तुम् वाक्यभेदप्रसङ्गात् । अतो नाचार्यस्य किञ्चिद्विधेयमिहास्ति । ननु माणवकस्यापि न किंचिद्विधेयमस्ति । अस्तीति ब्रूमः । कथम् । यदैवोपनयीतेति शब्दतो न्यायतश्चात्मानमाचार्यं कर्तुमुपनयनेन संस्कृत्य ¶ कंचिदध्याप-

* मेषे इति १ पु० । † प्रतिनिधीयेति २ पु० । ‡ नकारो नास्ति २ पु० ।
§ किंचिदिति २ पु० । ‖ नियुज्यते-इति २, ३ पु० ।

येदिति प्रतीयते तदैव यागश्रुतौ द्रव्यदेवतामात्रप्रतीतिवदऽध्ययनायोपनयनेन संस्कार्योपि समान्यतः प्रतीयते । तस्य च प्रेक्षावतो निष्प्रयोजने प्रवर्तयितुमशक्यत्वात् विद्यमानस्याप्यध्ययने ऽर्थावबोधस्य प्रागसिद्धिः प्रवृत्तिहेतुत्वासिद्धेः । विधितो ऽवश्यकर्तव्यतां प्रतिपद्य स्वयमेव प्रवर्तते । तेनाष्टवर्षं ब्राह्मणमुपनयीतेति अष्टवर्षो ब्राह्मण * उपसर्यदाचार्यमित्यर्थः ग्रामकामं याजयेद्ग्रामकामो यजेतेति यथा । नन्वेवमप्यधिकारो न लभ्यते । अस्त्यत्राधिकारहेतुर्नित्यं निमित्तम् वयोविशिष्टा जातिः जातिविशिष्टं वयो वा । ननु जातिवयसी विशेषणमुपादेयस्य अनुपादेयविशेषणमधिकारहेतुरिति स्थितिः । सत्यमस्तीयं स्थितिः किन्तु कर्तुरधिकारे इत्यपि स्थिता न्यायविदः । किंच । इह न माणवको जातिवयोविशिष्ट उपादेय उपनयने किं तूपनयनमेव † तदर्थं विधीयते संस्कारस्य संस्कार्योद्देशेन विधानात् । अतः संस्कार्यस्यावच्छेदकत्वं वयोजात्यवच्छिन्नं ‡ सद्भवति नित्यनिमित्तं माणवकस्य संस्कार्यत्व इति । तदेवमुपनयनस्याध्ययनार्थत्वात्तस्य च साधिकारत्वाऽत्तेनचाधिकारेण साधिकारो ऽध्ययनविधिः । अक्षरग्रहणमात्रेण चाधिकारसिद्धिः अर्थावबोधस्तु कारणान्तरादिति ।

ननु चैवमधीतो वेदो ‖ धर्मजिज्ञासाया हेतुर्ज्ञातः अनन्तरं धर्मो जिज्ञासितव्य इति वेद एवाधीतो ऽन्यनिरपेक्षो धर्मजिज्ञासाया हेतुरिति वदन्ति । सत्यम् । तथैव तत् को वा ऽन्यथा वदति अधीतवेदो ह्यवश्यकरणीयानि नित्यनैमित्तिकान्यऽकरणे ¶ प्रत्यवायजनकानि कर्माणि प्रतिपद्यते । तान्यनन्तरमेवावश्यविचारणीयानि कथमेतान्यनुष्ठेयानीत्यतः प्रागध्ययनादप्रतिपत्तेरयोग्यत्वादधीतवेदत्वमेवान्यनिरपेक्षमर्थावबोधहेतुरिति गीयते । न तथा ब्रह्मज्ञानमवश्यकर्तव्यम् अकरणे प्रत्यवायहेतुरिति प्रमाणमस्ति । तस्मादधीतवेदेनावश्यकर्तव्या धर्मजिज्ञासा नैवं ब्रह्मजिज्ञासा । तदेवं ** ब्रह्मजिज्ञासाया अधिकारानर्हत्वादहेयोश्च †† ब्रह्मतज्ज्ञानयोरनर्थ्यमान-

* उपसर्यैरिति पाठः सर्वपुस्तकेषु लभ्यते ।
+ तादर्थ्येन विधीयत इति २ पु० ।
‡ सदिति नास्ति ३ पु० ।
§ तेनैवाधिकारेणाधिकार इति ९ पु० ।
‖ धर्मस्य जिज्ञासाया इति २ पु० ।
¶ प्रत्यवायनिमित्तानीति २ पु० ।
** ब्रह्मज्ञानेच्छाया इति २ पु० ।
†† चशब्दो नास्ति २ पु०

त्वात् * जिज्ञासा ऽनुपपन्ना । मङ्गलस्यापि वाक्यार्थे समन्वयाभावात् श्रुतिमात्रोपयोगाच्च साधूक्तम् अथशब्द आनन्तर्यार्थः परिगृह्यते † नाधिकारार्थ इति । ननु प्रक्रियमाणात्पूर्वप्रकृतमपि किञ्चिन्नियमेन प्रतीयते ऽथशब्दात् ततस्तत्प्रतिपत्त्यर्थं किमिति न गृह्यते । उच्यते । नैतदानन्तर्याद्व्यतिरिच्यते । कथम् । एवम् । तत्प्रक्रियमाणस्य नियमेन पूर्ववृत्तं भवति । यदि तस्यानन्तरं तन्नाचापेक्षं तत्प्रक्रियेत एवं सति प्रक्रियमाणस्य हेतुभूतो ऽर्थः पूर्वनिर्वृत्तो भवति । अन्यथा यस्मिन् कस्मिंश्चित् पूर्ववृत्तापेक्षायामनुवादादृष्टार्थत्वयोरन्यतरत्वप्रसङ्गात् । अतो हेतुभूतोर्थो ऽपेक्षितव्यः तदिदमाह पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकादिति । सति चानन्तर्यार्थत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते तद्वक्तव्यम् स्वाध्यायानन्तर्यन्तु समानमिति । येन विना नियमेनानन्तरस्य न प्रक्रिया स तादृशो हेतुः पूर्वनिर्वृत्तो वक्तव्यो यस्यानन्तरं ब्रह्मजिज्ञासा प्रक्रियते । स्वाध्यायाध्ययनन्तु समानं साधारणो हेतुर्धर्मब्रह्मजिज्ञासयोः । अतश्चाथातो ब्रह्मजिज्ञासेति पुनरथशब्देन तन्नाचापेक्षणं व्यर्थं स्यात् । अथवा । समानं नात्यन्तमपेक्षितम् न स्वयमेव सामर्थ्यं जनयितुं प्रयोक्तुं च शक्तम् । अतः समानो हेतुर्नावश्यं निष्पादक इत्यर्थः ।

नन्विह ‡ कर्मविधिबोधानन्तर्ये विशेषः । तथा च वृत्त्यन्तरे वर्णितम् । कर्मणामधिकारपरम्परया शब्दतो वा संस्कारतया वा यथाविभागन्नादर्थ्यविगमान्निश्रेयसप्रयोजनत्वाच्चानन्तर्यवचनो ऽथशब्दो ऽधिगमानन्तरमिति अन्यैरपि स्ववृत्तौ वर्णितम् तथाथातःशब्दो प्रथम एवाध्याये प्रथमसूत्रे वर्णितौ । अथेति पूर्वप्रकृतां धर्मजिज्ञासामपेक्ष्यानन्तरं ब्रह्मजिज्ञासाप्रारम्भार्थः । अत इति पूर्वनिर्दिष्टस्यैवार्थस्य हेतुतामाचष्टे ब्रह्मजिज्ञासां प्रतीति । अत्राह न धर्मजिज्ञायाः प्राग्प्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरिति । वेदान्ताध्ययनं यद्यपि केवलं न § पुष्कलं कारणम् तथापि न तेन विनोत्पद्यते ब्रह्मजिज्ञासा उपपद्यते तु धर्मावबोधनं विनापीत्यभिप्रायः । कथम् । तच्च तावद्-

* जिज्ञासानुपपत्तेः २ पु० ।
† नाधिकारार्थ इति नास्ति २ पु० ।
‡ कर्मावबोधानन्तर्ये विशेष इति २ पु० ।
§ सुष्टं कारणमिति २ पु० ।

मेजिज्ञासायां चयं वृत्तं द्वादशलक्षणे प्रतिपादितन्यायसहस्रं तदनुग्रहोपजातश्च वाक्यार्थनिर्णयः वाक्यार्थश्चाग्निहोत्रादिकं कर्म । तच्च यः प्रथमसूत्रे ऽथशब्दापादानसूचितो न्यायः स्वाध्यायस्यार्थावबोधोपयोगप्रतिपत्तिहेतुः यद्प्योत्पत्तिकसूत्रे शब्दार्थयोः सम्बन्धनित्यत्वेन वेदान्तानां चापौरुषेयत्वेन कारणेनानपेक्षत्वं नाम प्रामाण्यकारणमुक्तम् । तदुभयमिहाप्युपयुज्यतामपेक्षितत्वात् । इतरस्य पुनर्न्यायकलापस्य न ब्रह्मजिज्ञासायामुपयोगो ऽस्ति । यतो निरस्ताशेषप्रपञ्चं ब्रह्मात्मैकत्वं प्रतिज्ञातम् तच्च न तत्प्रतिपादने तत्प्रतिपादनसामर्थ्ये वा शब्दानां कश्चिन्न्यायो ऽभिहितः । यत्पुनः प्रथमतन्त्रसिद्धन्यायोपजीवनम् अस्मिन्नपि तन्त्रे तत्सगुणविद्याविषयम् । तच्च मानसी क्रियोपासना विधेया ऽनित्यफला धर्मविशेष एव । तदेवं न्यायकलापस्य न ब्रह्मजिज्ञासायामुपयोगः । अतो न तदपेक्षो ऽथशब्दः । यत्पुनः स्वाध्यायस्यार्थावबोधोपयोगे ऽनपेक्षत्वेन स्वतःप्रामाण्यसिद्धौ च न्यायद्वयम् तदपेक्षितमपि न केवलं ब्रह्मजिज्ञासाकारणम् *स्वाध्यायवदेव तेन न तदपेक्षो ऽथशब्दः । यः पुनर्वाक्यार्थनिर्णयः स न कथमपि ब्रह्मजिज्ञासायामुपयुज्यते । न ह्यन्यविषयं ज्ञानमन्यत्र प्रवृत्तौ हेतुः । प्रतिपत्तौ कदाचित् स्यादपि यथा ऽनुमानादौ । तदपीह नास्ति । धर्मब्रह्मणोः सम्बन्धानिरूपणात् । अतः कर्मणामुपयोगः परिशिष्यते । तथाच तैरप्युक्तम् । कर्मणामधिकारपरम्परया शब्दतो वा संस्कारतया वा यथाविभागं तादर्थ्यावगमादिति । अचेदं निरूप्यते । केयमधिकारपरम्परा कथं वा तादर्थ्यमिति । यथा तावत् प्रासादमारुरुक्षोः सोपानपरम्परा क्रमशः प्राप्यमाणा प्रासादारोहणहेतुर्न तथेह ब्रह्मजिज्ञासां चिकीर्षोः कर्माणि सहस्रसंवत्सरपर्यन्तानि तत्क्रियाहेतुतया स्थितानि प्रमाणाभावात् । अथ †कामोपहतमानसस्तद्भिमुखो ब्रह्मजिज्ञासायां नावतरति । कर्मभिस्तु कामान्वाप्तौ तदुपशमाद् ब्रह्मजिज्ञासायामवतरति । तथा च सार्वभौमत्वादुत्तरोत्तरशतगुणोत्कर्षावस्थितान् ‡ब्रह्मलोकावाप्तिपर्यन्तान् कामानवाप्नुवन्ति अधिकारपरम्परया कर्माणि ब्रह्मलोकात्परं कामयितव्याभावान्निर्विषयस्य च कामस्यानुपपत्तेः दृष्टेश्च-

* स्वाध्यायवदेवेति न न तदपेक्षोऽप्यथशब्दः ३ पु० ।

† कामोपहतमनाः—इति ३ पु० । ‡ ब्रह्मणो लोकावाप्तीति १ पु० ।

नाग्निवत्कामोपशमे ब्रह्मजिज्ञासां करोति । कर्मानुष्ठानान्तर्यं तर्हि वक्तव्यम् न *धर्मावबोधानन्तर्यम् । कथं वा† कामाप्तिः कामोपशमहेतुः । दृष्टान्तसामर्थ्यात् । यथा हविषा कृष्णवर्त्मा वर्द्धमानोपि सर्वेहविःप्रक्षेपे सर्वं दग्ध्वा स्वयं शाम्यति । एवं विषयेन्धनः कामो यावद्विषयं ‡वर्द्धमानो ऽपि तत्क्षये क्षीणेन्धनाग्निवत्स्वयं शाम्यतीति युक्तम् । सत्यं युक्तम् यदि §हिरण्यगर्भोपभोगो न क्षीयेत । क्षीयते तु कृतकत्वात्परिच्छिन्नविषयत्वाच्च । तत्क्षये पूर्ववद्‖नवाप्तो ऽवाप्तव्य इति कामः समुल्लसत्येव । अतो विषयस्य क्षयादिदोषदर्शनात्¶कामोपशमो हिरण्यगर्भस्यापि । तथा चोक्तम् ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः । ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयम् इति । तस्मात्सर्वेच कामस्य विषयदोषदर्शनमेवोच्छेदकारणं नित्यवस्तुदर्शनं च रसवर्जं रसो ऽप्यस्य परं दृष्ट्वा निवर्त्तत इति स्मृतेः । न चैवंलक्षण आगमो ऽस्ति **हिरण्यगर्भनिखिलविषयावाप्तौ कामोच्छेदो भवतीति । ननु कामावाप्तौ स्वस्थहृदयः कार्यान्तरक्षमो भवतीति सर्वेषां स्वसंवेद्यमेतत् । सत्यम् तदुत्कलिकोपशमात् । तदुत्कलिकोपशमश्च तदा सामर्थ्यहानेः । सति च सामर्थ्ये ††स्वच्छन्दोपभोगसम्भवात् । यदि पुनरेकान्ततो निवृत्तकामो भवेत् न तं विषयं पुनः सङ्कल्पयेत् । तस्मान्न कर्मणां कामनिबर्हणद्वारेण ब्रह्मजिज्ञासायोग्यतापादनम् अतो न कर्मावबोधापेक्षो ऽप्यथशब्दः ।

भवतु तर्हि संस्कारद्वारेण कर्मणां पूर्ववृत्तत्वम् यस्यैते ऽष्टाचत्वारिंशत्संस्कारा ‡‡अष्टौ चात्मगुणाः स ब्रह्मणः सायुज्यं गच्छतीति महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुरिति ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । यथा §§ऽऽदर्शतलप्रख्ये पश्यन्त्यात्मानमात्मनीति च स्मृतेः विविदिषन्ति यज्ञेन दानेन तपसा ऽनाशकेनेति येन केनचन यजेतापि ‖‖ दर्विहोमेनानुपहतमना एव भवतीति च श्रुतेः । वक्ष्यति च सूचकारः ¶¶ अत एवाश्रमकर्मा-

* कर्मावबेधेति ३ पु० । † कामावाप्तिरिति ३ पु० । ‡ वर्त्तमानोऽपीति १ पु० ।
§ हैरण्येति ३ पु० । ‖ अनाप्त इति ३ पु० । ¶ कामापगम इति २ पु० ।
** हिरण्यगर्भोपभोगाच्चिखिलेति ३ पु० । †† स्वछन्दोपगमसम्भवादिति २ पु० ।
‡‡ अष्टावात्मेति १ पु० । §§ आदर्शतले प्रख्ये पश्यत्यात्मानम् इति ३ पु० ।
‖‖ दर्विर्होमेणेति ३ पु० । ¶¶ अत एवात्र कर्मेति क्वचित् ।

पेक्षा सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति च । सत्यमेवम् यदि समानजन्मानुष्ठितमेव कर्म * संस्कुर्वद् ब्रह्मजिज्ञासायोग्यत्वहेतुः स्यात् । न च नैयोगिके† फले कालनियमोऽस्ति । तेन पूर्वजन्मानुष्ठितकर्मसंस्कृतो धर्मजिज्ञासां तदनुष्ठानं चाप्रतिपद्यमान एव ब्रह्मजिज्ञासायां प्रवर्तत इति न नियमेन तदपेक्षोऽथशब्दो युज्यते । एतेन ऋणापाकरणद्वारेणापि नियमेन पूर्ववृत्तत्वं ‡ प्रत्युक्तम् । तथा च श्रुतिस्मृती । यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् तस्याश्रमविकल्पमेके ब्रुवत इति । तस्मात्साधूक्तम् धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरिति ।

अथापि स्यान्न हेतुत्वेनाऽनन्तरवृत्तकर्मावबोधापेक्षमथशब्दं ब्रूमः अपि तु क्रमप्रतिपत्त्यर्थम् यथा हृदयस्याग्रे ऽवदायति अथ जिह्वाया अथ वक्षस इति । तदप्ययुक्तम् । न्यायसूत्रे ऽपि चैककर्तृकाणां बहूनां युगपदनुष्ठानासम्भवादवश्यम्भाविनि क्रमे ब्रूयादपि तन्नियममथशब्दः । एककर्तृकत्वं च शेषशेषिणोः शेषाणां च बहूनामेकशेषिसम्बद्धानामधिकारान्तरप्रयुक्त्युपजीविनां च भवति नेतरथा । न हि धर्मब्रह्मजिज्ञासयोरेतेषामन्यतमत्वे प्रमाणमस्ति तदिदमाह यथा च हृदयाद्यवदानानामानन्तर्यनियमः क्रमस्य विवक्षितत्वान्न तथेह क्रमो विवक्षितः शेषशेषित्वे ऽधिकृताधिकारे वा प्रमाणाभावाद्धर्मब्रह्मजिज्ञासयोरिति । अथापि स्याद्यथा ऽऽग्नेयादीनां षण्णां यागानामेकं फलं स्वर्गविशेषः एवं धर्मब्रह्मजिज्ञासयोरप्येकं फलं स्वर्गस्ततः क्रमापेक्षायां तन्नियमार्थो ऽथशब्द इति । यथा वा द्वादशभिरपि लक्षणैर्धर्म एको जिज्ञास्यः प्रतिलक्षणमंशान्तरपरिशोधनया । यथा वा ऽस्मिन्नपि तन्त्रे चतुर्भिरपि लक्षणैरेकं ब्रह्म जिज्ञास्यम् तच्च चांशान्तरपरिशोधनेन लक्षणानां क्रमनियमः । एवं तन्त्रद्वयेनैकं ब्रह्म जिज्ञास्यम् तच्च क्रमनियमार्थो ऽथशब्द इत्याशङ्क्याह फलजिज्ञास्यभेदाच्च धर्मब्रह्मजिज्ञासयोरिति सम्बन्धः । तमेव भेदं कथयति अभ्युदयफलं धर्मज्ञानं तच्चानुष्ठानापेक्षम् । अभ्युदयः फलं धर्मज्ञानस्येति प्रसिद्धमेव न‖ कस्यचिद्विसंवादः । तदपि न ज्ञानस्य फलमपि तु ज्ञेयस्य । तस्यापि न ज्ञेयत्वादेव फलम्

* संस्कुर्यादिति ३ पु० । † यौगिके–इति १ पु० । ‡ प्रयुक्तमिति १ पु० ।
§ अनन्तरपूर्ववृत्तेति ३ पु० । ‖ कश्चिद्विसंवाद इति २ पु० ।

किं त्वनुष्ठीयमानत्वात् । निश्रेयसफलन्तु ज्ञानं * न चानुष्ठानान्तरापेक्षमिति ब्रह्मज्ञानस्य फलमपवर्गः । स च नित्यसिद्धो ऽव्यवहितः स्वसंविदः यतो ऽविद्या संसारहेतुः । नचाविद्यामनिवर्तयन्ती विद्योदेति । तदेवमत्यन्तविलक्षणत्वात्प्रस्थानभेदाच्च न †फलद्वारेणाप्येकोपनिपातः । तेन न क्रमाकाङ्क्षा तन्त्रद्वयस्य । जिज्ञास्यं पुनरत्यन्तविलक्षणम् । यतः कार्यो धर्मः पुरुषव्यापारतन्त्रः स्वज्ञानकाले ऽसिद्धसत्ताकः प्रथमे तन्त्रे जिज्ञास्यः । इह तु नित्यनिर्वृत्तं पुरुषव्यापारानपेक्षं ब्रह्म जिज्ञास्यम् । किं च चोदनाप्रवृत्तिभेदाच्च । इदमपरं प्रमाणोपाधिप्रमेयवैलक्षण्यं धर्मचोदना हि प्रेरयन्ती पुरुषमसति विषये प्रेरयितुमसमर्था सती विषयमप्यवबोधयति । ब्रह्म प्रमाणं पुनर्बोधयत्येव केवलं नावबोधे पुरुषः प्रेर्यते । अवबोधो हि यथावस्तु यथाप्रमाणं चोदेति न पुरुषस्येच्छा‡मप्यनुवर्तते तच्च कुतः §प्रेर्यत यथा ऽत्रार्थयोः सन्निकर्षे सति तेन सन्निकर्षेणात्रावगम्यार्थज्ञाने पुरुषो न नियुज्यते तद्वत् अनिच्छतो ऽपि स्वयमुत्पत्तेर्ब्रह्मणि तु नित्यसिद्धत्वान्न प्रेरणा सम्भवति । ब्रह्मचोदनेति चोदनाशब्दो भाष्ये प्रमाणविवक्षाप्रयुक्तो न प्रेरणाविवक्षया तदाह या हि चोदना धर्मस्य लक्षणं सा स्वविषये ‖विनियुञ्जानैव पुरुषमवबोधयति ब्रह्मचोदना ¶पुनः पुरुषमवबोधयत्येव केवलमवबोधस्य चोदनाजन्यत्वान्न पुरुषो ऽवबोधे नियुज्यते । यथाऽत्रार्थसन्निकर्षेणार्थावबोधे तद्वत् । तदेवं जिज्ञास्यैक्यनिबन्धना ऽपि न क्रमापेक्षा तन्त्रद्वयस्य । येन तदपेक्षो ऽथशब्दो व्याख्यायेत । अत उपसंहरति तस्मात् किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति ।

उच्यते । नित्यानित्यवस्तुविवेक इहामुत्रार्थ ** फलभोगविरागः शमदमादिसाधनसपन्मुमुक्षुत्वं चोक्तम् पुरस्तात् अधिकारार्थत्वे अथशब्दस्य शास्त्रारम्भवैयर्थ्यं प्रवृत्त्यभावादिति । प्रवृत्त्यभावे च कारणमुक्तम् । अखिलसुखभोगाद्विरण्यगर्भावाप्तिपर्यन्तान्निवर्तयति ब्रह्मजिज्ञासा क्रियमाणा तेन ††तत उद्वेगो लोकस्य कुतस्तच्च प्रवृत्तिरिति । तस्मादावदस्य ‡‡ हि-

* ब्रह्मज्ञानमिति ३ पु० । † नकारो नास्ति १ पु० । ‡ अपिशब्दोनास्ति १ पु० ।
§ प्रेरणा-इति ३ पु० । ‖ विशब्दो नास्ति ३ पु० । ¶ पुनःस्थाने तुशब्दः ३ पु० ।
** फलेति नास्ति १ पु० । †† तत्रोद्वेगो ३ पु० । ‡‡ हिरण्यगर्भावाप्तिरिति ३ पु० ।

रणयगभावाप्रिपर्यन्तस्य भोगस्योत्पादपरिच्छेदाभ्यां विनाशित्वादनित्यत्वं नावैति विनश्यदपीदं कूटस्थनित्यवस्तुपर्यन्तमेव विनश्यति । अन्यथा निरुपादानस्य पुनरुत्पत्त्यसम्भव इति वर्त्तमानस्याप्यसम्भवादभावो ऽभविष्यदिति निरूपणात् । नित्यानित्यवस्तुविवेको यावन्न जायते तावद्विरक्तो न जायत *इत्यध्याहारः । यावच्चाभिमुखं विनाशदर्शनाद्बुज्ज्ञानस्यापि भोगान् सक्चन्दनवस्त्रालङ्कारभोगानिवाग्निप्रवेशार्थं भोगार्थव्यापारजनितदुःखानुभवाच्च तन्निमित्तां †निर्वृतिमप्यलभमानो भोगाद्विरक्तस्ततो मुमुक्षत्वं तत्साधनशमदमोपरमतितिक्षासमाधानसम्पन्नो भूत्वा यावन्नालम्बते तावद् ब्रह्मजिज्ञासाङ्कः प्रतिपद्येत कथंचित् वा दैववशात्कुतूहलाद्वा बहुश्रुतत्वबुद्ध्या वा प्रवृत्तो ऽपि न निर्विचिकित्सं ब्रह्मात्मत्वेनावगन्तुं शक्नोति यथोक्तसाधनसम्पत्तिविरहात् अनन्तर्मुखचेता बहिरेवाभिनिविशमानः । तस्माद्वर्णितवस्तुकलापादानन्तर्यमभिप्रेत्याथशब्दं प्रयुक्तवानाचार्यः । तदाह भाष्यकारस्तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्द्धं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये तस्मादथशब्देन यथोक्तसाधनसम्पत्त्यानन्तर्यमुपदिश्यत इति ।

अतः शब्दो हेत्वर्थ इति । स्यादेतत् । कृतकत्वपरिच्छेदौ नैकान्ततः क्षयिष्णुतां गमयतः परमाणुषु पाकज‡लोहितस्य कृतकस्य तेषां च परिच्छिन्नानां नित्यत्वाभ्युपगमात् । वेदे ऽप्यक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोममभूता अभूमेत्यादिपुण्यफलस्याक्षय§त्वश्रवणात् । अतो न विषयभोगान्नियमेन विरागो विवेकिनामपि । नापि कूटस्थनित्यवस्वभ्युपगमेन मुमुक्षत्वम् ततश्च न शमदमादिपरिग्रहः । यतो न तादात्म्यं भोक्तुः सम्भाव्यते । नापि तदर्थाप्तिः दुःखाभावे ऽपि सुखभोगाभावान्नानवद्यः पुरुषार्थः । अतो ऽजीर्णभयान्नाहारपरित्यागो ‖ भिक्षुभयान्न स्याल्या अनधिश्रयणम् दोषेषु प्रतिविधातव्यमिति न्यायः । अतो न तस्य ब्रह्मजिज्ञासायां हेतुत्वमित्यतस्तस्य हेतुत्वप्रदर्शनार्थो ऽतःशब्दः । कथम् । यस्माद्वेद एवाग्निहोत्रादीनां श्रेयःसाधनानामनित्यफलतां दर्शयति तद्यथेह ¶ कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत इत्यादिना ।

* इत्यध्याहार इति २, ३ पु॰ नास्ति । + निर्वृत्तिमिति ३ पु॰ ।
‡ लोहित्यस्येति २, ३ पु॰ । § त्वशब्दो नास्ति १, २ पु॰ । ‖ भिक्षुकभयादिति ३ पु॰ ।
¶ कर्मचित इति प्रायो बहुत्र भवति तत्रापि कर्मजित इति क्वोतो न्यायः पाठः ।

ननु * पुण्यस्याप्यक्षयफलत्वं वेद एवाहेत्युक्तम् । न । तस्य वस्तुबल-प्रवृत्तानुमानविरोधे ऽर्थवादस्य नित्यत्वप्रतिपादनाऽसामर्थ्यात् । परमाणूनां पाकजस्य च तद्गुणस्यानित्यत्वात् । अतो भवत्य† नित्यत्वदर्शनं विषयभोगानां मुमुक्षुत्वे हेतुः । यत्पुनर्मुमुक्षुत्वाभावे निमित्तमुक्तम् तच्चाह तथा ब्रह्मज्ञानादपि परं पुरुषार्थं दर्शयति ब्रह्मविदाप्नोति परमित्यादि । अत उपसंहरति तस्मादयोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्येति । ‡ यतः परिपूर्णो हेतुरनन्तरमवश्यं कार्यमारभते अतः कर्तव्येत्यावश्यकतामाह भाष्यकारः । यतो द्वैतानुषङ्गादतितरामुद्विजमानेन ब्रह्मात्मत्वं च हस्तप्राप्तमिव मन्यमानेन प्रवर्तितव्यमेव ब्रह्मजिज्ञासायां प्रदीप्तशिरसेव जलराशौ §स्पृशतेव च सुस्वादु फलमङ्गुल्यग्रेणाग्रपादस्थेन । एवं सत्यर्थाद्ब्रह्मजिज्ञासाया नियमेन पूर्ववृत्तत्वमयशब्देन पूर्वोक्तेन न्यायेन निराक्रियते ‖ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति । अन्तर्णीतविचारान्वये हि चतुर्थीसमासः स्यात् न शब्दाभिधेय इत्यवयवार्थमङ्गीकृत्य षष्ठीसमासो दर्शितः । ब्रह्मशब्दस्यार्थनिर्देशावसरे प्राप्ते सूचकार एव निर्देक्ष्यतीति कथयति ब्रह्म च वक्ष्यमाणलक्षणं जन्माद्यस्ययत इति । तच्च यदन्यैर्वृत्तिकारैः ब्रह्मशब्दस्यार्थान्तरमाशङ्क्य निरस्यते न खलु ¶ब्राह्मणजातिरिह गृह्यते प्रत्यक्षसिद्धत्वाज्जिज्ञास्यत्वाभावात् । नापि तत्कर्तृका जिज्ञासा चैवर्णिकाधिकारात् । नापि जीवपरियहस्तत्कर्तृत्वे विशेषणानर्थक्यात्कर्मत्वे नित्यसिद्धत्वात् । न शब्दराशेर्ग्रहणम् तस्य धर्मजिज्ञासौत्पत्तिकसूत्राभ्यामर्थवत्त्वप्रमाणत्वयोर्निरूपितत्वात् । नापि हिरण्यगर्भस्य । तदवाप्तेरपि विरक्तस्य ब्रह्मजिज्ञासोपदेशात् । नापि तत्कर्तृकताज्ञानवैराग्ययोः सहसिद्धत्वादिति । तदपि न कर्तव्यमित्याह अत एव न ब्रह्मशब्दस्य जात्यादयर्थान्तरमाशङ्कितव्यमिति ।

ब्रह्मण इति कर्मणि षष्ठी । वृत्त्यन्तरे तु शेषलक्षणा व्याख्याता तां निरस्यति न शेष इति । तच्च हेतुमाह जिज्ञास्यापेक्षत्वाज्जिज्ञासाया इति । अथापि स्यादन्यज्जिज्ञास्यमिति तदर्थमाह जिज्ञास्यान्तरा-

* पुण्यस्याक्षयहेतुत्वमिति २ पु० । † अनित्यदर्शनमिति २ पु० ।
‡ अत इति १ पु० । § स्पृशते न च सुस्वादुति ३ पु० ।
‖ ब्रह्मणो जिज्ञासेति नास्ति २, ३ पु० । ¶ ब्राह्मणत्वादीति २, ३ पु० । पु० ।

निर्देशाच्चेति । पुनः शेषषष्ठीवादाऽऽह ननु शेषषष्ठीपरिग्रहे ऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते सम्बन्धसामान्यस्य विशेषनिष्ठत्वादिति । यद्यपि शेषे षष्ठीति सम्बन्धमात्रे षष्ठी विहिता तथापि व्यवहारो विशेषमवलम्बते । बहवश्च सम्बन्धविशेषास्तत्रावश्यमन्यतमः प्रतिपत्तव्यः अन्यथा व्यवहारानुपपत्तेः । तत्र प्रकरणोपपदयोर्विशेषहेत्वोरभावादर्थाद्विशेषक्रियोपादानात् कारकत्वेनैव सम्बन्धः तत्रापि सकर्मिकायाः कर्मकारकमभ्यर्हितमिति कर्मत्वं ब्रह्मणो न विरुध्यते । एवमपि साधारणे शब्दे ऽभिप्रेतमर्थं विहायार्थान्तरं परिगृह्य पुनस्तद्द्वारेणाभिप्रेतमर्थं * प्रतिपद्यमानस्य व्यर्थः प्रयासः स्यात् । तदाह एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यादिति ।

ननु किमिति व्यर्थः शेषषष्ठीपरिग्रहे सामान्येन यत् किञ्चिद् ब्रह्मसम्बन्धि † येनयेन जिज्ञासितेन विना ब्रह्म जिज्ञासितं न भवति तत्सर्वं जिज्ञास्यत्वेन प्रतिज्ञातं स्यात् । अतो न ‡ विशिष्टसम्बन्धो विवक्ष्यते सामान्ये तस्याप्यन्तर्भावादिति यदुच्यते तदाह न व्यर्थो ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादिति चेदिति । स्वयमेव परोक्षमाशङ्क्योत्तरमाह न प्रधानपरिग्रहे तदपेक्षितानामर्थात्सिद्धत्वादिति संक्षेपतो वस्तुसङ्ग्रहवाक्यम् । एतदेव प्रपञ्चयति ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात् प्रधानम् तस्मिन्प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति तान्यर्थात्सिद्ध्यन्त्येवेति न पृथक् सूचयितव्यानि यथा राजासौ गच्छतीत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वदिति । यस्माद् ब्रह्मावाप्तिः पुरुषार्थः तेन तज्ज्ञानेनाप्तुमिष्टतमम् अतस्तदर्थत्वात्प्रवृत्तेः प्रधानं तत् तस्मिन् प्रधाने जिज्ञास्यमाने येन जिज्ञासितेन विना न सम्पूर्णा जिज्ञासा तत्सामर्थ्यादेव तादर्थ्येन जिज्ञास्यते न पृथगभिधानेन § कृत्यमस्ति । यथा राजासौ गच्छतीत्युक्ते यावता परिवारेण विना राज्ञो गमनं न सम्पद्यते तावतो गमनमर्थात्सिद्धमिति न पृथगभिधीयते लोके तद्वदिहापि स्वरूपप्रमाणयुक्तिसाधनप्रयोजनानि ब्रह्मज्ञानपरिपूर्णतार्थमर्थादेव जिज्ञास्यत्वान्न पृथक् सूचयितव्यानि । किंच । शास्त्रप्र-

* प्रतिपाद्यमानस्येति १ पु० । † येनेति सकृदेव १ पु० ।
‡ विशिष्टत्वेति २, ३ पु० । § कृत्यमस्तीत्यस्य स्थाने समस्तीति ३ पु० ।

वृत्तिरेव कर्मणि षष्ठीं गमयति । कथम् । एवं हि शास्त्रमारब्धव्यम् पुण्यचितो लोकः क्षीयत इत्यादिश्रुतेर्न्यायतश्च पुण्यस्य क्षयदर्शनाद्विरक्तस्य ब्रह्मविदाऽऽप्नोति परमित्यादिश्रुतेर्ब्रह्मज्ञानात्पुरुषार्थसिद्धिः परेति । अतस्तज्ज्ञातुमिच्छतः श्रुत्या यतो वा इमानि भूतानि जायन्त इत्येवमाद्यया तत्प्रतिपादनपूर्वकं तद्विजिज्ञासस्वेति साक्षादेव कर्मतया ज्ञेयत्वेनानुशासनं यत् तदिदमथातो ब्रह्मजिज्ञासेति सूचितम् । तेन कर्मषष्ठीपरिग्रहे श्रुतिन्यायसूचनपरं सूत्रं तदनुगतं भवति । अन्यथा लक्ष्यानुगतमसम्बद्धं स्यात् । तदाह श्रुत्यनुगमाच्चेति वस्तुसङ्ग्रहवाक्यम् । * तत्प्रपञ्चः यतो वा इमानि भूतानि जायन्त इत्याद्याश्च श्रुतयस्तद्विजिज्ञासस्व तद् ब्रह्मेति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयन्ति तच्च कर्मणि षष्ठीपरिग्रहे सूत्रेणानुगतं भवति तस्माद् ब्रह्मण इति कर्मणि षष्ठी ॥

ज्ञातुमिच्छा जिज्ञासेति । जिज्ञासापदस्यावयवार्थं कथयति इच्छाप्रदर्शनार्थं तत्रश्चेच्छायाः † फलविषयत्वात्तज्ज्ञानस्यापवर्गपर्यन्तता सूचिता भवति तदाह ‡ अपवर्गपर्यन्तं ज्ञानं सन्वाच्यायाः इच्छायाः कर्म फलविषयत्वादिच्छाया इति । अवगतिरिति साक्षादनुभव उच्यते ज्ञानन्तु परोक्षेऽनुमानारूढेपि § सम्भवति संनिहितेप्यसम्भावितविषयेऽनवसितरूपमित्युक्तं पुरस्तात् तदाह ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म ब्रह्मावगतिर्हि पुरुषार्थः । ब्रह्मरूपतासाक्षात्करणमित्यर्थः । तदेतच्छास्त्रान्तर्भूतं सूत्रम् अनेन च प्रयोज्यसम्बन्धिन्योर्जिज्ञासामुमुक्षाक्रिययोरेकस्याः कारणान्तरसिद्धायाः पूर्ववृत्ततया हेतुत्वमर्थादुपात्तमितरस्यास्तदनन्तरं तत्प्रयुक्तायाः कर्तव्यता श्रुत्याऽभिहिता तच्च जानात्येवासौ मयैतत्कर्तव्यमिति उपायन्तु न वेद ततः तस्योपायः कथनीयः शास्त्रस्य च सम्बन्धाभिधेयप्रयोजनानि वक्तव्यानि । इतरथा प्रेक्षारहितमिव सर्वमापद्येत । अतो ‖ ऽनेनैव सूत्रेणेदमपि सर्वं सूचितमिति कथयितुमाह तस्माद् ब्रह्मजिज्ञासितव्यमिति । अन्तर्गीतविचारार्थविधेयत्वाङ्गीकारेण मीमांसितव्यमित्यर्थः । एतदुक्तं भवति ¶ ब्रह्मज्ञानकामेनेदं

* अस्यैव प्रपञ्च इति ३ पु· ।

+ फलविषयत्वाज् ज्ञानस्याऽवगतिफलपर्यन्तता सूचितेति ३ पु· ।

‡ अवगतिपर्यन्तमिति २, ३ पु· एवमेव भाष्येऽप्युपलभ्यते ।

§ भवतीत्येव १ पु· । ‖ तत्रानेनैव सूत्रेणेति २, ३ पु· । ¶ ब्रह्म ज्ञातुकामेनेति ३ पु· ।

शास्त्रं श्रोतव्यम् * यस्माद् ब्रह्मज्ञानमनेन शास्त्रेण निरूप्यते तेन प्रयोज्यस्याभिमतोपायः शास्त्रमित्यर्थाच्छास्त्रस्य सम्बन्धाभिधेयप्रयोजनं कथितं भवति ॥

॥ † इति तृतीयवर्णकं समाप्तम् ॥

———०———

तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात्। यदि प्रसिद्धम् न जिज्ञासितव्यम्। अथाप्रसिद्धम् नैव शक्यं जिज्ञासितुमिति प्रयोजनविषयसम्बन्धानाक्षिपति। कथम्। प्रसिद्धशब्देन प्रतिपन्नमुच्यते तदादि प्रतिपन्नमन्येन केनचित् तदा ऽस्य शास्त्रस्य न विषयः। कस्मात् प्रतिपाद्यत्वेन हि विषयता प्रतिपन्ने च तस्मिन् अकिञ्चित्करं शास्त्रमिति नास्य विषयः स्यात्। ततश्चानेनानवगमान्नास्य प्रयोजनं ब्रह्मावगतिः स्यात्। अतः प्रयोजनमप्याक्षिप्तम्। अथाप्रसिद्धं ‡ न शक्यं जिज्ञासितुम्। कथम्। यन्न कदाचिदपि बुद्धौ समारूढविशेषम् कथं तत्प्रपादयेत। अतः प्रतिपादनाशक्तेर्न तत्स्पृशत्यपि शास्त्रम्। प्रसिद्धं पुनर्यदि नामानेन प्रतिपाद्यते प्रसिद्धत्वादेव तथापि न तेनार्थेन निरालम्बनम्। अप्रसिद्धं पुनरालम्बनमपि न स्यात्। अतो न केनचिदर्थेन सम्बद्धं शास्त्रमिति सम्बन्ध आक्षिप्तः।

अस्ति तावद् ब्रह्मेत्यादिना चितयमपि समाधत्ते श्रोतृप्रवृत्त्यर्थम्। ननु प्रेक्षावता अविसंवादकेन प्रणीतं शास्त्रम् नेदृशो निष्प्रयोजनं निर्विषय § मसंबद्धं चारभत इति तद्गौरवादेव प्रवर्त्तन्ते श्रोतारः किमनेन प्रयासेन। सत्यम् भवति सामान्येन प्रयोजनवत्त्वप्रतीतिः प्रणेतृगौरवात् न तु तावन्मात्रेण प्रवृत्तिः। अभिप्रेत ‖ प्रयोजनाय हि प्रवर्त्तन्ते न तन्निर्देशादृते शक्यते ऽवगन्तुम्। एवमपि प्रयोजनविशेष एव निर्दिश्यताम्। न च विषयभावमनापन्नमशक्यप्रतिपादनं च प्रयोजनं भवति छिदिक्रियाविषय एव वृक्षश्छिन्नः प्रयोजनमित्युच्यते। दण्डादेरपि मृद्विषयस्य मृदेव घटावस्था प्रयोजनम्। सत्यम् तथापि यथा चिकित्साज्ञाने चरकसुश्रुताद्येयप्रभृतीनि बहूनि यथा वा तण्डुलनिष्पत्ति ¶ प्रयोजना अवघातनखनिर्भेददलनक्रिया बह्व्यः। तच

* यद् ब्रह्मेति १ पु.।
† इति पञ्चपाद्यां तृतीयवर्णकं समाप्तमिति ३ पु.।
‡ नैव शक्यमिति २ पु.।
§ असम्बन्धमिति १ पु.।
‖ प्रयोजने इति २ पु.।
¶ प्रयोजनावघातेति १ पु.।

* नावश्यमेकत्रैव प्रवृत्तिः तथेहाप्यन्यस्मादपि कथंचिद्ब्रह्मावगतिसिद्धौ नावश्यमत्रैव प्रवृत्तिः । अतो ऽनन्यसाधारणो विषयो वक्तव्यः यथा ऽर्जुनस्यायं विषय इत्यनन्यसाधारणता प्रतीयते । तेनानन्यसाधारणत्वाय विषयो निर्देश्यः प्रवृत्त्यङ्गत्वेन । सम्बन्धोपि वक्तव्यः प्रवृत्त्यङ्गत्वेनैव । यथा साधुशब्दपरिज्ञानं व्याकरणारम्भात्प्राङ् न केनचित्साध्यते तेन न केनचित् सम्बद्धुम् अतस्तदर्थो न क्वचित् प्रवर्तते † यथा वौदननिष्पत्तिरेकक्रिया नियतापि न गमनाद्येकक्रियासाध्या तेन न तया सम्बन्धः ततश्च न गमनादिक्रियायामोदनार्थी प्रवर्तते । तेन पुरुषार्थरूपता ऽनन्यसिद्धता तत्प्रतिपाद्यता चेति भिद्यन्ते विषयसम्बन्धप्रयोजनानि तानि च चीण्यपि प्रवृत्त्यङ्गम् । नाऽपुरुषार्थे काकदन्तपरीक्षायां ‡ तुषकण्डने वा प्रवर्तते प्रेक्षावान् । नापि पुरुषार्थे चिकित्साज्ञाने सुश्रुतादिसिद्धे चरके नियमेन प्रवर्त्तते । नापि तण्डुलेषु दलनसिद्धेष्ववघाते । नाप्यनन्यसिद्धे ऽपि साधुशब्दपरिज्ञाने पुरुषार्थे अतत्साधने वैद्यकादौ कश्चित्प्रवर्तते गमने वा ऽनोदनसाधने । तच्च विप्रतिपत्त्येकान्ततःप्रसिद्धतामप्रसिद्धतां च निरस्य शक्यप्रतिपाद्यमानतामनन्यसिद्धतां च दर्शयन् विषयसम्बन्धौ समर्थितवान् निःश्रेयसप्रयोजना प्रस्तूयत इति § च प्रयोजनम् ।

ननु ब्रह्म वेदान्तानां विषयः शास्त्रं च तेषां ब्रह्मप्रतिपादनानुसरणोपायन्यायविषयम् तत्कथं शास्त्रस्य विषयसम्बन्धौ भवतः । प्रयोजनन्तु कदाचित्स्यादपि प्रणाड्या धर्मार्थविषययोरिव शास्त्रयोः कामावाप्तिः । नन्वाग्नेयादीनां स्वर्गफलानां प्रयाजादीतिकर्तव्यतावद्वेदान्तानामप्यर्थमवबोधयता ‖ मितिकर्तव्यतामीमांसा तेनार्थावबोधे वेदान्तानामुपकारकत्वाद्भवति शास्त्रमपि तद्विषयम् । नहि शालिबीजस्याङ्कुरं जनयतः सहकारिणो जलादेरङ्कुरो न कार्यम् । तेन यद्यपि वेदान्ता एव ब्रह्मावबोधे कारणं मीमांसा चेतिकर्तव्यताभागं पूरयति तथापि ब्रह्मविषयैव । न हि च्छेत्तुरुद्यमननिपातनलक्षणो व्यापारः परशुविषयो न वृक्षविषयस्तदर्थत्वात् करणस्य ¶ च द्वारत्वात् । अन्यथा ऽन्यच्च कर्तृव्यापारो ऽन्यच्च फलमिति वैयधिकरण्यं स्यात् ।

* नावश्यकमेकत्रेति १ पु· ।
† यथा चौदननिष्पत्तिरिति २ पु· ।
‡ तुषखण्डने-इत्युपकल्पितं २ पु· ।
§ चकारो नास्ति २ पु· ।
‖ इतिकर्तव्यमीमांसेति १, ३ पु· ।
¶ करणस्य तद्द्वारत्वादिति २ पु· ।

उच्यते । विषम उपन्यासः । युक्त यच्च यदुपकारमन्तरेण फलात्पात्तरव न सिध्यति तस्यापि तद्विषयत्वम् इह पुनर्विनापि मीमांसया सम्बन्धग्रहणतदनुस्मरणबुद्धिसन्निधानमात्रोपकृतं वाक्यमर्थमवगमयति नापरमपेक्षते । ननु संशयविपर्यासनिरासद्वारेण निर्णयहेतुत्वान्निर्णेयस्य च निर्णयप्रधानत्वाद्भवति निर्णेयं वस्तु निर्णयहेतोर्विषयः । नैतत्सारम् । यच्च ह्यनेकं विज्ञानं वाक्यश्रवणे * सति जायते मीमांसानिरपेक्षमेव । तच्चैकं वाक्यजन्यमेकार्थनियतत्वादेकस्मिन्प्रयोगे वाक्यस्य इतराणि पुनः सामान्यतोदृष्टनिबन्धनानि । तच्च मीमांसया लोकप्रसिद्धशब्दशक्त्यनुसारिण्येदं † शब्दजनितं ज्ञानमिति तदालम्बनं वेदार्थ इति ज्ञात्वान्यदुपेक्षते न पुनर्निर्णयज्ञानोत्पत्तौ व्यापारः शास्त्रस्य । यथा चक्षुः कुतश्चिन्निमित्तात्संप्रयुक्तेऽपि स्थाणुः ‡ पुरुषो वेति संशयात्मकं पुरुष एवेति वा विपर्ययस्वरूपं ज्ञानमुत्पाद्य पुनर्निमित्तान्तरानुगृहीतं सन्निर्णयात्मकं सम्यग्रूपं § ज्ञानमुत्पादयति नैवं शब्दो मीमांसायाः प्राक् संशयितं विपर्यस्तं वा ज्ञानमुत्पाद्य पुनस्तदनुग्रहान्निर्णयात्मकं सम्यग्ज्ञानं वा जनयति किन्तु प्रागेव मीमांसानुग्रहात् स्वसामर्थ्यजन्यं ज्ञानमजीजनदेव । तस्मान्न ब्रह्मविषयं शास्त्रम् ।

अत्रोच्यते । यद्यपि वाक्यार्थज्ञानं शास्त्रानुग्रहा ‖ त्प्रागेवोदेति तथापि ¶ स्वोत्पत्तिसमकालसमुत्थेन सामान्यतोदृष्टनिबन्धनेनार्थान्तरनिवेशिना समकक्षाभिमतेन ज्ञानेन विरोधादुन्मज्जननिमज्जनमिवानुभवदस्यामवस्थायां संशयज्ञानकोटिनिक्षिप्तं सन् मीमांसया शब्दशक्त्यनुसरणे सति प्रतिपक्षतानस्यानुत्पत्तौ निमज्जनाभावान्निश्चलं निर्णयज्ञानमिव जातमिति लक्षणया मीमांसया निर्णयः क्रियत इत्युच्यते न पुनः साक्षान्निर्णयज्ञानहेतुत्वात् । तदेवं लक्षणया वेदान्तानाँ ब्रह्मविषयाणां सहकारिकारणं मीमांसेति ब्रह्मज्ञानविषयं शास्त्रमभिधीयते । तच्चेदं चयमप्यवश्यं वक्तव्यम् प्रयोजनं विषयः सम्बन्धश्च शास्त्रादौ श्रोतुः प्रवृत्त्यङ्गत्वेन । यद्यपि प्रणेतृगौरवादेव सप्रयोजनत्वं शास्त्रस्य तथापि न प्रयोजनविशेषसिद्धिस्तत्प्रत्ययमात्रेण निर्देशा-

* सति मीमांसानिरपेक्षमेवोत्पद्यते—इति २ पु० ।
‡ स्थाणौ स्थाणुरिति २ पु० ।
‖ प्रागेवोदयादीति २ पु० ।
† शब्दजनितमिति १ पु० ।
§ अत्र 'वा' शब्दोऽधिकः २ पु० ।
¶ तदित्यधिकमत्र २ पु० ।

दृते । तस्मात्तन्निर्देश्यम् । निर्दिष्टे ऽपि तस्मिंस्तस्याशक्यप्रतिपादनतां मन्वानो विहतश्रद्धत्वान्न प्रवर्त्तेतेति साध्यो निर्देश्यः । शक्यप्रतिपादनप्रतिपत्तावप्यन्यतःसिद्धेर्थे निर्दिष्टेः नैव प्रवृत्तिरित्यनन्यसाध्योपि निर्देश्यः तदेतत्त्रयमेकत्र समवेतं विभक्तं चोपलभ्यत इत्यलमतिविस्तरेण ॥

अस्ति तावद् ब्रह्मेत्यादिना प्रसिद्धत्वप्रदर्शनेनाप्रसिद्धतां निराकुर्वञ्शक्यप्रतिपाद्यतया सम्बन्धं समर्थितवान् । कथम् । ब्रह्मशब्दस्तावज्जातिजीवकमलासनशब्दराशीनां नान्यतमाभिप्रायेण सूत्रे प्रयुक्तः अनुपपत्तेरित्युक्तम् । अतो नूनमन्यदेव किंचिदभिधेयमभिप्रेत्यायं प्रयुक्त इति गम्यते । तेन स्वर्गापूर्वदेवताद्यर्थवत्पदप्रयोगादेव कश्चिदर्थो ऽस्तीत्यवसीयते । नैतत्सारम् । नहि पदं चक्षुरादिवदप्रतीतपूर्व एवार्थे झटिति विज्ञानं जनयति येनापूर्वमन्यतो ऽसिद्धमर्थं पदप्रयोगादेव प्रतीमः । स्वर्गाद्यर्थो ऽपि नैव पदप्रयोगादेव सिद्धः । अत्रोच्यते । यस्मिन् वाक्ये एकं पदं मुक्त्वेतरेषां पदानामर्थः सिद्धः स किमेकपदार्थानवगमापराधेन त्यज्यताम् उत बहुपदार्थप्रसिद्धिबलेना ऽप्रसिद्धोपि कथंचिदवगम्येतेति । तच्च निगमनिरुक्तव्याकरणानामेवंरूपपदार्थानुगमहेतूनां विद्यमानत्वात्तद्बलेनार्थमनुगम्य वाक्यार्थावगतिर्युक्ता न पुनरेकाप्रसिद्धा प्रसिद्धपदार्थसंसर्गस्त्यक्तुं युक्तः । न हि प्रसिद्धिरप्रसिद्धा त्यज्यते प्रसिद्धिबलेना ऽप्रसिद्धमपि कल्प्यत इतिन्यायात् ।

ननु निगमादिवशेनार्थानुगमे सर्वत्रैव कथंचिदर्थान्वयस्यावगन्तुं शक्यत्वादव्यवस्थितः पदार्थः स्यात् ततश्च वाक्यार्थो नावधार्येत न तर्हि निगमादीनामर्थवत्ता । भवत्यर्थवत्ता यच्च स्वार्थादन्यत्रापि विनियोगात्प्रयोगः तच्च कथमभिदध्यादित्यपेक्षायां तद्गतस्यैवावयवार्थान्वयलेशस्यानुगमात् । एवं तर्हि एकार्थनियमाय प्रयोगपरतन्त्रता मृग्यते तदन्तरेणापि प्रयोगमेकार्थनियम एव कथंचि * न्निगमादि व्याप्रियेतेति न कश्चिद्दोषः । तदत्र ब्रह्मशब्दे व्युत्पद्यमाने बृंहतेर्धातोर्वृद्धिकर्मणो ऽर्थानुगमात् प्रयोगानुगमेवा ऽसति विशिष्टार्थविषयस्यापेक्षिकमहत्त्वस्यापरिग्रहात्सर्वतोनिरवग्रहमहत्त्वसम्पन्नं वस्तु वाक्यार्थान्वयि ब्रह्मपदादनुगम्यते । ततश्च कालकृतावच्छेदनिमित्तस्याल्पत्वस्या-

* निगमादि व्याप्रियते इतीति २ पु० ।

भावात् सदासत्त्वान्नित्यं किंचिद्वस्तु ब्रह्मपदात्प्रतीयते । तथा रूपान्तरसद्भावे तद्रूपविकलत्वात्तदवच्छेदकृतमल्पत्वं स्यात् तच्च ब्रह्मपदादेवाऽपास्यते । तस्मादेकरसमद्वैतं वस्तु ब्रह्मपदात्प्रतीयते । एतेन देशकृतोऽपि परिच्छेदो निराकृतो वेदितव्यः । वस्त्वन्तरसद्भावे हि तदपेक्षयैतावति सद्भावो नातः परमस्तीति स्यादेतस्माद्व्यावृत्त इति तदभावे न परिच्छिन्नबुद्धिर्भवति । बृहत्त्वं च बृहत्यर्थान्वयादेव । कथम् । अबोधात्मकं हि वस्तु भोग्यम् । अतो भोक्तारं प्रति शेषत्वान्निकृष्टम् । चेतनः पुनर्न कस्यचिद्गुणभावमेति । तेनोत्कृष्टं सर्वस्मात् बृहत्स्वरूपं किंचिदिति बृहत्यर्थान्वयमेवानुसृत्य गम्यते । मुक्तमिति चाविद्याकामकर्मपरतन्त्रस्तैरितश्चामुतश्च पशुवन्नीयमानो निकृष्टो भवति ब्रह्मशब्दस्तु स्वार्थप्रक्षेपेण वाच्यं किंचिद्गमयन् सदैवाविद्यादिसंसारबीजानाकलितया तस्योत्कृष्टमहत्त्वमावेदयति । सर्वज्ञं सर्वशक्तिसमन्वितं च तदिति ब्रह्मशब्दादेवावगम्यते । कथम् । यदि किंचिदविदितं तेन कुतश्चिद्वा कार्याद्व्यावर्तते शक्तिः आपेक्षिकस्तदोत्कर्षः स्यात् न तदुक्तम् अन्यतोऽसिद्धस्य वस्तुनः पदप्रयोगादेव प्रतिपत्तौ सिद्धे हि वस्तुनि प्रयोगे तस्य यथासिद्धमेव महत्त्वं *निरुच्यते शब्दादेव तदर्थान्वयप्रतीतौ निरङ्कुश एवार्थोऽभ्युपेतव्यः । एवं च बृंहतेरर्थः परिपूर्णो भवति यदि सर्वमस्य साक्षादेव संविद्गोचरे वशे च वर्तेत तदेतदाह अस्तितावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितम् ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य †नित्यशुद्धादयोऽर्थाः प्रतीयन्ते बृंहतेर्धातोरर्थानुगमादिति ।

नन्वेवमपि व्युत्पत्त्यनुसरणेन भवत्येवमात्मके वस्तुनि प्रतीतिर्न पुनरेतावता तस्य सिद्धिः यदमाक्षस्याप्रमाणत्वात् । सत्यमेवम् अत एव जिज्ञासा धर्मस्येव ‡लोकाख्यप्रमाणाभाससिद्धस्य इदमपरं ब्रह्मशब्दार्थस्य सिद्धौ कारणमुच्यते साध्यत्वसिद्ध्यर्थम् सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिरिति । तदेव दर्शयति सर्वो ह्यात्मास्तित्वं प्रत्येति न नाहमस्मीति । यदि नात्मास्तित्वप्रसिद्धिः स्यात्सर्वो लोको नाहमस्तीति प्रतीयात् । आत्मा च ब्रह्मेति । कथं पुनरात्मा ब्रह्म । वेदान्तेष्वात्मनि ब्रह्मशब्दप्रयोगादात्मानमेव च

* निरुच्येत–इति २ पु० । † शुद्धत्वादय इति २ पु० ।
‡ लोकादिप्रमाणेति २ पु० ।

लोकोऽहमिति व्यपदिशति तदेवमहंप्रत्यय एव ब्रह्मणः * प्रसिद्धत्वान्ना-प्रसिद्धशङ्का । यदि तर्हि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेत्य-जिज्ञास्यत्वं पुनरापन्नमिति विषयमाक्षिपति असिद्धं हि वस्तु साध्यमानं विषयः सिद्धं तु न पुनः साध्यत इति नास्य शास्त्रस्य विषयः । न तद्विशेषं प्रति विप्रतिपत्तेरिति विषयसम्बन्धौ समर्थ्येते । सत्यम् अहमित्यात्मनि प्रत्ययः आत्मा च ब्रह्म किन्तु तस्मिन्नेव विप्रतिपत्तयोऽयमसावयमसाविति । ताश्च वस्तुतो ब्रह्मपदार्थविषया एव तदेकार्थत्वाद् ब्रह्मशब्दस्य । ततः † सामा-न्यतःसिद्धमपि विशेषतो ऽसिद्धेरसिद्धकल्पमेवेति भवत्यस्य विशेषसिद्धिहेतो र्विषयसामान्यतः सिद्धत्वाच्छक्यते विशेषतः प्रतिपादयितुमिति भवति तस्य शास्त्रं साधनमिति सम्बन्धोपि समर्थितः । विप्रतिपत्तिं दर्शयति देहमा-त्रमित्यादि । तद्यथा गोशब्दस्य व्यक्त्याकृतिजातिक्रियागुणसाम्नाद्यनेकार्थसं-निधौ प्रयुज्यमानस्य कैश्चिज्जातिरन्यैर्व्यक्तिरित्याद्यभिधेयं प्रतिपन्नम् एवं सचेत-न्य‡कार्यकारणसंघातसन्निधावहंप्रत्ययस्योत्पद्यमानस्य कैश्चित् किंचिदालम्बनं प्रतिपन्नम् तदाह देहमात्रं चेतन्यविशिष्टमात्मेति प्राकृता जना लौकाय-तिकाश्च प्रतिपन्ना इति । तथाहि । मनुष्योऽहमित्यात्मनि मनुष्यत्वाभिमानो गच्छामीति च गन्तृत्वाभिमानो देहविषयत्व उपपद्यते । देहमात्रमिति सशिरस्कपिण्डाभिप्रायं द्रष्टव्यम् । मात्रशब्देन न देहातिरिक्तं स्वतन्त्रं चैतन्य-मन्यविशेषणं वा किन्तु देहाकारपरिणतभूतचतुष्टयान्तर्भूतमेवेति दर्शय-ति । आत्मेति अहंप्रत्ययालम्बनमित्यर्थः । प्राकृता इति । शास्त्रोपदेशासंस्कृत-मतयो दृष्टमात्राविकल्पितव्यवहारिण इत्यर्थः । लौकायतिका इति भूत-चतुष्टयतत्त्ववादिनः प्रसिद्धाः । एवमिन्द्रियाण्येव चेतनानि आत्मेत्यपरे । इन्द्रियाणां चक्षुरादिमनःपर्यन्तानामेकैकस्मिन्न § सत्यपि शरीरे रूपादिज्ञा-नानामभावात् तेषामेव व्यस्तानां चेतनत्वमहंप्रत्ययविषयत्वं च मन्यन्ते क्रमेण च वरगोष्ठीवदितरेतरगुणभावं च । तथाचेन्द्रियधर्मसामानाधिकर-ण्यमहंप्रत्ययस्य दृश्यते काणोऽहं मूकोऽहमित्यादि । मन एव चेतनमहंप्रत्य-यस्य विषयमन्ये मन्यन्ते । दृश्यते हि स्वप्न इन्द्रियदशकोपरमे ऽपि मनस एवा-

* सिद्धत्वादिति २ पु० ।
† सामान्यतःप्रसिद्धमपि इति २ पु० ।
‡ कार्यकरणसंनिधाविति २ पु० ।
§ अति सत्यपीति २ पु० ।

हमिति* सर्वव्यवहारास्पदत्वमिति वदन्तः । विज्ञानमात्रं क्षणिकमित्येक इति । मात्रग्रहणेन नाहमित्यकारादिवर्णोच्चयातिरिक्तं किंचिदवभासते यदहंप्रत्ययस्य विषयः कल्प्येत । तेन विज्ञानमेव स्वरसभङ्गुरमविरतोदयमखिललोकयात्रानिलयमनुभवभग्नपक्षान्तरमहमित्युत्पद्यत इत्यन्ये मन्यन्ते । शून्यमित्यपर इति । सुषुप्ते विज्ञानलेशस्याप्यभावादकस्मादेवाहमितिसमुदयदर्शनादकारणस्य कादाचित्कस्य परमार्थवस्तुत्वाभावादसदऽवभास एवाहङ्कार इत्यपरे सङ्गिरन्ते । अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपर† इति । अहमुल्लेखशून्यस्य भोक्तृत्वस्यादर्शनात्तस्य च प्रत्यभिज्ञानात् स्थिरत्वसिद्धेः स्थिरस्य चा‡वधिहेत्वनुपलब्धेर्§नित्यत्वम् । निर्विकारस्य च भोगासम्भवाद्विकारस्य च क्रियाफलत्वात् क्रियावेशात्मकत्वाच्च कर्तृत्वस्येवमात्मकत्वाच्च संसारित्वस्य देहादेश्च बुद्धिपर्यन्तस्य भोक्तृत्वानुपपत्तेस्तद्व्यतिरिक्तः संसारी कर्ता भोक्ताहंप्रत्ययविषय इत्यपरे प्रतिजानते ।

कथं पुनस्तद्व्यतिरिक्तत्वं मन्यन्ते । तस्य भोक्तृत्वानुपपत्तेरित्युक्तम् । कथं तस्य भोक्तृत्वानुपपत्तिरिति । उच्यते । ‖ भूतसंघातस्तावच्छरीरम् । तच्च व्यस्तानां समस्तानां वा युगपत्क्रमेण वा भोगः परिकल्प्येत । सर्वथाप्यसम्भवः । यदि तावद्व्यस्तानां युगपत्परिकल्प्येत ततः स्वार्थप्रयुक्तत्वात् प्रवृत्तेरङ्गाङ्गिभावो ¶ नावकल्पेत । न चाङ्गाङ्गिभावमन्तरेण संघात** उपपद्यते । तस्मान्न व्यस्तेषु युगपद्भोगः । अस्तु तर्हि क्रमेण विरोधाद्वरगोष्ठीवदिति । नैतदेवं युक्तम् । तच्च योग्यस्यासाधारणत्वात् असाधारणत्वं च प्रतिपुरुषनियमात् । इह पुनर्विपरीतम् बहूनां सन्निधौ साधारणे च भोग्ये प्रतिनियतभोगव्यवस्थाहेत्वऽसम्भवात् †† । अस्तु तर्हि समूहस्य तिलज्वालावच्चेतनासमन्वयोपपत्तेः । मा भूत् प्रत्येकं युगपत्क्रमेण वा । नैतदेवम् । भोगेषु समूहासम्भवात् । कथमसम्भवः । भोक्तुर्भोगं प्रति प्राधान्यात् । ननु भोगेपि समूहो दृष्टो यथा स्त्रीपुंसयोः । नैतत्सारम् । संदिग्धत्वात् समूहस्योत तद्व्यतिरिक्तस्येति । तिलज्वालायान्तु विपरीतम् समूहकार्ये समूहिनां गुणभावोपपत्तेः । अस्त्वेकस्य

* मन एवाहमिति सर्वव्यवहारास्पदमिति २ पु० । † इतिशब्दो नास्ति १, २ पु० ।
‡ अवधिहेतुत्वानुपलब्धेरिति तु त्रिष्वपि पुस्तकेषु भवति । § नित्यत्वादिति ३ पु० ।
‖ भूतचतुष्टयं तावच्छरीरमिति १ पु०, भूतसंघातः शरीरमिति २ पु० ।
¶ नावकल्प्येतेति १, ३ पु० । ** उत्पद्येतेति १, २ पु० । †† हेतुत्वाऽसंभवादिति १ पु० ।

तर्हि नियतो भोगः । न । तत्रापि कस्यैकस्येत्यनवधारणात् । किमवधारणेन विनापि तेन विवक्षितार्थोपपत्तेः । यद्येवं समेषु केषांचिद् गुणभावानुपपत्ते * र-युक्तः कार्यात्मकेषु । † एवं कारणात्मकेष्वपि समानश्चर्चः भूतस्वाभाव्याविशेषात् । तथोभयात्मके समूहे । तस्माद्देहादिव्यतिरिक्तमहंप्रत्ययविषयं मन्यन्ते ।

भोक्तैव केवलं न कर्तेत्येक इति । पूर्वोक्तस्यैव देहादिव्यतिरिक्तस्य कर्तृत्वमतत्स्वभावं मन्वाना भोक्तैव केवलो ऽहंप्रत्ययविषय इत्येके प्रस्थिताः । करोमि जानामि भुञ्जे चेति न सर्वदाहंप्रत्ययेनानुषङ्गः । तेन नायं तद्विषयः । यदि स्यात् न तदुल्लेखविकल ‡ उदियात् । ननु भोक्तापि तर्हि नासौ । तदुल्लेखाभावात् । नैतदेवम् । अहमिति चेतनत्वसमुल्लेखात् तदर्थत्वात्सर्वस्य तदात्मकमेव भोक्तृत्वमिति भोक्तैव केवलमिति युक्तं मन्यन्ते ।

अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचिदिति । तस्मादपि देहादिव्यतिरिक्तादहंप्रत्ययविषयादन्यः सर्वस्येशिता ततश्चेशितव्यस्य सर्वात्मना वेत्ता नियमनशक्तिसम्पन्नश्च । शरीरिणां मनसा ऽप्यचिन्त्यरूपात्तनुभुवनविरचनकार्यात्प्रेक्षावत् § कर्तृकत्वमन्तरेणासम्भाव्यमानात् कुलालादिरिव घटादिकार्यात्प्रतिपन्नः सातिशयानां काष्ठाप्राप्तिः ‖ परिणामानामुपलब्धा । सातिशयं च ज्ञानम् अतः क्वचित्काष्ठां प्राप्तं सर्वविषयमिति ¶ सर्ववित्सर्वदासिद्ध ईश्वरः प्रतिपन्नो ब्रह्मशब्दार्थ इति केचित्प्रतिपेदिरे ।

नन्वहमिति सर्वो लोक आत्मानं प्रत्येति आत्मा च ब्रह्म इत्यहंप्रत्ययविषयस्यात्मनो ब्रह्मत्वेन तद्विप्रतिपत्तौ ब्रह्मविप्रतिपत्तिं दर्शयितुं प्रक्रान्तम् तत्कथ ** मनहंप्रत्ययविषये ऽनात्मनीश्वरे ब्रह्मत्वविप्रतिपत्तिः †† प्रदर्श्यते । उच्यते । ब्रह्मणि विप्रतिपत्तिप्रदर्शनस्य प्रक्रान्तत्वादहंप्रत्ययविषयविप्रतिपत्त्यापि प्रणाड्या ब्रह्मविप्रतिपत्तिरित्येवेति ‡‡ रेव निर्दिश्यते । यतो नाहं §§ विषयविप्रतिपत्तिप्रदर्शनेन किञ्चित्कृत्यमस्ति । तस्मात्साध्वेतत् ।

* रयुक्तमिति ३ पु० ।
† एवं कारणात्मकेषु तेष्वपि समानचर्चो भूतभाव्याविशेषादिति १ पु० ।
‡ उदीयादिति १ पु० । § कर्तृत्वमिति १ पु० ।
‖ परिमाणानामिति ३ पु० । ¶ वाशब्दोऽत्राधिकः ३ पु० ।
** अनहंप्रत्ययविषयेऽविषये–इति ३ पु० । †† निर्दिश्यत इति ३ पु० ।
‡‡ ब्रह्मविप्रतिपत्तिरित्येवेति २ पु० । §§ अहंप्रत्ययविषये विप्रतिपत्तौति २ पु० ।

आत्मा स भोक्तुरित्यपर इति । योयमहमित्युल्लिख्यमानश्चेतनो भोक्ता स ब्रह्मेति कैश्चित्प्रतिपन्नस्तस्याहंप्रत्ययसिद्धो भोक्तृत्वावभासः स मिथ्यैवानिर्वचनीयानाद्यविद्याविलसितः । परमार्थतस्तु यः सर्वज्ञ ईश्वरोऽहंप्रत्यये ऽनन्तर्भूतः प्रमाणान्तरानवसितः सोस्यात्मा स्वरूपम् । एवमसौ बृंहत्यर्थान्वयाद् * ब्रह्मशब्दाभिधानीयतां लभते । इतरथा तद्रूपविकलस्य न निरङ्कुशं बृहत्त्वमिति न † ब्रह्मशब्दाभिधेयः स्यात् । एवं बहवो विप्रतिपन्नाः युक्तिवाक्यतदाभाससमाश्रयाः सन्त इत्युपसंहरति ।

एवमुक्तेन प्रकारेण केचित् किञ्चिद् ब्रह्मेति प्रतिपन्नाः । किमेवमेव मनोरथमात्रेण नेत्याह युक्तिं प्रमाणानां स्वविषयनिश्चयेनुग्राहिकां तर्कशब्दपर्यायां वाक्यं च प्रतिवेदान्तं यथावद्ब्रह्मस्वरूपप्रतिपादनपरमालोचयन्तः । आत्मा स भोक्तुरिति ‡ युक्तिवाक्याभ्यामन्त्यं पक्षं निश्चितवन्तः सम्यग्दर्शिनः । इतरे तु युक्तय इवावभासन्त इति युक्त्याभासाः न परमार्थतो युक्तयः ताः समाश्रित्य वाक्यानीवावभासन्ते न तानि वाक्यान्यऽतत्परत्वात् तानि वाक्याभासानि परिगृह्य पक्षान्तरेषु विप्रतिपन्नाः । युक्त्याभासत्वं लेशतो दर्शितमेव देहादिव्यक्तिरिक्तात्मपक्षं दर्शयद्भिः । इतरेषां च युक्त्याभासत्वं स्वावसरे दर्शयिष्यामः । दर्शितं च लेशत उत्तरोत्तरपक्षग्रहणकारणप्रदर्शनेन । वाक्याभासतां तु तत्र तत्राधिकरणे सिद्धान्तयिष्यन्तः प्रदर्शयिष्यामः । तत्राऽविचार्य§ यत् किञ्चित्प्रतिपद्यमानो निश्श्रेयसात् प्रतिहन्येता ‖ नर्थं चेयादिति । तत्रैवं स्थिते मुमुक्षुर्ब्रह्मज्ञानेन परं निश्श्रेयसमाप्तुकामो ऽविचार्यैतच्छास्त्रमश्रुत्वा प्रवर्तमानो ¶ ऽन्त्यपक्षादर्वाचीनं कञ्चित्पक्षं परिगृह्णीयात् तदा मोक्षस्य सम्यग्ज्ञानफलत्वात्तस्य चातथाभावान्निश्श्रेयसात्प्रतिहन्येत मोक्षफलं न प्राप्नुया**दनर्थं च प्रतिपद्येत । अन्धन्तमः प्रविशन्ति ये केचात्महनो जना इतिश्रुतेः । अनात्मदर्शनेनात्मनो ऽस †† त्कल्पत्वापादनमात्महननम् । एवंरूपस्यात्महननस्य कृतत्वात् अन्यथा ऽऽत्मनो हननासम्भवात् प्राणत्यागस्य प्रकृतानुपयोगादिति ।

* ब्रह्मशब्दाभिधानीयकं लभत इति ३ पु· । † ब्रह्मशब्दाभिधेयत्वं स्यादिति ३ पु· ।
‡ युक्तिवाक्याभ्यामिति नास्ति २ पु· । § यत्किञ्चित्प्रतिपाद्यमाने-इति १ पु· ।
‖ अनर्थं चर्च्छेदिति कुत्रचिद्भवति, अनर्थं वेयादिति २ पु· ।
¶ अत्यन्तपक्षादर्वाचीनं किञ्चित्पक्षमिति १ पु· । ** अनर्थं वा प्रतिपद्येतेति ३ पु· ।
†† कल्पापादनमिति २ पु· ।

तस्माद् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निश्श्रेयसप्रयोजना प्रस्तूयत इति । ब्रह्मजिज्ञासोपन्यासव्याजेन जिज्ञासापदेना * न्तर्णीतमीमांसा वेदान्तवाक्यानामारभ्यते । अथवा ब्रह्मज्ञाने कर्तव्यतयोपदिष्टे तज्ज्ञानाय प्रवृत्तेभ्योऽर्थादेव तत्प्रतिपादनं प्रतिज्ञातमिति तदर्थं वेदान्तमीमांसारभ्यते । किंप्रयोजना किमुपकरणा चेति । उच्यते । तदविरोधितर्कोपकरणा निश्श्रेयसप्रयोजना चेति । तेर्वेदान्तैरविरोधी तर्को युक्तिरुपकरणमितिकर्तव्यता सहकारिकारणमिति यावत् । अथवा । तर्कोऽनुमानं वेदान्तैरविरुद्धम् तदऽर्थप्रतीतेरेव दृढत्वहेतुतयोपकरणमस्या इत्यर्थः ॥

॥ † इति पञ्चपादिकायां चतुर्थं वर्णकम् ॥

॥ इति प्रथमसूत्रं परिसमाप्तम् ॥

ब्रह्म जिज्ञासितव्यमित्युक्तमिति । ‡ ब्रह्मज्ञानकामेनेदं शास्त्रं श्रोतव्यमित्युक्तमित्यर्थः । यदैवेदमित्युक्तम् तदैव ब्रह्मणो लक्षणं प्रमाणं युक्तिः साधनं प्रयोजनमिति सर्वं व्याख्येयत्वेन प्रतिज्ञातम् । तच्च स्वरूपस्याभ्यर्हित्वात्तत्प्रथमं निर्देष्टव्यं किंलक्षणं पुनस्तद् ब्रह्मेत्यत आह भगवान् सूत्रकारः जन्माद्यस्य यत इति । युक्तिरपि लक्षणनिर्णये ऽर्थात् सूचितैव । जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिरिति परिच्छेदः पदार्थः पदविग्रह इत्येतत् चितयमपि व्याख्यानाङ्गं सम्पादयति । तद्गुणसंविज्ञाने प्रयोजनमाह जन्मस्थितिभङ्गं समासार्थ इति । तृतीयलिङ्गनिर्देशा § त्संहतिप्रधानं समासार्थः । नन्वादिः पूर्वकालकोटिमतो भवति तदभावे प्रपञ्चस्य को नामादिरित्याशङ्क्याह जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं चेति । यदनेन सूत्रेण लक्षितं ब्रह्म तत्स्वरूपकथनपरं वाक्यम् । तत्रादौ जन्म निर्दिष्टमिति तस्यादित्वं वस्तुस्वभावापेक्षमपि न हि वस्तु प्रलीय तिष्ठति स्थित्वा वा जायते नापि जनित्वैव ‖ प्रलीयते क्षणिकत्वनिराकरणात् । अतो जनित्वा स्थित्वा प्रलीयते एवमनादिरयं प्रपञ्चः । अस्येत्यादिभाष्येण पदभागस्ये-

* अन्तर्णीता मीमांसेति ३ पु० ।

† इति पञ्चपादिकायां प्रथमसूत्रं समाप्तमित्येतावदेवास्ति ३ पु० ।

‡ ब्रह्म ज्ञातुकामेनेति ३ पु० । § संहतिप्रधानं धर्मजातं समासार्थ इति ३ पु० ।

‖ नश्यतीति २, ३ पु० ।

दम: प्रातिपदिकमात्रस्यार्थनिर्देश: । तथाहि । सर्वत्र सर्वनाम प्रक्रमादिकारणान्तरबलेन कतिपयाभिधेयपरम् तदभावे स्वमहिम्ना प्रमाणविषयमात्राभिधायकम् तेनाह प्रत्यक्षादिसन्निधापितस्य धर्मिण इदमा निर्देश इति । षष्ठी जन्मादिधर्मसम्बन्धार्थेति सर्व एवेह सम्बन्ध: सम्भवति न तद्विशेष आदरणीय इति कथयति । यत इति कारणनिर्देश इति । प्रकृतित्वनिबन्धना * हि पञ्चमी नान्यनिबन्धनेति दर्शयति ।

अस्य जगत इत्यादिना भाष्येण लक्ष्यस्य ब्रह्मण: स्वरूपलक्षणं कथयितुमुपचक्रमते । द्विविधं हि लक्षणमुपलक्षणं विशेषलक्षणं च । तत्रेदं लक्षणं प्रपञ्चधर्मत्वात्पृथग्भूतमेव कारणमुपलक्षयति न विशेषणत्वेन अत: पृथक्स्वलक्षणकथनम् । † नामस्वरूपाभ्यां व्याकृतस्येति । कार्यप्रपञ्चं केचित्कथंचित्स्वप्रक्रियानुसारेण विभजन्ति तद्व्युदासाय प्रसिद्ध्यर्थानुवादश्रुतिबलेन द्वैराश्यं कृत्वा ऽऽह नामरूपाभ्यामिति । इत्थंभावे तृतीया । व्याक्रियमाणं हि वस्त्व ‡ भिधेयस्वरूपं स्वनामगर्भं विकल्पपूर्वमेव व्याक्रियत इति स्वसंवेद्यमेतत् । अनेन कर्तृभोक्तृसंयुक्तस्येति । कर्तृत्वभोक्तृत्वमपि नामरूपात्मकत्वात्प्रपञ्चानुयायीति दर्शयति प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्येति प्रतिकर्मफलोपभोगे नियतो देश: स्वर्गफलस्य मेरुपृष्ठं ग्रामादिफलस्य भूमण्डलम् । काला ऽपि स्वर्गफलस्य देहपातादूर्ध्वं पुत्रफलस्य § बालभावान्निमित्तमपि ‖ उत्तरायणादि ¶ मरणस्य । मनसा ऽप्यचिन्त्यरचनारूपस्येति । न ह्यवोग्दर्शी ** क्वचिद्बुद्धिर्लोकसन्निवेशप्रकारमध्यात्मं च प्रतिनियतार्थक्रियासमर्थावयवशिराजालसन्निवेशं निरूपयितुमपि समर्थ: किं पुन†† र्विरचयितुम् । जन्मस्थितिभङ्गं यत: सर्वज्ञात्सर्वशक्ते: कारणाद् भवति तद् ब्रह्मेति वाक्यशेष इति साकाङ्क्षस्य सूत्रवाक्यस्याकाङ्क्षितपदपूरणमुपलक्षितब्रह्मस्वरूपं लक्षणं च दर्शयति ।

नन्वन्ये ऽपि परिणामादयो भावविकारा: सन्ति ते किमिति न संगृह्यन्त इत्याशङ्क्याह अन्येषामपीति । न क्वचिद्वस्तुनो व्यवस्थाविशेषो

* हिशब्दो नास्ति १, २ पु० ।
‡ अभिधेयरूपमिति ३ पु० ।
‖ अपीति २ पु० नास्ति ।
** क्वचिदिति नास्ति ३ पु० ।
† नामरूपाभ्यामिति ३ पु० ।
§ बालभावादूर्ध्वमिति ३ पु० ।
¶ मरणमित्येव तु त्रिष्वपि पुस्तकेष्वस्ति ।
†† किं पुनर्विचारयितुमिति १ पु० ।

विनाशरहितो नाप्यनिर्वृत्तजन्मनोऽस्थितस्वभावस्य विनाशः । अतस्त्रिष्वेवान्तर्भावान्न पृथगुपन्यासस्तेषाम् । ननु * षड् भावविकारा इति नैरुक्ताः तेषां ग्रहणेऽन्तर्भावोक्तिप्रयासोऽपि परिहृतः स्यादित्याशङ्क्याह यास्कपरिपठितानां तु जायतेऽस्ती † त्यादि । पृथिव्यग्नेजःसु जगद्रचनारूपस्थितेषु तन्मयानां भावानां सम्भाव्यन्ते ततस्तद्ग्रहणे तेषामेव ब्रह्मत्वेन लक्षितत्वाशङ्का स्यात् न च तदुक्तम् । अतः सूचार्थवत्त्वाय श्रुतिनिर्दिष्टा एवोत्पत्त्यादयो गृह्यन्ते तदर्थनिर्णयार्थत्वात्सूचाणाम् । अतो यदवष्टम्भो विश्वो विवर्तते प्रपञ्चः तदेव मूलकारणं ब्रह्मेति सूचार्थः ।

ननु श्रुतिनिर्दिष्टग्रहणे सूचमर्थशून्यं स्यात् । न हीमां पृथिवीं जायमानां पश्यामः नाऽपो न तेजः कथं सिद्धवल्लक्षणत्वेनोपादीयत इति । उच्यते । तेजसस्तावदरणिनिर्मथनादिषु दृश्यते जन्मे इन्धनक्षये विनाशः । अपामपि चन्द्रकान्तादिषु जन्म क्रमेण च शोषः । पृथिव्या अप्यवयवसंयोगविभागदर्शनात् तन्निमित्तौ जन्मविनाशावनुमीयेते दृश्यते चाद्याप्यवयवसंयोगविभागकृतौ पृथिव्येकदेशस्य जन्मविनाशौ । वाय्वाकाशकालदिशामपि यावद्विकारं तु विभागो लोकवदिति वक्ष्यमाणेन न्यायेन स्त एव जन्मविनाशौ । न यथोक्तविशेषणस्येत्यादिना भाष्येण युक्तिरपि ब्रह्मस्वरूपनिर्णयायानेनैव सूचेण तन्त्रेणावृत्त्या वा जन्मादस्य यतः सम्भवति इति सूचितेति दर्शयति । अस्य जगतो नामरूपाभ्यां व्याकृतस्येत्याद्यभिहितविशेषणचतुष्टयस्य यथोक्तविशेषणमीश्वरं मुक्त्वेति सर्वज्ञं सर्वशक्तिं विहाय नान्यतः परपरिकल्पितात्प्रधानादचेतनाच्चेतनादपि परिच्छिन्नज्ञानक्रियाशक्तेः संसारिणो हिरण्यगर्भादुत्पत्त्यादि सम्भावयितुमपि शक्यम् । अचेतनात्तावदचेतनात्वादेवानुपपन्नम् । चेतनादपि परिच्छिन्नज्ञानक्रियाशक्तित्वात् । अभावात्पुनर्नाचेतनत्वादेव केवलादनुपपत्तिरपि तु निरुपाख्यत्वादतीतकल्पसंस्काराभावात् पूर्वकल्पैकरूपो वर्तमानोऽपि कल्प इति प्रमाणाभावात् सर्व एव व्यवहारो यादृच्छिक इति न क्वचि‡त्कश्चिन्नियमोऽभविष्यत् । न च स्वभावतः विशिष्टदेशकालनिमित्तोपादानादिति । स्वभावो नामान्यानपेक्षः तेनापेक्षैवानुपपन्ना

* षड् भावविकारा नैरुक्ता इति १ पु०, षड्भावविकारास्तैरुक्ता इति तु क्वचित् ।

† इत्यादीनामितीति क्वचित् । ‡ क्वचिदिति नास्ति १ पु० ।

कुतो नियमसम्भवः । अतो युक्त्या ऽपि वस्त्वन्तरस्य कारणत्वसम्भावना-निराकरणेन पारिशेष्यात्पूर्वोक्तविशेषण ईश्वर एव कारणमिति सिद्धम् ।

एतदेवानुमानमिति । येयं युक्तिरभिहिता यथोक्तविशेषणमीश्वरं मुक्त्वा नान्यतो जगतो जन्मादि सम्भवतीति एतदेव स्वतन्त्रमनुमानमीश्वर-सिद्धौ सर्वज्ञत्वसर्वशक्तित्वसिद्धौ च तस्य प्रमाणं किं वेदवाक्यैरितीश्वरकार-णिनः कणादप्रभृतयो मन्यन्ते जन्मादिसूचलक्षितान्यपि वाक्यानि यतो वा इमानि भूतानि जायन्त इत्यादीनि परार्थानुमानवाक्यसमानि दृश्यन्त इति वदन्तः । नन्विहापि तदेवोपन्यस्तमिति । यथा धूमविशेषस्यागुरुसम्भवत्वं तथा प्रपञ्चसन्निवेशविशेषस्य सर्वज्ञत्वादिगुणकारणत्वमिति । न वेदान्तवा-क्यार्थयथनार्थत्वात् सूचाणामिति । सत्यम् तदेवोपन्यस्तमुपकरणत्वेन न तच्च तात्पर्यं तात्पर्यन्तु वेद*वाक्ययथने तदेव प्रपञ्चयति वेदान्तवाक्यानीति । समन्वयसूचप्रमुखोपात्तैः शब्दशक्त्यनुसारिभि†र्न्यायैर्वाक्यानां ब्रह्मणि तात्प-र्याध्यवसाननिवृत्ता ब्रह्मावगतिर्नानुमानादिप्रमाणान्तरनिर्वृत्ता । सत्सु तु वेदा-न्तवाक्येषु तदविरोध्यनुमानमपि भवन्न निवार्यते श्रुत्यैव सहायत्वेन तर्कस्या-‡प्यभ्युपेयत्वात् । तथाहि । श्रोतव्यो मन्तव्य इति श्रुत्या यथा श्रवणं ब्रह्मावगतिहेतुरनूद्यते तथा मननस्यापि सिद्धवदनूद्यमानत्वात् । तथा ऽपरा श्रुतिः पण्डितो मेधावीत्यादिराचार्यवान् पुरुषो वेदेति पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति यदाचार्येण श्रुत्यनुसारिणा स्फटिकादिनिदर्शनेन शिष्येभ्यः प्रत्ययदा-र्ढ्यापादनं तदा ऽऽचार्यवान् पुरुषो वेदेत्यनूद्यते । न धर्मजिज्ञासायामिवेत्या-दिना । युक्तिसाहाय्यापेक्षणे कारणमाह श्रुत्यादय इति । श्रुतिः पदान्तर-निरपेक्षः शब्दः । आदिशब्देन लिङ्गवाक्यादयः शब्दप्रकारा गृह्यन्ते ।

न त एव ब्रह्मणि प्रमाणं किन्त्वनुभवादयो ऽपि । तच्च हेतुमाह अनु-भवावसानत्वाद् § भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्येति । सिद्धे वस्तुनि सम्भ-वत्यनुभवस्तदवसाना आकाङ्क्षानिवृत्तिर्यतः । ननु धर्मजिज्ञासायां विना ऽप्य-नुभवेन शब्दशक्त्यनुसरणमात्रेणैव निराकाङ्क्षं फलपर्यन्तं ज्ञानं भवति न तर्क-गन्धमप्यपेक्षते तथेहापि स्यात् प्रमाणत्वाविशेषाद्वेदान्तवाक्यानामित्याशङ्क्य

* वेदान्तवाक्येति २ पु० । † न्यायैरिति नास्ति १ पु० ।
‡ अपिकारश्चिन्त्यः ३ पु० । § स्वरूपवस्त्विति ३ पु० ।

विशेषमाह कर्तव्ये हि विषय इत्यादिना । ब्रह्मज्ञानमपि वस्तुतन्त्रमेव भूतवस्तुविषयत्वादित्यन्तेन भाष्येण । कथम् । कर्तव्यं हि कर्तव्यत्वादेवासिद्धस्वभावं नानुभवितुं * शक्यमिति न तदाकाङ्क्षा । इह तु सिद्धस्य साक्षाद्रूपेण विपर्यासगृहीतस्य † सम्यग्ज्ञानेन साक्षात्करणमन्तरेण न मिथ्याज्ञानोदयनिवृत्तिः । द्विचन्द्रादिषु तथादर्शनात् । नहि कर्तव्यसिद्ध्यर्थनिष्ठयोः प्रमाणत्वसाम्यादवबोधनप्रकारेऽपि साम्यम् । यदि स्यात् ‡ पुरुषेच्छावशनिष्पाद्यत्वमपि स्यात् । ततो विधिप्रतिषेधविकल्पसमुच्चयोत्सर्गापवादबाधाभ्युच्चयव्यवस्थितविकल्पादयोऽपि प्रसज्येरन् । न च वस्तुनि युक्तमेतत् निःस्वभावत्वप्रसङ्गात् । तथा चैकस्मिन् वस्तुनि स्थाणुः पुरुषो वेति विकल्पो न § वैकल्पिकद्रव्यत्यागज्ञानवत्सम्यग्ज्ञानं भवति स्थाणुरेवेति निश्चितैकार्थतापरमार्थं यतो वस्तुस्वभावपरतन्त्रं सिद्धवस्तुज्ञानं न ज्ञानपरतन्त्रं वस्तु यदि स्यात् शुक्तिरजतमपि तथा स्यात्कर्तव्यज्ञानं पुनर्वैपरीत्येऽपि सम्यगेव योषा वाव गौतम अग्निरित्यादिषु दर्शनात् । तचैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव भूतवस्तुविषयत्वात् । अतो युक्तो युक्ते ‖ रनुप्रवेशः अनुभवापेक्षा च नेतरच ।

¶ अपरः परिचोदयति ननु भूतवस्तुविषयत्व इत्यादिना । अयमभिप्रायः । भूतत्वादुक्तेरपि चेदनुप्रवेशस्तथा सति किं वेदवाक्यैर्विचारितैः यथाहुरीश्वरकारणिनस्तथा भवतु पूर्वसूत्रेण प्रतिज्ञानिर्देशोऽनेन च ** हेत्वभिधानमित्युत्तरमाह नेन्द्रियादिविषयत्वे सम्बन्धाग्रहणादित्यादिना । इन्द्रियाणि प्रपञ्चमात्रं गृह्णन्ति न तत्कारणम् । यदि तद्ग्रहणमपि स्यान्नानुमानोपन्यासेन कृत्यमस्ति । सामान्यतोदृष्टमपि न प्रमाणमतीन्द्रिये ब्रह्मण्यत उपसंहरति तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थं †† किं सर्हि वेदवाक्यप्रदर्शनार्थमिति युक्तिमपि तदुपकरणान्तदर्थानुभवप्रयोजनां ‡‡ सूचयतीत्युक्तम् ।

* शक्यत इति ३ पु· । † अयिमो नञत्रास्ति ३ पु· ।
‡ पुरुषस्येच्छावशादिति ३ पु· ।
§ वैकल्पिकद्रव्यजन्ययागज्ञानवदिति २ पु·, वैकल्पिक द्रव्ययागज्ञानवदिति ३ पु· ।
‖ अपिशब्दोऽत्राधिकः ३ पु· । ¶ अपर इति १ पु· ।
** हेतुत्वाभिधानमिति ३ पु· । †† किंत्विति ३ पु· पाठो भाष्यशैलीविरुद्धः
‡‡ सूचयतीति ३ पु· ।

नन्वेवं सति कथं युक्तिरब्रह्मविषया * सती तद्विषयाणां वाक्यानामुपकरणं भवति । उच्यते । ब्रह्मपरेषु वाक्येषु मृदादिदृष्टान्तैर्युक्तय उपन्यस्यन्ते ताश्च विधिप्रतिषेधवाक्ययोः प्रवर्तकत्वनिवर्तकत्वाकाङ्क्षितस्तुतिनिन्दार्थवादवत् स्वरूप † वाक्यस्य फलपर्यन्तापेक्षितसम्भावनार्थवादतां प्रतिपद्यमानास्तच्च ‡ श्रुतिसाहाय्ये वर्तन्त इत्युच्यते । किं पुनस्त § द्वेदवाक्यं सूचयेण्ह लिलक्षयिषितमिति । ‖ सर्वस्मिन्नेव वेदान्तवाक्ये ब्रह्मपदस्याप्रसिद्धत्वान्न स्वार्थं विशेष्यत्वेन विशेषणत्वेन वा वाक्यार्थं समर्पयितुमलमित्याक्षिपति येषां वेदान्तवाक्यानां येन संनिवेशक्रमेण ब्रह्मप्रतिपादने समन्वयः स्वाध्यायपाठे स्थितस्तल्लक्षणार्थं सूचद्वयमिति तयैवोदाहरणमाह भृगुर्वै वारुणिरिति । अथशब्दोपात्तन्यायेन प्रथमसूचस्योदाहरणं यतो वा इमानि भूतानीति जन्मादिसूचस्य कथम् । पूर्वोक्तेन न्यायेन पृथिव्यादीनां जन्मादिदर्शनात्तत्कारण एकत्वनानात्वयोरन्यतरावगमे प्रमाणाभावाद् बुद्धिमत्कारणपूर्व ¶ तामाचे प्रतिपन्ने यतो वा इमानीति कारणस्यैकवचननिर्देशात्तदर्थमाचस्यैव विधित्सितत्वादर्थात्सर्वज्ञं सर्वशक्ति जगत्कारणमिति कारणविशेषो वाक्यादवगम्यते । पुनस्तद्विजिज्ञासस्वेत्यनूद्य तद् ब्रह्मेति तच ब्रह्मशब्दप्रयोगाद् ** बृंहत्यर्थान्वयेन सर्वतोऽनवच्छिन्नस्वभावं जगत्कारणं ब्रह्मपदस्यार्थ इति गम्यते । †† तस्य च निर्णये वाक्यमप्यानन्दाद्ध्येव खल्विति प्रसिद्धावद्योतकेन हिशब्देन संयुक्तमानन्दावद्योतकमुपपद्यते । अनानन्दात्मके हि जगत्कारणे ब्रह्मशब्द ‡‡ प्रयोगो न युज्यते । न हि तस्योपलक्षणीये विषये स्वार्थप्रक्षेपेण वृत्तिः समञ्जसा । तस्माद् ब्रह्मपरे वाक्ये जन्मादिधर्मजातस्योपलक्षणत्वाद् ब्रह्मसंस्पर्शाभावात्सर्वज्ञं सर्वशक्ति §§ समन्वितं परमानन्दं ब्रह्मेति जन्मादिसूचेण ब्रह्मस्वरूपं लक्षितमिति सिद्धम् ॥

॥ ||| इति पञ्चपादिकायां पञ्चमं वर्णकम्
द्वितीयसूचञ्च समाप्तम् ॥

* सतीति नास्ति ३ पु० । † वाक्यस्यापि फलपर्यन्ततो ऽपेक्षितेति ३ पु० ।
‡ श्रुतीति नास्ति ३ पु० । § वेदान्तवाक्यमिति २ पु० ।
‖ भाष्यमिति अत्राधिकं ३ पु० । ¶ तत्रत्र नास्ति ३ पु० । ** बृहत्यर्थेति १, ३ पु० न
†† तताऽस्य निर्णयवाक्यमानन्दाद्धि खल्विति सिद्धावेति ३ पु० ।
‡‡ प्रयोगस्तत्र न युज्यत इति ३ पु० । §§ समन्वितमिति नास्ति ३ पु० ।
||| इति पञ्चपादिकायां पञ्चमं समाप्तम् इति द्वितीयं सूत्रमिति ३ पु० ।

शास्त्रयोनित्वात् । अयमपरः प्रपञ्चकारणस्य ब्रह्मणः सर्वज्ञत्वे हेतुः । अनेकनानाविधविषयविद्यास्थानोपबृंहितस्य वेदाख्यस्यापि शास्त्रस्य प्रपञ्चान्तःपातित्वात्तत एव जन्म । न च तेनाविषयीकृतस्य सद्भावे प्रमाणमस्ति । अतः सर्वविषयत्वात्सर्वज्ञं तत् । कल्पम् प्रत्ययप्रयोगो भाष्ये बोद्धृत्वाभावादीषदऽपरिसमाप्त्या । ततश्च कारणं तद्विषयादप्यधिकतरग्रहणसमर्थं गम्यते । दृश्यते ह्यद्यापि शास्त्रकाराणां तथाभावः ।

नन्वेवं सति बुद्धिपूर्वत्वात्सापेक्षं स्यात् । न स्यात् ब्रह्मवदऽनादित्वात् । कूटस्थनित्यत्वाच्च कथं पुनस्ततो जन्म । तत्परतन्त्रत्वाद्रज्जुसर्पवत् । तथा च श्रुतिः निश्वसितमेतदिति । यथा ऽपेक्षारहितेव लोके * निश्वासप्रवृत्तिस्तथा ऽस्यापीति न सापेक्षता दोषः ।

नन्वेवं सति कथं सर्वज्ञता । तस्यैव ज्ञानशक्तिविवर्तात्मकत्वात् । नाम † विकल्पप्रपञ्चस्य रूपप्रपञ्चस्यापि तदाश्रित्य विवर्तनानज्जन्मता नासतः प्रादुर्भावात् ॥

॥ ‡ इति पञ्चपादिकायां षष्ठं वर्णकम् ॥

अथवा यथोक्तमृग्वेदादीत्यादिना सूचस्य प्रमाणप्रतिज्ञामर्थान्तरमाह अपेक्षितत्वात् । कथं पुनरेकस्य सूचस्यार्थद्वयम् । सूचत्वादेव । तथा च पौराणिकाः अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुरिति । विश्वतोमुखमिति नानार्थतामाह । अतोऽलङ्कार एव सूत्राणां यदनेकार्थता नाम ।

ननु पूर्वसूत्रे शास्त्रमुदाहरता ब्रह्मावगमे शास्त्रं प्रमाणं प्रतिज्ञातमेव । सत्यमेतत्सूत्रबलेन तदादुहृतम् । अन्यथा § सूत्रे शास्त्रोपादानाभावादनुमानाशङ्कायां यतः सर्वज्ञात्सर्वशक्तेः कारणा ‖ ज्जगतो जन्मादि भवति तद् ब्रह्मेति वाक्यशेष इत्यस्यो ¶ पस्कारस्याप्रमाणत्वप्रसङ्गः । प्रतिप्रपञ्चं पृथक्कारणजन्यताया अपि सम्भवात्सर्वज्ञत्व ** सर्वशक्तित्वासिद्धेर्लोके च

* निश्वासस्य प्रवृत्तिरिति ३ पु० ।
† विकल्पेति नास्ति ३ पु० ।
‡ इति षष्ठवर्णकमिति १, २ पु० ।
§ पूर्वसूत्रे इति २ पु० ।
‖ जगतो नास्ति ३ पु० । ¶ उपकारेति ३ पु० । ** सर्वेति पुनर्नास्ति ३ पु० ।

जगत्कारणे ब्रह्मशब्दप्रयोगादर्शनात् । अतो जन्माद्यस्य यतः शास्त्रप्रमाणकमित्येतावदिदं सूत्रं सदऽसंदिग्धमनुमानशङ्कानिवृत्तेः पृथक्करणं * प्रपञ्चान्तःपातिनः शास्त्रस्यापि हेतुत्वेन सर्वज्ञत्वं सुसम्पादमिति व्याख्यानान्तरेण † कथयितुम् ॥

॥ इति पञ्चपादिकायां सप्तमं वर्णकम्
तृतीयसूत्रञ्च परिसमाप्तम् ॥

———o———

कथं पुनर्ब्रह्मणः शास्त्र ‡ प्रमाणकत्वमुच्यते यावता ऽऽम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति क्रियापरत्वं शास्त्रस्य प्रदर्शितम् । अतो वेदान्तानामानर्थक्यमक्रियार्थत्वात् । यद्यपि प्रदर्शितानि वाक्यानि सर्वज्ञत्वादिगुणकं ब्रह्म जगत्कारणं प्रतिपादयन्ति तथापि तच्च परिनिष्ठिते वस्तुनि प्रत्यक्षादीनामपि प्रवृत्तिसम्भवात्तैरऽसंवादे न प्रामाण्यं प्रतिलभन्ते ।

नन्वपौरुषेयत्वात्तज्जन्यं स्वार्थपरिच्छेदे ऽनपेक्षं कथमप्रमाणम् । सत्यम् । तथापि यथा चाक्षुषं § स्पर्शनगोचरचिचनिम्नोन्नतज्ञानं तेनासंवादादप्रमाणम् तथेहापि स्यात् । किंच । पुरुषार्थशून्यत्वादप्यप्रामाण्यम् । पुरुषार्थो हि नाम सुखावाप्तिर्दुःखपरिहारश्च । तौ सिद्धत्वाद्धानोपादानविषयौ न सिद्धवस्तुन्य ऽक्रियाशेषे सम्भवतः । ततो न क्वचिद्वेदवाक्यानां विधिस्पर्शमन्तरेणार्थवत्ता दृष्टापपन्ना वा । किंच । प्रत्यक्षादिविषये न शब्दमात्रस्य प्रामाण्यम् शास्त्रस्येष स्वभावो यदनवगतार्थाबोधकत्वम् । शब्दमात्रस्य पुनः प्रमाणान्तरगृहीतार्थप्रकाशन एव सामर्थ्यं दृष्टम् नानवगतार्थप्रकाशने । तस्मादनर्थका वेदान्ता न तेषां ब्रह्मणि प्रामाण्यम् । इत्येत एव वेदोषरा वेदान्ता इति केषांचिदुद्गारः । यत्पुनर्भाष्यकारेण कर्तृ ‖ देवता ¶ स्वरूपप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानां प्रकरणान्तरभयादनभ्युपगम्य स्ववाक्यगतोपासनाकर्मपरत्वमुक्तम् । तदयुक्तम् । उपासनावि ** धिशेषत्वेऽपि संवादाभावाज्जगत्कारणे न सर्वज्ञत्वादिसिद्धिः । ††सत्यम् अनुमानतो ऽनिर्दिष्टविशेषे

* तुशब्दोऽत्राधिकः ३ पु० ।
‡ प्रमाणत्वमिति ३ पु० ।
‖ देवतेति २, ३ पु० नास्ति ।
** विधीति २, ३ नास्ति ।
† कथयितुमितीति ३ पु० ।
§ स्पर्शगोचरेति ३ पु० ।
¶ स्वरूपादीति ३ पु० ।
†† यतःशब्दोऽत्राधिकः १ पु० ।

तस्मिन्नवगते समारोपितैर्धर्मैरुपासनानियोगः सेत्स्यति । एवं चाध्ययनविधिग्राहितानां वेदान्तानामेकान्ततो नानर्थक्यं * भविष्यतीत्यभिप्रायः ।

तत्तु समन्वयात् । तद् ब्रह्म सर्वज्ञत्वादिगुणकं वेदान्तशास्त्रात्प्रतीयत इति प्रतिजानीते हेतुं चाचष्टे समन्वयादिति । तच्च तात्पर्येण वेदान्तवाक्यानां समन्वयादित्यर्थः । सम्यगन्वयः समन्वयः । अथ कोयं सम्यक्त्वाऽन्वयस्य । पदानां परस्परानवच्छिन्नार्थानामनन्याकाङ्क्षाणामव्यतिरिक्तैकरसप्रातिपदिकार्थमाचान्वयः । सोयमित्यादिवाक्यस्थपदानामिव प्रकृष्टप्रकाशशब्दयोरिव चन्द्रपदाभिधेयार्थकथनेन । तथाच व्यक्तिविशेषः कश्चिच्चन्द्रप्रातिपदिकाभिधेयः केनचित् पृष्टो ऽस्मिञ् ज्योतिर्मण्डले कश्चन्द्रो नामेति तस्य प्रतिवचनम् प्रकृष्टप्रकाशश्चन्द्र इति । ‡ तदेवं प्रतिवचनं भवति यदि यथा चन्द्रपदेनोक्तम् तथा ऽऽभ्यामपि पदाभ्यामुच्येत । एवं च सति नीलोत्पलवदऽयुतसिद्धपरस्परावच्छिन्नविशेषणविशेष्यभावेनाप्यन्वयो दुर्लभः कुतः पृथक्सिद्धः क्रियाकारकलक्षणः सम्बन्धः । तथाविधान्युदाहरति रूपेव § सोम्येदमग्र इत्यादीनि ॥

ननु जन्मादिसूत्रोदाहरणेष्वेव प्रामाण्यं दर्शनीयम् किमुदाहरणान्तरेण । बाढम् अस्त्यत्राभिप्रायो भाष्यकारस्य । तच्च ब्रह्मणो लक्षणं वक्तव्यमिति तटस्थस्यैव ब्रह्मणो निरूपकाणि वाक्यान्युदाहृतानि । इह तु तत्त्वमसीति जीवस्य ब्रह्मात्मतावगतिपर्यन्तानि वेदान्तवाक्यानि न तटस्थमेव जगत्कारणं प्रतिपाद्य पर्यवस्यन्तीत्यतस्तथाभूतान्येव वाक्यान्युदाहृतानि सदेव सोम्येदमग्र आसीदित्येवमादानि । यत्पुनः सिद्धे वस्तुनि प्रत्यक्षादिसम्भवात्तदभावे मिथ्यात्वाशङ्कायामप्रामाण्यमिति । तदूपादाभावान्नेन्द्रियगोचर इति प्रत्युक्तम् । ननु इन्द्रियागोचरत्वादेव प्रत्यक्षाद्यविषयत्वान्न शब्दमात्रस्य तत्र प्रामाण्यमित्युक्तम् । उच्यते । यद्यपि शब्दमात्रस्य प्रत्यक्षादिविषय एव प्रयोगो दृष्टः । व्युत्पन्ना तु कथं व्युत्पद्यते इति वाच्यम् । श्रोतृव्यवहारो हि मूलं बालानां व्युत्पत्तेः । स च श्रोतुर्ज्ञानान्तरानिमित्ततापरिशुद्धः शब्दसामर्थ्यावः

* भविष्यति फलं च तत्र रात्रिसत्रवाक्यानामिवार्थवादसमर्पितं भविष्यतीत्यभिप्राय इति ३ पु० ।

† र्थकथने तथेति ३ पु० । ‡ तदेवं हीति ३ पु० । § सोम्येदमित्यादीनीति ३ पु० ।

गमहेतुः । अतो न प्रतिपत्तुर्ज्ञानान्तरा * सिद्धार्थावबोधकत्वं सामर्थ्यावगमकाले ऽवगतम् । तेनानवगम्यैव तद्विषयं ज्ञानं सामर्थ्यावगमः यथावगमं च विज्ञानोत्पत्तिः । यदा पुनर्व्युत्पन्नः स स्वयं † प्रयुयुक्षते ‡ परप्रतिपत्तये तदा ज्ञानान्तरसन्निधापितं स्वसाक्षिकं विवक्षन् सामर्थ्यावगमकाले ऽपि तयोः सत्तां प्रतिपद्यते केवलं न ज्ञानोत्पत्तौ तयो§रुपयोगम् । तस्मान्न शब्दस्य प्रमाणान्तरगृहीतार्थप्रकाशने सामर्थ्यं व्युत्पत्ति‖ काले ऽवगतम् किन्तु चक्षुरादिवदन्य¶ निरपेक्षो यथावगत**सामर्थ्यश्च शब्दो विज्ञानं जनयति । तस्मान्न प्रमेयस्य प्रत्यक्षादिविषयत्वं शब्दस्य विज्ञानजनन उपयुज्यते । अपि च । अपौरुषेये शब्दे चक्षुषीव †† विज्ञानोत्पत्तावनपेक्षे कथमप्रामाण्यमाशङ्क्येत ।

ननूक्तमाशङ्काकारणं ‡‡ स्पर्शनगोचरचित्रनिम्नोन्नतविषयस्य चाक्षुषस्य प्रत्ययस्य तत्संवादाभावा §§ दप्रमाणत्वम् । न तत्साधूक्तम् । अदुष्टकरणत्वादस्य तस्य च तदभावात् । तथाहि । शब्दस्तावदपौरुषयत्वाददुष्टः । प्रमेयस्य ‖‖ पुनर्ज्ञानहेतुत्वे न प्रमाणमस्ति शब्दस्यैव तदेकनिष्ठत्वेन तन्नियमात् । चित्रस्य तु चाक्षुषज्ञाने सामग्र्यन्तःपातिनः श्यामादिरेखासन्निवेशविशेषो दोषः । तदभावे तिमिराभाव इव सम्यग्दर्शनोत्पत्तेः । अतः प्रवर्तमानमपि प्रमाणं संवादकमेवेति नाप्रामाण्यमावहति । न च संवादलक्षणं प्रामाण्यम् अपि तु बोधलक्षणमिति प्रमाणविदां स्थितिः । अतो यथैव विधिवाक्यानां स्वार्थमाचे प्रामाण्यम् एवं स्वरूपवाक्यानामपि । अनवगतार्थपरिच्छेद ¶¶ सामान्यात् ।

ननु विधिवाक्यानामेव प्रामाण्यं युक्तम् । क्रियार्थत्वादाम्नायस्य । न इतरेतराश्रयत्वात् । विधिवाक्यानामेव हि प्रामाण्ये सिद्धे क्रियार्थत्वमाम्नायस्य सिध्येत् क्रियार्थत्वे च सिद्धे तेषामेव प्रामाण्यमितीतरेतरा**श्रयत्वं स्यात् न ह्येकमप्यन्यतः सिद्धम् । अतो यदवगमयत्याम्नायस्तदर्थः सः । तस्माद्यथाकार्यमवगमयंस्तदर्थः एवमैकात्म्यमप्यवगमयंस्तदर्थो भवितुमर्हति । प्रतीतिकृ-

* सिद्धावबोधेति २ पु० । † परस्मैपदं ३ पु० । ‡ परस्य प्रतीति ३ पु० ।
§ उपयोगः—र्हति ३ पु० । ‖ कालावगतामिति ३ पु० । ¶ निरपेक्षमिति २, ३ पु० ।
** सामर्थ्यश्चेति २ पु० । †† विज्ञानहेताविति २, ३ पु० । ‡‡ स्पर्शगोचरेति ३ पु० ।
§§ अप्रामाण्यमिति ३ पु० । ‖‖ अग्रिमो नञत्रास्ति ३ पु० ।
¶¶ सास्यादिति २ पु० । ** आश्रयः स्यादिति ३ पु० ।

तत्वात्प्रामाण्यस्य । प्रतीतिस्तु कार्यैकात्म्ययोस्तुल्या । प्रत्यक्षादिष्वऽप्येतदेव प्रमाणवृत्तम् यदनवगतमवगम्यते ।

आह । युक्तं प्रत्यक्षादीनां तावत् प्रामाण्यमपेक्षान्तराभावात् । आम्नायस्य त्वध्ययनविधिनोपादापितस्य न *पुनः पुरुषार्थमप्राप्य पर्यवसानं लभ्यते विधानानर्थक्यप्रसङ्गात् । † तस्मादैकात्म्यवाक्यानां स्वार्थमात्रनिष्ठता न युक्ता । उच्यते । पुरुषो ह्येतावदपेक्षते इष्टं मे स्यादनिष्टं मे मा भूदिति न त्वित्थमन्यथा वेति । न चास्य स्वयमीष्टे । द्विविधं चेष्टं प्रेप्सति । किंचित्प्राप्यं यथा ग्रामादि । किञ्चित्प्राप्तमपि ‡ भ्रान्त्या यथा हस्तगतमेव विस्मृतसुवर्णादि । अनिष्टमपि द्विविधं परिजिहीर्षति किञ्चित्परिहार्यं यथा गर्तादि । किञ्चित्परिहृतमपि भ्रान्त्या यथा रज्ज्वादि सर्पादिबुद्ध्युपगृहीतम् । तच्च प्राप्यपरिहार्ययोः साधनज्ञानायत्तत्वात्पुरुषार्थस्य विधिप्रतिषेधावर्थवन्तौ । इतरयो §स्तावद् भ्रान्तिमात्रव्यवहितत्वान्न तदपनयादन्यत् पुरुषार्थत्वेनापेक्षते । ‖ तदपनयश्च तत्त्वज्ञानाद्भवति नान्यथा । एवमपि लभ्यमानं पुरुषार्थमनुमन्यत एव पुरुषः सुतरां चाभिनन्दति । साधनायत्तो ह्यायासाल्लभ्येत ज्ञानायत्ते त्वायासेऽपि परिह्रियते । तेनानेकानर्थकलुषितमिवात्मानं मन्यमानस्य भ्रान्तस्य सर्वानर्थशून्यात्मतत्त्वप्रतिपादनादेव पुरुषार्थसिद्धेरैकात्म्यवाक्यानां स्वार्थमात्रनिष्ठत्वे ऽपि न विध्यानर्थक्यप्रसङ्गः । तस्मात्सिद्धं ब्रह्मणः शास्त्र ¶ प्रमाणत्वम् ।

॥ ** इति पञ्चपादिकायामष्टमं वर्णकम् ॥

अत्रापरे प्रत्यवतिष्ठन्ते । यद्यपि शास्त्रेण प्रमीयते ब्रह्म । तथाऽपि विधिसंस्पर्शिना न तद्ग्रहितेन । कस्मादेवम् । अन्यथा शब्दप्रयोगानुपपत्तेः । पुरुषेच्छासमुत्थापितो हि शब्दप्रयोगः । सा चेष्टानिष्टप्राप्तिपरिहारविषया । न च पारम्पर्येणापि सुखदुःखे विहायेष्टानिष्टे सम्भवतः । न च विस्मृतसुवर्णारोपितसर्परशनाप्रतिपत्ताविव तदनन्तरं शास्त्रादपि ब्रह्मात्मप्रतिपत्तौ सुखावाप्तिर्दुःखपरिहारश्च दृश्यते । पूर्ववदेव संसारित्वोपलब्धेः । प्रतीत्यु-

* पुनरिति नास्ति ३ पु० । † तत्तदैकात्म्येति प्रायः पाठः ।
‡ यथा भ्रान्त्येति ३ पु० । § इतरयोस्तु भ्रान्तीति २, ३ पु०
‖ तदपनयनमिति ३ पु० । ¶ प्रमाणकत्वमिति ३ पु० ।
** इति श्रीपद्मपादाचार्यविरचितायां पञ्चपादिकायामष्टमं वर्णकमिति ३ पु० ।

त्तरकालं च ध्यानोपदेशात् । तस्मात्सन्तु नाम लोके विधिरहितान्यपि पुरुषार्थपर्यन्तानि वाक्यानि । वेदे तु न तद्रहितानां तत्पर्यन्तता । तस्माद्यद्यपि जिज्ञास्यवैलक्षण्यं धर्मब्रह्मजिज्ञासयोः सिद्धसाध्यविषयत्वेन । तथापि सोऽन्वेष्टव्यः स विजिज्ञासितव्य इत्यादि * विधिषु को ऽसावात्मेत्याकाङ्क्षायां सर्व एव ब्रह्मस्वरूपपरः पदसमन्वयस्तत्समर्पकत्वेनोपयुक्तः न स्वतन्त्रमेव ब्रह्म प्रतिपादयितुमलम् । अतो विधीयमानज्ञानकर्मकारकत्वेनैव ब्रह्म प्रतिपादयत इति । यः पुनः तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति भाष्ये पूर्वपक्षोपसंहारः तत्र प्रतिपत्तिशब्दः सर्व एव मनोव्यापारः प्रमाणात्मक इतरो वा ब्रह्मसंस्पर्शित्वेन विधेयः कैश्चित् कथंचित् कल्पितः तस्य † सर्वस्य संग्रहार्थो द्रष्टव्यः ।

अत्रोच्यते । किमिदं ज्ञानं ब्रह्मकर्मकं विधीयते । न तावच्छब्दजन्यम् । स्वाध्यायपाठादेव तत्सिद्धेः । अथ ‡ शब्दजन्यस्यैव ज्ञानस्याभ्यासो विधीयत इति । न तस्य प्रयोजनं पश्यामः । नन्विष्टविषयस्य ज्ञानसन्तानस्य सुखसन्तानहेतुत्वं दृश्यते । यद्येवम् § तद्वदेव विध्यानर्थक्यम् । अथ पुनः साक्षात्करणाय ज्ञानसन्तानविधिरुच्यते । नैतद्युक्तम् । न हि दृष्टाधिकारो विधिरसम्भावितदृष्टफलो भवति । न हि लैङ्गिको ऽर्थो लिङ्गजन्मनैव ज्ञानेन सहस्रशो ऽप्यभ्यस्यमानेन साक्षात् क्रियते मा भूत् ‖ शब्दज्ञानादेवाभ्यस्यमानात्साक्षाद्भावः । तज्जन्मनो ज्ञानान्तरादुद्भविष्यति । नेत्थंभावे प्रमाणमस्ति । अस्तु तर्हि शब्दात् प्रतिपन्नस्य यथाप्रतिपत्ति ध्यानं नाम मनोव्यापारो विधीयत इति । किमर्थं तस्य विधानम् । ध्येयसाक्षात्काराय । न तस्य संभवः । न हि परोक्षं ध्यायमानं साक्षाद्भावमापद्यमानं दृष्टम् । ननु दृष्टं परोक्षमपि ध्यायमानं साक्षाद्भावमापन्नं कामादुपलब्धे । मैवम् । न तद्ध्यायमानम् । अपित्वविद्यात्मकम् अन्यथा बाधो न भवेत् ।

ननु द्रष्टव्य इति दर्शनमनूद्य निदिध्यासितव्य इति ध्यानं दर्शनफलं विधीयते । उक्तमेतत् न दृष्टाधिकारो विधिरसंभावित ¶ दृष्टफलो भवतीति ।

* विधिषु सत्स्विति २ पु० । † सर्वस्योपसंग्रहार्थ इति ३ पु० ।
‡ शब्दजन्यस्य ज्ञानस्यैवेति । ३ पु० । § तद्वदेवेति २ पु० नास्ति ।
‖ शाब्दज्ञानादिति ३ पु० । ¶ दृष्टफले भवतीति ३ ।

न हि ध्यानं ध्येयसाक्षाद्भावहेतुः क्वचिद् दृष्टम् । अथापि * भवतु नाम ध्यानाद्ध्येयसाक्षाद्भावः ध्येयस्य तथात्वे किं प्रमाणम् । शब्दस्तात्पर्यसाक्षात्करणोपायोपासनविधाने पर्य्यवसितो न तत्सद्भावे । सत्यम् । तथापि तत्त्वं सिध्यति वक्ष्यमाणेन देवताविग्रहवत्त्वन्यायेन । विषम उपन्यासः । तत्र हि न तथात्वे साधकं बाधकं वेति प्रतीतिशरणैस्तथा ऽभ्युपेयते । न तथेह सर्वस्यात्मत्वे प्रत्यक्षादिविरोधात् । आरोपितरूपेणापि ध्यानोपपत्तेः । पूर्वोक्तेष्वपि ज्ञानविधिपक्षेष्व † नयैव दिशा वस्तुतथात्वसिद्धिर्निराकार्या ।

यत्पुनः कैश्चिदुच्यते शाब्दज्ञानादन्यदेव ज्ञानान्तरमलौकिकं वेदान्तेषु कर्तव्यत्वेन विधायत इति । तत्र वदामः । तत्पुनः किंसाधनं ‡ किंकर्म चेति वक्तव्यम् । न ह्यनवगतऽर्मकारकं ज्ञानं विधातुं शक्यम् । अवगते च तस्मिन् विधानानर्थक्यम् । साधनमपि न विहितम् तेन विना साकाङ्क्षं वचनमनर्थकं भवेत् । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीत्यादिना वचनेन साधनं वेदानुवचनादि विहितमेवेति चेत् । प्रमाणान्तरस्य तर्हि प्रमाणं शब्दो नात्मतत्त्वस्य । नैतदुपपद्यते कार्यगम्यं हि प्रामाण्यं न विधिगम्यम् । तदुक्तम् । गुणाद्वा ऽप्यभिधानं स्यात्सम्बन्धस्याशास्त्रहेतुत्वादिति । तदेवमयुक्तमेतत् विधिसमन्वये शास्त्रप्रमाणत्वं ब्रह्मणः ।

अथाप्यथ यदतः परो ॥ ज्योतिरिति प्रपञ्चातिरिक्तब्रह्माभ्युपगमे देवताविग्रहवत्त्वन्यायसंभवान्मोक्षकामस्य ब्रह्मोपासनं विधीयते । तथा च श्रुतिः विद्यया तदारोहन्तीति । नच साध्यत्वे ऽप्यन्तवत्त्वम् । शब्दगम्यत्वादनावृत्तेर्न च पुनरावर्तत इति । न ह्येष तर्कगम्यो येन तर्केणास्य तत्त्वं व्यवस्थाप्येत । शब्दगम्यस्य तु शब्दादेव तत्त्वव्यवस्थेति मन्वानस्योत्तरमाह भाष्यकारः न कर्मब्रह्मविद्याफलयोर्वैलक्षण्यादिति । वस्तुसङ्ग्रहवाक्यमेतत् । अस्यैव प्रपञ्चो ऽतो न कर्त्तव्यशेषत्वेन ब्रह्मोपदेशो युक्त इत्येतदन्तं भाष्यम् ।

अस्यायमर्थः । संक्षेपतः श्रुतितो न्यायतश्च मोक्षस्य नित्यसिद्धत्वप्रतीतेर्न क्रियासाध्यो मोक्ष इति । कथम् । यदि सन्ध्योपासनवन्मानसं ¶ ब्रह्मकर्मकमुपासनं नाम धर्मो मोक्षफलः स्वर्गादिफलयागवद्विधीयते । तथा

* भवतु ध्यानाद्ध्यानादिति ३ पु० । † एतयैवेति ३ पु० । ‡ किंकर्मकं चेति ३ पु० ।
§ कर्मकारणमिति ३ पु० । ॥ दिवो ज्योतिरिति श्रौतः पाठः । ¶ कर्मेति अधिकमत्र ३ पु० ।

सति शरीरवतैव तत्फलं भोक्तव्यमित्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इत्यशरीरमोक्षानुवादो योग्यप्रियाप्रियस्पर्शनाभावानुवादश्च निरालम्बनौ स्याताम् । न चाशरीरत्वमेव धर्मकार्यम् स्वाभाविकत्वात्तस्य । तेनानुष्ठेयफलविज्ञानं मोक्षाख्यमशरीरत्वं स्वभावसिद्धं नित्यमिति सिद्धम् । तच्चापि कथंचि† त्परिणामि नित्यं स्यात्स्यादपि कदाचिद्धर्मकार्यम् । इदन्तु कूटस्थनित्यं ब्रह्म जिज्ञास्यत्वेन प्रक्रान्तम् यत्स्वरूपावगमो जीवस्य मोक्षोऽभिप्रेयते । तच्च यदि हस्तगतविस्मृतसुवर्णादिवद् भ्रान्तिमात्रव्यवहितं मोक्षं प्रत्याख्याय ब्रह्मविषयध्यानक्रियाते देवताविषययागादिव ‡ त्प्रीतिविशेषो भोग्यो मोक्षः कल्प्येत । ततस्तेष्वेव तारतम्यावस्थितेषु प्रीतिविशेषेषु यागफलेष्वयमपि तथाभूतः स्यात् । ततस्तद्यथेह कर्म § जितो लोकः क्षीयते एवमेवामुच्च पुण्य § जितो लोकः क्षीयत इतिलिङ्गदर्शनोपबृंहित ‖ न्यायावगतानित्यत्वो मोक्षः प्रसज्येत । ¶ न च तथाभ्युपगमो मोक्षवादिनाम् । अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्त इत्युपसंहारः ।

यत्पुनर्न च पुनरावर्तत इति शास्त्रावगतं नित्यत्वं न तर्केणापनेतुं युक्तमिति । तदयुक्तम् । वर्तमानापदेशत्वेन तथाभावे प्रमाणापेक्षणात् । न च कार्यस्य नित्यत्वे प्रमाणमस्ति । परमाणूनां पाकजो गुणो नित्यत्व नोदाहरणम् प्रक्रिया** मात्रसिद्धत्वात् । किंच + तेषामिह न पुनरावृत्तिः इमं मानवमावर्तं न वर्तन्त इति श्रुतिरिहेममिति विशेषणादस्मिन् कल्पे ऽनावृत्तिं दर्शयति नानधिकामनावृत्तिम् । †† अपि च । अभ्युपेत्य ब्रह्मणः क्रियानुप्रवेशं मोक्षस्यानित्यत्वदोष उक्तः न तु क्रियानुप्रवेशं क्षमते वेदान्तवाक्यगतः पदसमन्वयः । तथाच ब्रह्म वेद ब्रह्मैव भवतीत्याद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति वेदनब्रह्मभवनयोरेककालत्वनिर्देशात् । अतो न विदितस्य क्रियायां विनियोगः । तथा तद्वैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे इति ब्रह्मदर्शनसर्वात्मभावयो ‡‡ रेककालत्वनिर्देशान्मध्ये क्रियान्तरं

* अनुवादभोग्यप्रियाप्रियस्पर्शनाभावानुवादाविति द्वन्द्वो ऽस्ति ३ पु· ।
† परिणतिनित्यमिति ३ पु· । ‡ प्रीतीतिभोग्य इति ३ पु· ।
§ चित इति २ पु· । ‖ न्यायावगतो ऽनित्यो मोक्ष इति ३ पु· ।
¶ न तथेति २ पु· । ** मात्रेति नास्ति १, २ पु· ।
†† अपि चेति ३ पु । ‡‡ एककालत्वनिर्देशादिति २, ३ पु· नास्ति ।

वारयति पश्यन्निति शतृप्रत्ययो लक्षणहेत्वोः क्रियाया इति क्रियाया हेतुभूताद्धातोः शतृप्रत्ययस्मरणात् क्रियायाश्चान्यव्यवहिते हेतुमति हेतुत्वात् । यथा तिष्ठन् गायतीति तिष्ठतिगायत्योर्मध्ये क्रियान्तराभावः *प्रतीयते तद्वत् । अत्र न स्थितिक्रियासामर्थ्यादेव गीतिक्रियानिर्वृत्तिः अपि तु प्रयत्नान्तरात् शब्दतो न तयोर्मध्ये क्रियान्तरप्रतीतिरित्येतावतोदाहरणम् । इह पुनर्न सर्वात्मभावस्य ब्रह्मदर्शनातिरेकेण प्रयत्नान्तरापेक्षा विद्यते ।

किंच । तस्मै मृदितकषायाय तमसः पारन्दर्शयतीत्याद्याः श्रुतयस्तमसो मिथ्याज्ञानस्य मोक्षव्यवधायिनोऽपनयनमात्रं दर्शयन्ति मोक्षं न क्रियासाध्यम् । इतश्चैतदेवम् । अन्येऽपि न्यायविदो मिथ्याज्ञानापाये तदनन्तरं दुःखाभावं निर्वाणं दर्शयन्ति । मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति न क्रियातः । कथं गम्यते । इन्द्रो मायाभिः पुरुरूप ईयत इति मिथ्यैव भेदावभासस्तस्य प्रतिपक्षादभेदावभासादपनय इति गम्यते ।

अथापि स्यान्नैकत्वविज्ञानं †यथावस्थितवस्तुविषयं येन मिथ्यारूपं भेदावभासं निवर्तयेत् अपितु संपदादिरूपम् विधितः पुरुषेच्छया कर्तव्यमिति । संपन्नामाऽल्पमपि वस्त्वालम्बनीकृत्य केनचि‡त्सामान्येन दर्शनमाचान्महद्वस्तुसम्पादनम् । ततश्च तत्फलावाप्तिः । फलस्यैव वा संपादनम् यथा मनसो वृत्त्यनन्तत्वसामान्येनानन्तविश्वदेवसंपादन कृत्वा ऽनन्तलोकजयः । एवं जीवस्य §चिद्रूपसामान्येन ब्रह्मरूपसंपादनं कृत्वा ब्रह्मफलमवाप्यत इति । अध्यासस्त्वब्रह्मणि मनआदित्यादौ ब्रह्मदृष्ट्यो‖पासनं जीवस्यापि ब्रह्मदृष्ट्योपासनं संपाद्यालम्बनमविद्यमानसमं कृत्वा¶ संपाद्यमानस्यैव प्राधान्येन मनसा ऽनुचिन्तनमध्यासे त्वालम्बनस्यैव प्राधान्येनानुचिन्तनं क्रियायोगो वायोरग्न्यादीनां संहरणात्संवर्गगुणत्वेनोपासनम् । एवं जीवस्य स्वगतेन बृंहत्यर्थयोगेन ब्रह्मेत्युपासनं कार्यान्तरेण गुणभूतस्य ब्रह्मदृष्टिः संस्कारः आज्यस्येवावेक्षणम् ।

अथोत्तरं संपादादिरूपेहात्यादि । तथा सति तत्त्वमस्यादिवाक्यानं

* प्रमीयते इति १ पु· ।
† यथावेति १, २ पु· नास्ति ।
‡ समानत्वेनेति ३ पु· ।
§ चिद्रूपत्व सामान्येनेति २ पु· ।
‖ उपासनमेव जीवेति ३ पु· ।
¶ संपद्यमानस्येति १ पु· ।

नरूपचरितब्रह्मात्मैकत्वावगमपरः पदसमन्वयो विना कारणेन स्वेच्छामात्रेण संपदादिपरः परिकल्प्येत । तदवगमनिमित्तं च मिथ्याज्ञानापायपूर्विका विस्मृतहस्तगतसुवर्णावाप्तिवद्ब्रह्मावाप्तिः फलमनुभवारूढमपह्नूयेत। नेह नानास्ति किंचनेति च भेदाभावश्रुतिरुपरुद्धेत । तस्मान्न संपदादिवत्पुरुषव्यापारपरतन्त्रा ब्रह्मविद्या किन्तु प्रत्यक्षादिजनितज्ञानवदपरामृष्टहानोपादानवस्तुस्वरूपमात्रनिष्ठेत्यभ्युपगन्तव्यम् । तत्रैवं सति कथं ब्रह्म प्रतिपत्त्युत्तरकालं कर्मकारकतां नीयेत। तत्तज्ज्ञानं वा * तद धिगमफलपर्यन्तं सद् विधिविषयो भवेत् । अतो मिथ्यैव भेदावभासः तस्य प्रतिपत्त्यादभेदावभासादऽपनयः । तस्मान्मिथ्याज्ञाननिवृत्तिमात्रं मोक्ष इति श्रुतिन्यायाभ्यां सिद्धम् ॥

ननु विदिक्रियाकर्म तावद्भवति ब्रह्म ततः क्रियासम्बन्धे संभाविते भवति विधेरवसर इत्याशङ्क्याह न च विदिक्रियाकर्मत्वेनेत्यादि । आह सोयं शान्तिकर्मणि वेतालोदयो ब्रह्मणः क्रियानुप्रवेशं निराकर्तुं ज्ञानक्रियाया अपि विषयत्वं निराकुर्वता तत एव शास्त्रयोनित्वमपि † निराकृतमेव तदाह विषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेदिति । अत्रोत्तरम् नाविद्याकल्पितत्वादित्यादि । शास्त्रं हि सोयमित्यादिलौकिकवाक्यवद् ब्रह्मणि प्रमाणम् । तथाहि । सोयमिति देशकालभेदे ‡पाधिप्रविलयेनाभेदो ऽवगम्यते तथा त्वंपदार्थोऽप्यात्मानमहंरूपं मन्यमानस्तत्त्वमसिवाक्यात्तत्पदार्थैकतामुपगच्छन् सोयमितिवदऽहमात्मकेदमंशोपाधिकृतवेद्यवेदितृवेदनात्मकप्रपञ्चेनार्थात्प्रलीयमानेना§ वच्छिद्य विच्छिद्यमानानिदंप्रकाशः प्रमाणफलं ‖ दर्शितः । तदप्यवच्छेदकविनाशे तदैव विजहन्निर्विशेषतामापद्यते । तेन ¶ प्रमाचादिचतुष्टयस्य युगप** त्प्रलये ऽपि तदवच्छेदानुभवफलं वाक्यनिबन्धनम् । अतो वेदैकगोचरो निर्वाणमिति वेदविदः प्रतिपेदिरे । तथाचैवंविधस्य प्रामाणव्यापारस्य प्रकाशका मन्त्रब्राह्मणवादा भाष्ये दर्शिताः । एवं च नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः । यस्य तूत्पाद्यो मोक्ष इत्यादिना । तस्माज् ज्ञानमेकं मुक्त्वा क्रियागन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यत इत्यन्तेन भाष्येणा ऽविद्यानिवर्त-

* तदवगमपर्यन्तमिति २ पु· । † निराकृतमेतदाहेति १, २ पु· ।
‡ उपाधिकृतभेदप्रविलये इति ३ पु· । § अवच्छिद्यमानानिदंप्रकाश इति ३ पु· ।
‖ दर्शित इति ३ पु· नास्ति । ¶ प्रमाणादीति २ पु· । ** प्रविलये ऽपीति २ पु· ।

नेन नित्यमुक्तात्मस्वरूपसमर्पणं मोक्षं विहाय क्रियानुप्रवेशं कल्पयतो ऽपि न तस्य तच्च संभव इति * दर्शितम् । कथम् । यदि तावदुत्पाद्यो विकार्यो वा मोक्षः तदा यद्यपि क्रियानुप्रवेशो युक्तः तथापि मोक्षस्य ध्रुवमनित्यत्वमित्युक्तम् न कर्मब्रह्मविद्याफलयोर्वैलक्षण्यादित्यादिभाष्येण । अथानित्यत्वपरिहाराय स्थितस्यैवा ऽऽप्यत्व † मुच्यते । तदपि न । आत्मस्वरूपस्य क्रियापूर्वकाऽऽप्यत्वानुपपत्तेः । व्यतिरेकेपि सर्वगतत्वेन नित्यप्राप्तत्वादाकाशेनेव न क्रियापेक्षा प्राप्तिः । अथ विकारावर्तिनो ‡ ऽप्यथ यदतः परो दिवो ज्योतिर्दीप्यत इति श्रूयमाणस्य प्राप्तये क्रियापेक्षेति । न । विकारदेशेपि ब्रह्मणो विकारसंस्पर्शाभावादविशेषात् । अथ विकारावर्त्यैव ब्रह्म न विकारदेशे ऽस्ति तेन तत्प्राप्तये क्रियापेक्षेति । सा तर्हि तत्प्राप्तिरात्मनस्तादात्म्यापत्तिरुत स्वेनैव रूपेण तच्चावस्थानम् । यदि पूर्वकल्पः तदा स्वरूपनाशः । अथ द्वितीयः । संयोगस्य विप्रयोगा § वसानत्वात्पुनरावृत्तिः । न चापुनरावृत्तिश्रुतिर्वर्तमानापदेशिनी तथाभावे प्रमाणान्तरमपेक्षमाणा स्वयं ‖ प्रमाणीभवति । संस्कार्यत्वमपि न सम्भवति गुणदोषयोराधेयापनेययोस्तच्चासम्भवात् । अथ विद्यमानस्याभिव्यक्तिरादर्शस्येव निघर्षणेन । तच्च न आत्मनः क्रियारहितत्वात् । अन्याश्रयायास्तु न विषयः प्रत्यगूपत्वात् ।

नन्वीश्वराभिध्यानान्मलापगमो भविष्यति दीपप्रभयेव घटावगुण्ठनेन ¶ तमोपनयः । उच्यते । किमसौ मलः ** परमार्थः सन्नुताविद्यात्मकः । यदि **परमार्थः सन् । ††न तर्हि स्वाश्रयविकारमन्तरेणापसारयितुं शक्यः । न हि विकार आत्मनः संभवति ‡‡ अविकारित्वश्रुतेः । अथाविद्यात्मकः । न तर्ह्यविद्यावद्भूतेन सम्यग्ज्ञानेन विना तस्यापनयः लोके तथादृष्टत्वात् अन्यथा चादृष्टत्वात् । न च स्नानादिक्रिययेव संस्कार्यत्वसंभवः । अहंकर्तुरिदमंशस्यैव तच्च संस्कार्यत्वात् । तस्मान्न संस्कार्योपि मोक्ष इत्युपसंहरति । अथापि त्वऽन्यदपि क्रियाफलमस्ति तद् द्वारेण मोक्षस्य क्रियानुप्रवेशः स्यादित्याशङ्क्याह अतोन्यन्मोक्षं प्रतीत्यादि । न हि दृष्टमदृष्टं वा क्रियाफलमुत्पत्त्यादिचतुष्ट-

* दर्शयतीति ३ पु० । † उच्येतेति ३ पु० । ‡ अपिशब्दो नास्ति ३ पु० ।
§ अवसानादिति २ पु० । ‖ प्रमाणमिति ३ पु० । ¶ तमोऽपगम इति ३ पु० ।
** परमार्थसन्निति ३ पु० । †† न हि स्वाश्रयेति १, ३ पु० । ‡‡ अविकारश्रुतेरिति ३ पु० ।

यातिरिक्तं शक्यं केनचिद्दर्शयितुम् । तस्माज्ज्ञानस्यैव मोक्षो गोचरो न क्रियायाः ।

ननु * च ज्ञानस्यापि न गोचरो ब्रह्मेत्युक्तम् न विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मण इति वदता । सत्यम् । कर्मत्वं ज्ञानं प्रति निषिद्धुम् न पुनरनुपयोग एवैकान्ततो ज्ञानस्याभिहितः । तथा च तत्रैवोपयोगप्रकारो दर्शितः अविद्यापरिकल्पितभेदनिवृत्ति † परत्वादित्यादिना भाष्येण । मा तर्हि वोचः क्रियाया गन्धमात्रस्यानुप्रवेश इह नोपपद्यत इति ननु ज्ञानं मानसी क्रिया न वैलक्षण्यादित्युत्तरम् । कथं वैलक्षण्यम् । अजन्यफलत्वात् । उक्तमजन्यफलत्वमहङ्कार ‡ टीकायाम् । इदमपरं वैलक्षण्यम् ज्ञानं न चोदनाजन्यम् वस्तुजन्यं हि तत् । वस्तु च ज्ञानात्प्रागेव § स्वरूपे व्यवस्थितम् । अतस्तत्तन्त्रं ज्ञानम् न तज् ज्ञानेनान्यथा कर्तुं शक्यम् । अथापि स्यात् । भवेत्प्रत्यक्षं वस्तुजन्यम् अनुमानादिषु कथम् । तत्रापि लिङ्गादिपरतन्त्रम् न चोदनायास्तत्रानुप्रवेशः । किंच । न चोदनाजन्यं ज्ञानमेकान्ततो वस्तुपरिच्छेदकम् योषादिष्वग्न्यादिदृष्टिविधानदर्शनात् । अतो वस्तुविषयस्य ज्ञानस्य क्रियात्वे ऽपि न चोदनाजन्यत्वम् न पुरुषतन्त्रत्वम् अपितु प्रमाणवस्तुपरतन्त्रत्वम् एवं सम्यग्ज्ञानत्वोपपत्तेः अग्नाविवाग्निज्ञानस्य । एवं सति ब्रह्मात्मैकत्वविज्ञानस्यापि यथाभूतवस्तुविषयत्वान्न चोदनाजन्यत्वम् । अतो न विधेरत्रावकाशः । अतः श्रूयमाणा अपि विधयः केवलप्रमाणवस्तुपरतन्त्रे ज्ञाने ऽकिंचित्करत्वात् कुण्ठीभवन्ति । अतो ऽर्थवादतया ऽऽत्मज्ञानस्तावकत्वेन तदुन्मुखीकरणात् सामर्थ्यसिद्धबहिर्मुखतानिरोधाच्च विधिकार्यलेशस्य विद्यमानत्वाद्विधय इव लक्ष्यन्ते । तथा च श्रवणं नाम आत्मावगतये वेदान्तवाक्यविचारः शारीरकश्रवणं च । मननम् वस्तुनिष्ठवाक्यापेक्षितदुन्दुभ्यादिदृष्टान्तजन्मस्थितिलयवाचारम्भणत्वादियुक्त्यर्थवादानुसंधानं वाक्यार्थाऽविरोध्यनुमानानुसंधानं च । निदिध्यासनं मननोपबृंहितवाक्यार्थविषये स्थिरीभावो विधेयस्योपासनापर्यायस्य निष्फलत्वात् । ‖ दर्शनम् ततो वाक्यार्थे स्थैर्यान्निरस्तसमस्त-

* चेति नास्ति ३ पु० ।
‡ टीकायामित्युक्तम्० इदमपरमिति ३ पु० ।
‖ दर्शनं ततो वाक्यार्थस्थैर्येति ३ पु० ।
† परत्वादिभाष्येणेति ३ पु० ।
§ स्वस्वरूपेणेति ३ पु० ।

प्रपञ्चावभासविज्ञानघनैक्कतानुभवः । कः पुनरत्रार्थवादः । इदमत्र प्रस्तुम् क्रियाकारकफलात्मकात्संसाराद्विरक्ताये मेचेय्ये मुमुक्षवे मोक्षसाधनमात्मज्ञानं प्रतिपिपादयिषन्न वा अरे पत्युः कामाय पतिः प्रियो भवतीति पत्यादेरीप्सितत्वं प्रतिषिध्यात्मन ईप्सित * तमत्वमाह । ननु नैवात्मन ईप्सित * तमत्वमुच्यते किन्तु पत्यादीनामेवात्मार्थतयेप्सितत्वमुच्यते आत्मनस्तु कामाय पतिः प्रियो भवतीति । मैवम् । न हि तस्मिन्नऽनिष्टे तदर्थमिष्टं भवति । तस्मादनेनोपायेनात्मन एवेप्सितत्वमुक्तम् । ईप्सितश्चेद् द्रष्टव्यः श्रोतव्य इत्येषोऽर्थवादः । एतच्च सर्वं प्रथमसूत्रेणैव सूचितं विवृतं च भाष्ये । † अपि च । नैवायं विधौ कृत्यः । किं तर्हि । अर्हे कृत्यतृचश्चेत्यर्हे कृत्यः । ‡ एतेनात्मेत्येवोपासीत आत्मानमेव लोकमुपासीतेत्येवमादीनि विधिच्छायानि वाक्यानि व्याख्यातानि वेदितव्यानि । अतो हानोपादानशून्यात्मावगमादेव कृतकृत्यता प्रतीयते । श्रुतिस्मृतिवादानां च तथा प्रस्थितत्वात् । तस्मान्न प्रतिपत्तिविधिविषयतया ब्रह्मणः समर्पणमित्युपसंहरति । अस्यायमर्थः । न प्रमाणात्मकेनेतरेण वा ज्ञानव्यापारेण विधीयमानत्वेन कल्पितेन § संस्पर्शो ब्रह्मण इति ।

‖ यदपि केचिदाहुरित्यादि । अस्यायमर्थः । यदि स्वरूपमात्रनिष्ठोऽपि वेदभागोऽस्ति तत इदं पूर्वोक्तं प्रतिष्ठां लभते अन्यथा क्रियानुप्रवेशातिरिक्तमवेदार्थं एव स्यादिति । अस्योत्तरम् । तन्न औपनिषदस्य पुरुषस्यानन्यशेषत्वादिति वस्तुसंग्रहवाक्यम् । ¶ अस्यैव प्रपञ्चः यो ऽसावुपनिषत्स्वेवाधिगत इत्यादिः । अस्यायमर्थः । यो ऽयमहंप्रत्ययविषयात् क्रियासम्बन्ध्यात्मनोऽतिरिक्तः सम एकः सर्वभूतेष्वहंकर्तुरपि साक्षिभूतो न स केनचित्प्रमाणेन सिद्धः येन क्रियाशेषतां नीयेत । न हि प्रमाणान्तरासिद्धः क्रियासम्बन्धितयोपदेष्टुं शक्यः । न च स न प्रतीयत इति युक्तं वक्तुम् । तत्प्रतिपादकोपनिषत्पदसमन्वयस्य दर्शितत्वात् । अत एवौपनिषदत्वविशेषणमनन्यविषयत्वात् । तच्च वेदान्तानां तत्परत्वे ऽवकल्पते । नैष प्रतीयमानोऽपि

* तमब् नास्ति ३ पु० ।
† किञ्च नैवेति ३ पु० ।
‡ तेनेति ३ पु० ।
§ संसर्गो ब्रह्मण इति ३ पु ० ।
‖ यत्त्वपि केचिदिति ३ पु० ।
¶ तस्यैवेति ३ पु० ।

शुक्तिरजतवन्मिथ्येति शक्यं वक्तुम् बाधाभावात् । इतश्च न शक्यते मिथ्येति विदितुम् तस्मिन्नोपनिषदे पुरुषे स एष नेतिनेत्यात्मशब्दप्रयोगात् । आत्मनश्चानिराकार्यत्वात् य एव निराकर्ता तस्यैवात्मत्वप्रसङ्गात् । न च तस्य कदाचिदभावः सम्भवति अभावहेतूनामविषयत्वात् । न च निर्हेतुको विनाशः चितेरेकरूपावभासेन क्षणभङ्गनिराकरणात् । अतो ऽवच्छेदचयशू· तस्मिन् स्वयंप्रकाशमाने सर्वस्य पुरुषावधिर्विनाशः सा काष्ठा सा परा गतिः । तदेवमसंसार्यात्मनि प्रमाणान्तरागोचरे वेदान्तवाक्यसमन्वयात् प्रतीयमाने कथं तत्परो वेदभागो न भवेत् कथं वा प्रतीयमानो निराक्रियेत ।

नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामित्यक्रियार्थानां पदानामर्थशून्यत्वं शास्त्रतात्पर्यविद आहुः । तस्मात्प्रवृत्तिनिवृत्तिव्यतिरिक्तार्थवादिनां * निरालम्बनत्वात् ततो वस्त्ववगमः सामान्यतोदृष्टनिबन्धनो भ्रमः । तेन प्रवृत्तिनिवृत्त्यनुपयोगि वस्तु न शब्दादवगम्यते † अत एव ‡ तन्मिथ्येति शक्यते वक्तुम् । प्रमाणान्तरस्यापि § तद्विषयस्यासम्भवात् । कथं पुनः प्रवृत्तिनिवृत्त्यनुपयोगि वस्तु न शब्दादवगम्यते । शब्दस्य तच्च सामर्थ्यायहणात् । नचागृहीतसामर्थ्य एव शब्दश्चक्षुरादिवद्विज्ञानं जनयति । सामर्थ्यग्रहणं च ज्ञानकार्योन्नेयम् । ज्ञानं च विशिष्टार्थविषयं तद्विषयप्रवृत्त्या ‖ ऽवगम्यते । तदभावे कुतः सामर्थ्यकल्पना स्यात् । अकृप्तसामर्थ्यश्च शब्दो ¶ ऽक्रियाशेषे ऽर्थे कथं विज्ञानं जनयेत् ।

उच्यते । नैव सूचकारभाष्यकारयोरभिप्रायो लौकिको वा न्यायः सम्यगवगतो भवता पश्यतु भवान् । देवदत्त गामभ्याज शुक्लां दण्डेनेति प्रवर्तकाभ्याजेतिपदातिरेकिणां देवदत्तादिभूतार्थवादिनामप्रवर्तकानामपि प्रवर्तकादेव वाक्याद्भूतवस्तुविषयमपि सामर्थ्यं प्रतीयते न वेति । प्रतीयते चेत् निष्प्रयोजनत्वमानर्थक्यम् न निरालम्बनत्वम् । तदाह भाष्यकारः अपिच आम्नायस्य क्रियार्थत्वादित्यादिना भाष्येण । प्रयोजनं चानन्तरं पारम्पर्येण वा सुखावाप्ति ** र्दुःखपरिहारो वा स्यात् । अतस्तदर्थक्रियानुपयोग्यर्थवाचिनां सो ऽरो-

* निरालम्बनत्वे इति ३ पु· । † तत एवेति ३ पु· । ‡ तदिति २ पु· तास्ति ।
§ तद्विषये ऽसंभवादिति ३ पु· । ‖ अवेति नास्ति ३ पु· ।
¶ अक्रियविशेषे ऽर्थे इति ३ पु· । ** सुखावाप्तिदुःखपरिहारो इति २ पु· ।

दीदित्यादिपदानां भवत्वानर्थक्यम् ब्रह्मात्मत्वावगतिसमन्वितानां तु परमपुरुषार्थफलानां कथं निष्प्रयोजनत्वम् । स्यादेतत् । यद्यपि प्रवर्तकादेव वाक्याद्भूतार्थविषयमपि सामर्थ्यं प्रतीयते तथापि नाप्रतिपन्नभूतार्थावगतेः संभवः । * क्रियार्थतयैव संसर्गावगमात् । न हि गोपदात्तदर्थः सास्नादिमत्पिण्डधर्मत्वेनावगतो व्युत्पत्तिकाले पुनः प्रयोगान्तरेष्वप्रतिष्ठितः केसरादिमत्पिण्डधर्मत्वेन वा प्रतीयते । विषम उपन्यासः । गोपदस्याभिधेयसम्बन्धेन नानाविधसामर्थ्यमुपलब्धम् । अतो युक्तैकरूपैव प्रतीतिः । शब्दान्तरार्थान्वये पुनः प्रतिविभक्ति प्रतिपदार्थान्तरं च प्रयोग † भेदादन्यथान्यथा च सम्बन्धग्रहणकाल एवाऽऽवापो ‡ द्वापनिबन्धनः समन्वयो दृश्यते । तेन द्रव्यगुणक्रियाभिधायिभिः पदैः सम्बन्धयोग्यताभिधायिविभक्तिसंयुक्तैः प्रयोगैदम्पर्यवशादऽनियतः सम्बन्धो व्युत्पत्तिकाले निरूपितः । तथा च षष्ट्कर्तुः प्रथमभक्षः तस्मात्पूषा प्रपिष्टभाग इत्येवमादौ क्रियाशून्यानां समन्वयो दृश्यते । यस्तु कर्तव्य इति क्रियासम्बन्धः § स समन्वयनिमित्तो न तन्निमित्तः समन्वयः । यत्तु तद्भूतानां क्रियार्थेन समाम्नाय इति सूचयामास जैमिनिः । तदपि सिद्धेषु रूपादिष्वऽर्थेषु वर्तमानानां सामानाधिकरण्याद्यर्थत्वेन समाम्नायः समुच्चारणमिति यतो दर्शितः समन्वयो विशेषणविशेष्यत्वेनापि ‖ क्रियार्थेनेति तु धर्म ¶ जिज्ञासोपक्रमात्प्रकृतोपयोगितया ** सूचितम् । तथा च भाष्यकारोपि दृष्ट्वा हि तस्यार्थः कर्मावबोधनमित्यर्थसद्भावमात्रे कथनीये कर्मावबोधनमिति प्रकृतोपयोगित्वेनैवोक्तवान् । तदेतदाह भाष्यकारः यदपि शास्त्रतात्पर्यविदामनुक्रमणमित्यादिभाष्येण । अत एव पूर्वेण तन्त्रेणागतार्थत्वाच्छारीरकारम्भः । तच्च हि वेदस्य विवक्षितार्थत्वं स्वतःप्रमाण्यं स्वरूपे च विज्ञानोत्पत्तौ शब्दस्य सामर्थ्यमित्येतत्सर्वमवगतम् । क्रियार्थेन समाम्नाय इति तु धर्मजिज्ञासाप्रतिज्ञानुसारेण सूचितम् । इह पुनस्तत्तु समन्वयादिति विशेषणविशेष्यात्मकमपि गौण †† मपि सामानाधिकरण्यं विहायैकस्मिन्निरंशे ऽधिकरणे तत्त्वमसीति समन्वयो

* क्रियाऽर्थतैवेति ३ पु० ।
† भेदेनान्यथा चान्यथा चेति ३ पु० ।
‡ उद्धारनिबन्धन इति ३ पु० ।
§ स इति नास्ति १, २ पु० ।
‖ क्रियार्थत्वेनेति ३ पु० ।
¶ जिज्ञासा प्रक्रमादिति २ पु० ।
** सूचितमिति १ पु० ।
†† अपिशब्दः पुनर्नास्ति पु० ३ ।

मुख्यः प्रदर्शितः । तथा च भगवान् पाणिनिरव्यतिरिक्ते * प्रातिपदिकार्थमात्रे प्रथमां स्मरति ना ऽस्ति क्रियाकर्तर्यं † वातिरिक्ते ऽर्थे । तेन च कात्यायनस्या-स्तिर्भवन्तिपर इति मतं नानुमन्यते । दृश्यते च फलिता अमी द्रुमा राज्ञो-ऽयं पुरुष इत्यस्तिक्रियाशून्यः समन्वयः । नाचापि ये फलिता द्रुमास्ते सन्ति यो राज्ञः पुरुषः सो ऽस्तीति विवक्षितम् ‡ अपित्वेते द्रुमाः फलिताः अयं पुरुषो राज्ञ इति सम्बन्धमात्रावसितं वाक्यम् । एवं सामान्यतःसिद्धस्य जग-त्कारणस्य सर्वज्ञत्वादिस्वभावत्वे त्वम्पदार्थस्य च ब्रह्मात्मतायां समन्वयो वेदान्तवाक्यानां सिद्धः न तत्रास्तिक्रियाया वस्तुस्वरूपान्तर्वर्तिन्या अप्यनुप्रवेशो § दूरत एव बाह्यायाः ।

किञ्च । ब्राह्मणो न हन्तव्य इतिप्रतिषेधवाक्यसमन्वये न क्रिया क्रियार्थो वा ऽवगम्यते किन्तु क्रियानिवृत्तिरेव नियमेन प्रतीयते । व्रतशब्द-समन्वयात्तु प्रजापतिव्रतादिषु नेक्षेतोद्यन्तमादित्यमित्यादिष्वनीक्षणं ‖ मानसी संकल्पक्रिया प्रतीयते अनीक्षणं कुर्यात् ¶ नेक्षे ऽहमिति संकल्पयेदिति । न नञः समन्वयमात्रात् तस्य समन्वीयमानार्थाभावकरत्वात् । न च स्वभाव-प्राप्तहन्त्यर्थानुरागेणेत्यादिभाष्यस्यायमर्थः । स्वभावत एव रागादिनिमित्ता-च्छास्त्रमन्तरेणैव हननक्रिया प्राप्ता यदि नञानुरज्यते विशेष्यते तदा भवत्यहननमिति । ततश्चाहननं कुर्यादिति वाक्यार्थः स्यात् न हननं न कुर्या-दिति हननक्रियानिवृत्त्योदासीन्यम् । अतो न हन्यामिति मानसी संकल्पक्रिया ऽपूर्वा ऽभिहिता स्यात् । न चैतदुक्तम् नञः सम्बन्ध्युपमर्द**रूपत्वात् । अनी-क्षणे तु व्रत †† शब्दबलात्तथासमन्वयो न नञः सामर्थ्यादित्युक्तम् ।

ननु नञर्थे नियोगः प्रतिषेधेषु । तेन यागाद्यनुष्ठानादिवनञर्थानुष्ठा-नान्नियोगः साध्यः किमुच्यते क्रियानिवृत्त्योदासीन्यं प्रतीयत इति । वार्तमे-तत् । नञर्थो हि नाम न क्रिया ‡‡ नापि साधनम् अपि तु येन संसृज्यते तस्याभावो न तत्सिद्धिहेतुः । एवं प्रतिषेधस्य विधेरन्यत्वं सिध्यति । अन्यथा

* प्रातिपादिकमात्र इति ३ पु· । † एव ह्यतिरिक्तार्थे इति ३ पु· ।
‡ किन्त्वेते इति ३ पु· । § "दूतर एव अन्याया: बाह्याया:"—इति ३ पु· ।
‖ नामेत्यत्राधिकं ३ पु· । ¶ नेक्षे इतीति ३ पु· ।
** रूपत्वादवीक्षणेत्विति ३ पु· । †† शब्दसमन्वयात्तथेति ३ पु· ।
‡‡ न साधनमिति ३ पु· ।

विधिरेव * सर्वं स्यात् । तस्मात् संसृज्यमानाभावमात्रे प्रतिषेधवाक्यं पर्यवस्यति । † तत्र न विधिगन्धो ‡ पि विद्यते । तत्र संसृज्यमानं विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नाभ्यनुज्ञानानामभावात्प्रतिपाद्यधर्मः प्रतिषिध्यमानक्रियया § फलं प्रार्थनाप्रतिषेधवाक्ये लिङाद्यर्थः । तेन तदभावः प्रतिषेधार्थः स च प्रागभावः स्वभावसिद्धः । ‖ तस्मात्संस्कारोद्बोधनिमित्तसन्निधावपि तत्प्रतिबन्धे प्रयत्न आस्थेयः । स च यद्यपि साध्यः तथाप्यन्वयव्यतिरेकगम्यो न शब्दार्थः तत्प्रतिपादकपदाभावाच्च एकवाक्ये संसृष्टपदार्थव्यतिरेकेणान्यच्च वाक्यार्थत्वाभावाच्च । अतो यश्चार्थादर्थो न स चोदनार्थः । वाक्यन्तु क्रियाशून्यमेवावसितम् न साध्यं किञ्चित्तेन विषयीकृतम् औदासीन्यमात्रावसितत्वात्तस्य ।

अथ पुनर्नेजर्थविषयो नियोग एव प्रतिषेधे ऽपि वाक्यार्थ इत्यभिनिवेशः । भवतु तथापि प्रतिषिध्यमानक्रियानिवृत्त्या स सिध्यति क्रियोपादाने च तत्फलप्रार्थनैव हेतुरिति तत्कारणप्रतिबन्धे प्रयत्नास्थानान्नियोगसिद्धिः । तच्चान्वयव्यतिरेकावसेयमिति पूर्वोक्तान्मार्गान्न विशिष्यते । तदेवं वृद्धव्यवहारानुसारेणैव समन्वयानुसरणे सति तद्गम्यं ब्रह्म न धर्मवच्चोदनागम्यम् । दर्शितानि च वेदान्तवाक्यानि कारणसामान्ये सिद्धे तद्विशेषावगमाय समन्वितानि यतो वा इमानि भूतानि जायन्त इत्यादीनि तत्त्वमसीत्यादीनि च ।

यत् पुनरुक्तम् प्रतिपन्नब्रह्मात्मभावस्यापि पूर्ववत्संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमस्य समन्वयस्य ततो न तन्मात्रे तस्य पर्यवसानमित्यत्रोत्तरम् नावगतब्रह्मात्मभावस्येत्यादि । अस्यायमर्थः न कर्मनिमित्तस्तावच्छरीरसम्बन्धः इतरेतराश्रयदोषात्क्रियादिरहितत्वाच्च चैतन्यस्य । अनादित्वे ऽप्यन्धपरम्परावदप्रतिष्ठत्वात् । तन्निमित्तत्वे च पुत्रादिशरीरेष्विव गौणत्वप्रसङ्गात् तथानुभवाभावात् प्रसिद्धगौणत्वप्रकारासम्भवात् पुत्रादिशरीरेणेव स्वशरीरेणापि प्रमातृत्वाभावप्रसङ्गात् । पारिशेष्यादविद्यानिमित्तः शरीरसम्बन्धः । तस्यां च निवृत्तायां तत्सम्बन्धनिवृत्तौ कथं पूर्ववत्त्व ऽनिमित्तः

* सर्वः स्यादिति ३ पु० । † न तत्रेति ३ पु० । ‡ अपिर्नास्ति ३ पु० ।
§ फलप्रार्थनेति ३ पु० । ‖ तस्मात्तत्संस्कारेति ३ पु० ।

सुखदुःखानुभवः । तथा च श्रुतिस्मृतिवादा ब्रह्मविदः सर्वसंसारप्रवृत्त्यभावं दर्शयन्त उदाहृता भाष्ये । तस्मान्न ब्रह्मात्माभिमानिनः पूर्ववत्संसारित्वम् तदभिमानविरोधात् । वैषयिकस्तु साक्षादनुभवाभिमानः संसारविषय आरब्धकर्मशेषनिमित्तः तिमिरनिमित्तद्विचन्द्रवत् । मननिदिध्यासनयोर्न ब्रह्मावगत्युत्तरकालीनता किन्तु श्रवणवदवगत्युपायतया पूर्वकालतेवेत्युक्तम् ।

तदेवं सिद्धस्य वस्तुनः स्वरूपसत्तामात्रेणाप्रतिपन्नस्य प्रमाणविषयतया प्रमेयत्वाद्विधीयमानक्रियाकर्मत्वे तु कारकत्वस्य प्रमाणान्तरसिद्धुपेक्षत्वात्ततः सिद्धुनुपपत्तेर्वाक्यभेदप्रसङ्गात्प्रत्यक्षादिविरोधे देवताधिकरणन्यायासिद्धेर्वाक्यान्तरसिद्धस्य कर्मकारकत्वे चतुर्विधस्यापि कर्मकार्यस्य तत्रासम्भवात्तत् कर्मकोपासनाद्वेवताकर्मयागादिवत्स्वर्गोपमो मोक्षः फलं कल्प्येत । तस्य तद्वदेवानित्यत्वप्रसङ्गाद् ब्रह्म वेद ब्रह्मैव भवती * त्यादिभ्यो ब्रह्मवेदनमोक्षफलयोर्निरन्तरत्वप्रतिपादकेभ्यो वाक्येभ्योर्थादन्तराले क्रियानुप्रवेशनिराकरणात् तरति शोकमात्मविदित्यादिश्रुतिभ्यो मोक्षप्रतिबन्धनिवृत्तिमात्रस्यैवात्मज्ञानफलस्य दर्शितत्वात्साध्यान्तराभावे क्रियानुपपत्तेर्ब्रह्मात्मावगमस्य च मुख्यैक्याधिकरणस्य संपदादिद्विकल्पनानुपपत्तेः प्रमाणजन्याया अपि विदिक्रियायाः कर्मत्वनिषेधाद्विधीयमानोपास्तिक्रियाविषयत्वस्य दूरनिरस्तत्वाद्विदिक्रियाविषयत्वे ऽपि समारोपितनिवर्तनमुखेन नित्यसिद्धचैतन्यस्य ब्रह्मस्वरूपतासमर्पणाद्वाक्यविषयत्वोपपत्तेः सत्यपि वा विदिक्रियाकर्मत्वे तस्य च विध्यनायत्तत्वाद्विधिच्छायानां संस्तावकत्वेनाहार्यत्वात्संसारनिवृत्तेश्च ज्ञानफलस्य दृष्टत्वात् । अतो विधिनिरपेक्षं स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम् वेदान्तवाक्यसमन्वयादिति सिद्धम् ।

एवं च सति † वेदान्तानां परस्परसमन्वयजनितविज्ञानातिरेकेण चक्षुरादिवत्प्रवर्तकत्वस्याभावा ‡ त्तद्विषयः शास्त्रारम्भः पृथगुपपद्यते । अन्यथाचापि बोधकत्वातिरेकेण प्रवर्तकत्वमपि चेत् अथातो धर्मजिज्ञासेत्येवारब्धत्वान्न पृथगारभ्येत । अथाप्यबहिःसाधनत्वात्ततः परिशेषितमिति । तथाप्यथातः परिशिष्टधर्मजिज्ञासेति प्रतिज्ञा स्यात् प्रवर्तकविशेषजिज्ञास-

* इत्यादिश्रुतिभ्यो ब्रह्मेति २ पु. । † पदानां परस्परेति ३ पु. ।
‡ तद्विषयपृथक्शास्त्रारम्भ उपपद्यत इति ३ पु. ।

नात् । तदेवं ब्रह्मावगमात् प्रागेव विधिविधेयप्रमाणप्रमेयव्यवहारः । परतस्तु प्रमातुर्विधिविषयस्य चाभावान्न तत्सद्भाव इति । अपि चाहुरिति । प्रसिद्धमेतद् ब्रह्मविदामिति पूर्वोक्तं न्यायं संक्षेपतः श्लोकैः संगृह्णाति * गौणमुख्यात्मन इति । गौणोहंमानो ममत्वेन सम्बन्धात्पुत्रदारादौ । अतः स । गौण आत्मा मिथ्या देहादारभ्याहङ्कर्तुरिदमंशपर्यन्तो ऽहंमानो नात्मन्यात्माभिमानात् अतः स मिथ्यात्मा । तस्योभयस्याप्यात्मनो मुख्यपरमार्थब्रह्मात्मावगमेन तदाधारपुत्रदेहादिबाधनाद ऽसत्त्वे तन्निमित्तं शास्त्रीयं नियोज्यत्वं † शारीरं च भोक्तृत्वं निमित्ताभावान्न कथंचिदुद्भवेदित्यर्थः । तदेतद् ‡ द्रढयन्नाह अन्वेष्टव्यात्मेति । सेाऽन्वेष्टव्य इत्याद्युपक्रमेणोपदिष्टापास्ताशेषसंसाररूपब्रह्मात्मावगमात्प्रागेव प्रमातृत्वाभिमानः § प्रत्यक्चितेर्यदा ‖ पुनस्तदूर्ध्वं विस्मृतसुवर्णवदवाप्तम् तदा स एव प्रमातृत्वाभिमतो निरस्तसंसारदोषः संपन्नः । कुतस्तस्य कर्तृत्वभोक्तृत्वे भवतः ।

यद्ययमहमुल्लेखप्रमुखप्रमातृत्वादिव्यवहारः कल्पितः कथमिदानीमस्य प्रामाण्यमित्याशङ्क्याह देहात्मप्रत्यय इति । यथा देहे विशिष्टजातीये तद्व्यतिरिक्तस्याहङ्कर्तु ¶ रहंमानसम्बन्धः कल्पितो ऽपि स्वनिबन्धने लोकशास्त्रव्यवहारे यथा ऽवगतितत्त्वहेतुः तथा ऽयं कल्पितो ऽप्यलौकिकात्मस्वरूपप्रतिपत्तेः प्राक् प्रमाणम् निश्चितप्रत्ययोत्पादनाद्बाधानुपलब्धेश्चेति ॥

इति नवमं वर्णकम् ।

** इति श्रीपद्मपादाचार्यविरचितायां पञ्चपादिकायां चतुःसूत्री समाप्ता ॥

परिसमाप्तश्चायमुपलभ्यमानो ग्रन्थः ॥



* गौणमिथ्यात्मन इति ३ पु० । † सांसारिकञ्चेति २ पु०, सांव्यवहारिकं चेति ३ पु० ।
‡ दर्शयन्नाहेति ३ पु० । § प्रत्यगात्मन इति २ पु० ।
‖ पुनः स्वरूपमिति ३ पु० । ¶ अहंमानबन्ध इति १ पु० ।
** इति पञ्चपादिकायां नवमो वर्णकः समाप्तः· इति चतुस्सूत्री–इति ३ पुस्तके पाठो ऽस्ति ।

V. A. VENKATESWARA AIYAR

No. 5.]

THE

VIZIANAGRAM SANSKRIT SERIES

UNDER THE SUPERINTENDENCE OF

ARTHUR VENIS M. A. Oxon.

PRINCIPAL, SANSKRIT COLLEGE, BENARES.

THE

PAÑCHAPÂDIKÂVIVARAṆA

OF

PRAKÂŚÂTMAN

WITH EXTRACTS FROM THE

TATTVADÎPANA AND BHÂVAPRAKÂŚIKÂ

EDITED BY

RÂMAŚÂSTRÎ BHÂGAVATÂCHÂRYA,

ASSISTANT PROFESSOR, SANSKRIT COLLEGE, BENARES.

VOL. III.

SANSKRIT TEXT.

(ALL RIGHTS RESERVED.) Registered under Act XXV of 1867.

PRINTED, PUBLISHED AND SOLD BY

E. J. LAZARUS & Co., BENARES.

MAY BE HAD FROM GANESH DAS AND CO., CHOWK, BENARES:

JAYESTHARAM MUKUNDJI AND CO., BOMBAY:

OTTO HARRASSOWITZ AND M. SPIRGATIS LEIPZIG:

LUZAC AND CO., LONDON.

1892.

V. A. VENKATESWARA AIYAR

पञ्चपादिकाविवरणम् ।

श्रीप्रकाशात्मयतिविरचितम् ।

विवरणतत्त्वदीपनविवरणभावप्रकाशिकाभ्यां व्याख्या-
नाभ्यां सङ्कलितया टिप्पण्या सहितम् ।

काशीस्थराजकीयसंस्कृतपाठशालायामध्यापकेन
श्रीरामशास्त्रिभागवताचार्येण संशोधितम् ।

काश्याम् ।

ई. जे. लाजरसकम्पन्याख्येन स्वमुद्रालये मुद्रितम् ।

संवत् १९४८ ।

॥ श्रीः ॥

॥ भूमिका ॥

पञ्चपादिकाविवरणाभिधोऽयं निबन्धोऽनन्यानुभवपूज्यपादशिष्यैः परमहंसपरिव्राजकाचार्यैः प्रकाशानुभवापरनामधेयैः[१] ब्रह्ममीमांसाशास्त्रस्य सारभूतानर्थांश्चतुःसूचीव्याख्यान एव प्रतिपादयद्भिः श्रीप्रकाशात्मयतिभिः[२] प्रणीतः । सत्स्वप्यनेकेषु पञ्चपादिकाव्याख्यानेषु[३] अमुमेव निबन्धमुत्तमत्वेनावधार्य वेदान्तिनः स्वनिबन्धेषु[४] प्रमाणयन्ति ॥

सोऽयं निबन्धोत्तमः पठनपाठनादिषु विरलप्रचारत्वेन तथा विलुप्तो यदाधुनिका निबन्धेषु "भाष्यटीकाविवरणं" "पञ्चपादिकाविवरणं" वेति दृष्ट्वा किमिदं विवरणं नाम वेदान्तग्रन्थेष्वेव वान्यत्र वेति विकल्पयन्तीति वेदान्तरत्नमञ्जूषामिव निगूढं सम्पाद्य प्रकाशयितुं प्रवृत्ताः सम्पादकमहाशयाः ॥

यतयः स्वीयनिबन्धेषु स्वदेशकालादिकं प्रायो नैव निरूपितवन्त इति भगवतः श्रीप्रकाशात्मयतेः देशकालौ सम्यङ् न ज्ञायेते तथाप्यनुमीयते यद्विद्यारण्यसमयात्[५] पूर्वं तस्य स्थितिरासीदिति । यतो माधवाचार्येण सर्वदर्शनसंग्रहान्ते प्रतिज्ञातं खलु "इतः परं सर्वदर्शनशिरोमणिभूतं शाङ्करदर्शन-

(१) वाराणसीस्थराजकीयसंस्कृतपाठशालीयवेदान्तपुस्तकेषु ४ संख्यकपुस्तके । "श्रीपरमहंसपरिव्राजकाचार्यानन्दानन्यानुभवपूज्यपादशिष्यप्रकाशानुभवभगवतः कृतौ पञ्चपादिकाविवरणे" इति ॥

(२) विवरणारम्भे । प्रकाशात्मा यतिः सम्यक् प्राप्तविद्यागुरुत्सया । यथाश्रुतं यथाशक्ति व्याख्यास्ये पञ्चपादिकाम् ॥ तत्त्वदीपनेऽप्येवमेव ॥

(३) अमलानन्दकृतं पञ्चपादिकादर्पणं विद्यासागरकृता पञ्चपादिकाटीका च । एकं तद्व्याख्यानपुस्तकमुक्तपाठशालायां वर्तते किन्त्वाद्यन्तहीनत्वाच्च निश्चितं भवति किं तदिति ॥

(४) गोविन्दानन्दो भाष्यरत्नप्रभायां "तदुक्तं प्रकाशात्मश्रीचरणैः" इत्यियाटिक्सोसाइटीमुद्रितपुस्तके ३ पृ॰ द्रष्टव्यम् ॥

अप्पयदीक्षिता अपि सिद्धान्तलेशसंग्रहे । "स्वप्रपञ्चविपरीतप्रमात्रादिज्ञानसाधनस्यान्तःकरणस्येत्यादिपञ्चपादिकाविवरणग्रन्थेनापि तथा प्रतिपादनात्" अस्यां श्रेण्यां मुद्रिते पुस्तके ६७ पृ॰ द्रष्टव्यम् ।

(५) तल्लिखिततामपत्रे १३१३ शककालः । आनन्दाश्रमसंस्कृतसीरीज २ संख्या द्रष्टव्या ।

मन्यच्च लिखितमित्यचोपेक्षितमिति" । ततः परमसौ संन्यस्तो विद्यारण्ययोगीत्याख्यया प्रसिद्धो विवरणप्रमेयसंग्रहाख्यं निबन्धं विनिरमादिति ॥

पञ्चपादिकाविवरणस्य प्रसन्नगम्भीरतया सुबोधार्थमखण्डानुभूतिशिष्याखण्डानन्दमुनिकृतविवरणतत्त्वदीपनग्रन्थात् जगन्नाथाश्रमपूज्यपादशिष्यनृसिंहाश्रमकृतविवरणभावप्रकाशिकाग्रन्थाच्च क्वाचित्की लघ्वी टिप्पण्यपि सङ्कलिता ॥

अनयोर्निबन्धयोः पूर्वापरभावचिन्तायां भावप्रकाशिकाग्रन्थे "ऽयमेवार्थस्तत्त्वदीपनकृतामभिप्रेतः" इत्युपलब्ध्या भावप्रकाशिकाकर्तुर्नृसिंहाश्रमस्य समयात् (१) पूर्वं तत्त्वदीपनमासीदिति सिद्धम् । किन्तु तत्त्वदीपनं कस्मात् परमिति विचारे विवरणप्रमेयसंग्रहेणार्थतः साम्यादनुमितं भवति यदेकं दृष्ट्वा एकस्य निर्माणं तच्च तत्त्वदीपने विद्यारण्यादर्वाचीनानामाचार्याणामनुल्लेखात् विवरणप्रमेयसंग्रहे तत्त्वदीपनप्रदर्शितानां भास्करादीनां मतानां चोल्लेखदर्शनात् तत्त्वदीपने तच्च तच्च निष्कृष्टार्थं "इति प्रमेय"मित्याकरेण दर्शित इति तत्त्वदीपनग्रन्थाद्विवरणप्रमेयसंग्रहः संग्रहत्वान्नवीन इति कथनं तु साहसमिवाभातीति तत्पूर्वापरभावे प्रमाणं मृग्यमेव ॥

अस्य पुस्तकस्य संशोधनार्थं पञ्चादर्शपुस्तकानि सम्पादितानि । तच्च पुस्तकचयं वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालयात् तचोभयं परिशोधितं देवाक्षरं वाराणसेयं तच्चैकं वैक्रमसंवत्सरे १९२५ लिखितम् । तृतीयं तालपत्रस्थं वङ्गाक्षरं प्राचीनत्वाद्दुष्पठमिति तत्रत्यपुस्तकालयाध्यक्षस्य पं० विन्ध्येश्वरीप्रसादशर्मणः साहाय्येन तस्मादुपयोगः सम्पादितः । अन्यच्चोत्कृपाठशा[illegible]धानाध्यक्षाणां पुस्तकं तत् प्रायो वर्षाणां पञ्चशत्याः प्राचीनं जीर्णं पाठभेदे क्वचिद् दर्शनमेवार्हति । अपरं महामहोपाध्यायपण्डितश्रीगङ्गाधरशास्त्रिभिः प्रदत्तं १८२२ संवत्सरे लिखितं परिशुद्धम् ॥

तत्त्वदीपनपुस्तकं भावप्रकाशिकापुस्तकं च वाराणसीस्थविद्वद्वरपण्डितश्रीविभवरामशर्मभिः प्रदत्तं प्राचीनं परिशोधितं च ययोः प्रारम्भपरिसमाप्तिवाक्यानि प्रदर्श्यन्ते ॥

यथा ।

(१) तत्कृततत्त्वदीपनस्य समाप्तिः वैक्रमीय १९०४ वर्षे पुरुषोत्तमपुरे जाता ।

तत्त्वदीपनम्

यदबोधसमुद्भूतं यद्बोधात् प्रविलीयते ।
नामरूपात्मकं विश्वं तस्मै पूर्णात्मने नमः ॥ १ ॥
जटाजूटं बिभ्रत् क्वचिदपरभागे भृतकच-
स्तथैकस्मिन् भागे भसितमपरत्राप्रघुसृणः ।
फणीन्द्रं कस्मिंश्चिन्मणिगणधरोऽन्यत्र भगवान्
गिरीशः श्रेयो नः प्रदिशतु शिवामिश्रितवपुः ॥ २ ॥
दिक्कूलंकषकीर्तिफेनविशदप्रोद्दामविद्याजल-
भ्राम्यद्वाङ्मयतुङ्गभङ्गविलसत्तीर्थप्रभेदास्पदम् ।
वादिव्रातकथाप्रसङ्गविसर[1]तर्काश्मसारोज्ज्वलं
वन्दे सर्वमुनीन्द्रसेव्यमनिशं श्रीबोधपृथ्वीधरम् ॥ ३ ॥
वादिवारणसन्दोहप्रभञ्जनविशारदम् ।
श्रीमदानन्दशैलाङ्कपञ्चास्यं सततं भजे ॥ ४ ॥
विमलमदजलौघद्योतमानोरुगण्ड-
स्थलनिकटनिकुञ्जद्भ्राजमानालिमालः ।
जयति पृथुलकण्ठाबद्धमालेन्द्रनीला-
वलिरिव सुरसिद्धाराधितो विघ्नराजः ॥ ५ ॥
आधारपङ्केरुहमध्यसंस्था मृणालसूचाकृतिरप्रमेया ।
शीर्षादिभेदस्थितसर्ववर्णा जिह्वाङ्गणे नृत्यतु वागजस्रम् ॥ ६ ॥
नानाविधनिबन्धाढ्यप्रसूनरसमादरात् ।
निबन्धमधु संगृह्य क्रियते तत्त्वदीपनम् ॥ ७ ॥

पञ्चपादिकां व्याचिख्यासुर्ग्रन्थकरणयोग्यतार्थं परां देवतां[2] प्रार्थयते कश्चित् । यमेवैष वृणुते तेन लभ्य इतीश्वराधीनत्वं विद्याया लक्ष्यते

विलसत्–पा॰ संस्कृतपाठशालीयपु॰ ।
परदेवतां–पा॰ सं॰ पु॰ ।

विदुषश्च ग्रन्थकरणाधिकारात् परदेवताप्रार्थनमुचितम् । अत्रेषाक्षरयोजना । सते नम इति सम्बन्धः[१] ॥

समाप्तिवाक्यम् ।

ज्ञाने सत्यपि प्रमातृत्वादिकं दृष्टमित्याशङ्क्य तात्पर्यमाह । अद्वितीयेति । सकलशास्त्रव्यवस्थासिद्ध्यर्थं सोपाधिकं निरुपाधिकं च रूपमनूदितमिति द्रष्टव्यम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याखण्डानुभूतिपूज्यपादशिष्येणाखण्डानन्दमुनिना विरचिते विवरणतत्त्वदीपने समन्वयसूत्रं[२] समाप्तम् । समाप्तं नवमवर्णकम् ॥

भावप्रकाशिका

यत्सत्त्वचैतन्यसुखानुलिप्तं विश्वं हितं सत् स्फुरतीव भाति ।
स मां निरस्ताखिलभेद आत्मा पायादबोधाद्विपदो नृसिंहः ॥ १ ॥
श्रीमद्गुरुपदद्वन्द्वमद्वैतात्मप्रसिद्धये ।
हृदये सदयं भूयान्निगूढात्माञ्जनं परम् ॥ २ ॥
श्रीमद्गुरुकृपालेशादद्वैतब्रह्मगोचरे ।
क्वचित् क्वचिद्विवरणे गूढो भावः प्रकाश्यते ॥ ३ ॥

निर्विशेषब्रह्मप्रतिपादकग्रन्थकरणस्य तत्प्रतिपत्तिं विनायोगात् तस्याश्च यमेवैषं (ष) वृणुते तेन लभ्य इत्यादि शास्त्रा (स्त्रा) त् परमात्मप्रसादाधीनत्वप्रतीतेर्विषयप्रयोजने दर्शयन् परमात्मानं नमस्करोति । पालन इति ॥

नवमवर्णके ।

प्रस्तोष्यमाणवर्णकस्यानन्तरवर्णकादपुनरुक्तमर्थमाह । लोके पदानामित्यादिना । अत्र च ग्रन्थकारस्याशयोऽतिस्पष्ट इति न किञ्चिल्लिख्यते ॥

(१) सम्बन्ध-इति नास्ति सं॰ पु॰ ।
(२) चतुर्थसूत्रम्-पा॰ सं॰ पु॰ ।

अहं कियान् क्वाक्षमनःश्रुतीनां विहारदूरं परमात्मतत्त्वम् ।
अहो गुरूणां चरणारविन्दप्रसादभाजां सुलभं समस्तम् ॥
कृतिरियमनवद्या नैव वासीन्न जाने
मम हृदयनिविष्टो यस्तमोदूरचारी ।
हितमहितमथान्यत्कारयन्मां य आस्ते
नरमृगवपुरीशो दृग्भिरेनां पुनातु ॥
यदि च विकृतिरचाल्पीयसी भूयसी वा
कियदपि मम नैनः संस्तवो वा गुणेन ।
अपि तु भवत एतौ किं ग्रहग्रस्तलोके
नरमृगवपुषस्ते यच्च वेदाः प्रमाणम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशिष्यश्रीमन्नृसिंहाश्रममुनिविरचितायां पञ्चपादिकाविवरणभावप्रकाशिकायां समन्वयसूत्रविचारः समाप्तः । समाप्ता विवरणटिप्पणी ॥

वाराणसीस्थराजकीयसंस्कृतपाठशालायाम्
विन्ध्येश्वरीप्रसादशर्मा द्विवेदोपाख्यः ।



अथ शुद्धिपत्रम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१६	१०	दर्शनाचाप्य	दर्शनात् नाप्य
१७	१६	ऽविद्यासम्भवति	ऽविद्या सम्भवति
१८	२२	प्रमाणमेवहि	प्रमाणमेव हि
२०	१३	कथा–	कथा
२०	१५	वाद इति ।	वाद इति
२१	६	रजतमयं	रजतमयं
२१	१४	ज्ञानेपिसंसर्ग	ज्ञानेपि संसर्ग
२६	१६	स्मरामा	स्मरामी
२७	७	दोषेा पहिते	दोषेापहिते
२७	१६	दायमानेषु	दीयमानेषु
२८	६	ख्यात्यन्तरा	ख्यात्यन्तर
२८	८	कथम् ।	कथम्
२८	१२	हितेापि	वहितेापि
२६	२८	संयेागादिदं मात्र	संयेागादिदंमात्र
३०	१५	ज्ञानेात्तरेा	ज्ञानान्तरेा
३१	५	पारेख्य	पारेाख्य
३१	६	कल्पनीयं	कल्पनीयम्
३१	१७	मायास्वाश्रय	माया स्वाश्रय
३१	२८	अनयेा	॥ अनयेा
३२	७	मायायां	मायायाम्
३३	१७	दन्यदाप्रवृत्ति	दन्यदा प्रवृत्ति
३४	१७	परत्रपरा	परत्र परा
३४	२१	परत्रपरा	परत्र परा
३४	२३	चैत्यन्य	चैतन्य
३४	२६	परत्रपरा	परत्र परा
३६	८	विशिषे	विशेषे
४०	४	बाधापेक्षा	बाधापेक्षया
४०	१६	दृष्टुर्दोषः	द्रष्टुर्दोषः
४१	१३	प्रदापादौ	प्रदीपादौ
४१	२४	प्रसिद्ध	प्रसिद्धि
४३	२२	विरोधात्	ऽविरोधात्
४५	६	प्रतिविम्ब *	प्रतिबिम्ब
४६	२६	मीमांसक	मीमांसकं
४८	१६	भासिस्व	भासि स्व
४८	२०	किं	किं–
४८	२१	पि शब्दौ	पिशब्दौ
४८	२४	भास एवावभास एवा	भास एवा
५०	१०	विम्बपुरत्व	बिम्बपुरस्त्व
५१	१८	त्यात्मनात्म	त्यात्मानात्म
५३	१६	तन्त्रता न स्यात्	तन्त्रता स्यात्
५३	२१	चारादित्या	चारादादित्या
५४	६	ष्टापूर्व	ष्टा पूर्व
५५	३	द्रष्ट	द्रष्टृ
५८	२४	मतीतर	मतीततर
५८	२५	त ैव	तत्रैव
५६	६	मयः पिण्ड	मयःपिण्ड
"	"	मुखस्याऽथात्र	मुखस्याप्यात्र
६०	हेडिंग	प्रतिविम्ब	प्रतिबिम्ब
६०	२५	आडेा देाऽना	आडेा देाऽना
६१	१८	ऽनिन्द	ऽनिद
६१	२४	अनिन्द	अनिद
६४	२१	प्रात	प्रति
६५	हेडिंग	प्रतिविम्बत्वा	प्रतिबिम्बत्वो
६५	७	सर्वज्ञाता	सर्वज्ञता
६६	११	निर्विकल्पं	निर्विकल्प
६७	१७	परिहार	परिहारा
७२	६	चैतन्यमपि चैतन्य	चैतन्य
७२	११	परिछिन्ने	परिच्छिन्ने
७२	२२	प्रदीपप्रभा	प्रदीपप्रभ
७४	५	मपहृयत	मपहूयत
७४	१४	आकारमेकं	त्याकारमेकं
७४	२२	न स्यात् ।	न स्यात्
७५	१४	रितिरे	रितरे
७६	३	प्रभावत्तं	प्रभावद्वर्त्त
७६	७	संसारास्था-	संसारावस्था-
७७	१८	त्मश्रय	त्माश्रय
७७	१६	संविदत्तर	संविदन्तर
७८	१३	मित्युनु	मित्यनु
७८	२२	सकृत्कर्त्तुः	सकृत्कर्त्तुः
७८	२३	कतृत्वे	कर्तृत्वे
८०	१७	कारणाचि	कारणानि

* एवमग्रेपि विम्बस्थाने 'बिम्ब' इति बोध्यम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
८०	१७	चिष्पन्न	निष्पन्न
८१	१७	शक्तो	शक्तो
८२	१२	सहकारि सव्य	सहकारिसव्य
८३	१४	नाप	नापि
८३	२३	त्यद्यन्ते ।	त्यद्यन्ते
८३	२६	महदेतात्स	महदेतत्सि
८४	४	गमात्म	गमान्म
८४	१५	तत्वेनेयं	तत्वे नेयं
८६	१०	निरवयस्य	निरवयवस्य
८७	हेडिंग	ज्ञानान	ज्ञानानि
८७	७	क ङ्ख्या	काङ्क्षाया
८७	६	भावात् ।	भावात्
८७	२५	विद्याव	विद्याव
८८	२	संपति	संप्रति
८६	१६	ज्ञणा	ज्ञाणा
६०	१३	ष्विपि	ष्वपि
६०	२०	द्विविवेको	द्विवेको
६१	१६	शरारा	शरीरा
६४	५	नार्थपत्या	नार्थापत्या
६४	११	नैकान्ति	ऽनैकान्ति
६५	२१	कर्त्तुभो	कर्त्तुभो
६५	२६	विविरोधा	विरोधा
६६	२३	पेक्ष इत्याह	पेक्षेत्याह
१०४	१	कारिणा	कारणा
१०४	६	पारोक्ष्य	परोक्ष्य
१०८	१६	विशिष्टानन्व	विशिष्टान्व
११०	१४	कृतः	कृतः ।
११२	२	दान्य	दीन्य
११२	१८	ज्ञानकर्म	ज्ञानकर्म-
११२	२६	गम्यत	गम्यते
"	"	ष्ठयं	ष्ठेयं
११६	२६	तीति कर्त्तव्य	तीतिकर्त्तव्य
११७	६	विधः	विधिः
११७	७	सिद्धान्ता	सिद्धान्तो
११७	२१	देयताविधि	देयता विधि
११८	१२	इति ।	इति
११८	२८	प्रत्यक्षादाना	प्रत्यक्षादीना
"	"	परोक्षा	परोक्ष
११६	१५	विधेः ।	विधेः
११६	२२	कार्यस्य	काय्यस्य
११६	२५	क्रष्ट	क्रष्ट
१२०	१४	कल्पने	कल्पने
१२२	८	साधनत्वात् ।	साधनत्वात्
१२४	४	न कारः	नकारः
१२५	२४	पादय	पादाय
१२७	२३	किंचो	ष्किंचो
१२८	१६	नुपपत्तेः ।	नुपपत्तेः
१२६	८	प्रताय	प्रतीय
१३१	६	विवक्षादर्शिता	विवक्षा दर्शिता
१३२	२५	लाके	लोके
१३३	२	ख्याभयं	ख्योभयं
१३४	२	मन्यममस्य	मन्यतमस्य
१३५	२२	ऽभिधायते	ऽभिधीयते
१३६	२२	विधाय	विधोय
१३६	२३	घातानिष्वि	घातादिष्वि
१३८	१६	श्रयणा	श्रवणा
१४०	१६	पीठे	पीठे
१४१	२०	देत्तदाह	देतदाह
१४१	२३	प्रयोजांयत्	प्रयोजयित्रं
१४२	२५	संस्कार्याच्च	संस्कार्यच्चि
१४४	१	सुपादायते	सुपादीयते
१४४	१०	प्रतिपादिक	प्रतिपादक
१४५	३	ऽधापन	ऽध्यापन
१४५	६	पायत्वपी	पायत्वेपी
१४५	१६	संप्रत्ति	संप्रत्ति
१४६	१	कारणः	कारिणः
१४६	११	दधिकार	दधिकारि
१४६	२०	निवर्त्तयितुं	निर्वर्त्तयितुं
१४६	२६	ध्यापाय	ध्यापयि
१४७	४	सत्युपप	सत्युप
१४७	५	किंतूप-	किंतूपग-
१४७	६	स्यव	स्यैव
१४६	१	वोपनीयो	वोपनयो
१५१	४	फलभाक्तृ	फलभोक्तृ
१५१	२४	समर्थ्या	सामर्थ्या
१५२	१५	नुपपत्त	नुपपत्ते
१५२	१८	ऽप्यस्ती-	ऽप्यभ्यस्ती-
१५२	१६	दर्शनाभ्यच	दर्शनाच्च
१५३	७	भावात् दव-	भावादव-
१५३	८	फलपेक्ष	फलापेक्ष
१५३	१६	विधि	विधि-
१५४	१	न तु	ननु
१५४	२७	कार्याप	कार्योप
१५५	१४	जिज्ञासायोः	जिज्ञासयोः
१५५	२४	ऽन्यार्थात्वेन	ऽन्यार्थत्वेन
१५६	८	पत्तेति	पेक्षेति
"	"	परिशेषपरिशेषात्	परिशेषात्
१५६	१२	नोत्तरेत्तर	नोत्तरोत्तर

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१५६	१४	प्रामाणा	प्रमाणा
१५७	१४	संस्कार	संस्कारा
१५७	१६	चत्वारिश	चत्वारिंश
१५८	१६	मरणता	करणता
"	"	नेति कर्त्त	नेतिकर्त्त
१५८	२३	मात्रत्वा	मात्रत्वा-
१५८	२४	रुद्धेशात्वा	रुद्धेश्यत्वा
१५६	२४	तदुक्तार्थ	तदुक्तार्था
१६०	१७	न्यान्यः	नान्यः
१६१	४	प्रणवता	प्रवणता
१६२	६	न्यसेत्याद	न्यसेत्याद
१६२	१०	विहित्वा	विहितत्वा
१६२	१४	कल्मषस्या	कल्मषस्य
१६४	१०	विधानत्	विधानात्
१६४	१४	नान्यैर्देवै	नान्यैर्देवै
१६४	१७	धर्मै	धर्मैः
१६४	१८	तद्धर्मणां	तद्धर्माणां
१६६	१८	ऽनुरूपि	निरूपि
१६७	११	वृत्तव्यां	वृत्तां
१६८	१६	सस्त्वि	सत्त्वि
१७०	१४	इत्यतः	इति । अतः
१७१	२	च्चातुर्मस्या	च्चातुर्मास्या
"	"	तत्रव	तत्रैव
१७१	१७	तस्य	तस्या
१७३	३	प्रधान्येन	प्राधान्येन
१७५	१६	केनारम्भः । क्रियते	केनारम्भः क्रियते
१७६	७	जिज्ञासा	जिज्ञासा
१७६	६	व्यर्यास्त्विति	व्यमस्त्विति
१७७	२५	वस्तुकर्म	वस्तु कर्म
१७६	३	न्याया विष	न्यायविष
१७६	४	सम्भावाना	सम्भावना
१८१	१०	विरुरोधिषु	विरोधिषु
१८१	१५	प्रयोगान्तरेष्व	प्रयोगान्तरेष्व-
१८२	१७	ममुखेन	नमुखेन
१८४	८	समार्थ्या	सामर्थ्या
१८४	२१	तत्रोपय	तत्रोपप
१८५	१६	ऽनुगम्यते ।	ऽनुगम्यते
१८५	२३	वार्थनु	वार्थानु
१८६	५	निर्णात	निर्णीत
"	"	जिज्ञास्य	जिज्ञास्य-
"	२२	रूपानर्ण	रूपनिर्ण
"	२५	प्राणि	प्रामाणि
"	२६	जिज्ञासा	जिज्ञासा
१८७	४	समाधत्त	समाधत्ते

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१८७	१८	वैंदकैः	वैदिकैः
१८६	२४	कल्पकं	ल्पकं
१६१	१	साद	सादि
१६३	१५	चैतेन्य	चैतन्य
१६४	२२	क्रमकरि	क्रमकारि
१६५	२२	प्रदापा	प्रदीपा
१६६	२७	अपक्षन्त	अपेक्षन्त
२००	७	गात् मान	गात्मान
२००	२५	घटाकाशमिति	घटाकाशमिति ।
२०२	६	नैवताव	नैताव
२०२	२८	यते	र्यते
२०३	२४	कर्तृत्वभावे	कर्तृत्वाभावे
२०४	१७	प्राक्तनः	प्राक्तनः
२०५	४	धिकारण	धिकरण
२०७	८	व्याघ्रो	व्याघ्रोऽ
२०८	१४	प्रशान्त	प्रक्रान्त
२०६	२३	सर्वज्ञाता	सर्वज्ञात
२१०	६	ऽपरिभाव	परिभाव
२१२	२०	आहोस्वि	आहोस्वि
२१४	७	वाना मपि	वानामपि
२१५	१०	कार्यत्वात्सि	कार्यत्वासि
२१५	१६	एवाह्या	एव ह्या
२१६	२६	द्धस्वत्वं	दधस्वत्वं
२१७	१३	द्वि शिष्ट	द्विशिष्ट
२१६	७	दात्र ऽद्वि	दात्रऽद्वि
२१६	२४	रित्यतर्थ	रित्यर्थ
२२०	२३	प्रति	प्रति-
२२०	२८	मुद्रयो परि	मुद्रयोपरि
२२०	२६	मुद्रयो परि	मुद्रयोपरि
२२१	८	स्फटिक	स्फटिक
२२१	१४	सामार्थ्या	सामर्थ्या
२२१	२३	कर्त्तव्यता ब्रह्मा	कर्त्तव्यताब्रह्मा
२२२	२२	तथा-	तथा
२२२	२६	नेका-	नेक-
२२३	२६	सहिष्णु धर्म	सहिष्णुधर्म
२२४	१६	तार्ह	तर्हि
"	"	पैरुषे	पौरुषे
२२६	१६	किमिति त	किमिति त-
२२७	३	लभ्योप	लभ्योप-
२२८	११	सर्व	सर्व-
२२६	३	दस्य	वेदस्य
२३१	३१	कत्वानिश्च	कत्वनिश्च
२३४	५	ग्रामाणा	प्रमाणा
२३४	१७	कशीति	कशीति इति

शुद्धिपत्रम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२३४	२८	तत्र	तत्र
२३४	२६	किंचित्कल्प	किंचित्कल्प
२३५	२४	पक्रम	पक्रम
२३६	१९	विषविषय	विषय
२४०	४	नावहति	नावहन्ति
२४०	५	सर्वप्रामा	सर्वप्रमा
२४०	१६	प्रामाणा	प्रमाणा
२४०	२१	च्चैत्यन्य	च्चैतन्य
२४१	६	व्युत्पित्तुः	व्युत्पत्तुः
२४२	१६	नन्वेवमपि ।	नन्वेवमपि
२४२	२२	व्यावृ	व्यावृत्तं
२४३	१०	अपिचा	अपिच
२४३	२४	नवत	नवगत
२४४	२६	श्चेतरा	श्चेतरेतरा
२४५	३०	अयम	अष्टम
२४६	२०	मानेष्ठ	मानेष्ट
२४६	२५	विलायां	वेलायां
२४७	८	त्वादर्थं	त्वादर्थं-
२४७	२६	नैयैागिक	नैयोगिक
२४६	१९	त्सजीती	त्सजाती
२४६	१६ ।	तदपि	तदपि
२५०	६	प्रति पाद	प्रतिपाद
२५१	२६	श्लेाकि	श्लोकि
२५३	१४	गतम्विमु	गतम् विमु
२५३	१६	तम	रीतम
२५४	६	नुन	ननु
२५४	१०	त्युपसना	त्युपासना
२५४	१२	परिणाम	परिमाण
२५५	१४	पुन रा	पुनरा
२५५	२३	मुक्त्युपायेग	मुक्त्युपयोग
२५६	१६	मुच्यते ।	मुच्यते
२५६	१६	श्यनृषि	श्यवृषि
२५७	२१	प्रहा	प्रहो
२५८	११	इति ।	इति

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२५८	२२	मित्यत	मित्यतः
२५६	१३	तत्रावस्था	तत्रावस्था
२५६	१८	स्यान्यत्म	स्यान्यात्म
२५६	२५	श्शाशि	श्शांशि
२६०	५	पृथत्क्रि-	पृथक्क्रि-
२६०	२२	श्चेतित्यु	श्चेत्यु
२६०	२४	प्रतियाद	प्रतिपाद
२६०	२५	वस्तु प्रति	वस्तुप्रति
२६२	२३	न च स	न च सा
२६२	२७	नुपायि	नुयायि
२६२	३०	श्वच्छिच	श्वच्छिच
२६३	२९	नन्तरभू	नन्तरभू
२६४	२	प्राकाशो	प्रकाशो
२६४	३०	भत्राभित्रे	भित्राभित्रे
२६६	२४	ब्रह्मणो	ब्रह्मणो
२६६	२६	स्ताद्भाव	स्तद्भाव
२६७	२७	रेवत्यै	रेवेत्यै
२६८	२०	र्द्धमाऽऽमा	र्द्धऽऽमा
,,	,,	प्रतीकालम्ब.	प्रतीकालम्ब-
२६६	६	श्रस्य श्रयस्य	श्रयस्य
२६६	१६	गायत्री शा	गायत्रीशा
२६६	२५	फल प्राप्तिः	फलप्राप्तिः
२७०	१	संकल्पै	संकल्पै-
२७०	१०	चेदुत् क्रा	चेदुत्क्रा
२७१	५	इत्यादि प	इत्यादिप
२७६	२४	दर्शेतिति	दर्शेति
२७७	३	सार्थ्य	सामर्थ्य
२७७	१८	तस्माद्-	तस्माद
२७७	२२	द्वितीयेा	द्वितीया
२७८	२१	सामञ्जस	समञ्जस
२७८	२८	शेाधतं	शेाधितं
२८०	३	सम्बध	सम्बन्ध
२८३	३	सम्ब	सम्ब-

वर्णक्रमानुसारिसूचीपत्रम् ।

	पृष्ठे पङ्क्तौ
अज्ञानं चित्स्वरूपमात्रसम्बन्धि तत्र जीवब्रह्मव्यवहारभेदं प्रवर्त्तयति	४५ । १
अज्ञानपदार्थविषये भेदाभेदवादिमतखण्डनम्	१६ । २१
अज्ञानपदार्थस्य ज्ञानाभावमिथ्याज्ञानवासनानात्मकत्वोक्तिः ...	१६ । ३
अज्ञानपदार्थस्य भावभूतत्वे प्रत्यक्षमनुमानमर्थापत्तिश्च प्रमाणम् ...	१२ । १३
अज्ञानपदार्थस्य भावभूतत्वे युक्तिः	११ । १६
अज्ञानस्य ज्ञानाश्रयत्वोपपादनम्	४३ । ३
अज्ञाने प्रमाणदानम्	४२ । ८
अध्यस्तरजतज्ञानस्यापरोक्षत्वोपपत्तिः	२१ । १०
अध्यस्तरजतमुत्तरज्ञानबाध्यम्	२१ । १८
अध्यस्तरजतस्य स्वयंभासदृशत्वम्	२१ । ३
अध्यासभाष्यजिज्ञासासूत्रप्रसङ्गनिरूपणम्	३ । १८
अध्यासभाष्यावान्तरार्थविभागः	२ । १८
अध्यासलक्षणवाक्यशेषपूरणादि	२० । २१
अध्यासलक्षणवाक्यस्थपदकृत्यप्रदर्शनम्	१० । २६
अध्यासलक्षणवाक्यस्थपदकृत्यविवरणम्	४० । ३
अध्यासलक्षणवाक्यस्यार्थान्तरप्रदर्शनम्	२२ । ३
अध्यासलक्षणसंभावनापरभाष्याक्षेपः	१८ । २१
अध्यासलक्षणातिरेकेणाध्यासंभावनादर्शनौचित्यम् ...	१६ । ५
अध्यासलक्षणे अतिव्याप्तिशङ्का	३५ । २४
अध्यासलक्षणे अतिव्याप्तिशङ्कापरिहारः	३६ । २
अध्यासलक्षणे अव्याप्तिशङ्कानिरासो	३४ । ४
अध्यासवादे शून्यतावादाद्विशेषप्रदर्शनम्	३८ । ६
अध्यासविषयकविविधाक्षेपः	६ । १०
अध्यासविषये अख्यातिवादखण्डनम्	२३ । ८, २६ । ५
अध्यासविषये अख्यातिवादोपन्यासः	२२ । १९
अध्यासविषये नानोदाहरणदानतात्पर्यम्	४० । १४
अध्याससम्बन्धिविशेषविषयविचारः	६४ । २२
अध्यासादिक्रमनियमविवक्षोक्तिः	५ । ६
अध्यासो धर्माणामिव धर्मिणामपि	६३ । ६
अनात्मवस्तुष्वज्ञानकृतावरणाभावोक्तिः	१३ । १६
अनुभवः प्रमाणफलं न तु हानादि	५१ । १२
अन्तःकरणविषयकविचारः	५८ । १७, ६४ । २
अभिव्यक्त्यादिविचारः	७१ । १०


	पृष्ठे	पङ्क्तौ
अर्थक्रियाकारित्वं वस्तूनां न सत्त्वं किन्तु स्वाभाविकम् ...	८० ।	१६
अविद्यानिमित्तक एव भेदाध्यासः	४४ ।	४
अविद्याश्रयविचारः	४५ ।	७
अविद्याश्रयोऽन्तःकरणमितिमतखण्डनम्	४५ ।	२०
अहङ्कारकार्यस्वरूपविचारः	६१ ।	६
अहङ्कारतदुपादाननिमित्तस्वरूपप्रमाणकार्यसुषुप्त्यनवभासप्रदर्शनम् ...	५८ ।	३
अहङ्कारस्य व्यतिरिक्तात्मविषयकत्वविचारः	४७ ।	१०
अहङ्काराध्यासो निरुपाधिकः	६७ ।	२२
अहङ्कारानुभवतत्स्मृत्युपपादनम्	५५ ।	१०
अहङ्कारो नेदमंशः	५२ ।	१
अहंमितिप्रत्ययोऽध्यासः	१८ ।	१
आकाशस्य प्रत्यक्षत्वाप्रत्यक्षत्वमतानि	८६ ।	१७
आत्मन एव स्वयंप्रकाशत्वं न सुखादेः	६६ ।	१
आत्मनः स्थायित्वस्थापनम्	५४ ।	३
आत्मनः स्वयंज्योतिष्त्वप्रतिष्ठापनम्	४१ । १ ,	५३ । ६
आत्मनः स्वयंप्रकाशतया ऽपरोक्षत्वम्	८५ ।	२१
आत्मनि प्रत्यभिज्ञोपपादनम्	७६ ।	६
आत्मनि मीमांसकाभ्यनुज्ञोपदर्शनम्	६१ ।	१८
आत्मनि शरीरादेः सादृश्याभावे ऽपि यथा ऽध्यासस्तथा कल्पनीयम् ...	१० ।	१२
आत्मनि स्वयंप्रकाशे ऽपि मननादिसहकारेणैव महावाक्यस्याऽपरोक्ष्यप्रयोजकत्वम्	१०३ ।	७
आत्मनो ज्ञानविषयत्वोपपादनम्	७६ ।	१५
आत्मन्यऽज्ञानकृतमावरणम्	१५ ।	७
आत्मन्यऽध्यासस्य नैसर्गिकत्वोक्तियुक्तिः	१० ।	१७
आत्मन्यऽध्यासासंभवशङ्कासमाधयः	४० ।	१५
आत्मन्यऽनात्माध्यासस्य कारणजन्यत्वेनाध्यासत्वोपदर्शनम् ...	४८ ।	१४
आत्माध्यासविषयकदृष्टान्तकृत्योपपादनम्	६८ ।	३
आत्मा प्रत्यक्षप्रतीतिसिद्धः	४६ ।	१
आत्मा स्वरूपसिद्धप्रत्यक्षावभासः	५० ।	५
आत्माऽहङ्कारयोर्व्यतिरिक्तत्वसाधनम्	५२ ।	१०
आहेतिपरोक्तिवचनप्रयोजनम्	२० ।	१३
इदं रजतमितिज्ञानस्यात्मख्यातित्वनिराकरणम्	२८ ।	६
इदं रजतमितिज्ञानस्यान्यथाख्यातित्वनिराकरणम्	२७ ।	५
इदं रजतमितिज्ञाने ऽनिर्वचनीयख्यातेरेव निर्दुष्टत्वम् ...	३० ।	४
इदं रजतमितिज्ञाने द्व्यात्मकत्वनिराकरणम्	३१ ।	४
उपासनविधिशेषतया न ब्रह्मणि वेदान्तसमन्वयः किन्तु स्वतः ...	२४५ ।	२०
एकदेश्युक्तशास्त्रारम्भप्रकारं पूर्वपक्षी निराकरोति	५५३ ।	१
कर्तृकरणसंबन्धशोधनम्	८८ ।	१२
कामादयोऽन्तःकरणस्य धर्मा नात्मनः	६३ ।	१३

	पृष्ठे पङ्क्तौ
क्षणिकत्वानुमानप्रत्यनुमानम्	७८ । ५
क्षणिकनित्ययोः सहकारिसंनिधानक्रमस्याऽविशेषादविशिष्टं कारणत्वम्	८३ । १४
क्षणिकवस्तुकारणतावादिमते ऽन्वयव्यतिरेकग्रहासंभवप्रदर्शनम् ...	८२ । १५
चैतन्यस्य कर्तृत्वाद्यऽहङ्कारोपाधिकम्	७० । ६
चैतन्यस्य प्रमातृत्वकर्तृत्वादिविचारः	६६ । १
चैतन्यस्य विषयप्रकाशकत्वविचारः	७१ । २०
जगज्जन्मादिहेतुत्वेन प्राप्तस्य ब्रह्मणि सप्रपञ्चत्वस्य निषेधवाक्यैर्बाधः	६७ । १०
जिज्ञासासूत्रवाक्यार्थकथनम्	१७५ । १८
जिज्ञासासूत्रे अतःशब्दार्थविचारः	१७० । १०
जिज्ञासासूत्रे अथशब्दार्थविचारः	१३२ । १
जिज्ञासासूत्रे जिज्ञासाशब्दार्थविचारः	१३२ । ५
जीवतत्त्वनिरूपणम्	२६४ । ६
जीवन्मुक्तिविषयकविचारः १०५ । १०,	२८३ । २३
जीवब्रह्मविभागोऽविद्यातन्त्रः	६६ । १७
जीवब्रह्मविभागोपपादनम्	६७ । ५
जीवस्य ब्रह्मप्रतिबिम्बत्वोपपादनम्	६५ । ६
जीवस्य सप्रपञ्चत्वाभासे ऽपि निष्प्रपञ्चत्वम्	६८ । १८
जीवस्यावच्छेदवादे दोषोपदर्शनम्	६५ । २३
ज्ञानपदार्थविचारः	१७४ । १४
ज्ञानेच्छोपपत्तिः	१७४ । ७
टीकारम्भावतारणम्	१ । २०
तमसो भावत्वसाधनमभावत्वनिरसनञ्च	८ । १६
तर्कतोऽपि तत्त्वज्ञानादेव मोक्षः	२५७ । ८
दर्पणमुखप्रतिबिम्बादिदृष्टान्तविचारः	६२ । ५
दोषविवेकः	८६ । २५
द्रष्टरि दृश्यावभासस्याविद्याध्यासत्वे शास्त्रीयविषयप्रयोजनसिद्धिः ...	१८ । १४
नञर्थविचारः	२८० । २३
निरधिष्ठानाध्यासयुक्तिनिरासः	३७ । १
निर्विशेषवस्तुज्ञानस्य कर्मविधिष्वनावश्यकत्वम्	६१ । १
पदार्थानां फलानुपधानकाले ऽपि सत्त्वम्	७८ । २४
पूर्वमीमांसाशास्त्रनिरूपणीयार्थसङ्ग्रहः (प्रसङ्गतः)	१९० । १०
प्रकाश्यमानस्यापि चैतन्यस्याविद्याविषयत्वविचारः	४६ । १४
प्रत्यक्षपरोक्षव्यवस्था	८४ । २१
प्रत्यभिज्ञयाऽऽत्मा विषयतया सिध्यति न त्वाश्रयतया ...	७३ । १७
प्रत्यभिज्ञया चैतन्यैक्योपदर्शनम्	७७ । ८
प्रत्यभिज्ञालक्षणम्	७५ । २२
प्रपञ्चबाधो रजतादिबाधविलक्षणः	६६ । १४
प्रमाणानामविद्यावद्विषयत्वम्	८८ । १

	पृष्ठे	पङ्क्तौ
प्रमातृत्वादिव्यवस्था	७३ ।	१
प्रामाण्याऽप्रामाण्ययोस्स्वतस्त्वपरतस्त्वविषयकविचारः ...	१०१ ।	२४
बन्धस्याऽविद्यात्मकत्वादध्यासः सूत्रव्याख्यानतः प्राङ् निरूपणीय एव ...	६ ।	२
बाधलक्षणम्	३४ ।	१
बाधस्य सावधिकत्वसाधनम्	३७ ।	२२
बाधस्याऽप्रसिद्धिशङ्का	३३ ।	१४
बाध्यमानस्य रजतस्य कालान्तरगतत्वनिरासः	३८ ।	१८
बाध्यमानस्य रजतस्य देशान्तरगतत्वनिरासः	३६ ।	१४
बाह्यानेकोपाधिनिमित्तश्चैतन्ये शारीरत्वक्षेत्रज्ञत्वादिव्यपदेशः ...	८५ ।	१५
बौद्धस्वमतसंकरपरिहारः ७३ ।	१२, । ८४ ।	११
ब्रह्मजिज्ञासापदे समासविचारः	१७३ ।	६
ब्रह्मजिज्ञासायां विषयप्रयोजनसंबन्धाक्षेपः	१७७ ।	१
ब्रह्मजिज्ञासायां विषयप्रयोजनसंबन्धाक्षेपपरिहारः	१८१ ।	१
ब्रह्मज्ञानस्य बाध्यत्वाबाध्यत्वविषयकविवेकः	८६ ।	७६
ब्रह्मज्ञानात्सविलासानाद्याज्ञाननिवृत्तिर्ब्रह्मानन्दावाप्तिश्च ...	६५ ।	२४
ब्रह्मज्ञाने विधिविषयतानिराकरणम्	२७३ ।	१
ब्रह्मणो लक्षणोपलक्षणे	२०४ ।	१
ब्रह्मणि वेदान्ताः पर्यवसायिनो न त्वभिधायिनः	२६२ ।	१३
ब्रह्मणि वेदान्तानां समन्वयप्रतिपादनम्	२३३ ।	११
ब्रह्मणो वेदोपादानतया सर्वज्ञत्वम् २२४ ।	१, २३१ ।	१
ब्रह्मतो जीवस्य भेदाभेदनिराकरणम्	२५६ ।	२१
ब्रह्मात्मताज्ञानस्य कर्तृत्वादिनिषेधत्वमर्थसिद्धम्	६६ ।	१७
ब्रह्ममीमांसाशास्त्रस्य पूर्वमीमांसातो विशेषकर्त्तव्यता	६२ ।	१
ब्रह्मविचारस्य मोक्षोपयिकत्वान्मुमुक्षोस्तत्र प्रवृत्तिः	१०७ ।	१
ब्रह्मविचारे किमानन्तर्यमथशब्दावगम्यम्	१३४ ।	५
ब्रह्मविचारे साधनचतुष्टयानन्तर्यमथशब्दावगम्यम्	१६७ ।	१५
ब्रह्म वेदैकसमधिगम्यम्	२३१ ।	१६
मङ्गलाचरणम्	१ ।	२
मङ्गलाचरणविषयविचारः	७ ।	१४
मनननिदिध्यासनयोः श्रवणाङ्गतोपपादनम्	१०४ ।	६
मायाऽविद्ययोरेकत्वप्रतिपादनम्	३१ ।	१५
मायाविद्ययोरेकत्वे ग्रन्थान्तरसंवाददानम्	३२ ।	१०
मुक्तिविषयकभेदाभेदवादापवादः	२८५ ।	१२
लोकव्यवहारस्याविचारपूर्वकत्वम्	६० ।	१०
वर्णकम् –१	१०६	
वर्णकम् –२	१३१	
वर्णकम् –३	१७६	
वर्णकम् –४	२०३	

	पृष्ठे	पङ्क्तौ
वर्णकम् –५	२२३	
वर्णकम् –६	२३१	
वर्णकम् –७	२३२	
वर्णकम् –८	३४५	
वर्णकम् –९	२८७	
विधिविषयकविचारः	१०७	६
विरोधपदार्थनिरूपणम्	८	१०
वेदानां पौरुषेयत्वापौरुषेयत्वविचारः	२२४	१४
वेदानां प्रामाण्याप्रामाण्यविचारः	२२६	६
वेदानामर्थबोधकत्वोपपादनम्	२३०	७
वेदान्तानां निर्विशेषवस्तुपर्यवसायित्वम्	२८०	६
शरीरादयोऽध्यस्ताः पदार्थाः	१८	६
शरीरादेरहंप्रत्ययवत्त्वेऽपि युष्मदर्थत्वयुक्तिः	१०	६
शब्दबोधोपयोगिशब्दार्थसम्बन्धनिरूपणम्	२५	६
शास्त्रतात्पर्यार्थोपसंहारः	२८६	२२
शास्त्रारम्भविषयकः पूर्वपक्षः	११९	८
शास्त्रारम्भविषयकः सिद्धान्तनयः	१२१	२१
शुद्धचितोऽधिष्ठानत्वोपपादनम्	६८	१२
शुक्तिरजतस्य मिथ्यात्वं बाधसिद्धम्	३३	३
श्रवणमननादिविधिविचारः	४	५
श्रुतार्थे मननादेरसंभावनाविपरीतभावनानिवृत्तये उपयोगः ...	१०९	१
सगुणब्रह्मोपासनानामुपासनान्तराणाञ्च चित्तशुद्ध्यर्थत्वम् ...	१०६	६
सप्रपञ्चश्रुतिनिषेधश्रुत्योर्मध्ये निषेधश्रुतेः प्राबल्यम्	६८	१
संवेदनादेः प्रमाणत्वं न स्वाभिमतम्	५९	१५
सहकारिविशेषसन्निधानसापेक्षकारणात्कार्यविशेषजन्म ...	८९	१
सांसारिकसर्ववस्तुनोऽविद्यात्मकत्वम्, तस्याश्च ज्ञाननिवर्त्यत्वम् ...	८७	४
सिद्धान्त्येकदेशिमतदूषणाय शास्त्रारम्भविषये पूर्वपक्षः ...	११९	८
सौषुप्तसुखपरामर्शविषयविवेचनम्	५६	२
सौषुप्ताज्ञानसुखानुभवोपपादनम्	५७	८
स्थायिनोऽर्थक्रियाकारिताविचारः	७८	१२
स्फटिकजवाकुसुमप्रतिबिम्बविचारः	६०	६
स्मरणाभिमानखण्डनम्	२४	१९
स्वाप्नार्थान्तर्भानशङ्कासमाधी	३५	२
स्वोक्ताध्यासलक्षणे संवादिवाक्यान्तरमतप्रदर्शनम्	३६	६

पञ्चपादिकाविवरणम् ।



पालने विमलसत्त्ववृत्तये जन्मकर्म्मणि रजोजुषे लये ।
तामसाय जगतः पराकृतद्वैतजालवपुषे नमः सते ॥ १ ॥

यस्याः प्रसादमवलम्ब्य जगद्गुरूणामप्यस्खलद्बुहुगुणाः प्रसरन्ति वाचः ।
सा वेदशास्त्रपरिनिर्मितवन्द्यदेहा भूयात्समग्यवरदैव सरस्वती नः ॥ २ ॥

विघ्नाभितापमभिहत्य मदीयकृत्यबीजं प्रवृद्धमदनुग्रहवर्षपातैः ।
सम्प्रार्थितः सिततरोपि गणेशमेघः सिञ्चन्नऽभीष्टफलमङ्कुरयत्वऽमोघम् ॥ ३ ॥

श्यामोऽपि श्रुतिकमलावबोधरागः शान्तः सन्नयति तमो विनाशमन्तः ।
नीरूपं प्रथयति योपि गोसहस्रैस्तं व्यासं नमत जगत्य ऽपूर्वभानुम् ॥ ४ ॥

उद्धृत्य वेदपयसः कमलामिवाब्धेरालिङ्गितांखिलजगत्प्रभवैकमूर्त्तिम् ।
विद्यामशेषजगतां सुखदाम ऽदाद्यस्तं शङ्करं विमलभाष्यकृतं नमामि ॥ ५ ॥

वन्दे तमात्मसम्बद्धस्फुरद्ब्रह्मावबोधतः ।
अर्थतोपि न नाम्नैव यो ऽनन्यानुभवो गुरुः ॥ ६ ॥

प्रकाशात्मा यतिः सम्यक् प्राग्विद्याशुश्रुत्सया ।
यथाश्रुतं यथाशक्ति व्याख्यास्ये पञ्चपादिकाम् ॥ ७ ॥

विदितसकलवेदैर्न्न प्रशंसन्ति लोके
ग्रथितमपि महद्भिः किं पुनर्मादृशेन ।
इति विफलसमे ऽस्मिन् वाग्व्यये ऽहं प्रवृत्तः
स्वमतिविमलतायै क्षन्तुमर्हन्ति सन्तः ॥ ८ ॥

प्रारिप्सितग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय चाभिलषितदेवतापूजानमस्कारः कर्त्तव्यः शास्त्रार्थश्च तत्त्वम्पदार्थविवेकोपायलभ्यः प्रत्यग्ब्रह्मणोरेकत्वलक्षणः सङ्क्षेपतो दर्शनीयः कृत्स्नस्य भाष्यस्य तच्च तात्पर्य्यकथनायेति तदुभयं श्रुत्यर्थाभ्यां सङ्क्षेपतो दर्शयति अनाद्यानन्दकूटस्थ * ज्ञानानन्तसदात्मने । अभूतद्वैतजालाय साक्षिणे ब्रह्मणे १

* ज्ञानानन्देति ३ पु० ।

नम इति । कृत्स्नस्य भाष्यस्य ब्रह्मात्मैकत्वे तात्पर्य्यमत्र दर्शितमुत्तरत्र विभज्यतात्पर्य्यदर्शनात् । अत्र देवतागुरु * विषया पूजानमस्काराद्युपबृंहिता † भक्तिर्वक्तुरुक्तप्रयोजनसम्पादिन्यपि श्रोतृणामपि विद्याङ्गभावं प्रतिपद्यत इति वाङ्मनःकायप्रणिधानैर्गुरूनभिपूजयति नमः श्रुतिशिरःपद्मषण्डमार्त्तण्डमूर्त्तय इत्यादिभिस्त्रिभिः श्लोकैः । यत्कार्यमुद्दिश्य मङ्गलाचरणं सम्पादितं तन्निर्दिशति पदादिवृन्तभारेणेति । ननु नेदं भाष्यं व्याख्यानपदवीमुपारोढुमर्हति भाष्यलक्षणाभावात् । सूचार्थो वर्ण्यते यत्र वाक्यैः ‡ सूत्रानुकारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरिति हि भाष्यलक्षणं वदन्ति । तत्राथातो ब्रह्मजिज्ञासेतिसूत्रे अनुवादपरिहाराय शास्त्रे पुरुषप्रवृत्तिसिद्धये च कर्त्तव्येतिपदमध्याहर्त्तव्यम् । तत्र जिज्ञासापदेनान्त § र्नीतं विचारमुपलक्ष्यानुष्ठानयोग्यतया साधनचतुष्टयसम्पन्नस्य ब्रह्मज्ञानाय विचारः कर्त्तव्य इति सूत्रवाक्यस्य श्रौतो ऽर्थः सम्पद्यते । अर्थादधिकारिविशेषणमोक्षसाधनं ब्रह्मज्ञानमिति सिध्यति । सन्निधानाच्च वेदान्तवाक्यविचार इति श्रुत्यर्थाभ्यां साधनचतुष्टयसम्पन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्त्तव्य इति सूत्रवाक्यस्य तात्पर्य्येण प्रतिपादोऽर्थो ऽवगतः । तत्रेदं भाष्यं न सूत्रार्थैकलामपि प्रतिपादयत्यतो न व्याख्यानार्हमित्येतं शङ्कितं दोषं परिहरन् भाष्यखण्डस्य सूत्रेणार्थादुपात्तविषयप्रयोजनप्रतिपादने तात्पर्य्यं दर्शयति युष्मदस्मत्प्रत्ययगोचरयोरित्याद्यहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार इत्यन्तं भाष्यमस्यानर्थहेतोः प्रहाणायाऽऽत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इत्यनेन भाष्येण पर्यवस्यच्छास्त्रस्य विषयः प्रयोजनं चार्थात् प्रथमसूत्रेण सूचिते इति प्रतिपादयतीति । तत्र नैसर्गिकोयं लोकव्यवहार इत्यन्तं भाष्यमिति ग्रन्थः शास्त्रविषयं प्रयोजनं च प्रतिपादयतीत्युत्तरेण सम्बध्यते । ननु कथं भाष्यद्वयमेव विषयप्रयोजने प्रतिपादयति । शास्त्रारम्भनिमित्तविषयप्रयोजनसिद्धिहेतोरध्यासस्योपस्थापकत्वादिति ब्रूमः । हेतुवचनं हि प्रतिज्ञातार्थमेव साधयति । तथाहि । एतच्छास्त्रमारभ-

* विषयपूजेति ३ पु· । † उपबृंहिता नाम वर्द्धिता परिपूर्णा संयुक्तेति यावत् ।

‡ सूत्रानुसारिभिरिति क्वचित् पाठः ।

§ अन्तर्नीतमिति पु· त्रये ऽप्यस्ति, तथापि अन्तर्णीतेति तु न्याय्यं स्यात् ।

णीयं सम्भावितविषयप्रयोजनत्वात्कृष्यादारम्भवत् । शास्त्रं च सम्भावित-विषयप्रयोजनम् अविद्यात्मकबन्धप्रत्यनीकत्वात् जाग्द्बोधवदिति । तदेवं * शास्त्रस्यारम्भनिमित्तविषयप्रयोजनवत्त्वप्रत्यनीकस्य बन्धस्याविद्यात्मकत्वं निर्द्दिशद्भाष्यद्वयं विषयप्रयोजने प्रतिपादयतीति । ननु बन्धस्याविद्यात्म-कत्वलक्षणो हेतुरसिद्धः कथमसिद्धमसिद्धेन साध्यत इत्यत आह । सर्वे वेदान्ता आरभ्यन्त इत्यनेन भाष्येण पर्यवस्यदिति विषयादिसिद्धिहेतोर-ध्यासस्य सिद्धिहेतुभूतानि लक्षणसम्भावनासद्भावप्रमाणानि प्रतिपादयता भाष्येण सह लक्षणादिभिः स्वार्थमध्यासं साधयित्वा विषयप्रयोजने साध-यतीत्यर्थः । अत एव व्यवधानाव्यवधानाभ्यां विषयादेः साधकत्वादेत-
× दन्तमनेन पर्यवस्यदिति भाष्यस्य विभागेनोपादनं कृतम् । ननु तर्हि सर्व- ×
लोकप्रत्यक्ष इत्यनेन पर्यवस्यदिति वक्तव्यम् । सत्यम् । अस्यानर्थहेतोरिति भाष्यस्य विषयप्रयोजनयोर्वेदान्तवाक्यसम्बन्धकथनद्वारेण विचारशास्त्रसम्ब-न्धप्रतिपादनपरत्वात् । विचारशास्त्रीयविषयप्रयोजनसाधने सव्यवधानत्व-साम्येन पूर्वभाष्येण सहोपादानं कृतम् । नन्वेवमप्यसूत्रसम्बन्धिनी विषय-प्रयोजने किमिति † प्रतिपाद्येते इत्यत आह विषयः प्रयोजनं चार्थात्प्रथ-सूत्रेण सूचिते इतीति । इतिशब्दो हेतौ यस्मात्प्रथमसूत्रेणार्थात्सूचिते तस्मा-त्प्रतिपादयतीति ॥

[कः पुनरस्य सूत्रस्य प्रसङ्ग ‡ इति । उच्यते । नित्येनैवाध्ययन-विधिना ऽधीतस्वाध्यायो वेदान्तवाक्येष्वापातदर्शनेनेदमवगच्छति । आत्म-नस्तु कामाय सर्वं प्रियमित्युपक्रमात्सर्वतोविरक्तस्यात्मप्रेष्ठेरात्मनि विज्ञाते सर्वमिदं विज्ञातमेतावदरे खल्वमृतत्वमित्युपसंहारादमृतत्वसाधनमात्म-दर्शनं द्रष्टव्य इत्यनूद्य तादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नामाऽङ्गि विधीयत इति । स च तच्च कियद्विशेषणपर्यन्तो ऽधिकारी किम्प्रमाणकश्च को वा ऽसौ वेदान्तवाक्यविचारो ऽन्यतः प्राप्तो ऽप्राप्तो वा कथं चात्मज्ञानं मोक्षसाधनं किम्प्रमाणकं च तत्किं वा तदात्म-तत्त्वं किम्प्रमाणकं चेति जिज्ञासते । तं च जिज्ञासुं पुरुषार्थकाममुपलभ-

* शास्त्रारम्भेति २ पु० । † प्रतिपद्येते–इति १,२ पु० । ‡ इतिशब्दो नास्ति ३ पु० ।

मानो भगवान् बादरायणः साधनचतुष्टयसम्पन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारं विदधतो विधेरपेक्षिताधिकारिविषयफलानुबन्धचयमागमिकमपि न्यायेन निर्णेतुं सूचयामासा ऽथातो ब्रह्मजिज्ञासेति । *श्रुतिसूचयोरैकरूप्यावगमात् । मननिदिध्यासनयोश्च श्रवणाङ्गत्वमुत्तरत्र वक्ष्यामः । ननु श्रोतव्य इति विधिर्मोक्षसाधनब्रह्मात्मज्ञानाय वेदान्तवाक्यविचारं साधनचतुष्टयसम्पन्नस्य विधातुं न शक्नोति श्रवणादीनां विषयावगमं प्रत्यन्वयव्यतिरेकसिद्धसाधनत्वात् । न चावघातादिवदुभयार्थता सम्भवति । दृष्टादृष्टप्रकारद्वयसाध्यापूर्ववदिहादृष्टसाध्यस्याभावादात्मावगमस्य दृष्टोपायमात्रसाध्यत्वादिति । नैतत्सारम् । आत्मत†त्त्वापरोक्ष्यस्य सर्वादृष्टसाध्यत्वस्य ‡ वक्ष्यमाणत्वादवघातादिव §दुभयार्थतया विधानोपपत्तेः । ननु विधिपरत्वे वेदान्तानां तन्निष्ठतया ब्रह्मस्वरूपस्यासिद्धादिदोषप्रसङ्गान्नास्ति श्रवणादिविधानमिति भाष्यकारैरेव दर्शितम् । सत्यम् । ज्ञानविधिस्तच्च निराकृतो न श्रवणादिविधिस्तचोक्तदोषप्रसङ्गाभावात् । कथम् । दर्शनविधाने हि ब्रह्म ‖कर्मतया गुणभूतं प्रसज्यते । ब्रह्मदर्शनमुद्दिश्य विचारविधाने तु स्वप्रधानफलभूतदर्शनविशेषणतया ब्रह्मापि स्वप्रधानं भवति नतु गुणभूतमिति वेदान्तैर्ब्रह्मणि स्वप्रधाने प्रतिपाद्यमाने तद्दर्शनाय श्रवणादिविधानं ¶नैव विरुध्यते । नन्वेवमप्युपक्रमोपसंहाराभ्यामेकस्मिन्नात्मप्रतिपादनपरे वाक्ये कथमवान्तरवाक्यैः श्रवणादिविधानं कल्प्यत **इति । अवान्तरवाक्यभेदेन विविदिषन्तीति यज्ञादीनां ज्ञानसंयोगविधानवदुपरि हि देवेभ्य इत्युपरिधारणविधानवन्मलवद्वाससो व्रतकलापविधानवच्चेति ब्रूमः । अथवा । तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्येत्यादिवाक्यं श्रवणादिविधायकमस्तु तस्य तत्परत्वात् । सूचकारेण च वक्ष्यमाणत्वात् । सर्वथा तावन्मननिदिध्यास-

* मुमुक्षोर्ब्रह्मज्ञानाय विचारकर्त्तव्यताप्रतिपादकत्वेन तयोस्तुल्यत्वादिति भावः ।-भावप्रकाशिका । † तत्त्वापरोक्षस्येति २ पु· । ‡ सर्वापेक्षा च तद्दर्शनादिति सूत्रे ।

§ न च नियमापूर्वस्योपयोगाभावः कल्मषनिवृत्तेस्तत्साध्यत्वात् । न च यज्ञादिनैव सा सिद्धेति वाच्यम्, जिज्ञासाप्रतिबन्धककल्मषनिवृत्तेस्तत्साध्यत्वे ऽपि ब्रह्मनिर्णयप्रतिबन्धकनिवृत्तेरेतत्साध्यत्वादिति संन्यासापूर्ववत्तस्यार्थवत्त्वादिति भावः-इति भावप्रकाशिका ।

‖ ज्ञानस्येति शेषः-भाव· ।

¶ विनैव रुध्यत इति पाठे १ पुस्तके सत्यपि नैव विरुध्यत इति युक्तः पाठः, न विरुध्यत इति तु २,३ पु· । ** इत्यावान्तरेति १ पाठः ।

नाभ्यामङ्गभूताभ्यां सह श्रवणविधानमस्त्येवा ऽतस्तदपेक्षितानुबन्धचय-
* निर्णयाय † सूचमारब्धम् । कर्त्तव्ये ‡ चाधिकारिणा मोक्षसाधन § ब्रह्म-
ज्ञानाय वेदान्तवाक्यविचारे प्रथमसूचेण प्रतिपादिते स च कर्त्तव्यो विचारो
जन्मादिसूचमारभ्य प्रवर्त्तिष्यत इति तच विध्यपेक्षितेष्वधिकारिविषय-
फलानुबन्धेषु विषयफलयो ‖ रुपपादनाय बन्धस्य मिथ्यात्वमच वर्ण्यत
इति सूचसङ्गतमेवेदं भाष्यं व्याख्येयमिति ॥]

ननु यद्यर्थाद्विषयप्रयोजने सूचिते तर्हि भाष्यकारेण सूचस्य तच
व्यापारं दर्शयित्वा ऽऽक्षेपसमाधानपूर्वकं साक्षादेव प्रतिपादनीये ¶ विषयप्र-
योजने अन्यथा सूचकारभाष्यकारयोस्तच तात्पर्याभावप्रसङ्गादिति । तचाह
एतच्च तस्माद् ब्रह्मजिज्ञासितव्यमित्यादिभाष्ये स्पष्टतरं भाष्यकारेणोक्तमिति ।
प्रतिपादयिष्याम इत्यध्याहारः । प्रथमग्रन्थोक्तमेवार्थमाक्षेपसमाधानपूर्वकमति-
तरां स्पष्टीकर्त्तुं चोदयति अचाह यदेवमिति । नन्वस्यानर्थहेतोरिति भाष्यव-
त्पूर्वभाष्यमपि विषयादिकमेव प्रतिपादयति कुतस्तच पर्यनुयोग इति नेत्याह
अहं मनुष्य इति देहेन्द्रियादिष्वित्यादिनाच विचारकर्त्तव्यताविषयप्रयोज-
नाध्यासानामुत्तरोत्तरेण ** पूर्वपूर्वस्य साध्यत्वस्य सूचेणैव सूचितत्वादध्या-
ससाधनद्वारेण विषयप्रयोजने साधयित्वा विचारकर्त्तव्यता साधनीयेति क्रम-
नियमं विवक्षन्नाह उच्यत इत्यारभ्य वक्ष्यति चैतदित्यतः प्राक्तनेन ग्रन्थेन ।
ननु †† ब्रह्मज्ञानप्रयोजनां विचारकर्त्तव्यतां ‡‡ सूचयता सूचेण कथं बन्धनि-
वृत्तिर्विचारविज्ञानयोः प्रयोजनत्वेन सूचितेति । तचाह । ब्रह्मज्ञानं हि
सूचितमनर्थहेतुनिबर्हणमिति । विचारसाध्यज्ञानस्य प्रयोजनमाकाङ्क्षन्विचार-
विधिरधिकारिविशेषणं मोक्षं प्रयोजनत्वेन प्रमिमीते इत्यर्थः । नन्वनर्थो
नरकपातादिलक्षणो ऽन्य एव शरीरादिप्रतिभासस्य च मिथ्यात्वं साध्यत
इति किं केन सङ्गतमिति नेत्याह अनर्थश्च प्रमातृताप्रमुखं कर्तृत्वभोक्तृत्व-

* विनिर्णायायेति २ पु० । † न्यायसूत्रमिति २ पु० ।
‡ अधिकारिणः—इति २ पु० । § ब्रह्मात्मज्ञानायेति २ पु० ।
‖ उपादानायेति १,३ पु० ।
¶ विषयप्रयोजने ऽन्यथेति १,२ पुस्तके सत्यपि विषयप्रयोजने अन्यथेति ३ पुस्तकपाठो युक्तः । ** पूर्वपूर्वसाध्यत्वस्येति २ पु० ।
†† ब्रह्मज्ञानप्रयोजनमिति १,२ पु० । ‡‡ सूत्रयता—इति २ पु० ।

मिति । निवर्त्तता तर्हि ज्ञानेन वस्तुभूतमेव प्रमातृत्वकर्तृत्वभोक्तृत्वमिति नेत्याह तदपि वस्तुकृतमिति । तथाहि । चित्रावयविनि नीलविशिष्टद्रव्यज्ञानं स्वविषयं वा स्वविषयसमवेतं वा रसादिकं विरोधिनं वा पीतिमादिगुणं न निवर्तयति स्वविषयानवबोध एव केवलस्तेन निवर्त्यते । स्वाश्रयगतं वस्तु ज्ञानेन निवर्त्तत इति चेन्न घटादिज्ञानेनात्मगतधर्माधर्मादिगुणानिवृत्तेः । न चाश्रयविषयोभयसम्बन्धि वस्तु ज्ञानेन निवर्त्तते आत्मनः शरीरविषयज्ञानेन देहात्मसम्बन्धादनिवृत्तेरिति । ननु न दृष्टसामर्थ्यात् ज्ञानाद्बन्धनिवृत्तिर्येनाविद्यात्मत्वं वर्ण्यत किंत्वागम एव ज्ञानाद्बन्धनिवृत्तिं श्रावयति । ननु श्रुतोपपत्त्यर्थमेव बन्धस्याविद्यात्मत्वं वर्णनीयमेव । यथाग्नेयादीनां † षण्णां यागानामधिकारापूर्व्वविषयतया ऽपूर्व्वकरणभावे श्रुतेपि कालान्तरभाविप्रधानापूर्व्वसाधनत्वोपपत्त्यर्थं क्रमभावियागकर्म्मजन्यानि मध्यवर्त्तीन्यवान्तरापूर्व्वाणि कल्प्यन्ते । यथा वा श्रुतस्यैव स्वर्गसाधनत्वस्योपपत्तये ऽपूर्व्वं कल्प्यते तद्वत् । ननु तच्च क्षणिकानां कर्मणां कालान्तरवर्त्तिफलसाधनत्वाभावव्याप्तिनियमाल्लोके वेदेपि स्वर्गापूर्वसि ‡ द्वौ मध्ये § ऽपूर्वाणि कल्प्यन्ते श्रुतोपपत्तय इति । तर्ह्यत्रापि व्याप्तिनियतिरस्तीत्याह यतो ज्ञानमज्ञास्यैव निवर्त्तकमिति । अतः सूत्रस्यैव बन्धस्याविद्यात्मकत्वे व्यापारात्सूत्रार्थविचारकर्त्तव्यतोपपत्त्यर्थप्रयोजनसाधनायाध्यासो वर्णनीय इत्याह तदयमित्यादिना सूत्रार्थोपपत्त्युपयोगितयेत्यन्तेन ग्रन्थेन । ननु सूत्रेण प्रथमप्रतिपन्नं प्रतिपाद्यमर्थमुल्लङ्घ्य किमिति चरमप्रतिपन्नमार्थिकार्थमेव भाष्यकारः प्रथमं वर्णयतीति तत्राह सकलतन्त्रोपोद्घात इति, प्रतिपाद्यमर्थं बुद्धौ संगृह्य प्रागेव तदर्थमर्थान्तरवर्णनमुपोद्घातः, प्रतिपाद्यं बहिरेव प्रतिज्ञाय पश्चात्तत्सिद्धिहेतूपवर्णनं प्रतिपादनमिति विभागः, तन्त्रमिति तन्त्रार्थो ब्रह्मात्मैकत्वमुच्यते । ननु भवतु प्रयोजनसिद्धिहेतुरध्यासः कथं तन्त्रार्थसिद्धिहेतुरित्याशङ्क्य तत्कथनाय तन्त्रार्थं प्रथमं कथयति तथाचास्य शास्त्रस्येति एतदभ्यर्थं प्रतिपादितमित्युत्तरेण सम्बन्धः । तदेवैतदभ्यर्थं दर्शयति सुखैक-

* अविद्यात्मकत्वमिति २,३ पु० ।
† आग्नेयादिषण्णामिति प्रायः सर्वत्र ।
‡ सिद्धाविति २ पु० ।
§ अपूर्वान्तराणीति २ पु० ।

तानेत्यादिना । अयमर्थः । ब्रह्मात्मैकत्वे वेदान्ताः पर्यवस्यन्तीति यदिदं वेदान्तशास्त्रस्येदंपर्यं तत् सूचभाष्याभ्यां प्रतिपादितमिति । तन्त्रार्थं प्रदर्श्य तस्याध्याससिद्ध्यधीनतया ऽध्यासस्य प्रथमवर्णनीयतां दर्शयति तत्राहं कर्त्ता सुखी दुःखीति । ननु शास्त्रमेव प्रत्यक्चाभिमतमपि बन्धमाभासीकृत्य ब्रह्मात्मैकत्वं प्रतिपादयिष्यति किं पृथगध्यासवर्णनेनेति । तत्राह तावज्जरद्गवादिवाक्यवदिति । ननु शास्त्रार्थसिद्धिरध्यासपराधीना चेत्स एव तर्ह्यध्यासः सूचकारेण मुखतो वर्णनीयः तस्य प्राधान्यादन्यथा तत्तात्पर्यप्रसङ्गादिति । तत्राह वक्ष्यति चैतदिति । तर्ह्युपोद्घातत्वात्प्रथममेवाध्यासविषयं सूत्रं प्रणेतव्यमिति चोदति । यद्येवमिति । अर्थनिर्णयप्रधानत्वाद्वादकथालक्षणायां * प्रतिपादनप्रक्रियायां प्रवृत्तः सूचकारो नोपोद्घातप्रक्रियायामिति परिहरति मैवमर्थविशेषोपपत्तेरिति । तर्हि भाष्यकारेणापि यथासूचक्रममेव प्रवर्तितव्यं नतु सूचक्रममतिलङ्घ्येति । तत्राह भाष्यकारस्त्विति । सुखप्रतिपत्त्यर्थं प्रवृत्त्यङ्गभावायेत्यर्थः । एवमपि न व्याख्येयमिदं भाष्यं शास्त्रादौ मङ्गलाचरणाभावात् । विघ्नोपसंस्पृष्टतया शास्त्रार्थे ऽप्रतिपत्त्यन्यथाप्रतिपत्तिविप्रतिपत्तिसम्भवात् शिष्टाचारपरिपालनहीनतया चानाप्तप्रणीतत्वप्रसङ्गादिति चोदयति ननु ग्रन्थकरणादिकार्यारम्भ इति । ननु शिष्टानां निष्ठीवनादिप्रवृत्तिः किमन्येनानुसरणीयेति नेत्याह शिष्टाचारश्च नः प्रमाणमिति· आचारो धर्म इत्येवानुष्ठीयमानं कर्म प्रमाणं कर्त्तव्यमित्यर्थः । ननु प्रयोजनाभावात् किं मङ्गलाचरणेनेति नेत्याह प्रसिद्धं च मङ्गलाचरण †स्येति । नन्वत्र विघ्न एव नास्त्यल्पारम्भत्वादिति नेत्याह महति चेति । ननु सम्भावनामात्रान्न प्रवृत्तिर्विघ्नशान्तये किन्तु निश्चयादित्यत्राह प्रसिद्धं चेति । ननु लोकप्रसिद्धिर्निर्मूला न विघ्ननिश्चयहेतुरित्यत आह विज्ञायते चेति । उपसंहरति तत्कथमिति । सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान्मङ्गलायतनं हरिरितिस्मृतेः शिष्टाचारप्रतिपालनाय विघ्नोपशान्तये च विशिष्टदेवतातत्त्वानुस्मरणलक्षणं मङ्गलाचरणं कृतमित्याहाचोच्यत इति ।

* समासो ऽस्ति २ पु· ।
† मङ्गलाचरणत्वस्येति १ पु· ।

किं तच्च प्रमाणमित्यत आह युष्मदस्मदित्यादीति इत्यन्तमेवभाष्यं प्रमाणमित्यर्थः मङ्गलाचरणमिति वा । कथमिदं विशिष्टदेवतानुस्मरणं गमयतीति । तत्राहास्य चायमर्थ इति । ननु नेह विशुद्धात्मतत्त्वदेवतानुस्मर्यते किन्त्वध्यासाभावो वर्ण्यत इति । सत्यम् । तादर्थ्येन तत्त्वमप्यनुस्मर्यत इत्याह तत्कथंचनेति । नन्वन्यपरत्वाद्देवतानुस्मृतिरविवक्षिता न कार्यकरीति । नेत्याह । तदन्यपरादेवेति । अन्यार्थमपि देवतानुस्मरणं स्वभावादेव विघ्नोपप्लवं धक्ष्यति धूमार्थ इव वह्निस्तृणादिकमित्यभिप्रायः । व्याख्येयत्वं प्रतिपादितमुपसंहरति तस्मादिति । अन्यार्थप्रवृत्तेन युष्मदस्मदित्यादिपदद्वयमर्थाद्व्याख्यातम् उत्तरपदं व्याख्यातुं भाष्यमा * ददाति विषयविषयिणोरित्यादिना तच्च द्विविधो विरोधो द्विविधा चेतरेतरभावानुपपत्तिः । कथम् । द्वयोः पदार्थयोरेकदेशकालावस्थानसामर्थ्याभावः पदार्थधर्मौ विरोधः । तन्निमित्तो ऽवस्थानलक्षणकार्याभाव इतरेतरभावानुपपत्तिरित्येकस्कन्धः । अपरस्तु पदार्थयोरितरेतरात्मतासामर्थ्याभावः पदार्थधर्मौ विरोधः । तन्निमित्त इतरेतरात्मतालक्षण † कार्याभावानुपपत्तिरित्यतो द्वैविध्यात्पृच्छति कोयं विरोध इत्यादिना । तच्च प्रथमं पक्षं दूषयति ‡ तावदित्यादिना सहावस्थान § मुक्तमित्यन्तेन ग्रन्थेन । तच्च तमःप्रकाशशब्दाभ्यां छायातपशीतोष्णग्रहणमङ्गीकृत्य तत्रापि सहावस्थान ‖ मुक्तं वेदितव्यम् । इदानीं द्वितीयं पक्षमवलम्बते उच्यते परस्परात्मतालक्षणो विरोध इत्यादिना । ननु तमो नामा ऽऽलोकाभावमात्रमिति केचिदूपदर्शनाभावमात्रमित्यन्ये तत्कथं दृग्दृश्ययोर्भावरूपयोरिदं दृष्टान्तत्वेना ¶ द्रियत इति । उच्यते । उपचयापचयाद्यवस्थाभेदविशेषविशिष्टं रूपवत्तया चोपलभ्यमानं तमः कथं द्रव्यीमभावविधामासीदेत् । बहुलालोकवितते पि देशे निमीलितनयनस्य गोलकान्तरवर्त्तितमोदर्शनमन्धकारोपलब्धिः पिहितकर्णपुटस्यान्तरशब्दोपलब्धिवन्न विरुध्यते । आलोकविनाशितस्य च तमसः पुनर्मूलकारणादेव झटिति महाविद्युदादिजन्मवज्जन्म सिद्ध्यति । ननु रूपवतो द्रव्यस्य स्पर्शवत्त्वनियमा-

* सर्वेष्वेव पुस्तकेषु आददातीति पाठः, भाष्यं व्याख्यातुं प्रतीकग्रहणमास्यविवरणं विनाऽनुपपन्नमित्यास्यविवरणास्य विवक्षितत्वाच्चात्मनेपदमिति द्रष्टव्यमिति भावप्रकाशिका च ।

† कार्याभावो ऽनुपपत्तिरिति २ पु० ।

‡ यदि तावदिति २,३ पु० ।

§ उक्तं वेदितव्यमित्यन्तेनेति २ पु० ।

‖ उक्तमिति द्रष्टव्यम् इति २ पु० ।

¶ उपादीयत इति २ पु० ।

त्तद्रहितं तमः कथं रूपवद् द्रव्यम * वगम्येत । नैष दोषः । वायोरन्यच्च स्पर्शवद्द्रव्यस्य रूपवत्त्वनियमेपि रूपरहितस्य स्पर्शवतो वायोरभ्युपगमात्तद्दर्शननियमादेव स्पर्शहीनस्य रूपवत्तमसः सिद्धेः । धूमस्य च रूपवतश्चक्षुःप्रदेशादन्यच्च स्पर्शानुपलब्धेः तद्व † त्सर्व्वस्पर्शहीनं तमः किं न स्यात् । सवितृकिरण ‡ वितते पि देशे प्रदीपालोकजन्मविनाशयोः प्रागभावप्रध्वंसाभावेतरेतराभावेषु तमोबुद्धयदर्शनान्नालोकाभावमात्रं तमः । सर्व्वालोकाभावश्चेत्सर्व्वालोकासन्निधाने तर्हि न निवर्त्तेत । बहुलान्धकारसंवृतापवरकान्तरवस्थितस्यापि बहीरूपदर्शनेन सहापवरकान्तस्तमोदर्शनान्न रूपदर्शनाभावमात्रं तम इत्यलमतिप्रसङ्गेन]

ननु दृग्दृश्ययोरितरेतरभावानुपपत्तिस्तयोर्विभ्रमनिमित्तं तादात्म्यावभासं न निरुणद्धि । शुक्तिकारजतयोरपि हि तादात्म्यहीनयोरेव विभ्रमनिमित्तमेकाधिकरण्यमवभासते तद्वदिहापि स्यादिति चोदयति कथमिति । सत्यमिदमंशमात्रस्याधिष्ठानस्य § रजतस्य चाध्यस्यमानस्य क्वचित्तादात्म्यमस्त्येव । ततश्चाधिष्ठानसामान्यांशस्याध्यस्यमानविशेषांशस्य च क्वचित्सामान्यविशेषभावेन वा गुणगुणिभावेन वा समानाधिकृतस्यान्यचान्यतरांशवतः पदार्थस्य दर्शनादन्यतरांशाद्भ्रासो विभ्रमो दृष्टः तद्वदिहाधिष्ठानस्य चितोध्यस्यमानस्य चानात्मनो नास्तीत्याह स्वतस्तावद्विषयिणश्चिदेकरसत्वान्न युष्मदंशसम्भव इत्यादिना । अयमाशयः । द्रष्टुरचिदंशः स्वाभाविको वा स्यादागन्तुको वेति । न स्वाभाविक इत्याह स्वत इति । चेत्यं हि जडं चैतन्यस्य कर्मकारकतयावभासते । तत्कथमेकस्यां क्रियायां कर्त्तुर्विपरीतस्थानगतं कर्मकारकमात्मा स्यादित्यभिप्रायः । आगन्तुकश्चेत्सहेतुरहेतुर्वा ‖ निर्हेतुश्चेत्तत्राह अपरिणामित्वादिति । नहि निरवयवं वस्तु स्वतः सावयवाकारेण परिणममानं दृष्टमित्यभिप्रायः । न सहेतुरित्याह निरञ्जनत्वादिति । नहि निरवयवमाकाशं हेतूपरागात्परिणममानं दृष्टमित्यर्थः । तर्ह्यनात्मैवाधिष्ठानमात्मांशात्मकं क्वचिद्दृष्टमिति । नेत्याह विषयस्यापीति । समत्वादित्ययमर्थः । यथा द्रष्टुर्द्रष्टृन्तरं न प्रत्यक्षगोचरो ऽनुमेयमेव तत् एवं विषयो ऽपि स्यादिति । परतोपि

* अवगम्यते–इति १, ३ पु० ।
† सर्वं स्पर्शहीनमिति १ पु० ।
‡ संवृतेऽपीति २ पु० ।
§ रजतस्याध्यस्यमानस्य चेति २ पु० ।

नानात्मनश्चिदाकारपरिणामो जडोपादानस्यापि कार्यस्य जडत्वात् । तर्ह्यात्मचैतन्यमेवानात्मा स्वांशत्वेन स्वीकरोतीति चेत् तत्राह चितेरप्रतिसंक्रमत्वादिति । तस्मात्क्वचिदपि तादात्म्यादर्शनादन्यत्रान्यतरांशदर्शने नान्यतरांशाध्यासो नो * पपद्यत इति । तद्धर्म्माणाम † पि सुतरामित्यारभ्याभाव एवाध्यासस्य युक्त इत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः ।

नन्वहङ्कारादिषु शरीरान्तेष्वहमित्येव प्रत्ययो नत्विदमिति कथमेषां युष्मत्प्रत्ययगोचरत्वमिति तत्राह तद्बलनि ‡ र्भासिततयेति । तस्यात्मप्रत्ययगोचरस्य चैतन्यस्य बलेन निर्भास्यत्वादहङ्कारादेः प्रतिभासतो युष्मदर्थत्वाभावेप्यपरोक्षतयावभास्यत्वेन लक्षणेन युष्मदर्थभावो युज्यत इत्यर्थः । अपृथक्त्वेपि चैतन्यात्पृथगिवावभासन्त इति । अन्तःकरणवृत्त्युपाधौ नानेवावभासन्त इत्यर्थः ।

भूयोवयवसामान्यसादृश्याभावादात्मनि कर्तृत्वादेरहङ्कारादयुपाधिनिमित्तभ्रमत्वेपि शरीराद्यध्यासस्य सोपाधिकभ्रमत्वाभावाद द्रष्टुर्यहङ्कारादिशरीरान्तपदार्थाध्यासस्या ऽसम्भवं प्राग्रमङ्गीकरोति यद्यप्येवमिति । निरुपाधिकभ्रमकार्यदर्शनमेव गुणावयवसामान्याभावेपि केतकीगन्धसदृशः सर्पगन्ध इतिवत्सादृश्यं वा शङ्खपीतिमादाविव कारणान्तरं वा कल्पयतीत्याह तथापीत्यादिना एवमध्यासस्यापीत्यभिप्राय इत्यन्तेन § ग्रन्थेन । नैसर्गिकशब्दार्थमाह प्रत्यक्चैत्यन्यसत्तामात्रानुबन्धीति । कथम् । आत्मनि कर्तृत्वभोक्तृत्वदोषसंयोग एवाध्यासः । तत्रभोक्तृत्वाध्यासः कर्तृत्वाध्यासमपेक्षते अकर्तुर्भोगाभावात् कर्तृत्वं च रागद्वेषसंयोगाध्यासमपेक्षते तद्रहितस्य कर्तृत्वाभावात् दोषसंयोगश्च भोक्तृत्वमपेक्षते अनुपभुक्ते ऽतज्जातीये वा रागाद्यनुपपत्तेः । एवं बीजाङ्कुरवद्धेतुपरम्परया ऽनादित्वादध्यासस्य नैसर्गिकत्वमिति । लोकव्यवहारशब्दोध्यासाभिधायीति दर्शयति लोक इति मनुष्योहमित्यादिना । व्यवहारोभिज्ञाभिवदनमुपादानमर्थक्रियेति चतुर्विधः अतो मनुष्योहमिति ज्ञानाभिधाने व्यवहारशब्दमर्हत इति भावः ।

[अन्यस्यान्यात्मतावभासो ऽविद्येत्युक्ते शुक्लः पट इत्यादिप्रत्ययाना-

* नैवोपपद्यते—इति २ पु· ।
† अपिकारो नास्ति २ पु· ।
‡ निर्भासितयेति १ पु· ।
§ ग्रन्थेनेति नास्ति २ पु· ।

मविद्यात्वप्रसङ्गो मा भूदिति सत्यस्य वस्तुनो मिथ्यावस्तुसम्भेदावभासो ऽविद्येति स्वसिद्धान्तमङ्गीकृत्य सत्यानृते मिथुनीकृत्येत्युक्तं तद्व्याचष्टे सत्यमनिदंचेतन्यमित्यादिना । ननु क्त्वाप्रत्ययोपादानादर्थतः क्रियाभेदः * पूर्वापरभावश्चाङ्गीकर्तव्यः । तत्कथमध्यासमिथुनीकरणलोकव्यवहाराणामेकार्थत्वमिति । नेत्याह अध्यस्य मिथुनीकृत्येत्यादिना । ननु किमिति स्वरूपमात्रपर्यवसानम् । क्रियाभेद एव क्त्वाप्रत्ययसामर्थ्यादुपादीयतामिति नेत्याह उपसंहारे चेति । नहि पदमात्रवैयर्थ्यभयाद्वाक्यार्थो नैसर्गिकत्वगुणविशिष्टो विशेष्यपदार्थोध्यास उपक्रमोपसंहारयोर्भेत्तुं युक्त इत्यभिप्रायः । किं तर्हि क्त्वाप्रत्ययावलम्बनमिति । प्रतिपत्तिः क्रियाभेदपूर्वापरीभावाविति§ आह अतश्चैतन्यं पुरुषस्य स्वरूपमिति । तद्व्यपदेशमात्रमुपचारमात्रमित्यर्थः । कथमेकोप्यध्यासोन्योन्यात्मता सत्यानृते अ†हमिदं ममेदमिति च विशेषणभेदाद्विशिष्टो ऽध्यासः परोपाधौ भिद्यते वि‡शिष्टाश्च प्रत्ययाः क्रमेण वक्तुर्भवन्तीति प्रतिपत्तिः पूर्वापरीभावं विशेषणभेदाच्च विशिष्टक्रियाभेदं चाङ्गीकृत्य क्त्वाप्रत्यय इति । तच्चाज्ञानमित्युक्ते ज्ञानाभावमात्रमुक्तं स्यात् मिथ्येत्युक्ते भ्रान्तिज्ञानमिति स्यात् तदुभयव्यावृत्त्यर्थं निरुच्य पदार्थौ दर्शयति । मिथ्या च तदज्ञानं चेत्यादिना ।]

ननु कथं मिथ्याज्ञानमध्यासस्योपादानम् । तस्मिन्सत्यध्यासस्योदयादसति चानुदयादिति ब्रूमः । नन्वध्यासस्य प्रतिबन्धकं तत्त्वज्ञानं तदभावश्चाज्ञानमिति प्रतिबन्धकाभावविषयतया ऽज्ञानस्याध्यासेनान्वयव्यतिरेकावन्यथासिद्धौ । नैतत्सारम् । पुष्कलकारणे हि सति कार्योत्पादविरोधि प्रतिबन्धकम् । नचाध्यासपुष्कलकारणे सति तत्त्वज्ञानं कार्यप्रतिबन्धकतया ज्ञायते किंत्वसत्येवाध्यासकारणे तत्त्वज्ञानोदयः । तस्माज्ज्ञानान्वयव्यतिरेकौ प्रतिबन्धकाभावविषयौ । तथापि विरोधिसंसर्गाभाव इति चेन्न । कार्यस्य कारणापेक्षा हि प्रथमम्जायते न विरोधिसंसर्गाभावापेक्षा । तस्मात्प्रथमापेक्षितकारणकृत्रिमेवान्वयधारकौ न्यायसहितौ कुर्वाते । ननु कृत्रं विषयेन्द्रियादिदोषः कारणमिति । स । न निमित्तं तु तत् उपादानापेक्षायामज्ञानमनुप्रविशति । सर्वं च कार्यं सोपादानं

* पूर्वापरीभाव इति २ पु० । † सत्यानृतेऽहमिदमित्येवं पुस्तकत्रये ऽपि न्यम् ।
‡ विशिष्टार्थप्रत्ययाश्च क्रमेणेति २ पु० । § भावेतिनास्ति १ पु० ।

भावकार्यत्वात् घटादिवत् इत्यनुमानात् । क्रियागुणादेरपि साश्रयस्यैवोत्पत्तेरुत्पद्यमानाश्रयस्यैवोपादानत्वात् । नन्वात्मान्तःकरणं वा भ्रान्तिज्ञानोपादानं भविष्यति न । आत्मनो ऽपरिणामित्वात् अन्तःकरणस्य चेन्द्रियसंयोगादिसापेक्षत्वात् मिथ्यार्थं च प्रत्ययमात्रविपरिवर्त्तिनि तदयोगात् अधिष्ठानज्ञानेनान्यथासिद्धत्वाच्च तदन्वयव्यतिरेकयोरन्तःकरणस्य जड़त्वादज्ञातृत्वात् आत्मनो ऽभ्रान्तत्वप्रसङ्गाच्च । तस्मान्मिथ्यार्थतज्ज्ञानात्मकं मिथ्याभूतमध्यासमुपादानकारणसापेक्षं प्रत्यनाश्रयस्यानतया काचादिनिमित्तकारणेषु भिद्यमानेषु मिथ्याभूतस्यैव सर्वकार्यस्वभावानुकूलस्य सर्वचानुगमादज्ञानस्यात्माश्रयतया भ्रान्तिज्ञानाश्रयकोटिनिक्षिप्तत्वाच्च मिथ्याज्ञानमेवाध्यासोपादानं नात्मान्तःकरणकाचादिदोषा इति सूक्तम् । आत्माश्रयाध्यासस्य शुक्तिकासंसर्गो विभ्रम इति वक्ष्यते । एकस्यैवाध्यासस्य नैसर्गिकत्वं नैमित्तिकत्वं च विरुद्धमिति चोदयति कथं पुनरिति ।

तच्च प्रथमं तावदध्यासप्रवाहजन्मनोपादानकारणरूपेण नैसर्गिकत्वं कार्यव्यक्तिरूपेण नैमित्तिकत्वमित्यविरोधं दर्शयितुमात्मनि भावरूपमज्ञानं साधयति अवश्यमेषा ऽविद्या शक्तिरिति । अवश्यमिति गर्भेति च प्रमाणद्वयवत्तामाह । प्रत्यक्षं तावदहमज्ञो मामन्यं च न जानामीत्यपरोक्षावभासदर्शनात् । ननु ज्ञानाभावविषयो ऽयमवभासः । न । अपरोक्षावभासत्वादहं सुखीतिवत् अभावस्य च षष्ठप्रमाणगोचरत्वात् । प्रत्यक्षाभाववादिनोपि नात्मनि विज्ञानाभावावगमः सम्भवति । मयि ज्ञानं नास्तीतिप्रतिपत्तावात्मनि धर्मिणि प्रतियोगिनि चार्थेवगते तच्च ज्ञानसद्भावात् ज्ञानाभावप्रतिपत्त्ययोगादनवगते ऽपि धर्म्यादौ सुतरामभावानवगमात्षष्ठप्रमाणगोचरे फलनिङ्गाभावानुमेयेपि ज्ञानाभावे आत्मादावनवगते ऽप्यात्मनि ज्ञानाभावप्रतिपत्त्ययोगात् । मेति । त्वदुक्तमर्थं संख्यां वा शास्त्रार्थं वा न जानामीति विषयव्यावृत्तमज्ञामित्यपि तच्छ्रवणादौ प्रवर्त्तते । भावरूपाज्ञानप्रत्यक्षवादे तु सत्यप्याश्रयप्रतियोगिज्ञाने ज्ञानाभावस्येव भावान्तरस्यापि नानुपपत्तिर्नियन्तुं शक्यते । न-

यप्रतियोगिज्ञानभूतमपि साक्षिचैत्यन्यं भावान्तरस्याज्ञानस्य निवर्तकं

* ज्ञानविषयप्रतिभासत्वात् । नहि स्वज्ञानेनैव स्वयं निवर्त्तते । नन्व-

‡ निष्प्रावर्त्तको विषयः कथं साक्षिचैतन्येनावभास्यते प्रमाणायत्तत्वा-

द्विषयसिद्धेरिति । उच्यते । सर्वं वस्तु ज्ञाततया वाऽज्ञाततया वा साक्षिचैतन्यस्य विषय एव । तच्च ज्ञाततया विषयः प्रमाणव्यवधानमपेक्षते अन्यस्तु सामान्याकारेण विशेषाकारेण वा ऽज्ञानव्यावर्त्तकतया सदा भासत इत्युपपत्तिसहितमज्ञानप्रत्यक्षं भावरूपमेवात्मन्यज्ञानं गमयतीति सिद्धम्]। [अनुमानमपि विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं भवितुमर्हत्य ऽप्रकाशितार्थप्रकाशकत्वादन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति । ततश्च ज्ञानेन समानाश्रयविषयं भावरूपमज्ञानं सिद्धम् । शक्तिरित्यात्मपरतन्त्रतया ऽऽत्मनः सर्वकार्योपादानत्वस्य नि * र्वोढृत्वमाह । तत्स्वरूपमात्मतत्त्वं तत्सत्तामात्रानुबन्धिनीत्यर्थः । किंच । [अर्थापत्तिरपि भावरूपाज्ञानसद्भावे प्रमाणमित्याह अन्यथामिथ्यार्थावभासानुपपत्तेरिति । विशुद्धब्रह्मात्मनि शुक्तिकायां चाहङ्काररजताध्यासस्यार्थज्ञानात्मकस्य मिथ्याभूतस्य मिथ्याभूतमेव किंचिदुपादानमन्वेषणीयम् । सत्योपादानत्वे कार्यस्य कारणस्वभावतया ऽध्यासस्यापि सत्यत्वप्रसङ्गात् । तस्यापि मिथ्योपादानस्य सादित्वे तथाविधोपादानान्तरकल्पनाप्रसङ्गादनाद्येव तन्मिथ्योपादानमिति कल्पनीयम् । यच्चानादि स्वयंमिथ्या मिथ्योपादानमात्मसम्बन्धि च तदज्ञानमिति मिथ्याध्यास एव तथाविधाज्ञानोपादानं कारणमन्तरेणानुपपद्यमानस्तत्कल्पयतीत्युक्तम्]

ननु येन तस्यातिशय उत्पद्यते स तस्य विषयः । नचाज्ञानेनात्मन्यावरणातिशयजन्म प्रमाणाभावादर्थानुपपत्तेश्च । न तावदवगते नीलार्थे तच्चावरणकृत्यमवगन्तुं शक्यते अनवगते तु † नतराम् । नन्ववगते सति पूर्व्वमा ‡ वृतमित्यवगम्यताम् । न । धारावाहिकविज्ञानगम्येर्थे पूर्वमवगतस्यापि पश्चादवगमदर्शनात् । नन्विदानीमेवावगतत्वं पूर्वमनवगतिं साधयति । न । पूर्व्वानवगतिमविज्ञायेदानीमेवावगतमित्यवधारणायोगात् । ननु पूर्व्वापरप्रत्यभिज्ञायां मध्ये ऽनवगतिरवगम्यत इति । न प्रत्यभिज्ञानुपपत्तिर्मध्ये ऽनवगतिं साधयति । धारावाहिकेप्यात्मनि सदावगते

* निर्वोढृत्वमाहेति प्रथमपुस्तके ऽस्ति, निर्बोढृत्वमाहेति २ पु॰ तल्लेखकाज्ञानजन्यम् ।
† न सुतरामिति १,३ पु॰ । ‡ आवृत्तमिति १ पु॰ द्वयेऽपि ।

तद्दर्शनात् । मध्ये ज्ञानस्मृत्यभावादनवगतिरवगम्यते इति चेन्न । अवगतेपि स्मृतिनियमाभावात् । तथापि विषयानवगतिः प्रतीयत इति चेत्सत्यं विषयैः सह सान्निचैतन्ये अज्ञानाध्यासात्प्रतिभासः । नचाध्यस्तस्यावरणमस्ति द्विचन्द्रादिवत्प्रमाणगम्यत्वाभावात् । तस्मान्नास्त्यनात्मन्यावरणे प्रमाणम् । नच स्वयमेव प्रकाशहीनस्य जडस्यावरणार्थोपि सम्भवति । तस्मादतिशयाभावान्नाज्ञानविषयो ऽनात्मेति । तदाह सा च न जडेषु वस्तुषु तत्स्वरूपावभासं प्रतिबध्नातीति । किंत्वन्यदेवानात्मन्यतिशयकार्यं कृत्वा तद्विषयमज्ञानमिति वक्ष्यत इत्यभिप्रायः । तच्च हेतुः प्रमाणवैकल्यादेवेति । अथवा चैतन्यप्रकाशेन जडानां नित्यवदन्वयान्नित्यवत्प्रकाशे प्राप्ते सम्भवत्येवानात्मस्वावरणकृत्यमित्याशङ्क्याह प्रमाणवैकल्यादेवेति । अनात्मप्रमाणस्य चैतन्यस्य वैकल्यादावरणादेव विषयानवगतिसिद्धेर्न विषये पृथगावरणं कल्पनीयमित्यर्थः । इतश्च नाऽनात्मन्यावरणमित्याह रजतप्रतिभासादिति । यद्यात्माश्रयमज्ञानमनात्मावरणं स्यात्तदावरणविनाशमन्तरेण विषयावभासायोगाद्विषयज्ञानेनात्मज्ञानं निवर्त्तेत । अतः सत्यामेवात्मन्यऽविद्यायां चिष्वपि कालेषु विषयस्वरूपप्रतिभासदर्शनान्नाऽनात्मावरणमज्ञानमिति भावः] ।

[ननु शुक्तिकाविषयमज्ञानमन्यदेव तज्ज्ञानान्निवर्त्तते ऽन्यच्चात्मविषयमज्ञानमात्मनि दृश्यमानमिति । तन्न । आत्माश्रयमात्मविषयं चाज्ञानमन्तरेणानात्मसु प्रतिविषयं भावरूपाज्ञानसद्भावे प्रमाणाभावाद्विषयाग्रहणस्य प्रमाणवैकल्यादप्युपपत्तेः । * किञ्च तर्ह्यतिशयमज्ञानजन्यमाश्रित्य बाह्याध्यात्मिकेषु वस्तुष्वित्यनात्मविषयमज्ञानं दर्शितमिति तदाह अतस्तच्च रूपान्तरावभासहेतुरेव † केवलम् । नन्वचाप्यनुपपत्तिः समाना । कथम् । शुक्तिकाज्ञानं हि रूपान्तरावभासं निवर्त्तयत्तदुपादानमज्ञानमपि निवर्त्तयतीति ते मतम् । तच्च कथं शुक्तिकाज्ञानात्सहाज्ञानेनाध्यासे निवर्त्यमाने पुनरात्मन्यज्ञानं दृश्येत । अतः प्रतिविषयमज्ञानभेदो ऽध्यासस्याज्ञानानुपादानत्वं वोपादाननिवृत्तिमन्तरेणा ‡ ध्यासनिवर्त्तिर्वा समाश्रयणीयेति । उच्यते । अस्मिन्पक्षे शुक्तिकादिज्ञाने रजताद्यध्यासानां स्वकारणे प्रविलयमात्रं § क्रियते ‖ मुसलप्रहारेणेव घटस्य ।

* किञ्चेति १, २ पु· । † हेतुरेवेतीति ३ पु· केवलमिति तु नास्ति । ‡ निवर्त्यन्त इति २, ३ पु· । § उपादेयनिवृत्तिर्येति अधिकं ३ पु· । ‖ मुश्लेति १ पु· । मुषलेति ३ पु· ।

अथवा । मूलाज्ञानस्यैवावस्थाभेदाः रजताद्युपादानानि शुक्तिकादिज्ञानैस्सहाध्यासेन निवर्तन्त इति कल्प्यताम् । कथं पुनर्लोके सहाज्ञानेनाध्यासस्य तत्त्वज्ञानान्निवृत्तेरप्रतिपत्तौ ब्रह्मज्ञानात्सहाज्ञानेनाध्यासस्य निवृत्तिर्दृष्टद्वारेण कल्प्यत इति । नैष दोषः । तत्त्वावभासविरोधिनो ऽग्रहणमिथ्याज्ञानादेस्तत्त्वज्ञानेन निवृत्तिदर्शनादिहापि तत्त्वावभासविरोधितयैव भावरूपाज्ञानादेः कल्प्यमानत्वात्तस्य ब्रह्मज्ञानान्निवृत्तेरुपपत्तेः । नचावरणपक्षोक्तदोषप्रसङ्गः । विषयव्यावृत्तरूपान्तरस्य भ्रान्तिज्ञानेनावगमात् । ननु एवमात्मन्यपि अज्ञाननिमित्तमावरणकृत्यं नास्ति । कथम् । न तावदावरणं प्रकाशविलोपः स्वरूपस्यानपायात् । नापि सत एव प्रकाशस्य कार्यप्रतिबन्धः । ज्ञानस्य विषयावभासात्मनोदितस्य स्वकार्ये प्रतिबन्धप्रतीत्ययोरभावात् । तस्मान्नैवात्मन्यपि भावरूपमज्ञानमनुपयोगादिति तत्राह प्रत्यगात्मनि तु चितिस्वभावत्वात्स्वयंप्रकाशमान इत्यादिना तस्यानवभास इत्यन्तेन ग्रन्थेन । अयमर्थः । अस्ति प्रकाशत इत्याद्यभिज्ञादिव्यवहारपुष्कलकारणे सति नास्ति न प्रकाशते चेति योयमात्मतत्त्वालम्बनो व्यवहारः * स भावरूपेण केन चिदात्मन्यावरणमन्तरेण नोपपद्यते सति पुष्कलकारणे ऽसति चावरणे सन्निहिते घटे प्रकाशत इत्यादिव्यवहारदर्शनात् । अतो नास्ति ब्रह्म न प्रकाशते चेति व्यवहारो ऽन्यथानुपपत्त्या भावरूपमज्ञानं गमयतीत्यर्थापत्तिरनुमानं वा समुदायार्थः । तत्सिद्ध्यर्थमात्मनि प्रकाशत इत्यादिव्यवहारं प्रति पुष्कलकारणतां दर्शयति चितिस्वभावत्वादिति । किं तर्ह्यावरणमिति तत्राह ब्रह्मस्वरूपानवभासस्येति । नास्ति न प्रकाशत इति व्यवहारालम्बनयोग्यत्वस्य व्यवहारकार्यदर्शनादेव कल्प्यमानस्येत्यर्थः । नचाधिष्ठानप्रतिबन्धमन्तरेण तच्च विपर्ययकार्यमुपपद्यते ऽविद्यासम्बन्धादेवावरणस्यानिरूपिताकारता च युक्तेति भावः । ननु प्रमाणवैकल्यादेवाचाप्यग्रहणमिति । नेत्याह अनन्यनिमित्तत्वादिति । अतो ऽनवभासात्पुष्कलकारणे सति परिशेषादिदमायातमित्याह तद्धतनैसर्गिकसिद्धाऽविद्याशक्तिप्रतिबन्धादेव तस्यानवभास इति । मूर्तद्रव्यान्तरस्यासम्भवादिति भावः । अतः कार्यदर्शनोन्नेयमावरण-

* स्वभावरूपेणेति १ पु० ।

कृत्यं विपर्ययं चात्मनि कुर्वाणमज्ञानं भावरूपमेवोभयकारणत्वान्यथानुपपत्त्या कल्प्यत इत्याह । अतः सा प्रत्यक्चितीति ।

17 ननु अग्रहणमिथ्याज्ञानतत्संस्कारेभ्यो ऽन्यदज्ञानं नाम न पश्यामः । त एव च जीवस्य स्वयंप्रकाशमानमपि ब्रह्मस्वरूपावभासं प्रतिबध्नन्तीति । नेत्याह सुषुप्तादौ चेति । तत्राप्यविद्याशक्तिः संस्कारशेषं तिष्ठति न संस्कारादय एवाज्ञानमित्यर्थः । कथम् । न तावत्सुषुप्तादौ स्वयम्प्रकाशब्रह्मस्वरूपानवभासः पुरुषान्तरसंवेदनवद् द्रष्टृभिन्नत्वादिति शक्यं वक्तुम् एकत्वश्रुतेः । नापि मिथ्याज्ञानप्रतिबन्धात् तच्च तस्याभावात् । नापि तत्संस्कारप्रतिबन्धाद्भ्रान्तिः संस्काराणां तत्त्वावभासप्रतिबन्धकत्वाभावात् सत्स्वपि रजतभ्रमसंस्कारेषु शुक्तिकावबोधदर्शनान्नाप्यग्रहणप्रतिबन्धात् । स्वरूपग्रहणस्य नित्यत्वात्स्वयंप्रकाशमाने संवेदने तद्विषयकादाचित्काग्रहणस्याप्रतिबन्धकत्वात् । नापि कर्म्मणा स्वरूपावभासविरोधिता सर्वदाऽणुमात्रस्यापि चैतन्यस्यानवभासप्रसङ्गात् । अज्ञानेपि तुल्यमिति चेन्न । तस्य स्वविषयचैतन्यावभासं प्रत्यप्रतिबन्धकत्वात् । नचाज्ञानस्येव कर्म्मणां नित्यवत्साक्षिचैतन्येनावभास्यता येन तदवभासकतया साक्षिचैतन्यमप्रतिबद्धं प्रकाशेत । नच कर्म्माणि स्वाश्रयावभासविरोधीनीति प्रमाणमस्ति । संस्कारत्वाच्च कर्म्मणां भ्रान्तिसंस्कारवदप्रतिबन्धकता । तस्मात्सुषुप्तादौ स्वरूपानवभासव्यवहारो ऽग्रहणमिथ्याज्ञानतत्संस्कारकर्म्मभ्यो ऽन्यदेव किंचित्प्रतिबन्धकमज्ञानं कल्पयतीत्यर्थः । ननु द्रव्यान्तरमेव प्रतिबन्धकं कल्प्यतां किमज्ञानकल्पनयेति नैतत् । ब्रह्मज्ञानात्प्रतिबन्धनिवृत्तिमन्तरेण स्वविषयावभासायोगात् ज्ञाननिवर्त्यस्य चाज्ञानत्वात् ।

अत्र कश्चिद्वेदाभेदाभ्यां सर्वसंकरवादी वेदान्तार्थग्रहनसम्प्रदायहीनो दुर्ज्जनरमणीयां वाचं जल्पति । न किलाग्रहणमिथ्याज्ञानतत्संस्कारेभ्यो ऽन्यत् सकलसंसारबीजभूतमवस्थाचयेप्यनपाय्याऽऽसंसारविमोक्षाद्वृणडायमानमज्ञानं नामास्ति किंतु भ्रान्तिज्ञानमग्रहणं चाज्ञानमिति । अयं प्रष्टव्यः केयं भ्रान्तिरिति । अहंकारादिशरीरपर्यन्ते ऽनात्मनि आत्मबुद्धिरिति चेत् । अहो विस्मरणशीलता सर्वचसङ्कीर्णचेतसः । खण्डो गौरित्यादिभेदाभेदप्रत्ययं प्रमाणमुपपयादयन्नाहं मनुष्य इतिप्रत्ययं भेदाभेदविषयं

किमित्युपेक्षसे । नाहं मनुष्यो ब्रह्मास्मीतिप्रत्ययसामर्थ्यादिति चेत् । तन्न । नायं खण्डो गौः किं तु मुण्डो गौरितिप्रत्ययेपि खण्डमुण्डाभ्यां गोत्वस्याऽभेदवत् शरीरब्रह्मभ्यां जीवस्याभेदप्रत्ययस्यापि प्रामाण्योपपत्तेः । इदंरजतवद् भ्रान्तिरिति चेत् न । खण्डो गौरित्यत्रापि तथात्वप्रसङ्गात् । नायं खण्डो गौः किंतु मुण्ड इति व्यक्त्यन्तरे खण्डस्य गोत्वोपाधौ निषेधप्रत्ययसामर्थ्यात्तत्र व्यवहारानुच्छेदात् प्रामाण्यमिति चेत् । तदहं मनुष्य इत्यत्रापि तुल्यम् मोक्षावस्थायामपि सर्वात्मत्वात्तव सर्वशरीरेन्द्रियाद्यभिमानव्यवहारानुच्छेदात् । जातिव्यक्तिगुणगुणिकार्यकारणविशिष्टस्वरूपांशांशिसबन्धा यत्र विद्यन्ते तत्र भेदाभेदौ न शरीरात्मनोस्तेषामभावादिति चेत् तर्हि * शरीरशरीरिसम्बन्धोपि गुणगुण्यादिवद्भेदाभेदनिमित्तं किं † न स्यात् अन्यथा सर्वैक्यङ्करवादितया ‡ क्षपणाकशिष्यता चिरकालसमुपार्जिता बाध्येत । अस्ति च चेतनस्वरूपशरीरयोः कार्यकारणभावश्चेतनस्वरूपांशस्य ब्रह्मत्वात् अतो न ते भ्रान्तिरस्ति ।

किंच । भ्रान्तिज्ञानमन्तःकरणपरिणामश्चेतदात्माश्रयाऽविद्या न स्यात् । अन्तःकरणपरिणाम एवात्मनि अध्यस्त इति चेत्तथाप्यन्यथाख्यातिवादिनः संसर्गस्य शून्यत्वादात्माविद्यासम्बन्धो न स्यात् । न चात्मपरिणामो भ्रान्तिः अपरिणामित्वात् । न चाऽज्ञानगुणस्य द्रव्यस्य पुनर्ज्ञानगुणान्तराकारेण परिणामः सम्भवति अवान्तरजातीयस्यैकस्मिन् द्रव्ये गुणद्वयस्य युगपत्समवायायोगात् । नहि पटे शौक्ल्यं युगपत्समवैति । तस्मादनादिसि § द्धमिथ्याज्ञानानभ्युपगमे न काचित्सर्वैक्यङ्करवादिनो ऽविद्यासम्भवति अनादिमिथ्याज्ञानसम्बन्धोऽप्यात्मनि अज्ञानवत्काल्पनिकत्वादाकाशकार्ष्ण्यवदात्मनः कूटस्थतां न विहन्तीत्यलमतिविस्तरेण । अत्र च प्रत्यक्षानुमानार्थापत्तयो ऽनादिभावरूपाज्ञाने प्रमाणत्वेनोपन्यस्ताः । तत्रैवंभूतेन कारणरूपेण कार्यरूपेण च नैमित्तिकत्वनैसर्गिकत्वे न विरुद्धे इत्युपसंहरति । अतो नैसर्गिकोप्यहङ्कार इति अन्योन्यधर्म्मांश्चेत्यादिरध्यासस्वरूपं दर्शयतीत्यन्तो ग्रन्थः स्पष्टार्थः ।

निष्कलङ्कचैतन्यैकताने निरंशानन्दैकरसे ऽज्ञानादिसाक्षिण्यनादिसिद्धेप्यज्ञानाध्यासे कादाचित्कमध्यासमाश्रित्याह अहमिति तावत्प्रथमोध्यास इति ।

* शरीरिसम्बन्धोऽपीति ३ पु० । † किंनेति २, ३ पु० नास्ति ।
‡ क्षपणिकेति २ पु० । § सिद्धेति २ पु० नास्ति ।

नन्विदं रजतमितिवदध्यासे द्वैरूप्यमहमित्यत्रापि वक्तव्यम् अहमिति चैकरूपेणावभासते अतो नाध्यास इति चोदयति नन्वहमिति निरंशचैतन्यमात्रमिति । यथा द्वैरूप्येणाध्याससम्भवस्तथा वक्ष्यत इत्याह यथाध्यस्तांशान्तर्भाव इति । नन्वन्तःकरणेन्द्रियाणामात्मनः पृथक्सत्त्वोपलब्ध्यभावादध्यस्ततयैव सिद्धेरात्मतत्त्वावबोधेन च स्वरूपतो विलयश्रवणात्स्वरूपेण संसृष्टरूपेण चात्मन्यध्यस्ततया सिद्धिरस्तु शरीरं पुनरिन्द्रियैरिदंबुद्धिगृहीतत्वात्केवलसाक्षिवेद्यत्वाभावादुत्क्रान्तेष्यात्मनि पृथगुपलब्धेर्भूतेषु लयश्रवणाच्च नाध्यस्ततया सिद्धुमिति चोदयति नन्विदमित्यहंकर्तुरिति । शरीरव्यतिरिक्तं ममबुद्धिगृहीतं सुतरामनध्यस्तमित्याह ममेदमिति चेति । शरीरादिपदार्थस्वरूपस्य मिथ्याकल्पितकर्तृभोक्तृप्रमातृदोषसंयुक्तात्मार्थतयैव कार्यतया भोग्यतया प्रमेयतया द्वेष्यतया च तादर्थ्येनैव सृष्टत्वात्स्वरूपेणापि मिथ्यात्वं स्वप्नदृष्टान्तेनानुमातुं शक्यत इत्याह उच्यते यदैवाहंकर्तेत्यादिना । दार्ष्टान्तिकं दर्शयति । एवमहंकर्तृत्वप्रमुख इति ।

द्रष्टरि दृश्यावभासस्याविद्याध्यासत्वे शास्त्रीयविषयप्रयोजनसिद्धिः फलिष्यतीत्याह अतस्तादृग्ब्रह्मात्मानुभवपर्यन्तादिति । तादृग्ब्रह्मात्मानुभवो बन्धनिवृत्तिश्चोपपद्यत इत्यर्थः । विषयप्रयोजनसिद्धौ किमायातमिति शास्त्रारम्भकर्तव्यता सिद्धेत्याह तदर्थविषयवेदान्तमीमांसारम्भ इति । ते एव ब्रह्मात्मानुभवबन्धनिवृत्ती अर्थः प्रयोजनं विषयश्च यस्य वेदान्तमीमांसारम्भस्येति विग्रहः । सर्वलोकप्रत्यक्ष इत्यन्तस्योत्तरभाष्यस्य तात्पर्यमाह । आह कोयमिति । इदानीं विभज्यावान्तरतात्पर्यं कथयति तत्रापीति ।

लक्षणसम्भावना * परभाष्यमाक्षिपति । यद्येवमिति । किमिति लक्षणसम्भावने नापेक्ष्येते † इति तत्राह नह्यनिर्ज्ञातरूपमिति । प्रमाणमेवहि प्रमेयमन्यस्यान्यात्मनावभासमध्यासं व्यवस्थापयत् स्वदेशकालोपाधौ सम्भावितरूपं सर्वतोव्यावृत्तासाधारणरूपञ्च व्यवस्थापयति किं पृथग्लक्षणसम्भावनोपन्यासेनेत्यर्थः । नन्वनुमानादिप्रमाणनिर्ज्ञातेषु वस्तुमात्रेषु विशेषलक्षणसम्भावने पृथगपेक्ष्येते इत्यत आह दुःसंपादमिति । विशेषत ‡ इत्यसाधारणाकारेण व्यावृत्त-

* परमिति २ पु० ।
† नापेक्ष्यते–इति १ पु० ।
‡ असाधारणाकारव्यावृत्ततयेति १ पु० ।

तयेत्यर्थः । तच्च द्रष्टुरन्यस्य दृश्येनान्यात्मनावभासो विद्यत इत्येतावति प्रमाणं वक्ष्यते न तस्याविद्याभ्रान्त्यध्यासमिथ्यात्वे अतस्तत्प्रमाणेन न सिध्यतीति परिहरति उच्यते न देहेन्द्रियादिष्वित्यादिना ।

* नन्वन्यस्यान्यात्मनावभासप्रमाणेनैव तन्मिथ्यात्वमपि सिध्यति प्रमेयैक्यादिति चोदयति तत्कस्य हेतोरिति । नानुभवादेवेति परिहरति लोक इति । ननु प्रमाणे सति किमित्यनुभवाभावः प्रमाणभेदादित्याह बाधे सतीति । बाधानुपपत्तिर्मिथ्यात्वे प्रमाणं प्रत्यक्षानुमानव्यवहारानुपपत्त्यागमा आत्मन्यनात्मावभासे प्रमाणमिति भावः । नन्विहापि बाधनिमित्तमितरेतरविवेकमन्तरेणान्यस्यान्यात्मतावभासोयमित्यवगन्तुं न शक्यते अन्यथा स्वस्यैव स्वेनात्मनावभासः किं न स्यादिति नेत्याह नेह स विद्यत इति । यौक्तिकज्ञानादिना परोक्षविवेकमाश्रित्य परस्परात्मतावभासनिश्चयो ऽपरोक्षबाधस्य भ्रान्तिप्रतिभासोच्छेदिनोऽभावान्न स्पष्टो मिथ्यात्वाध्यवसाय इति भावः । अतो × ऽविद्यात्वस्पष्टीकरणाय लक्षणमेव वक्तव्यमित्याह तस्मादध्यासस्येति । तर्हि लक्षणप्रमाणाभ्यामेव वस्तुनिर्णयसिद्धेः प्रमाणेनैवासम्भावनानिराकरणात्सम्भावना पृथङ्न वक्तव्येति चोदयति नन्वेवमपीति । सत्यपि प्रमाणसामर्थ्ये प्रत्यक्षावभासमपि असम्भाव्यमानतया निराकृतमनुभूयत इत्यनुभवमेवावलम्ब्य परिहरति सत्यमेवमिति । औत्पातिक इति अदृष्ट्व्यतिरिक्तकारणशून्य इत्यर्थः ।

ननु प्रमाणेनैव क्वचिदसम्भावना तिरस्क्रियतां यथाकाशगमने पक्षिणां क्वचिदसम्भावनया प्रतिभासो ऽपरोक्षोपि निरस्यते यथा सवितृशुष्यादौ तच्चात्मन्यात्मावभासः कं पक्षमवलम्बतामित्यसम्भावनापक्षमेवेति विशेषं दर्शयति एवमविषयेऽसङ्ग इति । अधिष्ठानस्याध्यस्यमानेन सहैकज्ञानविषयत्वं वक्तव्यम् तदभावान्नाध्याससम्भव इत्याह अविषय इति । द्रष्टुर्व्यतिरिक्तस्य कृत्स्नस्य कार्यकारणसंघातस्याध्यासात्मकत्वेन द्रष्टृर्व्यैव काचादिवद्दोषानुषङ्गो वक्तव्यः तदभावान्नाध्याससम्भव इत्याह † असङ्ग इति । अधिष्ठानस्याध्यस्यमानेन गुणावयवसादृश्यं वक्तव्यम् तदभावान्ना-

* नन्वन्यस्यात्मतावभासेति २ पु· । † असङ्गत इति ५ पु· ।

(१) अध्यासस्संभव इत्याह केनचिदपि गुणादिनेति । अधिष्ठानयाथात्म्याव-
भासो ऽध्यासविरोधी तद्भावाच्च ना * ध्याससम्भव इत्याह निष्कलङ्कचैतन्य-
तयेति ।

नन्वात्मन्यविषयादिरूपे ऽनवगते नासम्भावनाबुद्धिः अवगते तु नाध्यास एव तिष्ठति कुतो ऽसम्भवनाबुद्धिरिति । नैतत्सारम् । आत्मन्य-विषयादिरूपे परोक्षावभासो ऽसम्भावनाबुद्धिहेतुः अपरोक्षावभासोध्यासस्य निवर्तक इत्युक्तत्वात् । उपसंहरति तन्मा शङ्कीति । तदुच्यते । तत् त्रितयं लक्षणं सम्भावना प्रमाणं क्रमेणोच्यत इत्यर्थः । अनन्तरभाष्यस्य तात्पर्यमाह आह कोयमिति । तन्त्रेणेति । युगपदर्थद्वयविवक्षयेत्यर्थः । उभयस्य चेह सम्भवादिति । लक्षणप्रश्नस्य सम्भावनाक्षेपस्य च स † म्भवादित्यर्थः । उभय-मेव विवक्षितं चेत्सम्भावनैव प्रथमं किन्न प्रदर्श्यत इत्यत्राह तत्रापीति । × स्वरूपमाख्यायेति प्राथम्ये हेतुः ।

नन्वाहेति परोक्तिकथनं किमर्थमिति । अर्थनिर्णयप्रधानत्वाद्वादकथा-शास्त्रम् तत्र प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वाद इति । वादिप्रतिवादिभ्यां गुरुशिष्याभ्यां वा पक्ष-प्रतिपक्षपरिग्रहेण क्रियमाणार्थनिर्णयावसाना वादकथाच प्रवृत्तेति दर्शयितुं परोक्तिकथनमित्याह तत्रैवम्भूते विषय इत्यादिना । तेनाक्षिप्तमाक्षेपरूप-मप्यभिप्रायमनेन पृष्टमेवेति मत्वा प्रत्युक्तं पुनरसावाक्षेपरूपेण विवृणोती-त्याक्षेपमवतार्येति व्याख्येयम् । ननु शास्त्रेषु जल्पवितण्डाभिप्रायेणापि परोक्तिरस्तीति नेत्याह सर्वत्रैवंविध इति ।

ननु लक्षणवाक्ये लक्ष्याभिधायिनः पदस्याभावात्साकाङ्क्षं वचनमन-र्थकमित्याशङ्क्य वाक्यं पूरयति प्रश्नवाक्यस्थितमिति । ननु परस्य परात्मना ऽवभासोध्यास इति वक्ष्यति तत्र कथमेकेनैव परशब्देन लक्षणं पूर्यत इत्य-त्राह तत्र परचेत्युक्त इति । उत्तरो ग्रन्थः स्पष्टार्थः । ननु घञादीनां भावे
, २६ विधानात्कथं कर्मपरतया स्मृतिशब्दो व्युत्पाद्यत इति ‡ तत्राह असंज्ञायाम-

* संभवशब्दो नास्ति ३ पु० । † सम्भावादिति ९ पु० ।

‡ तत्राह सञ्ज्ञायामपीति । कर्तृव्यतिरिक्तकारकेषु संज्ञायामपि प्रयोगो भवतीति ९ पु० ग्रोधनेन पश्चात्कल्पितम् ।

पीति । कर्तृव्यतिरिक्तकारकेषु * संज्ञायामिवाऽसञ्ज्ञायामपि प्रयोगो भवत्यकर्तरि च कारके संज्ञायामितिसूचादित्यर्थः ।

ननु स्मर्यते चेद्रूपशब्दः किं † मर्थमस्मर्यमाणे वस्तुन्युपमासमासार्थ इत्याह स्मर्यमाणरूपमिवेति । ननु किमुपमासमासेन स्मर्यत एवेदं रजतमिति नेत्याह न पुनः स्मर्यत एवेति । ननु चक्षुरादिप्रमाणाभावात्परिशेषात्स्मृतिरिति नेत्याह स्पष्टं पुरोवस्थितत्वावभासनादिति । यथान्यत्रेदं रजतमऽयं घट इत्यादाविनरेतरसंसृष्टौ सामान्यविशेषावपरोक्षावबभासेते तथेहापि प्रतिभासः । नहि परमार्थेदंरजतसंवेदनाकारावभासन्यूनतामन्तरेण संसर्गसंविदंशाभावः शक्यते वक्तुम् ।

अर्थाभावे कथमपरोक्षा संविदिति चेत् न । यथासंविदवभासाधीनत्वादर्थसत्तानिश्चयस्य । नह्यर्थसत्तानिश्चयाधीनः संवित्सत्तानिश्चयः अर्थसत्तानिश्चयस्यापि निश्चयान्तराधीनत्वप्रसङ्गात् । ननु नेदं रजतमित्युत्तरसंवेदनादर्थाभावोपि निश्चितः । न । तत्रापि पूर्वसंवेदनेन सद्भावविषयेण विरोधात् । इदंरजताभावसंवेदनानामविवेककल्पनयोत्तरज्ञानेपिसंसर्ग ‡ संविदभावः किं न स्यात् व्यवहारसंवादज्ञानादुत्तरज्ञाने संसर्गसंवित्सद्भावश्चेत् न अर्थक्रियासंवादज्ञानादर्थसंवित्सद्भावनिश्चय इति वदतः संवित्प्रत्यक्षत्ववादहानात् । अर्थक्रियासंविदोपि संविदन्तराधीनसद्भावनिश्चयप्रसङ्गात् §

ननु सम्प्रतिपन्नोर्थाभावः । न । यथाप्रतिभासमेव मिथ्यारजतस्योत्तरज्ञानेन निरसनयोग्यस्योपगमात् लौकिकपरमार्थदृष्टरजतप्रतियोगिकाभावविषयत्वाद्रजते चैकाल्याभावज्ञानस्येति संविद्द्वयानुरोधेन व्यवस्थासिद्धेरन्यतरसंविदपह्नवायोगात् तथाचोभयसंविद्विषयानुभवो नास्त्यच रजतं मिथ्यैव रजतमभादिति । नन्वपरोक्षशुक्तिकाज्ञानाविवेकाद्रजतमपरोक्षतया प्रतिभासत इति नेत्याह स्पष्टमिति । केयं स्पष्टता नाम । विवेकज्ञानसमयेप्येतावन्तं कालमिदं रजतमिति अभादिति संसृष्टावभासत्वेन प्रत्यभिज्ञायोग्यता । अन्यथा तद्रजतमेतावन्तं कालमितो ऽविविक्तमिति प्रतीयात् अथ वा तज्ज्ञानात्तच प्रवृत्ति-

* सञ्ज्ञायामिवासञ्ज्ञायामपीति ३ पुस्तके शोधनेन कृतम् ।
† किमर्थ इत्यस्मर्यमाणे-इति २ पु· ।
‡ सम्वेदनाभाव इति २ पु· । § त्वप्रत्ययोनास्ति २ पु· ।

रिति पदार्थांशज्ञानतत्प्रवृत्त्योर्नियमात् इहापिसंसर्गप्रवृत्तिनिमित्ततासंसर्गज्ञानस्य स्पष्टतेति पूर्वदृष्टावभास इति स्पष्टार्थः ।

यदा ज्ञानविशिष्टार्थ एवाध्यासस्तदा स्मर्यमाणसदृशोन्यात्मनावभास्यमानो ऽन्यो ऽर्थो ऽध्यास इत्येवंलक्षणपरतया वाक्यं योजितम् । यदा पुनरर्थविशिष्टं ज्ञानमेवाध्यासः तदा स्मृतिसमानोन्यस्यान्यात्मनावभासोध्यास इत्येवंलक्षणपरतयापि तदेव वाक्यं योजयितुं शक्यत इत्याह यतोर्थादिति । अर्थाद्वाक्यसामर्थ्यादित्यर्थः । कथमित्यादिः स्पष्टार्थः । ननु न स्मृतिश्चेद् भ्रान्तिः प्रत्यक्षज्ञानवत् न पूर्वानुभवजन्यत्वमित्याशङ्क्य सम्प्रयोगमात्रजन्यज्ञानादन्येषां सर्वेषामविशिष्टं पूर्वप्रमाणजन्यत्वमन्वयव्यतिरेकसामर्थ्यादित्याह नह्यसम्प्रयुक्तावभासिन इति ।

ननु संस्कारजन्यत्वमुपगतं चेदन्यसम्प्रयुक्ते चक्षुषि यदनन्तरमन्यविषयं ज्ञानमुत्पद्यते सा स्मृतिरेव तद्व्यवधानेन तु यज्ज्ञानमुत्पद्यते तदनुमानादि प्रमाणमिति प्रमाणस्मृतिद्वैराश्यमेव विज्ञानस्य न तृतीयं मिथ्याज्ञानं नामास्तीति अख्यातिवादी प्रत्यवतिष्ठत * इत्याह † अपर आहेत्यादिना । ननु स्मृतिश्चेद्भवादिस्मृतिवत्स्वार्थं गृह्यमाणाद्विविच्य स्मरामीति दर्शयेदित्यत आह प्रमोषादिति । ननु शुक्तिकासम्प्रयोगे सादृश्यद्रजतं किमिति स्मर्यते सादृश्यादिति-चेत् अतिसादृश्याच्छुक्तिकान्तरमेव स्मर्यतामिति नेत्याह इन्द्रियादीनामिति । ननु मा भूत् स्मृतेः प्रमोषात्स्वार्थविवेकता ग्रहणं तु स्वार्थं स्मर्यमाणाद्विवेचयेदिति नेत्याह सम्प्रयुक्तस्य चेति । ननु स्मृतिग्रहणयोर्यौगपद्याभावात्क्रमवर्त्तित्वे पूर्वज्ञानं व्यवधानान्न प्रवृत्तिहेतुः । नच सामान्यमात्रज्ञानाद्विशेषमात्रज्ञानाद्वा प्रवृत्तिरित्यत आह तेन दर्शनस्मरणयोर्निरन्तरोत्पन्नयोरिति । निरन्तरोत्पत्तिरेव प्रवृत्तिहेतुरित्यर्थः । नन्विदं रजतमित्यभादिति संसर्गप्रत्ययः प्रत्यभिज्ञायत इति नेत्याह अनुत्पन्न एवैकत्वावभास इति ।

जन्मान्तरानुभूतं न स्मर्यत इतिभाष्यवचनादस्मर्यमाणत्वाच्च बालस्य तिक्तस्मृतिः कथमिति चोदयति नन्वनास्वादिततिक्तरसस्येति । ‡ जन्मान्त-

* इत्याहेत्येतावन्मात्रं नास्ति २,३ पु० । † अपरमाहेत्यादिनेतीति ३ पु० ।
‡ जन्मान्तरानुभूते-इति २ पु० ।

रानुभूतत्तिक्तस्मृतिः कल्प्यत इत्याह उच्यत इति । जन्मान्तरानुभवस्योपकारितामाह अन्यथा * ननुभूतत्व एवेति । किमिति तर्हि जन्मातरानुभूतं किञ्चिदेव स्मर्यते न सर्वमिति दोषबलादित्याह तस्मात् पित्तमेवेति । किमिति तर्हि दोष एव जन्मान्तरानुभूतं सर्वं न स्मारयतीत्यत आह कार्यगम्यत्वादिति । नन्वतत्त्वे तत्त्वज्ञानमिति शास्त्रकारेणैव दर्शितः संसर्गभ्रम इति नेत्याह अतेनान्यसम्प्रयोग इति । वक्तव्ये च पूर्ववादिनाप्यविवेके संसर्गज्ञानकल्पनागौरवादऽख्यातिरेव युक्तेति भावः ।1

उच्यते । केयमख्यातिरिति । न तावत् ख्यात्यभावमात्रं अनभ्युपगमादतिप्रसङ्गाच्च । अन्यार्थिनोऽन्यच प्रवृत्तिहेतुर्ज्ञानमिति चेत् । यच तर्हि न प्रवृत्तिर्झटिति बाधश्च तच कथं भ्रान्तिः । अथाविविक्तानेकपदार्थज्ञानम् तर्हीदमिति रजतमिति चापुनरुक्तशब्दद्वयस्मृतिहेतुतया विविक्तावभासनान्न तस्य सामान्यविशेषयोरविवेकभ्रमः सम्भवति । नच भेदावमर्शनैकत्वज्ञानमनभ्युपगच्छतः सामान्यविशेषयोरविवेकः सम्भवति विविक्ताकारद्वयावभासनात् । इतरेतराभावभेदद्वित्वादिसङ्ख्याविशिष्टज्ञानं विवेक इति चेत् गामानय दण्डेनेति गोदण्डयोस्तत्कारकत्वयोश्चाविवेकभ्रमः स्यात् । तचाप्यानुषङ्गिकभेदादिज्ञानमस्तीति चेत् इदमिति रजतमिति चेहाप्यपुनरुक्तशब्दानुषक्ताकारद्वयावभासे द्वित्वाद्यवभासो विद्यत एव अन्यथा सामान्याकाराद्विशेषाकारस्य विवेकानवभासादिदमित्येव स्यात् † रजतमित्येव स्यात् नेदं रजतमिति । किञ्च । प्रतीयमानाकारयोर्नाविवेको ऽपुनरुक्तप्रतिभासादप्रतीयमानाकाराविवेको न भ्रमो ऽतिप्रसङ्गात् । तस्मान्नाविवेको भ्रमः ।

किञ्च । खण्डो गौरित्यादिप्रत्ययाश्चाविविक्तानेकपदार्थविषया विभ्रमाः प्रसज्येरन् । नच ग्रहणस्मरणाविवेक एव भ्रमः अहं मनुष्य इति गृह्यमाणाविवेकस्य भ्रमत्वात् । सामान्यविशेषादौ संसर्गज्ञानमेवास्तीति चेत् । तथाप्यविविक्तानेकपदार्थज्ञानाद् भ्रमत्वमपि स्यात् । नच तच संसर्गप्रत्ययोपि ऐक्यस्य तदालम्बनस्याभावात् । गुणगुण्यादिसम्बन्ध एवालम्बनमिति चेत् न । प्रत्यभिज्ञाया ऐक्यालम्बनत्वात् । इहापि सादृश्यसम्बन्ध एवेदं रजत-

* अननुभूतत्वेति-इति २ पु० । † रजतमिति वास्यादिति २, ३ पु० ।

मितिसंसर्गप्रत्ययालम्बनं स्यात् । अस्ति च सामान्यविशेषादीनामिदंरजतयोरिव विवेकप्रत्ययो घटस्य शौक्ल्यमितिविवेकाभ्युपगमात् । किञ्च । ग्रहणमेव स्मर्यमाणात्स्वार्थं किं न विविञ्च्यात् । विशेषदर्शनाभावादिति चेत् । यदि गृहीतमात्रस्य रजताद्वेदोस्ति तदा भेदांशोचितो विशेषो धर्म्याकारः प्रतियोग्याकारो वा नान्य इति गृहीत एव भेदाकारो विविक्तः प्रतीयेत । अथ धर्मिप्रतियोग्याकारे गृहीते ऽपीतरेतरापेक्षया तृतीयमेव ज्ञानं भेदं ग्राहयतीति । तर्हि सर्वपदार्थज्ञानानां भेदग्रहणात्प्रागविवक्तत्वाद् भ्रमत्वप्रसङ्गः । अथ न गृहीतमात्रस्य रजताद्वेदः । तर्ह्यैक्यमेवेति संसर्गज्ञानस्य सालम्बनतासिद्धिः ।

२२ किञ्च । स्मृतिर्वा गवयादिस्मृतिवद्गृह्यमाणात्स्वार्थं किमिति न विविञ्-
२०. च्यात् । स्मरणाभिमानप्रमोषादिति चेत्तत्राह कोयं स्मरणाभिमान इति । न तावत् स्मृतिरेव । तस्याः प्रमोषे ज्ञानस्यैवाभावप्रसङ्गात् । स्मृतेरन्यश्चेत् कथमन्यस्य प्रमोषे परिपूर्णमुत्पन्नं ज्ञानं स्वकार्यमर्थविवेकं न कुर्यात् । न चान्यः स्मरणाभिमानो दृश्यत इति भावः । ननु पूर्वानुभवतद्देशकालानामन्यतमेन स इत्याकारेण वा स्मर्यमाणस्य सम्भेदः स्मरणाभिमान इति नेत्याह न तावज्ज्ञानानुविद्धतया ग्रहणमिति । सोयमिति प्रत्यभिज्ञाभ्रमे हि सर्वेषामेवैषां स इत्याकारस्य पूर्वानुभवदेशकालानां च स्मरामीतिपर्यन्तानां सम्भेदावगमेपि गृह्यमाणेनाविवेकदर्शनादिति भावः । नच पूर्वानुभवसम्भेदः
२१ स्मर्यमाणे सम्भवतीत्याह नह्यतिवृत्तस्येति । अर्थस्मृतिसंस्कारस्य जनकं यत्पूर्वविज्ञानं तत्स्वयंग्राह्यविशेषणतया स्वेनैव न विषयीक्रियते अर्थमात्रविषयत्वात्पूर्वज्ञानस्य । नहि पूर्वज्ञानेनाविषयीकृते विषये तत्संस्कारजन्या स्मृतिः समुत्पद्यते । तस्मादर्थमात्रविषयज्ञानजन्या स्मृतिरर्थमात्रमेव विषयीकरोति न पूर्वज्ञानेनाविषयीकृतं ज्ञानमपि अन्यथा नीलज्ञानात्पीतेपि स्मृतिः स्यात् ।

ननु स्मर्यमाणे पूर्वानुभवसम्भेदः स्वानुभवसिद्धः । सत्यम् । यत्पूर्वानुभवसमयेऽर्थावभासलिङ्गजन्यमर्थज्ञानसद्भावविषयमनुमानज्ञानमुत्पन्नं तदनुमानज्ञानसंस्कार * जनिता स्मृतिः अनुभवसम्भिन्नमर्थं गमयति मूलज्ञानेना-

* जनितस्मृतिरिति ३ पु· ।

प्यर्थज्ञानविषयेण विशिष्टार्थविषयीकरणात् । यस्मादर्थस्मृतिसमनन्तरमनुभव-
विशिष्टार्थस्मृत्यन्तरजननादर्थस्मृतिरेवानुभवसम्भिन्नेति विभ्रमः तस्माच्छुद्धमे-
वार्थमित्युपसंहरति शुद्धमिति । पूर्वज्ञानेन यावन्मात्रं वस्तुमात्रं वा ज्ञानसम्भिन्नं ७
वा व*स्तु विषयीकृतं तावन्मात्रमेवावभासयति न स्वमूलज्ञानसम्भिन्नमि-
त्यर्थः ।]

नन्वर्थस्मृतिर्वा †ज्ञानसम्भिन्नविषयं स्मृत्यन्तरं वेत्यत्र को विवेक
इति तत्रोदाहरणमाह तथाच पदात्पदार्थस्मृताविति । वाक्यार्थप्रत्ययवि- ,,
वक्षया यावदन्त्यपदोच्चारणपरिसमाप्तिस्तावत् क्रमेणोच्चार्यमाणेषु पदेष्वेकैकस्मा-
त्पदादेकैकार्थविषयाणि ज्ञानान्युत्पद्यन्ते ताश्च सम्बन्धिशब्ददर्शनात्सम्बन्ध्य-
न्तरार्थविषयाः स्मृतय इत्यभिहितान्वयवादिनामन्विताभिधान‡वादिनां च २३
संमतम् ।[ननु को ऽसौ §शब्दस्यार्थेन सम्बन्धो यतः शब्दस्य दर्शनादर्थे
स्मृतिरुत्पद्येत । ‖अर्थबुद्धिजननसामर्थ्यलक्षण इति चेत् । किं स्मृतिजन-
नसामर्थ्यलक्षणो ऽन्यो वा । ¶नचान्यः । पदानां पदार्थांशेषु स्मृतिव्यतिरि-
क्तकार्यान्तराभावात् । न च स्मृतिजननसामर्थ्यसम्बन्धादेव स्मृतिजन्म अन्यच
सादृश्यादिसम्बन्धान्तरे सत्यन्यतर*दर्शने ऽन्यतरस्मिन् स्मृतिदर्शनात् ।
तस्मान्न शब्दादर्थे स्मृतिरिति । †उच्यते । सम्बन्धज्ञानसंस्कारः शब्ददर्श-
नं चाच स्मृतिहेतुः नार्थेन सम्बन्धविशिष्टशब्दज्ञानम् येन विशिष्टे स्मृतिसा-
मर्थ्यव्यवस्थापनाद्विशेषणीभूतं सम्बन्धान्तरमिष्येत सम्बन्धविशिष्टान्यतर-
दर्शनाच्चान्यतरस्मृतौ सम्बन्धविशेषणत्वेनान्यतरस्यापि स्मृतिविषयस्य प्रागेव
बुद्धता स्यात् । सादृश्यादिमूलसम्बन्धानां बुद्धिसामर्थ्यलक्षणत्वाभावात् ।
सामर्थ्यसम्बन्धादर्थान्तरत्वं न विरुध्यते । बुद्धिसामर्थ्यसम्बन्धाद् बुद्धि-

* वस्तुमात्रं चेति ३ पु० । † ज्ञानसम्भिन्नविषयेति २ पु० ।
‡ वादिनामपीति ३ पु० । § अर्थेन शब्दस्य सम्बन्धइति ३ पु० ।

‖ अज्ञातसम्बन्धाच्छब्दात्स्मृत्युत्पत्तावव्युत्पन्नस्यापि ततो ऽर्थस्मरणप्रसङ्गः, शक्तिज्ञानं च स्मृतिरूपकार्यज्ञानाधीनमित्यन्योन्याश्रयः—इति भाव० ।

¶ पदस्य स्मारकत्वं भवतां संमतं चेति चशब्दार्थ इति तत्त्व० ।

* तरप्रत्ययो नास्ति ३ पु० ।

† शब्दस्य शक्तिरेवार्थे सम्बन्धः, तस्यां च संगतिग्रहणकाले ज्ञातायां समयान्तरे शब्ददर्श-नात्तस्यार्थे शक्तिरूपसंस्कारोद्बोधे सति ततोर्थे स्मृतिर्भवतीति नोक्तान्योन्याश्रय इति परिहरति उच्यत इत्यादिनेति भाव० ।

नोत्पद्यत इति च स्ववचनविरोधः । तस्मात्पदेभ्यः पदार्थमात्रेषु बुद्धि-
सामर्थ्यसम्बन्धात् स्मृतय इति सिद्धम् ॥ कुतः पुनस्तच्च ज्ञानसम्भेदाभाव
२३ इति तत्राह ज्ञानस्यापीति । शब्दसामर्थ्यविषयतया सम्बन्धित्वेन
स्मृतिविषयत्वे ज्ञानस्यापि शब्दार्थत्वप्रसङ्गादिति । तथेष्टभूभागविषयेत्यादिः
स्पष्टार्थः । ननु स्मृतिज्ञानस्य त्रिकोणत्वादिवत्स्वगतः कश्चिद्विशेषो दृश्यते
१ स स्मरणाभिमान इति नेत्याह नापि स्वगतो ज्ञानस्येति । ननु नित्या-
नुमेयेऽपि * लिङ्गविशेषाद्धेतुविशेषानुमानं युक्तमिति । कोऽसौ लिङ्गविशेषः † ।
न तावद्ग्राह्यविशेष इत्याह नापि ग्राह्यविशेषनिमित्त इति । अस्तु तर्हि फल-
विशेषो लिङ्गविशेष इति नेत्याह नापि फलविशेषनिमित्त इति । ननु स्मरा-
मीत्यनुभवः स्मरणाभिमान इत्यत आह यः पुनः क्वचित्कदाचिदिति ।
यदि स्मृतिस्मार्यस्मर्तृविषयशब्दचयानुषक्तो ऽनुभवविशेषस्तत् स्मरामीति
यदि वा चितयविषयमनुमानज्ञानान्तरमेतत् उभयथापि ग्रहणादिचितयात्
स्मरणादिचितयस्य ‡ प्रागेव भेदावगममन्तरेण ग्रहणादिचितयशब्दव्यतिरिक्त-
स्मरणादिशब्दानुस्मरणं ग्रहणानुमानव्यतिरेकेण स्मरणानुमानं च न सम्भ-
वति विशिष्टाभिधेयावगमनिमित्तत्वाद् विशिष्टशब्दानुस्मरणस्य विशिष्टा-
वगमानुमानस्य चेति प्रागेव स्मरामात्यनुभवाद्ग्रहणस्मरणयोर्भेदो वक्तव्य
इति भावः । ननु स्मृत्यनुभवयोरर्थमात्रविषयत्वे को भेद इत्यत आह ।
24 तस्मादिति । कारणविशेषादेवेत्यर्थः ।

× कथं वा तव स्मृतेर्ज्ञानानुमानस्य चार्थविशिष्टज्ञानविषयत्वे समाने
विभागावगमः । कारणभेदादिति चेदिहापि तत्समानम् । स इत्याकारेण
स्मृतिर्ज्ञानानुमानाद्विद्यत इति चेत्कोयं स इत्याकारः । परोक्षदेशकाल-
विशिष्टतेति चेदनुमानादिष्वपि प्रसङ्गः । पूर्वानुभवसंभिन्नतेति चेत् । ज्ञाना-
नुमाने § पौरुषेयवाक्यजन्यज्ञाने च प्रसङ्गः । तस्मात्संस्कारजन्यत्वं स इत्या-
११ कार इति । अस्तु तर्हीहापि तथाविधैव स्मृतिरिति नेत्याह ॥ नचेहेति ।

* सुरभिधूमविशेषस्याऽगरुजदहनानुमापकत्ववद्ग्राह्यविशेषस्य व्यापकविशेषानुमापकत्व-
मित्यर्थ इति तत्त्व० । † विशेषइतीति ३ पु० ।

‡ प्रागेवेत्यत्र स्मरामीत्यनुभवादितिशेषः–तत्त्व० ।

§ नद्यास्तीरे प्रसूनानि सन्तीत्यादिवाक्याच्चदीतीरप्रसूनविषयज्ञानसत्ता बोध्यते ततश्च
स्वजनकज्ञानसंभिन्नविषयत्वस्य तत्रापि भावाच्च भेद इत्यर्थः–इति तत्त्व० । ॥ न चेतीति २ पु० ।

नच स्वप्ने ऽहं नीलमिति गृह्यमाणाविवेकः । स्मर्यमाणानामऽन्योन्याविवेके परोक्षमेव सर्वमवभासते । अतो न प्रमाणस्मृतिद्वैराश्यमेव * ज्ञानस्य किन्तु तृतीयं भ्रान्तिज्ञानमपीत्युपसंहरति अतो नान्यसंप्रयोग इति । न चेत् स्मृतिः 2 किं तर्हीदं रजतमिति ।

नन्वन्यथाख्यातिरेषा । तथाहि । शुक्तिकासंप्रयोगे दोषो † पहितमिन्द्रियं देशान्तरादिगतं रजतम ‡ भिगृह्णाति । तच्च स्वदेशाद्यवस्थितं दोषो पहितेन्द्रियेण गृह्यमाणं शुक्तिकात्मना गृह्यते । नन्वननुभूतमपि यत्किञ्चिदपि दोषोपहितमिन्द्रियं किमिति न गृह्णाति । सादृश्यादिदोषसामर्थ्यादिति वदामः । तस्माद्ग्रहणात्मकमन्यथाज्ञानमिति ।

उच्यते । केयमन्यथाख्यातिः । अन्याकारं ज्ञानमन्यालम्बनं वा वस्तुनो वस्त्वन्तरात्मनावभासो वा अन्यथा परिणते वस्तुनि ज्ञानं वा । न तावत्प्रथमः कल्प इत्याह नन्वेवं सति वैपरीत्यमिति । कुतो वैपरीत्यमित्यत आह नैतत्संविदनुसारिणामिति । सर्वच यदाकारं संवेदनं तदेवालम्बनमितिनियमे रजताकारसंवेदनविरुद्धं शुक्तिकालम्बनत्वमित्यर्थः । ननु न संविदाकारतालम्बनता सर्वच किन्तु संवित्प्रयुक्तव्यवहारविषयेति चोदयति ननु शुक्तेः स्वरूपेणापीति ।

इदं तावदयुक्तम् । नहि व्याघ्रसर्पादिज्ञानाद्दण्डादिष्वादीयमानेषु व्याघ्रादिज्ञानस्य दण्डाद्यालम्बनम् । नच द्रव्यगुणादिज्ञानप्रयुक्त्या द्रव्यगुणादिष्वादीयमानेषु द्रव्यादीनामन्योन्यज्ञानालम्बनत्वं प्रसिद्धम् । तस्मात् तदाकार एवालम्बनमिति नान्याकारं ज्ञानमन्यालम्बनमन्यथाख्यातिरिति बहिरेवोपसंहर्तव्यम् । अस्तु तर्हि वस्तुनो वस्त्वन्तरात्मनाऽवभास इति तचाहाथ तथारूपावभासनमिति । न तावदत्यन्तभेदवादिनां संसर्गः परमार्थः ततश्चानिर्वचनीयानभ्युपगमाच्छून्य एव संसर्गः प्रकाशेत । एवं खण्डो गौरित्यादिसंसर्गप्रत्ययाः सर्व एव विभ्रमाः प्रसज्येरन्निति बहिरेवैकः पक्षः प्रतिवक्तव्यः ।

* विज्ञानस्येति २ पु· । † उपहतमिति २, ३ पु· ।
‡ अभिस्थाने अपिः २ पु· ।

८ १९ अथ भेदाभेदवादी संसर्गसत्यतां ब्रूयात्तत्राह यदि पारमार्थिकमिति । खण्डो गौरित्यादिवत्सर्वस्य भेदाभेदान्न क्वचिदपि भ्रान्तिबाधौ सर्वत्र वा तौ स्यातामित्यर्थः । अस्तु तर्ह्यन्यथापरिणते वस्तुनि ख्यातिरन्यथाख्यातिरिति तत्राह अथ शुक्तेरेवेति । शुक्तेः परिणामनिराकरणग्रन्थः स्पष्टार्थः ।

अथ पुनर्दुष्टकारणजन्यायाः प्रतीतेरित्यादिना ऽन्यथाख्यातावेव परिणामप्रकारभेदो निराक्रियते ख्यात्यन्तरानिराकरणं वा । कथम् । अत्राहात्मख्यातिवादी बुद्धेरेव रजताकारो न बहिरिति । कुतः । संप्रयोगव्यतिरेकेणापरोक्षत्वाद् बुद्धिवत् । कथम् । विज्ञानस्य रजताकारः प्राप्तः । संस्कारसामर्थ्यादिति वदामः । तथाहि । यस्यां ज्ञानसन्ततौ यदा कदाचित्पूर्वं रजतज्ञानमुत्पन्नं तदेव संस्कार उच्यते । नच विज्ञानजन्यो ऽन्येषामिव स्थायी क्षणिको वा ऽन्यः कश्चिदस्य संस्कारो विद्यते विज्ञानमात्रवादात् । स चानेकज्ञानव्यवहितोपि कदाचित्सजातीयं रजतज्ञानान्तरमुत्पादयति शालिबीजमिवानेकाङ्कुरादिकार्यव्यवधानेन पुनः सजातीयबीजान्तर * निमित्तमिति । अथवा तज्जन्यज्ञानसन्तान एव संस्कारः स च तथाविधज्ञानान्तरादित्यनादिवासनाप्रापितं रजतं बुद्ध्याकारो बहिर्वदवभासत इति ।

† स वक्तव्यः किं तद्रजतं जायते न वेति । ‡ नचेज्जायमानस्वरूपं न स्यादाकाशवत् । जायते चेत् नार्थादर्थान्तराभावात् । अथ ज्ञानादेव दुष्टकारणजन्याद्रजतोत्पाद इति । तदाह अथ पुनर्दुष्टकारणजन्यायाः प्रतीतेरेव रजतोत्पाद इतीति । जनकप्रतीते रजतात्पूर्वकालत्वादतद्विषयत्वात्प्रतीत्यन्तरस्यादुष्टकारणस्य तद्विषयत्वे सर्वप्रतीतिविषयत्वप्रसङ्गात् । दुष्टकारणप्रतीतेश्च रजतजन्यतया तदालम्बनत्वे रजतस्यार्थक्रियावत्तया सत्त्वप्रसङ्गात् । अतज्जन्यत्वे तद्विषयत्वाभावादप्रतीतमेव रजतं स्यादिति भावः । अन्यथाख्यातिं निराकृत्या ऽख्यातिवादी स्वपक्षमुपसंहरति तदेवं पारिशेष्यादिति ।

९ अख्यातिदूषणमप्युक्तमनुस्मारयति ननु स्मृतेरिति ।

२१ ननु न स्मृतिर्नोपि ग्रहणं चेदऽलौकिकमिदं ज्ञानं कथमिति चोदयति

* बीजान्तरमित्यथवेति २, ३ पु० ।

† स च वक्तव्यइति ३ पु० ।

‡ नचेज्जायते जायमानज्ञानस्वरूपमिति २ पु०, नचेज्जायमानज्ञानेति ३ पु० ।

* का तर्हि गतिरिति । † किं ‡ सामग्र्यं पृच्छसि किं वा ज्ञानमथ विषयमिति । ६ १०
यदि सामग्र्यं तदाह नेन्द्रियज्ञानादित्यादिना । नन्विन्द्रियसंस्कारौ चेत्सामग्री सम्यक्ज्ञानमेवेदं स्यात् स्मृतिग्रहणवदिति चोदयति कथमेतदिति । दोषसहकृतत्वात् तृतीयमिदं सामग्र्यमित्याह । उच्यते कारणदोष इति । ननु दोषः प्राप्तकार्यस्य प्रतिबन्धको § नाधिक्ये हेतुरिति तदाह कार्यगम्यत्वादिति । नचानादेः कार्यानुदयस्य हेतुर्दोषः । कृत्याभावात् । किन्तु व्याध्यादिवद्विपर्ययकार्यहेतुर्दोष इति । ननु दोषः संस्कारोद्बोधकृच्चेन्न ‖ सामग्र्यामन्तर्भवतीति । न तृतीयमिदं सामग्र्यमिति तदाहातः संस्कारदुष्टकारणसंवलितेति । अथ ज्ञानस्यैक्यं चोद्यते तदाह सा चैकमेव ज्ञानमिति ।

नन्विदमा संप्रयोगादन्तःकरणपरिणामज्ञानमेकमुत्पद्यते न तद्रजतं तत्सर्गं वा विषयीकर्तुमीष्टे । मिथ्यावस्तुनि देशान्तरादिगते वा संप्रयोगानुपपत्तेश्चक्षुरुन्मीलनान्वयव्यतिरेकयोरधिष्ठानज्ञानोपपत्तयादन्यथासिद्धेः । नापि संस्काराद्रजतांशावगमः स्मृत्यनभ्युपगमात् । नापि दोषः स्वयमेव कस्य चिज्ज्ञानस्य हेतुर्दृष्टः ज्ञानकारणानामेव कार्यविशेषनिमित्तत्वात् । अतो न रजततत्सम्भिन्नशुक्तिविषयमेकं ¶ ज्ञानं समस्ति । किं त्वविद्यैव** बाह्यदोषनिमित्तकारणापेक्षया रजताकारेण साक्षिचैतन्यस्य रजतावच्छेदज्ञानाभासाकारेण च परिणममाना स्वकार्येण सह साक्षिचैतन्यस्य विषयभावं प्रतिपद्यत इति ते मतम् । तच्च कथमेकज्ञानत्वमिति तदाह । एकफलमिति । विषयावच्छिन्नं हि फलमवभासते न ज्ञानावच्छिन्नम् । विषयश्च सत्यमिथ्यावस्तुनोरन्योन्यात्मतयैकतामापन्नस्तेनैकविषयावच्छिन्नफलैकत्वोपाधौ सत्यमिथ्याज्ञानद्वयमप्येकमित्युपचर्यत इति भावः । अथ विषयः कथमिति तदाह तस्य चेति । कुतो रजतस्य †† मिथ्यात्वमित्यत आह तेन मिथ्यालम्बन- ,, १

* का पुनर्गतिरिति २ पु· ।

† किं करणव्युत्पत्त्या सामग्री पृच्छ्यते उत भावव्युत्पत्त्या ज्ञानमाहो कर्मव्युत्पत्त्या विषय इति विकल्पार्थः–इति तत्त्व० ।

‡ सामग्रीमिति ३ पु· ।

§ नाधिकहेतुरिति १ पु· । ‖ उद्बोधकृच्चेति ३ पु· ।

¶ दुष्टलोचनपुरोवर्त्तिद्रव्यसंयोगादिदं मात्रविषयं ज्ञानमुत्पद्यते तदा चेदमाकारावच्छिन्नाविद्याद्योभः संजायते सा च चक्षुषा सदृशसंदर्शनरागसमुद्बुद्धसंस्कारसधीचीना रूप्याकारेण परिणमतइत्यर्थ इति तत्त्व० । ** एकज्ञानमिति १ पु· ।

†† मिथ्याज्ञानत्वमिति १ पु· ।

मिति । भावाभावज्ञानयोर्मिथ्यात्वप्रसिद्ध्यभावादिदं ज्ञानसमवायिमिथ्यात्वमनिर्वचनीयार्थतामेव गमयतीत्यर्थः ।]

28 संप्रयुक्तेर्थे संप्रयोगो निरपेक्षो ज्ञानकारणं संस्कारश्च पूर्वानुभूतस्मृतौ निरपेक्षः ततश्च निरपेक्षकारणद्वयजन्यत्वात् * ज्ञानद्वयमेव निरन्तरोत्पन्नमि-
९ १८ त्यख्यातिवादी चोदयति भिन्नजातीयज्ञान इति । ज्ञानभेदे हि निरन्तरोत्पन्नावपि न प्रवृत्तिकार्योदयः सम्भवति तच यथा वर्णज्ञानेषु क्रमवर्तिषु ज्ञानकार्योदयान्यथानुपपत्त्या पूर्वपूर्ववर्णसंस्कारसहितमन्त्यवर्णज्ञानमेव हेतुत्वेन कल्प्यते कारणयौगपद्याय तथा प्रवृत्तिकार्यानुपपत्तिरेव ज्ञानैक्यं कल्पयति किं कारणभेदेनेति परिहरति नैष † दोष इति । ननु कारणभेदात्कार्यभेदोप्यनुमीयत इति नेत्युदाहरणमाह दृश्यते हीति । ननु तचापि कारणभेदात् ज्ञानभेद इति नेत्याह उभयचापीति । ननु लिङ्गदर्शनं व्याप्तिस्मृतिश्च लिङ्गज्ञानकारणं न संस्कार इति नेत्याह । संस्कारानुद्बोध इति । ज्ञानद्वययौगपद्याभावादित्यर्थः । तस्मादित्युपसंहरति ॥ ननु प्रत्यभिज्ञायां संप्रयोगः पूर्वानुभूतस्मृतिश्च कारणं ज्ञानद्वययौगपद्यप्रसङ्गाभावान्न संस्कार इति तचाहा-
१० १ यमेव न्याय इति । ज्ञानाज्ज्ञानोत्तरोत्पत्तौ व्याप्त्याद्यभावात्संस्कार एव कारणमित्यर्थः । ननु प्रमाणान्तरेष्वयं निरपेक्षकारणसमाहारः नाभिज्ञाप्रत्यक्षे अभिज्ञाप्रत्यक्षं ‡ च रजतज्ञानमिति तचाह तथा भिन्नजातीयज्ञानहेतुम्य इति । ननु यच संस्कारः प्रमाणकारणेन संबध्यते तच स्मृतिगर्भप्रमाणज्ञानमेव दृष्टं न तथेदं रजतज्ञानमिति तचाह तच लैङ्गिकज्ञान इत्यादिना ।]

किञ्च । ज्ञानद्वयपक्षेऽख्यातावपरोक्षावभासिनः स्मर्यमाणत्वे सर्वच प्रति-
29 पन्नोपाधौ विषयसत्त्वाभावेन्यथाख्यातौ प्रतिपन्नस्य संसर्गस्य शून्यत्वे पुरोदेशप्रतिपन्नस्य रजतस्य § देशान्तरसत्त्वे चात्मख्यातौ बहिरवभासस्यान्तरत्वे-
,, ४ चानुभवविरोधः स्यान्न तथास्मत्यक्षं इत्याहैवं च सति नानुभवविरोध इति । ननु तवाप्यस्तीति प्रतिपन्नस्यानिर्वचनीयत्वे ऽनुभवविरोधः समानः । तन्न । इदन्तासंसर्गवद्रजतस्य शुक्तिकासत्तासंसर्गायमवभासते न रजतस्यापरसत्त्वम् ।

* ज्ञानद्वयमेतच्चिरन्तरेति २ पु· ।
† नैषेतीति २ पु· ।
‡ चेदं रजतमिति ज्ञानमितीति ३ पु· ।
§ देशान्तरत्वे चेति २ पु· ।

अथवा त्रिविधं सत्त्वं परमार्थसत्त्वं ब्रह्मणः अर्थक्रियासामर्थ्यसत्त्वं मायोपाधिकमाकाशादेः अविद्योपाधिकसत्त्वं रजतादेरिति परमार्थसत्त्वापेक्षया ऽनिर्वचनीयमिति नानुभवविरोधः यथानुभवमर्थसत्त्वाभ्युपगमात् ।

यस्मात् भ्रान्तित्वव्यवहारः सदसज्ज्ञानयोरनुपपन्नो यतश्च पश्चान्तरेष्वनुभवविरोधो यतश्च ज्ञानद्वय * पारेत्यस्मृतित्वस्मरणाभिमानप्रमोषतद्वैत्वविवेकान्यन्निमित्तप्रवृत्तयो जन्मान्तरानुभूतस्मृतिश्चेत्यप्रतिपन्नमपूर्वं बहु † कल्पनीयमख्यातावन्यथाख्यातौ चा ‡ न्यच्च प्रतिपन्नस्यान्यच्च सत्त्वमिन्द्रियस्य च जन्मान्तरानुभूतदेशकालव्यवहितार्थग्राहित्वं दोषस्य च तथाविधादृष्टसामर्थ्यं § संसर्गस्य च शून्यस्य प्रत्यक्षतेति प्रमाणविरुद्धं बहु कल्पनीयं अतः सर्वदोषपरिहाराय यथाप्रतिपन्नस्य मिथ्यात्वं नामैकः स्वभावो नास्ति रजतं मिथ्यैव रजतमभादित्यनुभवसिद्धः समाश्रयणीयो ऽविद्योपादानकल्पनायाश्चान्वयव्यतिरेकसिद्धत्वादित्याहातो मायामयमिति । सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदोवभासमानो मायामिथ्याऽनिर्वचनीयख्यातिरध्यास एवायमित्यर्थः ।

अत्र केचिदाहुः । अतो ऽविद्यामयमिति वक्तव्यं न मायामयमिति । विभ्रमाणां तत्त्वज्ञाननिराकार्यतया ऽविद्यात्मकत्वान्मायाविद्ययोर्भेदात् । तथाहि मायास्वाश्रयमव्यामोहयन्ती कर्तुरिच्छामनुवर्त्तते न तथा ऽविद्या । प्रसिद्धश्च मायाऽविद्ययोर्भेदो लौकिकानां नहि मायाविनिर्मितहस्त्यश्वरथादावविद्याशब्दं प्रयुञ्जत इति ।

उच्यते । लक्षणभेदाल्लोकव्यवहारसामर्थ्याद्वा ‖ तयोर्भेदः कथ्यते । न तावल्लक्षणभेदादनिर्वचनीयतया तत्त्वावभासप्रतिबन्धविपर्ययावभासलक्षणस्याविशेषात् । ननु मन्त्रौषधादिसत्यवस्त्वेव माया नानिर्वचनीया । न । परिदृश्यमानमिथ्यावस्तुन्येव मायाशब्दप्रयोगात् । पार्श्वस्थस्य मन्त्रौषधाद्यपरिज्ञानात्तच्च मायाशब्दप्रयोगाभावाच्च मन्त्रादेश्च काचादिवन्निमित्तकारणत्वादध्यासोपादानाविद्याकृत्रिमवत्कादाचित्कमायोपादानानिर्वचनीयानादिवस्तुकल्पना ¶ । तच्च च

* परोक्षेति ३ पु· ।
† कल्पमिति २ पु· ।
‡ अत्र प्रतिपन्नस्येति २ पु· । अनयोरिति २ पु· ।
§ संसर्गस्य शून्यस्य च प्रत्यक्षतेति १, २ पु·
¶ कल्पनादिति २ पु· ।

*मायां तु प्रकृतिमिति श्रुतौ प्रकृतौ मायाशब्दप्रयोगात् प्रकृतिभूतयोर्मायाविद्ययोस्त† द्विकारयोश्चाध्यासमाययोर्लक्षणभेदादेकत्वमवगम्यते ।

ननु स्वाश्रयव्यामोहाव्यामोहहेतुत्वाभ्यां लक्षणभेदो दर्शितः । यद्याश्रयो द्रष्टा व्यामुह्यत्येव पार्श्वस्थो मायां पश्यन् । अथ कर्त्ता न तस्य मायावित्वाद्व्यामोहाभावः । किन्तु बाधनिश्चयप्रतिकारज्ञानाभ्याम् । अन्यथा पार्श्वस्थवत्कर्त्तापि व्यामुह्येदेव । अथेच्छया कर्तुं शक्यते माया न तथा ऽविद्येति । न तदपि मन्त्रौषधादौ निमित्तकारणे कर्तुः स्वातन्त्र्यान्न मायायां अविद्यायामपि अङ्गुल्यवष्टम्भादिना द्विचद्रकेशोण्डूकादिभ्रमा मन्त्रौषधादिनिषेवणात्स्वप्नभ्रमास्तत्त्वज्ञानेप्यनुवृत्तप्रतिभासाश्च कर्तुरिच्छया निष्पाद्यन्ते ।

नच शास्त्रव्यवहारान्मायाविद्याभेदः । तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरित्यादिश्रुतौ सम्यक्ज्ञाननिवर्त्याविद्यायां मायाशब्दप्रयोगात् । तरत्यविद्यां विततां हृदि यस्मिन् निवेशिते । योगी मायाममेयाय तस्मै विद्यात्मने नम इत्यादिस्मृतौ मायाविद्ययोः सामानाधिकरण्येन तत्त्वज्ञानेन तर्तव्यत्वाभिधानात् । मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वादितिसूत्रे सूचकारेण स्वप्ने मायाशब्दप्रयोगात् । भाष्यकारेण चाविद्या माया ऽविद्यात्मिका मायाशक्तिरिति तत्र तत्र निर्देशात् । टीकाकारेण चाविद्यामायाऽत्वरम् इत्युक्तत्वात् । ब्रह्मसिद्धिकारेण चैवमेवेयमविद्या माया मिथ्याप्रत्यय इत्युक्तत्वात् । तस्माल्लक्षणैक्याद्दृढ्व्यवहारे चैकत्वावगमादेकस्मिन्नपि वस्तुनि विक्षेपप्राधान्येन मायाऽऽच्छादनप्राधान्येनाविद्येति व्यवहारभेदः । इच्छाधीनत्वतद्वैपरीत्येन वा व्यवहारभेद इति युक्तं मायामयमिति ।

अस्तु तर्हि प्रतिपन्नोपाधावेव यथाप्रतिपत्ति परमार्थसत्त्वम् कल्पनागौरवादिदोषपरिहारादिति नेत्याह अथ पुनरिति । ननु ‡ कारणदोषवतामेव तद्दृश्यमिति नेत्याह यतो नहीति । तदभावे न तत्रेति § सर्वत्र परमार्थरजत इत्यर्थः । आत्माश्रयाविद्यात्मकत्वेपि सर्वैरेव गृह्येतेति नेत्याह मायामात्रत्वे इति । प्रसिद्धमायावदिति भावः । इदमाकारावच्छिन्नसाक्षिचैतन्यसमाश्रितस्य

* मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुताविति ३ पु० ।

† तदितिपदं नास्ति २ पु० । ‡ करणेति ३ पु० ।

§ सर्वपरमार्थेति १, २ पु० ।

रजतस्य शुक्तिकासंभेदोप्यविद्यात्मक इति सुखादिवदनन्यवेद्यत्वमिति भावः । ज्ञानस्यैव भ्रान्तित्वप्रसिद्धानुपपत्तिः कल्पनालाघवानुभवाभ्यामनुगृहीता मिथ्यार्थज्ञानतां गमयतीत्युक्तम् इदानीं बाधकप्रत्यक्षं स्वयमेव रजतस्य मिथ्यात्वं प्रतिपादयतीत्याह किञ्च नेदं रजतमिति । १०

ननु प्रतिपन्नोपाधौ रजतादेरभावं बाधो बोधयति न तस्य मिथ्यात्वमिति चोदयति कथमिति । प्रतिपन्नोपाधावभावप्रतियोगित्वमेव मिथ्यात्वं नाम तच्च बाधकज्ञाने रजतं प्रतिपन्नोपाधावभावप्रतियोगितयावभासत इति प्रत्यक्षमित्याह तेन हि तस्येति । बाधकज्ञानसिद्धस्य प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्य मिथ्यात्वस्य पुनः स्वशब्देन परामर्शाच्च बाधविषयो मिथ्यात्वमित्याह नेदं रजतं मिथ्यैवेति । ननु देशकालान्तरबुद्धिषु सत्त्वादपि रजतस्यैवं बाधः संपत्स्यत इति नेत्याह नच तत्केन चिद्रूपेणेति । ,, नेदं रजतं किन्तु तद्रजतं बुद्धिर्वेति स्यात्परामर्शो न मिथ्यैवेति स्मृतिग्रहणाविवेकत्वाद्भवयादाविवेत्यभिप्रायः ।

ननु कोयं बाधो नाम । * अन्यार्थिनो ऽन्यच्च प्रवृत्तिनिरोधः तर्हि यच्च रजतादौ परिव्राजकादेः प्रवृत्तेरेवानुदयः तच्च बाधप्रसिद्धिर्न स्यात् प्रसिद्धश्च तत्रापि बाधः । न प्रवृत्तिविच्छेदो बाधः किन्तु प्रवृत्तियोग्यताविच्छेदश्चेत् न । पुनरपि तत्रैव रजताविवेकादन्यदाप्रवृत्तिदर्शनात् योग्यताऽविच्छेदात् उदकज्ञानाच्च प्रवर्तमानस्य सर्पचोरादिदर्शनेन प्रवृत्तिनिरोधे सर्पादिज्ञानादुदकज्ञानस्य बाधप्रसिद्धिः स्यात् । अविविक्ततया प्रतिपन्नस्य विवेको बाध इति चेत् न । सर्वपदार्थेषु प्रथममविविक्ततया प्रतिपन्नेषु पश्चादितरेतरापेक्षया भेदज्ञानं सर्वत्र बाधः स्यात् । नच पदार्थज्ञानमेव भेदज्ञानम् गृहीतमात्रस्य सति भेदे ऽविवेकाभावप्रसङ्गादित्युक्तम् । अन्यात्मना प्रतिपन्नस्येतरेतराभावप्रतिपत्तिबाध इति चेत् । शुक्लो घट इति प्रतिपद्य घटस्य शौक्ल्यं न द्रव्यं गुण इति ज्ञानं सर्वत्र बाधः स्यात् न तथा प्रसिद्धिरस्ति । समानौ च सर्वत्र भेदाभेदाविति ऐक्यं प्रतिपद्य भेदप्रतिपत्तिः सर्वत्र बाधः स्यात् । न च ज्ञानस्य प्रध्वंसो बाधः स्वयं क्षणिकत्वात् अर्थस्य च संविद्विषयस्यान्यस्य वा ज्ञानेन प्रध्वंसायोगात् बाधस्य च लोकप्रसिद्धत्वात् । तस्मान्न बाधं पश्यामः ।

* यत्रन्येति २ पु· ।

उच्यते । अज्ञानस्य स्वकार्येण वर्त्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बोधः तथाविधानवबोधनिवृत्तौ बाधप्रसिद्धेरिति ॥ स्मृतिरूपशब्देन कारणचितयजन्यत्वमुक्तम् । तच्च कारणचितयजन्यो ऽन्यस्यान्यात्मतावभासो *
१० १३ लक्षणं तदिदं लक्ष्यं न व्याप्नोतीति चोदयति ननु न व्यापकमिति । कथं लक्षणांशस्याभाव इति तत्राह न हि स्वप्नशोकादाविति । संप्रयोगस्य कारणांशस्याधिष्ठानांशस्य † चाऽभावादित्यर्थः । कस्तर्हि स्वप्न इति तदाहात एवेति । तत्र वासनाजन्यस्मृतिमात्रत्वे भ्रान्तिप्रसिद्धिर्गवयादिस्मृतिवन्न स्यादिति परिहरति न तावत्स्मृतित्वमिति । ननु कारणचितयाभावान्न ज्ञानान्तरमपीत्याह ननु स्मृतिरूपत्वमपि नेति ।

कारणचितयजन्यत्वमन्यस्यान्यात्मनावभासं च सम्पादयामीत्याह अत्रोच्यत इति । सम्प्रयोगाभावादपरोक्षावभासित्वाद् ग्रहणस्मृतिमात्रत्वे प्रत्युक्ते तृतीयमिदं विज्ञानं स्वयमेवोक्ताध्यासलक्षणं गमयितुं समर्थमिति वदितुं प्रकारान्तरं पर्युदस्यति उक्तमेतदिति । स्वप्नप्रपञ्चविपरीतप्रमाचादिविज्ञानसाधनस्यान्तःकरणस्य निद्रादिदोषपूर्वानुभवसंस्कारसहितस्य संप्रतिपन्नकारणचितयत्वादुक्तं स्मृतिरूपं भ्रान्तिज्ञानमित्याह तदिह निद्रादिदोषोपप्लुतमिति ।

,, १९ कथं परत्वपरावभास इति तदाह तस्य चेति । निद्रादिदोषसंस्कारोपप्लुतेनान्तःकरणेन मिथ्याध्यासनिमित्तकारणेनावच्छिन्नचैतन्यस्याऽविद्याशक्तिः पुष्कलनिमित्तकारणसंसर्गादध्यासं प्रति पुष्कलकारणता ‡ मापद्यमाना मिथ्यार्थालम्बनाकारेण विवर्त्तत इति चैतन्यमेव स्वाविद्यया विवर्त्तते अतः सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभासलक्षणः परत्वपरावभासो विद्यत इति भावः । तथा जागरणेपि बाह्याधिष्ठानांशसंसृष्टान्तःकरणावच्छिन्नतया बाह्याधिष्ठानसंसृष्टचैत्यन्यस्याविद्याशक्तिर्बाह्याधिष्ठानसंसृष्टरजताद्याकारेण विवर्त्तत इति शुक्तिकाद्यवच्छिन्नं चैतन्यं रजताद्यालम्बनमिति बाह्यालम्बनं रजतादि कथ्यते । सर्वत्र तु चैतन्यमेव साक्षाद्बाह्यावच्छिन्नतया वा विभ्रमालम्बनमिति युक्तः परत्वपरावभास इत्यर्थः ।

* आत्मानावभास इति २ पु· । † तस्थाने वाकारः १ पु· ।
‡ आपद्यमानमिथ्यार्थेति १ पु० ।

आकाशवत्सर्वविषयेोपरक्ततया सर्वचावभासमानमात्मानमनादृत्याह-
मित्येवावच्छिन्नमात्मानमुपादाय चोदयति नन्वेवं सत्यन्तरेवेति । आत्मैवा- १० २०
धिष्ठानं चेदिदं रजतमितिवदहं नीलमित्येव स्वप्नप्रपञ्चो भायादित्यर्थः ।
* निष्कृष्टाहङ्कारं चैतन्यमात्रमात्मानमादाय † चेत्यस्य च चित्सामानाधिकर-
ण्यावभासं सर्वचाङ्गीकृत्य परिहरति को वा ब्रूत इति । पुनरप्यहङ्कारावच्छि-
न्नमात्मनमादाय चोदयति ननु विच्छिन्नदेश इति । इदमिति पृथक्त्वये-
त्यर्थः । पृथक्त्वावभासोऽप्यन्तरेवेत्याह ननु देशोऽपीति । अनवच्छिन्नचैतन्य-
संसृष्टतयैव ‡ भेदावभासोपीति भावः । अहङ्कारावच्छिन्नमादायाहं भेद इत्यपि
प्रतीयादित्याह अयमपीति । निगूढाभिसन्धिरेव पूर्वमुत्तरमुक्त्वेदानीं सर्वतो
§ विप्रसृतचैतन्यं सर्वात्मना प्रकाशमानमात्मानं स्पष्टीकुर्वन्नाह नैष दोषो
जागरणेपीति । प्रातिभासिकभेदमन्तरेण प्रमाणतो न भिद्यत इत्यर्थः । नन्व-
हमवच्छिन्नचैतन्यादन्यान्येव विषयगतचैतन्यानि किं न स्युरित्यत आह
अन्यथा जडस्येति । स्वयं चैतन्यहीना विषया आत्मावगतिप्रकाशेनापि न ११ ३
संसृज्यन्ते चेन्मयावगता इति सम्बन्धावभासो न स्यादित्यर्थः ।

सर्वच चैतन्यावगुण्ठनेपि अहमिदमिति चात्मानात्मानौ विभक्ताविति
प्रतिभासः कथमिति तत्राह यः पुनरिति । ननु चैतन्यमेव सर्वचान्तर्बहिर्भे-
दादिरूपेणावभासते चेत्कथन्तस्याखण्डाद्वितीयतेति । चेत्यभेदोपरागनिमि-
त्तभेदमन्तरेण स्वरूपभेदानवगमादित्याह तस्य च निरंशस्येति । निरंशद्र-
व्यस्याणुत्वमनन्तत्वं वा स्यान्मध्यमपरिणामं चेदं चैतन्यं सर्वचावभासते
नच निरंशं मध्यमपरिमाणमिति । परोपाधिपरिमाणं चैतन्यमित्यर्थः । जाग-
रणेप्येवं किमुक्तव्यं स्वप्नस्य चैतन्याधिष्ठानत्वमित्यर्थः ।

केवलस्य मनसो बहिःप्रत्यक्षसाधनत्वाभावादथवेत्यङ्गीकरणवादः ।
‖ अव्याप्तिः परिहृता इदानीं मिथ्याध्यासभ्रान्त्यविद्याप्रसिद्ध्यभावेप्यन्यस्या-
न्यावभासो विद्यत इतिलक्षणस्यातिव्याप्तिमाह कथं तर्हि नामादिष्विति । ,,

* निष्कृष्टः पृथक्कृतः अहङ्कारो यस्मात्तत्तथोक्तम् इति तत्त्व० ।

† अनवच्छिन्नात्मगततयापि प्रतिभासाभावमाशङ्क्य घटः स्फुरति पटः स्फुरतीति चित्स-
मानाधिकरणतया प्रतीतिरस्तीत्याह चेत्यस्येतीति तत्त्व० ।

‡ भेदावभासोप्यहङ्कारेति १ पु० । § विप्रसृतमिति २, ३ पु० ।

‖ अव्याप्तिं परिहृत्येदानीमिति २ पु० ।

अन्यस्यान्या * त्मताज्ञानम † ध्यासलक्षणमियं त्वन्यस्यान्यत्र मानसी क्रियेत्य-
११ ९ तिव्याप्तिं परिहरति सत्यमत एव चोदनावशादिति । ननु ज्ञानमेव तत्र विधीयत इति नेत्याह नहि ज्ञानमिति । विधिजन्यपुरुषेच्छाप्रयत्ननिरपेक्ष-मेव सर्वत्र ज्ञानस्य पुष्कलकारणम् अनिच्छतोप्यनिष्टज्ञानदर्शनात् अतो विधानान्मानसी क्रियेति भावः ।

ननु स्मृतिज्ञानमित्यारभ्य तं केचिदित्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । नन्वध्यासे वादिविप्रतिपत्तिदर्शनान्नैकरूपेण लक्षणं व्यवस्थापयितुं शक्यत इत्याशङ्क्याधिष्ठानाध्यस्यमानयोः स्वरूपतत्त्वदेशकाल ‡ विशिष्टेष्वेव वादिनां विप्रतिपत्तिरन्यस्यान्यात्मतावभासमात्रे § लक्षणे न विप्रतिपत्तिः । तच्च लक्षणं
* लौकिकसामान्यविशेषादिसंसर्गप्रत्ययानां भ्रमत्वप्राप्तिपरिहाराय । सत्यस्य मिथ्यावस्तुसम्भेदावभास इति बलादापततीत्यङ्गीकृत्य मतान्तराण्युपन्यस्यति
x तं केचिदित्यादिना । प्रथमस्त्वात्मख्यात्यन्यथाख्यातिविशेषयोः द्वितीयस्त्व-ख्यातेः तृतीयस्तु शुक्तेः स्वाभावरजतात्मना ख्यातिरिति शून्यख्यात्यन्य-थाख्यातिविशेषयोरुपन्यासः । कल्पनामित्यस्य व्याख्या अविद्यमानस्यैवावभा-समानतामिति । यल्लक्षणमवादिष्मेति पूर्वलक्षणशब्देन यच्छब्दस्य सम्बन्धः । अख्यातिवादिनापि मानसं संसर्गज्ञानं संसर्गाभिमानो वा वक्तव्य इत्यभि-
१२ ५ प्रायः । ननु स्मृतिरूपतया कारणचित्तयजन्यत्वमुपेक्षितमिति नेत्याह पूर्वः दृष्टत्वेति ।

नन्वविद्यादिदोषपूर्वभ्रमसंस्काराभ्यामेव पदार्थमात्रज्ञानानि जायमा-नानि ‖ विभ्रमाः । न सत्यं वस्तु तत्संप्रयोगादि प्रमाणकारणं ¶ चापेक्षते विभ्रम इति परक्षेतिपदमविवक्षितमिति शून्यवादी मन्यते तत्राह स्मृतिरूपः पूर्वदृष्टावभास इति । न पदार्थमात्रज्ञानं विभ्रमः शून्यज्ञानस्यापि तथात्व-प्रसङ्गात् किन्त्वन्यत्रान्यज्ञानम् ततश्चाविभ्रमेपि पदार्थज्ञाने लक्षणव्याप्तेर्नि-
,, ८ रुपपत्तिकत्वमिति । कथं निरुपपत्तिकोयमित्यादिग्रन्थः स्पष्टार्थः । ननु

* आत्मना ज्ञानमिति २ पु० । † अध्यासस्येति २ पु० ।
‡ विशिष्टेष्वेवेति १ पु० । § लक्षणे इति नास्ति १, ३ पु० ,
‖ विभ्रम इति १, पु० । २ पु० विभ्रमा इति पश्चाच्छोधितम् ।
¶ वापेक्षते इति २ पु० ।

संविद्रजतयोरितरेतराधिष्ठानत्वेन साधिष्ठाने भ्रमे सम्भवति न तृतीयस्य सत्यवस्तुनो ऽधिष्ठानत्वकल्पना युक्तेति चोदयति ननु रजते संविदिति । १२ ११
नन्वध्यस्यमानव्यतिरेकेणाधिष्ठानस्य सिद्धिर्वक्तव्या तचेतरेतराधिष्ठानत्वे सतीतरेतरापेक्षसिद्धित्वादसमञ्जसं स्यादिति तचाह बीजाङ्कुरादिवदिति । न बीजाङ्कुरादिष्वितरेतराश्रयता किन्तु कारणपरम्परया ऽनवस्थेति परिहरति । नैतत्सारमिति । नन्विहापि कारणपरम्परेति नेत्याह * इह पुनर्यस्यामिति । नन्विहापि तर्हि रजते संवित् रजतं पूर्वस्यां संविदि सा च स्वविषये स च † पूर्वसंविदीति परम्परामेव कल्पयामीति चेत् । यदि तावत्पूर्वपूर्वमुत्तरोत्तरस्यान्वितत्वेनाधिष्ठानं स्यात्ततः पूर्वस्य पूर्वस्योत्तरस्मिन्नुत्तरस्मिन्नध्यासे युगपदवस्थानात् क्षणिकत्वहानिः । ननु बीजाङ्कुरादावन्योन्योपादानत्वेपि न युगपदवस्थानं दृश्यत इति तचाह बीजाङ्कुरादिष्वपीति । अभिमतवस्तुसिद्धिः अन्वयिकारणत्वसिद्धिरित्यर्थः । अनन्वितेषु बीजादिष्वन्वयिकारणाकाङ्क्षाया अनिवृत्तत्वादित्यर्थः । अतो ऽन्वयिद्रव्यमेव तचाप्युपादानं बीजादेरन्योन्यनिमित्ततेति भावः । इहापि तर्हि पूर्वस्योत्तरं प्रत्यनन्वितत्वेनैवाध्यासनिमित्तता बीजादिवदिति नेत्याह कुत इदमेवमिति पर्यनुयोगे दृष्टत्वादेवमिति । अयं भावः । बीजाङ्कुरयोः कार्यकारणभावस्य दृष्टत्वाददृष्टेपि तयोरेव कार्यकारणपरम्परा दृष्टपरम्परात्वान्नानवस्थादोषमावहति संविद्रजतयोरधिष्ठानाधिष्ठेयतया निमित्तनैमित्तकभावस्य प्रथममेव कल्प्यत्वात्तयोरेव पूर्वपूर्वनिमित्तनैमित्तिकभावकल्पना त्वन्धपरम्परैव स्यादिति । दृष्टपरम्परामेव दर्शयति दृष्टत्वादेवमिति । तचैव दूरं वेति नानवस्थादोषमतिवर्त्तत इत्यन्धपरम्परामेवेत्यर्थः ।

ह्याकारावभासत्वात्सर्वभ्रमाणां परच परावभास एव भ्रम इत्युक्तं भ्रान्तिज्ञानप्रतिपन्नविषयेर्थे ‡ भ्रान्त्यंशाभावविशिष्टांशान्तरज्ञानस्य बाधकत्वाच्च साधिष्ठानो भ्रम इत्याहापि च न क्वचिदिति । नन्वनुमानाप्तवचनाभ्यां सर्पाभावमात्रमपि कदाचिद्गम्यते न तदभावविशिष्टमंशान्तरमिति तचाह यचाप्य- ,, १९

* इहेति नास्ति २ पु० ।
† पूर्वस्यां संविदीति २ पु० ।
‡ भ्रान्त्यंशान्तराभावेति २ पु० ।

नुमानादिति। तच्च प्यभावविशिष्टं वस्तुमात्रं गृह्यते विशेषाकाङ्क्षादर्शनादिति भावः। ननु प्रधानं नास्तीत्यादौ न तदभावविशिष्टं वस्त्वन्तरं गृह्यते तेषा-
१२ २० मन्यत्रानध्यस्तत्वादिति तत्राह प्रधानादिष्वपीति। अथवा * सर्वभ्रमावभासेषु च साक्षिचैतन्यस्यालम्बनस्य विद्यमानत्वाच्छङ्क्यमाननिरधिष्ठाननिरवधिकभ्रम-बाधेपि साक्ष्येवाधिष्ठानमवधिश्च विद्यत इत्याह अथवा सर्वलोकसाक्षिकमिति।

नन्वर्थबाधया ज्ञानस्यापि बाधात् भ्रमबाधे तदवभासिसाक्षिचैतन्य-मपि बाध्येतेति तत्राह तद्बाधे तदनुषङ्ग एवेति। अधिष्ठानत्वेनापि परिशे-षादिति भावः। अत इत्युपसंहारः। तदेव प्रपञ्चयति तेन तन्मात्रस्येति। साधिष्ठानभ्रमसाधनप्रसङ्गेनाध्यस्तस्यापि शून्यतां निराचष्टे नाप्यध्यस्तमप्य-सदिति। प्रत्यक्षतो रजतमिति विशेषप्रतिभासायोगप्रसङ्गादिति भावः। प्रतिभासमात्रनिराकरणे शून्यं न भासत इतिवाक्यस्याबोधकत्वप्रसङ्गात्।
१३ १ ननु अध्यस्तं सर्वं शून्यमेवेति तेपि मतमिति चोदयति नन्विति। शून्याद्धा-वृत्तिरपि भ्रमस्य कथितैवेत्याह क्व एवमाहेति। सद्धावृत्तिमात्रं भ्रमस्यासत्त्वं नाम न शून्यत्वम् निषेधप्रतियोगित्वादिति भावः। ननु भ्रमस्य स्वकाले ऽनिर्वचनीयत्वेपि बाधादूर्ध्वं शून्यत्वमविशिष्टमिति शङ्कते अथ पुनरिति। सर्ववादिनां सर्वं वस्तु स्वकाले वर्त्तमानमपि विनाशादूर्ध्वं शून्यमेवेति सम्म-ततो न दोष इत्याह काममिति।

ननु भवतु नाम सर्वस्य वस्तुनो विनाशादूर्ध्वं शून्यता न विभ्रम-गृहीतं वस्तु बाधादूर्ध्वं शून्यं भवति किन्तु देशान्तरादिगतमिति चेत् तत्र किं बाधकज्ञानमेव रजतादेर्देशान्तरे सत्त्वं गमयति † किंवेह बाधानुप-पत्तिरिति न तावद्बाधकज्ञानमित्याह तथाच बाधकज्ञानमिति। नेदं रजतं किन्तु देशकालान्तरे बुद्धौ वेत्यनवगमादिति भावः। यावदभिधानसामर्थ्यं हि वाक्यमर्थं प्रतिपादयति देशान्तरवर्त्तित्वं ‡ त्वनभिहितं न वाक्यार्थ इत्यर्थः।

एवं सति प्रतिपन्नस्य वस्तुनो ऽचाभावो ऽन्यच सत्त्वमन्तरेणानुप-
,, ७ पन्न इत्यर्थापत्त्या वाक्यं गमयिष्यतीति नेत्याह नार्थापत्त्येति। अन्यथाख्यातौ

* सर्वधर्मावभासेष्विति २ पु०।
† किंचेहेति २ पु०।
‡ तुशब्दो नास्ति २ पु.।

निषिद्धस्य संसर्गस्यात्मख्यातौ बहिष्ठस्य वान्यच सत्त्वमन्तरेण निषेधदर्शनादख्यातावपि ऋत्विग्विच्छेदे सर्वस्वदानकर्त्तव्यताबुद्धावृत्विग्विच्छेदान्तरनिमित्ता * ऽदक्षिणयागसमाप्तिविज्ञानबाधितायां न सर्वस्वदानकर्त्तव्यता तच्च प्रतिपन्नान्यच सतीति कल्प्यते। प्रवृत्तिरेव तच्च निरुध्यत इति चेन्न। प्रवृत्तिनिरोधो न बाध इत्युक्तत्वात्। यागादिषु च प्रवर्त्तमानस्य राजचोरादिप्रतिबन्धनिश्चयात्प्रवृत्तिनिरोधेपि यागादिबुद्धौ बाधप्रसिद्ध्यभावात्सत्यां चाबाधितकर्त्तव्यताबुद्धौ यदाकदाचित्प्रवृत्तिसिद्धेः ।

किञ्च । लोकेपि प्रतिपन्नोपाधावेव यस्य निषेधस्तस्य निषेधोपाधिसजातीयोपाध्यन्तरे सत्त्वं न कल्प्यत इत्याह इह भग्नघटाभाववदिति । यथा १३ ९
प्रतिपन्नदेशे निषिद्धस्य घटस्य न देशान्तरे सत्त्वमेवं प्रतिपन्नदेशकालवस्तुसर्वोपाधौ निषिद्धस्य न प्रतियोगित्वेनाप्रतिपन्नसर्वोपाधौ सत्त्वसिद्धिरित्यर्थः । ननु कथं सर्वच शून्यस्य प्रतिपत्तिरिति तत्राह तन्मात्रेणापि तत्सिद्धिरिति । अत्रैवानिर्वचनीयमिथ्यावस्तुसद्भावमात्रेणापि तस्याः प्रतीतेः सिद्धिरित्यर्थः ।

ननु तर्हि पूर्वं रजतमभूदिदानीं नेति घटवत्कालभेदेन निषेधः स्यात्। न लौकिकपरमार्थरजतस्यात्रकालत्रयेपि शून्यत्वात्तदपेक्षया निरुपाधिकनिषेधसिद्धेः । निरुपाधिकनिषेधसामर्थ्यात्त्र प्रतिपन्नं मिथ्यारजतमिति बाधानन्तरं परामृश्यते मिथ्यैव रजतमभादिति । अन्यथा कालभेदे सत्यरजतमेव स्यान्नायं सर्प इत्यभावमात्रविषया हि प्रत्यक्षप्रतिपत्तिर्न देशान्तरे सर्पसत्त्वं गमयति किमु वक्तव्यं रज्जुरियमित्यधिष्ठाने पर्यवसिता प्रतीतिर्न्न कल्पयतीति दर्शयति यत्रापि सर्पबाधपूर्वक इति । तदेवमित्यादुपसंहारः । यद्येवं परत्रेत्यादिः स्पष्टार्थः ।

सत्यं विस्पष्टार्थमित्यस्यायमर्थः । स्मृतिरूपशब्देन किं संस्कारज- ,, १६
न्यत्वं पूर्वानुभवसम्भेदो वा स्मृत्या सादृश्यं भ्रान्तेरभिधीयते इति विषये संस्कारजन्यत्वमेवेति स्पष्टीकरणार्थं पूर्वदृष्टस्यावभासो न दर्शनस्येत्युक्तमिति । पूर्वदृष्टसजातीयस्येत्यर्थो निर्वचनीयरजताभ्युपगमाद्भ्रान्तिश्चेत्सत्यस्य वस्तुनो × मिथ्यावस्तुसम्भेदावभासो ऽन्यथातिप्रसङ्गादित्याद्या या युक्तिरभिहिता लोकानु-

* अदक्षिणायागेति १, ३ पु० ।

१३ १६ भवसिद्धत्वादध्यासस्य तथापि युक्त्या न प्रयोजनमित्याह तथाच लोके ऽनुभव इत्यादिना ।

ननु शुक्तिका रजतवदिति च वचनं न भ्रान्त्यपेक्षयोपपद्यते इदं रजतमित्येवावभासनात् । नच बाधापेक्षा तत्र वत्करणाभावादिति चोदयति ननु न शुक्तिकेति । बाधकज्ञानापेक्षया शुक्तिका रजतमवभासत इति लक्षणप्रदर्शनं, बाधकज्ञानविषयतया वा तत्सामर्थ्येन वा सिद्धस्याध्यासस्य मिथ्यात्वस्य लक्ष्यस्य वच्छब्देन अभिधानमिति लक्ष्यलक्षणसङ्गतिरनेन वाक्येन तत्र प्रदर्श्यत इत्याह उच्यते शुक्तिकाग्रहणमिति । ननु मिथ्या रजतमिति विशेषणादन्यत्र सत्यरजतं वक्तव्यमिति नेत्याह मिथ्यात्वमपि रजतस्येति । स्वरूपपरं विशेषणं नान्यव्यावृत्तिपरमित्यर्थः । ननु रजतस्य मिथ्यात्वे तद्धर्मत्वादिदन्तायाऽपि मिथ्यात्वात्सर्वमिथ्यात्वेन निरधिष्ठानताप्रसङ्ग इति नेत्याह तत्रासंप्रयुक्तत्वादिति । कथं तस्यासम्प्रयुक्तस्य रजतस्यापरोक्षतेत्यत आहा-

१४ १ ऽपरोक्षावभासस्त्विति ।

उदाहरणद्वयस्य तात्पर्यमाह तत्र शुक्तिकोदाहरणेनेत्यादिना अस्मदर्थे अहमिति प्रतिभास इत्यर्थः । प्रतिभासता युष्मदर्थत्वाभावेपि चिदवभास्यत्वं नाम युष्मदर्थलक्षणमस्तीत्याह तदवभास्यत्वेनेति अद्वितीयचैतन्यप्रकाशात्मनि द्रष्टर्यहङ्कारादिसङ्घातस्याध्यस्तत्वादध्यस्यमानव्यतिरिक्तमधिष्ठानमध्यासाधिष्ठानयाथात्म्यविषयप्रमाणज्ञानं द्रष्टा चेति चितयमात्मेति वक्तव्यं ततश्चाधिष्ठानगतो दोषो * दृष्टुर्दोषः प्रमाकरणादोषो † वा सर्वं दोषजातमात्मन्येवेति वक्तव्यं तदभावाच्चैतन्यस्याध्यासविषयज्ञानस्याजन्यत्वात्कारणचितयजन्यविज्ञानस्यात्मन्यनात्माध्यासे सम्भवात् अगृहीतविशेषस्य सामान्यग्रहणस्याधिष्ठानत्वनिमित्तस्यात्मन्यसम्भवाच्च परचैत्ययोगान्नाध्यासलक्षणं बहिरुक्तमप्यात्मनि सम्भवतीति चोदयति ननु बहिरर्थ इत्यादिनोच्यत इत्यतः प्राक्तनेन ग्रन्थेन । नन्विहापि बहिरर्थवदगृहीतविशेषत्वमर्थत्वसामान्यादनुमीयतामिति नेत्याह नत्विह कारणान्तरायत्तेति । ननु स्वभावावभासेपि

,, १० संवेदनवदगृहीतविशेषांशोपि स्यादिति नेत्याह निरंशस्येति । मध्यमपरिमाणनिराकरणादणुरनन्तो वात्मा निरंश इति ।

* द्रष्टृदोष इति २ पु० । † करणगतदोषोवेति २ पु० ।

ननु निरंशोप्याकाशादिवन्न कार्त्स्न्येनावभासत इति तत्राह स्वयंज्यो- १४ १०
तिष इति । यावत्सत्त्वमवभासभावादित्यर्थः । कुतः । अचायं पुरुषः स्वयंज्योति-
रात्मैवास्य ज्योतिरित्यादिश्रुतेः । ननु ज्योतिरिति प्रकाशगुणमात्रं नाभिधीयते
आत्मनो गुणत्वप्रसङ्गात् अतः प्रकाशगुणवद् द्रव्यं ज्योतिरिति जन्यज्ञाने-
नापि प्रकाशेनात्मा प्रकाशगुण इति ज्योतिरात्मेति न विरुध्यते । नैतत्सा-
रम् । सर्वभावानामन्यनिमित्तप्रकाशसंसर्गित्वादात्मन्यपि तत्प्रसङ्गनिराकर-
णाय स्वयंज्योतिरितिविशेषणोपपत्तेः आत्मैवास्य ज्योतिरिति चैवकारात् ।
ननु कारकान्तरानपेक्षतया स्वयमेव स्वात्मनि ज्ञानं जनयतीति स्वयमिति
विशेषणं किं न स्यात् । न । ज्योतिष्ट्वस्यैव * विशेष्यत्वात्कारकत्वस्य विशे-
ष्यतया ऽप्रतिभासात् ।

किञ्च । ज्ञानजन्मप्रयुक्तत्वात् कारकापेक्षायास्तदभावे ऽपेक्षैव नास्ती-
ति । ननु ज्ञानप्रयुक्तं जन्मापि विद्यते । न । प्रकाशगुणत्वप्रयुक्तमेव,द्रव्यजन्म
व्यतिरेके ह्यद्रव्योपाधौ जन्माभावस्य प्रदीपादौ दृष्टत्वादचापि ज्योतिःशब्दा-
दात्मनि प्रकाशगुणस्य जन्माभावनिश्चयात् । न चान्तःकरणेपि प्रकाशगुणोदयो
ज्ञानपरिणामः स्वभावत एव प्रकाशगुणवद्द्रव्यस्यान्तःकरणस्यैव विशेषपरि-
णामस्य ज्ञानत्वाभ्युगमात् । नच ज्ञानमपि क्वचिज्जन्मवद्दृष्टम् । दृष्टमन्तःकरण
इति चेन्न ज्ञातुरर्थप्रकाशस्य ज्ञानत्वात्तस्य चात्माश्रयत्वादन्तःकरणपरिणामे
ज्ञानत्वोपचारात् । नच ज्ञानमात्माश्रयं द्रव्यमिति युक्तम् तस्यैव प्रकाशगुण-
त्वेना † ऽऽत्मनो ज्योतिष्ट्वहानात् । जडप्रकाशगुणो न जन्यश्चित्प्रकाशगुणो जन्य
इति चेत् न । प्रकाशत्वप्रयुक्तत्वात्स्वद्रव्योपाधौ जन्माभावस्य दर्पणादौ विद्य-
मानप्रकाशस्यैव तिरोधाननिराकरणं क्रियते प्रदीपादिषु तु द्रव्यमेव जायते
न प्रकाशगुणः । प्रज्ञानघनशब्दाच्च चैतन्यज्योतिरात्मा न जडज्योतिरिति
गम्यते विज्ञानमानन्दं प्रज्ञानमानन्दं ‡ ब्रह्मेत्यादिवचनाच्च ज्ञानमिति ज्ञातृ-
त्वमुच्यते न भावार्थे इति चेन्न । § भावार्थे प्रसिद्धविरोधात् शब्दस्य । किञ्च ।
प्रतिक्षणं प्रकाशगुणकल्पनाद्धरमेकस्यैव गुणस्य स्थायित्वकल्पनम् । आत्मनि
प्रकाशगुणव्यतिरेकाभावाच्च नागन्तुकत्वे प्रमाणमिति ।

* विशेष्यत्वात्तत्र कारकत्वस्येति ३ पु० । † आत्मनः स्वयंज्योतिष्ट्वेति ३ पु० ।
‡ आनन्दमिति पुनर्नास्ति २ पु० । § भावार्थे इति १ पु० ।

१४ १० नन्वाऽऽत्मन्यगृह्यमाणविशेषत्वमनुभवसिद्धमिति चोदयति ननु ब्रह्म स्वरूपमिति । तर्हि शुक्तिकायामिव ब्रह्मण्येवानवभासविपर्ययौ स्यातां न जीव इत्याह न तदनवभासनादिति । ननु कार्यकारणभावहीनयोर्द्रव्ययोः सामानाधिकरण्यमेकद्रव्यनिष्ठं सेयं देवदत्त इतिवदऽतो द्रव्यैकत्वाज् जीवगतावेवानवभासविपर्ययाविति * चोदयति ननु न ब्रह्मणोऽन्य इति। तर्हि ज्ञानप्रकाशविरोधादाश्रयविषयभेदाभावाच्च नाज्ञानता ब्रह्मण इत्याह एवं तर्हीति । तच्चाद्वितीयाधिष्ठानब्रह्मात्मनि प्रमाणस्य चैतन्यस्याविद्याकारणदोषसंसर्गं प्रथमं दर्शयति उच्यते विद्यत एवेति । प्रत्यक्षानुमानार्थापत्ति † प्रदर्शिताऽज्ञानस्य
,, १७ श्रुतितदर्थापत्तिभ्यां प्रदर्शनं क्रियते श्रुतिस्तावदिति। सुषुप्ते मिथ्याज्ञानाभाव.तत्संस्कारस्य ‡ चाऽप्रतिबन्धकत्वात् क्वादाचित्कग्रहणाभावस्य च स्वतःसिद्धग्रहणविरोधित्वाभावात्स्वरूपचैतन्येनैव ब्रह्मस्वरूपावभासे प्राप्ते तदवभासप्रतिबन्धनिमित्तमनृतं दर्शयति अनृतेन हि प्रत्यूढाः त इमे सत्याः कामा अनृतापिधाना इति । ततश्च मिथ्याज्ञानतत्संस्काराग्रहणकर्मभ्यो व्यतिरिक्तमनवभासनिमित्तमनृतं मिथ्यावस्तु सिद्धम् । अनीशया शोचति मुह्यमान इति स्वभावसिद्धेश्वरस्यानीश्वरत्वं तद्भावाप्रतिपत्तिरेव वस्तुनो ऽनपायात्ततश्चेश्वरभावाप्रतिपत्तेः शोकस्य च निमित्तं मोहं दर्शयति । आदिशब्दान्न तं विदाथ य इमा जजानान्यत् § युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्पचासुतृप उक्थशासश्चरन्तीति । नीहारं तमोऽज्ञानमित्यनर्थान्तरम् तेन प्रावृतत्वमेव जीवानां ब्रह्मापरिज्ञाने जल्पत्वाद्यध्यासे च निमित्तं दर्शयति । तथा ऽविद्यायामन्तरे वर्तमाना नान्यच्छ्रेयो ‖ वेदयन्त इति श्रेयोरूपब्रह्मापरिज्ञाने क्रियाकारकाद्यध्यासे च निमित्तभूतामविद्यां दर्शयन्तीत्याद्याः । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्तीत्याद्याः स्मृतयोपि द्रष्टव्याः ।

अर्थापत्तिरपि ब्रह्मज्ञानाद्बन्धनिवृत्तिः श्रूयमाणा ब्रह्मणि प्रागनवबोधोऽध्याससम्बन्धहेतुरस्तीति कल्पयतीति फलश्रुत्यनुपपत्तिरथवा द्रष्टव्य इत्यादिदर्शनविधानानुपपत्तिर्वा प्रागनवगममन्तरेणेति जीवस्य ब्रह्मस्वरूपानवभा-

* नोदयतीति १ पु० । † प्रदर्शितस्याज्ञानस्येति २ पु० ।
‡ वाप्रतिबन्धकत्वादिति १, २ पु० । § युष्माकमनन्तरं बभूवेति ३ पु० ।
‖ वेदयन्ते प्रमूढा इतीति २ पु० उपकल्पितम् ।

सनिमित्तं जीवाश्रयाध्याससम्बन्धहेतुरज्ञानदोषो विद्यत इत्युक्तम् । अत्र च साक्षिवेद्यस्याज्ञानस्य प्रमाणैरभावव्यावृत्तिः प्रदर्श्यत इति न तस्य प्रमाणवेद्यत्वप्रसङ्ग इति । सत्र चोद्यति ननु न जीवो ब्रह्मणो ऽन्य इति । किमत्र जीवब्रह्मणोरेकत्वात्पर्यनुयुज्यते । किमेकत्वादाश्रयविषयभेदानुपपत्तिः किं वा चित्स्वभावस्याविद्याश्रयत्वविरोधो ब्रह्मणो वा सर्वज्ञत्वादिहानिरिति । न तावदज्ञानमाश्रयविषयभेदापेक्षं किन्त्वेकस्मिन्नेव वस्तुन्याश्रयत्वमावरणत्वेति कृत्यद्वयं सम्पादयति स्वाश्रयापवरकप्रदेशे कृत्यद्वयसम्पादितमोवदक्रियात्मकत्वादावरणत्वाच्च । नहि तमो वस्तुद्वयापेक्षमवभासते अज्ञानमिति च द्वयापेक्षज्ञानपर्युदासेनाभिधानात् द्वयसापेक्षवदवभासते । यथास्थितिरगमनशब्देनाभिधीयमाना कस्य किंविषयमगमनमिति कर्म्मसापेक्षवद्भाति तद्वत्तमोवच्च स्वाश्रयावरणमज्ञानं स्वाश्रयैकत्वेन न विरुध्यते । नापि स्वाश्रयचित्प्रकाशेन विरुध्यते ऽज्ञानम् स्वावभासकेन संवेदनेन चित्प्रकाशेनाज्ञानस्याविरुद्धत्वात् । साक्षिचैतन्यस्य चाज्ञानावभासकत्वादतो न चिदाश्रयत्वविरोधः ।

किञ्च । जन्यज्ञानेनात्मन्यवस्थाचये ऽवभासमान एव स्वपरविषयज्ञानाश्रयत्वं * सर्वैरेवोपगन्तव्यमिति नावभासमाने अज्ञानाश्रयत्वविरोधः । नच प्रकाशमात्रमज्ञानविरोधि स्वज्ञाने ऽभावात् । नच स्वयम्प्रकाशमाने ज्ञानसंसर्गविरोधः क्वचिद्दृष्टः विषयाणां परप्रकाश्यानामेव तत्संसर्गविरोधात् । संवेदनस्यात्मस्वरूपत्वादेव तदाश्रयाज्ञानोपगमान्न तदुदाहरणम् । अथ ब्रह्मणः † सर्वज्ञत्वविरोधादैक्ये सति नाज्ञानमुपपद्यत इति न जीवाश्रयत्वोपगमात् । नन्वैक्यमुक्तम् । सत्यम् । सत्यप्यैक्ये प्रतिबिम्बात्मन्यध्यस्तश्यामत्वादेर्बिम्बेऽदर्शनात् अवदातताया श्चाविरोधदर्शनादेवं सर्वज्ञत्वाविद्याश्रयत्वयोः सत्यप्यैक्ये विरोधात् । तस्मान्नैक्यमविद्याश्रयत्वेन विरुध्यते किंत्वविद्यामेवोपपादयतीत्याह बाढमत एवार्थादिति । ऐक्ये स्वयंप्रकाशत्वे सर्वज्ञत्वे च सत्येवानवभासदर्शनादाच्छादिका विद्या कल्प्यते अन्यथा भेदजाड्यकिंविज्ञत्वे ग्रहणाभावमात्रमेव स्यात् ततश्च तमोनृतनीहाराज्ञानावृतत्वादिशब्दा अनवभासाध्यासनिमित्तभावरूपाज्ञानप्रतिपादका बाध्येरन्निति ।

* सर्वैरेवोपमन्तव्यमिति १ पु० । † सर्वज्ञत्वरोधादैक्ये इति १ पु० ।

नन्वेकद्रव्यत्वे सति जीवब्रह्मविभागः किंनिबन्धनो यतः सर्वज्ञत्वाविद्याश्रयत्वे व्यवस्थाप्येते इत्यन्तःकरणावच्छेदात्कश्चिद्भेदं वक्ति अन्यस्त्वतिरेकात् अपरस्तु स्वभावादेवांशांशिभावात् । तत् सर्वं व्यावर्तयति अतो
१५ १ऽनादिसिद्धाविद्यावच्छिन्नेति । आत्मावरणमात्माज्ञानमेव जीवब्रह्मविभागाद्याध्यासोपादानं यतोऽतो जीवावच्छेदनिमित्तमज्ञानमित्यवच्छेदस्यापि प्रातिभासिकाध्यासस्य तदुपादानत्वात् सत्यतोनिरवयवस्य द्वैधीभावायोगात्कर्तृत्वभोक्तृत्वदोषसंयोगानां बीजाङ्कुरवदनादिप्रवाहस्य दर्शितत्वात्तदुपादानमप्यज्ञानमनादीत्याह अनादिसिद्धेति । अनादिजीवविभागाध्यासप्रवाहस्यानाद्यऽविद्यैव कारणं नान्तःकरणादीत्याह अविद्यावच्छिन्नेति ।

नचान्तःकरणमवच्छेदकमर्थतो विदारणाभावादवच्छेदस्य विभ्रममात्रत्वादज्ञानस्यैव तदुपादानत्वादन्तःकरणस्य च सम्यग्ज्ञाननि*रस्यतयाऽविद्याध्यासत्वात् स्वकारणावच्छिन्नस्यैवावच्छेदकत्वसंभवात् । सत्यत्वेपि सादेरनाद्यवच्छेदोपाधित्वाभावात्सुषुप्तादौ चान्तःकरणाभावादनवच्छेदप्रसङ्गात् । तदापि सूक्ष्मावस्थमन्तःकरणमवच्छेदकमिति चेत् । किं तावन्निरवयवत्वापत्तिः सूक्ष्मता सावयवस्यावयवाभावे स्वरूपनाशात् । अथा† वयवापचयमात्रं सूक्ष्मता । न । अवस्थितावयविनो अकार्यत्वप्रसङ्गात् । कारणात्मना स्थितिरिति चेत् । किं कारणमेव ‡ स्थितमित्यर्थः कार्यमपीति वा । पूर्वस्मिन्नन्तःकरणाभावात् । उत्तरस्मिन् स्थित्यवस्थातो न विशेषः । तस्मात्कार्यसंस्कारविशिष्टशक्तिमत्कारणावस्थानमेव सूक्ष्मतापत्तिः अतो नान्तःकरणमवच्छेदकमस्ति । तस्मात् कृत्स्नाविद्यासामर्थ्यादेव जीवब्रह्मविभागसिद्धौ नातिरेककल्पनावकाशः । जीवस्य ब्रह्मणश्चविद्येत्यविद्यापूर्वमेव विभागमपेक्षत इति चेत् । न । कस्य कस्मादतिरेक इत्यतिरेकस्यापि विभागपुरःसरत्वप्रतीतेः । यथा भेदाधीनोपि धर्म्मिप्रतियोगिभावो भेदेनोपरज्यते । कस्य कस्माद्भेद इत्येवमतिरेकाधीनोपि जीवब्रह्मभावस्तस्मिन्नुपरज्यते । जीवाद् ब्रह्मणोतिरेक इति चेदऽविद्यायामपि तुल्यमेतत् निरंशत्वान्नांशांशिभावेन भेदः संभवति । तस्मादऽविद्यैव भेदाध्यासनिमित्तमिति ।

* निरस्यतयेति पाठस्य सर्वत्र सत्वेऽपि निरास्यतयेति तु युक्तं मन्यामहे ।
† अवयवापायमात्रमिति ३, ३ पु० । ‡ अवशब्दोऽधिकः ३ पु० ।

नन्वविद्या किंसंबन्धिनी भेदनिमित्तम् । ननु दर्पणादिद्रव्यं वा किंसंबन्धि बिम्बभेदनिमित्तम् । मुखमात्रसंबन्धीति चेत् इहापि चित्स्वरूपमात्रसंबन्ध्यज्ञानं तच्च जीवब्रह्मव्यवहारभेदं प्रवर्त्तयति । कथं पुनः स्वरूपमात्रसंबन्धिनोऽज्ञानस्य ब्रह्मस्वरूपं परिहृत्य जीवविभागैकपक्षपातिता दर्पणघटादेर्मुखाकाशभेदे हेतुतया मुखादिसंसर्गेणापि बिम्बाकाशौ परिहृत्य प्रतिबिम्बघटाकाशादिपक्षपातित्ववदिति वदामः ।

ननु किमाश्रयेयमविद्या । न तावदन्तःकरणविशिष्टस्वरूपाश्रया प्रमाणाभावात् । नन्वहमज्ञ इति प्रतिभास एव विशिष्टाश्रयत्वे प्रमाणम् नाहमनुभवामीत्यनुभवस्यापि चैतन्यप्रकाशस्य विशिष्टाश्रयत्वप्रसङ्गात् । ननु यथा अयो दहतीति दग्धृत्वायसोरेकाग्निसंबन्धात्परस्परसंबन्धावभासः तथानुभवान्तःकरणयोरेकात्मसंबन्धात्तथावभासो नान्तःकरणस्यानुभवाश्रयत्वादिति चेत् एवमज्ञानान्तःकरणयोरेकात्मसंबन्धादहमज्ञ इत्यवभासो नान्तःकरणस्याज्ञानसंबन्धादिति तुल्यम् । प्रतीतेरन्यथासिद्धौ परस्परसंबन्धकल्पनायोगादात्मनि अविद्यासंबन्धस्य सुषुप्तेपि संप्रतिपन्नत्वाच्च । अथ स्वरूपमात्राश्रयत्वानुपपत्तेर्विशिष्टाश्रयत्वं कल्प्यत इति चेत् । न । विशिष्टेपि स्वरूपसंबन्धस्य विद्यमानत्वाज्जडस्य चाज्ञानाश्रयत्वे भ्रान्तिसम्यग्ज्ञानयोरपि तदाश्रयत्वप्रसङ्गात् । ननु स्वरूपेपि ब्रह्मण्यनुपपत्तिस्तुल्या । सत्यम् । अनुपपन्नद्वयाश्रयत्वकल्पनादूरं संप्रतिपन्नस्वरूपाश्रयत्वोपादानम् मोक्षावस्थासंबन्धिन एव संबन्धाश्रयत्वात् ।

अत्र कश्चिदन्तःकरणस्यैवाज्ञानमिति जल्पति । स वक्तव्यः किं*मात्मा सर्वज्ञः किंचिज्ज्ञो वेति । किंचिज्ज्ञत्वे कदाचित्किंचिन्न जानातीति विषयानवबोधस्त्वयैवात्मनो दर्शितः । अथायंहणमिथ्याज्ञानयोरात्माश्रयत्वेपि भावरूपाज्ञानमन्तःकरणाश्रयमिति । किं तत् । ज्ञानादन्यच्चेदज्ञानम् काचकामलादीनामप्यज्ञानत्वान्न विवादः । अथ ज्ञानविरोधीति । न । भिन्नाश्रययोर्ज्ञानाज्ञानयोरेकविषययोरपि विरोधित्वादर्शनात् । करणाश्रयमज्ञानं कर्त्राश्रयज्ञानेन विरुध्यत इति चेत् । न । प्रमाणाभावात् । पुरुषा-

* किमात्मा सदा सर्वज्ञ इति ? पु० ।

न्तरसुषुप्तौ च तदीयेनान्तःकरणेन लीयमानेन करणभूतेन तन्निमित्तकर्मानुमानेपि तदीयान्तःकरणाज्ञाननिवृत्त्यदर्शनात् भ्रान्तिनिमित्तदोषत्वात्काचादिवत्करणाश्रयमज्ञानमिति चेन्न चक्षुरादावपि प्रसङ्गात् । सादित्वात्तेषामनाद्यज्ञानाश्रयत्वानुपपत्तिरिति चेत् अन्तःकरणेपि तुल्यम् । सत्कार्यवादाश्रयणान्न सादयन्तःकरणमिति चेत् । चक्षुरादावपि तुल्यम् । अतो न तदनाद्यज्ञानाश्रयमिति । अनृतनीहारादिशब्दैश्च प्राग्ज्ञानानामग्रहणवतां चेतनानामेवावृतत्वाभिधानान्नान्तःकरणाश्रयमज्ञानं किंतु चैतन्याश्रय * मित्यलम-
१५ ५ तिविस्तरेण । तदेतदाह अविद्यावच्छिन्नानन्तजीवेति]

न्यायः प्रदर्शितः । श्रुतिस्तु अन्यद् युष्माकमन्तरं बभूव नीहारेण प्रावृता इति व्यवधायकमज्ञानं दर्शयति । विभेदजनके ज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यतीति स्मृतिः । ननु ब्रह्मव्यतिरिक्तमनादिवस्तु नास्तीति तत्राह तथाच स्मृतिरिति । अत इत्युपसंहारः स्पष्टार्थः ।

स्वयंप्रकाशस्याविद्याश्रयत्वमुपपन्नमित्युक्तमिदानीं प्रकाशमानस्याविद्याविषयभावो नोपपद्यत इत्याक्षिपति ननु प्रमाणविरोध इति । ननु त्वदुक्तमर्थं न जानामीति प्रतिभासमानमेवाज्ञानस्य व्यावर्तकमवभासते । ननु तच्च विशेषाकारस्यानवगतस्य व्यावर्तकता । न । अनवभासमानस्य व्यावर्तकतया प्रतिभासानुपपत्तेः । नन्ववभासमानस्यापि तद्व्यावर्तकत्वमनुपपन्नमेव । न । अज्ञानसंबन्धस्य प्रतिभासमाचशरीरत्वादनुपपत्तेरलङ्कारत्वात्प्रतिभासस्तु विद्यत एव तच्च कथं प्रतीयमानस्याविद्याविषयत्वानुपपत्तिरित्याक्षिपति किं तत्प्रमाणमिति । निरंशस्येति परिहारः । संविदभेदो ऽपरोक्षप्रकाशमानता नाम । शरीराद्भेदश्च स्वयंज्योतिषात्मप्रकाशेनाभिन्नस्तत्तन्त्रो वापरोक्ष एव तथापि न प्रकाशत इति † सिद्धान्ती परिहरति ननु भोक्तुरिति । ननु न भोक्तेत्यादिः स्पष्टार्थः ।

पदार्थज्ञानमेव भेदज्ञानमतोहमित्यात्मपदार्थज्ञानमेव भेदेपि प्रत्यक्षमिति मीमांसकमन्यश्चोदयति कथं पुनर्भोक्तेति । संसर्गाध्यासो हि भेदा-
११ १३ नवगमनिमित्तमिति सर्वत्र व्याप्तमिति परिहरति मनुष्योहमितीति । पदार्थ-

* इत्यलमतिप्रसङ्गेनेति ३ पु० । † इति परिहरति सिद्धान्तीति ३ पु० ।

प्रत्यक्षेणैव भेदेपि प्रत्यक्षे सामानाधिकरण्यं गौणावभास इति चोदयित्वा परिहरति ननु गौण इत्यादिना । आह गौणवादी नाऽन्वहमिति यदीति । १५१३।१
ननु प्रत्यक्षावभासं बाधित्वा ऽऽगमानुमानाभ्यामेव व्यतिरेको गृह्यतामिति नेत्याहागमानुमानयोरपीति । ननु मिथ्यात्वात्प्रत्यक्षावभासस्य द्विचन्द्रावभासस्येव ताभ्यामेव बाध इति चोदयति मिथ्यात्वात्तस्येति । यश्चाविचारपुरःसरमेव प्रत्यक्षावभासमप्यनुमानादिना झटिति बाधितमुच्छिन्नव्यहारं भवति तच्च तथा भवतु यच्च पुनर्विचारपदवीमुपारूढयोर्ज्ञानयोर्बलाबलचिन्तया बाधनिश्चयः तच्च नानुमानादिना प्रत्यक्षस्य मिथ्यात्वसिद्धिरिति मत्वाहं कुतस्तर्हीत्यादिना उच्यत इत्यतः प्राक्तनेन ग्रन्थेन । स्पष्टार्थो ग्रन्थः ।

किमर्थतो व्यतिरिक्तात्मविषयोऽहङ्कार उच्यते किं वा प्रतिभासतः । अर्थतश्चेत्तत्राह यद्यपि * देहादिव्यतिरिक्तेति । व्यतिरेकप्रतिभास एव अध्यासविरोधितया सामानाधिकरण्यस्य गौणत्वमावहति नत्वर्थमात्रमिति भावः । ननु सामान्येन गृहीतस्य विशेषाग्रहणादन्यसंसर्गावभासो भवति × आत्मा तु विशेषरूपेण गृहीतः कथं तत्राध्यासः तत्राह † दृश्यते हीति । अथ प्रतिभासत एवाहंप्रत्ययो विविक्तात्मविषय इति शङ्कते अथ पुनरेकान्तत इति । परिहरति ‡ ततस्तद्भाव इति । यौक्तिकज्ञानसहकृतेनाहंप्रत्ययेनात्मनि विविक्ते प्रतिपन्ने पुनः सामानाधिकरण्यं गौणमेव तत्सामान्यात्पूर्वमपि गौणमेवेत्यभिप्रेत्याह जिज्ञासोत्तरकालं तर्हीति । विचारेणापि नाहंप्रत्ययस्य व्यतिरिक्तात्मविषयत्वमापादितं किं तु सर्वदा स्वरूपमात्रविषयोहंप्रत्ययो यौक्तिकज्ञानलब्धस्तु व्यतिरेको ऽतस्तस्याननुसंधाने पूर्ववदध्यास एवेति परिहरति न युक्त इति । तत्रापि नाध्यास इति चोद्यम् अनुभवविरोध इति परिहारः । अकारस्य व्यतिरेकेपि ह्रस्वादेरव्यतिरेकादध्यास इति चोदयति नन्वनुभव इति । अन्यतरव्यतिरेके द्वयोरेकत्वाद्भेदस्येतरेतरव्यतिरेकः सिद्धयतीत्याह तन्नेति । ननु § महदेतदित्यादिचोद्यपरिहारौ स्पष्टौ । ,, ९।१०

* देहव्यतिरिक्त इति १ पु० ।
† दृश्यते चेतीति २ पु० मूलसंमतः ।
‡ ततस्तत्सद्भाव इति ३ पु० मूलसंमतः ।
§ ननु महदेतदिन्द्रजालमितीति ३ पु० ।

किं च विवेकानन्तरमध्यासोहंप्रत्ययमात्रेण विरुध्यत इत्युच्यते किंवा
१६ १२ युक्तिकज्ञानेन । न तावदहंप्रत्ययमात्रेणेत्याह तथाह्ययंप्रत्ययस्येत्यादि *-
ना । ननु पूर्वमात्रविषयेपि युक्तिज्ञानसन्निधानाद्युक्तिरिक्तविषयोहंप्रत्यय इति
नेत्याह अतो युक्त्या विषयविवेचनेपीति । नहि प्रत्यक्षज्ञानं ज्ञानान्तरसन्निधा-
नात्स्वविषयादधिकविषयं भवतीति भावः । विचारजन्यज्ञानस्याननुसंधाना-
दनुसंधानेपि परोक्षत्वान्नापरोक्षाध्यासः प्रागवस्थातो भिद्यत इत्युपसंहरति
अतो न्यायत इति ।

ननु प्रत्यक्षे देहात्मैक्याध्यासे किमैक्यप्रत्ययमपबाध्यव्यतिरेके प्रमा-
णमुक्तमित्युच्यते युक्तिसहितागमानुमानाहंप्रत्ययैर्द्वित्वचन्द्रबाधयैकत्ववद्भ्रान्ति-
रेकः सिध्यतीत्युक्तं भवति तदेवं स्वयंज्योतिष इति दृष्टान्तानुवादेन दार्ष्टा-
न्तिककथनपरो ग्रन्थः स्पष्टार्थः । स्वयंप्रकाशत्वेप्यविद्ययाऽगृह्यमाणविशेष-
त्वादात्मनोधिष्ठानयोग्यत्वकथनेन परत्वपरावभास इति लक्षणांशो दर्शितः ।
कारणचितयेप्यद्वितीयात्मावभासिचैतन्यप्रमाणतद्भ्रान्ताविद्याकारणदोषौ लब्धौ
संस्कारमिदानीं लम्भयत्यनादित्वाच्चेति । नन्वध्यस्यमानाधिष्ठानविषयं का-
रणचितयजन्यमेकमेव ज्ञानं वक्तव्यं तदभावान्नाध्यास इत्याशङ्क्याह पृथग्भो-
क्तृविषयानुभवफलाभावादिति । आत्मचैतन्यमेवात्मानात्मसंभेदावभासिस्व-
रूपेणाजन्यत्वेपि विशिष्टविषयोपरक्ताकारेण जन्यते भ्रान्तित्वाच्च विषयविष-
यिणोरेकस्मिन् प्रत्यये संभेदावभासः संभवतीति कारणचितयजन्यमात्मन्य-
नात्मावभासिज्ञानमध्यासः सिद्ध इति ।

१७ २ कथं पुनरित्यादिभाष्यस्य तात्पर्यमाह कोयमध्यासो नामेति । किं
वृत्तस्येति † पृष्टमेवानेनाऽऽक्षिप्तमपि मयेत्युभयचैवकारापि शब्दौ प्रयोक्तव्यौ ।
अध्यस्यमानेन समानेन्द्रियविज्ञानविषयत्वमेवाधिष्ठानस्य दृष्टम् इह तदभा-
वान्नाध्याससंभव इत्याक्षेपग्रन्थार्थः । तत्रैकस्मिन्विज्ञाने द्वयोः संभिन्नतयाव-
भास एवावभास एवापेक्ष्यते विषयतयावभास इति विशेषणायोगादिति मन्वानः

* ननु महदेतदिन्द्रजालमित्यादिश्चोद्येति २ पु० ।
† इत्यादीति ३ पु० ।
‡ एष्टमेवाक्षिप्तमपीति १ पु० ।

परिहरति न तावदयमेकान्तेनाविषय इति । अस्मत्प्रत्ययशब्देनात्मविषयं ज्ञान- १७
मुक्तमिति मन्वानश्चोदयति ननु विषयिण इति । एकस्यां प्रत्यक्षदर्शनक्रिया-
यामेकस्यैव कर्तृस्थाने तदैव तद्विपरीतकर्मकारकस्थाने चावस्थानमनुपपन्न-
मिति भावः अस्तु तर्ह्यंशाभ्यां तद्भाव इति नेत्याह तत्कथमेकस्येति । तच्च
सर्वतो विप्रसृतस्य सवितृप्रकाशस्याकाशे विशेषाभिव्यक्तिनिमित्तदर्पणादिव-
दात्मचैतन्यस्य सविकल्पकतया स्फुटीकरणव्यवहारनिमित्तं भास्वरद्रव्य-
मात्मन्यध्यस्तमन्तःकरणमस्मत्प्रत्यय इत्याहा * स्मत्प्रत्ययाभिमितोहङ्कार
इति । नन्विदं रजतमितिवदध्यस्तत्वे ऽहमिति द्वैरूप्यावभासो वक्तव्य
इत्यत आह स चेदमनिदमिति । अयो दहतीति दग्धृत्वविशिष्टस्याग्नेरय-
श्च द्वैरूप्यावभासवदहमुपल † मे इत्युपलब्धृत्वविशिष्टस्यात्मनो ऽन्तःकर-
णस्य चास्त्येव द्वैरूप्यावभासो ऽसाधारणक्रियोपरक्तमात्मादिद्रव्यमेव वस्त्व-
न्तरविशिष्टमवभासत इति भावः । दुःखिप्रेमास्पदरूपेण परिणामितदागमा-
पायद्रष्टृरूपेणाहङ्कारविषयादिष्वनुस्यूतचैतन्यरूपेणाहमिति च व्यावृत्तरूपेण च
सर्वलोकसाक्षिकं द्वैरूप्यमित्याह सर्वलोकसाक्षिक इति ।

ननु विषयसंविद आश्रय आत्मा तत्राहं जानामीति संविदाश्रयत्वेना- ,, १
वभासमानोहङ्कारः कथमिदमंशः स्यादिति चोदयति ननु किमत्र वदितव्य-
मिति । नन्वयो दहतीत्यादावयःपिण्डादिवदऽकर्तृत्वेपि दर्शनक्रियाश्रयको-
टिनिक्षिप्ततया ऽहङ्कारस्यावभासः सम्भवतीति पूर्ववादिनं सिद्धान्ती चोद-
यति कथमिति । अयःपिण्डव्यतिरेकेण वह्नेः ‡ र्दहनक्रियाश्रयत्वदर्शनवदह-
ङ्कारव्यतिरेकेणात्मनो ज्ञानक्रियाऽदर्शनादहम एवात्मत्वमित्युत्तरेण ग्रन्थेन
प्रतिपादयति ।

तत्र साङ्ख्यास्त्वचिदात्मन्यन्तःकरणे चिदाकारप्रतिबिम्बावभासः § त-
थाविधबिम्बान्तरपुरःसरः प्रतिबिम्बत्वान्मुखप्रतिबिम्बवदिति बिम्बभूतमा-
त्मानमनुमिमते । नैयायिकवैशेषिकाश्चेच्छादयो गुणाः पृथिव्यादिमहाभूत-
द्रव्यव्यतिरिक्तस्यैव विशेषगुणास्तेष्वदृष्टत्वे सत्येकेन्द्रियग्राह्यतया विशेषगुण-
त्वात् भूतचतुष्टये ऽदृष्टगन्धवद्विक्कालमनसां विशेषगुणहीनत्वात्परिशेषादि-

* अस्मत्प्रत्ययत्वाभिमत इति ३ पु· । † उपलम्भे-इति पु· त्रयेऽपि पाठः ।
‡ दहनादिक्रियेति ३ पु· । § तथाविधबिम्बपुरस्सर इति २ पु· ।

च्छादिगुणवद् द्रव्यमन्यदेवात्मेत्यनुमिमते । तथा संवेदनेषु विषयाकारप्रतिबिम्बावभासः तथाविधबिम्बसन्निधानपुरःसरोऽतस्मिन् तदवभासत्वाद् दर्पणस्फटिकादिगतमुखरक्तत्वादिवदिति नित्यानुमेया विषया इति सौचान्तिकाः कल्पयन्ति । तान्प्रत्याह प्रमातृप्रमेयप्रमितयस्तावदपरोक्षा इति ।

१७ १६ यदि साङ्ख्यादयः प्रत्यक्षसिद्धस्यैवात्मनोऽनुमानानि स्पष्टीकरणार्थानीति मन्येरन् तदा न कश्चिद्विरोधः । यदि नित्यानुमेयमात्मानमिच्छेयुः तदा विषयवदहमित्यपरोक्षावभासविरोधः । सौचान्तिकस्यापि यदि विषयानुमानज्ञाने साक्षाद्विषया एवावभासेरन् प्रत्यक्षेप्यवभासन्तां कस्तत्रापराधः इत्यनुमानज्ञाने विषयस्यैवावभासनादनैकान्तिको हेतुः । न चेदनुमानज्ञानेपि बिम्बभूतविषयावभासः प्रतिज्ञातार्थस्य बिम्बपुरस्त्वस्याप्रतिभासनात् अनुमानानुदय एव स्यात् अपरोक्षव्यवहारयोग्यविषयावभासविरुद्धं चानुमानमिति ।

अत्र विज्ञानवादिनस्तु विज्ञानाभेदनिमित्त एव विषयस्यापरोक्षावभास इत्याहुः । तन्निराकरोति प्रमेयं कर्मत्वेनापरोक्षमिति । इदं पश्यामीत्यनुभवात् । नच विज्ञानाभेदादेषा * परोक्ष्यमवभासते बहिष्ठस्यापि रजतादेरापरोक्ष्यात् । तदपि † विज्ञानमिति चेन्न रजतवद्बाधाभावप्रसङ्गात् । तस्मादव्यवधानेन संविदुपाधिताऽपरोक्षता विषयस्येति ।

तचात्मात्ममनःसंयोगजन्यप्रत्यक्षेणापरोक्ष इति वार्त्तिककारन्यायवैशेषिकानुसारिणः कल्पयन्ति । प्रमितिस्त्वात्मनि संयुक्तसमवायनिमित्तज्ञानान्तराद्परोक्षेति न्यायवैशेषिकौ । प्रमेयगता प्रमितिः संयुक्ततादात्म्याज्ज्ञानान्तरेणापरोक्षेति वार्त्तिककारीयाः । तान्प्रत्याह प्रमातृप्रमितौ पुनरपरोक्ष ‡ एव केवलमिति ।

न तावदात्मविषयं § प्रत्यक्षं ज्ञानान्तरं मनोजन्यमिति प्रमाणमस्ति । सति मनसि आत्मदर्शनादसति सुषुप्ते चादर्शनादन्वयव्यतिरेकौ प्रमाणमिति चेत् न । विषयानुभवेनैवान्यथासिद्धत्वात् ‖ विषयानुभवसम्बन्धादेव विषयवदात्मसिद्धावात्मनि ज्ञानान्तरं परिकल्प्य मनसोन्वयव्यतिरेककल्पनायोगात् तस्माद्विषयत्वमन्तरेणात्माऽपरोक्ष एव ।

* अपरोक्षमिति २ पु० । † विशब्दो नास्ति २ पु० । ‡ अपरोक्ष एवेति १ पु० ।
§ ज्ञानान्तरं प्रत्यक्षमिति ३ पु० । ‖ अन्यथासिद्धित्वादिति १ पु० ।

नच संयुक्तसमवायादात्मनि विषये वानुभवस्य ज्ञानान्तरविषयतया परोक्षता । प्रत्यक्षस्य वर्त्तमानविषयापेक्षत्वेन युगपत्फलद्वयावस्थानप्रसङ्गात् । संयुक्तसम्बन्धादनुभवावभासे तद्गतपरिमाण * रसादीनां तेनैव ज्ञानेनापरोक्षता-प्रसङ्गात् अनुभवस्य च स्वसत्तायां प्रकाशव्यतिरेकादर्शनाच्च † ज्ञानान्तरागम्यता-सिद्धिः । नचात्मव्यापाराद्विषयानुभवजन्म सम्भवति सर्वगतस्य कुठारा-दिवत् परिस्पन्दाभावात् परिणामफलस्य च घटादिवत् क्रियैकाश्रयत्वात्सं-विदाश्रयत्वे विषयस्यैव चेतनत्वप्रसङ्गात् । नच तज्जननव्यापारवत्त्वादात्म-नश्चेतनता मनआदीनामपि प्रसङ्गात् विषयाश्रयत्वे चानुभवस्य मयेदं वि-दितमिति सम्बन्धावभासः स्वात्मनि ज्ञानक्रियानुमानं च न स्यादनुभवस्या-त्मसम्बन्धाभावात् । तस्माद् द्वयोर्नै कर्मतया ऽपरोक्षता ।

ननूभयोः स्वयम्प्रकाशत्वकल्पना न युक्ता अन्यतरस्य स्वयम्प्रकाशत्वे आत्मैव स्वयंप्रकाश इति चेन्नेत्याह प्रमितिरनुभव इति । अथवा । हानोपादा- १७ १
नोपेक्षाः प्रमाणफलमिति केचित्तत्राह प्रमितिरनुभव इति । नहि हानादीनां इतरेतरव्यभिचारिणां मानफलता युक्ता ऽव्यभिचारिण्यनुभवे सतीत्यर्थः ।

ननु संवेदनमेवार्थसारूप्येण प्रमाणं प्रमीयते ऽनेनेति व्युत्पत्तेरर्थोपल-ब्ध्यात्मना तदेव प्रमाणफलमिति सुगतमतानुसारिणस्तद्व्यावर्त्तयति प्रमाणं त्विति । प्रमाणं तु प्रमातृव्यापारश्चतुष्टयसन्निष्कर्ष एवेति ‡ प्राभाकराः । § नन्व-हमिदं जानामीत्यात्मनात्मविषयावनुभवौ भेदेन प्रत्यक्षसिद्धाविति नेत्याह तत्राहमिदं जानामीति ।

ननु यदवभासते तज्ज्ञानकर्मतयैवावभासते इति विषयेषु नियमा-दात्माप्यवभासते चेत्कर्मतयैव ‖ नाश्रयमात्रतयेति चोदयति ननु नायं विष-यानुभवनिमित्त इति । ननु प्रत्यक्षज्ञानस्य विषयजन्यत्वात्कारकतापि विष- ,,
यस्य वक्तव्या तत्र कथमेकस्यां क्रियायामेकस्यैव कर्तृत्वेन विरुद्धरूपद्वया-न्वयः कर्तुश्च गुणभावात्कर्मणश्च प्राधान्यादेकस्य रूपद्वये वैरूप्यप्रसङ्गश्चेति

* रसादीनां च तेनैवेति २ पु. ।

† ज्ञानान्तरागम्यतासिद्धेर्नचात्मव्यापाराद्विषयेऽनुभवफलजन्मेति २ पु. ।

‡ प्रभाकराः—इति ३ पु. । § नन्विदमहं जानामीति ३ पु. ।

‖ नाश्रयतया चोदयतीति १ पु., नाश्रयतयेति चोदयतीति २ पु. ।

२२ तचाह तस्मिंश्च द्रव्यरूपत्वेनेति । तच सामान्यांशस्यात्मानात्मसाधारण्यादात्मत्वायोगात् । विशेषांशस्य निरंशत्वान्न कर्तृकर्मव्यवस्थेति परिहरति * नचैतदुक्तमिति । निरवयवस्य युगपत्कार्यद्वयपरिणामायोगाच्चेत्याह अपरिणामित्वादिति ।

किञ्च । ग्राहकरूपस्यापि विषयतया सिद्धिरस्ति † वा नवा । नचेत्स्वयं-
१ प्रकाशत्वसंविदाश्रयत्वसिद्धेरनभ्युपगमादऽसिद्धिप्रसङ्गः । कर्मतया सिद्धिश्चेत्तचाह प्रमेयस्य चेति । तस्मात्संविद्बलादेव चितयसिद्धौ संविदाश्रयपक्षपातितया ऽहमः सिद्धेर्नेदमंशोहङ्कार इत्युपसंहरति तस्मान्नीलादिज्ञानफलमिति ।

अहङ्कारस्यात्मव्यतिरिक्तत्वं साधयितुमात्मनः स्वयंप्रकाशत्वसाधनाय विकल्पयति तचेदं भवानिति । उत सोपि अनुभवोपीत्यर्थः । तचात्मा
५ चित्स्वभावो ऽनुभवो जड़प्रकाश इति पक्षो नोपपद्यते इत्याह तच न तावदिति । नन्वप्रकाशमानमेव ‡ प्रमाणफलं चक्षुरादिवद्विषयमवभासयेदिति कुतो विश्वस्यानवभासो न विषयप्रकाशजननेन चक्षुषः प्रकाशकत्वात्संविद्वैलक्षण्यात् संवेदनं तु स्वयंप्रकाश एव न प्रकाशान्तरहेतुःअतश्चक्षुरादिवैलक्षण्यात्प्रदीपवदवभासमान एवानुभवोर्थं प्रकाशयति न च प्रदीपालोकस्यार्थानुभवजननेनैव चक्षुरादिवदर्थस्य प्रकाशकता किन्तु पृथगेव । तथाहि । ज्ञानप्रकाश्यत्वादज्ञानविरोधिनो ऽन्यदेवालोकप्रकाश्यत्वं तमोविरोधितया प्रसिद्धम् तदव्यवधानेन आलोकेन क्रियते न तदुभयं करोति चक्षुरज्ञानत्वादनालोकत्वाच्च । तस्मादनुभवः सजातीयप्रकाशान्तरनिरपेक्षः प्रकाशमान एव विषये प्रकाशादिव्यवहारनिमित्तं भवितुमर्हत्यव्यवधानेन विषये प्रकाशादिव्यवहारनिमित्तत्वात्प्रदीपालोकवत् । नच चक्षुषा सजातीयप्रकाशेन प्रदीपस्यालोकेनेव घटस्य प्रकाश्यता स्वयमेव प्रकाशगुणत्वात् । तद्विषयज्ञानप्रकाशं जनयति चक्षुरिति चेत्तथापि विजातीयज्ञानेनैव प्रदीपस्य प्रकाश्यतेति न सजातीयालोकापेक्षा । तस्माद्व्यवहितप्रदीपस्येवानुभवस्याप्यप्रकाशमानत्वे प्रदीपप्रकाश्यस्येव विश्वस्यानवभासप्रसङ्ग इति ।

* नैतदुक्तमिति २ पु० । † वाशब्दो नास्ति २ पु० । ‡ प्रमाणेति नास्ति २ पु०

ननु प्रमातृचैतन्यमेव जडानुभवबलादात्मानं विषयं चावभासयतीति चोदयति मैवम् प्रमाता चेतन इति । तच्च यदि चैतन्यस्य विषयोपराग- १८
हेतुरनुभवः पराभ्युपगतबुद्धिपरिणामवदिष्यते तदुच्यते चिदात्मप्रकाशस्य तु जडानुभवाधीनता ऽनुपपन्नेत्याह तन्न स्वयंप्रकाशचैतन्यस्वभावोपि सन्निति । चेतयतिक्रियापि पूर्वानुभवफलवज्जडरूपानुभवफलं चेतनस्यापि प्रदीपस्थानीयत्वाच्चेतयतिक्रियानवस्थेति * दूषयति किञ्च प्रमाणफलेनेति । उभयचैतन्यस्वभावपक्षे पुरुषद्वयवन्नान्योन्याधीनसिद्धिता नापि संविदात्मसम्बन्धावगम इत्याह द्वितीयेपि कल्प इति ।

ननु चिद्गुणमपि पुरुषान्तरसंवेदनं न पुरुषान्तरस्य स्वयंप्रकाशम् तथात्मा चैतन्यगुणोपि न स्वयं प्रकाशत इति शङ्कते अथ चैतन्यस्वभावत्वेपीति । परिहरति विशेषे हेतुर्वाच्य इति । अनुभवोपि तर्हि न स्वयंप्रकाशः स्यात्पुरुषान्तरसंवेदनवदऽव्यवधानान्नेति चेदात्मन्यपि तत्समानमिति भावः । किञ्चेति स्पष्टार्थः । अस्तु तर्हि जडात्मनः स्वयंप्रकाशानुभवाश्रयतया सिद्धिरिति नेत्याह तृतीयेपीति । अयमर्थः । संवेदनं नाम गुणो द्रव्यं कर्म वा भवति । कर्मत्वे प्रकाशत्वफलत्वयोरनुपपत्तिर्द्रव्यत्वेप्यणुमध्यमानन्तपरिमाणानाम् अणुपरिमाणत्वे विषयेपि तावन्मात्रावभासः स्यान्नहि खद्योतप्रकाशमात्रं † संस्पृष्टस्य घटस्य सर्वात्मनावभासः । महापरिमाणत्वे तदाश्रयतयात्मनोपि सर्वत्रावभासप्रसङ्गः । मध्यमपरिमाणत्वे सावयवत्वेनावयवपरतन्त्रता स्यात् । गुणत्वे सति आत्मैव ‡ प्रकाशगुण इति प्रदीपवदात्मा स्वयंप्रकाशः स्यात् । स च गुणः स्वाश्रयोपाधौ न जायते प्रकाशगुणत्वादात्मन्यव्यभिचारादित्यादिप्रकाशगुणवदित्यात्मैव स्वयंप्रकाश इति तदे- दा
तदाह अनिच्छतोप्यात्मैव चितिप्रकाश इति । ,,

ननु मध्यमपरिमाणमेव स्वावयवाश्रयं फलमस्तु आत्मपरतन्त्रता तु घटस्येव भूतलतन्त्रतेति नेत्याह न तदतिरिक्ततथाविधफलसद्भाव इति । प्रदीपेन प्रकाशितमितिवन्मयावगतमित्यनुभवादात्मैव चित्प्रकाशः । अन्यथा

* दर्शयतीति २, ३ पु· ।
† संस्पृष्टस्येति १ पु·, मात्रसंसृष्टस्येति २ पु· ।
‡ प्रकाशेति नास्ति २ पु· ।

काष्ठेन प्रकाशितमितिवदुपचारप्रसङ्गादिति भावः । प्रमाणान्तरापेक्षया पृच्छति
१७ कथमिति । संवेदनस्य भेदावभासशून्यत्वादनुभवाधीनसिद्धिकस्य * च विषयवदनात्मत्वादेकः स्थाय्यात्मैवानुभव इत्याह प्रमाणजन्यश्चेदनुभव इति । सामान्यविशेषभेदकल्पनागौरवादात्मैक एवानुभव इत्याह सर्वानुभवानुगतं चेति । स्वगतभेदप्रतिभासशून्यतामेव प्रपञ्चयति नच नीलानुभव इति । ननु नीलसंवित्स्थितिकाले पीतसंविदो ऽभावात्स्थितिविनाशौ दृष्टौ धर्मिभेदं कल्पयत इति चोद्यमुद्भाव्य परिहरति ननु विनष्टाविनष्ट इत्यादिना । ननु साधनसन्निधानादुत्तरसंवेदनस्य जातत्वात् संविद्द्वययोगपद्यायोगात् विनष्टापूर्वसंविदिति चेन्नेतरेतराश्रयादित्याह † सा च जन्यत्व इति । सिद्धस्यैव संवेदनस्य विषयोपरागनिमित्तं साधनमितिकल्पनं लघीयः विषयोपरक्तसंविज्जन्मसाधनत्वकल्पनादिति भावः ।

सत्यपि संविदां स्वगतभेदे ऽतिसादृश्यात् ज्वालायामिव परोपाधिमन्तरेण भेदो न विभाव्यत इति सुगताः कल्पयन्ति तान्निराकरोति एतेनातिसादृश्यादिति । किञ्च । ज्ञानान्तरगम्यत्वे भेदस्यातिसादृश्याद्विज्ञेष्वभेदभ्रमजन्म स्यात्स्वयंप्रकाशस्य तु भेदः प्रकाशाभिन्न इति प्रकाशमानतैव युक्तेत्याह नहि ‡ चिदात्मप्रकाशस्येति । नच यथा जीवस्येति स्पष्टार्थः । एकत्वेन पुष्कलप्रकाशस्याप्यविद्याप्रतिबन्धे प्रमाणमुक्तम् इहत्वप्रतिबद्धपुष्कलकारणत्वाद्भेदप्रकाशेन भवितव्यमित्याहाभिहितं तच्चेति । ननु संविदः सादृश्यप्रतिबद्धभेदावभासाः स्थायिप्रकाशबुद्धिवेद्यत्वाज्ज्वालावदित्यनुमातुं शक्यते § तत्राह नहि सामान्यतोदृष्टमिति । पूर्वापरैकरूपानुभवो भेदस्य च प्रकाशेन भवितव्यमित्यनुभवयुक्ती । कथं पुनरात्मचैतन्यस्य नित्यस्य विषयानुभवत्वमिति तदाह तस्माच्चित्स्वभाव एवेति ।

ननु स्वयंप्रकाशमानात्मचैतन्यस्य विषयानुभवत्वेपि विषयानुभवमेव
१९ निमित्तीकृत्याहमितिद्रष्टृपरामर्शादात्मैवाहङ्कारः संवृत्त इति चोदयति बाढमत एवेति । द्रष्टृरूपेण परामर्शस्य विषयानुभवो निमित्तम् । अन्यथा द्रष्टृ-

* चो नास्ति ३ पु· ।
† आश्रयत्वादिति ३ पु· ।
‡ चित्प्रकाशस्येति २, ३ पु· ।
§ इत्यत्राहेति २, ३ पु· ।

दिविभागशून्यश्चिन्मात्रावभासः स्यादिति भावः । मैवम् । सुषुप्तावात्मन्यव- भासमानेप्यहङ्कारस्यानवभासमानत्वादितिव्यतिरेकप्रदर्शनेन परिहरति सत्य- १९ ८
मेवमिति । ननु विषयानुभवनिमित्तो द्रष्टृरूपावभासो ऽहमुल्लेखस्तद्रहिते सुषुप्ते कथमस्य प्रसङ्ग इति चोदयति कथमिति । विषयानुभवनिमित्तो विषयावभासः स्याज्जड़त्वान्न तन्निमित्तचिदात्मपरामर्श इति परिहरति नीलानुषङ्गो यश्चैत- न्यस्येति । ननु सुषुप्ते द्रष्टृरूपाभावे कथमहमिति तद्रूपपरामर्शो नेत्याह तच्च यदि नामेति । द्रष्टृत्वं सप्रतियोगिरूपं स चेदमहमर्थो नात्मैवाहङ्कारः स्यादिति भावः ।

ननु पराग्व्यावृत्तं द्रष्टृरूपं भोक्तृत्वमेव कथं तत्सुषुप्तावनुभूयत इति चोदयति नन्वहमिति । नाहङ्कारस्य त्वया निष्प्रतियोगिकात्ममात्रत्वाभ्युपग- मादिति परिहरति नैतत्सारमिति । ननु स्वरूपमपि विषयानुभावादेवाहमि- ति व्यज्यतां नेत्याह नैतच्छक्यमिति । ततश्च विषयोपरक्तसप्रतियोगिकस्व- भावस्याहङ्कारस्यात्मत्वं सुषुप्तावनुभवविरुद्धमिदमापत्स्यत इत्याह ततश्च विषयोपराग इति । आत्मनस्तु सर्वात्मकत्वान्न पराग्व्यावृत्तताहमुपरागादेव * व्यावृत्त्यवभास इत्यर्थः । भवत्येवेत्यादिः स्पष्टार्थः । यथा पूर्वस्मिन् दिने ऽहमित्यभिमान † एवासमेवमनुभूते स्मृतिनियमाभावेपि स्मर्यमाणात्ममात्रत्वा- दहङ्कारस्य सुषुप्तेपि स्मृतिः स्यादित्यर्थः । अहङ्कारादिप्रतिभासस्य नित्यचै- तन्यरूपस्याविनाशात्तज्जन्यसंस्कारप्रसूता स्मृतिरनुपपन्नेति चोदयति अविना- शिनः संस्काराभावादिति । परिहारो ह्यस्तनोपीति ।

ननु सिद्धान्ते कथमहङ्कारस्मृतिस्तदवभासिसाक्षिचैतन्यस्य नित्य- त्वात् । उच्यते । अहंवृत्त्यवच्छिन्नमेवान्तःकरणं चैतन्यस्य विषयभावमाप- द्यते तद्वृत्तिसंस्कारजन्यस्मरणावच्छिन्नमन्तःकरणं पुनः स्मृत्यनुभवावच्छेदक- ∽
मिति स्मरणोपपत्तिः । ननु सुषुप्ता ‡ वनुभूतसुखस्याप्याश्रयपक्षपातितयाऽह- मुल्लेखादस्त्येव सुषुप्ते ऽहमनुभव इत्याह नन्वस्त्येव सुषुप्ते ऽनुभव इति । ननु ,, २०
सुखमनुभूतं चेत्तस्य विषयजन्यत्वाद्विषयानुभवनिमित्त एव तत्राप्यहमुल्लेखः

* व्यावृत्ततावभास इति २ पु· ।

† अभिमन्यमान एवासमिति २ उपकल्पितमस्ति । ‡ सुषुप्तावननुभूतेति १ पु· ।

२२।२३ स्यात् इति नेत्याह नात्मनो ऽन्यस्येति । सत्यमस्तीत्यादिः स्पष्टार्थः । ननु सुखावमर्शस्य मुख्यसुखालम्बनत्वं परित्यज्य कथं विरोधिदुःखाभावविषयतयोपचारः कल्प्यते शाब्दे हि ज्ञाने लक्षणा स्यात् * प्रत्यक्षस्तु सुखावमर्शो न लक्षणामर्हतीति चोदयति कथमिति । मुख्यसुखाभावाद् दुःखाभावस्य लक्ष्यस्य संप्रतिपन्नत्वादिति परिहरति स्वप्ने तावदित्यादिना ।

ननु परामर्शसामर्थ्यादेव मुख्यमेव सुखं कल्प्यतामिति नेत्याह यदि पुनः सुप्तः सुखमिति विशेषत इति । विषयविशेषोपरक्ततयेवेत्यर्थः । दुःखा-
१ भाव एव परामर्शविषय इत्यत्र लिङ्गमाह व्यपदेशोपीति । ननु सुखानुभवस्यापि लिङ्गमस्ति प्रसन्नेन्द्रियत्वादीति तत्राह यत्पुनः सुप्तोत्थितस्येति । तद-
३ सदिति स्पष्टार्थः । उत्तरौ च चोद्यपरिहारग्रन्थौ स्पष्टार्थौ । तस्मान्न सुषुप्तौ भोक्तृतयाप्यहमुल्लेखेनानुस्मर्यते इति । नन्वनुभूतेपि भोक्तृतयाप्यहमुल्लेखेनानुस्मर्यते इति । नन्वनुभूतेपि न स्मृति † नियमः । सत्यम् । आत्मन्यनुस्मर्यमाणे तावन्मात्रस्याहङ्कारस्याहमित्येव स्मृतिनियमः स्यादित्युक्तम् ।

ननु दुःखाभावो विद्यमानो ऽपि नानुभवितुं शक्यते प्रतियोगिस्मरणाभावात्सम्भवति च ‡ मुख्य एव स्वरूपानन्दानुभवः । ननु § तदपि सुखमविद्यावृतं न प्रकाशमर्हति । न । अनावृतसाक्षिचैतन्यसुखांशस्य प्रकाशोपपत्तेः । जागरणे तर्हि किमिति नावभासते । ‖ भासत एव परमप्रेमास्पदत्वलक्षणं सुखम् तीव्रवायुविक्षिप्त ¶ प्रदीपप्रभावन्मिथ्याज्ञानविक्षिप्ततया न स्पष्टमवभासते सुषुप्तौ तु ** तदभावादधिकं व्यज्यत इति ।

ननु उत्थितस्य दुःखाभावपरामर्शो विद्यते स कथं प्रतियोगिज्ञानाभावादननुभूतः परामृश्यते । उच्यते । अनुभूतमेव सुखमुत्थितस्यानुस्मर्यमाणन्तच्च विरोधिदुःखाभावमर्थापत्त्या गमयति अनुभूतं चेत्सुखं नास्ति दुःखमिति । अतो दुःखाभावो नानुस्मर्यते किंतु प्रमीयत इति एवमुत्थितस्य ज्ञानाभावपरामर्शोपि ज्ञानविरोधिनो ऽज्ञानस्यानुभूततया स्मर्यमाणस्यानुपपत्त्यैव प्रमीयते नानुस्मर्यते ।

* प्रत्यक्षसुखेति ३ पु० ।
† नियमः स्यादित्युक्तम् सत्यमिति ३ पु० ।
‡ मुख्यमेवेति १ पु० ।
§ तदापीति १ पु०, ३ पु० तदापीत्युपकल्पितम् ।
‖ अवभासत एवेति २ पु० ।
¶ प्रदीप्तदीपप्रभावदिति ३ पु० ।
** तुशब्दो नास्ति १ पु० ।

ननु जागरणेप्यनुभूयमानमज्ञानं कथं ज्ञानविरोधि स्यात् । न । अवस्थाविशेषविशिष्टस्याज्ञानस्य सुषुप्ते ऽनुभवात् तस्य च जागरणेपि घटादिज्ञानविरोधितादर्शनात्पटावगमसमये । नन्वस्मर्यमाणत्वादेव ज्ञानानां सुषुप्तौ ज्ञानाभावो * ऽनुमीयते । न । अतिवृत्तज्ञानानामपि सतामस्मर्यमाणत्वात् । प्रातर्गजाभावोपीदानीमनुस्मर्यमाणाद् गजविरोधिपदार्थादर्थापत्त्या प्रमीयते न गजविषयस्मृत्यनुदयमात्राद्व्यभिचारित्वात् । तस्माद्विशिष्टाज्ञानसुखानुभवानुपपत्तिगम्यो ज्ञानाभावदुःखाभावाविति मन्तव्यम् ।

नन्वज्ञानसुखानुभवयोः साक्षिचैतन्यस्य चाविनाशिनः संस्काराभावे कथमुत्थितस्य चयाणामनुस्मरणं स्यात् । उच्यते । अज्ञानगतचैतन्याभासजन्योपाधित्वादज्ञानसुखसाक्षिविकल्पानुभवस्याज्ञानावस्थाभेदेन चैतन्याभासानां भिन्नत्वात् तद्विनाश † संस्कारजस्मरणमज्ञानसुखसाक्षिचैतन्याकारमज्ञानविशिष्टात्माश्रयमेव सम्भाव्यते नान्तःकरणाश्रयमिति सर्वथापि सुषुप्ते ऽज्ञानसुखानुभवसम्भवात् असम्बद्धमिदं टीकाकारेणोक्तमिति । सत्यम् । परमतमाश्रित्येदमुक्तं न स्वमतमिति न दोषः । स्वयंप्रकाशत्वाहङ्कारभेदावुक्तावुपसंहरति तदेवं नायं नीलादिप्रत्ययादिति । अहङ्कारभेदस्याप्युपलक्षणार्थं यस्मादात्मनोहङ्कारो भिद्यते तस्मादागम ‡ मूलभाष्यवचनमुपन्यस्तमित्याह तस्माद् ब्रह्मविदामिति । २०

कश्चासावागमः । स एवाधस्तात्स एवोपरिष्टादिति भूमाख्यब्रह्मणः सर्वात्मकत्वमभिधायायातो ऽहङ्कारादेश इति तस्यापि सर्वात्मक§त्वमुक्त्वा ‖ अथात आत्मादेश इत्यात्मानम् ¶ अहङ्काराद् भेदेन निर्दिशति । ननु जीवब्रह्मणोः सार्वात्म्यव्यपदेशो यद्यैकत्वसिद्ध्यर्थमेवमहङ्कारस्यात्मैकत्वसिद्ध्यर्थो व्यपदेशः स्यात् । तन्न । द्वयोः सार्वात्म्यायोगात् । तच्च युक्तं भेदेन प्रतिपन्नयोर्जीवब्रह्मणोरेकत्वसिद्ध्यर्थस्तदुपदेशः अहङ्कारस्य तु पूर्वमेवात्मैकत्वप्रतिपत्तेः पृथगुपदेशो भेदसिद्ध्यर्थ इति गम्यते । ब्रह्मणः परोक्षस्य प्रत्य-

* अनुमीयतामिति २ पु० । † संस्कारजं स्मरणमिति २ पु० । ‡ मूलं भाष्येति २ पु० ।
§ कशब्दो नास्ति २ पु० । ‖ अथात्मादेश इति ३ पु० । ¶ अहङ्काराभेदेनेति ३ पु० ।

त्वसिद्धये ऽहमात्मत्वमुपदिश्य पुनस्तद्व्युदासेन मुख्यात्मत्वमुपदिशतीत्यर्थः । महाभूतान्यहङ्कार इति च स्मृतिः ।

तर्ह्ययमहङ्कारः किमुपादानः किंनिमित्तः किंस्वरूपः किंप्रमाणकः किङ्कार्यः किमिति सुषुप्ते न भातीति चोदिते सति उच्यत इत्यादिपरिहारः । येयमित्यादुपादानसङ्कीर्त्तनम् । अविद्याकर्मपूर्वप्रज्ञेति भ्रान्तिकर्मपूर्वानुभवसंस्कारा इत्यर्थः । तस्या इति निमित्तकारणनिर्द्देशः । विज्ञानक्रियाशक्तिद्वयाश्रय इति स्वरूपं दर्शयति । * कर्तृत्वभोक्तृत्वेति कार्यप्रदर्शनं कूटस्थचैतन्य इति प्रमाणोपन्यासः । यत्सम्भेदादित्यात्मनि सर्वोऽतदारोपनिमित्तत्वं कार्यान्तरमाह । किमिति तर्हि सुषुप्ते न स्यादित्यत आह स च सुषुप्त इति । अज्ञानकार्यलिङ्गशरीरप्रविलयो हि सुषुप्तिरित्यर्थः । ननु सति प्राणे क्रियात्मनि कथमहङ्कारस्य क्रियाशक्तेः प्रविलयः । उच्यते । नाहङ्कारमात्रत्वं प्राणस्य उच्यते किन्तु प्राणस्य पृथक्सतः पञ्चधा व्यापारहेतोरहङ्कारस्य क्रियाशक्तिरस्तीत्येतावदुच्यते मनोधीनतादर्शनात्प्राणवृत्तेरिति । प्राणलक्षणक्रियाशक्त्यंशं वा विहाय विज्ञानशक्त्यंशस्य लयः कल्प्यताम् सांशत्वादन्तःकरणस्य । स्वप्नादिवद् दृष्टिसृष्टिमाश्रित्य वा सुषुप्तपुरुषदृष्ट्यभिप्रायेण सर्वस्य तच्च लयो दर्शितः सुषुप्तप्राणशरीरादिदर्शनस्य पुरुषान्तरस्य विभ्रमत्वादिति ॥

अत्र सांख्या मन्यन्ते यद्यचेतनं मायाशब्दादिवाच्यम् अन्तःकरणाद्युपादानमिष्टं स्यात् तर्हि तदहङ्कारनिर्भासे साक्षिणि तच्छक्तित्वेन वा तदाश्रयत्वेन वा † तदधिष्ठानत्वेन वानन्तर्भूतमेव प्रधानं स्वतन्त्रमेव धर्मलक्षणावस्थाभेदैस्त्रिधा परिणमत इति । तच्च धर्मपरिणामो नाम महदादिकृत्स्नकार्यरूपेणावस्थानम् । तस्यैव च धर्मस्यातीतानागतवर्त्तमानलक्षणरूपापत्तिर्लक्षणपरिणामः । तथाहि । कार्यमनागतलक्षणापन्नं तत्परित्यज्य वर्त्तमानलक्षणमापद्यते पुनः तत्परित्यज्यातीतलक्षणापन्नं भवति पुनस्तदेव आगामिलक्षणापन्नं भवति । अवस्थापरिणामस्त्वतीतमतीतरमतीततममनागतमनागततरमनागततममिति तत्रैव नूतनचिरन्तनाद्यवस्थापत्तिः अतो न
२ २० † चेतनोपादानेन कृत्यमिति नेत्याह नचैवं मन्तव्यमिति । कुत इति तदाह

* कर्तृत्वभोक्तृत्वैकाधार इति ३ पु. । † तदधिष्ठेयत्वेन वेति ३ पु. ।

तथा सत्यऽपाकृताहङ्कृतिसंसर्ग इति । अहमिति कृतिः करणं यस्मिन्स साच्यहंकृतिः । अयमाशयः । चेतनस्यानात्मसम्भेदावभासो नाख्यातिर्नाप्यन्यथाख्यातिर्नापि चात्मख्यातिरित्युक्तम् इदानीं चेतनस्यैव स्वाविद्याविवर्तमानमिथ्यावस्तुसम्भेदावभासलक्षणानिर्वचनीयख्यात्यनभ्युपगमे चेतनाचेतनयोरत्यन्तविविक्तावभास एव स्यात् न सम्भेदावभास इति ॥

अत्र नैयायिका मन्यन्ते । आत्मेन्द्रियविषयेषु समवहितेषु कदाचिद्विज्ञानोदयसामर्थ्यादात्माश्रयज्ञानादिवृत्तीनां क्रमजनने * करणभूतं किञ्चिन्मनः कल्पितम् । तच्च तदतिरेकेणान्तःकरणं नाम ज्ञानसुखदुःखेच्छाप्रयत्नादिविज्ञानक्रियावृत्त्याश्रयमयः पिण्डवदग्नेरादर्शवन्मुखस्याऽर्कवच्चन्द्रस्यात्मावच्छेदकतया तस्मिन्नऽतदारोपोपाधिभूतं किञ्चिन्न पश्यामः । बुद्धिरिति चेत् न । बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमित्यत्तपादसूत्रवचनात् । जानाति बुद्धिरात्मोपलभत इति चेत् न । प्रतिधात्वर्थे धर्मिभेदप्रसङ्गात् तस्माद्वर्णितमन्तःकरणं नास्तीति । तत्राह स च परिणामविशेष इति ।

अयमाशयः । बुद्धेर्गुणेनात्मगुणेन † चैव आराग्रमात्रो ह्यवरोपि दृष्ट इति श्रुतौ परिणामगुणवत्तया द्रव्यमित्यवगता बुद्धिः । तथा यदा पञ्चैव लीयन्ते ज्ञानानि मनसा सह । बुद्धिश्च नेङ्गते तच परमात्मानमश्नुते इति श्रुतौ चेष्टाश्रयत्वेन द्रव्यमित्यवगता बुद्धिस्तथा विज्ञानं यज्ञं तनुते इत्यानन्दमयस्यात्मनः पृथगऽभिधानाद् विज्ञानं बुद्धिरित्यनर्थान्तरत्वाद् बुद्धिः क्रियाश्रयत्वेन द्रव्यमित्यवगता । तथा विज्ञानेन वा ऋग्वेदं विजानाति मनसा ह्येव पश्यतीति च करणपक्षपातिनोर्विज्ञानमनसोरेकत्वान्मनसश्च कामसङ्कल्पादिवृत्तिमत्त्वश्रवणादेकमन्तःकरणं विज्ञानक्रियाशक्तिमन्मनआदिशब्दवाच्यं श्रुतिलिङ्गेभ्यः प्रसिद्धम् । तथा बुद्धेर्गुणेनात्मगुणेन चैव सधीः स्वप्नो भूत्वा इमं लोकं सञ्चरति विज्ञानमयो मनोमय इत्यादिश्रुतावात्मावच्छेदकतया स्वगुणारोपगमनागमनादिनिमित्तत्वं चावगतम् । तथा कस्मिन्वहमुत्क्रान्ते उत्क्रान्तोभविष्यामीति श्रुतावुत्क्रान्त्याद्युपाधेः प्राणस्याप्यन्तःकरणांशत्वमवगतमयुगपदुपाधिद्वयायोगात् । ततश्च वर्णितमन्तःकरणं श्रुतिलिङ्गसिद्धमिति । नन्व-

* कारणभूतमिति १ पु० । † चैवं ह्याराग्रमात्रो ह्यवरोऽपि दृष्ट इति २ पु० ।

र्थवादलिङ्गानां न्यायापेक्षा विद्यते । सत्यम् । निरंशसर्वगतासङ्गस्याकाशस्येव निरुपाधेर्गमनपरिच्छेदाद्यनुपपत्तिरेव न्याय इत्यलमतिप्रसङ्गेन ॥

नन्वात्मन एव विज्ञानक्रियापरिणामशक्ती किं न स्यातामिति । निरवयवसर्वगतासङ्गस्य परिणामानुपपत्तेः परिणाम्यन्तःकरणसन्निधानाच्च प्रतिभासस्यान्यथासिद्धेरिति सदृष्टान्तमाह तेनान्तःकरणोपरागनिमित्तमिति । मिथ्यात्वं स्फटिकलौहित्यस्य कृप्रप्रतीतिसत्तयोः कारणाभावादिति भावः । तदुभयाभावमुत्तरग्रन्थेन साधयति । तत्राख्यातिवादिनः स्फटिकगतं मिथ्यालौहित्यमवभासते किन्तु जपाकुसुमगतमेव गृह्यमाणं स्फटिकादविविक्तमेवावभासत इति चोदयति कथं पुनः स्फटिक इति । नैतदित्याह यदि स्फटिकप्रतिस्फालिता इति ।

ननु दोषबलादिन्द्रियस्य कुसुमसंयोगाभावान्न सन्निवेशग्रहणमिति
२१ २ नेत्याह नहि रूपमात्रनिष्ठ इति । संयुक्तसमवायात् संयोगाद्वा गुणग्रहणे द्रव्यमपि संयुक्तमिति भावः । अन्यथाख्यातिवादी रूपमात्रं प्रतिविम्बितं स्फटिकात्मना प्रतिभातीति वक्ति तन्नेत्याह नापि स्वाश्रयमिति । तर्हि स्फटिकदेशे लौहित्यं सद्द्रव्यमेवाविविक्तं स्फटिकात्मना वा गृह्यते इति चोदयति नन्वभिजातस्येवेति । तथाप्यन्यथाख्यातौ संसर्गमिथ्यात्वमित्याह तथापि स्वयमलोहित इति ।

अख्यातिवादिनो मत * माददाति अथ प्रभैव लोहितेति । तर्हि स्फटिकग्रहणे संयुक्तसमवायकारणपैष्कल्यादप्रतिबद्धसंयोगाद् वा रूपग्रहणमपि स्यादित्याह शैक्ल्यमपि तर्हीति । विरोधिगुणया प्रभया विरोधिगुणस्यापसारणं प्रतिबन्धो वा कृत † इति शङ्कते प्रभयापसारितं तदिति । अपसारणे ‡ दोषमाह स तर्हि नीरूप इति । प्रतिबन्धश्च § द्रव्यस्यापि समानः गुणद्वारा विरोधिसाम्यादित्यर्थः । रूपहीनमपि द्रव्यं रूपिप्रभासंयोगाच्चाक्षुषं ‖ स्यात् इत्याशङ्क्याह न च रूपिसंयोगादिति । तर्हि शैक्ल्यमपसार्य लौहित्यस्योत्पन्नत्वा-

* आददातीत्येव पु॰ त्रयेऽपि पाठः; "आङो दोऽनास्यविहरणे" इत्यात्मनेपदन्तूच्चारणक्रियायामास्यव्यादानस्यावर्जनीयत्वाच्च भवतीति प्रागवोचद्भावप्रकाशिका ।

† इत्याशङ्कत इति २ पु॰ । ‡ दूषणमिति २ पु॰ । § चो नास्ति २ पु॰ ।

‖ चाक्षुषमपीति १ पु॰ ।

दूपवत्तया चाक्षुषः स्फटिक इति नेत्याह न प्रभानिमित्तमिति । अभ्युपगम्य प्रभामित्यादिः स्पष्टार्थः । ततश्चोपरक्ताहङ्कारनिमित्तमात्मनि कर्तृत्वाद्यारोपणमित्याह तदेवमिति । नन्वहङ्कारधर्मस्यात्मन्या * रोपमात्रं क्रियते किं वा मिथ्यैव धर्मान्तरमुत्पद्यते इति । पूर्वस्मिन् नायं दृष्टान्तो ऽन्यथाख्यातिश्च स्यादुत्तरस्मिन्सत्यमिथ्याकर्तृद्वयावभासः स्यात् । उच्यते । अहङ्कारस्य स्वधर्मसहितस्यैवात्मन्यध्यस्ततया मिथ्यात्वान्नान्यथाख्यातिप्रसङ्गो ऽन्यसन्निधानादन्यस्मिन्मिथ्याधर्मावभास इत्येतावति दृष्टान्तः । अथवा । कर्तृद्वयेपि धर्मिणोरेकत्वापत्त्या धर्मभेदानवभास इत्यविरोधः ।

ननु भिद्यते हृदयग्रन्थिरित्यादौ हृदयग्रन्थिरात्मनि अनर्थहेतुरिति गम्यते तत्कथमहङ्कारस्योच्यते इति तत्राह ततः संभिन्नोभयरूपत्वादिति । २१
नन्वात्मा स्वात्मन्युपरक्ताहङ्कारस्तद्धर्मादीन्नावभासयेत् उपरक्तत्वसाम्यात्स्फटिकादिवदिति तत्राह तत्र जड़रूपत्वादिति । † जाड्यचैतन्ये अवभासकत्वानवभासकत्वयोर्निमित्ते नोपरक्तत्वानुपरक्तत्वे इत्यर्थः । ननु चेतनस्याप्युपरक्तविषयज्ञानव्यापारशून्यत्वाज्जाड्यादविशेष इति तत्राह चिद्रूपस्य पुनरिति । अव्यवधानेन चित्संसर्ग एव प्रतिभासहेतुर्न ज्ञानव्यापार इति भावः । ननु साक्षिस्वरूपवद्विज्ञानक्रियाव्यवधानमन्तरेणाहङ्कारस्य सिद्धौ कथमिदमंशतेति तत्राह तेन लक्षणत इति । अर्थस्वभावत इत्यर्थः । ‡ अर्थतश्चित्स्वरूपता ऽनिन्दमंशता चैतन्यकर्मता चेदमंशतेति § न ज्ञानक्रिया ‖ व्यवधानेनेत्यर्थः । व्यवहारतः पुनः कथंभूतस्येदमंशतेति तदाह व्यवहारतः पुनरिति । यदुपरागात् यस्याहङ्कारस्योपरागादित्यर्थः । ¶ तदात्मन इति । तदात्मतामहङ्कारात्मतामापन्नस्येत्यर्थः । तद्व्यापारेणाहङ्कारव्यापारेणेति । वृत्तिव्यवधानसिद्धिरेव शरीरेन्द्रियविषयाणाम् इदमिति प्रतिभासितानामव्यवधानसिद्धिरेवानिदंप्रतिभासितेति भावः । नन्वज्ञानव्यवहितोहङ्कारः कथमव्यवधानादिदंतावभासाभावः स्यादित्यत्राहात एवाहमिति । अनिन्दन्ताप्रतिभासादेव अज्ञान- ,,

* आरोपणमात्रमिति २ पु० । † जाड्यचैतन्येत्वनवभासकत्वावभासकत्वयोरिति २ पु० ।
‡ अर्थतस्तु चिदिति २ पु० । § इतिशब्दो नास्ति २ पु० ।
‖ व्यवधानतेत्यर्थइति २ पु० ।
¶ तदात्मनोऽहङ्कारात्मतामापद्यमानस्येत्यर्थइति २ पु० ।

मात्रव्यवधानादेवेत्यर्थः । नन्वर्थतो युष्मदर्थत्वे तथाप्रतिभासाभावो न युक्त इत्यत्राह दृष्टश्च लक्षणत इति । ननु तत्र विमर्शेऽपि * मृन्मयव्यवहारो न जायते इह तु विमर्शे युष्मदर्थता व्यवह्रियते अतो नायं दृष्टान्त इत्यत आह व्युत्पन्नमतयस्त्विति । अत एव निपुणतरमभिवीक्ष्येत्यादिः स्पष्टार्थः ।

यदि स्फटिकोदाहरणेनैवात्मन्यनात्माध्यासः सिद्धो न तर्हि दर्पण-जलाद्युदाहरणेन वेदान्तविहितेन कृत्यमिति तत्राह यत्पुनर्दर्पणजलादिष्विति । ननु प्रत्यङ्मुखताभेदावभासाभ्यां वस्त्वन्तरे विम्बात्प्रतिविम्बे प्रत्यक्षे
२२ २ कथमेकत्वप्रमाणमन्तरेण तदेव तदिति चोदयति कथं पुनस्तदेव तदिति । व्यक्तिप्रत्यभिज्ञानादिति परिहरति एकस्वलक्षणत्वावगमादिति । नन्वभिज्ञायां भेदप्रतिभासः कथं प्रत्यभिज्ञया बाध्यत इति तत्राह न तद्वस्त्वन्तरत्व × इति । ननु व्यक्तिगतयोरैक्यभेदावभासयोः केन किं बाध्यमिति † विशये व्यक्तिभेदस्तत्रोपपत्तिशून्यत्वाद्बाध्यत इत्याहापि चार्थाद्वस्त्वन्तर इति । दर्पणावयवा एव व्यत्यन्तराकारेण परिणता इति वाच्यम् । अन्यथा ‡ व्यत्युत्पत्त्युपायाभावादिति भावः । ननु मुखलाञ्छितप्रतिमुद्रेयं न परिणाम इति नेत्याह विरुद्धपरिमाणत्वादिति । अस्तु तर्हि परिणाम इति नेत्याह तथा सतीति । ननु दृश्यते एव सर्वदा । नैवम् । दर्पणस्य तिर्यङ्निरीक्षणे पूर्वोत्पन्नमुखदर्शनाभावात् ।

ननु निमित्तकारणापायेपि कार्यमपैति यथा वैशेषिकाणामपेक्षाबुद्धिविनाशे द्वित्वादिविनाशो हस्तसंयोगापाये च कटविवरणापाय इति नेत्याह न खलु संवेष्टित इति । सर्वत्राग्निसंयुक्तद्रुतताम्रादाविव पुष्कलकारणेन विरुद्धकार्योदयादेव पूर्वकार्यविनाशः वैशेषिकाणां च प्रक्रियामात्रम् । तद्द्वित्वादेर्वस्तुसहभावित्वादिति भावः । ननु संस्कारजन्यकार्यान्तरोदयात्पूर्वकार्य-
,, १० विनाशो न निमित्तं कारणापायादिति कुत इति तत्राह तथा च यावदिति । निमित्तापायमात्राच्चेद्विवरणापायः संस्काराभावे § संवेष्टितेति भावः । इहापि तर्हि पूर्वसंस्थानस्य चिरकालं संस्थानसंस्कारबलाद्विरुद्धकार्योदये प्रतिविम्बा-

* मृण्मय इति २ पु० ।

† विशयो नाम संशयः, विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरमित्यादौ तथादर्शनात् ।

‡ व्यत्युपायेति १ पु० व्यत्यन्तरोपायाभावादितीति ३ पु० । § अपिशब्दोऽधिकः २ पु० ।

वाय इति चेत् न । उत्पन्नदर्पणमात्रे चिरकालावस्थितमुखपरिणामसंस्कारेपि बिम्बापायमात्रात्प्रतिबिम्बापगमदर्शनादित्याह एवं चिरकाल इति । २२

ननु चिरकालावस्थितविकासपरिणामसंस्कारप्रचयेपि सवितृकिरणा- × पाये विकासापायदर्शनवच्चिरकालावस्थितप्रतिबिम्बापायेपि बिम्बापाये स्यादिति नेत्याह यः पुनः कमलमुकुलस्येति । ननु निमित्तकारणापाय एव तत्रापि निमित्तं न पार्थिवाद्यवयवजन्या मुकुलतेति तत्राह तदुपरम इति । आदर्शेपि तर्हि मुखविपरीतकार्यपरिणामहेतुः कल्प्यतामिति नेत्याह नादर्शे पुनरिति । * कारुकर्मापेक्षं चादर्शतलजन्मेति भावः । किंच । सत्यपि बिम्बसन्निधाने दर्पणद्रव्यं † मुखाकारं कर्तुं दाहच्छेदादिबहुप्रयत्नदर्शनात् स्पर्शगो ‡ चरत्वाभावाच्च । अवयवव्यवधाने चाक्षुषत्वमपि न स्यादित्यभ्युच्चयः । तत्रायं प्रयोगः § न दर्पणादौ मुखव्यक्त्यन्तरमस्ति तज्जन्मकारणशून्यत्वात् ‖ शशमस्तकविषाणवदिति ।

तर्हि शुक्तिकारजतवन्मिथ्यात्वोपपत्तेर्न मुखैकत्वमिति चोदयति अत्राहेति । ननु प्रत्यभिज्ञयैकत्वमवगतमिति नेत्याह ¶ शुक्तिरजतस्येति । मिथ्यारजतेपि प्रत्यभिज्ञा दृश्यते मदीयमिदं रजतमितीत्यर्थः । उत्तरमाह मैवम् तत्र हीति । तत्र नेदं रजतमिति रजतस्वरूपमेव बाध्यते नात्र रजतं किन्तु तदिदं रजतमिति देशमात्रबाधया सत्यरजतेनैकतया न प्रत्यभिज्ञायते अतो रजते ऽभिज्ञाबाधात्प्रत्यभिज्ञा विभ्रम इत्यर्थः । इह तु नेदं मुखमिति न स्वरूपेण बाध्यते किंतु नात्र मुखं मदीयमेवेति प्रत्यभिज्ञायते नच सा बाध्यते । व्यक्त्यन्तरत्वे च नात्र मुखमस्तीति न बाधः स्यादित्यर्थः । यत्पुनरिति स्पष्टार्थः । ननु स्वमुखावयवानामप्यक्षुषत्वात्कथं प्रत्यक्ष * प्रत्यभिज्ञा । न । कतिपयावयवदर्शनादपि लोकवदवयविनश्चाक्षुषत्वोपपत्तेस्तत्त्वमसिवाक्यं त्वंपदार्थबाधनिमित्तं संसारिणो विनाशमन्तरेण मोक्षानुपपत्तेरतो नायं दृष्टान्त इति चोदयति ननु तत्त्वमसिवाक्यादिति । सोयं देवदत्त ,,

* कारुककर्मापेक्षमिति १ पु· ।
† मुखाकारे इति २ पु· ।
‡ गोचरताऽभावादिति ३ पु· ।
§ दर्पणादौ नेति १ पु· ।
‖ शशमस्तके विषाणवदिति ३ पु· ।
¶ शुक्तिकारजतस्येति ३ पु· ।
* प्रत्यभिज्ञानमिति २, ३ पु· ।

इति तादात्म्यपरं न परार्थबाधपरमिति परिहरति मैवमिति । किंच शास्त्रीयोपीति स्पष्टार्थः ।

न वारिस्थमित्याऽऽदित्यस्य वारिस्थतोपजीव्यते । अख्यातिवादी न बिम्बादन्यत्वेन प्रतिबिम्बं नाम दर्पणगतमवभासते किंतु बिम्बमेव दर्पणादविविक्तं प्रकाशत इतिवदति तदनुवदति यस्तु मन्यत इति । स्पष्टप्रत्यङ्मुखावभासं दर्पणान्तरानुप्रविष्टमिव स्वमात्मानं पुरुषान्तरवन्निरीक्ष्यमाणमिवेदं यादृग्दृश्यमानं मुखं तथा नावभासत इति वदन् कथमाप्तः स्यादित्याह
४ तमनुभव एवेति ।

ननु मूर्तद्रव्यस्य युगपत्कात्स्न्र्येन देशद्वयवर्त्तित्वं लोके न क्वचिदपि दृष्टमिति चोदयति कथं पुनः परिच्छिन्नमिति । एकमेकदेशस्थमेव मुखं * भ्रमाद्विन्नं भिन्नदेशस्थं * वावभासत इत्याह न वयमिति । किं पुनरिदमेकस्मिन्नेकदेशवस्तुनि भेदभिन्नदेशत्वलक्षणं वस्त्विति तदाह विच्छेदस्त्विति । ननु माययापि प्रमाणविरुद्धं कथमवभासत इत्यत आह नहि मायायामिति । ननु विच्छेदावभासः कथम् † अविद्याविजृम्भितो यावतोर्ध्वाग्रोपि स्पष्टमवभासमानो वृक्षो ऽधोग्रो ‡ जले प्रतीयते नच तत्राज्ञानमस्तीति । उच्यते । नच विषयावरणमज्ञानमध्यासहेतुरित्युक्तम् तच्चोपाधिकभ्रमेष्वुपाधिरेव आत्मा विद्यापरिणामे पुष्कलकारणं नचाधिष्ठान § याथार्थ्यस्य ज्ञानं सोपाधिकभ्रमेष्वध्यासविरोधि किंतु निरुपाधिकभ्रमेष्विति द्रष्टव्यम् ।

ननु सोपाधिकभ्रमत्वे भेदकर्तृत्वाद्यध्यासस्य न तत्त्वज्ञानादध्यासनिवृत्तिः किंतु उपाधिमात्रनिवृत्त्येति चोदयति ननु सत्येव बिम्बैकतावगम इति । ‖ चोदितदोषं परिहर्तुमाशङ्क्यान्तरं प्रथमं निवर्तयति कथं जीवः प्रतिबिम्बश्चेत् न बिम्बात्मतामवगन्तुमलं प्रतिबिम्बत्वात् अत्रिपाचगतदेवदत्तप्रतिबिम्बवदित्येतन्निराचष्टे देवदत्तस्याचेतनांशस्येति अचेतनत्वप्रयुक्ता तत्रानवगतिर्न प्रतिबिम्बत्वप्रयुक्ता घटादिषु तथादर्शनादिति भावः । ननु शरीरमेव चेतनमिति लोकायतस्तत्राह सचेतनांशस्यैवेति । दर्पणजाड्येन ¶ प्रतिबन्धात् स्वभावजाड्याद्वेत्यर्थः । दैवदत्तप्रतिबिम्बस्याचेतनत्वे हेत्वन्तरमाह

* चावभासत इति ३ पु० । † अविद्यया विजृम्भित इति १ पु० । ‡ जलेषु इति २ पु० ।
§ याथाम्यज्ञानमिति २ पु० । ‖ चोदितं दोषमिति २ पु० । ¶ प्रतिबन्धकत्वादिति ३ पु० ।

तथाचानुभव इति । कदाचित्तस्यापि चेतनत्वे स्वातन्त्र्यात्तच्चेष्टया विनापीदं २३ १
चेष्टतामिति भावः । ननु देवदत्तस्यैव विम्बस्य भ्रमनिवर्तकतत्त्वज्ञानाश्रयत्वं दृष्टमेवं विम्बत्वाद् ब्रह्मण एव भ्रमनिरासितत्त्वज्ञानाश्रयत्वं स्यादिति नेत्याह यस्य हि भ्रान्तिरिति । न विम्बत्वकृतं * तत्त्वज्ञानाश्रयत्वं किंतु भ्रान्तत्वकृतं तदप्यज्ञत्वकृतं तदपि जीवत्वनिमित्तमिति भावः ।

ननु जीवलक्षणप्रतिविम्बात्मतामात्मनो ब्रह्म जानीयाद्वा न वा । न चेत्सर्वज्ञत्वहानिः । जानाति चेत् ब्रह्म स्वात्मन्येव संसारं पश्येदिति नेत्याह यस्तु जानीते देवदत्त इति । देवदत्तो हि स्वात्मानमच्छिपाचे ऽल्पत्वादिगुणमवगच्छन्नपि तत्त्वज्ञानप्रतिहतत्वान्नानुशोचति एवं ब्रह्मापि स्वात्मनि जीवे प्रतिविम्बे संसारं पश्यदपि तत्त्वज्ञानित्वान्नानुशोचति । तत्त्वज्ञानसंसरणे चावदातश्यामत्वादिवन्नेतरेतरच व्यवतिष्ठेते इति भावः ।

नन्वेकतावगमेपि न तच विच्छेदविभ्रमो निवर्त्तते । सत्यम् । न प्रति- ×
विम्बकृतं तत्किंतूपाधेरज्ञानाजन्यत्वाज्ज्ञानानिवर्त्यत्वकृतमित्याह नापि ज्ञानमाचादिति । † ननु जीवस्यापि तर्ह्युपाधिजाड्येनास्कन्दनसम्भवात् न भ्रान्तिसम्यग्ज्ञानाश्रयत्वम् अप्रतिविम्बता च तदाश्रयत्वे स्यादिति नेत्याह जीवः पुनरिति । रूपंरूपं प्रतिरूपो बभूव एकधा बहुधा चैव दृश्यते ,, १
जलचन्द्रवत् अत एव चोपमा सूर्यकादिवदिति च श्रुतिस्मृतिसूचेर्जीवस्य प्रतिविम्बभावस्य दर्शितत्वात् । अमूर्त्तस्य चाकाशस्य साभ्रनक्षत्रस्य जले प्रतिविम्बवदऽमूर्त्तस्य ब्रह्मणोपि प्रतिविम्बसम्भवात् । जानुमाचप्रमाणेपि जले दूरविशालाकाशदर्शनात् । जलान्तराकाश एवाभ्रादिविम्बयुक्तो दृश्यत इति वक्तुमशक्यत्वात् । तत्प्रतिविम्बत्वं चिद्रूपत्वं च शास्त्रप्रतिपन्नं प्रत्यक्षप्रतिपन्नं च न निराकर्तुं शक्यत इति भावः ।

ननु घटाकाशवदुपाध्यवच्छिन्नो जीवः किन्न स्यात् । न । सामान्यविशेषाभ्यामुपाधिभिरण्डान्तर्वर्त्तिब्रह्मणः सर्वात्मना जीवभावेनावच्छिन्नत्वादनवच्छिन्नस्य ब्रह्मणोऽण्डाद्बहिरेव सद्भावप्रसङ्गात् । तच सर्वगतसर्वनियन्तृत्वादि ब्रह्मणो न स्यादवच्छिन्नप्रदेशेष्वनवच्छिन्नस्य द्विगुणीकृत्य वृत्त्ययोगात् ।

* तत्त्वं ज्ञानाश्रयत्वमिति १ पु० । † नन्विति १ पु० नास्ति ।

स्वरूपापेक्षया तत्सर्वं न बहिःस्थितब्रह्मापेक्षयेति चेत् न । यो विज्ञाने तिष्ठन्नित्यादौ जीवव्यतिरिक्तस्यैव ब्रह्मणो जीवसंनिधानेन विकारान्तरावस्थानश्रवणात् । प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनादेकस्यैव द्विगुणीकृत्यवृत्त्युपपत्तेर्जीवावच्छेदेषु ब्रह्मणोपि नियन्तृत्वादिरूपेणावस्थानमुपपद्यत इति प्रतिबिम्बपक्ष एव श्रेयानिति । मिथ्यातत्त्वज्ञानाश्रयत्वं च तत्र प्रत्यक्षमित्याह । स चाहंकर्तृत्वमिति । उपाधिस्वरूपमपि भ्रान्त्यैवावभासत इत्यर्थः । अतस्तत्त्वज्ञानेनोपाधिनिवृत्तेर्विच्छेदैक्यायेत्याह अतो युक्त इति ।

नन्वज्ञानं जीवावच्छेदोपाधिरिति पुरस्तादुक्तम् तत्कथमहंकारोपाधितया जीवस्याभिधीयत इति । नैष दोषः । चैतन्यस्यावच्छेदकविकल्पतारतम्येन व्यवहारविकल्पतारतम्यात् । तथाहि । निर्विकल्पंकचैतन्यमाचैकरसम् अविद्यासम्बन्धा * दीषद्विकल्पव्यवहारालम्बनं भवति सुषुप्ते । ततस्तदुपादानान्तःकरणावच्छेदात्तदेव स्थूलतरव्यवहारालम्बनं भवति स्वप्ने । पुनरन्तःकरणसंसृष्टस्थूलशरीरोपरागात् स्थूलतमं भवति जागरणे । न चोपाधिभेदाज्जीवभेदप्रसङ्गः । पूर्वपूर्वोपाध्यवच्छिन्नस्यैवोत्तरोत्तरेणावच्छेदात् । निरपेक्षोपाधिभेदे हि जीवभेदः ।

ननु स्थूलशरीरोपादानभूतसूक्ष्मरूपसहितेन लिङ्गशरीरसंस्कारेणोपरक्तमज्ञानं सुषुप्ते न जीवमवच्छेत्तुमर्हति । तत्र भ्रान्त्यभावात्तल्लक्षणत्वाच्च विभागस्य । अथ † भ्रान्त्यज्ञानमपेक्ष्यैवार्थगत एव विभागः ‡ कल्प्यते तत्र विभागस्य कार्यत्वे सुषुप्तिप्रलयादावभावाद् ब्रह्मण्येवाविद्यादिसाङ्कर्य्यं स्यादऽकार्यत्वे विभागस्यानादित्वाद § विद्यानिमित्तत्वं न स्यात् । उच्यते । ब्रह्मण्यविद्यादिसाङ्कर्यपरिहाराय सुषुप्त्यादावप्यस्त्येव जीवब्रह्मविभाग इति कल्प्यते । नन्वर्थगत एव तर्हि त्रिभागो न विभ्रमगतः । सत्यम् । सुषुप्त्यादिगतविभागादन्यच जीवब्रह्मविभागो विभ्रममात्रतया ऽविद्योपादान उच्यते । नन्वर्थगतो विभागस्तर्हि नाविद्योपादानः अनादित्वात् अविभ्रम-

* दूषत्वविकल्पेति १ पु० । † भ्रान्तिज्ञानमनपेक्ष्येति ३ पु० ।
‡ कल्प्यतामिति २ पु० । § अविद्यानिमित्तत्वे इति १ पु० ।

त्वाच्च । सत्यम् । तथाप्यविद्यातन्त्रो विभागो ऽनादित्वेपीति ब्रूमः । * यथा-हि । स्वात्माऽविद्यासम्बन्धो ऽविद्यातन्त्रो नाविद्योपादानः । सम्बन्धजन-नात् प्राक् स्वातन्त्र्येणावस्थानानुपपत्तेरज्ञानस्यानादित्वाच्चात्माविद्यासम्ब-न्धस्य नाविद्योपादानता ।

ननु जीवब्रह्माश्रयो विभागः कथमविद्यातन्त्रः स्यात् । उच्यते । अनाद्यविद्याविशिष्टं चैतन्यमनादिजीवभावेन काल्पनिकानादिभेदस्याश्रयो न स्वरूपेण तस्यैकत्वात् अतो विशिष्टाश्रयो विभागः † स्वरूपेणाप्युपरज्यमानो वि-शेषणाविद्यातन्त्रो विशिष्ट इत्यविद्याकृतो विभाग उच्यते । अविद्यातन्त्राणां चानिर्वचनीयत्वमनादित्वं चाविद्यासम्बन्धवन्न विरुध्यते । लोके च दर्पण-घटादिविशिष्टयोरेव मुखाकाशयोर्मिथ्याभेदावभासो न स्वरूपेणेत्युपाधितन्त्रता भेदस्योच्यते । तस्मादनाद्यविद्याप्रतिबिम्बकृतविभागस्यैव जीवस्य तदुत्प-न्नाहंकारादिविशेषेषु स्थूलप्रतिबिम्बापेक्षया सर्वेषामुपाधित्वं न विरुध्यते ।

अत्र सर्वसङ्करवादी प्रतिबिम्बस्यावस्तुत्वाभ्युपगमान्न जीवः प्रतिबि-म्बमिति जल्पति । तत्र मुखचित्स्वरूपयोः प्रतिबिम्बेषु नावस्तुत्वमिष्यते । भेदविपर्यासादीनामऽवस्तुत्वाभ्युपगमेपि न मुखचैतन्ययोः काचित् क्षतिः । मुखचित्स्वरूपयोश्च बिम्बात्मतां प्रमिमीमहे मिथ्यांशपर्युदासेन । नच मिथ्यां-शस्य बन्धमोक्षौ किंतु स्वरूपस्यैव स्वरूपगतस्यापि साङ्कर्यपरिहारयोपाधिभेदो दर्शितः । तस्मात्परसिद्धान्ताऽपरिज्ञानविलसितोऽयं सर्वसङ्करवादिनो विभ्रमः ।

‡ अवस्तुत्वाभ्युपगमादिति । अहंकारोपाधिनिमित्तो जीवब्रह्मविभागो २३
ऽनात्माध्यासश्च दृष्टान्तद्वयेन सिद्धः । तत्र किं रज्जुसर्पादाहरणेन वेदान्त-विहितेनेति चोदिते तस्य प्रयोजनमाशङ्कान्तरनिवृत्तिरित्याह ननु तत्र विभ्रा-म्यत इति । निरुपाधिकाध्यासपरिनिष्पन्नाहंकारोपाधिकः कर्तृत्वाद्यध्यास इति कथयितुमित्यर्थः । ननु सर्वत्राधिष्ठानाध्यस्यमानव्यतिरिक्तोपाधिनिमित्त एवाध्यासो न निरुपाधिक इति चोदयति ननु तत्रापि यदि नामेति । पूर्वा-नुभवसंस्कारमात्रोपाधिमात्रमिहापि विद्यते स्वतन्त्रोपाधिरेव निराक्रियत इति

* यथा ह्यात्मेति २ पु० ।

† स्वरूपेणोपरज्यमानो विशेषणाविद्येति २ पु०, स्वरूपतोप्युपरज्यमानविशेषणेति ३ पु० ।

‡ मिथ्यात्वाप्यमइति हि मूले मित्रति पाठः ।

परिहरति बाढमिहापीति । न पूर्वानुभवसंस्कार एव भ्रमहेतुर्न पूर्वभ्रान्तिसंस्कार इति नियमोस्तीति भावः ।

नन्वात्मनि सोपाधिकस्य निरुपाधिकस्य * चाध्यासस्योदाहरणाचयेगैव सिद्धत्वान्न घटाकाशोदाहरणेन वेदान्तविहितेन कृत्यमस्तीत्याशङ्क्य
१ चोद्यान्तरनिराकरणेनासङ्गत्वसिद्धिः प्रयोजनमित्याह तच्च यद्यप्यनिर्वचनीयतयेवेति । अरुणादिना स्फटिकादेर्गुणगुणित्वेन सम्भेदे योग्यस्याप्यनिर्वचनीयतया ऽरुणादेरसम्भेदावभासः सिद्ध इत्यन्वयः । कथं पुनर्घटाकाशोदाहरणेनासङ्गत्वसिद्धिरिति तदाह तच्च हीति । ननूदाहरणैरेवात्मनो ऽविकारित्वैकत्वासङ्गत्वानां सिद्धत्वान्नागमेन कृत्यमिति नेत्याह एतच्च सर्वमुदाहरणजातमिति । प्रमाणमन्तरेणोदाहरणमात्रादर्थसिद्ध्ययोगात्प्रत्युदाहरणसम्भवादिति भावः ।

अस्मत्प्रत्ययविषयत्वादिति भाष्यमात्मन्यध्यासोपपत्त्यर्थं तत्रास्मत्प्रत्ययस्तन्निमित्ताध्यासश्च दर्शितो विषयशब्दार्थमिदानीमाह तदेवं यद्यपीति । गौण्या वृत्त्या विषयशब्दप्रयोगे किं गुणसाम्यमिति तदाह प्रमेयस्य चेति । ननु † सविकल्पकाध्यासस्य सविकल्पकमेवाधिष्ठानं वक्तव्यम् तथादर्शनात् न ‡ निर्विकल्पकचिन्मात्रम् । तच्च कथमहंकारादध्यासेन § सविकल्पकेऽहंकाराध्यास इति चोदयति ननु व्यवहारयोग्यत्व इति । निर्विकल्पेपि सविकल्पाध्यासदर्शनादज्ञानाध्यासेन सविकल्पे पूर्वाहंकाराध्यासेन वा सविकल्पके
२ चिदवभासे सम्भवत्येवेत्तराहंकाराध्यास इत्याह नाऽनादित्वेनेति ।

नन्वविकारिचैतन्यैकतानस्य निष्कलङ्कस्वभावानन्दस्यासङ्गस्यात्मनो न प्रमातृत्वमुपपद्यते प्रमाणक्रियापरिणामाभावात् । नच प्रमातृत्वहीनस्य कर्तृत्वभोक्तृत्वे सम्भवत इति प्रमातृप्रमाणप्रमेयकर्तृकर्मकार्यभोक्तृभोगभोक्तव्यसंसर्गलक्षणस्य व्यवहारस्यात्मन्यसम्भवादऽहंकारस्य चाचेतनतया तदाश्रयत्वायोगादुच्छिन्नव्यवहारमिदं जगदापद्येतेति प्राप्तम् ।

अथ स्वभावसिद्धचैतन्यप्रकाशेनैव विषयं प्रकाशयेत् तर्ह्यविशेषात्सर्वगतत्वाच्च सर्वं प्रकाशयेदित्यव्यवस्थैव । तस्माद्विकारसमर्थ एवात्मेत्यपर

* चस्थाने वाकारः १ पु· । † सविकल्पाध्यासस्येति १, २ पु· ।
‡ निर्विकल्पं चिन्मात्रमिति १, ३ पु· । § सविकल्पे - इति १, २ पु· ।

आह न तावत्सर्वगतात्मवादिनामिदं चोद्यं सम्भवति । कथम् । यदि तावदात्मविषयेन्द्रियमनश्चतुष्टयसंनिकर्षादिनोत्पद्यमानं विज्ञानं क्रिया वा गुणो वा यावदात्मसमवाय्येवोत्पद्येत निरवयवे प्रदेशाश्रयत्वानुपपत्तेस्तदा युगपत्सर्वमूर्त्तद्रव्यसंयोगलक्षणत्वात्सर्वगतत्वस्य स्वाश्रयात्मसंयुक्तवस्तुनः सर्वस्यावभासिविज्ञानं स्यात् प्रदीपादिषु क्रियाप्रकाशगुणयोः स्वाश्रयसंयुक्ते वस्तुन्यनुरूपप्रकाशाद्यतिशयहेतुत्वात् । अदृष्टेन क्वचिदेव विषये ज्ञानं नियम्यत इति चेत् । न । प्रदीपादिषु यावत्संयुक्तवस्त्ववभासिष्वदृष्टेन वस्तुसामर्थ्यमतिक्रम्य नियमादर्शनात्सुखदुःखाद्यनिमित्ततृणादुपेक्षणीयसर्वविषयावभासेन चादृष्टनियमानुपपत्तेः । जनकमेव ज्ञानं प्रकाशयति न सर्वमिति चेत् न । चक्षुरादिषु प्रकाशप्रसङ्गात् । विषयस्य निरूप्यमाणत्वाद्विषयतया जनकमिति विशेषणायोगात् प्रदीपादिषु च प्रकाशगुणस्य स्वाश्रयसंयुक्ताजनकविषयस्यापि प्रकाशकत्वदर्शनात् । क्रियारूपे विज्ञाने समानमेतदिष्वादिव्यापाराणामनुद्दिष्टेपि विषये स्वाश्रयसंयोगे सत्यतिशयहेतुत्वदर्शनात् । निरवयवत्वादात्मनो न सर्वसंयोग इति चेत् । न किंचिदपि प्रकाशेत । क्रियागुणयोः स्वाश्रयमतिलङ्घ्यान्यच्च संसर्गायोगादसंसर्गादसंसृष्टे चातिशयायोगात् ।

अथ शरीरावच्छिन्नात्मप्रदेशसमवाय्येव ज्ञानं न यावदात्मसमवायीति मतम् । तर्हि सावयवत्वमात्मनः न व्यवहितविषयावभासश्च स्यात् आत्माश्रयप्रकाशस्य विषयेणासंसर्गात् न चाश्रयातिलङ्घनं क्रियादेरित्युक्तम् । नचानाश्रयात्मप्रदेशसंबन्धादवभासः । सर्वस्यावभासप्रसङ्गात् । नन्वभिचारकर्म्म स्वाश्रयात्मप्रदेशासंयुक्तं पुरुषान्तरे ऽनर्थं जनयति तद्वदिहापि स्यात् । नैतत्सारम् । दृष्टक्रियासामर्थ्यादेवादृष्टेप्युभयात्मप्रदेशसंयुक्तस्य देवतात्मनो वेश्वरस्य वा हेत्वन्तरस्य वा ऽनुमीयमानत्वात् । नचात्मसंयुक्तमनःसंसृष्टेन्द्रियसंयुक्तविषये ऽतिशयः पुरुषाश्रयज्ञानादुपपद्यते । विषयसंयुक्तेपि वस्त्वन्तरे प्रकाशत इतिव्यवहारातिशयप्रसङ्गात् । पूर्वभावित्वाच्च संयोगप्रवाहस्य ज्ञानवता विषयस्य वर्त्तमानसंयोगप्रवाहाभावादेवमणुदेह * परिमाणात्मवादेपि तुल्यो दोषः । तस्मान्नसर्ववादिनां प्रमाणादिव्यवहारसम्भव इति ।

* परिणामेति तु १ पु० ।

२४ २४ सत्यमस्मत्पक्षे तु कथंचित्सम्भवं प्रदर्शयिष्यामीत्याह तच्चैवंभूतस्याहंकर्तुरिति । इदमंशस्यान्तःकरणस्येत्यर्थः । व्यापार इति परिणामोऽभिधीयते । प्रकाशस्वभावं सावयवमन्तःकरणमदृष्टेन्द्रियादिसहकृतं ध्रुवादिविषयपर्यन्तं दीर्घप्रभाकारेण परिणमते । तेजसः शीघ्राति * दूरगमनदर्शनात्परिणामद्वारेण कर्तृकर्म्मसम्बन्धोऽवस्थाविशेष इत्याह स च प्राप्तिक्रियाहित इति ।

स्यादन्तःकरणस्य स्वपरिणामद्वारेण विषयसंबन्धः आत्मनस्तु विषयविशेषावभासः कथमिति तदाह तेन विषयविशेषसंबद्धुमिति । सर्वचाविद्यावृततया अनभिव्यक्तस्वभावमपि चैतन्यमन्तःकरणं येनयेनावस्थाविशेषेण विवर्त्तते तेनतेनाकारेण व्यज्यते ऽयःपिण्डेनेव चतुष्कोणत्वाद्यवस्थाविशेषमापाद्यमानेन कृशानुरितिविषयसंसृष्टान्तःकरणावच्छिन्नं चैतन्यं तदाकारमवभासत इति भावः । ननु प्रमातृरूपावच्छिन्नं चैतन्यं तद्रूपेण भासतां कथं चैतन्यस्य विषयावच्छेद इति तदाह कर्म्मकारकमपीति । स्वव्यापाराविष्टमिति परिणामसंसर्गादापन्नजाड्याभिभवलक्षणयोग्यत्वमुच्यते । अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि चैतन्याभिव्यक्तियोग्यतामापादयतीति भावः ।

नन्ववच्छेदकभेदे चित्प्रकाशभेदात्कथं विषयावच्छिन्नानुभवस्य प्रमातृरूपावभाससंसर्गः असंसर्गे वा कथं मयेदमवगतमिति प्रमातृप्रमेयसंसर्गावभासिसंवेदनं स्यात् अनुभवभेदात् । एकस्मिन्संबन्धावगमे पदार्थयोरवभासायोगादिति तत्राह प्रधानक्रियाहितप्रमात्वस्थाविशेषावच्छिन्नाप † रोक्षतैकरूपामति । एकामित्यर्थः । परिणामस्योभयसंसर्गाद्व्यञ्जकाभेदेन व्यङ्ग्याविच्छेद इति भावः । ननूभयत्र चैतन्याभिव्यक्त्यविशेषे घटावच्छिन्नानुभवः प्रमाता किं वा ऽन्तःकरणावच्छिन्न इति न विशेषः स्यादिति नेत्याह ततश्चात्मनो ऽन्तःकरणावस्थाविशेषोपाधिजनितो विशेष इति । प्रमातेति वाक्यशेषः । कर्तुर्हि प्रमातृता न कर्मणः । तत्रान्तःकरणस्य कर्तृत्वात्तदवच्छिन्नः प्रमातेत्यर्थः । ननु चैतन्यस्यैकत्वे प्रमातैव फलमिति विरुद्धमापन्नमिति तत्राह विषयानुभवसंशब्दितो ‡ विषयस्यापरोक्ष्यैकरसः फलमित्यन्तःकरणावच्छि-

,, ,, न्नतया प्रमाता विषयावच्छिन्नतया फलमिति भावः ।

* अतिदूरं गमनेति २ पु० । † आपरोक्ष्यतैकरूपमिति १ पु० ।
‡ विषयस्यापरोक्ष्यैकरस इति ३ पु० ।

ननु क्रियाफलयोरन्तःकरणात्मसमवायिनोर्भिन्नाश्रयत्वं घटान्तःकरणविषयतया च भिन्नविषयत्वमिति क्रियाफलयोरेकाश्रयत्वैकविषयत्वनियमविरोध इति नेत्याह इति क्रियैकविषयता फलस्येति । * विषयतेत्याश्रयस्याप्युपलक्षणम् अन्तःकरणात्मनोरैक्याध्यासेनैकाश्रयत्वम् चैतन्यस्यापि घटावच्छेदादे † कविषयत्वमिति । ननु बुद्धिस्थमर्थं पुरुषश्चेतयत इति सांख्याः । तद्विरुद्धमात्मा स्वचैतन्योपरक्तं चेतयत इति तत्राह एवं चाहं कर्तेति । प्रथमं बुद्धिस्थमर्थं तदात्मतामापन्नः पश्चाच्चेतयत इत्यर्थः । उक्तं तावत्सर्वगतस्याप्यात्मनोऽविद्यावृतप्रकाशस्य परिच्छिन्नान्तःकरणपरिणामोपाध्यभिव्यक्त्यपेक्षया विषयविशेषं प्रति प्रमातृत्वम् । २४ २०

ननु केयमभिव्यक्तिः । आवरणाभिभव एव न स्वरूपातिशयः । ननूक्तोपाधिः किंप्रमाणकः उक्तं ह्रीर्द्धीर्भीरित्येतत्सर्वं मन एवेति । धीशब्दवाच्यज्ञानपरिणामवन्मनो विज्ञानं बुद्धिरिति । तदेवमुपाधिवशान्नियमेपि तदज्ञानात् यच्चोदितं चैतन्यस्य सर्वविषयाविशेषित्वात्सर्वमस्य युगपदवभासेतेति तत्परिहरति तच्च च प्रमातुः स्वयंज्योतिष इति । परिणामसंसृष्टकर्म्मोपाधिनियमान्नासंसृष्टेषु चैतन्याभिव्यक्तिरिति नैकस्य प्रमातुः सर्वविषयावभास इति भावः । ननु कर्म्मकारकेपि चैतन्यमभिव्यक्तं चेत् सर्वप्रमातृसाधारणतया सर्वेषामवभासतामिति नेत्याह कर्मकारकमपीति । एतत् प्रमातृचैतन्याभिन्नतयैवाभिव्यक्तं तद्विषयचैतन्यं न प्रमात्रन्तरचैतन्याभेदेनाभिव्यक्तमतो न सर्वेषामवभास्यत्वमित्यर्थः । ,, २४

ननु स्वयंप्रकाशमानस्य प्रदीपादिवत्स्वसंसर्ग्यशेषवस्तुप्रकाशित्वे प्राप्ते कथमहंकारोपाधिनियमः कल्प्यते । न चान्तःकरणपरिणामसंसृष्टविषयादन्यच्च चैतन्यमुपरक्तमपि न प्रकाशयतीति युक्तम् । प्रकाशसंसर्गस्यैव प्रकाशमानताभिधानाद्विषयान्तरेषु चैतन्यस्यासंगितया नोपराग इति चेत् अन्तःकरणेपि तर्ह्यसंगितया नोपराग इति तदुपाधिनापि न किंचिदपि प्रकाशेत । स्यादेतत् । अन्तःकरणावच्छिन्नो हि जीवः प्रतिबिम्बस्थानीयः परिच्छिन्नस्तत्संसृष्टमेव विषयं प्रकाशयेद् ब्रह्म तु बिम्बस्थानीयं सर्व्वगतत्वात्सर्वमव-

* विषयइति आश्रयस्याप्युपलक्षणमिति ३ पु० ।
† एकाभिन्नविषयत्वमिति ३ पु० ।

१४ २४ भासयिष्यति । नच ब्रह्मणि *सर्वदर्शित्वं मुखावदातत्ववत् जीवमनुगच्छति । जीवगतं वा किञ्चिज्ज्ञत्वं मुखश्यामत्वादिवन्न ब्रह्मानुगच्छतीति सर्वमुपपन्नमिति । नैतत्सारम् । तथा सति विषयावच्छिन्नचैतन्यस्य ब्रह्मचैतन्यतया ऽहङ्कारावच्छिन्नजीवानुषङ्गाभावात्सर्वज्ञत्वमिव विषयावभासोपि जीवस्य न स्यात् । ननु जीवोपाधेरन्तःकरणस्य विषयस्य परस्परान्वयादुभयावच्छिन्नमपि ~~चैतन्यमपि~~ चैतन्यमन्योन्यसंसृष्टमिति युक्तो जीवस्य विषयावभास इति । नैतदुक्तम् । तथा सति सर्वगतेन ब्रह्मणा नित्यसंसृष्टमन्तःकरणमिति तदुपाधौ जीवब्रह्मचैतन्याभेदाभिव्यक्तेर्ब्रह्मसार्वज्ञ्यं जीवस्य नित्यवत्प्रकाशेत ।

अथ मतम् । सर्वगतमपि चैतन्यमविद्यावृतत्वात् स्वयमपि तावन्न प्रकाशेत । नच स्वयमप्रकाशमानश्चैतन्यप्रकाशः प्रदीपवत् प्रकाश्यमवभासयितुं क्षमः । अङ्गुलिमाच्छादित्यवत् परिच्छिन्नेनाप्यज्ञानेन सर्वगतमपि चैतन्यं तिरोधीयते तच्चान्तःकरणोपरागेणावरणाभिभवात्तचैवाभिव्यक्तम् चैतन्यं किंचिदेव प्रकाशयतीति । तदपि न युक्तम् । कार्यभूतेनान्तःकरणेन स्वोपादानाज्ञानाभिभवायोगात् । तस्मान्न युक्तं किंचिदज्ञत्वे ऽहंकारोपाधिवर्णनमिति । अत्रोच्यते । युक्त एवायमुपाधिः सर्वगतस्यापि जीवस्यासङ्गितया सर्वज्ञसंयोगात्प्रकाशस्य च संयुक्तवस्त्ववभासित्ववद् ब्रह्म तु सर्वोपादानतया स्वात्माभिन्नं जगदात्मानमिवावभासयति नतु जीवो ऽनुपादानत्वात् । कथं पुनः सर्ववस्तुदेशाव्यवहिततया सर्वगतस्य विषयान्तरेष्वसङ्गितयाऽसंसृष्टस्यान्तःकरणसंसर्गिता संभवेत् ।

उच्यते । यथा गोत्वादयो जातिविशेषाः केसरादिमद्व्यक्त्यन्तरप्रदेशसंनिहिता अपि स्वभावविशेषादश्वादिव्यक्त्यऽसङ्गितया तैरनभिव्यक्ता अपि सास्नादिमत्पिण्डसङ्गितया ऽभिव्यज्यन्ते । यथा वा प्रदीपप्रभावाव्याकाशरसगन्धादिप्रदेशव्यापिन्यपि स्वभावविशेषात्तानि न† प्रकाशयन्ती रूपसंसर्गितया तदेव प्रकाशयति एवं चैतन्यमपि स्वभावविशेषादन्तःकरणे संसृज्यते नान्यचेति युक्तम् । यथा च केवलेन वह्निना न दाह्यमपि तृणादि अयःपिण्डसमारूढेन दह्यते तथाऽहंकारसमारूढेनात्मना केवलेनाप्रकाश्या अपि विषयाः प्रकाश्यन्त इति युक्तमहंकारोपाधिवर्णनम् ॥

* सर्वदर्शितत्वमिति १ पु० । † प्रकाशयति-इति ३ पु० ।

अथवा सोपाधिकत्वाज्जीवः परिच्छिन्नो न सर्वमवभासयति । जीवावच्छेदनिमित्तान्तःकरणपरिणामसंसर्गेकृताभिव्यक्तित्वाद्विषयावच्छिन्नचैतन्यस्य जीवचैतन्यता च न विरुध्यते । ब्रह्माकारपरिणतान्तःकरणसंसर्गाभावाच्च न नित्यवद् ब्रह्मणः प्रकाशप्रसङ्गः । नचान्तःकरणस्वरूपमात्रसंसर्गेणाभिव्यक्तिरङ्गीकृता तद्गतधर्मादीनामपि प्रसङ्गात् । जीवाकाराहंवृत्तिपरिणतान्तःकरणेन च जीवोभिव्यज्यते । *अन्यथा ऽसुषुप्तेः । अतः परिच्छिन्नत्वा † न्न सर्वविषयावभासिता । अथवा ऽज्ञानावृतःस्वयमप्रकाशमानतया विविधविषयानऽनवभासयन्नन्तःकरणोपरागादावरणतिरोधाने तत्रैवा ‡ भिव्यक्तस्तत्संसृष्टमेव विषयमवभासयति । दृष्टं च वृश्चिकवृत्तादिकार्यस्य गोमयमृदादिकारणस्वभावतिरोधायकत्वमिति सिद्धैवात्मनि प्रमातृत्वादिव्यवस्थेति ।

विषयस्य चैतन्यविवर्त्तत्वात्तदभिन्नमपि चैतन्यमहमवभासैकरूपमुक्तम् । तत्रापसिद्धान्तप्रसङ्गं चोदयति ननु नीलादिविषयोपि चेदिति । यत्किं- २५ १
चित्साम्यादपसिद्धान्ते सर्वसिद्धान्तसंकरः स्यात् । अस्ति चात्र महान्सिद्धान्तभेदः । क्षणिकाद्विज्ञानाद्वैदेनार्थक्रियासामर्थ्यसत्त्वशून्यं विषयमाहुर्विज्ञानवादिनः । तत्त्वदर्शिनस्त्वद्वितीयात्संवेदनादभेदेपि विषयस्य भेदेनाप्यर्थक्रियासामर्थ्यसत्त्वं स्थायित्वं चाबाधितमस्तीति वदन्ति । तत्र कथं सिद्धान्तसंकर इति वदितुं संवेदनैक्यं दर्शयति नैवम् ‖ परस्परव्यावृत्ताविति । अस्त्वेकरूपता प्रत्यभिज्ञानाद्वैदेपि घटसंवित्पटसंविदित्यवभासत इति तत्राह विच्छेदावभासेपीति । स्वरूपप्रत्यभिज्ञा परोपाधिविच्छेदेन न बाध्यत इति भावः । नन्वेकत्वेपि संविदां विषयाभेदः किं न स्यादिति तत्राह यदि स्यादिति । अनुवृत्तस्य व्यावृत्तान्नाभेदोनुवृत्तत्वादाकाशघटादिवदित्यनुमानमुक्तम् । इदानीं प्रत्यक्षेपि विषयसंविद्भेद इत्याह किंच तैरपीति । नीलात्मकसंविदिति नीलमेवोच्यते । युगपद्विषयविषयिसंविद्द्वयानभ्युपगमात् । प्रत्यगवभास इति । अहं संवेदनमात्रमहं नीलं पश्यामीति कर्तृकर्मतया भेदः प्रत्यक्ष इत्यर्थः । अत्र विज्ञानवादी चोदयति नैतद् द्वयोरपीति । अयं भावः । ,,

* अन्यथा जीवस्य सुषुप्तेरिति २ पु० । + न जीवस्य सर्वविषयेति २ पु० ।
‡ अभिव्यक्तं तत्संसृष्टेति १ पु०, अभिव्यक्ततत्संसृष्टेति २ पु० ।
§ सामर्थ्यमत्वेति ३ पु० । ‖ परस्पराव्यावृत्ताविति १ पु० ।

संविदोन्यच्चेन्नीलं न तत्संवेदने ऽवभासेत । भासते चेत्सर्वं किमिति नावभासते विशेषसंबन्धाभावात् । नीलस्य संविदो जनकता विशेषसंबन्ध इति चेन्न इन्द्रियस्यापि विषयताप्रसङ्गात् । तस्मात्स्वाभाविकासाधारणाभेदसंबन्धादेव विज्ञाने नीलमवभासत इति । सिद्धान्ती तु भेदावभासोपि प्रत्यक्षो युक्त्या
२५ ८ कथमपह्नूयत इत्याह कथं पुनरिदमहं जानामीति । विज्ञानवादी तु नैतत्त्रयमेकसंवित्प्रतिभासि किंतु संवित्त्रयमेतत्क्रमवर्तीति परिहरति नायं तदवभास इति । क्रमवर्त्तित्वे अन्यसंवित्काले अन्यन्नावभासेत इदं तु चितयं युगपत्प्रत्यक्षमेवावभासते ततः प्रत्यक्षविरुद्धः क्रम इत्याह सिद्धान्ती कथं पुनस्तेष्विति । आह विज्ञानवादी तद्वासनासमेतसमनन्तरप्रत्ययसमुत्थमिति । अहमित्यहंकल्पनोपारूढं कदाचिद्विज्ञानं भवत्यनन्तरं चेदमिति * विषयविकल्पितं विज्ञानं भवति । ते एव विज्ञाने वासनासजातीयज्ञानस्य पूर्ववृत्तसजातीयज्ञानमेव वासना नान्यः संस्कार इत्युक्तम् । तच्च वासनाद्वयसमेताज्जानामीति क्रियाविकल्पप्रत्ययात्कारणचितयानुरूपेणाहमिदं जानामीति विषयक्रियाहंकल्पनाविकल्पितं आकारमेकं विज्ञानमुत्पद्यत इत्याह
आह सिद्धान्ती किं पुनरेवमिति । नहि केवलमहमिति चेदमिति वा जानामीति वा प्रत्यया दृष्टाः । किंतु प्रथमत एव प्रत्ययोहमिदं जानामीति कर्तृकर्म्मानुभवात्मको दृष्टः । तस्माद्यथाप्रतिभासमेवाहमिति विज्ञानाद्विन्नमर्थक्रियासमर्थं नीलवस्त्वनुमन्तव्यमिति भावः । सत्यम् नानुभावमाश्रित्य संवेदनादभिन्नं नीलं ब्रूमः किंतु † विज्ञानेन नीलस्य प्रतिभासान्यथानुपपत्त्या । कथम् । स्थायित्वे हि विज्ञानविषययोः क्रियानिमित्तासाधारणपरस्परसंबन्धादसाधारणो विषयावभासः स्यात् । क्षणिकस्य त्वागन्तुकसंबन्धाभावे यदि स्वाभाविकाभेदसंबन्धोपि न स्यात् । तच्च चैतन्येनासंसृष्टस्य प्रतिभास एव न स्यात् । अतः प्रतिभासानुपपत्तिरभेदं साधयतीति विज्ञानवादी वर्णो
,, १३ यति क्षणविध्वंसिनः क्रियानुपपत्तेरिति । तच्च प्रत्यक्षेण विज्ञानानां क्षणिकत्वमुच्यते किंवा ऽनुमानेन । ननु प्रत्यक्षेण तथा हि । वर्त्तमानावभासिज्ञानं स्वात्मनो ऽवर्त्तमानाद्व्यावृत्तिमपि गमयति । नीलज्ञानमिवानी-

* विषयकल्पितमिति २ पु० । † विज्ञाने नीलस्येति २ पु० ।

लव्यावृत्तं नीलमतो वर्तमानक्षणमात्रं विज्ञानं * प्रत्यक्षमिति । न तावत्प्रत्यक्षेण विज्ञानभेदावभास इत्याह यद्येवमहमिति संविद इति । २५

ननु सत्यपि भेदावभासे अतिसादृश्यान्न स्पष्टमवभासत इति शङ्कते अथात्यन्तसादृश्यादिति । कोयमभिप्रायः । यदि तावत्संविदोन्यो भेदो ज्ञानान्तरगम्यश्च सादृश्यदोषात् स्पष्टं नावभासत इत्यभिप्रायः । तदा धर्मिप्रतियोगिसंविदोः संविदन्तराविषयत्वात् न तयोर्भेदग्रहणं स्यात् विषयत्वे वा धर्म्मिप्रतियोगिभेदाख्यचितयमपि भेदसंवेदने कल्पितं तदभिन्नं वा स्यात् । अथ संवित्स्वरूपमेव भेदः संवेदनमेव तत् ज्ञानमिति तत्राह संविदोपि चेदिति । अपि च ऐक्यप्रतिभासे सादृश्यकल्पनं प्रमाणविरुद्धं भिन्नयोरैक्यभ्रमश्च सादृश्यकल्पनायां प्रमाणं तदभावाच्च न सादृश्यसिद्धिरित्याह अपि च तद्रूपप्रतिभास इति । नन्वैक्यावभासस्य व्यामोहत्वान्न सादृश्यकल्पना प्रमाणविरुद्धा ऐक्यभ्रमश्च भिन्नेषु सादृश्यमन्तरेणानुपपन्न इत्यर्थापत्तिमूला च सादृश्यकल्पना अतः सिद्धं सादृश्यमित्याह पूर्ववादी तद्रूपप्रतीतेर्व्यामोहत्वादिति । मैवम् ऐक्यभ्रमसादृश्यसिद्धयोरितिरेतराश्रयत्वादिति परिहरति नेतरेतराश्रयत्वादिति । नन्वैक्यप्रतिभासप्रामाण्यं न स्वतः सिद्धमिति किंतु सादृश्यस्य निर्मूलत्वप्रमाणविरुद्धत्वापेक्षया सादृश्यस्य च निर्मूलत्वप्रमाणविरुद्धत्वमैक्यप्रतिभासस्य प्रामाण्यापेक्षयेति तुल्यं तवापीतरेतराश्रयत्वमिति चोदयति स्यादेतत् अव्यामोहेपीति । ऐक्यप्रतिभासो न सादृश्याभावापेक्षः किंतु स्वत एव २६
प्रमाणमिति परिहरति नैतत्स्वारसिकमिति । ननु सादृश्यमपि स्वत एव सिद्धमित्याशङ्क्याह न तु सादृश्यकल्पना स्वत इति । कुतस्तर्हि सादृश्यसिद्धिरित्यत आह अप्रामाण्यपूर्विकेति । ऐक्यभ्रमो हि भिन्नेषु सादृश्यं कल्पयतीति भावः । ॥५॥

ननु केयं प्रत्यभिज्ञा नाम । यत्सामर्थ्यबलात्संविदैक्यं प्रतीयते । पूर्वानुभवसंस्कारसहितादिदानींतनवस्तुप्रमितिकारणाज्जातमेकस्य कालद्वयसंबन्ध † विषयकं प्रत्यक्षज्ञानं प्रत्यभिज्ञेति चेत् । न तर्ह्यात्मनि सा संभवति । कथम् । विज्ञानस्वभावस्य ह्यात्मनः स्थायित्वे स्वयंप्रकाशस्य ज्ञानान्तरागम्यत्वात्तद्विनाशसंस्काराभावात्स्वरूपस्य चाविनाशादविनाशिनः संस्काराभा-

* प्रत्यक्षमित्यर्थ इति ३ पु० । † कप्रत्ययो नास्ति २, ३ पु० ।

वात्स्वयंप्रकाशस्येदानींतनस्वरूपव्यतिरिक्तप्रमाणकारणाभावाच्च न प्रत्यभिज्ञाकारणं तावदात्मनि संभवति । नच स्वरूपज्ञानमेव प्रत्यभिज्ञा । तस्य प्रदीपप्रभाववर्त्तमानप्रकाशिनः पूर्वापरपरामर्शात्मकतायोगात् । सोहमिति च विषयाकाराभ्युपगमे स इत्यहमिति *चाकारभेदेन विषयभेदाज्ज्ञानभेदसिद्धेः । तस्मान्नात्मनि प्रत्यभिज्ञेति युक्त्या व्यामोहत्वसिद्धिरिति ।

७. अत्रोच्यते । अन्तःकरणविशिष्टे तावदात्मनि प्रत्यभिज्ञानं ब्रूमः न निष्कलङ्कात्मस्वरूपमात्रे तस्य मोक्षावस्थायिनः शास्त्रैकगम्यत्वात् संसारास्थायामन्तःकरणविशिष्टरूपानपायात् तस्यैव प्रत्यभिज्ञया स्थायित्वाभिधानात् तच्च चान्तःकरणजन्याहंप्रत्ययाधीनत्वाद्विशिष्टात्माभिव्यक्तेः । पूर्वकालविशिष्टात्मानुभवनिमित्ताहंवृत्तिसंस्कारसहित†मन्तःकरणमेवेदानींतनात्माभिव्यक्तिनिमित्तं सत् पूर्वापरकालविशिष्टात्मविषयं प्रत्यभिज्ञानमुत्पादयति । ननु पूर्वापराभिज्ञयोरविषयतयाभिव्यक्तस्यात्मनः कथं प्रत्यभिज्ञाविषयत्वमिति । नैष दोषः । यथा संवेदनस्य स्वसंविदितरूपस्यापि कालान्तरे स्वसंस्कारजनितस्मृतिविषयत्वं तद्वदिहाप्यभिज्ञायामविषयस्यापि प्रत्यभिज्ञाविषयत्वं न विरुध्यते ।

ननु स्वयंप्रकाशस्य विषयतैवानुपपन्ना । मैवम् । देशकालान्तःकरणविशिष्टतया विषयतोपपत्तेः । यथा धर्म्मस्यागमैक‡समधिगम्यस्यापीदानीं फलदानायोन्मुखीभावादिलक्षणधर्म्मविशिष्टतया वर्त्तमानफलोदयलिङ्गादिगम्यत्वम् तद्वत् । नन्वेकस्यैवात्मनः प्रत्यभिज्ञायां कथं कर्तृकर्म्मतया युगपद्विरुद्धरूपद्वयान्वयः । ननु सर्ववादिनां देहव्यतिरिक्तात्मानुमानविषयतया कर्तृकर्म्मभावः संप्रतिपन्नः । तन्न । अनुमानादौ विषयस्य कारकताऽभावात् आकारमात्रतया विषयत्वात् तच्च कर्तृतैवात्मनो न कर्म्मता । प्रत्यक्षे तु पुनर्विषयस्यापि स्वविषयज्ञानजनकतया कर्म्मकारकत्वात्प्राप्तैवात्मनो युगपदेकस्यां क्रियायां विरुद्धरूपद्वयापत्तिरिति ।

उच्यते । अन्तःकरणविशिष्टतयात्मनो ज्ञातृत्वं पूर्वापरकालविशिष्टतया च ज्ञेयत्वमित्युपाधिभेदादविरोध इति । सोहमिति च प्रत्यभिज्ञायाः स्वानुभवसिद्धत्वाद्यथाकथंचिन्निमित्तं कल्पयितव्यम् । व्यवहाराविसंवादाद्वा-

* चकारस्थाने वाकारो २ पु० । † अन्तष्करणेति १ पु० । ‡ समाधिगम्यस्येति १ पु० ।

न्तित्वायोगात् । नच सोहमित्याकारभेदादर्थभेदेन ज्ञानभेदो युक्तः । विज्ञानं क्षणिकमित्याकारभेदेनार्थभेदाद्विज्ञानस्य क्षणिकताभावप्रसङ्गात् । सत्यम् । विज्ञाने क्षणिकत्वादिधर्मोपरागो विकल्पव्यवहारमात्रं न सत्यतोस्तीति चेत्तथा स्थायित्वादिव्यवहाराश्च कालादिधर्मोपाधित्वाद्विज्ञाने विकल्पव्यवहारा इत्यविशेषः । इयांस्तु विशेषः । सति काले स्थायित्वादिविकल्पप्रत्ययाः सोहमित्याद्यनुभवसिद्धा व्यवहाराऽविसंवादिनोर्थक्रियासामर्थ्याश्च दृश्यन्ते न तथा क्षणिकत्वादिव्यवहारा इति ।

अत्र प्राभाकरा मन्यन्ते । नैवम्प्रत्यभिज्ञायां विषयत्वेनायमात्मा सिद्ध्यति किंत्वाश्रयत्वेनेति । तदयुक्तम् । पूर्वापरकालविशिष्टस्य आत्मनः क्षणमात्रवृत्तिप्रत्यभिज्ञानाश्रयत्वायोगात्तदाश्रयतया स्थायित्वसिद्ध्यभावात् । ननु पूर्वकालसंवेदनमिदानीमनुस्मर्य्यमाणं स्वाश्रयं तदानीन्तनमात्मानं साधयति स्मृतिश्च स्वाश्रयतयेदानींतनमात्मानं साधयतीति कालद्वयविशिष्टात्मसिद्धिरिति । नैतत्सारम् । स्मृतिपूर्वानुभावौ हि तत्तत्कालमात्मानं साधयतः अभिज्ञाप्रत्यक्षद्वयवदेकस्य कालद्वयसंबन्धः केन सिद्ध्यतीति वक्तव्यम् । पूर्वापरसंविद्द्वयमेव साधयतीति चेत् । न । घटादिष्वभिज्ञाद्वयव्यतिरेकेण प्रत्य * भिज्ञापादनात् । किंच । न तावत्स्वयमेव संविद्द्वयं साधयत्येकैकस्य कालद्वयवदात्माश्रयत्वाभावात् । न च संभूय पूर्वापरसंविद्द्वयं तद्वन्तमात्मानं साधयत्यन्योन्यस्यान्योन्यसंविद्विशिष्टात्मश्रयत्वाभावात् अथ संविद्द्वयमेव पूर्वापरसंविद्द्वयाश्रयात्मैक † त्वविषयसंविदन्तरमुत्पादयति सिद्धं तर्हि प्रत्यभिज्ञानमात्मविषयम् । किंच । अनुभूतं मयेत्याश्रयविशिष्टपूर्वसंविदनुस्मृतेः स्वानुभवसिद्धत्वात्स्मर्यमाणतयैवेदानीं पूर्वानुभूतात्मसिद्धिर्न पूर्वसंवेदनाश्रयतया तस्याऽविद्यमानस्येदानीमसाधकत्वात् । स्वयंप्रकाशमानं हि संवेदनमात्माश्रयं साधयति न स्मृतिविषयतया परप्रकाश्यम् अन्यथा धर्मादीनामपि परतःसिद्धानां स्वाश्रयात्मसाधकत्वप्रसङ्गात् । तस्मात्सिद्धमात्मनि प्रत्यभिज्ञानमिति ।

स्यात्तर्ह्यनुमानात्क्षणिकत्वमिति घटादौ साधयति अथान्ते क्षयदर्श- २६ ९
नादिति । घटस्य विनाशान्तरपूर्वक्षणविशिष्टसत्त्वमन्त इत्युच्यते । तस्य स्वस-

* प्रत्यभिज्ञोपपादनादिति प्रागभूत्तत्र प्रत्यभिज्ञापादानादिति शोधितं २ पु· ।
† त्वप्रत्ययो नास्ति ३ पु· ।

त्तक्षणादुत्तरक्षणे विनाशो दृष्टः । तच्चान्त्यक्षणावच्छिन्नघटसत्त्वात्पूर्वपूर्वक्षणावच्छिन्नघटसत्त्वान्याऽऽदिरित्युच्यन्ते । तान्यपि स्वसत्तात्क्षणादुत्तरक्षणे विनाशव्याप्तानि घटसत्त्वादन्त्यक्षणावच्छिन्नघटसत्त्ववदित्यनुमानम् । ततश्च सतेऽनन्तरं विनाशात्क्षणिकत्वसिद्धिरिति । क्षणिकेष्वैक्यं सादृश्यनिबन्धनमिति

८ तच्च प्रत्यनुमानमाह आदौ सत्तादर्शनादित्यादि । घटसत्तावच्छेदकाः* क्षणा उच्यन्ते । अन्त इति । विनाशावच्छेदकत्वेनाभिमताः क्षणास्तदन्त्यक्षणाः सर्वे घटसत्तया व्याप्ता इति साध्यते कालत्वात्सत्तावच्छेदककालवदिति प्रत्यनुमानम् । अभावानुभवविरुद्धमन्ते सत्तानुमानमिति चोदयति क्षयानुभवेति । तर्ह्यन्त्यक्षणात्पूर्वक्षणावच्छिन्नघटसत्त्वानामनन्तरक्षयानुमानमपि प्रत्यभिज्ञाविरुद्धमिति परिहरतीहापीति । क्षयानुभवोऽभिज्ञानुमानं बाधते न प्रत्यभिज्ञानुमानाद् दुर्बलेति नेत्याह नह्युभयोरिति ।

सर्वे भावाः क्षणिका अर्थक्रियाकारित्वात् । यदक्षणिकं न तदर्थक्रियाकारि यथा शशविषाणमित्युनुमानान्तरं दर्शयितुं स्थायिनोऽर्थक्रियानुपपत्तिमाह अथ मन्येत योसौ स्थिरत्वाभिमत इत्यादिना । ननु स्थिरस्यैव निमित्तसंयोगादन्यथाभूतस्य क्रियापूर्वकं कार्य्यमुत्पादयितुं सामर्थ्यं न क्षणिकस्यैति सिद्धान्ती चोदयति कथमयोग इति । इत्थमयोग इत्यादिः परिहारः । क्रमेणेति । अनेकानि कार्याणि सातत्येन कुर्यादित्यर्थः । एकं वाऽनेकं वा कार्यं सकृत्कृत्वो† परमत इत्याह योगपद्येनेति । क्रमपक्षं दूषयति न तावदिति । अनेकानि कार्याणि कर्तुं समर्थश्चेत्युष्कलकारणस्य भावादेकस्यानेककार्यदर्शनाच्च सकृदेव कुर्यादिति भावः । द्वितीयं पक्षं दूषयति नापि योगपद्येनेति । अर्थक्रियाकारित्वलक्षणत्वात्सत्त्वस्येति भावः । अतः सकृत्कर्तुः कालान्तरे पुनः कर्तृत्वे निमित्ताभावादकतृत्वे वा सत्त्वात्सकृदेव सत्त्वमित्युपसंहरति अतोर्थक्रियाकारित्वादेवेति ।

सिद्धान्ती तु स्थायिनः सकृदेव कार्यं कृत्वा तूष्णींभूतस्यापि नासत्त्व-
८ प्राप्तिः सत्त्वस्यार्थक्रियाकारित्वलक्षणत्वाभावादित्युपपादयति अथ केयमित्यादिना । तत्राह स्वविषयज्ञानजननमिति । युक्तं बाह्यर्थानामेतादृशं सत्त्वं

* क्षणादुच्यन्ते–इति २ पु०, क्षणा उच्यन्त इति उपकल्पितमास्ते ३ पु० ।

† उपरमत इति १, २ पुस्तकेष्वस्ति, उपरमतीति तु न्याय्यम्·उपरमते इत्याहेत्युपकल्पितं ३ पु·

विज्ञानानां तु स्वविषयविज्ञानाजनकत्वान्न सत्त्वलक्षणमिति दूषयति प्राग्रं २६
तर्हि सर्वासामिति । नन्वेकसन्तानज्ञानानामन्योन्यविषयविषयिताभावेपि पुरुषान्तरज्ञानस्य विषयतया पुरुषान्तरज्ञानं जनकमित्यर्थक्रियालाभः संविदामिति नेत्याह न सन्तानान्तरेपीति । पुरुषान्तरज्ञानं प्रति पुरुषान्तरज्ञानस्याप्रत्यक्षत्वादनुमेयत्वादिति भावः । अनुमानज्ञानविषयत्वात्तर्हि सन्तानान्तरज्ञानस्य सन्तानान्तरज्ञानं जनकमिति नेत्याह अनुमानेपीति । प्रत्यक्षमेवार्थजन्यं नानुमानादीति ते मतमित्यर्थः । ननु सर्वं संवेदनजातं सर्वज्ञज्ञानस्य विषयतया जनकं भवति तस्य सर्वविषयप्रत्यक्षत्वादित्यत आह * न सार्वज्ञेपीति । साक्षादिति । सहविज्ञानोपप्लवैरव्यवधानेन सर्वज्ञज्ञानोपरक्ततया तदभेदेनेत्यर्थः । † तच्च हेतुः । संसारसंविदेकरूपत्वप्रसङ्गादिति । संविद्विषययोरभेदोपगमात्सांसारिकज्ञानैः सोपप्लवैः सर्वज्ञज्ञानं दूषितं स्यादिति भावः । ननु सर्वोपप्लवोपरक्तमपि तत्त्वज्ञानेन बाधितत्वान्न दोषमावहति । न तावत्तदेव ज्ञानं सोपप्लवं बाधते । प्राप्तिबाधयोरेकस्मिन् क्षणे ऽनुपपत्तेः । ज्ञानान्तरस्य तु न पूर्वज्ञानोपप्लवो विषयो येन तदनुवादेन बाधः स्याद्विषयत्वे च बाधकज्ञानेप्युपप्लवानामभेदः स्यात् । तर्हि विनैवोपप्लवैः ‡ सार्वज्ञे ज्ञाने विज्ञानान्युपरज्यन्त इति नेत्याह अतदूपत्व इति । सर्वज्ञस्य लौकिकोपप्लवा § नवभासनादुपदेशायोग इति भावः ।

अथ न स्वविषयज्ञानजननमर्थक्रिया किंतु सजातीयलक्षणान्तरोत्पाद इति चोदयति अथेति । उत्तरमाह चरमक्षणस्यासल्लक्षणत्वप्रसङ्ग इति । अयमर्थः । अहमिति संतानपतितानि विज्ञानानि स्थायित्वानुसंधानकल्पनाभ्यां रागादिदोषैर्विषयैश्चोपप्लुतानि पूर्वपूर्वसजातीयविषयविज्ञानलक्षणसंस्कारेभ्य उत्तरोत्तराण्युत्पद्यन्ते । तच्च सर्वमिदं क्षणिकमिति भावनया ऽनादित्वकल्पना निवर्तते । स्वलक्षणभावनया द्रव्यगुणशब्दकर्मविशेषणविशेष्यकल्पना विनश्यति । दुःखमिति भावनया रागादिदोषप्रवृत्तिसुखदुःखोपप्लवाः क्षीयन्ते । शून्यमिति भावनया विषयोपप्लवविगमः । ततश्च भावनाभेदैश्चतुर्भिश्चतुर्विधसंस्कारविरोधिभिश्चतुर्विधोपप्लवे क्रमेण मन्दीकृते ,,

* न सर्वज्ञेऽपीति २ पु०, न सर्वज्ञज्ञाने–इति ३ पु० ।
† अत्र हेतुरिति ३ पु० ।
‡ ज्ञाने–इति नास्ति २ पु० ।
§ अनवभासत्वादिति ३ पु० ।

भावनाप्रकर्षपर्य्यन्तात्समनन्तरप्रत्ययात्सर्वोपप्लवविरहिविज्ञानमुत्पद्यते । तत्संसारसन्तानस्यान्त्यत्वाच्चरममिति तस्य कार्यान्तराभावादऽसत्त्वप्रसङ्गात्क्रमेण सर्वमसदेव पूर्वं स्यादिति । ननु चरमक्षणोपि स्वसन्तानक्षानान्त-
२४ राभावेपि सर्वज्ञज्ञानं विषयतया जनयतीति नेत्याह नच * सार्वज्ञज्ञानजननेति । तुल्यस्वभावयोः कार्यकारणभाव एकैकसन्तानता नाम चरमक्षणसर्वज्ञज्ञानयोर्विशुद्धतया तुल्यस्वभावयोः । कार्यकारणभावादवि-
१ च्छिन्नः संतान इति भावः । मा भूत्संतानविच्छेद इति नेत्याह मुक्त्यभावप्रसङ्गादिति । संतानविच्छेदो हि मुक्तिरभिप्रेतेति भावः । अथ सर्वज्ञसंतानस्य तुल्यसंतानस्य तुल्यस्वभावतया जनकत्वात्तत्संतानैक्यमेव मुक्तिरिति । तर्हि विषयतया जनकत्वमेव नास्तीत्याह नच संवित्संविदो विषय इति । प्रत्यक्षत्वं विषयशब्देनोच्यते पुरुषान्तरसंवेदनस्यानुमेयत्वात् । अथवा । प्रत्यक्षस्यैव संवेदनस्य देहान्तरसंबन्ध एवानुमीयत इति सर्वप्रमाणाविषयः संविदिति । अथवा संविदात्मना भेदाभावादित्ययमर्थः । संवित्संविदन्तरान्न संविदाकारेण भिद्यते प्रतियोगिनोऽसंवित्त्वप्रसङ्गादेका संवित्स्यात् । असंविदाकारेण भेदेपि संविदेकैव स्यादिति न संविदां विषयविषयिभाव इति ।

किंचेति । अर्थक्रिया नाम कारणसत्त्वे हेतुः प्रतीतिनिमित्तं वेति विकल्प्य हेतुत्वे दूषणमाह स्वकारणनिष्पन्नस्येति । कार्यात्प्रागेव कारणस्य निष्पन्नत्वादित्यर्थः । नच निष्पन्नमप्यर्थक्रियातः पूर्वमसदिति शक्यं वक्तुम् । शशविषाणतुल्यत्वेनाकरणत्वप्रसङ्गात् । प्रतीतिपक्षे अनवस्थादूषणमाह तच तस्या अन्यत इति । ननु कार्यमर्थक्रिया नाम ज्ञानानि च पूर्वेषामुत्तरोत्तराणि कार्य्याणि स्वयंसिद्धानीति न प्रतीत्यनवस्थेति चोदयति ननु स्वज्ञानार्थक्रियाया इति । तर्हि कार्यकारणभूतानां ज्ञानानां स्वयंसिद्धत्वान्नार्थक्रियासत्तावगतिनिमित्तमित्याह न तर्ह्यर्थक्रियात इति । मा भूत्कारणभूतं ज्ञानं कार्यभूतज्ञानाधीनप्रकाशं स्वयंप्रभत्वात् तथापि स्वयं स्वेनैवावभासत इति
६ स्वयमेव स्वस्यार्थक्रियेति नेत्याह नहि स्वरूपमेवेति । तस्मान्नार्थक्रियाकारित्वलक्षणं सत्त्वं किंतु स्वाभाविकमिति सकृत्कार्यं कृत्वा तूष्णींभूतस्यापि स्थायिनः सत्त्वं न विरुध्यत इति ।

* सर्वज्ञज्ञानेति ३ पु० ।

क्रमेणेति । शक्तस्यापि सहकारिसन्निधानविशेषक्रमापेक्षया कार्यक्रमो युज्यत इत्याह स्थायिनोपीति । शक्तस्य सहकारिकारणापेक्षामपलपति अथ कारणस्येति । गूढाभिसन्धिरुत्तरमाह अकारणस्यापि नतरामिति । मा भूत्तर्हि शक्तस्याशक्तस्य च सहकार्यपेक्षेति तत्राह असहकारि विश्वं स्यादिति । शक्तस्यैव सहकार्यपेक्षया कार्यकरत्वानुभवविरोध इति भावः । अशक्ता एव पदार्थाः सामग्रीलक्षणकारणोत्पत्तौ परस्परमपेक्षन्त इति नानुभवविरोध इत्याशङ्कते अथाकारणं कारणोत्पत्तय इति । कार्यं प्रत्यऽशक्ता अपि पदार्थाः सामग्रीकारणं प्रति शक्ता वा न वेति * विकल्पयति अथ तत्कारणस्येति । उभयत्र दूषणं कारणं † चेदिति अथ नापेक्षेत्युक्तार्थम् । ननु शक्ताऽशक्तयोरपेक्षाभावे कथं ‡ सहकार्यनुभवः कथ्यते । ननु कार्यस्याप्यसत्त्वाविशेषात्सर्वस्माज्जन्म किं न स्यात् । कारणस्य वा विशेषसंबन्धहीनस्य सर्वस्य जनकता किं न स्यादित्यव्यवस्थायां कथं कार्यकारणभावमात्रं त्वया व्यवस्थाप्यते । § अथाऽन्वयव्यतिरेकसामर्थ्यात्कार्यकारणनियम इति । सहकारिणोपि तथेत्याह तस्मादाद्यैव हेतोरिति । क्व तर्हि सहकार्युपयोग इति तत्र मतान्तरमुपन्यस्य पूर्ववादिनं दूषयति यस्तु मन्यते सहकारिजनितविशेष इति । यः सहकारिणमपेक्षते स स्वात्मनि विशेषोत्पत्तौ शक्तो वा न वेति विकल्प्याऽहेतुत्वे दूषणमाह विशेषोत्पत्ताविति । नह्यशक्तं सहकारिसहस्रसन्निधानेपि किंचित्कुर्वद्दृष्टमित्यर्थः । हेतुत्वे दूषणमाह अथ हेतुरिति । तत्र प्रथमविशेषस्य विशेषान्तरापेक्षया ऽनवस्थाप्रसङ्गदोषपरिहाराय किंचिदेव सहकारिभिः कारणे विशेषो जन्यते कार्य्यजननाय । क्वचित्तु कारणे विशेषजन्मानपेक्षमेव सहकारिभिः कार्य्यं जन्यत इत्यव्यवस्थां स्वयमेव दर्शयति अथ मतं न सर्वं कार्यमिति । तावत्येवाभवदुच्छूनता विशेषे सत्येवेत्यर्थः । तर्हि शक्तिमता कारणेन स्वात्मन्यनुपकुर्वन्नपि सहकार्यपेक्ष्यत इति त्वयैव स्वपक्षो निरस्त इति परिहरत्यनुपकुर्वन्नपि तर्हीति । आह साङ्ख्यात्क्षणिकवादी नानुपकुर्वन्निति । सर्वस्य सहकारित्वप्रसङ्गादित्यर्थः । क्व तर्ह्युपकरोति तदाह स्वरूपे तु

* विकल्पयति इत्यर्थेति १ पु० । † चेदित्यादि । अर्थेति ३ पु० ।
‡ सहकार्यानुभाव इति १ पु० । § यथान्वयेति १ पु० ।

१ नोपकरोतीति । कार्यं हि सहकारिणा जायमानमुपाक्रियत इत्यर्थः । तांह क्षणिकस्यैव नित्यस्यापि कार्यस्योपकाराय सहकार्यपेक्षा न विरुध्यत इति परिहरति नित्योपि तर्ह्यनाधेयातिशय इति । तदेव प्रपञ्चयति * यथैव क्षणिको भाव इति । सामग्रीसाध्यत्वादिति बहुकारकव्यापारसाध्यत्वादित्यर्थः । † पुनश्चोपकार्य्यमेवोपकारकं सहकारिणमपेक्षते नानुपकार्यं कारणमित्याशङ्क्य अथ मतं क्षणिकोपि नैवापेक्षत इति । यदन्यसंनिधौ भवति तदपेक्षत इति सम्बन्धः । नित्येपि तर्हि कारणे कार्यमेव सहकारिणमपेक्ष्य क्रमेण भविष्यतीति नेत्याह नित्यस्य तु जनकस्येति । सहकारिणां कारणस्य च सर्वदा भावात्सर्वदाकार्य्यजननादित्यर्थः । ननु सहकारिणामपि संनिधानमपेक्षत इति नेत्याह को हेतुरिति । कारणसहकारिणोरपि सम्बन्धः कार्यं चेत्सोपि कारणसहकारिभ्यां सदा भवतीति कार्यजन्म सदा भवेदित्यर्थः । ननु क्षणिकादपि सहकारि सव्यपेक्षात्किमिति सदा कार्यं न जायते विशेषवति सन्तानक्षणे कार्यजन्माभावात् पूर्वोत्तरकालयोर्विशेषाभावादिति तत्राह ‡ क्षणिकस्तु यो जनक इति ।

१० इदमयुक्तं वर्त्तत इति । अयमर्थः । न तावदग्निस्वलक्षणस्यैव धूमस्वलक्षणं प्रति कारणत्वमवगन्तुं शक्यम् । क्षणमात्रापवर्गिणोरन्वयव्यतिरेकबुद्धिद्वयकालावस्थानायोगात् । किंत्वग्निधूमसन्तानयोरन्वयव्यतिरेकाभ्यामग्निस्वलक्षणानि धूमस्वलक्षणानां कारणानीति सामान्योपाधौ प्रमातव्यम् । तचाग्निस्वलक्षणानां विशेषाभावादङ्गारगतादप्यग्निस्वलक्षणाद् धूमजन्म किं न स्यात् । § काष्ठस्वलक्षणाभावादिति चेत् न । तस्यापि स्वसंताने विद्यमानत्वात् । अग्निकाष्ठस्वलक्षणसंसर्गापेक्षा विद्यत इति चेन्न । संतानद्वयनित्यत्वे तन्निमित्तसंनिधानस्यापि सदा प्रसङ्गात् । तचाप्यन्यापेक्षेति चेदिहापि ‖ नित्येऽपि सहकारिसंनिधानस्य कदाचिद्भावान्नित्यवत्कार्यजननप्रसङ्गो न युक्तो वर्त्तत इति । ननु सहकारिसन्निधानादेव कार्योदयनियमेपि धूमकाष्ठसन्तानयोर्नोपकार्योपकारकसम्बन्ध इत्याह किमचायुक्तमिति । परिहरति सति नियम इति । सहकारिणां कार्येणान्वयव्यतिरेकनियमेपि नोप-

* तथैवेति क्वचित् । † पुनश्चोपकार्यं कार्यमेवेति २, ३ पु० ।
‡ क्षणिकास्तु-इति १, २ पु० । § काष्ठलक्षणेति १ पु० । ‖ अपिशब्दो नास्ति २ पु० ।

कार्योपकारकसम्बन्ध इत्युक्तिर्विरुद्धेत्यर्थः । नन्वन्वयव्यतिरेकनियमस्योपकार्योपकसम्बन्धव्याप्तिः क्व दृष्टेति दृष्ट्वा कार्यकारणयोरित्याह तथाहि यः २८
कश्चिदिति । उपकार्योपकारकसम्बन्धाभावे जलधूमयोरिवान्वयव्यतिरेकनियमानुपपत्तेरिति भावः ।

ननु ययोरेवाग्निधूमस्वलक्षणयोः कार्यकारणभावो दृष्टस्तयैवान्वयव्यतिरेकनियमो नाग्निधूमसंतानयोः येनाविशेषात्सर्ववह्निस्वलक्षणेषु धूमस्वलक्षणकारणेषु काष्ठसंयोगासंयोगाभ्यां धूमभावाभावदर्शनेन सहकारिकारणेष्वन्वयव्यतिरेकनियमो ऽपेक्षालक्षणोपकार्योपकारकसम्बन्धश्च स्यात् तस्मान्न कार्यकारणस्वलक्षणादन्यच सामान्योपाधौ कार्यकारणयोग्यताप्राप्तिरिति तत्राह एवं हि कार्यकारणभावसिद्धिरि * त्यादिना । सामान्योपाधौ हि व्यवहारो दृश्यत इति भावः । अस्तु सामान्योपाधौ जन्यजनकयोग्यतानियमस्ततः किमिति तत्राह तच्च न † यदि क्षणिकं कारणमिति । तदेव साधयति तथाहि हेतुपरम्पराप्रतिबन्धादिति । कारणस्य स्वयंशक्तित्वादित्यर्थः । नाप कार्यं सहकारिणमपेक्षते इति । कारणादेव जननादित्यर्थः । ननु वह्निस्वलक्षणाद्धूमजन्मनि काष्ठसंसर्गस्यापि संनिधानात्तदपि सहकारि कल्प्यत इति । तन्न । प्रागपि हि कृशानुस्वलक्षणस्य धूमजननयोग्यस्य काष्ठसंसर्गाभावात्तदहेतुत्वलक्षणस्य व्यतिरेकस्य दर्शनमन्तरेणान्वयमात्रान्न सहकारित्वसिद्धिरित्याह काकतालीयमुच्यत इति । तर्हि मा भूत्सहकार्यपेक्षेति कारणमपि मा भूदित्याह तथाच कार्यकारणव्यवहारा इति । तस्मात्क्षणिकनित्ययोः सहकारिसन्निधानक्रमस्याविशेषात्कारणत्वमविशिष्टमित्युपसंहरति तस्मात्क्षणिकस्यापीति । अयमर्थः । यथैकस्मादग्निस्वलक्षणात्समानदेशे वह्निरुपरिष्टाद्धूमो ऽधस्ताद्भस्म पुरुषे विज्ञानमिति सहकारिभेदाद्देशभेदेनैकस्मादनेकानि कार्याण्युत्पद्यन्ते । तथैकस्मात्कारणात्कालभेदेन सहकारिभेदात्कार्यभेदा इति । ,,

तस्मात्सत्यपि ‡ विषयाभेदे ऽहंसंवेदनस्य तथाप्रतिभासमद्वितीया §त्संवेदनाद्वेदेनाप्यर्थक्रियासमर्थतया ‖ ऽवस्थायित्वमस्तीति महदेतत्सिद्धान्त-

* इत्यादीति ३ पु· । † न यदत्तणिकमिति १ पु· तत्र यदि नेति ३ पु· ।
‡ विषयभेदे–इति १ पु· । § संवेदनादिति नास्ति १ पु· ।
‖ अवशब्दो नास्ति २ पु· ।

२५ वलक्षण्यमस्तात्युपसंहरति तदेवमहङ्कर्तुः सदैकरूपावगमादिति । यत्किञ्चित्साम्येन च सिद्धान्तसाङ्कर्यं मन्त्रार्थवादेतिहासपुराणप्रामाण्यानभ्युपगमाद्देवतास्वर्गेश्वरमोक्षानभ्युपगमात्क्षणिकप्रमाणसंबन्धस्य क्षणिकस्यैव सत्त्वाभ्युपगमाल्लोकायतबौद्धांशद्वयपरिणतः प्राभाकरो भेदाभेदाभ्युपगमात्मन्त्राद्यप्रामाण्याच्च लोकायतक्षपणकांशद्वयपरिणतो वार्त्तिककारः । यस्तु कश्चित् क्षपणकपादावनतशिरोबिम्बस्तत्त्वदर्शनतन्निष्ठपरमहंसप्रद्वेषतीव्रवायुविक्षिप्तविवेकविज्ञानलवः स्वपरपक्षगुणदोषविभागदूरीकृतविज्ञानो भेदाभेदाभ्यां बन्धमोक्षादिसङ्करमिव कुर्वन् दुर्ज्जनरमणीयां वाचं जल्पति सुगतविज्ञानवादसमानोऽयं वेदान्तवाद इति स सम्प्रदायश्रवणपरिचयशून्यतया दर्शनविवेकमनवबुद्धमानो नापवाद्यः किन्तु शोचनीय इत्युपेक्षणीयो विद्वद्भिः ।

ननु विज्ञाने प्रपञ्चस्य कल्पितत्वं तव तस्य च तुल्यम् । सत्यम् । विज्ञाने * प्रतिभास्यमानत्वं च तव तस्य च तुल्यमिति विज्ञानवादस्वदीयं दर्शनं किं न स्यात् । सत्यपि प्रतिभास्यत्वे सत्यमिथ्याविभागोऽस्तीति चेत् । इहापि सत्यपि मिथ्यात्वे अर्थक्रिया † समर्थसत्त्वासत्त्वविभागोस्त्येव । कल्पितत्वेनेयं विभागसिद्धिरिति चेत् । प्रतिभास्यत्वेपि न सत्यमिथ्याविभागसिद्धिः । दृश्यते विभाग इति चेत् । तदेव विभागदर्शनं मम किं न स्यात् । घटादेर्मिथ्यात्वमप्रसिद्धमिति चेत् न । प्रतिभास्यसत्यत्वस्याप्यसिद्धत्वाच्छुक्तिरजतघटयोरर्थक्रियाभावाभावसत्त्वासत्त्वविभागदर्शनाच्च । दृश्यते च माया प्रीतिद्वेषादिकारणम् श्रूयते च देवासुरसंग्रामादिषु मायाविनिर्मितशस्त्रभेदानां दाहच्छेदभेदादिहेतुत्वमित्यलमतिप्रसङ्गेन ।

ननु विषयस्यापि चैतन्यव्यञ्जकतया परोक्षत्वे ऽनुमानादिष्वपि तथा
२४ स्यान्न तथा दृश्यत इति चोदयति ननु नानुमेयादिष्विति । अन्तःकरणपरिणामसंसर्गकृतयोग्यत्वापत्त्या विषयस्य चैतन्यं प्रति व्यञ्जकत्वं तदनुमेयादिष्ववर्त्तमानत्वसम्भवात्तेषु वर्त्तमानधर्मद्वयोत्पत्त्ययोगान्नापरोक्षतेति परिहरति नानुमेयादिष्वपरोक्षत्वमिति । ‡ अव्यापृतत्वादिति । कारकत्वव्यञ्जकत्वधर्मद्वयानुपपत्तेरित्यर्थः । नहि विनष्टे घटे ऽग्निसंयोगाल्लोहित्यमुत्पद्यते ।

* प्रतिसमानत्वमिति ३ पु० । † सामर्थ्येति १ पु० । ‡ अव्यावृत्तत्वादिति १ पु० ।

प्रत्यक्षपरोक्षव्यवस्था । बाह्यानेकोपाधिनिमित्तः पुरुषे शारीरश्चेतश्चत्वादिव्यपदेशः ।

नन्वतीतानागताकारेण वृष्ट्यादेर्वर्त्तमानत्वमपि दृश्यते । न । वृष्टेर्युगपदतीतत्ववर्त्तमानत्वायोगात् । अतीतताधर्मस्यापि वर्त्तमानकालो घटादेरिव नान्वयितया ऽवच्छेदकः किन्तु प्रतियोगितयेति घटादिवन्न वर्त्तमानतासिद्धिः । किंच । अतीताकारेण वर्त्तमानस्य नेदानींतनक्रियागुणाश्रयत्वमतीताकारतया वर्त्तमानस्य घटस्य वर्त्तमानलौहित्यगमनाश्रयत्वादर्शनात् अतो नानुमेयादिषु काकरत्वव्यञ्जकत्वे युक्ते । प्रत्यक्षे पुनरिन्द्रियसंयोगस्य गुणस्य गुणिव्यापारमन्तरेणाऽव्यापाराद्युक्तो विषयस्य सामग्र्यन्तर्भाव इति । कथं तर्हि विषयव्यापाराभावे ऽनुमेयादिषु विषयाकारता विज्ञानस्येति । तदाह लिङ्गादीनामेवेति । २९
नन्वतीते वर्त्तमानविषयत्वजन्मवत्कारकत्वमपि स्यादिति नेत्याह प्रमेयस्य चेति । विषयत्वं नामानुमेयेषु सुषुप्त्यिव्यावृत्तिः । सा चाभाव * स्तद्धर्म्मो न भवति । विज्ञानाकारतापि न विषयव्यापारः किंतु ज्ञानस्यैवेति नातीतेर्थे क्रियाकारित्वम् । जानातेश्चानुमेयादिषु फलापेक्षया सकर्मकत्वं न कर्मकारकापेक्षयेति । सकर्मकत्वे च प्रत्यक्षवदपरोक्षतापि स्यादिति ॥

अर्थमुपवर्ण्यैदानीमस्मत्प्रत्ययविषयत्वादिति भाष्यं योजयति तदेवमहंकारग्रन्थिरिति । ननु शारीरः चेतश्च इत्यादिबहुविधोपाधिसंसृष्टमात्मानं वर्णयति श्रुतिस्तच्च कथमहंकारस्यैवोपाधितेति चोदिते अहंकारतत्संस्कारोपरक्ताज्ञानोपाधिकस्यैवात्मनोऽवस्थाचयेपि बाह्यबहुविधोपाध्यन्तरनिमित्तोयं व्यपदेश इत्याह स पुनरेवंभूतो जायत्स्वप्नयोरिति । गतागतमाचरन्नित्येनेकोपाध्युपराग उच्यते । सविकल्पके ऽधिष्ठाने सविकल्पाध्यास † इति वदतो ऽस्मत्प्रत्ययविषयत्वादिति परिहार उक्तः इदानीं निर्विकल्पकेपि सविकल्पाध्यासः संभवतीत्याह किंच न केवलमिति । ननु नित्यानुमेय आत्मा कथमपरोक्षतया सिद्ध इति नेत्याह नह्यात्मन्यप्रसिद्ध इति । स्वपरयोर्मयेदं ,,
विदितमिति कर्तृकर्मसंबन्धावगमशून्यत्वाविशेषात् । अनुभवनिमित्तज्ञानाश्रयत्वमन्यतरस्य विशेष इति चेत् न । आत्मपदार्थानुभवाभावे संबन्धावगमायोगादनुभवसंबन्धाभावाऽविशेषे ऽन्यतराश्रयज्ञानानुमानायोगादिति भावः । अस्तु तर्हि विषयानुभवाश्रयतया सिद्धिरिति नेत्याह नच संवेद्याज्ञानेनेति ।

* तद्धर्त्तमानं भवतीति १ पु० । † इतिवादत इति १ पु० ।

ननु संवित्स्वोपाधिं साधयति न कर्मकारकमिति । न तावदाश्रयत्वमुपाधिः विषये ऽभावात् । आश्रयविषयत्वमुपाधिरिति चेत् । किं विषयत्वं नाम । संवित्प्रयुक्तव्यवहारयोग्यत्वमिति चेन्न । आत्मापि तर्हि विषयः स्यात् । आश्रयव्यतिरिक्तत्वे सति संविद्व्यावर्तकत्वमिति चेच्चक्षुषोपि प्रसङ्गः । न चाश्रयव्यतिरिक्तत्वे सति तत्प्रयुक्तव्यवहारयोग्यो विषयः । संवित्तदाश्रयसंबन्धस्यापि विषयत्वप्रसङ्गात् । नच संबन्धो नास्ति न वक्तुम् । तस्मात्संप्रयोक्तादिवस्त्वेवावभास्यत इत्यस्तु तर्ह्यात्मविषयज्ञानान्तरादिति नेत्याह नच
२९ १४ ज्ञानान्तरेणेति । कुतः तच्च ज्ञानान्तरं विषयानुभवसमकालं वा भिन्नकालं वा । विभिन्नकालत्वे दूषणमाह भिन्नकालत्व इति । एककालत्वमिति चेत्तचाह नह्येककालमिति । निरवयस्य युगपदेकदेशे वा भिन्नदेशे वा परिणामद्वयायोगादित्यर्थः । एकस्य युगपत्सामस्त्येन परिस्पन्दद्वयमनुपपन्नं परिणामस्तु संभवतीत्याह मा भूदिति । परिणामद्वयमपि कार्त्स्न्येन युगपन्न संभवतीत्याह मैवमिति । यौवनस्थाविरयोः कृत्स्नशरीरवर्त्तित्वादिति । * नच भागेन परिणामो निरवयवत्वादिति भावः । तस्मादिति परिशेषात्स्वयंप्रकाशतया ऽपरोक्षत्वोपसंहारः । अध्यस्यमानेनैकेन्द्रियग्राह्यत्वमधिष्ठानस्य वक्तव्यं नापरोक्षतामात्रेण कृत्यमित्याशङ्क्याकाशदृष्टान्त इति भाष्यतात्पर्य्यमाह ननु न क्वचिदिति ।

अच शब्दस्य बाह्येकेन्द्रियग्राह्यत्वाद्गन्धवद् द्रव्यव्यतिरेकेणोपलब्धेः संभवाद्विशेषगुणत्वे वक्तव्ये स्पर्शादिगुणचतुष्टयसहवृत्तित्वाभावाद्बाह्येन्द्रियग्राह्यत्वाद्दिक्कालमनसां विशेषगुणशून्यत्वाद्भूतचतुष्टयात्मदिगादिव्यतिरिक्तद्रव्यस्यैव विशेषगुणः शब्दः तद्गुणश्चाकाश इति वैशेषिकादयो ऽनुमिमते । † बौद्धलौकायताश्चानुपलब्धिलिङ्गकं मूर्त्तद्रव्याभावमात्रमाकाशमनुमिमते । प्राभाकराणां त्वस्त्येवाकाशोनुपलब्धिलिङ्गो मूर्त्तद्रव्याभावमात्रत्वाद्वा ‡ वान्तरस्यैव चाभावत्वात् । क्षपणकवार्त्तिककारीयास्तु चाक्षुषमाकाशमिच्छन्ति । तथा सति स्पर्शित्वमपि स्यात् । अस्त्विति चेन्न । रूपस्पर्शवत्येव द्रव्ये चक्षुरादिप्रवृत्तिनियमात् । चक्षुःप्रसारणस्य चाकाशानुमानलिङ्गदर्शनेन्य-
,, २४ थासिद्धत्वात् । तस्मादप्रत्यक्षेपि ह्याकाश इत्युक्तम् । § अथवेति साक्षिवेद्यतया

* न च भोगेनेति २, ३ पु० ।
† बौद्धलोकायताश्चेति ३ पु० ।
‡ भावान्तरस्य चाभावत्वादिति ३ पु० ।
§ अथ चेति १ पु० ।

मनोमात्रगम्यतया वा अपरोक्ष इत्यर्थः । इन्द्रनीलमिव नीलमित्यर्थः । एवमविरुद्ध इत्यादिः स्पष्टार्थः । प्रतिपन्नोपाधौ निरस्यमानमर्थमविद्यान्वय- ३०
व्यतिरेकाभ्यामविद्यां मन्यन्त इत्यर्थः ।

न केवलमविद्यान्वयव्यतिरेकसामर्थ्यादविद्योपादानतया ऽविद्यात्वं किंतु विद्याविपरीतत्वाच्चेत्याह तद्विवेकेनेति । नन्वविद्यामुपवर्ण्य तस्याज्ञाननिवर्त्यत्वप्रदर्शनेनाध्यासनिवृत्तिसिद्धेः किमध्यासोपवर्णनेनेति चोदयति यद्येवमध्यास इति प्रक्रम्येति । पुरुषाकाङ्क्षया ऽनर्थनिवृत्तिविषयत्वादनर्थस्यैवाविद्यात्वेन ज्ञाननिवर्त्यत्वं वक्तव्यमिति परिहरति नैतत्सारमिति । अनर्थस्यैवाविद्यात्मकत्वे तदाश्रये विषये वा वस्तुतस्तन्निमित्तगुणदोषाभावात् । ज्ञानेन सर्वानर्थनिवृत्तिः फलिष्यति तत्फलवचनमुत्तरभाष्यमित्याह तदेतदाह यच्च यदध्यास इति । अविद्याध्यासविषयत्वप्रयुक्तस्तावद्गुणदोषाभावः सिद्धः अचाध्यासपरिणामितयाश्रयत्वप्रयुक्तदोषगुणाभावः कथ्यते । कथम् अनाद्यविद्याध्यासस्य नित्यचैतन्यावभासत्वान्न तचाध्यासपरिणामः । कादाचित्काध्यासपरिणामस्याविद्योपादानत्वादविद्यासंभेदादात्माश्रयत्वादसिद्धिरिति । प्रतिज्ञेति । सूचकारस्य ज्ञानेन बन्धनिवृत्तेरर्था * त्सूचणमुच्यते ।

वृत्तसंकीर्त्तनपूर्वकमुत्तरभाष्यस्य तात्पर्यमाह एवं तावद्युष्मदस्मदित्यादिनेति । प्रमातृप्रमाणप्रमेयकर्तृकर्मकार्यभोक्तृभोगभोग्यस्वलक्षणस्य व्यवहारचयस्य शरीरेन्द्रियादिष्वहंममाध्यासपुरःसरत्वं प्रत्यक्षमिति प्रत्यक्षोपन्यासः कृतः । ननु विधिप्रतिषेधपराणि शास्त्राणीत्येव वक्तव्यम् तन्निष्ठत्वात्सकलशास्त्रस्य किमिदं मोक्षपराणीति तचाह मोक्षपरत्वं चेति । कथं पुनरित्यादिभाष्यस्याध्यासोपादानं व्यवहारचितयमित्यच प्रमाणान्तरप्रश्नविषयत्वं दर्शयति बाढमुक्तलक्षणाविद्येति । आदिना कथं पुनरित्याद्येपार्थं दर्शयति ३१
प्रमातारमाश्रयन्तीति । अविद्याध्यासपरिनिष्पन्नाहंकारात्मसंपिण्डितोपादानत्वे प्रमाणानां प्रामाण्यमेव न सिद्धयतीत्यस्मिन्नर्थे भाष्यं योजयति अथवा कथमविद्याविद्विषयाणीति । अविद्यावदुपादानत्वे का प्रामाण्यानुपपत्तिरिति तदाह † अविद्यावद्विषयत्व इति । उच्यते देहेन्द्रियादिष्वित्यादिपरिहारभाष्यम- ,,

* सूत्रमुच्यते इति १ पु० । † मतुब्नास्ति २ पु० ।

३१ ९ वतारयति वस्तुसंग्रहवाक्यमस्यैव प्रपञ्च इति । व्यवहारचितयमध्यासोपादानमित्यत्रार्थापत्तिव्यतिरेक्यनुमानप्रदर्शनाय * यत्र यत्राध्यासाभावः संपतिपन्नस्तत्र व्यवहाराभावो दृष्ट इति व्यतिरेकव्याप्तिं भाष्यार्थं दर्शयति नहि देहेन्द्रियादिष्विति । देहादिशब्दार्थं विभागेनाध्यासं च कथयति यतो देहे ऽहममिमान इत्यादिना । प्रमाणान्तरप्रदर्शनाय व्यवहारचयमूलाध्यासे प्रत्यक्षमुक्तमनुवदति सर्वो हि मनुष्योऽहमिति । अत्रायं प्रयोगः देवदत्तस्य जायत्स्वप्नकालौ तस्यैव कर्तुः करणभूतदेहेन्द्रियादिष्वहंममाध्यासपुरःसरप्रमातृत्वादिव्यवहारवन्तौ तस्यैव सुषुप्तिकालादन्यकालत्वात् । यः कालस्तथाविधव्यवहारवान्न भवति न स तस्यैव सुषुप्तिकालादन्यकालो यथा तस्यैव सुषुप्तिकाल इति । व्यवहारचितयं वा दर्शिताध्यासोपादानमन्तरेणानुपपन्नमध्यासाभावे व्यवहारादर्शनात्सुषुप्त इत्यर्थापत्तिः ।

ननु कर्तृकरणयोः संबन्धमात्रं व्यवहारे ऽपेक्ष्यते न तादात्म्यसंबन्ध इति तत्र परिशेषानुमानार्थापत्तिसिद्धये संबन्धान्तराणि व्यावर्तयति न तावत्स्वस्वामिसंबन्ध इति । आह न स्वत्वेन संबन्धेनेति । सुषुप्तेपि तस्य भावादित्यभ्युच्चयः । इच्छानुविधायित्वमेव व्यवहारनिमित्तं तदभावात्सुषुप्ते व्यवहारविपर्यय इति चोदयति अपर आहात्मेच्छानुविधायित्वमिति । अस्त्विच्छामात्रेण विनियोज्यविनियोजकसंबन्धस्ततः किमिति तत्राह तत आत्मन इति । नन्वेतत्संबन्धमूलो व्यवहार इति किमत्र प्रमाणमित्यत आह तथाचोत्तिष्ठामीति । ननु भृत्यादयोपि तदिच्छानुविधायिनस्तच्छरीरेणापि व्यवहारः स्यादिति नेत्याह न च भृत्यादिषु तदस्तीति । उच्यते । यदीच्छानुविधानयोग्यतामात्रं संबन्धः सुषुप्तेपि तदस्तीति तत्रापि व्यवहारः स्यात् । अथेच्छयानुविधीयमानत्वं संबन्धः अर्थान्तरे तदभावात्प्रमातृत्वादिव्यवहारो न स्यात् अथ दृश्यते अयं संबन्धो व्यवहारमूलमिति नेत्याह नैतत्संविदि बहुमानवतो युक्तमिति । नच गौणत्वं मुख्यानुभवविरोधादित्याह गौणीत्यादिना । इच्छाप्यध्यासमूलैवेत्याह अपि चेच्छापि परिणामविशेष इति अन्तःकरणाध्यासमूलैवेच्छेति प्रत्यक्षमाह तथा चानुभव इति । नचात्मा-
१ नात्मनोः संयोगसमवायो व्यवहारनिमित्तम् सुषुप्तेपि भावात् । भोक्तृभोग्यान्वय-

* यत्रपदं सकृदेव १, ३ पु० ।

स्वकर्म्मारभ्यत्वस्वेन्द्रियाधिष्ठेयत्वादीनां भोगाद्यध्याससापेक्षत्वाद्वृत्यादिशरीरे च भावात् । अव्यवधानेन भोग्यत्वं मूलसंबन्ध इति चेत् । यदि भोगयोग्यता संबन्धः । सुषुप्तेप्यस्ति । यद्व्यवधानेन भुज्यमानसंबन्धः । तन्नात्मनः सर्वशरीरदेशकालाव्यवधाने सत्यचैव भोगान्वयस्य मूलसंबन्धान्वेषणा । तस्माद्यत्किंचिदेतत्संबन्धान्तरम् । अतः परिशेषादर्थापत्त्यनुमानाभ्यामध्यास एव व्यवहारमूलं सिद्ध इत्युपसंहरति अतः स्वयमसङ्गस्यापीति । ३२

ननु सर्वशरीरसंनिधानाविशेषे सति आत्मनः कथमस्मिन्नेव शरीरेऽध्यासनियम इति । अनादिस्तावदविद्याध्यासस्तत्परिणामत्वाल्लिङ्गशरीरे तत्कार्य्यभूतसूक्ष्मशरीरारब्धत्वात्तत्संश्लेषाद्वा स्थूलशरीरेध्यासनियमो न विरुध्यते । ननु प्रमातैव व्यवहाराश्रयो नाध्यास इति न प्रमातृत्वमेवाध्यासपरिनिष्पन्नमित्याह तेन यद्यपीति । यत्त्वध्यासपरिनिष्पन्नाहंकारात्मसंपिण्डितोपादानत्वे कारणदोषादप्रामाण्यं प्रमाणानामिति । तच्च यदि प्रतिपन्नोपाधौ केनापि प्रमाणेनाबाध्यत्वलक्षणतत्त्ववेदनप्रामाण्यं हानिरुच्यते तदङ्गीकृतमेव । अथा * गमेन परमार्थसत्यत्वांशे बाध्यमानेपि व्यवहारसमर्थवस्त्वङ्गता प्रामाण्यहानिरुच्यते न तच्च बाधाभावादित्याह तथा निरपेक्षणामिति । विधिमुखेापदर्शितमिति । व्यवहाराङ्गतायां प्रत्यक्षेणाध्यासमूलतायां प्रत्यक्षानुमानार्थापत्तिभिः प्रदर्शितमुभयमित्यर्थः । अर्थक्रियासमर्थत्वाच्च शब्दादिप्रत्यक्षाणामविद्यानिवृत्तिब्रह्मावगतिलक्षणार्थक्रियाहेतुत्वं मिथ्यात्वेपि शब्दादीनां न विरुध्यते ।

नन्वर्थक्रियासंवादात्प्रामाण्यप्रसङ्गः । न । ज्ञानादेवार्थतथात्ववदर्थावगमादेवार्थक्रियासामर्थ्यनिश्चयात् अन्यथा तवापि तथात्वज्ञानात्प्रामाण्यप्रसङ्गः । ननु ब्रह्मज्ञानस्याप्यध्यासोपादानत्वान्मिथ्यात्वमापन्नम् । यदि तावत्स्वरूपमिथ्यात्वमुच्यते अङ्गीकृतमेव तत् । अर्थविषयमिथ्यात्वन्न ब्रह्मणि भावात् । प्रपञ्चस्यापि बाधादेव मिथ्यात्वं नाध्यासोपादानज्ञानगम्यत्वात् । ननु दुष्टकारणजन्यस्य विषयतोपि मिथ्यात्वं दृष्टमिति नेत्याह दोषस्त्वागन्तुक इति । प्रमाणकारणेषु सत्सु पश्चाद्भवन् दोषो दोष इत्युच्यते ,,

* अथानुगमेनेति ३ पु० ।

स आगन्तुक इत्युक्तः । प्रमाणकारणत्वेनैव यो दोषो व्यवतिष्ठते स न दोषः कारणत्वादविद्याध्यासस्तु चैतन्यस्याद्वितीयावभासं प्रत्येव दोषो न द्वैतावभासं प्रति तस्य कारणत्वाद्यथा काचादिः * चक्षुरादिदोषस्तथाविधपापादृष्टोदयमनुमापयंस्तच्च प्रमाणत्वान्न दोषस्तद्वदित्यर्थः । चैतन्यदोषत्वादेव तत्प्रकाश्याव्यवहार्य्यब्रह्मविपरीतं व्यवहारयोग्यं वस्तु प्रदर्शयति । दोषत्वं चाविद्यायाश्चैतन्यस्य तथावभासविरोधितयान्यथाप्रतिभासनिमित्तत्वात् । कथमागन्तुके दोषबुद्धिर्न नैसर्गिक इत्येतावन्मात्रे ८ दृष्टान्तमाह नच सर्वसाधारण इति । ननु भाष्यकारेण दोषमात्रमेव विषयतोपि ज्ञानमिथ्यात्वे हेतुरुक्त इति नेत्याह अनैसर्गिकं च दोषमिति ।

नन्वविवेकिव्यवहारोध्याससमूलो भविष्यति न विवेकिव्यवहार इति नेत्याह इतश्चैतदेवं पश्वादिभिश्चेति । † पश्वादिदृष्टान्तेऽध्यासमूलतां व्यवहारस्य दर्शयति तथा च पश्वादय इति । अध्यासानुमाने हेतुभूतव्यवहारस्य विवेकिष्विपि पक्षधर्मतामाह तदेकरूपयोगक्षेमा इति । तच्च हेतुदर्शनात् हेतुमन्तमध्यासमनुमिमीते अतस्तदेकरूपकार्यदर्शनादिति । पश्वादिदृष्टान्तेप्यध्यासद्भावे प्रमाणं चोदयति ननु पश्वादीनामिति । पदार्थद्वयदर्शने सति प्रत्यक्षानुमानागमैर्भेदाप्रतिपत्तावध्यासः परिशिष्यत इत्याह प्रौढमतिभ्य इति । स्वाभाविकप्रत्यक्षेण विवेकदर्शने दोषमाह एवमेवेति । नन्वनुमानागमविचारहीनानामप्यदृष्टार्थं व्यवहारदर्शनात्प्रत्यक्षेणैव विवेको गृह्यते इति चोदयति ननु गोपालाङ्गनादय इति । न प्रत्यक्षेण विवेकग्रहः किन्त्वाप्तवचनादित्याह न तदभिज्ञव्यवहार इति । प्रत्यक्षश्चेद्विविवेको विशेषतः प्रत्यगात्मानं प्रतिपद्यो- १ रन्नित्याह तथा च ते पृष्टा इति । अतो निगमनवाक्यमुपपन्नमित्याह तस्मादुक्तमुक्तमिति । तस्य व्यवहारस्य काल एव कालो यस्याध्यासस्य सोध्यासस्तत्कालः स च पश्वादिभिर्विवेकिनामपि समान इति ।

३ एवं तावत्प्रत्यक्षादीनीत्युक्तानुवादः । न तेनानध्यस्तात्मभावेनेति भाष्यं पूर्वं न व्याख्यातं तदनुवादग्रन्थे व्याचष्टे तच्चेयमाशङ्का । भवत्वध्यासस्य व्यवहारनिमित्तता तथापि रजतादिवन्निमित्तकारणमेवाध्यासो व्यवहारस्य आत्मैव

* चक्षुरादिदोषोऽपि संस्थाविधापापेति २ पु० । † पश्वादिदृष्टान्ताध्यास इति १ पु० ।

केवलस्तूपादानमिति तचाह न तेनानध्यस्तात्मभावेनासङ्गस्येति। अयमर्थः। ३३
रजताद्यध्यासानां व्यवहाराश्रयकोटिनिक्षिप्तत्वाभावात्तदन्तरेण चात्मनि प्रमातृत्वादिव्यवहारदर्शनान्निमित्तकारणतैव युक्ता। इह तु पुनराश्रयकोटिनिक्षिप्तत्वात्केवलात्मनि सुषुप्ते व्यवहारादर्शनादुपादानकारणस्याभ्यर्हितत्वादन्वयव्यतिरेकवतोऽध्यासस्योपादानकारणत्वमेव व्यवहारं प्रति कल्पयितुं युक्तमिति। शास्त्रं पुनरित्युत्तरभाष्यस्याशङ्का तस्यापीति। तात्पर्याभिधानम् शास्त्रीयेत्विति। अदृष्टार्थप्रवृत्तौ व्यतिरेकज्ञानमभ्यनुजानाति अभ्यनुज्ञामाक्षिपति ननु फलनैयमिकेति। फलचोदना तावत् पश्वादीनामस्मिन्नेव जन्मनि लब्धुं शक्यत्वात्तज्जन्यसुखस्य च स्वर्गस्य पश्वादिचोदनाफलत्वाभावात् ज्योतिष्टोमादिफलत्वोपपत्तेर्निरतिशयप्रीतेरप्यचैव सम्भवान्न देहान्तरसम्बन्धिनमात्मानमापादयति। नैयमिकनैमित्तिकचोदना तु सुतराम् फलशून्यत्वात् फलवत्त्वे वा दृष्टेनैवोपभोक्तुं शक्यत्वात्। प्रायश्चित्तस्य तु दोषनिबर्हणफलत्वात्। दोषफलस्यास्मिञ्जन्मनि भोक्तुं शक्यत्वात्। जन्मान्तरस्य * चेतादृशत्वात् फलादर्शने च कारीर्यादिवदङ्गवैकल्य † प्रतिबद्धतया सहकार्य्यभावकल्पनोपपत्तेर्मन्त्रोषधादिसिद्धेनानेनापि शरीरेण स्वर्गादिभोगसम्भवान्न देहव्यतिरेकज्ञानोपयोग इति। तच देवताधिकरणन्यायेन मन्त्रादिप्रामाण्याद्विशिष्टदेशकालशरीरादिभोग्यं स्वर्गादिफलमङ्गीकृत्येदमुक्तमिति परिहरति सत्यमेवं तथापीति।

ननु मन्त्रादिसमन्वयप्रामाण्यमनपेक्ष्यैव चोदनाभिरेव व्यतिरिक्तात्मापेक्ष्यते कर्ममात्रनिर्णयप्रवृत्तेन भाष्यकारेणात्मनो निरूपितत्वादिति तचाह तथाच विधिवृत्तेति। विधिभिरेवापेक्षितश्चेत्सूचेणापि भवितव्यमित्यर्थः। नन्वनपेक्षितस्याऽसूचितस्य च भाष्यकारेण प्रतिपादनमयुक्तमित्याक्षिपति तत्कस्य हेतोरिति। तत्प्रमाणं बादरायणस्या ‡ नपेक्षत्वादितिसूचावयवेन मन्त्रादिप्रामाण्यद्वारेण परम्परया सूचित एवात्मेति परिहरति धर्मजिज्ञासेति कार्यार्थविचारं प्रतिज्ञायेति। एवं सूचार्थपरम्परया भूतेप्यर्थे प्रामाण्यमाश्रित्य भाष्यकारेणात्मविचारः कृतः न चोदनासामर्थ्यमाश्रित्येति कथमवगम्यत इति तचाह तथा चोदना हि भूतमिति। तर्हि चोदनापेक्षितत्वात्समन्वयोप्यचैव ,,

* चस्थाने वाकारः २ पु०। † प्रतिबन्धतयेति १ पु०, प्रतिबद्धतपःक्षत्रेति ३ पु०।
‡ अनपेक्षित्वादिति १ पु०।

३३ २० वर्णनीय इति नेत्याह स च स्वरूपावगम इति । ननु धर्मे प्रयतमानेनाप्य-
पेक्षितत्वात्कर्त्तव्य एवात्मविचार इति नेत्याह उपयोगाभावादिति । नहि
धर्ममात्रं व्यतिरिक्तात्मानमपेक्षते किन्तु फलमपेक्षते फले च न प्रयतते
जैमिनिरित्यर्थः । ननु फलमप्यपेक्षते चेतत्रापि प्रयत्नो युक्त इति न अन्यथा-
सिद्धत्वादित्याह भगवांस्तु पुनरिति । ननु ब्रह्मैव तत्र विचारितं न चोद-
नाफलमिति तत्राह तत्र च देहान्तरोपभोग्य इति । तत्त्व सर्वमिति स्पष्टार्थः ।

ननु समन्वयसामर्थ्यादेव व्यतिरिक्तात्मसिद्धेरात्मविचारः पिष्टपे-
षणमिति नेत्याह तत्सिद्धिश्चेति । ननु प्रमाणान्तरयोग्यस्य तदभावविरो-
३४ १ धयोः शब्दस्याप्रामाण्यान्नात्मसिद्धिरिति तत्राह अतस्तत्सिद्धौ पराक्रान्तवां-
स्तेनेति । विरोधपरिहारफलेन विचारेणेत्यर्थः । सत्यम् विनापि तेन
सिध्येदित्यादिनोक्तमर्थं संक्षेपतो दर्शयत्यस्ति तु तदिति । भूतेर्थे प्रामाण्यम्
स्वर्गादावित्यर्थः । न तेन विनेति । व्यतिरिक्तात्मना विनेत्यर्थः । ननु
सूत्रकारभाष्यकाराभ्यां देवताधिकरणे मुखत एव देवतादिषु मन्त्रादिप्रामाण्यं
नास्तीत्युक्तं तत्कथं सूत्रावयवसामार्थ्यात्प्रामाण्यमनुमतमिति मन्यते । नैष
दोषः । तत्र देवताया विग्रहवत्त्वे सन्निपत्योपकारकत्वप्रसङ्गाद्योग्यानुपलब्धि-
विरोधात् कर्मणि विरोधप्रसङ्गाभिप्रायेणोक्तत्वात् न प्रामाण्याभिप्रायेण अर्थवा-
दलिङ्गानामपि तत्र तत्र द्वादशलक्षण्यां प्रमाणत्वेनोदाह्रियमाणत्वादिति ।
तथापि न वेदान्तवेद्यमित्यादिभाष्यव्याख्यानं * स्पष्टार्थम् । तत्राशनायाद्यती-
तमित्यादिना † कर्त्तव्यान्वयाधिकारान्वयभोक्तव्याः क्रमेण निरस्यन्ते । प्राक् चे-
त्यादिभाष्यव्याख्यानं तत्त्वमसीतिवाक्यार्थावगमादित्यादि ।

कथं पुनर्व्यतिरेकज्ञानेनाध्यासस्य सहवृत्तिः । परोक्षापरोक्षविभागाच्च-
न्द्रद्वित्वज्ञानवदऽविरोध इति केचित् । सूक्ष्मशरीरस्यात्माऽविद्याकार्य्यत्वा-
त्कार्यकारणयोर्भेदाभेदभावात् स्थूलशरीरस्याग्न्ययःपिण्डवत्सूक्ष्मशरीरेण संश्ले-
षाद्वेदज्ञानेप्यध्यास इत्यपरे । सर्वथापि यावदपरोक्षज्ञानमध्यासो न निवर्त्तत
१३ इति भावः । तस्मादित्यध्यासप्रमाणोपसंहारः । नच केवलं प्रत्यक्षानुमाना-
र्थापत्तिभिरेवाध्याससिद्धिः किन्त्वागमोपि विधेर्बोद्धारमधिकारिणं ब्राह्मणादि-

* स्पष्टार्थः-इति १ पु० । † कार्यान्वयेत्यस्य स्थाने कर्त्तव्येति ३ पु० कल्पितम् ।

शब्दैरनुवदंश्चेतनाचेतनयोरैक्यावभासं दर्शयतीत्याह तदेव दर्शयति तथा- ३४
हीति। यो ज्योगामयावी उज्ज्वलामयवानित्यर्थः। वृत्तसङ्कीर्तनपूर्वकमध्यासो
नामेति लक्षणभाष्यमवतारयति एवमध्याससद्भावमप्रसाध्येत्यादिना। किमिति
पुनरुक्तलक्षणानुवाद इति * तदाह कस्य युष्मदर्थस्येति। भाष्यं योजयति
कस्मिन्नऽयुष्मदर्थे इत्यादिना। आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्येत्या-
दिना प्रत्यक्षतो दर्शितस्याध्यासस्य विभज्यप्रदर्शनायोत्तरं भाष्यमित्याह तदाह
तद्यथा पुत्रभार्यादिष्वित्यादि। तथाऽन्तःकरणधर्मानित्यतः प्राक्तनो ग्रन्थः
स्पष्टार्थः। अचेतरेतराध्यासविशिष्टे पूर्वपूर्वाध्यास इति कथयितुमात्मन्यध्य-
स्यतीत्यात्मशब्दार्थमाह अस्मदर्थश्चाहंप्रत्ययिसम्भिन्न इति। ननु शरीरमप्य ३५
ध्यस्यते न धर्मा एवेत्यत आह धर्मिणोपीति। ग्रहणमित्यध्याहारः। धर्म-
शब्दस्तर्हि किमिति गृहीत इत्यत आह धर्मशब्दस्त्विति। शास्त्रीयव्यवहार-
मूलत्वेन प्राधान्याच्च धर्माध्यासस्य प्राधान्येन ग्रहणमित्याह तन्निमित्तश्चेति।

नन्वन्तःकरणधर्माः कामादयो दण्डादिवत्सम्बन्धितया ऽवगमान्ना-
ध्यासमर्हन्तीति नेत्याह तथान्तःकरणधर्मा † न्कामादीनिति। तथाहि।
सत्यन्तःकरणे भावादसति च सुषुप्ते तेषामभावादन्तःकरणधर्माः कामादयः
सम्बन्धितया ऽध्यस्यन्ते न तादात्म्येनेति भावः। नन्वात्मसमवायिनामेव
कामादीनामन्तःकरणस्य वा ऽन्वयव्यतिरेकौ करणविषयतया ऽन्यथासिद्धौ।
न। कार्यस्य कारणपरतन्त्रतानियमात्करणनियमाभावात् करणकल्पनादुपा-
दानकल्पनस्या ‡ भ्यर्हितत्वाच्चक्षुरादिकरणान्तरभावाच्च। नन्वहं कामीत्यादि-
प्रत्यक्षप्रत्ययादात्माप्युपादानान्तरमस्तीति चेत्। न। दण्डादिवत्सम्बन्धि-
प्रत्ययादुपादानत्वे तादात्म्यादहं काम इति स्यात्। तस्मान्न्यायसहकृतान्व-
यव्यतिरेकावन्तःकरणस्यैव कामाद्युपादानत्वं कल्पयत इति भावः। अन्तः-
करणमित्यहंप्रत्ययिन इत्यादिः स्पष्टार्थः।

§ अशेषस्वप्रचारसाक्षिणि प्रत्यगात्मनीतिपदद्वयं व्याचष्टे स्वशब्देनाह-
ङ्कारग्रन्थिरित्यादिना। साक्षिशब्दार्थमाह। असङ्गतया ऽविकारित्वेनेत्यादिना। ,,
कथं पुनः सर्वान्तरस्यात्मनः प्रत्यगद्वयनमिति देहादिषु ‖ विप्रसृतचैतन्यस्य

* तत्राहेति ३ पु०। † कामादीनितीति–इति ३ पु०।
‡ अभिहितत्वादिति १ पु०, २ पु० च तत्स्थानेऽभ्यर्हितत्वादिति शोधितम्।
§ अशेषत्वप्रचारेति ३ पु०। ‖ विप्रमूतचैतन्यस्येति ३ पु०।

३५ २२ चित्तसमाधानविषये ऽन्तरनुप्रवेशभ्रमापेक्षयेत्याह स एव देहादिष्विदन्तयेति ।
५ ननु न साक्षिवेद्यमन्तःकरणं किन्त्वात्मेन्द्रियविषयेषु समवहितेषु ज्ञानोत्पादक्रमसामर्थ्यगम्यमिति । न । अथासिद्धत्वात् आत्मन एव क्रमज्ञानजननसामर्थ्यकल्पनया * न्यथासिद्धेः क्रमज्ञानोत्पादः द्रव्यान्तरक्रमसामर्थ्यकल्पनागौरवाच्च वरं प्रसिद्धस्यैवात्मनः क्रमसामर्थ्यकल्पनालाघवम् । ननु नार्थापत्त्या मनः कल्पयामि येनान्यथासिद्धिः स्यात् किन्त्वनुमानेन । तथाहि । आत्मनः सर्वविषयसन्निधाने क्रमकार्योत्पादः कर्तुः क्रमकारिसाधारणकारणापेक्षः सन्निहितबहुविषयस्य कर्तुः कर्मकार्य्योत्पादत्वात्सन्निहितबहुच्छेद्यस्य देवदत्तस्य कुठारसापेक्ष † क्रमच्छेदनवदिति । नैतत्सारम् । मनसः प्रतीन्द्रियसंयोगव्यापारे क्रमवर्त्तिनि साधारण ‡ कारणान्तरशून्ये ऽनैकान्तिकत्वात्फलस्य § च वृत्त्यात्पतत्तः क्रमवर्त्तिन्यःऽऽकाशसंयोगे कुठारादिव्यापारे नैकान्तिकत्वादिन्द्रियाणां प्रतिविषयसंयोगव्यापारे ‖ चानैकान्तिकत्वाच्च । अथ मतम् । विज्ञानादिविशेषगुणजन्म स्वाश्रये द्रव्यान्तरसंयोगलक्षणाऽसमवायिकारणापेक्षम् । नित्यद्रव्यविशेषगुण ¶ जन्यत्वात् अग्निसंयोगजन्यपरमाणुगतपाकजलौहित्यवदित्यनुमानम् । यत्तद् द्रव्यान्तरं तन्मन इति । नैतत् । शरीरेन्द्रियसंयोगस्य सिद्धत्वाद् द्रव्यान्तरसंयोगेनुमानायोगात्स्वप्नस्मृत्यादिज्ञानेष्वपि शरीरादिसंयोगानपायाद् द्रव्यान्तरसंयोगकल्पनानुपपत्तेः । तस्मान्नानुमानार्थापत्ती मनसि प्रमाणम् । आगमाच्च प्रागेव मनः सिद्धम् । नचैन्द्रियकत्वमणुपरिमाणे परमाणुवदयोग्यत्वादनन्तपरिमाणे मनसि युगपत्संयोगाद्युगपज्ज्ञान * जन्मप्रसङ्गात् मध्यमपरिमाणे च मनसि स्वप्नावस्थायामिन्द्रियाभावेपि मनोदर्शनान्मम मनो ऽन्यच्च गतमित्यनुभवाच्च साक्षिवेद्यमेव मन इति ।

तं च प्रत्यगात्मानमित्यात्मनोन्तःकरणादिष्वध्यासो दर्शितः तदयुक्तम् इतरेतराध्यासे द्वयोरध्यस्यमानत्वान्मिथ्यात्वापातात् द्वयोरप्यधिष्ठानत्वे
,, २४ द्वयोर्विशेषावभासो न स्यादिति तत्राह यदि युष्मदर्थस्यैवेति । अयमर्थः । एकतराध्यासे अन्यतरस्य सामान्यावभासो ऽन्यतरस्यैव विशेषावभासश्च स्यात् ।

* अन्यथासिद्धक्रमज्ञानेति ३ पु० । † क्रमभेदनवदिति १ पु० । ‡ करणेति ३ पु० ।
§ चस्थाने वाकारः १ पु० । ‖ अनैकान्तिकत्वाच्चेति ३ पु० नास्ति ।
¶ गुणजन्मत्वादिति १ पु० । * जन्मेति नास्ति ३ पु० ।

अत्र चिज्जडरूपेण द्वयोर्विशेषावभासो द्वयोरितरेतराध्यासं गमयति । अध्यासे विशेषावभासस्याध्यस्यमानताप्रयुक्तत्वात् । नच द्वयोरपि मिथ्यात्वापातः । चेतनस्याचेतने स्वरूपाध्यासाभावात् संसृष्टतयैवाध्यासात् । नच विशेषावभासादधिष्ठानत्वविरोधो ऽधिष्ठानधर्मतया विशेषस्याप्रतीतेः अधिष्ठानान्तरधर्मतया प्रतीतेरिति । ग्रन्थस्तु स्पष्टार्थः । ननु द्वयोः सामान्यविशेषात्मनावभासमानयोर्नाध्यासः सम्भवति । सामानाधिकरण्यमस्ति चेत् गौणमिति नेत्याह नाप्य विवदितव्यमिति । ननु विशेषावभासे ऽध्यासविरोध उक्तो नेत्याह नहि ३६
दृष्टे ऽनुपपन्नमिति । तद्विपर्ययेणान्तःकरणादिष्वित्यादिशब्दो विरुद्ध इत्याह नन्वन्तःकरण एव प्रत्यगात्मन इति । अन्तःकरणविशिष्टस्यैव बहिरध्यास इति कुत इति तत्राह अत एव तद्विपर्ययेणेति । ननु तस्मिन् भाष्ये विशिष्टस्यैवाध्यासः कथमुक्त इति धर्मग्रहणसामर्थ्यादित्याह अन्यथा चैतन्यमात्रैकरसस्येति । यद्यपि चैतन्यस्य विषये ऽध्यासेन्तःकरणमुपाधिस्तथापि चैतन्यमेव विषयावच्छिन्नं प्रकाशः तेनान्तःकरणमिति प्रतिभासाभिप्रायेणोक्तमित्याह सत्यमाह भवानिति । तस्यैव विषयस्यात्मानं प्रति कार्यकरत्वमापाद्येत्यर्थः । ननु बहिरप्यहङ्कारस्य चैतन्यवत्सम्बन्धो ऽवभासते ऽहं मनुष्य इत्यादाविति अत आह अत एव बुद्ध्यादिष्विति । चिन्मात्रावगमादेव सर्वपदार्थेष्वात्मत्वविभ्रम इत्यर्थः । अन्यथाहङ्कारस्य चैतन्याव्यतिरेकात्स एवात्मेति प्रतिपत्तिः स्यादिति । ननूपन्यासकाले नैसर्गिको ऽयं लोकव्यवहार इत्यारभ्य कर्तृत्वभोक्तृत्वप्रवर्तन इत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । अत्र सांख्यव्यतिरिक्ताः सर्वे वादिनः स्वत एव कर्तृत्वभोक्तृत्वशक्तिमतः प्रवृत्तिमात्रनिमित्तमध्यास इति वदन्ति तान्निराकरोति तेन कर्तुभोक्तुश्चेति । सर्वलोकप्रत्यक्ष इत्यादिः स्पष्टार्थः । अस्यानर्थहेतोरिति भाष्यस्य वृत्तसङ्कीर्तनपूर्वकं तात्पर्यमाह एवं तावत्सूत्रेणार्थादुपात्तयोरिति । ३७

नन्वनर्थस्य प्रहाणायेति वक्तव्यं न हेतोः प्रहाणायेत्यत आह हेतोः प्रहाण्या हीति । प्रयोजनभाष्यमाक्षिपति नन्वनर्थहेतुरध्यासो ऽनादिरिति । ननु शास्त्रप्रामाण्यान्निवर्ततामिति न प्रत्यक्षविरोधादित्याह तथाहि मनुष्यत्वादीति । नहि सादित्वमनादित्वं वा विनाशाविनाशयोर्निमित्तं किन्तु विरो- ,,

७ १० धिसन्निपातासन्निपाताविति परिहरति नायं दोष इति । लोके ताव * दनादिः
प्रागभावो निवर्तते । सुगतानां तत्त्वपरिभावनाप्रकर्षेणानादिवासनासन्तानानां
निवृत्तिरिष्टा नैयायिकादीनामप्यनादिर्मिथ्याज्ञानप्रवाहः परमाणुश्यामता च
निवर्त्तते । सांख्यानामप्यविवेको निवर्त्तते विवेकेन । मीमांसकादीनामिदानीं-
तनधर्मतत्त्वज्ञानप्रागभावोऽनादिर्निवर्त्तते । अनादिभावरूपमात्मवन्न निवर्त्तत
इति चेत् न अनिर्वचनीयत्वादज्ञानस्य अनादिर्न निवर्त्तत इति सामान्यव्याप्तिः
ज्ञानेनाज्ञाननिवृत्तिरिति विशेषव्याप्तिरतः सैव बलवती । ननु स्वोपादानग-
तोत्तरावस्था विनाशस्तच्च कथमनादेर्निरुपादानस्य विनाशः । न स्वाश्रयगतो-
त्तरावस्थेत्येतावत्वादन्यथाणुश्यामत्वादीनामनिवृत्तिप्रसङ्गात् । अभाववैलक्ष-
ण्यादात्मवदज्ञानस्याऽनिवृत्तिरिति चेन्न सद्वैलक्षण्यात्प्रागभाववन्निवृत्तिः किं न
स्यात् । कस्तर्हि निर्णयः । ज्ञानाज्ञानकृतो विशेषान्वय इत्युक्तम् । यत्तु व्यति-
रेकज्ञाने ऽप्यध्यासो न निवर्त्तत इति तच्चाह तत्त्वमसिवाक्यादिति । ननु
व्यतिरेकब्रह्मात्मज्ञानयोरध्यासनिवृत्तौ को विशेष इति तच्चाह तद्धि ब्रह्मणो-
ऽवच्छिद्येति । नच व्यतिरेकानवबोधनिमित्तः संसारः किन्तु ब्रह्मानबोधनि-
मित्त इति श्रुतितदर्थापत्तिभ्यां दर्शितम् अतस्तत्त्वज्ञानान्निवर्त्तत इति भावः ।
ननु ज्ञानमज्ञानस्यैव निवर्त्तकं कथमध्यासस्य निवृत्तिरिति तच्चाह ततः कार-
णनिवृत्ताविति । नन्वहंप्रत्ययो ऽप्यर्थतस्तथाभूतब्रह्मविषय एव स किमित्य-
ज्ञानं न निवर्त्तयतीति ब्रह्मात्मतानवभासकत्वादित्याह अहंप्रत्ययः पुन-
रिति । ननु विचाराद्विवेकज्ञानान्तरमुत्पन्नं निवर्त्तयेदिति न प्रमाणज्ञानत्वादि-
त्याह नापि ज्ञानान्तरमिति । ननु नानर्थनिवृत्तिः शास्त्रस्य प्रयोजनं किंतु निर-
तिशयब्रह्मानन्दावाप्तिरिति पुनः प्रयोजनभाष्यमाक्षिपति ननु† निरतिशयानन्दं
ब्रह्म श्रूयत इति । यथा शास्त्रजन्यब्रह्मविद्याफलमानन्दावाप्तिस्तथा ऽनर्थनि-
वृत्तिरपि श्रुता तच्च कथं प्रयोजनापेक्ष इत्याह ननु चानर्थस्यापीति । तर्हि कृत्स्नस्य
७ २१ फलस्य संकीर्तनं कर्त्तव्यं न फलांशस्येति चोदयति उभयं तर्हीति । न प्रयो-
जनत्वेन वक्तव्यानन्दावाप्तिर्विषयत्वनिर्देशसामर्थ्यादेव पुरुषाकाङ्क्षया प्रयोजन-
त्वसिद्धेः श्रुत्यर्थाभ्यां प्रयोजनसम्पूर्णतासिद्धिर्विषयनिर्देशलाभश्चेति युक्तो ऽयं

* अनादिप्रागभाव इति समासः ३ पु० । † निरतिशयमानन्दं ब्रह्मेति ३ पु० ।

व्यपदेश इत्याह न वक्तव्यमित्यादिना । ननु ब्रह्मात्मैव विषयो भवत्वान- ३७ २
न्दावाप्तिस्तु पृथक् प्रयोजनत्वेन निर्दिश्यतामिति नेत्याह * नच सा विषया-
द्बहिरिति । ब्रह्मात्मतैवानन्दप्राप्तिरित्यर्थः । नन्वनर्थनिवृत्तेरपि फलवचनवि-
षयत्वात्सापि शास्त्रविषय इति नेत्याह समूलानर्थहानिरिति । ब्रह्मात्मैक-
त्वमेव शास्त्रविषयः फलं त्वर्थसिद्धमिति भावः । तर्हि ब्रह्मात्मैकत्वशा-
स्त्रविषय एवानर्थनिवृत्तिर्न फलवचनविषय इत्याह अनर्थहेतुप्रहाणमपि
तर्हीति । ननु तत्त्वमसिवाक्ये ऽप्यनर्थनिवृत्तिर्विषयतया नावगम्यत इति
तत्राह यतः सर्वेषु वेदान्तेष्विति । वाक्यार्थस्य भावरूपत्वेपि ब्रह्मपदार्थस्या-
नर्थाभावविशिष्टतयैव प्रतिपादनात्सोपि विषय इत्यर्थः ।

ननु न पदार्थप्रतिपादकं वाक्यमस्ति किन्त्वैक्यप्रतिपादकमेवेत्याशङ्क्याह
तद्यथा सदेव सोम्येदमित्यादि समर्प्ययदेकं वाक्यमिति । अयमर्थः । अलौकि-
कत्वाद् ब्रह्मपदार्थं प्रतिपाद्य तादात्म्यवाक्येनैकवाक्यमिति । ब्रह्मणि † निष्प्र-
पञ्चे शास्त्रविषये जीवगतानर्थनिवृत्तिः कथं शास्त्रविषय इत्याशङ्क्याह तथा सति
तादृशेन तत्पदार्थेनेति । एवमपि स्वाभाविकनिष्प्रपञ्चता शास्त्रविषयो ऽविद्या-
तत्कार्यनिरासस्तु निष्प्रपञ्चब्रह्मात्मतावगतिसामर्थ्यलभ्यो न शास्त्रविषयो ऽवि-
द्यातत्कार्यप्रतिभासाभावस्य तत्प्रतिभासविरोधादेव शास्त्रेण प्रतिपादयितुमश-
क्यत्वादिति परिहरति यद्येवं ब्रह्मात्मावगतिनान्तरीयकमिति । ननु यथा ‡ ३८ १
प्रातिभासिकाऽविद्यातत्कार्य्यविरोधान्न तदभावविशिष्टो वाक्यार्थः प्रतिपत्तुं
शक्यते तथा ब्रह्मणि प्रपञ्चावभासविरोधान्निष्प्रपञ्चं ब्रह्मात्मत्वेन नावेदयितुं
शक्यमस्थूलादिवाक्यैरिति । उच्यते । न तावत्प्रत्यक्षादिसिद्धो ब्रह्मणि प्रपञ्चः ।
तस्य तदगोचरत्वात् । नच प्रपञ्चसिद्धिमाश्रित्य ब्रह्मसम्बन्धावगमः कारणमा-
श्रयकल्पकत्वात्तस्य । नन्विदं सर्वं यदयमात्मेत्यादिसप्रपञ्चवाक्यैर्ब्रह्मणि
प्रतिभासते प्रपञ्चः । सत्यम् । तेषां ब्रह्मणः सर्वोपादानकारणत्वसामर्थ्यसि-
द्धसार्वात्म्यानुवादेन निषेध्यसमर्पकतया निषेधकवाक्यैरेकवाक्यतयाऽन्वया-
न्निष्प्रपञ्चविरोधित्वाभावात् । नच सर्वोपादानतया सर्वात्मभावे सिद्धे सप्रपञ्च-
वाक्यैः सर्वात्मता प्रतिपादयितुं शक्यते । नच निषेधवाक्यैर्निषेध्याकाङ्क्षि-

* न विषयादिति ३ पु० । † निःप्रपञ्चेति प्रायेत्र १ पु० । ‡ प्रतिभासिकेति १ पु० ।

८ सप्रपञ्चनिषेधश्रुत्योर्निषेधश्रुतेः प्राबल्यम् । जीवस्य सप्रपञ्चत्वाभासेऽपि निष्प्रपञ्चत्वम् ।

तसमर्पणेनैकवाक्यतासंभवे वाक्यभेदं कृत्वा स्वातन्त्र्येण प्रयोजनवन्निष्प्रपञ्च-विरुद्धं सप्रपञ्चं प्रयोजनशून्यं च प्रमातुं शक्यम् । दृष्टश्च सुषुप्ते चेतनस्य निष्प्रपञ्चता पुरुषार्थ इति । श्रुतिश्चाशब्दमस्पर्शमरूपमव्ययम् निचाय्य तं मृत्युमुखात्प्रमुच्यत इति । दृष्टा च चेतनस्य सप्रपञ्चता ऽनर्थकरीति । नच तत्र श्रूयते फलम् । अतो निषेधैरेकवाक्यता युक्ता। नच निषेध्यप्रपञ्चानुवादप्रतिभासो निष्प्रपञ्चमितिं * बाधते तादर्थ्यादनुवादस्य । नन्वप्राप्तं प्रपञ्चं ब्रह्मणि सप्रपञ्चवाक्यैः प्रापय्य पुनस्तन्निषेधोनर्थक एव प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात् । उच्यते । अद्वितीयब्रह्मप्रतिपत्त्यर्थं सर्वजगदुपादानत्वप्रतिपादनसामर्थ्यादेव प्राप्तस्य ब्रह्मणि प्रपञ्चस्याद्वितीयपुरुषार्थसिद्ध्यर्थमनूद्य निषेधो युज्यते । ननु तर्हि सर्वोपादानत्वसामर्थ्यादेव सप्रपञ्चताप्रमितिः प्राप्ता । न । श्रुतसामर्थ्यप्राप्तस्य सप्रपञ्चत्वस्य साक्षान्निषेधश्रुतिविरोधे दौर्बल्यात् । न तर्हि सर्वोपादानतया सप्रपञ्चताप्राप्तिः । न । यावद्बाधं श्रुतोपादानत्वसामर्थ्यादेव शुक्तिकारजतादिवत्सप्रपञ्चताप्रतिभासात् । प्रतिपन्नमेव तु बलवत्प्रमाणेन बाध्यते नाप्रतिपन्नम् नापि प्रमितम् । नचोपासनाप्रकरणपठितसप्रपञ्चवाक्यैर्ब्रह्म तथा प्रमीयते । अन्यपराणां तत्परवाक्यविरोधादारोपितरूपेणाप्युपासनासंभवात् । सृष्टिवाक्यैरद्वितीयब्रह्मप्रतिपत्तये निषेध्यप्राप्तिपरैः प्राप्तत्वाच्च । तस्मान्निष्प्रपञ्चब्रह्मात्मप्रमितौ शाब्दी वा लौकिकी वा प्रमितिर्न विरुध्यते ।

ननु जीवोपि वाक्यार्थप्रमितिविषयः तस्मिन्प्रपञ्चे प्रत्यक्षावगते कथं निष्प्रपञ्चवाक्यार्थप्रमितिरिति । उच्यते । न तावदनुमानादिगम्यः कर्तृत्वादिप्रपञ्चः अपरोक्षत्वात् । नापि चक्षुरादिगम्यः प्रत्यगात्मनो बाह्येन्द्रियाविषयत्वात् । मानसप्रत्यक्ष † गम्य इति चेत् । किं तत्र प्रमाणम् । सत्येव मनसि आत्मनि बन्धोपलब्धेः असति च सुषुप्ते ऽनुपलब्धेरन्वयव्यतिरेकौ प्रमाणमिति चेत् न । अन्यथासिद्धत्वात् । आत्मनि कर्तृत्वादिप्रपञ्चसत्ताकारणतयाप्यन्वयव्यतिरेकोपपत्तेः । सुषुप्ते कर्तृत्वाद्यनवभासः किं मनसो ऽभावात्किं वा स्वयमभावादिति संदिग्धव्यतिरेकत्वात् । प्रतीतिः करणमप्यपेक्षत इति चेत् न । आत्मचैतन्येनैवाव्यवधानात्प्रतिभासोपपत्तेः । ननु कर्तृत्वभोक्तृत्वरागद्वेषसु-

* बाधेत–इति ३ पु० । † गम्य इति नास्ति १, ३ पु० ।

खदुःखादयोप्यात्मनि स्वयंप्रकाशा इति बौद्धप्राभाकराः कल्पयन्ति । नैतदुक्तम् । तेषां द्रव्यत्वे * बहुप्रकाशगुणकल्पनया तद्विशिष्टात्मप्रकाशकल्पनादात्मन एवैकं प्रकाशगुणं परिकल्प्य तदन्वयादितरेषां प्रकाशकल्पनाया लघीयस्त्वात् । तेषां गुणत्वे सति गुणस्य गुणान्ताराभावान्न स्वयंप्रकाशता । त एव प्रकाशगुणा इति चेत् न । प्रकाशगुणस्य स्वाश्रयोपाधावादित्यादाविवानुत्पत्तेः । बन्धस्य स्वसत्तायां प्रतीतिव्यतिरेकाभावोपि न स्वयंप्रकाशमानतां कल्पयति नित्यात्मप्रकाशसंसर्गादपि तदुपपत्तेः । नच कृप्रकारणाभावेपि बन्धापरोक्ष्ये प्रमाणकारणान्तरं कल्पयितुं युक्तम्[1]। निष्प्रपञ्चागमविरोधात् इन्द्रो मायाभिरिति मिथ्याकारणान्तरकृप्तेश्च । तस्मादज्ञानादिसत्यमिथ्यावस्तुसाधारणेन साक्षिभाचेण वेद्यत्वात्प्रपञ्चस्य सत्यतो निष्प्रपञ्चब्रह्मात्मप्रमितिः सप्रपञ्चप्रमित्या न बाध्यते । तस्मात् अविद्यातत्कार्य्यप्रपञ्चप्रतिभासाभावस्य तद्विरोधादेव ब्रह्मात्मविशेषणत्वेन प्रमातुमशक्यत्वाद् ब्रह्मात्मावगतिनान्तरीयकतया प्रातिभासिकबन्धनिवृत्तिरिति सूक्तम् ।

नन्वनर्थनिवृत्तिर्न शास्त्रविषयश्चेत् कथं विषयावगतिसामर्थ्यलभ्येति । तच्च किमनर्थनिरासः पर्यनुयुज्यते तन्निरासप्रतिभासो वा । यदि निरासस्तत्राह युक्तञ्चैतदिति । तत्त्वावभासविरोधित्वादविद्यातत्कार्यत्वाच्चेति भावः । ननु नेदं रजतमिति विज्ञानं तच रजतमिति विपर्यासं निवर्त्तयति इह तु अहं ब्रह्मास्मीति † विज्ञानं वस्तुस्वरूपनिष्ठं न प्रपञ्चनिषेधविषयं तच कथं विपर्यासनिरास इति चोदयति ननु च नजादेर्निरासकृत इति । ३८
तच द्वे ज्ञाने विपर्यासविरोधिनी विरोधिशुक्तिकादिभावान्तरात्मज्ञानमध्यस्तवस्तुतत्त्वाभावज्ञानं च । तत्राध्यस्ततत्त्वाभावज्ञानेनाध्यासनिरासे नजाद्यपेक्षा न विरोधिभावान्तरज्ञाने इति परिहरति नेदं रजतमिति यत्रेति । ब्रह्मणि तु विरोधिभावान्तरज्ञानादध्यासनिवृत्तिरित्याह इह पुनर्विज्ञानमेव तादृशमिति । ननु सर्वा हि व्यापारः स्वविषयमेव साधयति न नान्तरीयकमर्थान्तरम् अतो विपर्य्यासनिरासविषयो ज्ञानव्यापारो वक्तव्यो न भावान्तरविषय इति नेति दृष्टान्तमाह तुलोन्नमनव्यापार इवेति । अन्यविषयव्या- ,,

* बहुषु प्रकाशेति २ पु० । † ज्ञानमिति ३ पु० ।

३८ १६ पारादन्यविषयस्य नान्तरीयकसिद्धिं साधयति तथाह्युन्नमनव्यापार इति । ननु व्यापार एवोभयविषय इत्युभयं विषयतयैव सिध्यति नान्यतरज्ञान्तरीयकमिति नेत्याह नचोन्नमनकारकस्येति ।

भवतु शुक्तिब्रह्मात्मज्ञानाभ्यां रजतबन्धयोर्नान्तरीयको निरासः । निरासप्रतिपत्तिस्तु कथमिति । सापि नान्तरीयकेत्याह तदेवं विपर्य्यासगृहीते वस्तुनीति । एवमिति यथा निरासस्तथा तत्प्रतिपत्तिरपीत्यर्थः । अभिनयेन दर्शयति नाहं कर्ता ब्रह्माऽहमिति चो * त्क्रमेण सम्बन्धः । ब्रह्माऽहमिति वाक्यार्थबोधे ऽहं ब्रह्मैव चेन्नाहं कर्तेति नान्तरीयकबोधः । नेदं रजतमित्यत्राप्येषैव योजना । ननु वाक्यमेव ह्यर्थं किं न स्यादिति नेत्याह तस्माच्छुक्तिकेयमित्येव निराकाङ्क्षमिति । अनुवाद इति वाक्यार्थज्ञाननान्तरीयकसिद्धस्य अनुवाद इत्यर्थः । अर्थान्तरज्ञानेनार्थान्तरज्ञानस्य नान्तरीयप्रतिभासे दृष्टान्तमाह अत एवाऽख्यातपदस्येति । वाक्यार्थभूतक्रियावाचकत्वादाख्यातस्य वाक्यत्वम् । क्रियाज्ञानसामर्थ्यादेव सर्वसाधनानां विकल्पेन क्रियान्वयप्रतिपत्तौ पदान्तराण्यन्यतमनियमार्थानि नित्यवदन्वयप्रतिपत्तावनुवादमुखेनान्यनिवृत्त्यर्थानीत्यर्थः । संभवति च नित्यवदन्वयप्रतिपत्तिरेकस्य बहुसाधनतोपपत्तेः । तथाचाहुर्यजतिचोदनेत्यादि । उदाहरणान्तरं श्रुतार्थापत्त्यैवार्थान्तरप्रतिपत्तौ । कथं द्रव्यदेवतयोर्यागश्रुत्यन्यथानुपपत्तिगम्यतया यजत्यर्थतेत्याशङ्क्याह कथं क्रियामात्रवाचिन इति । ननु यच्च विपर्यासगृहीतस्य वस्तुनो विरोधिभावान्तरात्मविषयं वाक्यं विपर्यासं निवर्तयति तच्च विपर्यासनिरासप्रतिपादने वाक्यस्य सामर्थ्याभावान्नान्तरीयकं निरासज्ञानमस्तु । यच्च पुनः प्रत्यक्षं बाधकं तच्च विपर्यासनिरासविशिष्टभावान्तरज्ञानमेव बाधकम् न तच्च विपर्यासनिरासस्य नान्तरीयज्ञानमिहाप्यपरोक्षज्ञानाद्वन्ध्यनिवृत्तेरुभयविषयमेव ज्ञानं नान्यतरस्य नान्तरीयकतेत्याशङ्क्याह प्रत्यक्षबाधस्यापीति । न तावदनुपलब्धिगम्यो रजताभावः । पुरोदेशे दृश्यमानत्वात् अथ संप्रयोग † गम्य इति नेत्याह असंप्रयुक्तविषयत्वादिति । रजत-

३९ ३ तदभावो न संप्रयोगयोग्यावित्यर्थः । तदेवमशाब्दमित्युपसंहारः स्पष्टार्थः ।

* इति व्युत्क्रमेणेति २ पु॰, इति ह्युत्क्रमेणेति, ३ पु॰ ।

† गम्य इत्यस्य स्थाने जन्य इति १ पु॰, तदर्थरूपेण जन्य इति लिखितमस्ति २ पु॰ ।

ननु ब्रह्मविद्याफलमनर्थहेतुनिरासो न वेदान्तारम्भफलम् तच्च कथं प्रहाणाय वेदान्ता इत्याशङ्क्याह चतुर्थीप्रयोगोपीति । उपादानं वेदान्तारम्भ ३९
इत्यर्थः । तर्हि ब्रह्मविद्याफलत्वान्न शास्त्रस्यानर्थनिरासः प्रयोजनम् न परम्परयापि पुरुषाकाङ्क्षितप्रयोजनत्वोपपत्तेरित्याह प्रयोजनत्वं चेति । विद्याप्रतिपत्तय इति प्रतिपत्तिशब्दमाक्षिपति नहि विद्या गवादिवदिति । ज्ञानं हि वस्तुतः प्रतीतितश्च ज्ञातुरुत्पत्त्यैवाप्तमेवेत्यर्थः । तच्च प्रत्यक्षान्तरेषु स्वविषयेण सहापरोक्षावभासाविद्या भवति आप्तिशब्देन च विषयेण सहापरोक्ष्यनिश्चयो विवक्ष्यते तदिह न संभवतीत्याह सत्यमेवमन्यचेति । अत्र विद्येति शक्तितात्पर्य्यविचारसहकृताच्छब्दाद्यत् प्रमाणज्ञानमुत्पद्यते तदभिधीयते । तस्य प्रतिष्ठा स्वविषयेण सहापरोक्ष्यमिति । तत्रासंभवानेति चित्तस्य ब्रह्मात्मपरिभावनाप्रचयनिमित्ततदेकाग्रवृत्त्ययोग्यतोच्यते । विपरीतभावनेति शरीराद्यध्यासंसंस्कारप्रचयः । नन्वपरोक्षावभासनिमित्तप्रमाणगृहीते वस्तुनि नोभयविधचित्तदोषादपरोक्षनिश्चयाभावदर्शनमस्तीति तत्राह तथा च लोके ऽस्मिन्देशे काल इति । यथा दूरदेशवर्त्तिन्यार्द्रमरीचफलादौ तथाविधवस्तुदर्शनसंस्कारशून्यतया विपरीतसंस्कारवत्तया च प्रत्यक्षदृष्टेपि न निश्चिनोति । असंभावितविशेषांऽशापरोक्षनिश्चयो नोत्पद्यत इत्यर्थः । ननु प्रमाणादनिश्चीयमानः कथं तर्कप्रत्ययान्निश्चीयत इति तत्राह अत एव प्रमाणानामिति । प्रसिद्धैव सहकारिसंपत्तौ फलसिद्धिरित्यर्थः । ननु तर्कस्यापि प्रमाणत्वे कथं प्रमाणद्वयादर्थनिश्चयो भवति अप्रमाणत्वे नतरामिति मन्वान आह अथ कोयमिति । अप्रमाणमपि तर्कः सहकार्यैव प्रत्ययविशेषत्वादित्याह प्रमाण- ,,
शक्तिविषयतदिति । तेषां तत्त्वं तदित्युच्यते । प्रमाणादितत्त्वे संभवासंभवप्रत्ययस्तर्को न निश्चयरूप इत्यर्थः ।

तच्चेदं निरूपितं प्रथमे तन्त्रे । ज्ञानानां प्रामाण्यमप्रामाण्यं च स्वत इति ४०
केचित् । उभयमपि परत इत्यन्ये । प्रामाण्यं परतो ऽप्रामाण्यं स्वत इत्यपरे । अप्रामाण्यं परतः स्वतः प्रामाण्यमिति वेदवादिनः । तच्च न तावज्ज्ञानानां प्रामाण्यमप्रामाण्यं च स्वत इति युज्यते विरोधात् । ननु व्यक्तिभेदेन

व्यवस्था । सत्यमर्थतस्तथैव । प्रतीतितस्तु * प्रमाणाप्रमाणप्रतिभासाविशेषात्कस्य किमित्यनवगमाद्व्यवहाराभावप्रसङ्गात् । नच मूर्त्तामूर्त्तविभागवत्प्रमाणाऽप्रमाणविभागः प्रत्यक्षतो ऽवभासते । अर्थतस्तु व्यक्तिभेदेन व्यवस्थीयते । नाप्युभयं परतः । प्रमाणाप्रमाणविभागहीनस्य ज्ञानस्य स्वरूपानवगमात् । नापि प्रामाण्यमर्थपरिच्छेदसामर्थ्यं कारणगुणज्ञानात्परतो ऽवगम्यते । अनवस्थापातात् । नापि ज्ञानकरणव्यतिरिक्तात्कारणात्प्रामाण्यं जन्यते । क्षणमात्रापवर्गिणि ज्ञाने तदयोगात् । प्रतिभासतो भ्रान्तिसम्यग्ज्ञानयोर्विशेषाभावे चक्षुरादिगुणजन्यत्वावगमात्प्राक् प्रामाण्यनिश्चयाभावाद्व्यवहाराभावप्रसङ्गात् । प्रामाण्यनिमित्तचक्षुरादिगुणज्ञानस्यापि गुणान्तरजन्यत्वावगममन्तरेण गुणनिश्चयनिमित्तत्वायोगात् । प्रतिभासतो भ्रान्तेरविशेषात् स्वतो गुणजन्यत्वानिश्चयात् । ज्ञानस्य गुणान्वयव्यतिरेकयोश्च प्रामाण्यप्रतिबन्धकदोषाभावविषयतया † न्यथासिद्धत्वात् । दोषनिवृत्तिव्यतिरेकेणेन्द्रियादिषु गुणादर्शनाच्चान्यतोपि प्रामाण्यस्य ज्ञानेन सह जन्माभावः । अर्थक्रियासंवादज्ञानात्प्रामाण्यनिश्चयेपि तुल्यो ऽनवस्थादिदोषः । साधनज्ञानानामेवार्थक्रियासंवादात्प्रामाण्यम् न फलज्ञानानाम् अर्थक्रियान्तराभावात् अतो नानवस्थेति चेत् । तद्वदेव साधनज्ञानानामपि तत् स्वत एव स्यात् । अन्यथा प्रवृत्तस्यार्थक्रियातः प्रामाण्यं प्रामाण्याच्च प्रवृत्तिरितीतरेतराश्रयं स्यात् । न च प्रामाण्यनिश्चयाय प्रवृत्तिः असंदिग्धार्थत्वाज्ज्ञानानाम् । रूपकपरीक्षादौ प्रत्ययचतुष्टयाद् दृश्यते ऽर्थनिश्चय इति चेत् न । प्रथमज्ञानस्यैव संशयादिप्रतिबन्धनिरासित्वादुत्तरज्ञानानाम् । तस्माज्ज्ञानोत्पत्तिमात्रप्रयुक्तार्थव्यवहारदर्शनात् प्रतीतितो ऽर्थतश्च स्वत एवार्थनिश्चयः प्रामाण्यम् अप्रामाण्यजन्म दोषसहितात्कारणात् तत्प्रतीतिर्बाधादिति परत एवाप्रामाण्यं युक्तम् । नचाप्रामाण्यस्य परतो जन्म संभवति प्रामाण्यप्रागभावत्वादिति चेत् न । ज्ञानसंशयमिथ्यात्वानामप्रामाण्यानां भावरूपत्वात् । ननु स्वतः प्रमाणस्य कथं परतो ऽप्रामाण्यं स्वभावविरोधादिति चेत् । दोषप्रतिबन्धबलादग्नेरिव शैत्यस्पर्शो न विरुध्यते । स्वतःप्रामाण्या-

* प्रमाण्याऽप्रामाण्यप्रतिभासेति ३ पु० । † अन्यथासिद्धित्वादिति १ पु० ।

देव च यावद्दोषावगमं ज्ञानादेव व्यवहारदर्शनम् । तस्मात्प्रामाण्यतत्प्रतीत्योर्गुणतज्ज्ञानान्तराद्यनपेक्षमेव ज्ञानं स्वतः सत्तयैव निश्चयव्यवहारनिमित्तमिति स्थापितं तदेतद्विरुध्यते तर्कप्रत्ययापेक्षया ज्ञानस्य स्वविषयं प्रति निश्चायकत्व इति चोदयति नन्वेवं तर्कसापेक्षं स्वमर्थमिति । परिह- ३९
रति न स्यात्स्वमहिम्नैवेत्यादिना । प्रमाणादेवार्थापरोक्ष्यनिश्चये तत्प्रतिबन्धविगमे तर्कस्योपयोगान्नार्थनिर्णयहेतुतेत्युक्तम् ।

नन्वेवं बहिरर्थे प्रमाणप्रतिबन्धसंभवात्तद्विगमाय भवतु तर्कोपकारो न तथात्मनि स्वयंप्रकाशे प्रतिबन्धाभावादिति तत्राह तथा च तत्त्वमसिवाक्ये त्वम्पदार्थे इति असंभावयन्नित्या * परोक्ष्याभाव उच्यते विपरीतमिति च † पारोक्ष्यमुच्यते । अत्रायमाशयः । लोके तावद्विषयस्यापरोक्षता संवित्
भेदाद्वा विषयस्याव्यवधानतया स्वसंविज्जनकत्वाद्वा प्रमाणकारणेन्द्रियसंप्रयुक्तत्वाद्वा भवति उक्तकारणत्रयहीने ऽनुमेयादौ परोक्षतादर्शनात् । तत्र ब्रह्मण एव सर्वसंविदुपादानत्वाद्ब्रह्माकारशब्दप्रमाणजन्यसंवेदनेपि तदभिन्नतया वा तज्जनकतया वा ब्रह्मापि प्रथममेवापरोक्षतयावभासते । तच्च चित्तस्यातिसूक्ष्मे ऽनेकाग्रतादोषाद्विपर्य्ययसंस्कारदोषाच्च प्रतिबद्धं भ्रान्त्या परोक्षवदवभासते । तत्रापरोक्षज्ञानमुद्दिश्य यज्ञादीनां शमादीनां निदिध्यासनादीनां च विधानसामर्थ्यादज्ञादिनिबर्हितकल्मषप्रतिबन्धं शमादिनिरुद्धविपरीतप्रवृत्तिदोषं मननसंदर्शितप्रमेयादिसंभावनागुणप्रदीपोज्ज्वलितमतिसूक्ष्मतरब्रह्मात्मविषयनिदिध्यासनप्रचयपरिनिर्मिततदेकाग्रवृत्तिगुणं चेन्द्रियं पारोक्ष्यविभ्रमनिमित्तप्रतिबन्धनिरासेन शब्दादेवापरोक्षनिश्चयनिमित्तं भवतीति गम्यते । लोके चातिसूक्ष्मवस्तुनिर्धारणे चित्तैकाग्र्यविशेषापेक्षया दर्शनान्तर्कशब्देन चाचैतादृशं सर्वप्रतिबन्धनिरासि चित्तदर्पणमुच्यते । यौक्तिकासंभावनाविपरीतभावनानिरासितर्काणां प्रथमज्ञानेनन्तर्भूतत्वात् । एवं च तं त्वौपनिषदमिति तद्धितप्रत्ययेन ब्रह्मावगतिहेतुत्वं शब्दस्य दर्शितमुपपन्नं भवति अपरोक्षावगतेरेव सम्यगवगतित्वादिति । अन्यन्मतम् न प्रथमोत्पन्नं शाब्दज्ञानमेव प्रतिबन्धविगमापेक्षया ऽपरोक्षावभासं भवति किंतु शब्द

* इत्यऽपरोक्षनिश्चयाभाव इति ३ पु० । † पारोक्षमिति ३ पु० ।

एव प्रथमं ब्रह्मणि परोक्षज्ञानमुत्पाद्य पुनर्वार्णीतचित्तदर्प्पणसहकारिकारिणापेक्षया द्वितीयमपरोक्षज्ञानमुत्पादयति । शब्दादीनां तद्धितप्रत्ययादिना ऽपरोक्षज्ञाने विनियोगसामर्थ्यात् । यथा संप्रयोगो ऽभिज्ञामुत्पाद्य पुनः पूर्वानुभवसंस्कारापेक्षया प्रत्यभिज्ञामुत्पादयति तद्वत् । नच स्वयम्प्रकाशे ब्रह्मणि परोक्षज्ञानं विभ्रमः । स्वयम्प्रकाशेपि पुरुषान्तरसंवेदने परोक्षानुमानदर्शनादिति । सर्वथाप्यापरोक्ष्यस्य प्रयत्नान्तरलभ्यत्वाद्युक्तं पृथक्प्रतिपत्तिशब्दग्रहणमित्याह ततः प्राग्विद्योदितापीति । कैः पुनः सहकारिभिः शब्दप्रमाणा-
२३ दापरोक्ष्यं लभ्यत इति तचाह श्रवाप्रिप्रकारश्च वेदान्तेष्वेव निर्दिष्ट इति ।

12 ननु मननिदिध्यासनयोः कथं श्रवणं प्रत्यङ्गतावगमः यावता ब्रह्मण्येव शक्तितात्पर्य्यविशिष्टवेदान्तशब्दावधारणाच्छ्रवणशब्दाभिधेयादात्मन्यवबुद्धे पश्चान्मननमर्थसंभावनोपपत्तिपर्य्यालोचनाद्वारा जनिता ब्रह्मणि प्रत्ययावृत्तिरुत्पद्यते । ततश्च प्रमाणयुक्तिसंभावनाभ्यां परिनिश्चितेपि विषये तदेकाकारं चित्तसमाधानं निदिध्यासनमुत्पद्यते । तदेवं निदिध्यासनस्वरूपोपकारितया श्रवणमननयोस्तदङ्गभावे ऽवगते न युज्यते श्रवणाङ्गता मननिदिध्यासनयोरिति । अचोच्यते । यस्मिन्पक्षे शक्तितात्पर्यविशिष्टशब्दावधारणं प्रथमं ब्रह्मणि परोक्षज्ञानमुत्पाद्य मननिदिध्यासनसंस्कारविशिष्टान्तःकरणापेक्षया परोक्षज्ञानमुत्पादयति तच ब्रह्मणि परोक्षज्ञानस्य निदिध्यासनोपकारितया तदङ्गत्वेपि तात्पर्य्यविशिष्टशब्दावधारणादपरोक्षज्ञानोत्पत्तौ मननिदिध्यासने श्रवणस्य फलोपकार्य्यङ्गतामश्नुवाते । नन्वपरोक्षफलोदयेपि निदिध्यासनाङ्गतैव श्रवणमननयोः किं न स्यात् चयाणामपि सन्निपत्योपकाराविशेषात् । दर्शपौर्णमासवत्समप्रधानता वा किं * न स्यादिति । उच्यते । विशिष्टशब्दावधारणं प्रमेयावगमं प्रत्यव्यवधानेन कारणं भवति । प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात् । मननिदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवण † तासंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्य्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते इति फलं प्रत्यव्यवहितस्य करणस्य विशिष्टशब्दावधारणस्य व्यवहिते मननिदिध्यासने तदङ्गे अङ्गीक्रियेते । यदा तु पुनः शब्दादेव प्रथममपरोक्षानुभव-

* नशब्दः १ पु॰ नास्ति । † तत्प्रत्ययो नास्ति ३ पु॰ ।

फलं विज्ञानमुत्पन्नं भ्रान्तिविक्षेपसंस्कारखचित्ता * न्तःकरणदोषादथापि परोक्षानुभवफलतया विभ्रान्त्या ऽवतिष्ठते । तदा मननंनिदिध्यासने चित्तगतविक्षेपादिदोषप्रतिबन्धनिरासेनापरोक्षफलप्रतिष्ठाहेतुतया प्रमाणस्य फलोपकार्य्यङ्गमिति न विरुध्यते । नच शब्दकरणमन्तरेण निदिध्यासनादेवापरोक्षानुभवफलजन्म संभवति । तस्य प्रामाण्यासिद्धेः । शब्दावगतब्रह्मात्मविषयत्वादपरोक्षस्य तद्द्वारेण प्रामाण्यनिश्चय इति चेत् । नैवम् । उत्पन्नस्य हि विज्ञानस्य प्रमाणान्तराधीनविषयसद्भावनिश्चयाधीनप्रामाण्यकल्पनाद्वरं स्वस्यैव कृप्तप्रमाणजन्यत्वकल्पनम् । अन्यथा परतःप्रामाण्यादितरच्च स्वतःप्रामाण्यात् । तस्मादुक्तं श्रवणस्य फलोपकार्य्यङ्गता मननंनिदिध्यासनयोरिति ।

ननु ब्रह्मापरोक्षज्ञानमपि नानर्थनिवृत्तिनिमित्तम् सत्यपि तस्मिन्संसारानुवृत्तिदर्शनात् अन्यथा सद्य एव शरीरपातः स्यादिति चोदयति नन्वात्मैकत्वविद्याप्रतिपत्तिरिति । ननु व्यतिरेकज्ञानात्तत्त्वज्ञानस्य विशेषो दर्शितः । सत्यम् फलतो न विशेष इत्याह तथाहि जीवस्येति । नैतदुक्तम् तत्त्वापरोक्षात्समूलाध्यासनिवृत्तेरन्वयव्यतिरेकशास्त्रसिद्धत्वादित्याह भवतु तच्चाविद्याया इति । नन्वध्यासविरोधिव्यतिरेकावगमात्तत्त्वावबोधो ऽध्यासविरुद्धोपि तन्नापनयतीत्यनुमीयतामिति नेत्याह नहि जीवस्येति । अनवबोधविरुद्धं तत्त्वज्ञानं न व्यतिरेकज्ञानमित्यर्थः । सशरीरेन्द्रियस्यैवापरोक्षावगमात् तर्हि सद्य एव शरीरपातः स्यादिति चोदयति ननु ब्रह्मज्ञानादिति । तत्त्वज्ञानादविद्यानिरोधेपि पुनरनुवृत्तिर्युज्यत इत्याह न संस्कारादिति । तदेव प्रपञ्चयति तथाहीति । ननु क्रियाज्ञानयोरेव संस्कारः सम्भवति नाज्ञानतत्कार्य्ययोः । न । गन्धादिसंस्कारदर्शनात् । प्रलयावस्थायां सर्वकार्यसंस्कारोपगमात् । सर्वत्र विनाशमात्रप्रयुक्तसंस्कारजन्मानुमानात् । अविद्यातत्कार्यस्य भ्रान्तिज्ञानात्मकत्वात् । अज्ञानादौ च साक्षिचैतन्यावच्छेदकज्ञानाभासोपगमात्संस्कारसिद्धेः । ननु संस्कारात् स्मृतिमात्रहेतोः कथमपरोक्षद्वैतावभासः स्यात् । अविद्यावत्संस्कारस्यापि चैतन्यदोषत्वादिति वदामः । अपरोक्षावभासकारणगतो दोषो ऽपरोक्षभ्रमहेतुरिति सिद्धत्वात् आत्ममा-

* अन्तष्करणेति १ पु॰ प्रायोऽत्र सर्वत्र भवति ।

 सगुणब्रह्मोपासनानामुपासनान्तराणां च चित्तशुद्ध्यर्थत्वम् ।

चस्यैवाविद्याश्रयत्ववत्संस्काराश्रयत्वोपपत्तेश्च * अविद्यासंस्कारव्यतिरिक्तकार्याणामेवाविद्योपादानत्वात् । आत्मनो मिथ्याभूतसंस्कारोपादानत्वाभावेऽप्याश्रयोपाधित्वस्याविद्योपाधित्ववदविरोधात् । तत्त्वज्ञानानुसंधानादेव च क्रमेण संस्कारनिवृत्तेः कंचित्कालमवस्थायैव विदेहमुक्तिर्न विरुध्यते । अविद्यालेशो वा तमोलेशवत्संस्कारशब्देनाभिधीयत इति निरवद्यम् ।

० ११ ननु न सर्वे वेदान्ता इति स्पष्टार्थः । तच्च निर्विशेषब्रह्मप्रतिपत्त्यर्थेषु वेदान्तेषु सगुणब्रह्मोपासनानां तावत्प्रासङ्गिकत्वं दर्शयति सत्यमुपासनाकर्मत्विति । ननु निर्विशेषं चेद् ब्रह्म प्रतिपाद्यम् तस्य कथं सगुणोपासनालम्बनं सप्रपञ्चं ब्रह्माङ्गभूतं स्यात् येनाश्रित्य विधानमुच्यत इति अध्यारोपापवादन्यायमभिप्रेत्याह तच्चापाकृताशेषप्रपञ्चमिति । निराक्रियमाणे प्रपञ्चे कथमुपासनाविधानं निराकरणप्रत्ययविरोधादिति तत्राह अस्यां चावस्थायामिति । नन्वाश्रित्य विधाने गोदोहनवदधिकृताधिकारतापि स्यादिति मुमुक्षोरेवोपासनास्वप्यधिकारः स्यादिति । उच्यते । अपां प्रणयनस्य प्रकृततयोद्देश्यत्वान्न गोदोहनविधिनानुष्ठेयतया सिद्धिः अतः प्राप्तोद्देश्यत्वात्प्रणयनस्य स्वतन्त्रपशुकामिनो प्राप्तत्वात्प्राप्तप्रणयनस्य दर्शपौर्णमासाधिकारिण एव पशुकामस्य गोदोहनेप्यधिकारो दर्शितः । सप्रपञ्चब्रह्मप्रतिपत्तिश्चाश्रीयमाणा मुमुक्षोरमुमुक्षोश्च शब्दादविशेषेण प्राप्तेति तदाश्रित्य विधानं मुमुक्षूणामप्युपपद्यत इति न मुमुक्ष्वधिकारकल्पना किन्त्वाश्रित्य विधानमात्रमिति निरवद्यम् । अतो महातात्पर्य्यप्रक्रमो ब्रह्मपर इत्युपसंहरति तस्मात्तदर्थोपजीवित्वादिति ।

नन्वब्रह्मोपासनान्यपीत्यादेरयमर्थः । साक्षाद्वा परम्परया वाऽन्तःकरणशुद्धिद्वारेण वा ब्रह्मात्मैकत्वावगतिपराः सर्वे वेदान्ता इति वेदान्तविषयप्रयोजनयोरेव विचारशास्त्रस्याऽपि विषयप्रयोजनत्वमिति कथयितुमाह यथाचायमर्थ इति । भाष्यस्था तात्पर्य्यमाह प्रतिज्ञातेर्थ इति ॥ शरीरेत्यादिः स्पष्टार्थः । वेदान्तानां शारीरकत्वेऽपि विचारस्य कथं शारीर-
२५ कत्वमिति तदाह तदिह वेदान्तानामिति । ननु विचारकर्त्तव्यतामात्रं

* अविद्यासंस्काराव्यतिरिक्तकार्याणामिति १ पु- ।

सूचार्थः । तत्र विषयप्रयोजनयोरसूचितयोरुपादानं वेदान्ततद्विचारसंबन्धितया नोपपद्यत इत्याशङ्कामपनुद्य वृत्तसङ्कीर्तनपूर्वकमुत्तरभाष्यस्य तात्पर्य्यमाह मुमुक्षुत्वे सत्यनन्तरमित्यादिना । कथं ब्रह्मज्ञानस्य मोक्षः ४० प्रयोजनमर्थसिद्धमिति तदाह पुरुषार्थकामनेति । प्रवृत्तिरिति प्रवृत्तिविषयेष्टसाधनता ऽभिधीयते । सैव हि विधिरिति वक्ष्यामः ।

यस्मिन्धात्वर्थे प्रवृत्तिर्हितसाधनता लिङादिपदैरुपदिश्यते स धात्वर्थः सामान्येन हितसाधनो ऽधिकारिविशेषणेन * फलविशेषेण सामर्थ्यात्सम्बध्यते । सामान्यप्रतीतेर्विशेषपर्य्यवसानमन्तरेणानुपपत्तेः । अतश्च विचारो हि सामान्येन हितसाधनतयावगम्यमानः स्वसामर्थ्यसिद्धज्ञानद्वारेणाधिकारिविशेषणमोक्षविशेषफले पर्य्यवस्यतीत्यर्थः । ननु च पुरुषार्थकामिनो यत्र नियोग उपदिश्यते तत्र नियोगो धात्वर्थस्य पुरुषार्थसाधनत्वं कल्पयति । ततश्च विधीयमानो विचारो नियोगसामर्थ्यान्मोक्षसाधनमिति कल्प्यतां किमिष्टसाधनत्वविधिसामर्थ्यकल्पनयेति । नैतत्सारम् अनुपपत्त्यभावात् । तथाहि । नियोगस्वरूपं तावन्न फलधात्वर्थसंबन्धमन्तरेणानुपपन्नम् अनाप्तनियोगे नैयमिके वा ऽदर्शनात् । †प्रवर्त्तकत्वमनुपपन्नमिति चेत् । यदि फलकामनापि नियोगेन प्रवृत्तावपेक्ष्यते सैव तर्हि प्रवृत्तिहेतुः न नियोगः । प्रत्यक्षादिषु तस्याः प्रवर्त्तने स्वातन्त्र्यदर्शनात् । अथ नापेक्ष्यते कामः । तर्हि फलकामनामनपेक्ष्य बलवदनिलसलिलौघनुद्यमान इव पुरुषे नियोगेन प्रवर्त्त्यमाने न फलसंबन्धकल्पनावकाशः सलिलादिनोदनेपि प्रसङ्गात् । ननु फलकामिनो नियोगः प्रमीयमाणो ऽनुपपन्नः फलसंबन्धमन्तरेण अन्यथाफलकामिनियोगो न स्यात् । कोयमभिप्रायः । यदि तावत् फलकामना नियोगाधिकारिविशेषणं न स्यात् फलधात्वर्थसंबन्धमन्तरेणेति । तन्न । जीवनादीनामसाध्यानामप्यधिकारिविशेषणत्वदर्शनात् । साध्यस्य विशेषणत्वमनुपपन्नमिति चेत् न तावदनेन साध्यत्वं सिद्धवत्कर्तुं शक्यते । स्वरूपेण साध्यत्वं चेत् न अविवक्षितत्वात् । तथाहि । अधिकारिविशेषव्यावृत्तिमात्रप्रयोजनतया विशेषणपरेण शब्देन साध्यता न विवक्ष्यते नार्थादपि साध्यत्वविवक्षा । तत्र प्रमाणस्याद्याप्यदर्शनात् । कामनैव च सिद्धस्वरूपा ऽधिकारिविशेषणम् । स्वर्गस्य तद्भावर्त्तकत्वात् ।

* फलविशेषणेन सामर्थ्यादिति ए पु० । † प्रवर्त्तकद्वयमिति ए पु० ।

किञ्च । अन्यसाध्यस्यापि व्यापारान्तरे ऽधिकारिविशेषणत्वं दृश्यते अध्येतुकामो * मैत्र्यं चरेत्परस्त्रीकामः प्रायश्चित्तं कुर्यात् † यामकामो भुङ्क्ष्वेत्यादौ । नचाधिकारिविशेषणत्वमपि स्वर्गकामनायाः ‡ संभवति अयोगाऽन्ययोगव्यवच्छेदासंभवात् । तथाहि । स्वर्गकामपदं दर्श § पौर्णमासनियोगस्य पुरुषेणासंयोगं न व्यवच्छिनत्ति । नित्यविधिनैव पुरुषान्वयस्य सिद्धत्वात् । नापि नियोगस्यास्वर्गकामसंबन्धव्यवच्छेदार्थं विशेषणम् । अचापि दर्शपौर्णमासनित्यविधिसंबन्धविरोधात् । नच नित्यकाम्यनियोगभेदः । साङ्गदर्शपौर्णमासनियोगस्याविशिष्टत्वात् । अधिकारिमात्रभेदात् । तस्माद्वृद्धौ प्रेषानन्वाहेतिवद्विशेषणस्वर्गपरमिदं वचनं न विशिष्टपुरुषपरमिति फलवचनमेतत्स्वर्गकामपदमर्थात्स्वर्गकामोधिकारी भवति । फलवचनं च साधनवचनेनान्विताभिधानमर्हतीति न नियोगाभिधानावकाशः । ततश्चेष्टसाधनमेव लिङादिशब्दार्थो विधिरिति ।

अन्ये मन्यन्ते विषयनियोज्यव्यावृत्ते नियोगे ऽभिधीयमाने विषयनियोज्ययोरन्वयः सामर्थ्यादवगम्यते । अन्यथा ऽधिकारिणो विषयेण कर्तृकर्म्मानन्वयेनाननुष्ठीयमाने विषये नियोगस्य निवृत्त्ययोगात् । ततश्चाधिकारिणा धात्वर्थो ऽन्वीयमानस्तद्विशेषणेन स्वर्गेणाप्यन्वेति । विशिष्टानन्वयस्य विशेषणेनाप्यन्वयात् । तचान्वयो गुणप्रधानभावादृते नोपपद्यत इति स्वर्गप्राधान्येन कर्मगुणभावेनेति संपत्स्यते साध्यसाधनसंबन्ध इति ।

नैतत्सारम् । जीवनगृहदाहादिविशेषणेनापि यागस्यान्वयप्रसङ्गात् । को दोष इति चेत् । जीवनादेर्द्रव्यत्वं प्रत्यङ्गत्वेनान्वये विकृतावतिदेशः प्राप्नुयात् । तच यावज्जीवं सायं चरुं निर्वपेदिति स्यात् । प्राधान्येनान्वये जीवनादेरपि कर्मसाध्यत्वं स्यात् । तस्मात्स्वर्गकामपदं फलविशेषपरतया सामान्येन श्रेयःसाधनविध्यभिधायिना लिङादिपदेनान्विताभिधानं करोति । ननु शाब्दे फलविशेषान्वये सामान्येन श्रेयःसाधनत्वाऽपर्यवसानसामर्थ्याद्विशेषान्वय इत्युक्तमयुक्तम् । नैष दोषः । विशेषसाकाङ्क्षश्रेयःसामान्यसाधनत्वविधिसामर्थ्यात्स्वर्गकामपदं फलविशेषपरं ‖ कल्प्यते विध्याकाङ्क्षानिबन्धनत्वात्पदान्तरतात्प-

* मैत्रमिति क्वचित् । † यामकाम भुङ्क्ष्वेति २ पु०, यामकामो भुङ्क्ष्वेति ३ पु० ।
‡ संभवति संयोगान्येति ३ पु० । § पूर्णमासेति ३ पु० । ‖ कल्पतइति १ पु० ।

र्थस्य । ततश्च विधिसामर्थ्यात्फलसंबन्ध इत्युक्तम् । ननु तिङ्कृतद्धितसमासै-रनभिहित इति विशेषणात् लिङा यागस्य करणताभिधाने ज्योतिष्टोमेनेति तृतीया नोपपद्यत इति । न । यागज्योतिष्टोमसामान्यविशेषप्रकृत्यर्थभेदोपरक्त-करणत्वभेदादऽदोष इत्यलमतिप्रसङ्गेन ।

विषयसिद्धिः कथमिति तदाह तथा सति कुत इति । तदेवमि- ४१
त्यादयुक्तानुकीर्तनम् । प्रथमं तावदिति भाष्यस्य तात्पर्यकथनम् । ननु विषयः समन्वयलक्षणेनैव गम्यते प्रयोजनं च चतुर्थाध्यायेनैव *प्रमीयते तच्च किमिति विषयप्रयोजने प्रथमसूत्रेण †सूचिते इति तदाह । शास्त्रस्या-दिरयमिति नन्वेकस्य सूत्रवाक्यस्यानेकार्थत्वमयुक्तमिति । तत्राह सूत्रं चैतदिति । तत्राथशब्द इत्यादिपदव्याख्यानभाष्यस्य वृत्तसङ्कीर्तनपूर्वकं तात्पर्यमाह एवं सूत्रस्यादित्वेनेति ॥

॥ ‡इति प्रथमवर्णकं समाप्तम् ॥



* प्रतीयत इति ३ पु० । † सूत्रिते इति २ पु० ।

‡ श्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्यस्वप्रकाशानुभवभगवतः कृतौ पञ्चपा-दिकाविवरणे प्रथमवर्णकं समाप्तमिति ३ पु० ।

तचोक्तस्तावद्विचारविधेः फलानुबन्धो व्यवहितविषयब्रह्मात्मतानुबन्धश्चेदानीमव्यवहितविचारविषयानुबन्धमन्यत एवाप्राप्तानुष्ठानं दर्शयितुं प्रथममाच्छिपति सिद्धैव ननु ब्रह्मजिज्ञासेति । वेदान्तानामर्थनिर्णयापेक्षितो न्यायकलापो ऽथातो धर्मजिज्ञासेत्यादिसूचैः सूचित इत्यर्थः । ननु विधिवाक्यार्थनिर्णयस्तच प्रवृत्त इत्याशङ्क्याह सकलवेदार्थस्य विचारितत्वादिति । वेदस्य कार्यमात्रपरत्वादित्यर्थः । ननु वेदान्ततात्पर्याद् ब्रह्मावगम्यते न कार्य्यमनवगम्यं च न वाक्यप्रमेयमिति तत्राह ब्रह्मज्ञानस्य चेति । ननु क्रियाविधिकलापो निरूपितो ज्ञानविधिनिरूपणायेदमारभ्यत इति नेत्याह अतः सिद्धैवेति । उत्पत्तिविनियोगप्रयोगाधिकाराणां विध्यपेक्षितरूपाणां क्रियाप्रतिपत्त्योरविशेषेण निरूपितत्वादित्यर्थः । ननु यथा प्रथमे ऽध्याये वेदस्य प्रामाण्यं निरूपितम् । द्वितीये कर्मोत्पत्तिविधिभेदः । तृतीये विहितानामङ्गाङ्गिभावो निरूपितः । चतुर्थे क्रतुपुरुषार्थप्रयुक्तानुष्ठेयपरिमाणम् । पञ्चमे अनुष्ठानक्रमः । षष्ठे विध्यपेक्षितोधिकारनिर्णय इति पूर्वषट्केन प्रकृतिविध्यपेक्षितो विचारः कृतः समग्राङ्गसंयुक्तो विधिः प्रकृतिर्विकलाङ्गसंयुक्तो विकृतिरित्युच्यते । तच सप्तमेन प्रकृत्युपदिष्टानामङ्गानां विकृतावतिदेशो निर्णीतः । अष्टमे त्वाग्नेयोष्टाकपाल इत्यादिप्रकृत्युपदिष्टानामङ्गानां सौर्ये चरुं निर्वपेदित्यादिविकृतौ द्रव्यदेवतादिसामान्यद्वारेण विशेषातिदेशो निरूपितः । नवमे तु प्रकृत्युपदिष्टमन्त्रसामसंस्कारकर्मणां विकृतावतिदिष्टानां प्रकृतिविकृत्योर्द्रव्यदेवताभेदे सति प्रकृतिगतद्रव्यादिशब्दं विहाय विकृतिगतद्रव्यादिशब्दाध्याहारलक्षण ऊहो दर्शितः । यथाग्नये जुष्टमिति मन्त्रस्य विकृतौ सूर्याय जुष्टमिति पदप्रक्षेपः । दशमे तु विकृतावतिदिष्टानामङ्गानां * प्रकृतौ सावकाशानां विकृतिगतविशेषाङ्गोपदेशादिना बाधो दर्शितः । यथा प्रकृतेर्विकृतावतिदेशप्राप्तानां बर्हिषां शरमयं बर्हिरितिविकृतौ विशेषोपदेशेन बाधः । एकादशे त्वनेकशेषिविधिप्रयुक्तस्य शेषस्य सकृदनुष्ठानादेव सर्वशेषिणामुपकारसाम्यं तन्त्रं नामोक्तम् । यथाग्नेयो ऽष्टाकपाल उपांशुयाजमन्तरा यजत्यग्नीषोमीयमेकादशकपालमिति च पौर्णमासकर्मचयप्रयुक्तस्य

* विकृतौ सावकाशानामिति २ पु०, प्रकृतौ साधकानामिति शोधितं १ पु० ।

प्रयाजादेः सकृदनुष्ठानादेव शेषित्वेोपकार इति । द्वादशे त्वेकशेषिप्रयुक्तस्य शेषानुष्ठानस्याप्रयोजकसामर्थ्ययुक्तशेष्यन्तरेप्युपकारः प्रसङ्गो नाम दर्शितः । यथा पशुविधिप्रयुक्तानामङ्गानां पशुपुरोडाशेप्युपकारः । तदेवं प्रत्यद्धायमाशङ्कान्तरनिराकरणेन विद्वंशभेदो निरूपितः । तथा प्रतिपत्तव्यस्य ब्रह्मणः प्रत्यक्षादिभिरसिद्धत्वात्प्रतिपत्तिविध्ययोगाशङ्कायां तन्निराकरणायेदमारभ्यत इति । तत्राहाभ्यधिकाशङ्काऽभावादिति । यूपाहवनीयादिवद् ब्रह्मणः सिद्धि- ४२
रसिद्धौ * वारोपितरूपेणेवोपासनसिद्धिरित्यर्थः ॥

अत्र पूर्ववादी सिद्धान्त्येकदेशीयान् दूषयितुं वेदान्तानां † विधिनिष्ठत्वमङ्गीकृत्यैव ‡ याभ्यधिकाशङ्का तन्निराकरणायैव तेषामारम्भप्रकारं दर्शयति अत्र केचिदिति । ननु क्वचिदेव विधिश्रवणेपि तदाकाङ्क्षितानुबन्धसमर्पणेन व्यवहितमपि वेदान्तवाक्यजातं तदेकवाक्यतया संबद्ध्यते किं सर्वत्र विधिश्रवणेनेत्याशङ्क्याह यत्रापि विधिः श्रूयत इति । तत्रापि विधेरनुपपत्तिरिति § भावः ॥ ननु भावकर्मणोर्विहितानामपि कृत्यप्रत्ययानां कृत्याश्चेति विधौ स्मरणात्तव्यप्रत्ययेन ज्ञानं विधीयत इति तत्राह तत्र यद्यपि कृत्या इति । ‖ तथापीह विधिर्ने सम्भवतीत्यर्थः । ननु गन्तव्यमिति गमनविधानवज्ज्ञानं विधीयताम् । सत्यम् । युक्तं भावविषये तव्यप्रत्यये विधानमित्याह यो भावाभिधायीति । भाव इति धात्वर्थमात्रमुच्यते । तत्प्राधान्येन स्वतन्त्रफलाय विधातुं शक्यत इत्यर्थः । ननु कर्माभिधायितव्यप्रत्ययादपि धात्वर्थविषयो विधिरवगम्यते स्वाध्यायोऽध्येतव्य इति तत्राह यत्र पुनः कर्म प्राधान्येनोच्यत इति । तत्रापि स्वतन्त्रफलाय वा कर्म ¶ विधीयते किं वा कर्मकारकगतफलायेति । न तावत्स्वतन्त्रफलायेत्याह तत्र द्रव्ये गुणभूतामिति । अथ कर्मकारकसमवायिफलाय विधिः तत्राह द्रव्यपरत्व इति । नन्वात्मनि विहितक्रियासामर्थ्यादज्ञानाधर्मादिम ** लापकर्षः संस्कारः स्यादिति नेत्याह संस्कृतश्चेति ॥ तत्र सक्तूञ्जुहोतीति क्रतु- ,,
प्रकरणे श्रवणात्क्रत्वङ्गता सक्तुहोमस्यावगता । तत्राङ्गानि च द्विविधानि अर्थ-

* वास्याने चकारः १, ३ पु· ।
† विधिनिष्कर्षत्वमिति शोधितं २ पु· ।
‡ याधिकाशङ्का दर्शिता तन्निराकरणायेति १ पु· ।
§ भावइत्यस्य स्थाने शेष इति १ पु· ।
‖ तथापीह तु विधिरिति १ पु· ।
¶ विधीयतामिति ३ पु· ।
** मलापकर्षसंस्कारः स्यादिति ३ पु· ।

कर्माणि संस्कारकर्माणि च । क्रतूपकारकाण्यनाश्रित्य स्वातन्त्र्येण विहितानि प्रयाजादान्यर्थकर्माणि व्रीह्यादिकारकगुणभूतानि संस्कारकर्माणि । तच्च न तावत्सक्तुहोमस्यार्थकर्मता सक्तुद्रव्यस्य गुणभूतत्वात्प्रोक्षणादिवत् । संस्कारकर्म च द्विविधम् विनियुक्तसंस्कारो यथा व्रीहिभिर्यजेतेति विनियुक्तव्रीहीनुद्दिश्य प्रोक्षणादिसंस्कारः । कश्चिद्विनियोक्ष्यमाणसंस्कारो यथा ऽऽहवनीये जुहोतीति विनियोक्ष्यमाणस्याधानेन संस्कारः । संस्कृतस्य विनियोग इत्यर्थः । तच्च होमेन भस्मीकृतानां सक्तूनामुभयथापि क्रतौ विनियोगाभावात् वैयर्थ्यायोगाच्च संस्कारकर्मत्वं परित्यज्य सक्तूनिति प्राधान्यं च विहाय सक्तुभिरिति गुणभावेन कर्मप्राधान्यमुपादायार्थकर्मता निरूपिता यथा । तथात्मानमिति साध्यतया प्राधान्यं विहायात्मनोपासीतेति गुणत्वोपगमेन स्वतन्त्रफलायो-
४२ १३ पासनं प्राधान्येन विधीयतामिति शङ्कते अथ पुनर्विपरीत इति । तच्च यथा होमप्राधान्येपि सकर्मकत्वाद्धातोः सक्तव एव कर्मकारकतया भस्मीक्रियन्ते एवमवगमस्यापि सकर्मकत्वादर्थतः कर्माभावेन विधानमिति परिहरति तचापि न ज्ञायत इति । शब्दतः करणत्वेप्यर्थतः कर्मतात्मन एवेत्याशङ्कते अथ ज्ञायत इति । तर्हि कर्मकारकत्वे सत्यात्मनि कश्चिदतिशयो वक्तव्यस्तदभावान्निष्कर्मकं विज्ञानं न विधातुं शक्यत इत्याह एवं तर्हि तदेवायातमिति । नन्ववभास्यतया ऽवाप्तिरात्मनि विधेयक्रियाफलमिति नेत्याह तच्च कृतकरणमनर्थकमिति । नित्यचैतन्येन प्रतीतितो ऽवाप्तत्वान्न ज्ञानकर्म तेत्यर्थः । * अपरे पुनरित्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । अविद्याधर्मादिनिवृत्तिः संस्कारो न च संस्कृतस्यान्यच्च विनियोगाकाङ्क्षा स्वयंपुरुषार्थत्वादपुरुषार्थसंस्कारस्य च विनियोगापेक्षत्वात्तदर्थमारभ्यत इति पृथगारम्भवादिनो मतम् ।

अपरे पुनरेवमारभन्त इत्यादेरयमर्थः । प्रतिपत्तिविध्यपेक्षितो ऽपि चतुर्विधो न्यायः प्रथमतन्त्रे निरूपितः । तच्च तद्विषयस्य ब्रह्मणो निरूपणाय शास्त्रमारब्धव्यम् । तच्च न संभवति ब्रह्मणि प्रामाणाभावादिति ।
४३ ३ अचोच्यत इत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । अधिकारनियोगविषयतयेति । अयमर्थः । ज्ञानस्य फलसम्बन्धो ऽवगम्यत तत्फलकामिना तदनुष्ठेयं नियोगाच्चानुष्ठानमिति फलकामिनियोगविषयतया ऽवगमादिति भावः ।

* इत्यर्थ इत्यनन्तरम् अविद्याधर्मादि ३ पुस्तके अस्ति, मध्यपाठस्तु नास्ति ।

अथोच्यत इत्यादिनारभ्यद्वयं पूर्ववादी निराचष्टे । यदि लोके कृत्य- ४३
प्रत्ययो न नियोगं गमयतीति शङ्कते तन्नास्तीत्याह तत्स्वयमेवेति । * अथ वेदे तचाह प्रसिद्धं चैतदिति । अतः प्रथमसूत्रेणाध्ययनविधिमङ्गीकुर्वतां गत एवायं विचार इत्यर्थः । ननु चतुर्विधस्येत्यादिरुक्तार्थः । करणत्वेपि चात्मन एव कर्मकारकत्वे स्वतोऽपरोक्षतया नित्यसिद्धस्य विधेयक्रियाजन्यप्रतिभासायोगादकर्मत्वान्निष्कर्मकं ज्ञानं न विधातुं शक्यमित्युक्तमित्याह तदपि नेति । आत्मनि चतुर्विधफलाभावादकर्मत्वेपि कर्तृसमवायिमोक्षफलाय तदवभासिज्ञानसन्ताननियमविधिः स्यात् यथा हिरण्यं बिभृयादिति पक्षे प्राप्तस्य नियमविधिरभ्युदयफलस्तद्वदित्याह सिद्धस्यैवेति । नन्ववस्थाचयेपि ज्ञानसन्तानाविच्छेदान्न नियमविधिरित्याह ननु † न विधानतोपीति । तर्ह्यनात्मप्रतिभासनिवृत्तये परिसङ्ख्याविधिरदृष्टार्थः स्यादित्याह एवं तर्हीति । अतो गतार्थत्वान्नाधिकाशङ्केति भावः । सत्यपि ज्ञानविधाने प्रयोजनाभावान्न शास्त्रारम्भ इत्याह यत्पुनरात्मज्ञानादित्यादि ‡। नचानर्थनिवृत्तौ स्वयमहेतुरपि ज्ञानसन्तानो विधानादनर्थं निवर्तयति विशेषाभावादित्यर्थः । तर्ह्यलौकिकात्मतत्त्वज्ञानमविद्यादिदोषनिवृत्तिफलं विधीयतामित्याशङ्कते अथ पुनरहंप्रत्ययावसेयादिति । न अत्यन्तमसिद्धमुद्दिश्य विधानानुपपत्तेरित्याह तदसत् विधिर्हीति । यथा सामान्यप्रसिद्धं यागमुद्दिश्य पूर्वानुभूतयागव्यक्तिसदृशं व्यक्त्यन्तरं बुद्धिस्थमेव विधीयते एवमलौकिकात्म § ज्ञानं सामान्यतः प्रसिद्धमुद्दिश्य पूर्वानुभूतज्ञानव्यक्तिसदृशं व्यक्त्यन्तरं बुद्ध्यावाकलय्य तत्कर्तव्यतया विधेयमित्यर्थः । ननु ज्ञानसामान्यस्य लोके सिद्धत्वात्तदुद्देशेन विधाने तद्व्यक्तित्वेनालौकिकात्मज्ञानं कर्तव्यतया प्रतीयतामिति नेत्याह तद्यदि नाम ज्ञानमिति । तादृगात्मज्ञानस्य ज्ञानसामान्यव्यक्तित्वेनाप्रसिद्धत्वात्तादृशं ज्ञानं कर्तव्यतया बुद्ध्यावारोपयितुं ‖ न शक्यमित्यर्थः । अथ तादृगात्मज्ञानं सिद्धम् किं स्वात्मनि पुरुषान्तरे वा । पुरुषान्तरे चेत् अन्यस्याधिकारिणस्तदप्रतिपत्तेर्न तादृशं व्यक्त्यन्तरं कर्तव्यतया बुद्ध्यावारोपयितुं शक्यम् । अथ

* अथवेदमिति १ पु० । † नकारो नास्ति १ पु० । ‡ इत्यादिनेति १ पु० ।
§ तत्त्वेत्यधिकं ३ पु० । ‖ नशब्दो नास्ति १ पु० ।

३३ २० स्वात्मनि तत्राह किं विधिनेति । यदपि मतान्तरमित्यादिरुक्तार्थः । तद्विचाराय ब्रह्मविचाराय शास्त्रारम्भ इत्यर्थः ।

अपरं मतमिति स एव प्रतिपत्तिविधिवादी स्वपक्षमुपपादयति । सत्यम् । कार्यपरादपि वेदाद् ब्रह्मणोऽपि प्रतिपत्तेर्युक्तः प्रतिपत्तिविधिरित्याह * ननु तावन्मात्र इति । ननु विरुद्धमिदम् अर्थान्तरपराच्छब्दादर्थान्तरप्रतिपत्तिरिति तत्राह तस्मिन्सतीति । विधिप्रमाणाद्विधिसंसृष्टतयान्येऽपि पदार्थास्तदपेक्षिताः प्रमीयन्त इत्यर्थः । यथा रूपविषयस्य चक्षुषस्तत्संसर्गि सर्वं विषय इति दृष्टान्तमाह यथा रूपे सतीति । ननु द्रष्टव्य इत्यादिना नापरोक्षज्ञानं विधेयम् सुखसंवेदनतया स्वर्गादिवत्पुरुषार्थस्याविधेयत्वात् । नापि शाब्दज्ञानम् तत्र विधेरश्रवणादिति चोदयति कथमिति । अस्ति शाब्दज्ञाने विधानमित्याह उच्यत इति । नन्विदं वाक्यमात्मनोऽनात्मरूपताविधानपरम् अतोऽपुरुषार्थत्वान्न विधेयमिति नेत्याह न तावत्सर्वरूपतेति । प्रतिपन्नमुद्दिश्याप्रतिपन्नात्मरूपस्यैव विधानादित्यर्थः । दूषणान्तरमाह यदि सर्वरूपतात्मन इति । किं तर्हि विधीयत इत्यत आह अतः सर्वस्येति । नेतिनेत्यादिवाक्यपर्यालोचनयाप्यनात्मोपमर्देनात्मैव विधेय इत्याह अनात्मस्वरूपविलयनेनेति । नन्वात्मनोऽद्वितीयत्वप्रतिपादनपरमिदं वाक्यम् न तत्र ज्ञाने वस्तुनि वा विधिरवगम्यत इत्याह नन्वत्र विधिर्न श्रूयत इति । पूषा प्रपिष्टभाग इत्यादाविव कल्प्यतामित्याह कल्प्यतां तर्हीति । किं प्रतीते विध्यर्थ इत्यादेरयमर्थः । कालत्रयानवमृष्टे ऽनुष्ठानयोग्ये कर्मणि शब्दसामर्थ्यात्प्रतिपन्ने † तदन्यथानुपपत्त्या च कर्तव्यरूपे नियोगे ऽवगते विधायकपदार्थे पश्चाद्विधिर्विधायकपदं कल्प्यते ‡ किंवा एवंविधार्थे ऽप्रतिपन्ने ऽननुष्ठेये § वस्तुमात्रे च प्रतिपन्ने विधिपदं कल्प्यत इति । प्रतीते चेत्प्रमितये ऽनु-
१४ ९ वादाय वा पदं कल्प्यते नानुवादेन प्रयोजनम् । प्रमितये चेत्तत्राह प्रतीते कल्पनावैयर्थ्यमिति । प्रतिपादकतया लिङादिपदकल्पनावैयर्थ्यमित्यर्थः । अननुष्ठेयवस्तुप्रतिपत्तौ विधिकल्पनाहेत्वभावान्न तत्र पदादनुष्ठेयप्रतिपत्तिरित्याह

* नतु तावन्मात्र इतीति २ पु० । † तदप्यर्थानुपपत्त्येति २ पु०

‡ किंचैवंविधेर्थे इति २ पु० ।

§ अननुष्ठेयवस्तुमात्रे च प्रतिपन्न इति १ पु०, अननुष्ठेये वस्तुमात्रत्वप्रतिपन्ने इति २ पु० ।

अथाप्रतीत इति । अर्थवादसंसर्गेष्वपि कल्पनाप्रसङ्गादिति भावः । ननु ४४ १९
विकल्पदूषणयोः सर्वत्राविशेषान्न क्वचिदपि विधिकल्पनमिति मन्वानश्चोद-
यति नन्वश्रूयमाण इति । तत्र द्रव्यदेवतासबन्धः कालत्रयानवमृष्टः प्रमी-
यमाणः स्वाविनाभूतं यागं गमयति यागश्च * स्वाविनाभूतनियोगमिति श्रुत-
सामर्थ्यादेव विध्यर्थः प्रतिपन्नः । तत्र व्यवहारमाचाय पूषोट्टेशेन पिष्टद्रव्य-
त्यागः कर्तव्य इत्युपसंहियते न † तथेह श्रुतसामर्थ्याद्विध्यर्थः प्रतिपन्न
इत्याह सत्यम् युक्तं तत्रेति । नन्विहापि श्रुतस्यात्मनः सामर्थ्यान्नियोगः
प्रतिपन्न इत्याह नन्विहाप्यात्मपदमिति । ‡ न यागनियोगयोर्नियोगप्रतिपत्ता-
रमन्तरेणानुपपत्तिवत्प्रतिपत्तुर्न्नियोगमन्तरेणानुपपत्त्यभावादित्याह नैतत्सारम्
नियोगो हीति । ननु यः कश्चिद्भेदे संसर्गः प्रतिपन्नः स साक्षात्परम्परया ×
वा नियोगसंसृष्ट एव वायुर्वै क्षेपिष्ठेत्यादावपि परम्परया विधिसंसर्गाभ्यु-
पगमात् तत्र सर्वस्यात्मस्वभावताप्यविनाभावाद्विधिमुपस्थापयतीति तत्राह
अथापि भवतु नामेति । § भावार्थविषयत्वान्नियोगस्य नासौ भूतसंसर्गविषय
इति भावः । एवं तर्हि भावार्थोपि विधिविषयः संसर्गमाक्षेपाविनाभूत इति
सोपि कल्प्यतामित्याह धातुनैव सह कल्प्यत इति सर्वधात्वर्थदोषविवक्षया
पृच्छति कोसाविति । प्रथमं सर्वधात्वर्थसामान्यातिलङ्घने कारणाभावात्
कृतिधातुमुपस्थापयति यदि तावत्कर्तव्यमिति तत्र दूषणमाह तत्रानात्म-
स्वभावतेति । प्रपञ्चविलयनेनैव ह्यात्मदर्शनमिति भावः । दूषणान्तरमाह
इतिकर्तव्यता ‖ चेति । शमादयस्तु ज्ञानेतिकर्तव्यं न प्रपञ्चविलयनेति-
कर्तव्यमित्यर्थः । धात्वन्तरमाह अथेति । दूषयत्येवमपीति । नहि योषिदा-
दिष्वन्यादिभावेन ज्ञायमानेषु योषिदादिभावो निवर्त्तते विधेयबुद्धेरप्रामाणि-
कत्वादिति भावः । उभयथापि धात्वर्थविधौ दूषणान्तरमाह अशक्यार्थोप-
देशश्चेति । ननु योषिदन्यादिषु मानसी क्रिया ज्ञानं तु विधीयमानमना-
त्मानं निवर्त्तयतीति तत्राह नहि वस्तु वस्त्वन्तरात्मनेति । तर्हि पुरुषस्व- ४५
रूपप्रविलयनेन स्थाणुनिश्चयप्रमाणवदऽनात्म ¶ प्रविलयेनात्मनो निश्चायकं

* स्वाविनाभूतं नियोगमिति ३ पु· । † यथेहेति २ पु· । ‡ नकारो नास्ति १ पु· ।
§ भावार्थः विषयत्वादिति १, २ पु· । ‖ चकारस्थाने वाकारः १ पु· ।
¶ प्रविलयनेनेति ३ पु· ।

४५ १ प्रमाणज्ञानमन्यतःप्राप्तमनूद्य विधिमात्रमङ्गाङ्क्रियत इत्याह एवं तर्हि ज्ञातव्य इत्यादिना । तर्हि विधिवाक्यार्थे * मितिव्यतिरेकेण ब्रह्मसंवेदनस्यान्यतः प्राप्तस्यानुवादो वक्तव्यः नच प्रमाणान्तरमस्तीत्याह कुतः प्राप्तेरिति । ननु विधायकपदव्यतिरिक्तेभ्यो वेदान्ताभिधानेभ्य इत्याह अभिधानत इति । तर्हि विधिनिमित्तप्रतिपत्तिमनपेक्ष्याभिधानप्रमाणादेव ब्रह्मसंवेदने सिद्धे न विधिना कृत्यमित्याह एवं तर्हि विधानमनर्थकमिति । ननु निष्पन्नेपि संवेदने पुनस्तादृशं व्यक्त्यन्तरं चोद्यते इत्याह पुनःकर्तव्यतयेति । ननु किं तेन कार्यं पूर्वेणैव प्रयोजनसिद्धेरिति तत्राह यथा मन्त्रेष्विति । अयमर्थः । मन्त्राः स्वाध्यायविधिनैवोपात्ता गृहीतपदपदार्थसम्बन्धस्य स्वार्थे प्रत्ययमुत्पाद्य व्यवस्थिताः स्वार्थस्याननुष्ठेयत्वाद् ब्राह्मणवाक्यैश्च प्रमितत्वात्प्रवृत्तिनिवृत्तिप्रयोजनशून्या व्यवतिष्ठन्ते । तत्रैन्द्रा गार्हपत्यं, बर्हिर्देवसदनं दामि, इमा † मगृभ्णन् ‡ रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यादिश्रुतिलिङ्गवाक्यादिभिर्ब्रीह्यादिवत्कर्माङ्गभावेन विनियुक्ताः प्रधानापूर्वनिर्वृत्तिद्वारेण प्रयोजनवन्तो मन्त्रा इत्युच्यन्ते । तत्र मन्त्राः केनोपकारेणापूर्वसिद्धेरुपकुर्वन्तीति वीक्षायामध्ययनविधेरर्थज्ञानार्थत्वाद्दृष्टोपकारे सत्यऽदृष्टकल्पनानुपपत्तेस्तेष्वनुष्ठानकाले प्रतिपत्त्यपेक्षस्य द्रव्यदेवतादेः प्रतिपत्तिमुत्पाद्य तद्द्वारेणापूर्वस्योपकुर्वन्तीति कल्प्यते । ततश्च मन्त्रैरेवानुस्मृत्यानुष्ठाने ऽपूर्वसिद्धेर्न ब्राह्मणवाक्यैरिति गम्यते । तत्र प्रयोगविधिरङ्गैरपूर्वोपकारं कारयन्मन्त्रैरर्थज्ञानं कारयतीति । तत्र यथा प्रयोगवचनो मन्त्रैः प्रथमोत्पन्नज्ञानातिरिक्तमपूर्वोपकारि ज्ञानान्तरमनुष्ठापयति एवं ब्रह्मसंवेदनमपरमनुष्ठीयते मोक्षफलायेति । ननु युक्तं तत्र स्वार्थे प्रत्ययमुत्पाद्य निवृत्तानां मन्त्राणां श्रुत्यादिविनियोगसामर्थ्यात्प्रयोगवचनेन ज्ञानस्य पुनःकर्तव्यत्वम् नचात्मज्ञाने प्रयोगवचनोऽस्तीत्याह प्रयोगवचनस्तत्र विधायक इति । इहापि तर्हि स सम्पाद्यत इत्याह

,, ५ पूर्ववादी इहापि प्रयोगवचनो विधायक इति । कथम् । वेदान्तवाक्यैरात्मज्ञानं कुर्यादिति वेदान्तशब्दकरणविशिष्टोत्पत्तिविधिस्तावदध्याहृतः सोमेन यजेतेतिवत् । स च विधिः कथं ज्ञानं कर्तव्यमितीति कर्तव्यताभेदमीक्षमाणः

* प्रमितीति १ पु० । † अगृभ्णं रशनामिति १ पु० ।
‡ रसनामिति दन्त्यघटितः ३ पु० ।

प्रकरणपठित * शमादिविधीन् फलवदात्मज्ञानविधिसन्निहितानितिकर्त्तव्यतात्वेन विनियोजयन्विनियोगविधिः सम्पद्यते । पुनश्च साङ्गे कर्मणि नियोज्यमधिकारिणं ममेदं कर्त्तव्यमिति प्रतिपत्तारमाकाङ्क्षन्नर्थवादगतं मोक्षं राचिसन्न्यायेनोपसंहृत्य मोक्षकामो वेदान्तवाक्यकरणैः शमादीतिकर्त्तव्यतानुगृहीतैरात्मज्ञानं कुर्यादिति स एव विनियोगविधिरधिकारविधिः सम्पद्यते । पुनः स एव साङ्गं तत्त्वज्ञानम † धिकारिणमनुष्ठापयन्प्रयोगविधिः सम्पद्यत इति । पुनश्च सिद्धान्ती मन्त्रभ्यो वेदान्तानां वैलक्षण्यमाह ननु मन्त्रेष्विति । प्रत्ययपरत्वमिति । अपूर्वोपकारिप्रत्ययमाचे मन्त्राणां तात्पर्यं नार्थतथात्व इत्यर्थः । तच्च वेदान्तानां स्वार्थविधिपरत्वं प्रयोजनवदज्ञातार्थावगन्तृत्वादिति । तच्च विधेयप्रत्ययसमर्पणेन विधिपरत्वमज्ञातार्थपरत्वं चोभयं न विरुद्धमित्याह अन्यार्थमपि प्रकृतमिति । ननु स्थायिपदार्थानां क्रमेण वा युगपद्वा ऽनेकानि कार्याणि सम्भवति । शब्दस्य तु तात्पर्यात्सकृत्कार्यहेतोः कथमुभयपरत्वमिति तत्राह यथा वा पदार्थानामिति । सिद्धान्ती ब्रह्मण्याऽऽभिधानिकप्रथमप्रत्ययोपगमेनैव पुरुषार्थसिद्धेर्न मन्त्रेष्विव विधिशेषतया द्वितीयप्रत्ययायोत्पत्तिविनियोगाधिकारप्रयोगविधिकल्पन ‡ मपेक्ष्यत इति दर्शयितुं मन्त्रेभ्यो वैलक्षण्यमाह तदेतदनिरूपितमिवेति । विधिविषयसमर्पणेन विधिप्रमितिशेषस्य योषिदग्न्यादिवाक्यस्य तज्जन्यज्ञानस्य वा प्रमेयपरत्वादर्शनादिति वाक्यशेषः । ननु § तत्र लौकिकप्रमाणगम्यत्वात्प्रमेयस्य तत्परत्वाभावः इह तु विधिब्रह्मणोरलौकिकत्वादुभयपरत्वं स्यादिति नेत्याह न युगपदुभयमिति । ज्ञानं प्रति ब्रह्मणः प्रमेयतया प्राधान्यम् विधेयज्ञानविशेषणतया गुणभावः प्रमेयत्वादुपादेयताविधिं प्रत्युद्देश्यता प्रमेयत्वाद्विधेयता विधानायानुवाद्यता ‖ चेति ब्रह्मणः स्वज्ञानस्य विधिविषयतया तत्प्रमितिशेषत्वे ¶ च प्राधान्योपादेयत्वप्रमेयत्वानि तद्विरुद्धगुणत्वोद्देश्यत्वानुवाद्यत्वानि चैकस्यां शब्दजन्यप्रमितौ प्रसज्यन्ते तदिदं वैरूप्यम् । ननु प्रथम-

* शमादीन्फलवदिति ३ पु० ।

† अधिकारिणा ऽनुष्ठापयन्निति पूर्वमभूत्, तत्स्थाने अधिकारिणमनुष्ठापयन्निति शोधितं ३ पु० । ‡ अपेक्षत इति १ पु० । § तत्रेति नास्ति २ पु० ।

‖ चकारस्थाने वाकारः २ पु० । ¶ सकृज्जातस्याऽप्राधान्येति १ पु० ।

ज्ञानमर्थपरं द्वितीयज्ञानं विधिविषयतया तत्परमित्यविरोधः किं न स्यात् । न । शब्दस्योभयपरत्वाभावे तज्जन्यज्ञानस्यासकृज्जनितस्याप्युभयपरत्वानुपपत्तेः । ननु वैरूप्यप्रसङ्गो न दोषमावहति अन्यथागुणकर्मविधानानुपपत्तेरिति
४५ १९ चोदयति नन्वेवं सति गुणकर्मणामिति । क्रत्वङ्गभूतकारकसंस्कारार्थानि कर्माणि । तच्च क्रियाजन्यातिशयविशिष्टमेव कर्मकारकं कारकविभक्त्यभिधेयमित्यङ्गीकृत्य वैरूप्यमुच्यते । व्रीहीणां तावत्प्रमाणान्तरसिद्धत्वात्कारकत्वाज्ज्ञानुवाद्यत्वगुणत्वोद्देश्यत्वानि सिद्धानि विधेयप्रोक्षणजन्यातिशयवत्तया साध्यत्वादुपादेयत्वप्राधान्यविधेयत्वानि विभक्तिसामर्थ्यात्प्रतीयन्त इत्येकस्यां प्रमितौ गुणकर्मसु वैरूप्यमिति । तच्च न क्रियाजन्यातिशयो वैभक्तिकः किन्तु तदर्थक्रियाविध्यनुपपत्तिगम्यः । अतः शाब्दज्ञाने गुणत्वोद्देश्यत्वानुवाद्यत्वान्येव प्रतीयन्ते । प्राधान्यप्रमेयत्वोपादेयत्वानि त्वर्थापत्तिप्रमित्यन्तरेऽवभासन्त इति । ज्ञानभेदान्न वैरूप्यदोष इति परिहरति न निराकृतं स्यादिति । इहापि तर्हि ब्रह्मज्ञानविधेयज्ञानयोर्भेदाद्विरुद्धचिकस्य व्यवस्थयावभास इति नेत्याह यच्च पुनः प्रमाणान्तरादिति । नन्विहापि ज्ञानद्वयमेवेष्यतां कस्तर्हि सामग्रीभेदः । नचैकसामग्रीजन्यज्ञानसहस्रस्यापि प्रमेयभेदः सम्भवति । अस्तु तर्हि विधायकपदव्यतिरिक्तपदसमुदायस्य पृथगेव ब्रह्मस्वरूपं प्रतिपाद्य पुनस्तदनुवादज्ञानं जनयित्वा तस्य विधिविषयत्वसमर्पणेन पुनर्विधायकपदेन पदैकवाक्यतेति नेत्याह न स एव समन्वय इति । ननु तर्हि विधिपदेन यानि पदैकवाक्यभूतानि तद्व्यतिरिक्तपदानां पृथगन्वयेन ब्रह्मप्रतिपत्तिशेषतेत्याशङ्कते अथार्थवादपदानामिवेति । एवं तर्हि न ब्रह्मवाक्यस्य विधिवाक्यशेषता नाप्यर्थवादतेत्याह तदसत् युक्तमर्थवादपदानीति । नन्विहापि भूतार्थत्वादर्थवादजन्यज्ञानवद्विधिशेषतेति नेत्याह इह पुनरपरामृष्ट इति । प्रयोजनपर्यन्तत्वाय विधिशेषता न भूतत्वनिमित्तेति भावः । यद्यपि शाब्दज्ञानादग्रहणं निवर्त्तते तथापि मिथ्याज्ञानतत्संस्काराविद्यानिवृत्तिरपरोक्षानुभवात् तस्य च शाब्दज्ञानादनुत्पद्यमानफलस्य सिद्ध्ये ज्ञानं विधीयत इत्याशङ्कते अथ पुनः शाब्दज्ञानादिति । तर्हि विधीयमा-
४६ ८ नज्ञानस्य व्रीह्यादिवत्करणकारकं वक्तव्यम् तन्न सम्भवतीत्याह किं तज्ज्ञानमिति । ननु प्रत्यक्षादीनामपरोक्षज्ञानसाधनत्वं प्रसिद्धमिति । न । पूर्व-

ज्ञानवदऽतत्फलत्वप्रसङ्गादित्याह शाब्दं चेति । ननु विधीयमानं शाब्दं ४६ˣ
ज्ञानमिति । किं तज्ज्ञानं विधीयमानतया परोक्षफलं प्राथमिकज्ञानं तत्स-
न्तानो वा । न तावत्प्राथमिकमित्याह तदयुक्तं यत्तावदिति । उभयपरत्वे
वैरूप्यस्य दर्शितत्वादिति वाक्यशेषः । ननु प्रथमज्ञानेना ऽवगते ब्रह्मणि
तदुद्देशेन प्रत्ययसन्तानो विधीयतां तत्संस्कारप्रचयादपरोक्षसिद्धेरिति शङ्कते
अथ पुनस्तदेव ज्ञानमिति । किमुपासनविधिसामर्थ्यादिदमवगतं किं वा-
त्मन्येवात्मानं पश्येदितिदर्शनविधानसामर्थ्यादिति । न तावदुपासने विधिः
श्रूयते आत्मेत्येवोपासीत आत्मानमेव लोकमुपासीत तमेव धीरो विज्ञा-
येत्यादेः स्वभावसिद्धप्रत्ययोपादानेनालौकिकात्मविषयप्रतिपादनपरत्वात् एव-
कारविशेषणश्रवणात् वाक्यस्य विशेषणपरत्वात् उभयप्रतिपादने वाक्यभेदात्
निदिध्यासितव्य इति चात्मप्रतिपादनपरे * वाक्यभेदाभावाय स्तुतिपरत्वात् ।
अथ दर्शनविधिसामर्थ्यादिति नेत्याह तत्कथं लभ्यते उपास्तिध्यायत्यो-
रिति । ननु ज्ञानस्य सर्वत्र प्रवाहेणाविनाभावाज्ज्ञानविधानेन सन्तान-
विधिर्लभ्यत इति नेत्याह नापि ज्ञानेनैवेति । अथापि कथञ्चिदुपासनवि-
धानं कल्प्येत निदिध्यासनविधेः । तथाप्यपरोक्षफलस्याहेतुत्वादुपासनस्य
न शाब्दज्ञानाद्विशेष इत्याह नाप्यभ्यासादिति । अभ्यासस्याप्रमाणत्वाद्वि-
षयस्यासम्प्रयुक्तत्वाच्च न वस्त्वपरोक्ष्यमभ्यासात्किन्तु मिथ्याऽपरोक्ष्यमित्यर्थः ।
ननु ततस्तु तं पश्यते निष्कलं ध्यायमान इति ध्यानमपरोक्षफलं श्रूयते ।
सत्यम् । एकत्र चित्तस्य समवधानता तद्वैकाग्र्यनिमित्तं भवति । तदेका-
ग्रचेतसा सहकारिणा शब्द एवैषनिषदमिति तद्धितप्रत्ययसामर्थ्यादपरोक्ष-
ज्ञानमुत्पादयति ध्यायमानो ज्ञानप्रसादेन पश्यतीति वाक्यस्यान्वयात् चित्तै-
काग्रस्य सूक्ष्मवस्तुदर्शननिमित्तत्वात् दृष्टेनैवोपकारसिद्धावऽदृष्टकल्पनायो-
गात् । अपरोक्ष्यकामस्योपासनायां स्वयंप्रवृत्तेरदृष्टार्थत्वाच्च निदिध्यासनवि-
धानस्येत्युक्तं तदेतदाह नापि श्रूयत इति । दृष्टसामर्थ्यानुवादत्वाद्वाक्यस्य
विधिर्न श्रूयत इत्यर्थः । नन्वैकाग्र्यद्वारेणापरोक्ष्यनिमित्तत्वाद्दृष्टद्वारेणापि
प्रवर्त्ततामिति चोदयति ननु किमत्र श्रवणेनेति । परिहारग्रन्थः स्पष्टार्थः । ,, १
अतो ज्ञानद्वयाभावादेकस्य ज्ञानस्योभयार्थतायोगान्न ब्रह्मज्ञानं विधेयमिति

* वाक्ये-इति अधिकं ३ पु० ।

४६ १९ भावः । यत्पुनरिति स्पष्टार्थः । न स्थायिवस्तुदृष्टान्तेन तात्पर्य्यसापेक्षशब्द-
व्यापारनिर्णय इत्याह युक्तं तचेति । ननु समिधो यजति * तनूनपातं
यजति † इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति पञ्च वाक्यानि पञ्च
पदार्थान्विधाय तेषां क्रममपि विदधति । अतः शब्दस्यैव द्वैयर्थ्यमित्युक्त-
मनुवदति यदपीदमुक्तमिति । पदार्था एव शब्दगम्याः क्रमस्त्वर्थापत्तिगम्यो
न शब्दगम्य इति परिहरति यत्तावत्प्रत्येकमिति । ये तावदित्यर्थः ।
तेषामेव न क्रमस्य विधानमित्यध्याहारः । किं पदार्थेभ्यो ऽर्थान्तरभूतस्य
क्रमस्य वाक्यैः प्रतिपादनमुच्यते किं वा पदार्थमात्रस्यैव क्रमस्य प्रतिपाद-
नमिति । न तावदुत्तरः कल्प इत्याह नापि ते क्रमशब्दाभिधेया इति । ननु
विहितमङ्गं भवति अङ्गं च प्रयुङ्क्ते प्रयोगविधिः । अतः प्रयोगवचनप्रयोज्य-
त्वात् क्रमस्यापि विधेयत्वे वाक्येभ्य एवापदार्थस्यापि क्रमस्य विधिरेष्टव्य
इति नेत्याह प्रयोगवचनेनापीति । विहितस्यैव प्रयोज्यत्वात्पदार्थानामेव
विहितत्वादित्यर्थः । अन्यथा विहिते प्रयोगविधिः प्रयोगविधौ च विधि-
कल्पनेतीतरेतराश्रयात् । ननु पदार्था एव क्रमः तस्मात्पदार्थान्प्रयुञ्जानः
क्रममपि प्रयुङ्क्ते इति नेत्याह न ते क्रम इत्युक्तमिति । अपर आह । न
क्रमो नाम कश्चिदस्ति एकैकस्मिन् पदार्थे ऽदर्शनात् अनेकपदार्थाश्रयत्वे पदा-
र्थयौगपद्यात्क्रमायोगात् अयौगपद्ये चोभयाश्रयधर्म्मायोगादिति तचाह न च
क्रमो नामेति । ननु संयोगवदुभयाश्रयत्वे पदार्थयौगपद्यमित्युक्तम् तचाह
तच क्रमो नाम वस्तुभूत इति । क्रमत्वादेव न यौगपद्यापेक्षेति भावः ।
ननु देशकालवस्तूपाधिपरामर्शमन्तरेण क्रमो न दृश्यत इति तदाह
‡ तवेति । नन्वनुष्ठेयपदार्थानामनिष्पन्नस्वभावत्वान्न देशकालवस्तुक्रम इति
तचाह स्मृतिविज्ञानमेवेति । पाठक्रम एव स्मर्य्यमाणो ऽनुष्ठेयपदार्थेषूपरज्यत
इत्यर्थः । सर्वथेत्युपसंहारः । ननु क्रमस्य विधायकं वक्तव्यम् । न । क्रम-
स्याविधेयत्वात् । किंत्वनुष्ठेयविशेषणतया § प्रमीयते क्रमः न विधीयते ऽन-
नुष्ठेयत्वात् । केन तर्हि प्रमीयते । एकस्यानेकपदार्थप्रयोगानुपपत्त्येत्याह
४७ ६ तच्चैकत्वात्कर्तुरिति । सन्निहितं चेति । अर्थक्रमाभावे पाठक्रम इत्यर्थः ।

* तनूनपाते यजति–इति १ पु·
† इडां यजतीति क्वचित्पाठः ।
‡ तत्र वेति ३ पु· ।
§ प्रतीयत इति ३ पु· ।

तस्मात्सर्वत्र प्रमाणद्वयेनैव प्रमेयद्वयसिद्धिरिति प्रकरणार्थः । न तथेह ज्ञान- ४७ ७
द्वयमित्यारभ्य वेदो गमयतीति पर्यन्तः स्पष्टार्थः । प्रतिवस्तुसंप्रयोगं निरपेक्ष-
मेव प्रमाणं चक्षुर्न तथा प्रतिपदार्थं प्रमाणं शब्दः किन्तु यच्च तात्पर्ये तच्च
सम्भूयैव प्रमाणमित्याह युक्तं तच्च यदादवबोधयतीति । नन्वाभिधानिकमा-
त्मतत्त्वज्ञानं प्रमेयपरमेव मा भूत् किन्तु विधिविषयतया विधायकपदज-
न्यविधिप्रमितिविषयत्वेन विधिशेष इत्याह मा भूदिति । कथं तर्हि ब्रह्मा-
त्मसिद्धिरिति तत्राह तस्मिन्विहितेर्थादिति । ननु कस्यानुपपत्त्या तत्त्व-
सिद्धिरिति तदाह सविषयत्वादिति । अवगमविध्यन्यथानुपपत्त्यैवेत्यर्थः ।
परिहरति एवमप्यविवक्षितोर्थ इति । एकस्मिन्विषये *प्रथमप्रतिपत्तिरप्रमाणम् ।
तस्मिन्नेव द्वितीयज्ञानं प्रमाणमिति श्रुतिश्च न प्रमाणं श्रुत्यर्थापत्तिश्च प्रमा-
† णमित्यादि विरुद्धमित्यर्थः । किञ्चावगमविधानानुपपत्तिर्नावगम्यस्य वस्तुत्वं
गमयतीत्याह नच नियोगत इति । ननु ज्ञानस्य स्वतःप्रामाण्यात्तथा-
भूतार्थतैव युक्ता अन्यथा ऽऽरोपितज्ञानस्य विधौ प्रयोजनाभावादिति
तत्राह ‡ भवन्ति हि परिकल्पितविषया इति । आभिधानिकप्रत्ययस्य विधि-
संसर्गात्प्रागपि स्वतःप्रामाण्यं किं न स्यादिति भावः । ननु विधेयज्ञानस्यापि
§ स्वविषयप्रमितिरेव दृष्टं फलम् तत्परित्यज्यारोपितविषयत्वे ऽदृष्टकल्पना स्या-
दिति तत्राह एतदेवाच युक्तमिति । सकलप्रमाणविरोधेन दृष्टकल्पनाददृष्टक-
ल्पनमेव युक्तमित्यर्थः । तस्मात्कार्यनिष्ठे वेद इति अनारम्भवादी ‖ सिद्धान्तैक-
देशीयदूषणमुपसंहरति । ननु वेदान्तानां धर्मब्रह्मविषयत्वाभावे ऽध्ययनविधु- ×
पात्तानामानर्थक्यं स्यादिति नेत्याह एवं च सत्य ऽयमात्मा ब्रह्मेत्यादिना । ,, २३

तत्रात्मनो वेदान्तसङ्कीर्तितसमस्तगुणविशिष्टस्योपासनोत्पत्तिविधौ
शमादीतिकर्त्तव्योपसंहारेण विनियोगविधौ मोक्षकामनियोज्यसम्बन्धितया
चाधिकारविधौ साङ्गे कर्मण्यधिकारिणोनुष्ठापकतया च प्रयोगविधौ वेदान्ताः
पर्यवस्यन्ति तच्च सर्वं निरूपितमिति । अत्र किं शब्दानां कार्यान्वितस्वार्थो-
पबोधसामर्थ्या ¶ त्सर्वो वेदः कार्यपरतया निरूपित इत्युच्यते किं वा सूत्र-
कारादभियुक्तवचनसामर्थ्यादिति । न तावत्प्रथमः ** कल्पः समन्वयसूत्रे तस्य

* विषयेऽपि प्रथमेति १ पु० । † इत्यादीत्यस्य स्थाने इत्याहेति १ पु० ।
‡ संभवन्ति हीति १ पु० । § स्वविषयत्वप्रमितीति १ पु० ।
‖ सिद्धान्त्येकदेशीति १ पु० । ¶ सर्वोवेद इति नास्ति १ पु० । ** कल्प इति नास्ति १ पु० ।

निराकरिष्यमाणत्वात् । अभियुक्तवचनसामर्थ्याच्चेत्तचाह स्यादेतदेवं यदि
४८ २ सर्व एव वेदार्थ इति । ननु धर्मस्यैवोपक्रान्तत्वेपि * प्रासङ्गिकत्वेनेदं ब्रह्म निरूपितमिति नेत्याह विचारितश्चेति । कथमवगम्यते न वेदार्थोपायो विचारः प्रवृत्त इति सूचभाष्यवार्तिककारवचनसामर्थ्यादित्याह यावता
,, ३ कार्य्यनिष्ठ एवेति ।

अत्रायमाशयः । अथातो धर्मजिज्ञासा धर्ममीमांसाशास्त्रं विषयः । तत्किमारम्भणीयं न वेति विचारः । नारम्भणीयमिति पूर्वः पक्षः विचार्य्यमाणार्थनिर्णये प्रत्यक्षादीना † मसाधनत्वात् । आम्नायस्य चाध्ययनविधिना ऽदृष्टार्थतया विनियोगात् तदर्थमध्ययनविधिः अदृष्टार्थो दृष्टार्थो वेति विचार्य्यते । दृष्टसाधने विधेरयोगाददृष्टनियमा‡द्विधिरदृष्टार्थ इति प्राप्तम् । ननु स्वाध्यायो ऽध्ययनक्रियाकर्मतया ऽवगम्यमानः संस्कार्य्यो वाऽऽप्यो वेति दृष्टसम्भवे कथमदृष्टार्थता सम्भवेत् । § न । संस्कृतस्य क्रत्वन्तरे विनियोजकप्रमाणाभावात् । अवाप्तस्य च निष्फलत्वात् । नन्ववाप्तादाम्नायात्फलवदर्थावबोधे दृष्टफले नाऽदृष्टं कल्पयितुं शक्यते । न । दृष्टफलसाधने ‖ ऽन्यत एव प्रवृत्तेर्विधिवैयर्थ्यप्रसङ्गात् । ननु कर्मकारकप्रधानस्याध्ययनस्य कथं स्वतन्त्रादृष्टफलत्वं कल्प्येत न कर्मकारकस्य वैफल्यात्सक्तुन्यायेन स्वाध्यायेनाधीयीतेति वैपरीत्यकल्पनात् । ननु न श्रूयते फलमध्ययनस्यार्थवादेपि । तन्न । जपाध्ययनफलस्य घृतकुल्यादेरध्ययनत्वसामान्येन प्रथमाध्ययनेप्यतिदिश्य राचिसत्रन्यायेन घृतकुल्यादिकामः स्वाध्यायेनाधीयीतेति फलविपरिणामात् । संस्कारकर्मत्वाभावाच्च न फलश्रुतेरर्थवादता । नन्वदृष्टार्थत्वेपि स्वाभाविकस्यार्थावबोधसामर्थ्यस्य का हानिः । न । विषनिर्हरणादिकार्यान्तरे विनियुक्तानां मन्त्राणामर्थविवक्षाप्रतिबन्धदर्शनात् । तस्मादाम्नायस्यार्थविवक्षाभावात्प्रत्यक्षाद्यविषयत्वात्प्रमाणानुग्राहकत्वाच्च विचारस्य निरालम्बनो धर्मविचारो नारब्धव्य इति प्राप्तम् । आरम्भणीय एवायं विचार इति सिद्धान्तः । तस्य स्वाध्यायाध्ययनविधिप्रमितकर्तव्यत्वात् ।

* प्रासङ्गिकत्वेनैव ब्रह्मणि कल्पितमिति १ पु० । † असाधकत्वादिति ३ पु० ।
‡ विधेरिति १ पु० । § नञ्शब्दो नास्ति १ पु० । ‖ तुशब्दोऽधिकः १ पु० ।

ननु निरालम्बनत्वमुक्तम् । न । आम्नायस्यालम्बनत्वात् । नन्वदृष्टार्थो ऽसौ दर्शितः । न । अध्ययनस्य कर्मकारकप्रधानत्वात्स्वतन्त्रादृष्टार्थत्वायोगात् । ननु कर्मकारके न किञ्चित्प्रयोजनमस्ति इत्युक्तम् । न । उभयस्याप्युपपत्तेः । अध्ययनेन दृष्टद्वारेणा ऽऽप्यते * साङ्गाध्ययनविधिसामर्थ्यात् संस्क्रियते च स्वाध्याय इति । ननु † संस्कृतस्य विनियोगाभाव उक्तः । न । क्रतुविध्युपादानप्रमाणादेव विनियोगसिद्धेः । क्रतुविधिर्हि स्वविषयावबोधमाकाङ्क्षमाणस्तस्य जनकतया संस्कृतं स्वाध्यायमुपादत्ते । ननूपादानप्रमाणं ज्ञानस्य जनकतया स्वाध्यायमात्रमादत्ते न संस्कारमिति । सत्यम् । अध्ययनविधिसामर्थ्यादेव संस्कृतस्वाध्यायजन्यविशिष्टज्ञानवतैवानुष्ठितो यागो ऽपूर्वं जनयतीति कल्प्यते । अतः स्वाध्यायविधिसामर्थ्यमीक्षमाणः क्रतुविधिः स्वविषयज्ञानजनकतया संस्कृतस्वाध्यायमुपादत्ते । ननु स्वतन्त्रादृष्टं ‡ कल्प्यतामित्युक्तम् । न । दृष्टार्थान्तरस्वीकरणतज्जन्यज्ञानादिसमवाय्यदृष्टसम्पत्तौ श्रुतविरोधेन कारकवैपरीत्यमादाय स्वतन्त्रादृष्टकल्पनानुपपत्तेः आधानवद ऽनङ्गस्याप्यध्ययनस्य क्रतूपकारित्वं न विरुध्यते । ननु तव्यप्रत्ययेन प्रकृत्यर्थोपरक्तमपूर्वमेव स्वतन्त्रमभिधीयते । तचापूर्वाभिधानेपि भिन्नपदोपात्तप्रकृत्यर्थोपरक्तापूर्वाभिधानाद्वरमेकपदोपात्तकर्मकारकगतापूर्वाभिधानम् । भावार्थजन्यमपूर्वं न द्रव्यादिजन्यमित्येतावत् समवायस्तु यच क्वापि संभवति । अदृष्टार्थतया च स्वाध्यायस्यार्थविवक्षाऽभावेध्ययनविधिवाक्यस्याप्यर्थविवक्षाभावात् अदृष्टार्थतया ऽध्ययनविधानमेव न स्यात् । तस्मात्साङ्गाध्ययनविधिप्रयुक्तादृष्टस्य स्वसमवायितया ऽक्षरग्रहणार्थावबोधक्रतुप्रवृत्त्यादिदृष्टफलसापेक्षत्वात् स्वाध्यायस्य स्वभावनिमित्तार्थावबोधप्रतिबन्धकताभावाद्विवक्षितार्थमाम्नाय § मवलम्ब्य धर्मविचारः कर्त्तव्य इति । तदेवमर्थविवक्षाधर्मविचारावसरप्रदर्शनपरे शास्त्रारम्भे न सर्ववेदार्थविचारसिद्धिरिति प्रारभ्यमाणविचारो धर्मविषयो न वेदार्थमात्रविषय इत्युपपादयति ‖ तथाहि ४८ ४

शास्त्रारम्भ इति ।

ननु वेदवाक्यानि विचारयेदित्यादिभाष्य ¶ लिङ्गाद्वेदार्थमात्रविचारा-

* साङ्गाध्यायाध्ययनेति १ पु· । † संस्कृत्यविनीति १ पु· । ‡ कल्प्यमिति ३ पु· ।
§ आलम्ब्येति २ पु· । ‖ तथा च शास्त्रेति १, ३ पु· ।
¶ लिङ्गादित्यस्य स्थाने लिखनादित्युपकल्पितम् २ पु· ।

रम्भो ऽवगम्यत इति शङ्कते कथमिति । * सामान्यसिद्धिविशेषविप्रतिपत्त्योर्भाष्यकारेण धर्मे प्रदर्शितत्वात्स एव † विचार्यत इत्याह धर्मो नाम कश्चित्साधयितुरिति । एवं विषयविप्रतिपत्ती दर्शयित्वा धर्मविषय एव पूर्वपक्षप्राप्तिं दर्शयतीत्याह तचाग्निहोत्रादिलक्षण एवेति । ‡ न कारः पूर्वपरयोः संबध्यते । एवमाशङ्कित इत्यतः प्राक्तनो § ग्रन्थस्स्पष्टार्थः ।

४८ ११

एवमाशङ्किते शास्त्रारम्भे सिद्धान्तसूत्रं तत्प्रतिपाद्यार्थकथनेनावतारयति धर्माय वेदवाक्यानीति । ‖ यस्याम्नायस्यार्थविवक्षा तस्यैव विचारावसरश्चेति तदर्थविवक्षाविचारावसरौ । विवक्षाविचारावसरधर्मविचारात्सूत्रार्थान् सूत्रयोजनया दर्शयति वेदमधीत्यानन्तरमिति । ततः किमायातमित्यत आह एवं स्थित इति । किं तच विवक्षितं गम्यत इति तदाह किंतु धर्मातिरिक्त इति । अयमर्थः । वेदस्यार्थविवक्षाप्रदर्शनेन वेदार्थविचारः कर्तव्य इति ¶ वक्तव्ये धर्मग्रहणं कुर्वन्मा भूत्सर्ववेदार्थविचारप्रतिज्ञा किंत्वेकदेशविचारो ऽयमिति मन्यते सूत्रकार इति गम्यते । नन्वथातःशब्दाभ्यां स्वाध्यायस्य पूर्वनिर्वृत्ततया **विचारहेतुत्वमुच्यते । स्वाध्यायो हि स्वार्थविचारहेतुर्भवति न धर्मविचारहेतुः अतो ऽथातःशब्दविरोधान्न धर्मविचारः प्रतिज्ञातुं शक्यत इति चोदयति †† तत्कथं यत्तावदिदमिति । सामान्यविशेषाभ्यां विचार्यमाणप्रधानाभिधायिधर्मपदग्रहणसामर्थ्या‡‡त्तस्यैव विप्रतिपत्त्या पुरुषार्थसाधनतया च §§ जिज्ञासितत्वात् । प्रामाण्यप्रतिपादनात्प्राग्वेदार्थे सामान्यप्रतिपत्तिविशेषविप्रतिपत्तिपुरुषार्थसाधनत्वादीनामनवगमाज्जिज्ञासितत्वायोगाद् धर्म एव विचार्यत इत्याह उच्यते धर्मो नामेत्यादिना । ||| तच धर्मे जिज्ञासायोग्यत्वप्रदर्शनेन वेदार्थे तदभावं विवक्षति लोकप्रवादादिति । ननु धर्मविचारे स्वाध्यायस्य पूर्वनिर्वृत्ततया हेतुत्वमर्थविवक्षायाः प्रदर्शनं चानुपयोगीत्युक्तम् । सत्यम् । अग्निहोत्रादेरपि धर्मस्कन्धत्वा¶¶ट्टैवगत्या च धर्मत्वादुपयोग इत्याह अग्निहोत्रादिरपि वेदार्थ इति । यत इति विप्रतिपत्तिस्कन्धत्वादित्यर्थः ।

* सामान्यप्रसिद्धीति १ पु· ।
† विचार्य इत्याहेति १ पु· ।
‡ नकारस्तु पूर्वापरयोरिति १ ।
§ ग्रन्थ इति २ पु· ।
‖ तस्येति १ पु· ।
¶ वक्तव्यमिति १, २ पु· ।
** विचारहेतुरुच्यत इति १ पु· ।
†† तत्स्थाने 'नन्विति'–इति १ पु· ।
‡‡ तस्य चेति १ पु· ।
§§ जिज्ञासितत्वाप्रामाण्येति १ पु· ।
||| अत्र धर्मे–इति १ पु· ।
¶¶ धर्मस्कन्धत्वादैवगत्येति १ पु· ।

तेन विवक्षितोऽसौ स्वाध्याय इति प्रदर्शनीयमित्यर्थः । ननु पुरुषार्थत्वाच्चेद्धर्मविचारोऽध्ययनेनैव तत्सिद्धेः किं धर्मविचारेणेति नेत्याह नचाध्ययनमाचादिति । अतो नाऽथातःशब्दविरोध इत्याह अतोऽध्ययनानन्तरमिति । किंच धर्म* शब्दस्य प्रधानत्वादथातःशब्दविरोधेपि धर्मविचार एव युक्त इत्याह इति वदितुं धर्मग्रहणं युक्तमिति । पुरुषा हि धर्ममेव जिज्ञासन्ते न वेदार्थम् तस्यापि धर्मत्वप्रयुक्तत्वादुपादानस्येत्याह यतो न वेदार्थेति । सामान्यग्रहणविशेषविप्रतिपत्तिपुरुषार्थसाधनत्वधर्म्मशब्दग्रहणैर्द्धर्मविचारपरं प्रथमसूत्रमित्युक्तम् द्वितीयमपि सूत्रं तथैवेत्याह यत्पुनर्द्धर्मस्येति । धर्मल- ४८ २
क्षणपरं सूत्रमर्थात्प्रमाणप्रतिज्ञेति प्राभाकराः † मुखतः प्रमाणप्रतिज्ञा ऽर्थाद्धर्मलक्षणत्व ‡ मिति वार्त्तिककारीयाः । सर्वथाप्युभयं विवक्षितमिति । तच्च वेदग्रहणे प्राप्ते सर्वो वेदो धर्मविषयो मा भूदिति चोदनाग्रहीदिति गम्यत इत्याह तन्नूनमिति । ननु चोदनाग्रहणं § सर्ववेदस्य धर्मे प्रामाण्यपरिहाराय १३
न भवति किंत्वन्यदेव प्रयोजनमित्याह ननु चोदनाग्रहणस्येति । ४९

अयमर्थः । लिङादिशब्दव्यापारः पुरुषप्रवृत्तिलक्षणार्थभावनालक्षणभाव्यनिष्ठः स्वज्ञानकरणकः स्तुतिनिन्दार्थवादादिज्ञानेतिकर्त्तव्यताको लिङादिशब्देनाख्यातत्व ‖ सामान्यादर्थभावनाभिधायिनापि लिङ्विशेषेणाभिधीयमानः शब्दभावनेति कथ्यते । शब्द एव वा प्रदर्शितांशचयविशिष्टः शब्दभावना शब्दगुणो वा । सर्वत्र हि करणमितिकर्त्तव्यतानुगृहीतं भाव्यनिर्वृत्तिद्वारेणैव भावनां प्रति करणं भवति तच्च शब्दभावनाविषयं ज्ञानं लिङादिशब्दजन्यं प्रवर्त्तकज्ञानत्वात् । स्तुत्यादिज्ञानानुगृहीतं पुरुषप्रवृत्ति**निवृत्तिहेतुरिति भाव्यनिर्वृत्तिद्वारेण शब्दभावनां प्रति करण††मुच्यते । सा च शब्दभावना पुरुषप्रवृत्तिमुत्पादयन्ती तस्याः पुरुषार्थविषयत्वमन्तरेण नोत्पादयितुं क्षमते अपुरुषार्थे पुरुषस्याप्रवृत्तेः । ततश्चोदनाप्रयुक्तपुरुषप्रवृत्तेः समानपदोपात्तमऽपुरुषार्थे धात्वर्थं भाव्यं विहाय पुरुषविशेषणमपि स्वर्गादिकं भाव्यत्वेनोपादाय धात्वर्थकरणिका प्रयाजादीतिकर्त्तव्यताका स्वर्गादिभाव्यनिष्ठा पुरुषप्रवृत्तिरर्थभावना संपद्यते । तदेवंविधार्थभावनानिष्पत्तये शब्दभावनायाः प्रवर्त्तकत्वद्योतनाय चोदनाग्रहणमिति ।

* शब्दशब्दो नास्ति १ पु० । † सुखतः–इति कृतं ३ पु० । ‡ त्वप्रत्ययो नास्ति ३ पु० ।
§ सर्वस्य वेदस्येति १ पु० । ‖ सामान्याकथं भावेति १ पु० । ¶ विधायिनाऽपीति २ पु० ।
** निवृत्तीति नास्ति १ पु० । †† करणमित्युच्यत–इति २ पु० ।

नेतत्सारम् अध्ययनविधिरित्यादिपरिहारः । तस्यायमर्थः । स्वाध्यायोध्येतव्य इति तव्यप्रत्ययव्यापारः शब्दभावनाऽध्ययने पुरुषप्रवृत्तिलक्षणार्थभावनाभाव्यनिष्ठा स्वविषयप्रवर्त्तकज्ञानकरणिका ऽध्ययनफलार्थवादादिविज्ञानेतिकर्त्तव्यताका भवति । सा च * पुरुषप्रवृत्तिलक्षणामर्थभावनामध्ययनकरणिकां स्वाध्यायभाव्यनिष्ठां प्राङ्मुखत्वादीतिकर्त्तव्यताकामुत्पादयति । सा च भाव्यस्य स्वाध्यायस्य फलवद्विज्ञानजननिमित्तत्वमन्तरेणार्थभावनामुत्पादयितुमसमर्था स्वाध्यायगतलिङादिशब्दाभिधेयक्रतुभावनानां स्वर्गादिविषयत्वं परम्परया कल्पयतीत्यध्ययनविधिसामर्थ्यादेव वेदस्य विशिष्टफलविषयभावनानां प्रतिपादकत्वं सिद्धम् । अतो वेदग्रहणेनैव भावनानां धात्वर्थं विहाय स्वर्गाद्यालम्बनत्वं सिध्यतीति । अपिच चोदनाग्रहणे वेदान्तानामर्थान्तर †परत्वाशङ्का स्यात्
४९ ७ तन्निवृत्तये वेदग्रहणमेव युक्तमित्याह अपिच वेदग्रहणमेवेति । संदेहान्तरमाह चोदनाग्रहणे हीति । ननु वेदाध्ययनानन्तरं धर्मविचारं प्रतिज्ञाय चोदनालक्षण इति ब्रुवन्वैदिकचोदनामेव ब्रवीति । न तच विशेषाभावात् । अनेन च सूचेण तचापि सर्वचोदनानन्तर्यं किं न स्यात् । प्रकारान्तरेण वैदिकचोदनानियममाह अथ वेदाधिकरण इति । ‡ लक्षणसूचे प्राप्तं वेदग्रहणं विहायान्यच कुर्वन्न § बुद्धिपूर्वकारी स्यादिति परिहरति सोयमाभाणक इति । अतो वेदान्तानां धर्मपरत्वपर्युदासाय चोदनाग्रहणमित्याह ततश्चोदनाग्रहणादिति । तस्मात्सूचभाष्यवार्त्तिककाराभिप्रायेण ब्रह्मपरत्वमेव न धर्मपरत्वमित्याह तदेवं सूचकार इति] ननु तेषामेव कृत्स्नस्य वेदस्य धर्मे विनियोजकं वचनमस्तीत्याह ननु दृष्टो हि तस्यार्थ इति । सत्यम् । धर्मचोदनासूचप्रक्रमसामर्थ्यादुत्तरं सामान्यवचनं प्रकृतविशेष उपसंहियत इत्याह सत्यम् तत्प्रक्रमबलादिति । सामान्येन परिहारमभिधाय प्रत्येकमाह अपिच दृष्टो हीति । नन्वाम्नायशब्देन सकलवेदस्य धर्मावबोधे विनियोगः स्पष्ट इति चोदयति कथमिति । न विनियोगकात्स्न्र्यपरं भाष्यं किंत्वाम्नायस्यार्थसद्भावपरम् यथा रूपं प्रत्यक्षमित्युक्ते न सर्वप्रत्यक्षस्य रूपे विनियोगः किंतु रूपस्य प्रत्यक्षान्वयमाचं कथ्यते तद्वदिति परिहरति वेदाध्ययनानन्तरमित्यादिना । अयोगव्यवच्छेद इति । वेदस्य

* पुरुषप्रवृत्तिलक्षणाऽर्थभावना भाव्यनिष्ठा स्वविषयभावनाऽध्ययनकरणिका स्वाध्यायभाव्यनिष्ठा प्राङ्मुखत्वादीतिकर्त्तव्यताकामुत्पादयतीति १ पु· ।

† परत्वशङ्केति १ पु· । ‡ लक्षणसूत्रेणेति १ पु· । § पूर्वेति नास्ति १ पु· ।

कर्मावबोधेनासंबन्धं निराकृत्य संबन्धः प्रतिपाद्यत इति । नान्ययोगव्यवच्छेद इति वेदस्यार्थान्तरसंबन्धो नास्तीति नाभिधीयत इत्यर्थः । ननु कर्मशब्दः प्रमेयमात्रपरतया धर्मब्रह्मणोरविशिष्टः किं न स्यादिति नेत्याह कर्मशब्देन चेति । क्रियायां विषयमात्रे च प्रसिद्धस्य शब्दस्य कुतः क्रियापरत्वमिति प्रकरणादित्याह यतस्तदवबोध इति । तस्मादित्युपसंहारः । यत्पुनरित्युक्तानुवादः । आनर्थक्यशब्देनाभिधेयाभावः प्रयोजनाभावो वा *भिधीयते न तावदभिधेयाभाव इत्याह तच्च यद्यानर्थक्यमर्थाभाव इत्यादिना । अथेति निष्प्रयोजनत्वमनूद्य दूषणमाह भवतु सो ऽरोदीदिति । ननु तेषामपि पूषा प्रपिष्टभाग इत्यादिसंसर्गेष्विव प्रयोजनं † कल्प्यतामिति नेत्याह एकवाक्यत्वादिति । नन्वधस्तात्समिधं धारयन्ननुब्रूवेदुपरि हि देवेभ्य इत्युपरिधारणस्य पूर्वेणैकवाक्यस्य विधानवत्सप्रयोजनो विधिः कल्प्यतामिति नेत्याह कल्पयितुं चाशक्यत्वादिति । वेदान्तवाक्यान्यपि तर्हि प्रयोजनशून्यतया क्रियार्थानीति नेत्याह यानि पुनरपास्ताशेषाशिवमिति । अतः सूचं क्रियाप्रकरणपठितवाक्यविषयमित्याह अतः स्वयमपुरुषार्थत्वादिति । क्रियाप्रकरणपठितानामेव प्रयोजनशून्यानां स्तावकत्वेन क्रियान्वयो दर्शितो न वेदान्तानामित्यत्र लिङ्गमाह तथाच तद्विधान्येवेति । ‡ न वेदान्तवाक्यं किंचिदप्यर्थवादाधिकरणे क्रियाशेषत्वेनोदाहृतमस्तीत्यर्थः । ५० १ ,, ९

यदपि केचिदिति प्राभाकराणां शास्त्रारम्भप्रकारं दर्शयति । अयमाशयः । अध्ययनविधिर्हि विचारं विदधाति । स च स्वाध्यायस्य फलपर्य्यन्ततामाकाङ्क्षन् वेदार्थविचारमेव विदध्यान्न धर्मविचारमिति । ननु सामान्यप्रतिपत्तिविशेषविप्रतिपत्तिभ्यां जिज्ञासितोर्थो विचारमर्हति न तथा वेदार्थ इति तत्राह किं तर्हि अधीतवेदस्येति । उद्भिदा यजेत पशुकाम इत्यत्र पशुकाममुद्दिश्य यागो विधीयते यागविधानं चोद्दिश्य पशुकामाधिकारः । किंचोभयमिति । तथा सत्त्रे यजमाना एवर्त्विज इति यजमानानुद्दिश्य ऋत्विग्भावो विधीयते किंवर्त्विज उद्दिश्य यजमानभावो विधीयत इत्यादिवचनव्यक्तिसंशयाद्विचार इति । अथातो धर्मजिज्ञासा । वेदार्थविचारो विषयः स कर्त्तव्यो वा § न वेति ‖ विचारः ।

* विधीयते–इति १ पु० । † कल्पतामिति १, २ । ‡ नशब्दो नास्ति १ पु० ।
§ वाशब्दो नास्ति ३ पु० । ‖ विचारे नेतीति तावदिति १ पु० ।

नेति तावत्प्राप्तम् । आलम्बनप्रमाणाभावात् । नन्वाम्नायालम्बनो विचारः स्यात् । न । अध्यापनविधिशेषतयाम्नायस्य * स्वार्थविवक्षाभावात् । कथम् । अध्ययनं तावदध्यापनविधिप्रयुक्तानुष्ठानत्वात्तच्छेषतामश्नुते । स्वाध्यायोप्यध्ययननिर्वृत्तिद्वारेणाध्यापन † निर्वृत्तिपरो विषनिर्हरणादिवाक्यवन्न स्वार्थविवक्षामर्हतीति के चित् । अन्ये तु स्वाध्यायविधिवाक्ये तव्यप्रत्ययेनापूर्वस्य प्रतिपादनात्तदङ्गता तावत्स्वाध्यायस्याधिगता । तच्च विहिताध्ययनस्य प्रयोजकत्वादध्यापनविधेः प्रथमावगतामपूर्वाङ्गतामनपाकृत्यैवाध्ययनेनाध्यापनं निर्वर्त्यत इति ततश्चापूर्वाङ्गत्वादविवक्षितार्थत्वाद्विचारानारम्भः प्राप्तः । तच्चारम्भणीयो विचारः । स्वाध्यायस्य विवक्षितार्थत्वात् । नन्वध्यापनविधिशेषः स्वाध्याय इत्युक्तम् । न । प्रयुक्तिमात्रेणाङ्गत्वानुपपत्तेः । नह्याधानमुत्तरक्रतुप्रयुक्तिमात्रात् तदङ्गं भवति । ननु लिङ्गसंख्याप्रयाजादयः क्रतुविधिप्रयुक्तानुष्ठानास्तदङ्गतामश्नुवते न प्रकरणादिविनियोग ‡ प्रमाणसामर्थ्यादङ्गभावः । तदङ्गत्वाच्च तत्प्रयुक्तानुष्ठेयता । न तथेह विनियोगे प्रमाणमस्ति । नच प्रयुक्तिमात्रादङ्गतेति विशेषः । अतः स्वातन्त्र्याद्विवक्षितार्थः स्वाध्याय इति । यत्त्व § ध्ययनापूर्वाङ्गतेति तच्चाप्यपूर्वस्य प्रयोजनाकाङ्क्षायां दृष्टे सत्यऽदृष्टकल्पनानुपपत्तेः । स्वाध्यायसामर्थ्यजन्यं प्रयोजनवद्विज्ञानं फलत्वेन कल्प्यते । ननु न नैयोगिकं तत् किंतु दृष्टसामर्थ्यजन्यं फलविज्ञानम् । सत्यम् । नैयोगिकफलस्यैव विज्ञानस्यानुष्ठानाङ्गतया पूर्वोपकारः कल्प्यते । अथवा ऽर्थे तात्पर्य्ये विज्ञानस्य नैयोगिकफलत्वाधीनमिति कल्प्यते । लौकिकतात्पर्य्यनिमित्तविवक्षाद्यभावात् । तदेवं विवक्षितार्थत्वाच्छास्त्र ‖ मारम्भणीयमिति ।

तच्च वेदार्थविचारारम्भेपि न वेदान्तानाङ्गतार्थत्वमिति परिहरति
५० १३ तत्रापि न निखिलवेदार्थेति । वेदार्थोपाधिविचारेपि धर्मग्रहणसामर्थ्यात्तदेकदेशो विचारित इति भावः । ननु कृत्स्नाध्ययनविधिप्रयुक्तो विचारः कथमेकदेशविषयः स्यादिति चोदयति तत्कथमिति । परिहरति तथा सत्य ऽयात इति प्रतिवाक्याध्ययनविचारं विधिव्यापारभेदात्प्रयोजन ¶ भेदवशादेकदेशविचारेपि न विधिप्रयोज्यत्वविरोधः यथा चक्षुषा रूपं पश्येदिति विधिप्रयुक्त्या रूपैकदे-

* स्वार्थविवक्षायोगात् अध्ययनमिति १ पु· । † निवृत्तिविषयनिर्हरणेति १ पु· । ‡ प्रमाणेति नास्ति १ पु· । § अध्यापनेति १ पु· । ‖ आरभणीयमेवेति १ पु· । ¶ भेदेति नास्ति १ पु· ।

र्शनेपि तत्प्रयुक्तिर्न विरुध्यते तद्वदित्यर्थः । अन्यथा विध्यनुसारेण
ार्थविचारविवक्षायां धर्मग्रहणं न स्यादित्याह यतो न धर्म इति ५० १४
। धर्मग्रहणस्य न वेदार्थैकदेशविचारपर्युदासः प्रयोजनम् किंतु वेदा-
ष्यार्थतासिद्धिः प्रयोजनमिति शङ्कते सत्यम् तथापि शास्त्रकाराणा-
ारिहरति एवं तर्हीति । धर्मशब्दस्य हि * वेदार्थे प्रयोगनिमित्तं वक्त-
न तावद्रूढिः चैत्यवन्दनादावपि प्रयोगविप्रतिपत्तेः । अथान्वय†व्यतिरे-
श्रेयःसाधनाभिधायी धर्मशब्दः । तथाभूतत्वाद्वेदार्थस्यापि § धर्मशब्दः
र्त्तत इति । एवं तर्हि स्वाध्यायपाठादेव ब्रह्मणः प्रतायमानस्य
ाभिधेयत्वाभावाच्छ्रेयोरूपत्वात्तस्यार्थात्पर्युदस्तत्वाद्धर्म इत्येवं कृ-
वारो युक्तः । अन्यथा ऽऽपातप्रतिपन्नधर्मब्रह्मसंग्रहज्ञापनाय वेदार्थ-
ति वक्तव्यमिति भावः । नह्यनुष्ठेयश्रेयःसाधनवदननुष्ठेयश्रेयोरूपमपि
न्वयमात्रादेव विचारात्प्राङ् प्रतीयत इति शक्यं वक्तुम् । लक्षणसूचमपि
ायं न वेदार्थविषयमित्याह तथाचोत्तरमपीति । लक्षणं हि लक्ष्यस्या-
विभ्रमनिरासपरम् तच्च धर्म एव चैत्यवन्दनादौ प्रसक्ततया विप्रति-
वेदार्थः । अतो लक्षणस्य कृतार्थत्वाय धर्म ‖ एव लक्ष्यत इत्याह
पविप्रतिपत्तिनिरासपरमिति । ननु वेदार्थेपि विप्रतिपत्तयः सन्ति
ादलक्षणो वेदार्थः किं वा चोदनालक्षण इति तन्निरासाय लक्षणमु-
ति तत्राह इतरथा वेदार्थविप्रतिपत्ताविति । मन्त्रादिषु कार्यस्याप्रती-
त्प्रतीयते स तस्यार्थ इतिनियमान्नैवं विप्रतिपत्तिरिति भावः । ननु
णोऽप्यर्थवादलक्षणत्वं निराकृत्य चोदनालक्षणत्वं वेदार्थस्य किन्न सि-
ात आह यतो न धर्मग्रहणे सतीति । वेदार्थविप्रतिपत्तिनिराकरणप्रति-
वाद्धर्मविप्रतिपत्तिनिरासप्रतिभासादप्रतिपन्नवेदार्थविप्रतिपत्तिनिरासय-
ादित्यर्थः । अथ धर्मशब्दस्य वेदार्थे प्रयोगात् तद्विप्रतिपत्तिनिरास
ाच्यतामिति चोदयति कथमिति । तच्च न तावद्रूढिमाश्रित्य धर्मश- ,, २१

* वेदार्थप्रयोगे निमित्तमिति १ पु० ।
† न तावद्भूरिः—इति १ पु० ।
व्यतिरेकाभ्यां सिद्ध इति १ पु० ।
§ धर्मशब्द इति नास्ति १ पु० ।
लक्षित इत्याद्येति १ पु० ।

ब्दस्य वेदार्थे प्रयोग इत्युक्तम् । नापि लक्षणया * अभिधेयादन्यस्य लक्ष्यत्वेन वेदार्थस्याधर्मत्वप्रसङ्गात् । इदानीं † स्वार्थप्रक्षेपेण वा तत्र प्रवृत्तिः शब्दमात्रस्य वा संज्ञासंज्ञिसम्बन्धपरतयोपयोग इति शिष्यते । तत्र न तावत्स्वार्थप्रक्षेपेणो-
५० २१ त्याह यत्तावच्चोदनालक्षणो योऽर्थ इति । चोदनालक्षणस्य धर्मत्वे ऽभिधीयमाने धर्मस्य वा चोदनालक्षणत्वे वेदार्थस्त्वेतावानिति न निर्णीतं भवति । चोदना-धर्मशब्दयोर्वेदतदर्थाभिधायित्वाभावात् । यथा यज्ञात्तुषं तदूपमित्युक्ते न सर्वस्य प्रत्यक्षस्य रूपमर्थ इत्युक्तं भवति तद्वदिति भावः । चोदना-लक्षणेयं धर्मसंज्ञाविधिपरत्वं सूत्रस्य निराकरोति अथ पुनरित्यादिना । अङ्गीकृत्य दूषणमाह अथापि कथञ्चिदिति । अयं भावः । चोदना-लक्षणस्य वेदार्थत्वे ऽर्थशब्दस्य वैयर्थ्यं स्यात् । श्येनादीनामपि चोदनाल-क्षणत्वाद्वेदार्थत्वाच्च तद्व्यावृत्त्यनुपपत्तेः । अचोदनालक्षणत्वे वेदार्थत्वे च ताभ्यामेव श्येनादिनिवृत्तेरर्थशब्दस्य वैयर्थ्यं स्यात् । लक्षणवाक्ये ऽनुवाद-मात्रानुपपत्तेश्च प्रमाणप्रतिज्ञायामप्यर्थशब्दस्य वैयर्थ्यं स्यात् । धर्मविचारपक्षे श्येनादेः प्रतिषेधचोदनाविषयस्यानर्थत्वेनाधर्मत्वसिद्धिः प्रयोजनमिति । ‡तथा चोदनाशब्दोपि कृत्स्नवेदलक्षणापरो वक्तव्यः । कथम् । चोदनाव्यतिरिक्तोपि वेदभागोस्ति § वा न वा । अस्ति चेत् चोदनालक्षणोर्थः चोदनार्थ इति ‖ लक्ष्य-लक्षणयोरैक्यमेव स्यात् । अस्ति चेत्सो ऽप्यर्थवान्वेदभागो निरर्थको वा । अर्थवांश्चेत्कथं चोदनाप्रमेयो ऽचोदनाभागस्यार्थः स्यात् । अर्थशून्यश्चेत् चोदनाव्यतिरिक्तो वेदभागः कथं तर्हि चोदनार्थो ऽर्थानर्थवद्भागद्वयसमुदाय-वेदार्थः स्यात् । तस्माच्चोदनाशब्दः कृत्स्नवेद ¶ लक्षणापर इति चोदनालक्षणो
५१ १ वेदार्थ इति वाक्ये शब्दद्वयदूषणमभिप्रेत्य अथापि कथंचिदित्युक्तम् । तथा सति वेदस्य प्रामाण्यादर्थवत्त्वनिश्चये विचारात्प्रागेव संजाते किं वेदार्थश्चो-

* गङ्गाशब्देन किं जहल्लक्षणा विवक्षिता उताजहल्लक्षणा· नाद्य इत्याह—अभिधेयादिति· गङ्गापदलक्ष्यस्य तीरस्य गङ्गात्वाभावव्यज्जहल्लक्षणायां धर्मपदेन लक्ष्यमाणस्य वेदार्थस्य धर्मत्वं हीयेतेत्यर्थः—इति तत्त्व० । † स्वार्थप्रक्षेपेण अजहल्लक्षणयेत्यर्थ इति तत्त्व० ।

‡ एवं गुरुमतेऽर्थशब्दवैयर्थ्यमभिधाय दोषान्तरं समुच्चिनोति तथेति—इति तत्त्व० ।

§ वाशब्दो नास्ति ३ पु० ।

‖ लक्ष्यलक्षणयोरैक्यमित्यस्यायमर्थः, धर्मशब्दाभिहितवेदार्थशब्देन चोदनालक्षणोऽर्थो निर्दि-श्यते चोदनालक्षण इत्यत्र स एव निर्दिश्यत इति लक्ष्यलक्षणयोरैक्यं स्यादिति—इति तत्त्व० ।

¶ लक्षणपर इति २ पु० ।

दनालक्षणः किं वाऽर्थवादादिलक्षण इति विशये नार्थवादादिलक्षणः किंतु चोदनालक्षणो वेदार्थ इति निर्णयपरं सूत्रं स्यात् तच्चानुपपन्नम् निश्चितत्वादर्थवत्त्वस्येत्याह तथा सति चोदनालक्षण इति । ननु प्रथमसूत्रे स्वाध्यायस्यार्थविवक्षायाः प्रदर्शितत्वादर्थवत्त्वनिश्चयात्तदुद्दिश्य लक्षणविधानं युक्तम् । न अनिश्चिते प्रामाण्येऽर्थविवक्षाऽयोगात् । तत्र चाध्ययनविधिप्रयुक्ताप्रामाण्यमात्रनिराकरणेनार्थविवक्षादर्शिता न तु पौरुषेयत्वप्रमाणान्तरयोग्यविषयत्वादिनिमित्ताप्रामाण्यं तत्र निराकृत्य प्रामाण्यं व्यवस्थापितम् । तस्मादर्थवत्त्वानिश्चयाद्वेदार्थश्चोदनालक्षण इति नियन्तुं न शक्यते । अथ प्रथमसूत्रसामर्थ्यादेवार्थवत्त्वमङ्गीकृत्य लक्षणविधानमिति तत्राह तत्रानन्तरं प्रामाण्यप्रतिपादनं न युज्येतेति । ननु तस्यैव दृढीकरणाय पुनःप्रतिपादनम् । न । अर्थवत्त्वे निश्चिते दृढीकरणप्रयोजनाभावात् । अनिश्चिते च लक्षणप्रवृत्त्यभावात् । ननु वेदप्रामाण्यस्यापि वेदार्थत्वादेव प्रतिपादनं न वेदस्यार्थवत्त्वनिश्चयायेति । न वेदप्रामाण्यस्यापि वेदार्थत्वे सिद्धे वस्तुनि प्रामाण्यप्रसङ्गात् । भाष्यकारश्च द्वितीयाध्यायमारभमाणो वृत्तं प्रमाणलक्षणमिति प्रथमाध्यायेन वेदस्य प्रामाण्यमेव साधितं दर्शयति तन्न युज्यते वेदस्यार्थवत्त्व*निश्चयपूर्वे विचारे ऽतो धर्मे प्रमाणप्रतिज्ञैव लक्षणं वा द्वितीयसूत्रेण क्रियत इत्याह वृत्तं प्रमाणलक्षणमिति चेति । किंच । अस्मिन्नेव सूत्रे मन्त्रार्थवादयोर्धर्मे प्रामाण्यनिराकरणा † दर्थवादाधिकरणमनपेक्षितं स्यादित्याह मन्त्रार्थवादेषु ‡ वेति । स्तावकत्वेनान्वयप्रकारप्रतिपादनार्थमधिकरणमिति चेत् न । अत्रैव धर्मे प्रामाण्यनिराकरणाद्धर्मस्य प्रतिपादकतया तत्र पूर्वपक्षानुदयात् । उपसंहरति अतः पूर्वोक्तेन न्यायेन कार्य्यनिष्ठ एव वेदभागो विचार्यतया प्रक्रान्तो विचारितश्च न वस्तुनिष्ठ इति अतो वस्तुतत्त्वनिष्ठं वेदभागं विचारयितुमिदमारभ्यते § अथातो ब्रह्मजिज्ञासेति ॥ ११ ७

॥ इति द्वितीयं वर्णकं समाप्तम् ॥

* निश्चयपूर्वविचारे–इति १ पु· ।

† आम्नायस्य क्रियार्थत्वादिति सूत्रम् ।

‡ वास्थाने थकारः १ पु· ।

§ अथातो ब्रह्मजिज्ञासेति सूत्रं तु प्रतीके न गृहीतं १ पु· ।

* तच लोके ऽथशब्दस्य चत्वारो ऽर्था वृद्धव्यवहारे प्रयोगसामर्थ्यात्प्रसिद्धाः आनन्तर्य्यमधिकारो मङ्गलाचरणं प्रकृतादर्थादर्थान्तरत्वं च । तच इतरपर्युदासेनानन्तर्य्यमथशब्देनोपादीयत इत्यस्मिन्नर्थे सति चानन्तर्यार्थत्व
१ इत्यतः प्राक्तनभाष्यस्य तात्पर्य्यमाह तचाथशब्द आनन्तर्यार्थ इत्यादिना । कथम् । जिज्ञासाशब्दस्यावयवार्थेनार्थवत्त्वे सतीच्छायाः कर्त्तव्यतया प्रारम्भानुपपत्तेः । प्रत्यधिकरणं चाप्रतिपाद्यत्वान्नाधिकारार्थोऽथशब्दः ब्रह्मज्ञानेच्छाया मङ्गलाचरणार्थत्वस्य प्रसिद्धतरत्वात् । अप्रसिद्धत्वेपि प्रशंसापरतया ऽर्थवादत्वप्रसङ्गात् सूचस्य न मङ्गलाचरणार्थता । इच्छायाश्च कुतश्चित्प्रकृतादर्थादर्थान्तरभावस्य प्रसिद्धतरत्वान्नाभिधानेन कृत्यमिति अथशब्दस्य न तदर्थतेति । नन्विच्छायाः कुतश्चिदानन्तर्य्यमपि प्रसिद्धम् । सत्यम् । हेतुफलभावेनानन्तर्य्यस्य विवक्षितत्वात् आनन्तर्य्याभिधानमुखेन पूर्वप्रकृतपुष्कलकारणमथशब्देनावद्योत्यते । ननु ब्रह्मज्ञाने प्रवृत्तिपर्यन्तेच्छोदयसामर्थ्यादेव पुष्कलकारणमनुमीयते किमथशब्देन । सत्यम् । इच्छोदयप्रभृतीष्यमाणज्ञानोदयपर्य्यन्तस्य कार्यस्य पुष्कलकारणतया पूर्वप्रवृत्तस्य शास्त्रीयस्याधिकारिविशेषणस्य प्रतिपत्तिपरत्वादथशब्दस्य न दोषः । † तत्प्रतिपत्तिश्चेष्यमाणज्ञाने प्रवृत्तिपर्य्यन्तेच्छोदयद्वारेण प्रवृत्त्यङ्गभावं भजत इति तेनानन्तर्याभिधानमुखेन प्रवृत्तिनिमित्तविशिष्टेच्छोदयप्रभृतेर्ज्ञानोदयपर्य्यन्तस्य कार्यस्य पुष्कलकारणतया पूर्वनिर्वृत्तसाधनचतुष्टयावद्योतनायानन्तर्यार्थो ऽथशब्द इति सूक्तम् ।

ननु जिज्ञासाशब्दस्य विचारे रूढस्य कथमवयवार्थेनार्थवत्त्व‡मादीयते रूढिर्हि योगमपहरतीतिन्यायादित्याक्षिपति अयं तु जिज्ञासाशब्दो विचार-
१७ वचन इत्यारभ्योच्यत इत्यतः § प्राक्तनेन । ग्रन्थः स्पष्टार्थः । उच्यते नायं जिज्ञासाशब्दस्य इत्यादिः परिहारः । अयमाशयः । चत्वारः शब्दप्रवृत्तिप्रकाराः । तच रूढिः यथा वृद्धव्यवहारे ऽभिधानाभिधेयव्यतिरिक्तमनपेक्ष्यैव प्रयोगसामर्थ्यात् अखण्डाभिधानसम्बन्धः । योगः समासादिनैकपदमापन्नस्य

* अत्र लाके इति ३ पु० ।

† तत्प्रतिपत्तिरिति, यदिदं पूर्ववृत्तं पुष्कलकारणं तस्य शास्त्रीयत्वज्ञानाभावे निःसन्दिग्धा प्रवृत्तिर्न स्यात् शास्त्रपर्युदस्तत्वशङ्काया अपि संभवात् तस्माच्छास्त्रीयाधिकारिविशेषणसमर्पणार्थत्वमथशब्दस्येत्यर्थ इति तत्त्व० ।

‡ उपादीयत इति १ पु० ।

§ प्राक्तनो ग्रन्थः स्पष्टार्थः इति ३ पु० ।

शब्दस्य स्वावयवगतानेकाभिधानशक्तिद्वारेण विशिष्टार्थाभिधानम् । एतद्द्वाभयं मुख्यं वृत्तिरित्युच्यते । गौणः स्वाभिधेयादर्थादर्थान्तरे *लक्षणया वृत्तिरिति । तत्रैकस्यैव शब्दस्यर्थान्तरे रूढस्यार्थान्तरे च योगवृत्तिसम्भवे रूढिर्योगमपहरतीतिन्यायेन योगं परित्यज्य रूढिरुपादीयते । † रूढियोगमुख्यवृत्तिसम्भवे गौणः परित्यज्यते । तत्रैकस्मिन्नर्थे शब्दस्य योगवृत्तिसम्भवे तत्रैव तस्यैव शब्दस्य शक्त्यन्तरकल्पनानिमित्तकार्यन्तराभावात् । ननु पङ्कजशब्दादिषु योगरूढिरिति वृत्त्यन्तरम्वा कल्प्यत इति । न । तत्रापि योगवृत्त्यैवार्थप्रतिपत्तेः । ननूत्पलादिवस्त्वन्तरम् विहाय पङ्कजशब्दाञ्झटिति तामरसे प्रतिपत्तिदर्शनाच्छक्त्यन्तरमेव कल्पनीयम् । न । प्रयोगबाहुल्यादपि सामर्थ्याविशेषे प्रथमप्रतिपत्तिदर्शनात् । यथा नवस्वर्थेषु शक्त्यऽविशेषेपि गोशब्दात्सास्नादिमदाकृतौ प्रयोगबाहुल्यादेव प्रथमप्रतिपत्तिः । तस्मात् क्रृप्रसामर्थ्यादेव प्रयोगप्रतिपत्तिसम्भवे न शक्त्यन्तरकल्पनेत्याह नायं जिज्ञासाशब्द इति । कथमित्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । ५२

नन्ववयवार्थसंसर्ग एव योगवृत्त्याऽपि शब्देन प्रतिपाद्यते विचारस्तु न जिज्ञासाशब्दावयवार्थः । कथं तदवगमस्य क्रृप्रसामर्थ्यनैवान्यथासिद्धिरिति चोदयति कथमन्यथासिद्धत्वमिति । स्वयमवयवार्थत्वाभावेप्यवयवार्थसंसर्गाविनाभावादपि तल्लक्षणया प्रयोगप्रत्ययोपपत्तौ न शक्त्यन्तरकल्पना ऽनन्यथासिद्धकार्याभावादिति परिहरति अन्तर्गीतविचारार्थत्वादिति । ननु ज्ञानमात्रमिष्यमाणं कथं विचारेणाऽविनाभूतमिति तदाह तथाहीति । किं तत्र प्रमाणमिति तदाह एवं प्रयोगप्रत्ययथेरिति । ज्ञानं खल्विष्यमाणं विषयेण सहावगतमिष्यते अनवगतविषयेच्छायोगात् । ततश्च प्रतिपन्ने वस्तुनि ज्ञानमिष्यमाणं संदिग्धे निश्चयफलं वा परोक्षे ऽपरोक्षफलं वेष्यते । तच्चोभयं प्रमाणादिविचारप्रयत्नसाध्यमिति प्रतिपन्ने वस्तुनि विशिष्टज्ञानमिष्यमाणं प्रमाणादिविचारमविनाभावेन गमयतीति विचारसाध्यज्ञाने प्रयोगप्रत्ययावित्यर्थः । ननु नेच्छामात्रं सूत्रेण प्रतिपाद्यते प्रयोजनाभावात्किंत्विष्यमाणज्ञानप्रदर्शनमुखेन

* गुणलक्षणयेति ३ पु० ।

† रूढिश्च योगश्चेति रूढियोगौ, तावेव मुख्यवृत्ती तयोः संभव इति विग्रह इति तत्त्व० ।

तत्साधनं विचार*मन्तर्णीतमुपलक्ष्य स एव तात्पर्य्येण प्रतिपाद्यते अतो विचारज्ञानब्रह्मणामन्यममस्य तात्पर्य्येण प्रतिपाद्यस्यारम्भायाऽथशब्द इति चोदयति नन्वेवमपि कुत एतदिति । तदेव प्रपञ्चयति अन्तर्णीतं विचारमाश्रित्येति । अर्थलक्षणेन प्राधान्येनान्तर्णीतं विचारमाश्रित्येति सम्बन्धः । अतस्त्रयाणामन्यतमस्याधिक्रियमाणत्वमङ्गीकृत्येति योजना । तत्राथशब्देनानन्तर्याभिधानमुखेन शास्त्रीयसाधनचतुष्टयसंपन्नाधिकारिविशेषस्य न्यायतः समर्पणाभावे विचारारम्भार्थत्वे च कर्त्तव्यतया विधीयमानो विचारो निरधिकारो ऽननुष्ठेयः स्यादिति परिहरति उच्यते शास्त्रास्यानारम्भप्रसङ्गादिति । ननु विचारविधिरेव विश्वजिन्न्यायेना † ऽधिकारिविशेषं कल्पयित्वा प्रवृत्तिपर्य्यन्तो भविष्यति किमथशब्देनेति । ननु कर्त्तव्यतया ‡ वगतो विचारोपि प्रारम्भमर्थाद्गमयति किं § विचारप्रारम्भार्थेनाथशब्देन । ननु विधिसामर्थ्यादुभयप्राप्तौ कस्तत्र निर्णयः विध्यपेक्षितोपाधित्वादानन्तर्याभिधानमुखेनाधिकारिसमर्पणमेव युक्तमित्याह अधिकारार्थत्वे ह्यप्रयोजनमिति । प्रवृत्तिद्वारेण ‖ प्रयोजनपर्य्यन्तताशून्यमित्यर्थः । ननु मोक्षकामः कल्प्यते । न । प्रसज्यप्रतिषेधप्रसङ्गात् । तथाहि । कर्त्तव्य इत्युक्ते ऽविशेषात्सर्वाधिकारप्रतिपत्तौ तदनुपपत्त्या विशिष्टाधिकारः कल्पनीयः ततो वरं शब्देनैव विशिष्टाधिकारिसमर्पणमिति भावः । ननु राज्ञिसत्त्रन्यायेनार्थवादगतमेव मोक्षं ब्रह्मज्ञानं वा प्रयोजनं साध्यत्वेन परिणमय्य मोक्षकामो ब्रह्मज्ञानकामो वा विचारयेदिति विधिप्रतिपत्तिसमये-
५३ १ ,, ७ ऽधिकारिविशिष्टविधिप्रतिपत्तेर्न्न प्रसज्यप्रतिषेध इति चोदयति ननु ब्रह्मज्ञानं प्रयोजनमिति । तच्चेदं वक्तव्यम् किं सर्वेषां फलकामितया सर्वाधिकारं शास्त्रमुच्यते किंवा विशिष्टाधिकारमिति । विशिष्टाधिकारत्वे विधिप्रतिपत्त्यधीनत्वादर्थवादसामर्थ्यलभ्याधिकारिकल्पनायाः प्रसज्यप्रतिषेधव्यापारगौरवं तदवस्थमेव । अतोथशब्देन श्रोतव्यादिविधिप्रकरणपठितसाधनचतुष्टयसम्पन्नाधिकारिप्रतिपत्तिपूर्वके विचारविध्यवगमे नासौ दोष इत्यथशब्देन श्रौतविशेषाधिकारिसमर्पणमेव युक्तमिति । अथ सर्वाधिकारं शास्त्रमिति न प्रसज्यप्रति-

* अन्तर्नीतमिति १ पु॰ प्रायः ।
† अधिकारविशेषमिति २, ३ पु॰ ।
‡ अवगते विचारेऽपीति शोधितं १ पु॰ ।
§ विचारे प्रारम्भेति १ पु॰ ।
‖ पुरुषार्थपर्यन्ततेति ३ पु॰ ।

षेध: नापि विशेषाधिकारिसमर्पणे शब्दापेक्षेति । तच्च वक्तव्यम् । किं फलत: सर्वाधिकारं शास्त्रं किं वा विधित: । न तावत्फलत: सर्वेषां * फलार्थित्वाऽभावादित्याह न ब्रह्मज्ञाने ऽर्थित्वानुपपत्तेरिति । मा भूद् ब्रह्मज्ञानार्थितेत्यत: प्राक्तनो ग्रन्थ: स्पष्टार्थ: ॥ ५३ ७

नन्वध्ययनविधेस्त्रैवर्णिकाधिकारत्वात्तत्प्रयुक्तत्वान्न विचारस्य विधित एव सर्वाधिकारं शास्त्रमिति चोदयति मा भूद् ब्रह्मज्ञानार्थितेति । ननु विधिर्नाम स्वविषयस्य तदुपकारकस्य वा ऽनुष्ठाननिमित्तं भवति । नच विचारो ऽध्ययनविधेर्विषयस्तदुपकारको वा तत्कथमध्ययनविधिविधेयो विचार इति तत्राह स्वाध्यायाध्ययनस्यार्थावबोधफलत्वादिति । अयमाशय: । ,, २१ दृष्टफलस्याध्ययनविधेर्यावदर्थावबोधफलं व्यापाराद्विचारमपि फलनिष्पत्तये ऽध्ययनविधिरनुष्ठापयतीति । ननु विषयतदुपकारिव्यतिरिक्तस्य व्यापारस्य फलनिष्पत्त्यपेक्षया विधिप्रयुक्तानुष्ठेयत्वं क्व दृश्यते । अवघातादिष्विति चेत् । न । विधेयावघातस्यैव फलपर्य्यन्तमावर्त्यमानत्वात् विचारस्तु स्वतन्त्रमेव भावार्थान्तरं कथं विधीयत इति वक्तव्यम् । नैष दोष: । आवृत्तिगुणस्याविहितस्य विहितानुपकारकस्य च विधे: फलपर्य्यन्ततानुपपत्त्या विधेयत्वकल्पनवद्विचारस्यापि तदुपपत्तिरिति । तच्च किं विचारसाध्यज्ञानमर्थनिश्चयफलमध्ययनस्यान्वयव्यतिरेकसिद्धं दृष्टफलम् किं वा तदुद्देशेन विधानादधिकारिविशेषणतया शास्त्रीयं फलम् किं वा विधे: प्रयोजनपर्य्यन्ततासामर्थ्यलभ्यं फलमिति । न तावद् दृष्टं फलम् । अध्ययनमात्रादावृत्तिगुणकादप्यर्थनिश्चयानुदयात् आपातदर्शनस्य च विचारानपेक्षत्वात् । अतो नार्थनिश्चयदृष्टफला ऽध्ययनक्रिया स्यादिति । ननु तव्यप्रत्ययेन स्वव्यापार: शब्दभावनाविधिरूपतया ऽभिधायते सा च शब्दभावनाध्ययनकरणिकामर्थभावनां निष्पादयन्ती फलवदर्थावबोधं पुरुषार्थमर्थभावनाभाव्यत्वेन कल्पयति अपुरुषार्थे पुरुषप्रवृत्त्ययोगात् । ततश्च भाव्यान्तरलाभात्समानपदोपात्तमध्ययनं भावनाया: करणतामापन्नं भाव्यस्यार्थावबोधस्य निर्वर्त्तकतया करणं भवति । कुठारादीनामपि क्रियाभाव्यद्वैधीभावनिर्वर्त्तनद्वारेण च्छिदिभावनाकरणत्व-

* फलार्थित्वाभावादिति १ पु० ।

दर्शनात् । अतो ऽध्ययनविधेः प्रवर्तकत्वान्यथानुपत्त्येवार्थभावनाकरण-स्याध्ययनस्यार्थावबोधः फलमिति सिद्धम् अन्यथासमानपदोपात्तस्याध्ययन-स्यैव भाव्यतया स्वाध्यायावाप्तेरपि विधिफलत्वाभावप्रसङ्गादित्यत आह सा
५३ २३ ह्यधीयमानावाप्तिफलत्वादक्षरग्रहणान्तेति । अयमाशयः । तव्यप्रत्ययेन भावनाकर्मकारके ऽभिधीयमाने स्वाध्याये स्वावाप्तिफले च न भाव्यान्तरं कल्पनीयम् भावनाकर्माभिधायिशब्दविरोधादिति । ननु न भाव्यमाचेण पुरु-षप्रवृत्तिर्विधिना जन्यते किन्तु पुरुषार्थभाव्यापेक्षयैव ततश्च शब्दविरोधेऽपि भावनानिष्पत्तये ऽर्थावबोधो भाव्य इति शङ्कते अथाक्षरग्रहणं *निष्प्रयोजन-मिति । परिहरति भवतु तर्हि सक्तूनां गतिरिति । अयमाशयः । अर्थनिर्णेयस्याध्ययनमात्रादनिष्पत्तेः श्रूयमाणस्य स्वाध्यायस्य चाफलत्वा-दध्ययनमात्रस्य चाप्रयोजनतया भाव्यत्वायोगात्स्वाध्यायाध्ययनेन स्वर्गं भावयेदिति कल्प्यत इति ॥

ननु व्याकरणस्याप्यङ्गत्वात् †साङ्गादध्ययनाद्विधीयमानादर्थनि-श्चयो दृष्टफलतया जायते तस्य च विरोधपरिहाराय विचारः प्रयुज्यते अतो दृष्टे सत्यऽदृष्टकल्पना न न्याय्येति चोदयति तदपि न अक्षरेभ्यः प्रयोजनवदिति । परिहरति न तर्हि निष्प्रयोजनानीति । श्रूयमा-णस्वाध्यायलक्षणात्कर्मण एवाध्ययनभावनया ‡भाव्यमानात्फलवदर्थावबो-धसिद्धेः पश्वन्नादीनां प्रयोजनं प्रति परम्परया साधनानामपि भाव्य-त्वदर्शनाच्छ्रूयमाणस्वाध्यायावाप्तिपर्य्यन्त एव विधिव्यापार इति भावः । नन्वक्षरग्रहणपर्यन्ते विधिव्यापारे फलवदर्थावबोधस्य निर्निमित्तता स्यादिति
५४ ४ तचाह फलप्रयुक्त एवार्थावबोध इति । अयमाशयः । लौकिकाप्रवाक्यानां विधिमन्तरेणापि फलवदर्थावबोधकत्वदर्शनात्साङ्गाच्च कर्मणो विधायमाना-दवघातादिष्विवादृष्टजन्मनियमान्न विधिफलमर्थावबोधः किंतु स्वीकृतस्वा-ध्यायमात्रजन्यं फलमिति । विधेस्तु दृष्टसमवाय्यदृष्टमेव किंचित्फलमिति दृष्टफलाविरोधेनादृष्टसिद्धौ न तद्विरोधिस्वतन्त्रादृष्टं कल्पयितुं युक्तमिति । किंच । फलवदर्थावबोधफले ऽध्ययनविधौ यस्य यस्मिन्कर्मण्यधिकारस्तस्य

* निःप्रयोजनेति १, २ पु· ।
† साङ्गाध्ययनादिति ३ पु· ।
‡ भाव्यमानत्वादिति ३ पु· ।

तद्वाक्याध्ययनमेव स्यात् न वाक्यान्तराध्ययनम् तच्च प्रवृत्त्यादिफलाभावादिति न कृत्स्नवेदाध्ययनसिद्धिरित्याह अपिच अक्षरग्रहणान्तो विधिरिति । ५४
ननु कृत्स्नस्वाध्यायाध्ययनस्य नित्यतया विधेयत्वेपि सकलस्वाध्यायावाप्तिसमवेतस्यादृष्टस्यानधिकृतकर्मवाक्यगतस्यार्थावबोधानुष्ठानादिद्वारेण कथमपूर्वसिद्धिहेतुतेति । नैष दोषः । प्रायश्चित्तजपादपूर्वापकारित्वोपपत्तेः । नन्वध्ययनादक्षरावाप्तेः को विशेषः । अस्त्यत्र विशेषः । स्वाधीनोच्चारणाक्षमत्वं नामाक्षरधर्मो ऽवाप्तिः तदर्थो वाङ्मनसव्यापारो ऽध्ययनमिति ॥

नन्वधिकारिविशेषणमर्थावबोधमुद्दिश्याध्ययनं विधातव्यम् निरधिकारविधानायोगात् अर्थावबोधमुद्दिश्यैव च विहितशब्दोच्चारणे सति वाक्यतात्पर्य्यसिद्धेरर्थावबोधमुद्दिश्य रागप्रयुक्तशब्दोच्चारणे लोके तात्पर्यदर्शनादिति चोदयति ननु चाम्नूयमाणाधिकारो ऽध्ययनविधिरिति । अधिक्रियते ऽस्मिन्कर्मण्यनेनेत्यधिकारो विधिपुरुषसंबन्धनिमित्तं जीवनकामादिरुच्यते । ननु विश्वजिन्न्यायेनाधिकारी कल्प्यताम् अथवा वाजसनेयिनां ब्रह्मचर्य्यमागामित्यादिनोपनयनस्य प्रकृतत्वादुपनीतो ऽधिकारीति प्रकरणप्रमाणेन कल्प्यतामिति नेत्याह दृष्टश्चाक्षरग्रहणे ऽर्थावबोधः स कल्पनामधिकारस्य * निरुन्ध्यान्नित्यादिना । भवतु नामाध्ययनेनार्थावबोधं भावयेदर्थावबोधकाम इति विधिः तथापि विचारेणार्थावबोधं भावयेदिति विचारे प्रवृत्तिरध्ययनविधिना न विधीयत इति तत्राह दृष्टाधिकारेषु प्रत्यक्ष इति । तत्र किमर्थसामर्थ्यादेवाध्ययनस्यार्थावबोधः साक्षाद्वा परम्परया वा फलमित्युच्यते किं वार्थावबोधकाममुद्दिश्य विधानत इत्यभिप्रेत्याह । अत्रोच्यत इति प्रथमः कल्पोऽङ्गीकृत इत्याह भवेदध्ययनविधेरिति । द्वितीयः पक्षो ऽनुपपन्न इत्याह नाधिकारहेतुतेति । ,,
अध्ययनात्प्रागर्थावबोधस्याप्रतिपन्नस्य कामनायोगान्नार्थावबोधकाममुद्दिश्य विधानमित्यर्थः । ननु कथमर्थावबोधस्या ऽप्रतिपत्तिरध्ययनात्प्राग्वेदार्थस्या ऽप्रतिपत्तेः † विशेषणापरिज्ञाने तद्विशिष्टावबोधानवगमात् । ननु ‡ वेदस्य वाक्यप्रमाणत्वादाप्तवचनवदर्थो विदित इत्यर्थसद्भावमात्रमनुमानेनावगम्यते । न । अर्थवत्त्वज्ञानमात्रस्यानुमानसिद्धत्वात्तज्ज्ञानकामनाऽयोगात् अग्निहोत्रादिवि-

* निरुध्यादिति २ पु० । † नाऽगृहीतविशेषणाविशिष्टबुद्धिरितिन्यायादित्यर्थः—इति तत्त्व० ।
‡ वेदस्यापीति । ३ पु० ।

शिष्टवाक्यार्थानामप्रतिपन्नतया तद्विशिष्टज्ञानकामनाऽयोगात् । उपदेशत एवाग्निहोत्रादिवाक्यार्थविशेषाः प्रतिपन्ना इति चेत् । तर्हि वाक्यार्थविशेषज्ञानानामपि सिद्धत्वान्न तत्र कामना सम्भवेत् । अथौपदेशिकज्ञानस्याप्रामाण्यान्निर्णयज्ञानं काम्यत इति चेत् । अप्रामाण्ये निश्चिते न तत्र निर्णयज्ञानकामना अर्थस्य विभ्रममात्रत्वात् । औपदेशिकज्ञानस्य सन्दिग्धे प्रामाण्यविचारस्यैवावसरो नाध्ययनस्य । किंच । सर्ववाक्यार्थज्ञानानां युगपदेकबुद्धयोद्देशनासम्भवात्सामान्येनोद्दिश्य शब्दोच्चारणायामर्थमात्रज्ञाने शब्दस्य तात्पर्य्यप्रसङ्गादग्निहोत्रादिविशेषज्ञाने तात्पर्य्याभावाद्वाक्यशक्त्यनुसारेण विशिष्टार्थे तात्पर्यकल्पनायार्थज्ञानमुद्दिश्याध्ययनविधेस्तात्पर्य्यनिमित्तत्वप्रसङ्गात् । तस्माद्विशेषज्ञानानां प्रागसिद्धत्वान्न तत्काममुद्दिश्य विधानमित्याह प्राक् चाधिकारज्ञानेन प्रयोजनमिति । किंचोद्दिश्यविधानेपि नाध्ययनमात्रादृष्टफलतया ऽर्थावबोधसिद्धेरदर्शनादित्याह अतो न विधेरिति । नन्वर्थावबोधमुद्दिश्य शब्दोच्चारणायां तात्पर्य्यं लोके दृश्यते । न तावच्छ्रोतुरुच्चारणातात्पर्यं निमित्तम् लोके तदभावात् । न * वक्तुरुच्चारणा वेदे ऽपौरुषेये तात्पर्याभावप्रसङ्गात् । तस्मात्स्वभावत एवार्थप्रतिपादनसमर्थस्य शब्दस्य पुरुषसम्बन्धकृतदोषपरिहारायार्थज्ञानमुद्दिश्य शब्दोच्चारणापेक्ष्यते तात्पर्यमपि शब्दधर्म एव षड्विधलिङ्गगम्यो न पुरुषधर्म इति वक्ष्यते ॥

इदानीमध्ययनविधेर्नित्याधिकारतां प्रतिपादयितुमधिकारिविशेषणाभावादनध्ययनमेवेत्यध्ययनप्रवृत्तिमाक्षिपति यद्येवमधिकाराश्रयणादिति । तत्र विधिर्हि स्वविषये प्रवर्तकतया प्रतिपन्नस्तदन्यथानुपपत्त्या ममायं नियोग इति प्रतिपद्य प्रवृत्तिसमर्थमधिकारिणं कल्पयति । यदा तु पुनर्विधिविषयस्य निमित्तान्तरादनुष्ठानं सम्पद्यते तदा विधेः प्रवर्तकत्वं प्रतिबध्यते । प्रतिबद्धप्रवर्तकभावश्च विधिः प्रवृत्तिसिद्धये न स्वामिनमधिकारिणं कल्पयित्वा प्रवर्तयति । तत्राध्ययनविधिरपि स्वविषयस्याध्ययनविधिप्रयुक्तानुष्ठानत्वात्स्वयं प्रतिबद्धप्रवर्तकभावो नाधिकारं कल्पयित्वा प्रवर्तयतीति प्राभाकराः प्रत्यवतिष्ठन्त इत्याह अत्र केचिदाहुरिति । नन्वष्टवर्षं ब्राह्मणमुपनयीत तमध्याप-

* नतु वक्तुरुच्चारणे-इति ३ पु० ।

यीतेतिश्रुतावध्यापनविधिरश्रूयमाणाधिकारः कथमध्ययनं प्रयोजयेत् । कल्प्यते ऽत्राधिकार इति चेत् । न । अध्ययनेप्यधिकारं कल्पयित्वा स्वविधिप्रयुक्तिरेवाध्ययनस्य गृह्यतां सन्निधानात् । ननु कल्पिताधिकारेध्यापनविधौ तत्प्रयुक्तानुष्ठानत्वादध्ययनस्य न तत्राधिकारः कल्प्यत इति चेत् । विपरीतं किं न स्यात् अध्ययने कल्पिताधिकारे तत्प्रयुक्तानुष्ठानत्वादध्यापनस्य न तत्राधिकारः कल्प्यत इति । ननु लिखितपाठादप्यध्ययनसिद्धेर्नाध्ययनविधिरध्यापनं प्रयोजयति । तर्हि अविहिताध्ययनेनाप्यध्यापनविधिसिद्धेर्न विहितमध्ययनमध्यापनविधिः प्रयोजयेत् । अथाप्यध्ययनाध्यापनयोर्माणवकस्य प्राङ्मुखत्वपवित्रपाणित्वाद्यङ्गसाम्याद्विहितमेवाध्ययनमध्यापनविधिः प्रयुङ्क्त इति । अध्यापनस्याध्ययनविधिप्रयुक्तावपि समानमेतत् । किंच । आचार्याधीनो वेदमधीष्वेतिनियमविधानाल्लिखितपाठो न युक्तः अध्यापनादुत्तरभावित्वादाचार्यत्वस्याचार्यकरणविधिप्रयुक्तो ऽधीष्वेतिवाक्यार्थ इति चेन्न । तद् द्वितीयं जन्म तदस्मात्स आचार्य्य इत्युपनयनमाचादाचार्यत्वश्रवणात् । आचारान् ग्राहयतीतिव्युत्पत्त्या ऽऽचार्यत्वस्य प्रागेव सिद्धेः । आचार्यकरणविधिप्रयुक्त इत्यध्याहारात् शब्दस्य भाविवृत्त्याश्रयणस्यैव लघीयस्त्वात् । तस्मादधिकारकल्पनासाम्यादितरेतरप्रयुक्तिसाम्याच्च स्वविधिप्रयुक्तिसम्भवे ऽध्ययनस्य कथमध्यापनविधिप्रयुक्तिरिति तत्राह आचार्यकरणविधिप्रयुक्तस्यानुष्ठानमिति । ५४
अयमाशयः । संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु निय इति संमाननादिषु साध्येषु नयतेर्द्वितीयात्मनेपदं विधीयते तत्रोपनयीत तमध्यापयीतेत्येकप्रयोगतावगमादुपनयनाध्यापनयोः माणवकस्याध्यापनं प्रति कर्मकारकांशेन गुणभूतत्वान्माणवकः केनोपकारेणाध्ययनविधिं निर्वर्त्तयेदिति वीप्सायामुपगमेनाध्ययनं कुर्वन्नध्यापनविधेरुपकरोतीति गम्यते । तत्रोपनीयाध्यापयेदिति प्रयोगैक्यकल्पनायां नयत्यर्थसाध्यमेवाचार्यकरणमध्यापनस्यापि फलं गम्यते । ततश्चोपनीयाध्यापयेदाचार्यकरणकाम इति श्रुतस्यैवाचार्यत्वस्य फलस्य कामोपबन्धमात्रकल्पनात्साधिकारो ऽध्यापनविधिः सम्पद्यते । अथ वा उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षत इत्युपनयनाध्यापनयोः प्रयोगैक्यादध्यापने विधिश्रवणादाचार्यत्वफलश्रवणाच्चाचार्यत्वकामो माणवकमुपनीयाध्यापयेदिति विधिर्निष्पद्यते ।

अध्ययने तु नाधिकारनिमित्तं किंचिच्छ्रुतमस्तीति विशेषः । नन्वध्यापन-
विधिविषयतदङ्गताभावे ऽध्ययनस्य स्वतन्त्रविध्यन्तरविहितस्य कथं स्वत-
४ १७ न्त्रविध्यन्तरप्रयुक्तानुष्ठानतेति तत्राह अधानस्येव कामश्रुतिप्रयुक्तस्येति ।
अयमाशयः । ब्राह्मणोऽग्नीनादधीतेति श्रूयते तच्च न तावत्पुरुषमुद्दिश्य स्वात-
न्त्र्येण नित्यमाधानं विधीयते । द्रव्यपरतया प्रोक्षणादिवत्कर्मकारकसंस्कारक-
र्मताप्रतीतेः । अश्रूयमाणफलत्वादेव न स्वतन्त्रकाम्याधिकारता । नच
सकुन्यायेन गुणप्रधानवैपरीत्यान्नित्यकाम्याधिकारता यदा ऽऽहवनीये जुहो-
तीति संस्कृताग्नीनां क्रत्वन्तरे विनियोगात् । तस्मादुभयविधाधिकारशून्यो
नाधानविधिराधाने प्रवर्तयितुं क्षमः । तर्ह्युत्तरक्रतुविधिप्रयुक्तानुष्ठानमाधानं
स्यात् । उच्यते । न तावन्नित्यदर्शपूर्णमासादिविधिप्रयुक्तानुष्ठानम् । आधानमाह-
वनीयस्योद्देश्यतया ऽनुपादेयत्वात् क्रतुविधिप्रयुक्तानुष्ठेयत्वायोगात् । अनुपादे-
यमेव हि विधिरनुष्ठापयति अन्यथा स्वर्गकामादीनामप्यनुष्ठेयत्वप्रसङ्गात् । तस्मा-
दुत्तरकाम्यविधिप्रयुक्तमेवाधानस्यानुष्ठानमिति । नहि विधिरिह कामोप्युपादेय-
मेवानुष्ठापयति । किंतु यदुद्देश्यमुपादेयं वा विना काम्यमानं न सिध्यति
तत्सर्वं विधिः सहकारितया ऽनुष्ठापयति । एवं विधिरागयोर्विभागदर्शनात् ।
यथा सौवर्णे पाठे समुपविशेदितिविधौ तथाविधपीठाभावे विधिर्नानुतिष्ठति
रागस्तु तथाविधं पीठमुत्पाद्यापि तत्र निवेशयति । एवमाचार्यकरणकामनेषा-
ध्ययनमाचार्यप्रेरणाद्वारेण माणवकेन निर्वर्तयत्यध्यापनसिद्ध्यर्थमिति । अथा-
ध्ययनविधिरेव नित्याधिकारेण साधिकारोध्ययने प्रवर्तयतीति प्रतिपादयितु-
१८ मध्यापनविधिप्रयुक्तिं निराकरोति तदयुक्तमित्यपर इति । अयमाशयः । न
तावदाचार्यत्वं स्वयमेव विधेयमिति युक्तमुपनयनाध्यापनभावार्थविषयत्वा-
द्विधेरत्रापि विधिपदाभिधेयतया विधिरूपमाचार्यत्वम् आत्मनेपदमाचाभिधेय-
त्वात् । नापि नैयोगिकफलमाचार्यत्वम् आचारान् ग्राहयतीति प्रयोजककर्तृत्व-
निबन्धनस्याचार्यत्वस्य लौकिकत्वात् । अथ माणवकविषयनयत्यर्थजन्यमा-
चार्यत्वमलौकिकमिति । न तत् । यस्मात्स आचार्य इतिस्मृतौ माणवकसं-
स्कारं प्रति हेतुकर्तृत्वस्यैव लौकिकस्याचार्यशब्दनिमित्तत्वावगमात् । सहोप-
ठितानां च संमाननादीनामलौकिकत्वादाचार्यत्वस्यालौकिकत्वेप्युपनयननि-
योगफलं भविष्यति तेनाध्यापनविधेः कुतः साधिकारता । अथ तमध्याप-

योतेत्येकप्रयोगतावगमादुपनीयाध्यापयीतेति विधिः परिगम्यत इति । तथाप्यङ्गफलस्यार्थवादस्य न प्रधानविध्यधिकारनिमित्तता कल्पनीया आचार्यकरणकामो माणवकमुपनीयाध्यापयेदिति । तदेवमध्ययनविधेरप्युपनयनप्रकरणत्वाद्राजसनेयिनां सर्वस्मृतिषु चोपनीतो ऽधीयीतेति प्रकरणप्रमाणात्साधिकारत्वसिद्धेः स्वविधिप्रयुक्तमेवाध्ययनमिति युक्तम् । यत्तु मानवं वचनमुक्तम् तत्स्वयमेव वा मूलश्रुत्यनुमानेन वा नाचार्यकरणकामस्य किंचिद्विदधाति किंतु यच्छब्दोपबन्धादुपनयनाध्यापनानुवादेन कर्तुराचार्यसंज्ञामेव विदधाति तमाचार्यं प्रचक्षत इतिवचनात् । संज्ञायाश्च वक्ष्यमाणनमस्कारपूजादिविधानाङ्गत्वात् । तस्मादाचार्यकरणविधिप्रयुक्तिरयुक्तेति । नन्वेवमप्युभयचाधिकारकल्पना न युक्ता अन्यतरेणैवान्यतरस्य प्रयुक्तिसिद्धेः । अतः कस्यान्यतरस्य कल्प्यत इति वीप्सायां माणवकस्याप्रबुद्धत्वात्स्वाधिकारं प्रतिपद्यानुष्ठातुमशक्तत्वादध्यापनविधिरेव साधिकारो ऽध्ययनं प्रयुङ्क्त इति चोदयति कथमिति । तत्रोत्तरमाह अष्टवर्षं ब्राह्मणमुपनयीतेति । यदयमाचार्यस्य नियोग इति । आचार्यकरणकामस्य नियोग इत्यर्थः । अयमभिसन्धिः । आचार्यकरणविधिस्तावन्नाविहितमध्ययनं प्रयुङ्क्ते अध्ययनानधिकारिणां तत्र प्रयोजनशून्यतया ऽऽचार्यगुणभावेन प्रवृत्त्ययोगात् । अथ विहितमेवाध्ययनं प्रयोजयति । तत्र वक्तव्यम् किं विधिः स्वरूपनिर्धारणोपाधित्वेनाधिकारिणं विषयं चापेक्षते न वेति । स्वरूपोपाधितया विषयमपेक्षते नाधिकारिणम् प्रवर्तकत्वोपाधित्वादधिकारिण इति चेत् । तर्ह्यस्यायं विधिरिति विहितस्याध्येतृविशेषस्यापरिज्ञानाद् यं कंचिदध्यापयेदेतदाह माणवको न नियुक्तो भवतीति । अथ स्वरूपोपाधित्वेनैवाधिकारिणमपेक्षते विधिः तर्हि सिद्धमध्ययनविधेः साधिकारत्वम् तत्र प्रकरणादुपनीतो ऽधिकारी सम्पद्यते । साधिकारित्वे चाध्ययनविधेः प्रयोज्ययितृत्वमपि सिध्यति । परप्रयुक्तानुष्ठानसम्भवे साधिकारोपि विधिर्न प्रयोजयतीति चेत्तत्राह अनियुक्तस्य च स्वाध्यायाध्ययन इति । अनियुक्तस्येति । स्वाधिकारविधिनैवाप्रवर्तितस्येत्यर्थः । नन्वेकस्मिन्नऽप्रवर्तमाने ऽप्यन्यः प्रवर्तिष्यत इति श्रोतोरूपेणाध्यापनस्य सिद्धिरिति । न । उपनेतृत्वस्यापि तदङ्गत्वात् । स्वात्मनैवोपनीतमध्यापयेन्नान्येनोपनीतम् अन्यथाङ्गवैकल्यादधिकारानिष्पत्तेराचार्यत्वफलासिद्धेः । तर्ह्यन्या-

५४ १

,,

नप्युपनीयाध्यापयेत् । तन्न । सर्वे च माणवका न प्रवर्त्तन्ते निष्प्रयोजनव्यापार इति नाध्यापनं सिध्यति । ननु बालकस्य कथं स्वाधिकारप्रतिपत्तिः । संध्योपासनसमिदाहरणादिकर्त्तव्यताप्रतिपत्तिवदुपदेशसामर्थ्यादध्ययनकर्त्तव्यताप्रतिपत्तिरिति न विरोधः । किञ्च । अनित्येन विधिना नित्यस्याध्ययनस्यानु-
४ २० ष्ठाने तदुपरमे नित्यमध्ययनं सम्पादयितुं न शक्यत इत्याह किंचान्यत् आचार्यकरणविधिरिति । अयमाशयः । काम्यमानमाचार्यत्वं न तावत्स्वयमेव पुरुषार्थः परम्परया च सुखदुःखप्राप्तिनिवृत्त्योरेव पुरुषार्थत्वात् । तच्चाचार्यत्वस्याध्यापनमात्रस्य वा प्रयोजनाकाङ्क्षायां दृष्टे सत्यऽदृष्टकल्पनानुपपत्तेर्द्रव्यार्ज्जनोपायत्वेन षण्णां तु कर्मणामस्य चीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति स्मरणात् माणवकस्य चाध्ययनाङ्गत्वेन गुरुदक्षिणादिविधानात् अङ्गिन्यध्ययने ऽनुष्ठापकस्याध्यापनविधेर्दक्षिणाशुश्रूषाद्यङ्गेष्वनुष्ठापकत्वात् द्रव्यार्ज्जनमेव प्रयोजनम् । तच्च प्रयोजनवत्तया काम्यत्वान्न नित्यवत् प्रयोक्तृत्वसिद्धिरिति । उपगमनाध्ययने तर्ह्यनित्ये इति नेत्याह * उपनयनाख्यस्तु संस्कारो नित्य इति । ननु प्रायश्चित्तस्याप्यकरणे दोषः श्रूयते अतीते चिरकाले तु द्विगुणं व्रतमर्हतीति तच्च कथं प्रत्यवायश्रवणादुपनयनस्य नित्यतेति । उच्यते । न प्रायश्चित्ताकरणनिमित्तदोषनिरासाय द्विगुणं व्रतमुच्यते किन्तु प्रायश्चित्तेन निराकर्त्तव्यस्य पूर्वदोषस्यैवातीतचिरकाले द्विगुणव्रतापेक्षयैव निरास इत्युच्यते । अन्यथा प्रायश्चित्तानवस्थाप्रसङ्गात् । ननूपनयनसंस्कारस्य नित्यत्वे ऽप्यध्ययनस्य कथं नित्यतासिद्धि-
२५ रिति तत्राह संस्कारश्चेति । अङ्ग्युपाधिविहितत्वादङ्गस्योपहिताङ्गनित्यतास्वोपाधेरध्ययनस्यापि नित्यत्वं कल्पयतीति । नन्वध्ययनमनारभ्याधीयमानमु†पनयनफलं कथमध्ययनाङ्गं स्यात् । नचोपनयनसंस्कारविधिमात्रमेवानुपपत्त्या शेषित्वेनाध्ययनं कल्पयति श्रुत्यादिविशेषसम्बन्धनिमित्तप्रमाणाभावे ऽध्ययनविशेषेण सम्बन्धासिद्धेः । यथा हिरण्यं भार्यमिति विधिः प्रतीतितो हिरण्यसंस्कारार्थोपि श्रुत्यादिविशेषसम्बन्धप्रमाणाभावात्संस्कार्याहरण्यपदार्थसामर्थ्यात्क्रतुसम्बन्धे सर्वक्रतुसम्बन्धप्रसङ्गात् । एकस्य संस्कारस्य सर्वक्रतू-

* उपनयाख्यस्त्विति २ पु० । † उपनयनं कथमिति १ पु० ।

पकारित्वानुपपत्तेश्च अन्याङ्गतामनश्नुवानः संस्कारकर्मत्वं परित्यज्याभ्युदयफलः स्वतन्त्रो विधिरभ्युपगतः । एवमुपनयनविधिरपि श्रुत्यादिप्रमाणविरहात्संस्कार्य्यमाणवकसामर्थ्यात्क्रतुसम्बन्धे सर्वक्रतुसम्बन्धप्रसङ्गादन्याङ्गतामनश्नुवानः संस्कारकर्मत्वं परित्यज्य स्वतन्त्र एवाभ्युदयफलः स्यात् । कर्मस्वरूपविधिर्हि सर्वः स्वभावसामर्थ्यादेवाङ्गाङ्गिभावं सामान्येन * प्रमिमाणः श्रुत्यादिसहकृत एव † विशेषसम्बन्धं प्रमिमीत इति नोपनयनस्य संस्कारकर्मता सिध्यतीति ॥

अचोच्यते । अध्ययनविधिरेव श्रुत्यादिप्रमाणा‡नपेक्षतया चार्तुर्थिकेन प्रमाणेन नोपनयनमात्मीयाङ्गत्वेन स्वीकरोत्याचार्याधीनो वेदमधीष्वेत्यादिनियमविधानाल्लिखितपाठादिप्रतिषेधे सत्या§चार्योपगमनमन्तरेण माणवकाध्ययननिर्वृत्त्ययोगात् । ननु दृष्टमाचार्योपगमनमध्ययनविधिसामर्थ्यादुपादीयतामदृष्टस्तूपनयनसंस्कारः कथमङ्गतयोपादीयत इति । उच्यते । आचार्योपगमनविधिरेव नानाविधेतिकर्तव्यकलापानुगृहीतो ऽदृष्टं संस्कारमुत्पादयति । स च विधिर्विधिप्रयुक्तप्रयोजनमीक्षमाणो दृष्टोपगमनद्वारेणाध्ययनविध्युपकारे सम्भवति नादृष्टं कल्पयति । दृष्टे सत्यदृष्टकल्पनानुपपत्तेः । दृष्टफलातिशये ऽदृष्टे संभवति स्वतन्त्रादृष्टकल्पनानुपपत्तेरित्यर्थः । तद्देवमध्ययनविधिसामर्थ्यादुपादीयमाने सत्याचार्योपगमने तदाश्रितोपनयनविधिजन्यसंस्कारस्यापि तद्द्वारेणाध्ययनविधिसम्बन्धस्योपनयनविधिसामर्थ्यादेव सिद्धेरुभयविध्युपादानसामर्थ्यादध्ययनाङ्गमुपनयनमिति सिद्धम् । ननूपनयनस्य संस्कारकर्मतायां सिद्धायां संस्कारविधेः प्रयोजनाकाङ्क्षा ततश्चाध्ययनविधाविप्राचार्योपगमनदृष्टद्वारेणोपनयनविधिरध्ययनाङ्गतामात्मनः सामर्थ्यात्प्रमिमीते । न चोपनयनस्य संस्कारकर्मत्वे प्रमाणमित्यचोच्यते । परस्परोपादानसामर्थ्यादेवोपनयनाध्ययनयो‖रङ्गाङ्गिभावे सिद्धे किमुपनयनं प्रोक्षणादिवत्संस्कारकर्मतयाङ्गं किंवा प्रयाजादिवदध्ययनफलोपकार्यङ्गमिति ¶विशये ** संस्कारक-

* प्रमाणः श्रुत्यादिति १ पु० । † विशेषसंबन्धः प्रमीयत इति २ पु० ।
‡ अनपेक्षतयेति ३ पु० । § आचार्योपनयनमन्तरेण माणवकस्यापीति १ पु० ।
‖ अङ्गाङ्गिसिद्धेरिति २ पु० । ¶ विषये इति ३ पु० ।
** संस्कारतयेति ३ पु० ।

र्मतयाङ्गत्वमुपादायते अङ्गिस्वरूपोपकारलाभात् सन्निपत्याङ्गत्वात् । फलोपकार्यङ्गानां विप्रकृष्टतयाङ्गत्वात् । विप्रकर्षात्सन्निकर्षग्रहणस्य युक्तत्वात् । अतो माणवकसंस्कारतयोपनयनमध्ययनस्वरूपोपकार्यङ्गमुभयविध्युपादानसामर्थ्यात्सिद्धम् । किंच । अष्टवर्षं ब्राह्मण उपगच्छेत् सो ऽधीयीतेति वाक्यविपरिणामस्य वक्ष्यमाणत्वात्तच्छब्दश्रुतिरेवोपनयनसंस्कृतं माणवकमादाय स्वाध्यायाध्ययने नियुङ्क्त इति श्रुत्यनुगृहीत एवोपनयनविधिरध्ययनाङ्गतामात्मनः प्रतिपादयति । तच्छब्देन संस्कारो न परामृश्यते किंतु माणवक एवेति न युक्तं वक्तुम् अनन्तरप्रकृतत्वात्संस्कारस्य । उपनयनाध्ययनयोः परस्परसाकाङ्क्षत्वस्य दर्शितत्वात् अकाङ्क्षितसमर्पणत्वाच्च श्रुतेः अविभक्तेरपि प्रातिपदिकस्यान्विताभिधायितया सम्बन्धप्रतिपादिकत्वात् । तस्माच्छ्रुत्यनुगृहीत एव विधिरङ्गाङ्गिभावं प्रमिमीत इति । किंच । वाजसनेयिनां सर्वस्मृत्यनुमितश्रुतिषु चोपनयनं प्रकृत्याध्ययनविधानात्फलवदध्ययनप्रकरणानुगृहीत एवोपनयनविधिरध्ययनाङ्गतामात्मनः प्रतिपादयति । तस्मादुक्तम् संस्कारश्च स्वाध्यायाध्ययनार्थ इति । ननु काम्यत्वेप्याचार्यकरणविधिर्नित्यसमीहितफलत्वान्नित्य एव । ततश्च न नित्यानित्यसंयोगविरोध इति चोदयति ननु कथमाचार्य्यकरणेत्यादिना । फलस्य नित्यसमीहितत्वमङ्गीकृत्य परिहरति भवेदेवं नित्यता फलवशेन न शब्दादिति । ननु फलसामर्थ्याद्वा शब्दसामर्थ्याद्वानुष्ठेयं नित्यकर्त्तव्यं चेत् किं प्रमाणविशेषेण हीयत इति तत्राह तथाहि फलस्य नित्यसमीहितत्वादिति । वास्तवी फलवस्तुसामर्थ्यनिबन्धनेत्यर्थः । नन्वध्यापने क्वचित्फलसाधनकामनाधीना कर्त्तव्यताप्रतिपत्तिः अन्यत्र तु शाब्दकर्त्तव्यताप्रतिपत्त्यधीनाध्यापने फलसाधनेच्छा किमचाध्यापनस्य नित्यकर्त्तव्यता प्रतिपत्तेरायातमिति तत्राह शाब्दां हि नित्यकर्त्तव्यताप्रतिपत्ताविति । अस्त्यत्र विशेषः । कथम् । अध्यापनविधिर्हि शब्दान्नित्यतया प्रतिपन्नो * विशेषणस्वाधिकारोपाधौ सर्वदा सर्वान् प्रत्यनुष्ठेयेच्छामुत्पाद्य प्रवर्त्तयति । प्रामाणिककर्त्तव्यताप्रतिपत्तेः स्वोपाधौ संकोचाभावात् । इच्छाधीने तु कर्त्तव्यतावगमे तत्सङ्कोचादेव कर्त्तव्यतावगमसङ्कोचान्न नित्यवदध्यापनसिद्धिरिति । ननु प्रामाणिकनित्यकर्त्तव्यताधीनापीच्छा क्वचिद्देशे काले वस्तुनि च कारकसाम-

* विशेषेणेति ३ पु० ।

र्थ्याभावादिवशेनौचित्यात्प्रतिहन्यते । तच्च कथं नित्यकर्त्तव्यताधीननित्येच्छाद्वारेण नित्यवदनुष्ठानमिति तत्राह औचित्यादिभावेपीति । प्रमाणतस्तावन्नित्यो ऽध्यापनविधिः प्रत्यवायभयादिव यावज्जीवमिच्छादिद्वारेणाधिकारिणमनुष्ठापयतीत्यर्थः । तेनेति स्पष्टार्थः । ननु प्रमाणतो विधिनित्यत्वेपीच्छातोपि कर्तव्यतानित्यत्वं किं न स्यादिति नेत्याह फलवशात्तु कर्त्तव्यताप्रतिपत्ताविति । अनित्यैव सा स्यादित्यध्याहारः । नन्वर्थस्य नित्यसंमोहितत्वात्कर्त्तव्यताप्रतिपत्तिनिमित्तकामोपि नित्य एवेत्यत आह यद्यपीति । उपेयनित्यत्वेप्युपायभेदादध्यापनकर्त्तव्यताप्यनित्यैवेत्यर्थः । ननु कस्यचिदुपायान्तरासमर्थस्य तदेकोपायत्वान्नित्यकर्त्तव्यतेति * तत्राह तदेकोपायत्वपीति श्रुतेानित्यानित्यसंयोगविरोध इति । इदानीं स्वतो नित्यत्वाभावेपि नित्यपुत्रोत्पादनविधिशेषतयोपनयनाध्यापनयोर्नित्यत्वान्न नित्यानित्यसंयोगविरोध इति चोदयति ननु पितुः पुत्रोत्पादनविधिरिति । तच्च पुत्रोत्पादनविधेः पितॄणां परलोकगतानामस्मिल्लँोके पिण्डपितृयज्ञाद्यनुष्ठानद्वारेण तृप्तिसम्पादनं प्रयोजनम् । न चोपनयनाध्यापनार्थज्ञानादिव्यतिरेकेणानुष्ठानं सम्भवति । ततश्च नित्यस्य पुत्रोत्पादनविधेः फलपर्य्यन्ततापेक्षितमनुशासनं तच्छेषतया विदधाति तस्मात्पुत्रमिति वाक्यम् । ततश्च पितुरेव नित्यपुत्रोत्पादनविधिसामर्थ्यादुपनयनाध्यापनादिविधीनां नित्यत्वं प्राप्तम् । ततश्चार्थज्ञानपर्यन्तत्वादनुशासनस्याध्ययनमप्यर्थज्ञानफलमित्याह कथं वा ऽध्ययनस्येति । परिहरति नानेन पुत्रानुशासनं विधीयत इति । अथातः संप्रत्तिर्यदा प्रेष्यन्मन्यते ऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति । वेदतदर्थतत्फलानां स्वानुष्ठेयानां पुत्रे समर्प्यमाणानाम् । स पुत्रः प्रत्याह अहं ब्रह्माहं यज्ञोहं लोक इति । पुत्रेणानुष्ठेयतया स्वीकरणं संप्रतिकर्म । तच्च पूर्वानुशासनमन्तरेणाकस्मादेव सकलकर्त्तव्यसंग्रहानुपपत्तेः फलपर्यन्तपुत्रोत्पादनविधिनात्तिप्रमनुशासनं पूर्वनिर्वृत्तमेवा†र्थवादतया ऽनुवदत्येतद्वाक्यमिति भावः । स्या भूत् तदेतद्वाक्यमनुशासन‡विधायकम् तथापि नित्यपुत्रोत्पादनविधिसामर्थ्यादेव पितुरुपनयनाद्यनुशासनविधिर्नित्य एव प्राप्त इति तत्राह गर्भाष्टवर्षे- ॥

* तदाहेति १ पु० । † अनुवादतयेति ३ पु० । ‡ विधानमिति ३ पु० ।

गेत्यादिना । अयमर्थः । नित्यपुत्रोत्पादनविध्यधिकारणः पितुरायुर्नियमाभावादनुशासनपर्यन्तमवस्थानानुपपत्तेः कर्तव्यार्थोपदेशनमेवानुशासनं नानुष्ठापनम् । अतो नित्यपुत्रोत्पादनविध्याच्चिप्रत्ययापि नोपनयनादिविधिर्नित्यतेति । ननु पितुः कर्तव्योपदेशनमेवानुशासनं नोपनयनाद्यनुष्ठापनमिति कथमवगम्यते
२६ तदाह तथाच लिङ्गम् श्वेतुकेतुरिति । ततश्च नित्यानित्यसंयोगविरोधमतदवस्थ एवेत्याह तदेवमनित्येनेति । ननु माणवक एव एकस्मिन्नाचार्ये मरणादिना निवृत्ते पुनराचार्यान्तरमाहूय नित्यमध्ययनं सम्पादयिष्यतीति नेत्याह * किं चाचार्ये प्रेत इति । न तावन्माणवकः स्वनियोगेन प्रेर्यमाणः स्वाधिकारं निर्वर्तयितुमाचार्यान्तरं सम्पादयत्यनङ्गीकरणात् । नाप्याचार्यनियोगेनाधिकारिणोऽभावे नियोगस्य कर्तव्यताप्रतिपत्त्यभावादकर्तव्यानुष्ठानाय साधनसंपादनायोगादिति । ननु साधनान्तरप्रतिनिध्युपादानवदधिकारिणोपि प्रतिनिध्युपादानेन कर्तव्यं माणवकः सम्पादयेदिति नेत्याह नचाधिकारी प्रतिनिधीयत इति । अवश्यकर्तव्यस्य ह्यननुष्ठाने प्रत्यवायात्तदनुष्ठानाय हि मुख्याभावे प्रतिनिधिरादीयते । अधिकार्यभावे † ममेदमिति सम्बन्धानवगमादकर्तव्ये नियोगे कस्यावश्यानुष्ठानाय प्रतिनिधिरादीयते । न तावन्मृतस्य तस्य विधिसम्बन्धनिमित्तनिवृत्तेः कर्तव्यत्वाभावात् । नापि प्रतिनिधेः आचार्यस्येदं कर्तव्यम् । तस्य ‡ कर्तव्यसिद्ध्युत्तरकालत्वात् । तस्माद्नाधिकारिणः प्रतिनिधिसम्बन्धः । न तर्हि सर्वत्र प्रतिनिधिद्वारावकाश इति
३ तदाह अधिकारी स्वाधिकारसिद्ध्यर्थमिति । नन्वाचार्ये प्रेते ऽन्यः कश्चिदाचार्यः स्वाधिकारं निवर्तयितुं माणवकं स्वीकरिष्यति किं माणवकस्याचार्यान्तरकरणेऽ§व्यापारेणेति । न । पुनरुपनयनाभावात् । उपनेतृत्वाङ्गस्याचार्यस्य व्यापारस्याभावे ऽङ्ग्यध्यापननिर्वृत्त्ययोगात् । माणवकान्तरे ऽङ्गं निर्वृत्तमिति चेत् । तेनैवाध्यापनस्यापि सिद्धेर्न माणवकान्तरस्वीकारः अनुपनीतं वा ऽध्यापयीत अङ्गस्य निर्वृत्तत्वात् । वृत्त्युपचयार्थः संग्रह इति चेन्न दरिद्रस्य माणवकस्याग्रहणप्रसङ्गात् । अल्पव्यवहितग्रामवासिनां च माणवकानामाचार्यसंपादनाय ग्रामान्तरगमनं न स्यात् । न हि तत्र तत्राध्यापयितारः

* किंवाचार्ये-इति २ पु० । † ममेदं कर्तव्यमिति १ पु० ।
‡ कर्तव्यसिद्ध्युत्तरकालीनत्वादिति १ पु० । § व्यापारान्तरेणेति ३ पु० ।

श्राचियाश्च दृश्यन्ते । तथाच माणवकस्योपनयनादिसिद्ध्यर्थं स्वयमेवाचार्य-गमनं श्रूयते सत्यकामो ह वै जाबालो ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तमित्यादिश्रुतौ । उपसंहरति एवमेषा बहुदोषेति ।

ननु स्वविधिप्रयुक्तत्वे सत्युपगमनाध्ययनयोस्तत्प्रयुक्ततयोपनयनाध्यापनसिद्धेः तत्र विधानमनर्थकमिति । नायं प्रयोजकव्यापारयोर्विधिः किंतूपगमनाध्ययनयोः कर्तृव्यापारयोर्विधिरित्याह तस्मान्माणवकस्यैव नियोग इति । ४६
ननु णिजर्थसंसृष्टस्वार्थाभिधायिनि विधिपदे कर्तृव्यापारे विधिसंसर्गो वाक्यप्रमाणविरुद्ध इति चोदयति कथं गुणकर्तृव्यापारसम्बन्ध इति । किं न्यायविरोध उच्यते किंवा शब्दविरोधः । न तावच्छब्दविरोधः अन्यत्रापि दर्शनादित्याह यथैतया यागकाममिति । नापि न्यायविरोधः प्राप्तानुवादेनाप्राप्तविधानादित्याह यागकामस्य यागो विधीयत इत्यादिना । नन्वध्यापनयाजनयोः कर्तृप्रयोजकव्यापारद्वयावगमादन्यतरानुवादेनान्यतरो विधीयत इति युक्तम् । उपनयने तु धात्वर्थस्य प्रयोजकव्यापारत्वादनभिधीयमानः कर्तृव्यापारः कथं विधीयत इति चोदयति युक्तं * याजयेदित्यादिना । ननूपनयने मा भून्माणवकव्यापारविधिः अध्ययने तु भविष्यति । तन्न वाक्यसारूप्यादित्याह तदेवमाचार्यकरणविधिप्रयुक्तत्वादिति । तत्र प्रयोजकव्यापाराभिधायिनापि नयतिधातुना माणवकव्यापारस्यानभिधीयमानस्यापि गम्यमानत्वात्स एव धातुना लक्षणयोपादाय विधीयते न प्रयोजकव्यापारः स्वयंप्राप्तेरिति परिहरति उच्यते माणवकस्यैवार्थमिति । ननु माणवकव्यापारो गम्यमानतया वा कथं प्रतीयते कथं वा प्रयोजकव्यापारः प्राप्तानुवाद इति चोदयति कथम् ४६
यत्तावदिति । माणवकव्यापारस्य गम्यमानतामुपपादयितुं प्रथममाचार्यव्यापारस्याविधेयतामुपपादयत्युपनयीतेत्यस्याभिधानतो न्यायतश्चेति माणवकमुपनीयतेत्युक्ते माणवकस्य † स्वात्मसमीपगमनमभिधानतः प्रतीयते न स्वस्य माणवकसमीपगमनम् । अन्यथा माणवकमुपगच्छेदिति वचनं स्यात् । न्यायतश्च प्रतीयते यथा बालानच्चराणि शिक्षयन्लौकिकः पुरुषो न बालमुप-

* याजयेरित्यादिनेति १, २ पु० ।

† स्वात्मसमीपगमनमिति २ पु०, स्वात्मसमीपमागमनमिति १ पु०, आगमनमित्यस्य स्थाने आनयनमिति कृतमस्ति ३ पु० ।

भावं गच्छति किंतु बालानेव स्वयमात्मगुणभावं नयति । नन्वेवमप्याचार्य्यव्यापारो न प्राप्तानुवादः । कथम् । शुश्रूषादङ्गसहिते ऽध्ययने माणवकस्य विहिते स्वविधिप्रयुक्ते चाध्ययने वृत्यर्थतयाचार्यप्रवृत्तिः प्राप्नोति । वृत्यर्थप्रवृत्तौ च प्राप्तायां तदनुवादेन माणवकव्यापारो ऽध्ययनादिर्विधातुं शक्यत इति इतरेतराश्रयप्रसङ्गात् । ननु यामकामं याजयेदित्यत्रापि समानो ऽयं दोषः । अथ स्वविधिप्रयुक्तेषु यागान्तरेषु सामान्येन वृत्यर्थतया प्राप्तं प्रयोजकव्यापारमनूद्य यामकामस्य यागविशेषो विधीयत इति तर्हीहापि विध्यन्तरेषु सामान्यप्राप्तप्रयोजकव्यापारानुवादेन माणवकव्यापार उपगमनाध्ययनादिर्विधीयताम् । अथवा माणवकव्यापारविधिसामर्थ्यादेव प्रयोजकव्यापारः प्राप्स्यते । न प्रयोजकव्यापारविधानेन माणवकव्यापारः प्राप्स्यत इत्युक्तम् । तच्च माणवकव्यापारविधानादेव भाविनीं प्राप्तिमनूद्य माणवकव्यापारः कदाचिदप्यप्राप्तो विधीयत इति तदेतदाह एतच्च सर्वं वृत्यर्थत्वेन ब्राह्मणस्यान्यत एव प्राप्तमिति । ननु प्रयोजकव्यापारं प्राप्तमेवानूद्य गुणाधिकारादिविशेषविधिपरं वाक्यं किंन स्यादिति । न तावदधिकारविधिपरं वाक्यम् जीवनादिनित्यकाम्याधिकारश्रवणात् । अतो गुणविधिरेव दध्ना जुहोतीत्यादिवत्पर्यशिष्यत इत्याह तच्च कमध्यापयेदिति । भवतु तर्हि गुणविधिरिति नेत्याह तच्च प्राप्ते व्यापार इति । अयमाशयः । यदा विशेष्योपि पदार्थः प्रमीयते तदा नानाविधगुणविशिष्टतया स एको विशिष्टः पदार्थः प्रमीयत इति न वाक्यभेदः स्यात् । यदा तु विशेष्यमनूद्य विशेषणानि प्रमीयन्ते तदा विशेषणानामन्योन्यविशिष्टतयैकत्वापत्त्यभावादन्योन्यानपेक्षतया प्रत्येकं प्रमेयत्वे प्रमेयभेदाद्वाक्यं भिद्यत इति । ननु सर्वत्र विशेष्यं सामान्यद्वारेणानुवाद्यमेव । सत्यं विशेषणान्यपि तथा । किंतु विशेषाकारेणान्योन्यविशिष्टतया पदार्थाः प्रमीयन्त इति । तस्मादुत्पत्त्यधिकारगुणविधयः प्रयोजकव्यापारे न सम्भवन्तीत्युपसंहरति अतो नाचार्यस्येति ।

तच्च माणवकव्यापारस्य गम्यमानस्यैव धातुना लक्षणयोपादाय विधेयत्वं दर्शयितुं चोदयति ननु माणवकस्यापीति । परिहरति अस्तीति ब्रूम इत्यादिना । ननु कर्तुरेव व्यापारो गमनादिषु दृश्यते न कर्मकारकस्य यामादेः । माणवकश्च नयत्यर्थैकर्मभूतः कथं गम्यमानव्यापार इति चोदयति कथमिति ।

परिहरति यदैवोपनीयीतेति । उपनयनसंस्कार्योपीति उपगन्तापीत्यर्थः । नय- ५६ २।
त्यर्थकर्मणो नीयमानस्य गमनव्यापारः सुप्रसिद्ध इति भावः । ननु तर्हि माणवकस्य गमनं प्रयोजकव्यापारादेव सिध्यति किमिति तद्विधीयत इति न विधानमन्तरेणासिद्धेरित्याह तस्य च प्रेक्षावत इति । ननु विधानेपि काम्यविधिः स्यादिति नेत्याह विद्यमानस्यापीति । कथं तर्हि विधिरिति परिशेषान्नित्यविधिरित्याह विधितो ऽवश्यकर्तव्यतामिति । कथं तर्हि वाक्यं परिणम्यत इति तदाह तेनाष्टवर्षं ब्राह्मणमिति ।

ननु नित्यतया विधेयत्वेपि विधिपुरुषसंबन्धो वा विधिपुरुषसम्बन्धनिमित्तं वा प्रवृत्तिर्वाधिकारशब्दार्थो न लभ्यत इति चोदयति नन्वेवमप्यधिकारो न लभ्यत इति । अयमाशयः । ननु सामान्येन गम्यमानस्योपगन्तुरष्टवर्षं ब्राह्मणमिति विशेषणश्रवणादिदमेवाधिकारनिमित्तं संपत्स्यते । नैवम् । एकैकस्य विशेषणस्याधिकारनिमित्तत्वानुपपत्तेः विशेषणयोश्च परस्परविशिष्टताऽभावादेकैकस्य विशेषणस्याभिधानिके क्रियासंबन्धेप्यरुणयैकहायन्यादिवदर्थात्परस्परविशिष्टतयाधिकारनिमित्ततेति चेन्न विधिपुरुषसंबन्धनिमित्तस्याशाब्दत्वप्रसङ्गादिति परिहरति अस्त्यचाधिकारहेतुर्नित्यं निमित्तमिति । विधिपुरुषसंबन्धस्य प्रवृत्तेर्वा हेतुरित्यर्थः । नित्यमिति जीवतः पुरुषविशेषस्य नियतभावीत्यर्थः । न च शाब्दमेव सर्वचाधिकारनिमित्तं साङ्गकर्मानुष्ठानसामर्थ्यस्याप्यशाब्दस्याधिकारनिमित्तत्वाच्छक्तस्याधिकारादिति । अथवा क्रियासंबन्धाभिधानमुखेन विशिष्टसमर्पणे शब्दद्वयतात्पर्य्यकल्पनादधिकारनिमित्तस्य शाब्दत्वं न हन्यते । एवमपि विशिष्टस्य नाधिकारनिमित्ततेति चोदयति ननु जातिव- ५७ १
यसी विशेषणमुपादेयस्येति । अयमभिसन्धिः । उपादेयं नाम साक्षाद्वा परम्परया * वा विधिविषयतया ऽनुष्ठेयं तद्विशेषणं च । क्रियाकारकतद्गुणसमुदाय इत्यर्थः । तचोपादेयविशेषणानि दण्डी प्रैषानन्वाह लोहितोष्णीषा ऋत्विजः प्रचरन्तीति कर्तृविशेषणानि व्रीहिभिर्यजेतेत्यादौ बहुत्वादीनि करणविशेषणानि इन्द्राय † स्वाराज्ञ इत्यादीनि संप्रदानविशेषणानि । नचोपादेयविशेषणमधिकारसंबन्धनिमित्तमनुष्ठेयकारकविशेषणतया विधिं प्रति गुणभूतत्वादधिकारि-

* अयं 'वा'शब्दो नास्ति ३ पु० । † स्वराज्ञे-इति २ पु० ।

णस्तु विधिं प्रति स्वामितया प्राधान्येनान्वयात् । कथं पुनरत्र माणवकस्योपादेयत्वमवगम्यते । उच्यते । प्रयोजकव्यापारं प्रति माणवकस्य कर्मताभिधायिनी द्वितीया विभक्तिः स्वव्यापारं प्रति कर्तृत्वं गमयति । कर्तृविषयत्वात्प्रयोजकव्यापारस्य तत्र प्राप्तप्रयोजकव्यापारानुवादेन कर्तृव्यापारे विधिसंबन्धमात्रं परिगम्यते न शब्दप्राप्तमाणवककर्तृत्वं पराक्रियत इत्युपादेयमाणवकविशेषणस्य जातिविशिष्टस्य वयसो नाधिकारनिमित्तमेति । कस्य पुनरधिकारनिमित्तमेत-
७ त्यत आह अनुपादेयविशेषणमधिकारहेतुरिति । विधिप्रयुक्तानुष्ठेयतद्विशेषणव्यतिरेकेण विधिसबन्ध्यनुपादेयो यथा जीवनगृहदाहवान् स्वर्गकाम इत्यप-
८ सिद्धान्तेन परिहर्तुं नियोगपक्षमङ्गीकरोति सत्यम् अस्तीयं स्थितिरिति । अयं भावः । यच्च लिङादिपदेन नियोगो वाक्यार्थतया प्रतिपाद्यते तच्च वाक्यार्थीभूतनियोगाकाङ्क्षानिमित्तत्वात्पदार्थान्तरसंबन्धानां नियोगस्य च कस्य कस्मिन्निति स्वरूपोपाधित्वेनैवाधिकारिविषयसापेक्षत्वात्स्वर्गकामादिर्नियोगाकाङ्क्ष्याधिकारित्वेन संबध्यते ममायं नियोग इति स्वामितया ऽन्वयित्वं नियोज्यत्वमधिकारित्वं नाम । तच्च प्रथमं ममायं नियोग इति प्रतिपद्य नियोगस्य कार्यतावगमात्तदनुष्ठानाय धात्वर्थे विषये पश्चात्कर्तृतयान्वेति । * नियोगो हि साध्यतया ऽवगम्यमानः प्रथमान्वयिनो ऽधिकारिणो ममायं नियोग इति प्रतिपत्तुर्नियोगनिर्वृत्तिसमर्थे धात्वर्थे कर्त्रन्वयमन्तरेणानुपपद्यमानस्तदन्वयमर्थापत्त्या प्रतिपादयतीत्यधिकारान्वयपुरःसरः कर्त्रन्वय इति † प्राभाकरा मन्यन्ते । तच्च भवत्वनुपादेयविशेषणमधिकारहेतुः भावनावादे तु पुनरुपादेय‡विशेषणमप्यधिकारहेतुरित्याह किं तु कर्तुरधिकार इत्यपि स्थिता न्यायविद इति । अयमाशयः । लिङादिप्रत्ययैर्यदा पुरुषप्रवृत्तिर्भावना वाक्यार्थतया प्रतिपाद्यते तदा प्रधानाकाङ्क्षानिमित्तत्वात्संबन्धस्य क्रियायाश्च स्वरूपोपाधित्वेन कर्तृकरणकर्मापेक्षणीयत्वात्पुरुषार्थधात्वर्थयोश्च भाव्यतत्करणत्वेनान्वयात् परिशेषात्स्वर्गकामादयः कर्तृत्वेनान्वीयन्ते । त-

* नियोग इति· नियोगस्य कृतिसाध्यतया प्रतिपत्तेः सामान्यात्र कृतिसाध्यत्वात्सम्भवाद्भावनात्वर्थनिर्वर्त्तनद्वारा कृतिसाध्यत्वम्· न च धात्वर्थे कर्तृत्वेनान्वयाभावे सार्वत्रिकीत्तिरिति नियोगानुपपत्त्या कर्त्रन्वयसिद्धिरित्यर्थः–इति तत्त्व० ।

† प्रभाकरा इति २ पु· । ‡ विशेषणमधिकारहेतुरिति ३ पु· ।

तश्च कर्तृविशेषणतया तन्नियमार्थानि जीवनगृहदाहकामनादीनि तच्च प्रथमं कर्तृत्वेनान्वयं प्रतिपाद्य कर्तुरेव फलसंबन्धाद् मदीयमिदं फलसाधनं कर्मेति कर्मस्वामित्वलक्षणमधिकारान्वयं पश्चादनुभवति । कर्मफलभोक्तृत्वमेव हि कर्मणि स्वाम्यन्वय इति । ततश्च कर्तृविशेषणान्येव तस्यैव फलभोक्तृतया कर्मणि स्वाम्यन्वयं नियमयन्तीति कर्तुरधिकारस्थितिः । एवं भावनावाक्यार्थोपादानेनापि माणवकस्याधिकारसिद्धिरिति भावः । अथवा यथा राजसूये राजत्वं कर्तृविशेषणमन्येनाधिकारिणा राजत्वस्य कर्तृविशेषणतया सम्पादयितुमशक्यत्वादधिकारिविशेषणमपि सम्पद्यते तद्वदिहापि स्यादिति । ननु नायं परिहार उपपद्यते श्रेयःसाधनस्य लिङादिप्रत्ययैर्वाक्यार्थत्वेनाभिधीयमानत्वात्तस्य च प्रथममधिकारान्वयापेक्षत्वात् । कथम् । श्रेयो हि भोक्तारमपेक्षते अतस्तत्साधनमपि भोक्तृन्वयं भवति कस्येदं श्रेयःसाधनं ममेदमभिलषितसाधनमिति च स्वाम्यन्वयाकाङ्क्षादर्शनात्कस्यायं नियोगो ममायमिति च तद्भावना तु क्रियाकर्त्राश्रयतया ऽवगम्यमाना तमपेक्षते । ननु कृतियोग्यमेव श्रेयःसाधनं विधिः । कर्तुरिष्ट्र भ्युपायो विधिरित्यभ्युपगमात् । ततश्च कृतिः कर्तारमपेक्षत इति । तर्हि नियोगस्यापि कार्यतयावगमात्कृतिनिमित्तकर्त्रन्वय एव स्यात् । ननु कृतिर्नियोगोपसर्जनतयैव शब्देनाभिधीयते । नचोपसर्जनाकाङ्क्षया पदार्थान्वयः किं तु प्रधानाकाङ्क्षया । ततश्च प्रधाननियोगाकाङ्क्षया प्रथममधिकारान्वय इति । समानमेतदिष्ट्रसाधनेपि कृते उपसर्जनतया ऽभिधानात् । ननु श्रेयसोप्युपसर्जनत्वात्तत्सामर्थ्यलभ्ये भोक्तृन्वयः कथं साधनस्य स्यात् । नैष दोषः । साधनत्वस्वरूपोपाधित्वाच्छ्रेयसः तस्य च नियमेन भोक्तृन्वयात्कर्तृभोक्तृसाधारणस्य साधनस्य स्वोपाधिश्रेयोनुसारेण भोक्तृन्वयनियमसिद्धेः । तस्मान्ममाभिलषितसाधनमिति प्रथममधिकारान्वयो वाक्यार्थभूतेन विधिना श्रेयःसाधनेनापेक्ष्यते पश्चादभिलषितसाधनत्वस्याश्रये धात्वर्थे विषये विधिसमर्थ्यादेव कर्त्रन्वयं प्रतिपद्यत इति ।

एवमपि तच्च न विरोध इत्याह किंच इह न माणवको जातिवयोविशिष्ट ५७
उपादेय इति । यदैवोपनयनाध्ययनादिमाणवकव्यापारस्य सामान्येनाभिलषितसाधनत्वलक्षणो विधिः शब्देन प्रतिपाद्यते तदा सामान्यस्य श्रेयोविशेषाकाङ्क्षायां परम्परया पुरुषार्थसाधनमुपनयनसंस्कारं माणवकगतं श्रेयोविशेषं परिकल्प्य

तत्साधनत्वलक्षणो विधिर्माणवकव्यापारे प्रतिपादितो भवति । ततः संस्कार-फलभोक्तृतया विधौ माणवकः स्वामित्वेनान्वेति तत्र च स्वामिनियमार्थं ब्राह्मण्यादिविशेषणं तस्यैव पश्चादभिलषितसाधनत्वविषये माणवकव्यापारे कर्तृत्वयं नियमयतीति न्यायार्थः । ननु प्रयोजकव्यापारविषयतया कर्तृत्वेनैवान्वयो वाक्यात्प्रतिपन्नः । सत्यम् । * तत्र विधिसंबन्धसामर्थ्याद्भोक्तृत्वयं प्रतिपद्य कर्तृत्वयनियमः कल्प्यते । नन्वेवमप्यध्ययनस्य न साधिकारतासिद्धिरिति तत्राह तदेवमुपनयनस्याध्ययनार्थत्वादिति † । प्रसिद्धं च सर्वस्मृतिशास्त्रेषूपनयनमध्ययनाङ्गमिति । वाजसनेयिनां चोपनयनं प्रकृत्याध्ययनं विधीयते विधिद्वयसामर्थ्यं चोपादानप्रमाणं दर्शितम् इहापि तमध्यापयीतेत्युपनीतं तच्छब्देन परामृशति अङ्गाङ्गिनोश्चैकाधिकारत्वादुपनीतो ब्राह्मणोऽधीयीतेति सपद्यते । अङ्गाधिकारनिमित्तस्य कालस्य सर्वाच्चाङ्गिन्यन्वयनियमाभावाद् वयसो नाध्ययनाधिकारनिमित्तेति । ननु नित्याधिकारेणाध्ययनविधिनार्थावबोधो
१४ भाव्यतामिति नेत्याह अक्षरग्रहणमात्रेण चेति । ननु सकृदध्ययनादेव नित्याध्ययनविधिसिद्धेरावृत्तिः केन लभ्यते अर्थावबोधफलपक्षे वा कथं लभ्यते । फलावसानानुपपत्तिरिति चेदिहापि समानम् अक्षरावाप्तेः फलत्वात् । नन्वदृष्टमेव विधिफलमित्युक्तम् । समानमर्थावबोधपक्षेपि ।

नन्वदृष्टसमवायि दृष्टं फलमर्थावबोधस्तस्य चाक्षरस्वीकरणविचारादापेक्षत्वानदर्थमावृत्तिमिच्छन्तीति । न । शाखान्तरीयपौरुषेयवाक्येभ्योऽप्यर्थीकृतेभ्योऽर्थावबोधदर्शनाभ्यन्न तदर्थमावृत्यपेक्षा युक्ता । जपस्वाध्यायविधिसामर्थ्याच्चाक्षरस्वीकरणायाऽऽवृत्तिः कल्प्यते नार्थावबोधसामर्थ्यादध्ययनशब्द एव वा ऽधीयमानावाप्तिपर्यन्तव्यापारस्य मुख्यया वृत्त्याभिधायकः सकृदुच्चारणादौ गौणमित्यावृत्तिमिच्छन्तीति । ननु वेदस्यैवान्यनिरपेक्षतया विचारहेतुत्वं वदन्
१९ भाष्यकारो ऽध्ययनविधेरेव विचारहेतुत्वमाहेति चोदयति ननु चैवमधीतो वेद इति । सत्यम् । विचारस्य प्रयोजकोत्तरविधिप्रदर्शनद्वारेण विचारहेतुः

* तत्र विधीति· प्रयोजकव्यापारस्याविधेयत्वादितरत्र विधिसम्बन्धो वक्तव्यः· तथा च लिङादिप्रतिपाद्यप्रेरणासाधनत्वविध्यनुरोधेन भोक्तृत्वये प्रतिपन्ने कर्तृत्वयप्रतिपत्तेरङ्गीकरणात्र विरोध इत्यर्थः– इति तत्त्व० ।

† अत्र 'तदेवमिति महाप्रकरणोपसंहार' इत्यधिकः पाठोऽस्ति २ पु· ।

स्वाध्यायो नाध्ययनविधिविधेयताद्वारेणेति परिहरति सत्यम् तथैव तदित्या- ५७ १
दिना । ननु स्वाध्यायादापातप्रतिपन्नोत्तरविधिरनिश्चितः कथं विचारं प्रयुङ्क्ते
इति तदाह अधीतवेदो ह्यवश्यकरणीयानीत्यापातप्रतिपन्नानामुत्तरनित्यविधी-
नामनुष्ठेयनिर्णयज्ञानसापेक्षत्वात्तन्निर्णयाय विचारप्रयोजकत्वमिति । काम्यवा-
क्यविचारमप्याधानवत्फलकामनैव प्रयुङ्क्ते । नन्वनेकविधिप्रयुक्तिकल्पनाद्गरम-
ध्ययनविधिप्रयुक्तिकल्पनं विचारस्य । न । विधेयतदुपकारिव्यतिरिक्तस्य
विचारस्याप्रयोजकत्वादध्ययनविधेरित्युक्तत्वादर्थावबोधफलत्वाभावात्तदव-
घाता ऽऽवृत्तिवत्फलापेक्षयापि न विचारविधिरित्युक्तत्वादुत्तरविधिविधेयोपका-
रित्वाद् विचारस्य तत्प्रयुक्तिः सम्भवति । प्रतिवाक्यं निर्णयज्ञानभेदाच्च विधि-
भेदो न विरुध्यते । अन्यथा यागाद्यनुष्ठानस्याप्यध्ययनविधिप्रयोज्यत्वं
स्यात् । * स्वर्गादिसिद्धिपर्यन्तत्वादध्ययनविधिफलस्य । नन्वध्ययनमप्युत्तर-
विधिप्रयुक्तं न स्यात् अध्ययनमन्तरेण विचारनिर्णयकर्तृत्वानुष्ठानाद्यसिद्धेरिति
तत्राह अतः प्रागध्ययनादप्रतिपत्तेरिति । प्रागध्ययनादुत्तरविधीनामप्रतिपत्ते-
र्नाध्ययनप्रयोजकत्वमित्यर्थः । अध्ययनविधिश्च सन्ध्योपासनादिविधिवत्पि-
त्रादिभ्यः श्रूयमाणः प्रवर्तयति । नच सकलोत्तरविधीनामध्ययनात्प्राक् श्रवणं
सम्भवतीत्युक्तम् । अस्तु तर्हि ब्रह्मज्ञानस्यापि त्रैवर्णिकाधिकृतोत्तरनित्यविधि
प्रयुक्त एव विचार इति नेत्याह न तथा ब्रह्मज्ञानमिति । नच धर्मब्रह्म-
विभागसिद्ध्यर्थं नित्याग्निहोत्रादिविधिरेव ब्रह्म विचारयत्यापातदर्शनेनैव वि-
विक्तभूतवस्तुविषयत्वात् । तस्मादित्यवान्तरप्रकरणोपसंहारः । तदेवमिति
महाप्रकरणोपसंहारः ।

नन्वोंकारश्चाथशब्दश्च द्वावेतौ † ब्रह्मणो मुखात् । कण्ठं भित्त्वा
विनिर्यातौ तस्मान्माङ्गलिकावुभाविति मङ्गलार्थत्वादथशब्दस्य शास्त्रारम्भे
च शिष्टाचारपरिपालनाय विघ्नोपशान्तये च मङ्गलाचरणं * कर्तव्यमिति
तदर्थोऽथशब्द इति नेत्याह मङ्गलस्यापीति । न तावन्मङ्गलं ब्रह्मजिज्ञा- ५८
सायाः कर्तृकरणकर्मभावेन वाक्यार्थेऽन्वेति । कर्त्रादान्यतमभावे प्रमाणाभा-
वात् कारकान्तराणां विद्यमानत्वाच्च । नापि सामानाधिकरण्येनान्वयः ब्र-

* स्वर्गादीति· अर्थावबोधस्य स्वरूपेणाऽपुमर्थत्वात्स्वर्गादिफलपर्यवसायित्वम्· तच्च न यागाद्यनुष्ठानं विनेति तदाक्षेपेण ऽर्थीत्यर्थ इति तत्त्व० । † ब्रह्मणः पुरेति ३ पु· ।

ह्मजिज्ञासा मङ्गलमिति प्रशंसापरतया ऽर्थवादत्वप्रसङ्गात् न तु कर्तव्यमेव मङ्ग-
१ लाचरणमिति तचाह श्रुतिमाचोपयोगादिति । ननु प्रकृतादर्थादर्थान्तरविव-
क्षया ऽप्यथशब्दः प्रयुज्यते यथार्थान्तरे ऽभिहिते ऽर्थान्तरविवक्षया ब्रवी-
त्यथैवं मन्यस इति तदर्थोथशब्द इति चोदयति ननु प्रक्रियमाणादिति ।
हेतुफलभावे नानन्तर्याभिधाने प्रकृतादर्थादर्थान्तरत्वमन्तर्णीततया सिद्ध्य-
तीतिन पृथग्वक्तव्यमिति परिहरति नानन्तर्याद्धातिरिच्यत इति । नन्वर्थान्त-
रत्वमेवाभिधायानन्तर्यमन्तर्णीतं किमिति न गृह्यत इति चोदयति कथमि-
ति । तच किं नियमेन पूर्ववृत्ततया हेतुभूतो वस्तुविशेषो ऽवद्योत्यते किं
वा यत्किंचिद्वस्तु पूर्ववृत्तमपेक्ष्यत इति । तच न तावत्प्रथमः कल्पः आनन्त-
र्य्याभिधानमन्तरेण हेतुतया पूर्ववृत्तवस्तुविशेषनियमासिद्धेरित्याह एवं तत्प्र-
क्रियमाणस्य नियमेन पूर्ववृत्तमिति । अथोत्तरः कल्पस्तचाह अन्यथा यस्मिन्क-
स्मिंश्चिदिति । नन्वानन्तर्य्येपि हेतुतया पूर्ववृत्तं नावगम्यते । सत्यम् ।
पुष्कलकारणात्फलस्यानन्तर्य्यमेव मुख्यं भवति अव्यवधानादव्यभिचाराच्च
अहेतुफलयोस्त्वानन्तर्यं कदाचिद्व्यभिचरति कदाचिद्व्यवधीयते चेति गौणमेव
स्यात् । तस्मान्मुख्यानन्तर्याभिधानेन पूर्ववृत्ते पुष्कलकारणे ऽवद्यो-
तिते ऽर्थान्तरभावोप्यन्तर्भवति नार्थान्तराभिधाने मुख्यमानन्तर्य्यमन्तर्भ-
वतीत्युपसंहरति । अतो हेतुभूतोर्थोपेक्षितव्य इति । उक्तेर्थे भाष्यमवतार-
यति तदेतदाहेति । ननु फलं चेद् दृश्यते किं पुष्कलकारणावगमेन नाधि-
कारिविशेषणत्वेन फलपर्यन्तेच्छाया विचारादिप्रवृत्तौ प्रतिपत्त्यपेक्षत्वादित्याह
सति चानन्तर्यार्थत्व इति । ननु प्रज्ञातमेव * पूर्ववृत्तं धर्मजिज्ञासासूच इत्या-
शङ्क्याह स्वाध्यायाध्ययनानन्तर्य्यं तु समानमिति । भाष्यार्थं विवृणोति येन
विना नियमेनेत्यादिना । योजनान्तरमाह अथवेति । न पुष्कलं कारणमित्यर्थः ।

नन्वेकाध्ययनविधिप्रयुक्तस्वाध्यायाध्ययनस्यैकमोक्षप्रयोजनत्वे वक्तव्ये
ऽध्ययनविधिप्रयुक्तत्वाभावेपि कृत्स्नवेदार्थविचारस्यैकफलप्रयुक्तत्वाद्धर्मब्रह्म-
विचारयोरन्योन्योपकार्योपकारकभावेनैकफलशेषत्वादुपकारकधर्मावबोधानन्त-
र्य्यमुपकार्यब्रह्मावबोधस्योच्यत इति चोदयति नन्विह कर्मावबोधान-
१८ न्तर्य्यं विशेष इति । धर्मब्रह्मविचारयोरुपकार्योपकारकभावं दर्शयति तथा

* पूर्वनिर्वृत्तमिति २, ३ पु० ।

वृत्त्यन्तरे वर्णितमिति । अधिकारः प्रवृत्तिः संस्कारः फलम् प्रवृत्तिपरम्परया फलपरम्परया चेत्यर्थः । अथवा संस्कार इति कर्मभिः पुरुषसंस्कारोभिधीयते । शब्दत इति च तच्च प्रमाणमुच्यते । इत्यधिगतानन्तरम् धर्माधिगत्यनन्तरमित्यर्थः । अस्मिन्नर्थे शास्त्रकारसंवादान्तरमाह अन्यैरपि स्ववृत्तौ वर्णितमि- ५८
त्यादिना । एकफलवत्त्वं तावन्निष्ठतु न तावद् धर्मब्रह्मजिज्ञासयोरुपकार्योपकारकभाव इत्याह न धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्येति । भाष्यं विवृणोति वेदान्ताध्ययनं यदपीत्यादिना । ननु धर्मजिज्ञासायां व्युत्पन्नवेदप्रामाण्यपदपदार्थवाक्यार्थतदपेक्षितन्यायस्यैव ब्रह्म विचारयितुं शक्यत इति चोदयति कथमिति । अनुपकारं दर्शयितुं धर्मजिज्ञासां विभजते तच्च तावद्धर्मजिज्ञासायां चयं वृत्तमिति । किं तदिति तदाह द्वादशलक्षण इत्यादिना । तच्च न्यायसहस्रस्यानुपकारं दर्शयितुं न्यायमपि विभजते तच्च यः प्रथमसूत्र इत्यादिना । अध्ययनविधेर्दृष्टार्थावबोधफलपर्य्यन्ततापेक्षितो न्यायो ऽथशब्दसूचितः प्रथमेन पादेन च यावान्वेदप्रामाण्यापेक्षितो न्यायः स सर्वोपेक्ष्यतां प्रथमस्य पादस्य धर्मब्रह्मजिज्ञासयोः साधारणत्वान्न तदानन्तर्य्यं धर्मजिज्ञासानन्तर्य्यमित्यर्थः । नन्विहापि शास्त्रयोनित्वादत एव च नित्यत्वमित्यादौ वेदप्रामाण्यापेक्षितो न्यायः सूचित एव कुतः प्रथमपादापेक्षेति । सत्यम् अङ्गीकृत्यैतदुक्तमिति न विरोधः । ननु श्रुतिलिङ्गादिप्रमाणानामिहाप्यपेक्ष्यमाणत्वादितरोपि न्यायः पूर्ववृत्ततयापेक्षित इति नेत्याह इतरस्य तु पुनरिति । उत्पत्तिविनियोगप्रयोगाधिकारविधिकार्यापेक्षितो हि न्यायस्तत्र प्रतिपादितः नचाननुष्ठेयभूतवस्तुप्रतिपादने ऽसावुपयुज्यते । कार्यार्थसाम्येपि प्रत्यध्यायमवान्तरप्रमेयभेदेन न्यायभेदो ऽपेक्ष्यते किमु वक्तव्यमकार्य्यभूतवस्तुप्रमेयभेद इति भावः । श्रुत्यादयस्तु लोकप्रसिद्धा एवोपादीयन्ते । ननु कार्यशेषतया ब्रह्मापि तच्च निर्णीतमिति नेत्याह यतो न निरस्ताशेषेति । अप्रतिज्ञातस्याप्यपेक्षितन्यायो ऽन्यार्थात्वेन दर्शित इति नेत्याह न तत्प्रतिपादनसामर्थ्यं इति । ननु गुणोपसंहारेण विध्यपेक्षितोपि न्याय * उपजीव्य इति तत्राह यत्पुनः प्रथमतन्त्रसिद्ध इति । ननु सगुणविद्यापि ज्ञानमेवेत्यत आह तच्च मानसी क्रियेति । तदेवमित्युपसंहारः । ५९

* उपजीव्यत इति ३ पु० ।

मा भूदुर्मजिज्ञासानन्तर्य्यमथशब्दार्थः वेदप्रामाण्यविचारानन्तर्य्यं स्या-
११ दिति इत्याह यत्पुनः स्वाध्यायस्यार्थावबोधोपयोग इति । नच वेदाः प्रमाण-
मित्येतावता ब्रह्मविचारे ऽनेकायासबहुले कश्चित्प्रवर्त्तत इत्यर्थः । तर्हि धर्म-
निर्णयज्ञानं ब्रह्मजिज्ञासाधिकारहेतुरिति नेत्याह * यः पुनरिति । उपयुज्यमानो
धर्मनिर्णयो ब्रह्मविचारप्रवृत्त्युपयोगी स्यात् किं वा ब्रह्मनिर्णयोपयोगीति वक्त-
व्यम् । न तावत्प्रथमः कल्प इत्याह न ह्यन्यविषयं ज्ञानमिति । नापि द्वितीय
इत्याह तदपीह नास्तीति । कार्यकारणसंबन्धे प्रपञ्चेनापि ब्रह्मानुमानान्न धर्म-
निर्णयापत्तेति भावः । परिशेषपरिशेषात्कर्मणामुपयोग इत्याह अतः कर्मणामु-
पयोगः परिशेष्यत इति । तदपि न सम्भवति केषु चित्पत्स्येष्यति भावः । तथा-
धिकारपरम्परा ब्रह्मज्ञानोपकारश्च न सम्भवतीत्याह केयमधिकारपरम्परेति ।
नन्वनुष्ठानपरम्परेयम् तथाहि । संध्योपासनमारभ्य पूर्वपूर्वोऽन्यूनतरकर्मग्रहणो-
नोनरोत्तरमहत्तरकर्मोपादानात्सहस्रसंवत्सरे निरतिशये कर्मण्यवसितः परिशे-
षाद् ब्रह्मज्ञाने ऽवतरतीति नेत्याह यथा तावत्प्रासादमारुरुक्षोरिति । उत्तरक-
र्मोपादानात्पूर्वकर्मपरित्यागे परिशेषाद् ब्रह्मज्ञानावतारे च प्रामाणाभावादिति ।
तर्हि परम्परया कृत्स्नकर्मफलावाप्तौ तच्च कामनाभावान्निवृत्तकामः परमानन्द-
कामनया तथावतरतीत्याशङ्क्याह अथ कामोपहतमना इति । तदेव प्रपञ्चयति
तथाच सार्वभौमत्वादीति । अधिकारपरम्परया फलपरम्परयेत्यर्थः । परिह-
रति कर्मानुष्ठानानन्तर्य्यं तर्हि वक्तव्यमिति । कर्मानुष्ठानफलप्राप्त्यनन्तरभावि-
त्वाद् ब्रह्मविचारस्य न मनुष्याधिकारं शास्त्रं स्यादित्यर्थः । किंच कर्मोणयपि
ब्रह्मज्ञानस्यान्यथोपकुर्वन्ति न कामप्रविलयनद्वारेणेत्याह कथं वा कामा-
वाप्तिः कामोपशमहेतुरिति । सत्यमित्यतः प्राक्तनः स्पष्टार्थः । हैरण्यग-
र्भादिभोगानां प्रतिक्षणं क्षीयमाणत्वादनागतभोगनिचयकामनोपपत्तेर्न काम-
विलयनेन ब्रह्मज्ञाने ऽवतार इत्याह सत्यं युक्तम् यदि हैरण्यगर्भो भोग
इति । कुतस्तर्हि सर्वेषां कामविलय इति तदाह अतो विषयस्य † क्षयादिदो-
षदर्शनादिति । तस्मात्सर्वचेत्युपसंहरति । किंच । निखिलविषयाप्तौ कामोपशमः
११ शास्त्रसामर्थ्यादुच्यते किंवाऽन्वयव्यतिरेकसामर्थ्यात् । नाद्य इत्याह नचैवं लक्षण

* यत्पुनर्वाक्यार्थनिर्णय इति ३ पु० । † क्षयादिदर्शनादिति ३ पु० ।

आगम इति । तर्ह्यन्वयव्यतिरेकसामर्थ्यादिति चोदयति ननु कामावाप्ताविति । ६० १
परिहारग्रन्थस्तु स्पष्टार्थः । वैदिकशब्दाः सर्वे संभूय देहात्मत्वादिप्रपञ्चप्रविलयप्रमितिपरा इति तृतीयोधिकारः । स च प्रतीतिविरोधादेव निरस्त इति ।

ननु तर्हि कर्माण्यनुष्ठीयमानानि पुरुषसंस्कारतया ब्रह्मज्ञानकार्याणि अतो धर्मानुष्ठानानन्तरं ब्रह्मजिज्ञासेति चोदयति भवतु तर्हि संस्कारद्वारेणेति । ६० १
ननु सर्वे एते पुण्यलोका भवन्तीति स्वतन्त्रपुरुषार्थसाधनानां कर्मणां कथं संस्कारकर्मतया प्रोक्षणादिवद् गुणकर्मता । स्मृतिसामर्थ्यादिति चेन्न । श्रुतिविरोधात् । ननु संस्कारो नाम गुणाधानं मलापकर्षो वा । तच्च धर्मेण पापमपनुदति योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धय इति चात्मनि मलापकर्षसंस्कारः सिध्यति । विध्यन्यथानुपपत्त्या वाऽऽत्मन्यऽपूर्वगुणाधानं गम्यते अतः श्रुत्यवगतमेव संस्कारकर्मत्वम् इदं मे ऽनेनाङ्गं संस्क्रियत इति च श्रुतेः । नच क्रत्वङ्गद्रव्यसंस्कारतया नित्यकर्मणामितिकर्त्तव्यतोच्यते येन स्वतन्त्रफलविरोधः स्यात् किं तु द्रव्यार्जनविधिवदुपकारमात्रमिति । सत्यम् । पापक्षयापूर्वेलक्षणसंस्कारदभ्युदयफले श्रुत्यवगते न ब्रह्मज्ञानशेषता शक्या ऽवधारयितुम् स्मृतिसामर्थ्यादिति । उच्यते । नित्यनैमित्तिककर्मानुष्ठानैः संस्कृतस्यात्मनो यदि श्रवणमनन*ध्यानाभ्यासादीनि ज्ञानसाधनानि सम्पद्यन्ते तदा संस्कारकर्माणि सहकारिविशेषादात्मज्ञानमवतारयन्ति । यदा तु सहकारिकारणविरहस्तदाभ्युदयफलमिति व्यवस्थोपपत्तेर्न श्रुतिस्मृत्योः परस्परविरोधः । ननु यस्येते अष्टाचत्वारिंशत्संस्कारा इत्यत्र स ब्रह्मणः सायुज्यं सालोक्यं च गच्छतीति सालोक्यलिङ्गाद्विरण्यगर्भावाप्तिः संस्कारकर्मणां फलं गम्यते न परब्रह्मावाप्तिर्य्येन सहकारिसामर्थ्यात्कर्मणां पुरुषसंस्कारद्वारेण मोक्षफलता स्यात् । उच्यते । संस्कारशब्दस्तावद्वृधिव्रीहिसंस्कारवत्स्वतन्त्रफलसाधनाङ्गभूतद्रव्यशेषतां कर्मणां प्रतिपादयति । तच्च सर्वकर्मणां संस्कारतया ऽन्वयात्परिशेषार्थापत्त्या तत्त्वज्ञानशेषतया मोक्षफलता कल्प्यते । ब्रह्मणः सायुज्यं सालोक्यमिति च फलद्वयोपादानात् । तथाहि भगवानाह स्वेस्वे कर्मण्यभिरतः संसिद्धिं लभते नर इत्युपक्रम्य सिद्धिं प्राप्तो यथा ब्रह्म तथाऽऽप्नोति निबोध मे इति चोक्त्वा बुद्ध्या विशुद्धया युक्तो धृत्या ऽऽत्मानं नियम्य

* निदिध्यासनाभ्यासादीनीति ३ पु० ।

च । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमिति च ब्रुवन्नित्यकर्मभिः संस्कृतस्य सिद्धिशब्दाभिधेय-विशुद्धान्तःकरणस्य ध्यानयोगादिसहकारिसम्पन्नो तत्त्वज्ञानजन्मद्वारेण मोक्षं दर्शयति । स्वेस्वे कर्मणीति च नित्यकर्मागयुच्यन्ते संसिद्धिशब्देन चात्मवैमल्यं ब्रह्मज्ञानयोग्यतापत्तिरुच्यते परमसिद्धेरुत्तरत्राभिधानात् योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वा ऽऽत्मशुद्धय इत्युक्तत्वाच्च तथा महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः । ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तत इति च । तस्मात्संस्कारशब्दसामर्थ्यात् स्मृत्यन्तराच्च नित्यकर्माणि मलापकर्षगुणाधानलक्षणपुरुषसंस्कारद्वारेणात्मज्ञानयोग्यतामापाद्य तत्त्वज्ञानजनकतया मोक्षे ज्ञानेन सह समुच्चीयन्ते यथा व्रीहिप्रोक्षणादीनि संस्कारकर्माणि दर्शपूर्णमासस्वरूपोत्पत्तिहेतुतया स्वर्गे समुच्चीयन्त इति ।

ननु प्रोक्षणादिषदेकाधिकारतया गुणकर्मत्वेन नित्यकर्मणां प्राप्ता न ब्रह्मज्ञानस्याविधेयत्वात् आत्मनः * संस्क्रियमाणस्य विधेयकर्मगुणत्वाभावात् । न तर्हि संस्कारकर्मता विहिताङ्गद्रव्यसंस्कारकर्मसु तत्प्रसिद्धेः । न । अविहितभोजनाङ्गदधिसंस्कारप्रसिद्धेः । ननु विध्युद्देशे करणतया विहितानां नित्यकर्मणां मरणतावि[रो]धिनी दध्यादिसंस्कारवदात्मज्ञानेति कर्त्तव्यता प्राप्ता । नैष दोषः । अग्निं चित्वा सौत्रामण्या यजेत वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति सौत्रामणीबृहस्पतिसवयोरन्यच्च करणतया स्वतन्त्रविध्यन्तरविहितयोरग्निचयनवाजपेयाङ्गतयेतिकर्त्तव्यतादर्शनात् । तच्च करणेति † कर्त्तव्यताविधिवाक्यप्रमाणभेदाद् युक्तं सौत्रामण्यादेरुभयथात्वमिति चेत् । सत्यम् । अर्थविरोधाभावे सति नित्यविधिसामर्थ्यात्संस्कारस्मृत्यनुमितश्रुतिसामर्थ्याच्च करणतया संस्कारतया ‡ च स्वतन्त्रफलशेषात्मज्ञानेतिकर्त्तव्यता चेत्युभयथात्वमिहापि कल्प्यताम् । नचान्यार्थद्रव्यसंस्कारमाचत्वादितिकर्त्तव्यता आधाने ऽदर्शनात्संस्कृताग्नेरुद्देशात्वानचानङ्गतेति चेदिहापि संस्कृतं विशुद्धान्तःकरणं विरक्तं विविदिषुमुद्दिश्य ज्ञानसाधनविधानादिविरोधः । प्रत्यक्षेण विशुद्धिं प्रत्यक्प्रवणतां च चित्तस्य कर्मफलमवगच्छन् जन्मान्त-

* संस्कार्यमाणस्येति २ पु० । † करणेतिकर्त्तव्यर्थेति १ पु० ।
‡ चशब्दो नास्ति १ पु० ।

रानुष्ठितं कर्मानुमाय ज्ञानस्यान्तरङ्गसाधनेषु प्रवर्तिष्यत इति । तस्मात्स्वतन्त्रविध्यन्तरविहितद्रव्यार्जनस्य सहकारिकारणसम्पत्तिभेदात् क्रतुभोगयोः शेषत्ववन्नित्यकर्मणामपि सहकारिभेदादात्मज्ञानाभ्युदययोः शेषत्वं न विरुध्यत इति । योपि कश्चित्सर्वसंकरवादी वेदान्तार्थ * सूक्ष्मदूरीकृतविज्ञानो वेदान्तार्थदूषको न संस्कारार्थानि नित्यानि कर्माणीति वक्ति स शास्त्रार्थविभागज्ञानशून्यत्वादुपेक्षणीय इति ।

अथवा । सर्वाण्येव कर्माण्युत्पत्तिविधिविहितानि संयोगभेदेन † जीवनकामनाद्यधिकारविध्यन्तरवद् ब्रह्मानुभवकामो यज्ञादीन्यनुतिष्ठेदित्यधिकारान्तरविधिविधेयानि भविष्यन्तीत्याह यज्ञेन दानेनेत्यादिना । कथम् । आत्मतत्त्वापरोक्षानुभवस्तावदिष्यमाणतया स्वर्गादिवद्भावनासाध्यो ऽवगम्यते पुरुषार्थत्वाच्छाब्दज्ञाने तु संजाते तत्कामनायोगादसंजाते विषयानवगमादेव तच्च कामनाऽयोगाच्छब्दावगते परोक्षज्ञानमिष्यत इति युक्तम् तच्च प्रयत्नान्तरसाध्यमिति पुरस्ताद्दर्शितम् । तच्च यज्ञादीनामिच्छोपसर्जनतया ऽऽख्यातभिहितभावनाकरणतया ऽवगतानां साध्येनैवान्वयाद्यज्ञादीनि ब्रह्मानुभवसाधनान्यवगतानि । ततश्चात्मानुभवकामो यज्ञादीन्यनुतिष्ठेदिति विधिः परिणम्यते । नचेच्छामात्रेण संयोगः तस्या असाध्यमानतावगमात् । नच विविदिषन्तीति वर्त्तमानताविरोधो लेट्परिग्रहेण विधेरेवावगमात् । नच नित्यकाम्याधिकारान्तरविरोधः एकस्य कर्मणो ऽनेकाधिकारविधिसम्बन्धावगमात् । ननु कुण्डपायिनामयने मासमग्निहोत्रं ‡ जुहुतीत्यग्निहोत्रस्य प्रकरणान्तरत्वात् प्रसिद्ध्याग्निहोत्रात्कर्मान्तरत्ववद्विविदिषावाक्यस्य च प्रकरणान्तरत्वान्न प्रसिद्ध्याग्निहोत्रादीनामत्र विनियोगः कल्पयितुं शक्यते । अतः कर्मान्तराण्येवेहोत्पत्त्यधिकाराभ्यां सह विधीयन्ते । नेतदुक्तम् । कुण्डपायिनामयने ऽग्निहोत्रशब्दस्यालौकिकाभिधानत्वा § दाख्यातपरतन्त्रतया तदुक्तार्थमिधायिनः स्वातन्त्र्येण प्रदेशान्तरविहिताग्निहोत्रपरामर्शकत्वानुपपत्तेराख्यातस्य च जुहोतेः सामान्यवाचिनः स्वसन्निहितकारकादिनिरूपितं कर्मान्तरं विहाय व्यवहिताग्निहोत्रपरा ‖ मर्शित्वायोगा-

* सूक्ष्मादूरीकृतेति १ पु० । † जीवनकाम्यादीति १ पु०, जीवनकामादीति ३ पु० ।
‡ जुहोतीति ३ पु० । § आख्यापरतन्त्रेति २ पु० । ‖ परामर्शकत्वायोगादिति ३ पु० ।

त्कर्मान्तरमेव मासगुणविशिष्टं विधीयत इत्युक्तम् । इह त्वध्ययनयज्ञदानतपो-ऽनाशकशब्दानां लौकिकाभिधानतया स्वातन्त्र्यात्प्रदेशान्तरविहिताध्ययनादिपरामर्शोपपत्तेस्तान्येव कर्माणि संयोगभेदेन विधीयन्त इत्युपपद्यते ।

नन्वेवमपि ब्रह्मज्ञानं दृष्टप्रमाणसामर्थ्यजन्यत्वाच्चादृष्टमपेक्षते सति प्रमाणकारणे यज्ञादेरभावात् ज्ञानोदयादर्शनाभावात् । नेतत् । दृष्टकारणकृत्रो ह्यन्वयव्यतिरेकप्रमाणान्तर्भूतत्वात्केवलव्यतिरेकस्य तदपेक्षा युज्यते । इह तु सुखस्य दृष्टकारणसम्पन्नो केवलव्यतिरेकाभावेपि विधानादेवादृष्टसापेक्षत्ववत्सम्यग्ज्ञानेपि विधानादेवादृष्टसापेक्षत्वमुपपद्यते । ननु कर्मणां विज्ञाने विनियोगद्वाराभावाद्विज्ञानफले मोक्षे विनियोगः कल्प्यत इति । उच्यते । यथा यागादिकर्मणां स्वर्गाद्युद्देशेन विहितानां तदुपपत्तये विधिसामर्थ्यादेव मध्यवर्त्यऽपूर्वाणि कल्प्यन्ते एवमिहाप्यन्तःकरणशुद्धिचित्तैकाग्र्यादिद्वारं कल्प्यतामिति । किञ्च । साक्षाच्छ्रुतज्ञानसाधनत्वानुपपत्तौ तत्फलसाधनत्वकल्पनाद्वरं परम्परयापि तत्साधनत्वकल्पनम् । करणविभक्तेः काष्ठैः पचतीति परम्परया साधनेपि दर्शनात् फलसाधनत्वेपि तद्योगात् । नचास्मिन्वाक्ये यज्ञादिसाध्यो मोक्षः श्रूयते । आत्मा तु ज्ञानकर्मतया तत्साध्यो ऽवगम्यते न यज्ञादिसाध्यः । किञ्च । प्रमाणान्तरविरोधं परिहृत्यैव श्रुतपरित्यागेनाश्रुतकल्पना युक्ता । अस्ति च न्याय्यः पन्था * विद्यते न कर्मणा न प्रजयेत्यादिना कर्मणां मोक्षसाधनत्वनिषेधः । किञ्च । परम्परया साधनत्वकल्पना प्रमाणान्तरमप्यनुसरतीत्याह येन केनचन यजेतेत्यादि । अन्तःकरणशुद्धिपरवाक्यजातौ † फलक्षणार्थः ।

ननु विशुद्धिद्वारेण ज्ञानहेतुत्वे संस्कारविविदिषाफलयोः को ‡ विवेकः । उच्यते । श्रवणमननध्यानाभ्यासादिसहकारि § कारणसम्पन्नावेव संस्कारो विज्ञानं साधयति तदभावे सत्यभ्युदयमेव । विविदिषायां तु विज्ञानस्य कर्मफलत्वात्फलपर्य्यन्तं साधनानि सम्पाद्यापि विज्ञानं जनयन्तीति विशेषः । अत्र कश्चिद्वेदान्तेपि सर्वसंकरत्वादौ भेदाभेदमुग्धरत्नाजडवचनो विविदिषावाक्यादेव कर्मणां मोक्षसाधनत्वं कल्पयति । स च न्यायागमाभिज्ञानशून्य-

* विद्यते अनायेति ३ पु० । † उपलक्षणार्थमिति २ पु० ।
‡ को भेद इति १, ३ पु० । § कारणेति नास्ति २ पु० ।

त्वादुपेक्ष्यत इति । अश्वेन जिगमिषतीत्यश्वस्य पुनरावृत्तिपर्य्यन्तताऽपि क्वचिद् दृष्टेति नासौ कर्मणां मोक्षसाधनत्वे दृष्टान्तः । न्यायागमाभ्यां तु ज्ञानमेव सद्वारं साध्यमित्युक्तम् व्यवहितफलेषु कर्मसु न फलपर्य्यन्तमनुष्ठान-प्राप्तिश्चित्तस्य प्रत्यक्प्रणवताद्वारफलमवगम्योपरमसिद्धेरित्येवं वर्णिते पूर्ववादिना सिद्धान्तयति सत्यमेवम् यदि समानजन्मानुष्ठितमेवेति । अयमाशयः । ६१
प्रवृत्तिपर्य्यन्तेच्छोदयप्रभृत्यनुभवपर्य्यन्तविषये प्रवृत्त्यधिकारोपाधितया पूर्ववर्णो प्रतिपत्तव्याधिकारिविशेषणप्रतिपादनार्थोऽयमथशब्दः । तच्चाज्ञाततयैवानेक-जन्मव्यवहितफलहेतुषु कर्मसु फलप्रवृत्तिसमकालप्रतिपत्त्य * नपेक्षेषु न तत्प्र-तिपत्त्यर्थोप्यथशब्द इति । ननु समानजन्मानुष्ठितकर्मावगमेपि ब्रह्मजिज्ञा-साधिकारहेतुर्भवति एतज्जन्मप्रयुक्तत्वादृणसम्बन्धस्य अपाकृतर्णोचयस्यैव च मो-क्षाधिकारादिति तच्चाह एतेन ऋणापाकरणद्वारेणापीति । ननु ऋणानि चीर्ण्य-पाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यध इति स्मर्य्यते । सत्यम् । श्रुतिविरोधादपस्मृतिरित्याह तथाच श्रुतिस्मृती यदि ,,
वेतरथा ब्रह्मचर्यादेवेति । ननु † जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायत इति श्रुतिरस्ति । सत्यम् । अर्थवादो विधिश्रुतिविरोधे बाध्यते । किञ्च । ऋणशब्देन पुत्रयज्ञब्रह्मचर्य्याण्येवोच्यन्ते किं वा तद्विधय इति । न तावज्जा-यमानस्य पुत्रादिसम्बन्धो युज्यते योग्यानुपलब्धिविरोधात् । नापि तद्विधिस-म्बन्धः । विधिप्रतिपत्तिसामर्थ्यविकलस्याधिकाराभावात्सामर्थ्यस्य चाधिका-रिविशेषणत्वात् । गृहस्थो जायमानस्त्रिभिर्ऋणवा जायत इति चेन्न । तथा-कल्पनायां गृहात् प्रव्रजेदितिविधिविरोधात् । तत्रापि च पुत्रादिजन्मस-म्बन्धितया गृहस्थजन्मनि योग्यानुपलब्धिविरोधः समानः । नच पुत्रादि-विध्यनुष्ठानसामर्थ्याभावाद् गृहस्थजन्मसमये तद्विधिसम्बन्धो युज्यते । जन्मा-रभ्य पुत्राद्यधिकारसम्पत्तेः प्राग्विरोधिविध्यन्तरसम्बन्धपरिहारार्थमिदं वच-नमिति चेन्न । तथाकल्पनायां संन्यासविध्यन्तरविरोधात् । तस्मादर्थवा-दमाचमेतत् ।

ननु ब्रह्मचर्य्यं समाप्य गृही भवेदितिविधिविरोधे कथं ब्रह्मच-र्य्यादेव संन्यासो विधीयते । न । विरक्तमुमुक्षुविषयत्वात्संन्यासस्य सामान्य-

* अनपेक्ष्येष्विति २ पु० । † जायमानो ह वै ब्राह्मण इत्यपि ग्रन्थान्तरेषूपलभ्यते पाठः ।

विधिविरोधाभावात् । ननु कर्मानधिकृतान्धपङ्ग्वादिविषयः संन्यासः किं न स्यात् । न । ब्रह्मचर्य्याद् गृहाद्वनाद्वा प्रव्रजेदित्यविशेषश्रवणात् । अथ पुनरव्रती वा व्रती वा अस्नातको वा स्नातको वोत्सन्नाग्निरनग्निको वेत्यनधिकारिणामाश्रमिभ्यः पृथगेव संन्यासाधिकारित्वेनोपादानात् अन्धादीनामपि पुत्रपशुमहायज्ञादिकर्माधिकारादनधिकृतत्वासिद्धेः । अन्धादीनामप्यविरक्तानां संन्यासानधिकारात् । तदेव संन्यासनिमित्तम् । शरीरं मे * विचर्षणं जिह्वा मे मधुमत्तमा कर्णाभ्यां भूरि † विश्रुवम् अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमित्यादिनात्मज्ञानाय शरीरेन्द्रियादिपाटवस्य प्रार्थ्यमानत्वात् आत्मज्ञानशेषत्वाच्च संन्यासस्य दृष्टिपूतं न्यसेत्पादमित्यादिस्मृतेश्च पटुतरेन्द्रियस्यैव संन्यासाधिकारः । सर्वेषात्मज्ञानप्रकरणे संन्यासस्य विहितत्वाच्छ्रवणाद्यङ्गतयात्मज्ञानफलतया च संन्यासस्य सिद्धा । कथं पुनः कर्मणां तत्त्यागस्य चात्मज्ञानफलतया शक्या ऽवधारयितुम् । घोडशिग्रहणाग्रहणयोरिव क्रत्वङ्गतेति ब्रूमः । क्रमेण वा कर्मतत्त्यागयोरात्मज्ञानोपकारितया समुच्चयः कल्प्यते । द्वारोपकारभेदात् ‡ निबर्हणीयकर्मशेषस्यावानन्तर्यात् । ब्रह्मचर्यविषयतया वा व्यवस्था कल्प्यते ॥

कियत्पुनरत्र परित्यज्यते स्वशरीरव्यतिरिक्तं सर्वम् । ननूपवीतादि न त्यागमर्हति । न । अग्निहोत्रादिभिरविशेषात् । ननु संन्यासक्रत्वङ्गतया सर्वपरित्यागेष्युपवीतादि पश्चादुपादीयताम् । न । जाबालश्रुतौ प्रव्रजेदिति अग्निहोत्रादिभिरविशेषात्सहोपवीतादिना कृत्स्नपरित्यागं विधाया ऽथ परिव्राड् विवर्णवासा § मुण्डो ऽपरिग्रह इत्याश्रमधर्मविधिसमये ऽयज्ञोपवीती कथं ब्राह्मण इति प्रश्नपूर्वकमिदमेवास्य तदाज्ञोपवीतं य आत्मेत्येवकारेण बाह्ययज्ञोपवीतादि व्यावर्त्य आत्मन एव यज्ञोपवीतत्वसम्पादनात् ।

अत्र सर्वसङ्करवादी पुरस्तादज्ञोपवीतत्यागस्या ऽनिर्दिष्टत्वात् ब्राह्मणः कथमयज्ञोपवीतीतिप्रश्नस्य प्रसङ्गाभावात्प्रक्षिप्तमिदं वाक्यमिति जल्पति । तस्य तत्त्वदर्शनसन्निपुरमहंसपरिव्राजकद्वेष एवापराध्यते । पुरस्ताद्विधिसामर्थ्यलब्धसर्वपरित्यागेनोपवीतादित्यागप्रसङ्गापरिज्ञानस्य स्वाभाविकत्वात् । तथा

* विचक्षणमिति ३ पु० । † विश्रुतमिति २ पु० ।
‡ निबर्हणीयेति १, ३ पु० । § मुण्डोऽपरिग्रह—इत्येव पूर्वरूपपाठः १ पु० ।

च अथ परिव्राडेकशाटीपरिहितो * मुण्डो दरपात्र्यरण्यनित्यो भिक्षार्थी ग्रामं प्रविशेदा ऽऽसायं प्रदक्षिणेनाविचिकित्सं सार्ववर्णिकं भैक्ष्यचर्य्यमभिशस्तपतितवर्जमयज्ञोपवीती शौचनिष्ठः काममेकं वेणवं दण्डमादद्दीतेति परिव्राजकमेवोद्दिश्य † मैत्रायणी श्रुतिः । तथा च बोधायनोपि अत ऊर्ध्वं यज्ञोपवीतमासनं शिखा यष्टयः ‡ शिक्यं जलपवित्रं कमण्डलुपात्रमित्येतानि वर्जयित्वा ऽथ दण्डमादत्ते सखा मा गोपायेति संन्यासादूर्ध्वमेव दर्शयति । तस्माद्युक्तमेवात्मज्ञानाङ्गभूतः § संन्यासः । तस्मात्साधूक्तमिति भाष्योपसंहारः ॥ ६१

ननु नानन्तर्य्याभिधानमुखेनाधिकारिविशेषणप्रतिपत्त्यर्थो ऽयमथशब्दः किं तु तदभिधानमुखेन क्रमप्रतिपत्त्यर्थ इति चोदयति अथापि स्यान्न हेतुत्वेनेति । तत्र वक्तव्यं स्वयमेव क्रमं प्रतिपादयति आहोस्वित्प्रमाणान्तरप्रतिपन्नक्रमापेक्षितन्यायं सूचयतीति । न तावत्प्रथमः कल्प इत्याह तदेतदयुक्तम् न्यायसूत्र इति । आगमाभावादित्यर्थः । द्वितीये विकल्पे धर्मब्रह्मजिज्ञासयोः क्रमापेक्षानिमित्तस्यैकविधिप्रयुक्तत्वनुष्ठानत्वस्याभावान्न तदर्थ इत्याह अपि चैककर्तृकाणामित्यादि । उक्तार्थं भाष्यमवतारयति तदिदमाहेति । अत्र कश्चिद्धर्मब्रह्मजिज्ञासयोरिति विशेषोपादानमवगच्छन्नपि ज्योतिष्टोमोद्गीथज्ञानयोरधिकृताधिकारत्वं खलु विदत्त इति प्रतिवक्ति स खलु मन्दभाग्य एव । उद्गीथाद्युपासनानां धर्मविशेषाणामेव निरूपितविधिचतुष्टयानां ब्रह्मप्रकरणे प्रत्ययत्वसाम्यात्प्रासङ्गिकत्वेन भेदादिमात्रस्येव निरूपितत्वाच्छास्त्रतात्पर्य्यावगम्यस्य ब्रह्मज्ञानस्य कर्मण्यधिकृताधिकारित्वाभावात् । ननु मा भूदेकविधिप्रयुक्तत्वनुष्ठेयतया ऽऽप्तिक्रमविशेषापेक्षितन्यायानुसरणपरो ऽथशब्दः किंत्वेकफलप्रयुक्तत्वनुष्ठेयतयैकप्रमेयजिज्ञास्यप्रयुक्तत्वनुष्ठेयतया वा साधनद्वये कर्मब्रह्मक्रमस्याक्षेप इत्युत्तरभाष्यस्याशङ्कामाह यथाग्नेयादीनामित्यादिना । चोदनाप्रवृत्तिभेदाच्चेत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । अयमत्राशयः । न धर्मब्रह्मज्ञानयोरेकफलत्वे प्रमाणमस्ति । अर्थापि न युज्यते । कथम् । न तावद्विविदिषावाक्यस्य शब्दसामर्थ्यन्यायपरीक्षायां समुच्चये प्रामाण्यमित्युक्तम् । नच विद्यां ६२

* मुण्डो दरपात्रारण्यनिष्ठ इत्यस्य स्थाने मुण्डो दरपात्र्यरण्यनिष्ठ इति शोधितम् ३ पु· ।

† मैत्रायणश्रुतिरिति ३ पु· । ‡ शिक्यजलेति १, २ पु· । § संन्यस्तइति १, २ पु· ।

|| एकविधिप्रयुक्तानुष्ठेयतयेति ३ पु· ।

चाविद्यां च यस्तद्वेदोभयं सहेति समुच्चयविधिः । अविद्यया मृत्युं तीर्त्वा विद्यया ऽमृतमश्नुत इति फलभेदागमात् । नापि तेनेति ब्रह्मवित्पुण्यकृच्चेति ज्ञानकर्मणोरेकस्मिन् पुरुषे समुच्चयविधिः । ब्रह्मवित्पुण्यकृतोः पुरुषयोर्मार्गे समुच्चयावगमात् । अन्वाचयार्थेन च चकारेण प्रत्येकं निरपेक्षमार्गान्वयोपपत्तेः । पुण्यकृच्छब्देन * चाऽऽमानवपुरुषादर्चिरादिना गच्छतां प्रतीकालम्बनानामऽभिधानादिष्टादिकारिणां धूमादिमार्गश्रवणाच्च । नच तान्याचरथ नियतं सत्यकामा इति समुच्चयविधिरवगम्यते । केवलकर्मणामेव श्रवणात्सत्यशब्देन चैष वः पुण्यः सुकृतो ब्रह्मलोक इति वाक्यशेषात्सत्यलोकाभिधानात् प्रवा ह्येते अदृढा यज्ञरूपा नास्त्यकृतः कृतेनेति च कर्मनिन्दया तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति च विज्ञानविधानात् । सत्येन लभ्यः तपसा ह्येष आत्मेति न समुच्चयविधिः । तपःशब्दस्य मनसश्चेन्द्रियाणां चैकाग्र्यं परमं तप इति ध्यानस्यैवाभिधानात् । तस्मान्न समुच्चये प्रमाणमस्ति ॥ प्रतिषेधाच्च नान्यः पन्था विद्यते ऽयनाय नास्त्यऽकृतः कृतेन न कर्मणा न प्रजया धनेन नान्येर्दवैस्तपसा कर्मणा वा | हित्वा ऽविद्यां यियेवेयान्तद्विष्णोः परमं पदमिति च । केवलकर्मणां प्रतिषेध इति चेन्न अविशेषात् । समुच्चयविधायिप्रमाणाभावे सर्वकर्मणां प्रतिषेधोपपत्तेश्च । ज्ञानाङ्गतया ‡ सर्वकर्मसंन्यासविधानाच्च न समुच्चयः । संन्यासाश्रमधर्मे समुच्चय इति चेन्न । तद्धर्मणां ध्यानादीनां ज्ञानस्वरूपोपकारित्वात् । नित्यकर्मविधानानुपपत्तिरेव ज्ञानसहकारितया कर्मणां मोक्षफलत्वं कल्पयतीति चेन्न § नित्यकर्मणां फलनिरपेक्षत्वात् । सापेक्षत्वे च विश्वजिन्न्यायावतारात्संस्कारद्वारेण च विनियोगस्य दर्शितत्वात्कर्मणामेव च विद्वदनुपपत्त्या मोक्षसाधनत्वकल्पनात्समुच्चयासिद्धेः । ‖ कर्मप्रतिषेधस्योदितहोमप्रतिषेधवज्ज्ञानस्तुत्यर्थत्वोपपत्तेर्ज्ञानकर्मणोर्विकल्पेन मोक्षसाधनत्वप्रसङ्गात् । ब्रह्मज्ञानमेवेतिकर्तव्यतया कर्मणां मोक्षसाधनत्वं कल्पयतीति चेन्न । शमादीतिकर्तव्यतान्तरभावात्करणतया विद्वदुद्देशप्रसिद्धानां च कर्मणां विधिविरोधात् ॥ अर्थश्च वि-

* वामानवेति १ पु० । † हत्वेति १. २ पु० ।
‡ सर्वकर्मतयासंन्यासेति १, २ पु० । § नित्यकर्मणामिति नास्ति १ पु० ।
‖ ज्ञानस्यापि कदाचिन्मोक्षसाधनत्वादिति अधिकमस्ति २ पु० ।

रुध्यते । कश्च कर्मणां साध्योऽर्थ इति वक्तव्यम् । न तावद् ब्रह्मात्मैकत्वं तस्यासाध्यत्वात् । नाप्यविद्याभेदांशाध्यासकर्मणां निवृत्तिः भिद्यते हृदयग्रन्थिर्ब्रह्म वेद ब्रह्मैव भवतीत्यादौ ब्रह्मदर्शननिवर्त्यत्वावगमात् । नहि तस्मिन् दृष्ट इत्युक्ते कर्माणि सहकारित्वेनावगम्यन्ते । नाप्युपाधिद्वयनिवृत्तिः कर्मणां फलम् । तथा विद्वान्नामरूपाद्विमुक्त एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्या*स्तं गच्छन्तीति च ब्रह्मदर्शननिवर्त्यत्वावगमात् अज्ञानमात्रोपादानत्वस्य दर्शितत्वाच्च कर्मोपाधीनाम् । किञ्च । समुच्चयवादिनो न विज्ञान † साध्यमपि फलमस्ति । कर्मोपाधीनां सत्यवस्तुतया विज्ञानाऽनिवर्त्यत्वान्मिथ्याध्यासस्य च क्षणिकतया स्वयमेव निवृत्तेः । प्रवाहस्य च प्रवाहिनिवृत्तिमन्तरेण पृथगुच्छेदाभावादवस्तुत्वाच्च । मिथ्याज्ञानसंस्कारस्य शुक्तिकादितत्त्वज्ञानेनाविरोधदर्शनादनिवर्त्यत्वात् । ब्रह्मात्मभावस्य च स्वयंप्रकाशतया विज्ञानाप्रकाश्यत्वात् । तत्त्वज्ञानाभ्याससंस्काराच्च मिथ्याज्ञानसंस्कारनिवृत्तौ तत्त्वज्ञानान्मुक्तिश्रुतिविरोधात् । तस्मात्सर्वानर्थोपादानानादिमिथ्याज्ञाननिवृत्त्येव विज्ञानं फलवदिति न समुच्चयावकाशः ॥

अत्र सर्वसङ्करवादी ब्रह्मविचाराऽपेक्षिताधिकारमप्यजानन्समुच्चयसामर्थ्यादेव धर्मावबोधानन्तरं ब्रह्मावबोधं जल्पति । तच्च सति वा समुच्चये विपरीतं किं न स्यादिति निरूपणीयम् । तथाहि । ज्ञानवतैवानुष्ठितानि कर्माणि मोक्षं साधयन्तीति प्रथमं ब्रह्मावबोधमुत्पाद्य ‡ तद्वतैव ब्रह्मचारिणा धर्मविचारादि सर्वं स्वाश्रमधर्मानुष्ठानं कर्तुं युक्तमिति विपरीत एव क्रमः स्यात् । अन्यथा ह्यादावेव मुमुक्षोराधर्मविचारपरिसमाप्तेरनुष्ठीयमानकर्मणामानर्थक्यप्रसङ्गात् । दृश्यन्ते च प्रथमाश्रम एव मुमुक्षवः । सर्वसाधारणत्वाद्धर्मविचार एव प्रथमः कर्तव्य इति चेत् । देवानांप्रिय § न सर्वसाधारणं कर्तुमयं प्रवृत्तः किन्तु काम्यमान ‖ साधनमवश्यानुष्ठेयं वा निर्वर्तयितुं प्रवृत्तः । तच्च यदि विचारद्वयं काम्यमानमोक्षसाधनमिष्येत तर्हि व्युत्क्रम एव श्रेयानित्युक्तम् । अथ नित्याध्ययनविधिः कर्मविचारं प्रयोजयति अतो ऽवश्यानुष्ठेयविचारान-

* अस्तं यान्तीति ३ पु० । † साध्यं फलमिति ३ पु० । ‡ तेनैव ब्रह्मेति ३ पु० ।
§ न सर्वसाधारणेति पाठे न यान सर्वसाधारणेति पश्चात्कृतं १ पु० ? ।
‖ साधनमिति नास्ति १, २ पु० ।

न्तरं काम्यमानब्रह्मविचारः प्रयुज्यत इति चेत् । नैतत्सारम् । काम्यमान-ब्रह्मविचारानन्तरमपि नित्यकर्मविचारोपपत्तेः । नन्वध्ययनानन्तरं कर्मविचाराननुष्ठेयप्रत्यवायः स्यात् । सत्यम् । नित्यवदल्पानुष्ठानेपि प्रत्यवायपरिहारात् । किंच । तावन्मात्रमुपेयतां विदुषानुष्ठीयमानब्रह्मचारिधर्माणामपि मोक्षसाधनत्वलाभात् । वेदानुवचनादिषु प्रत्येकं निरपेक्षकरणविभक्तिश्रवणात् । आश्रमकर्मणां विकल्पेन मोक्षसाधनत्वोपपत्तेः । ब्रह्मचर्यादेव संन्यासविधानाच्च । धर्मावबोधो नित्यतया ऽनुष्ठितोपि न ब्रह्मविचारहेतुरननुष्ठेयश्च धर्मविचारो ऽग्निहोत्रादिव्यतिरिक्तसंन्यासधर्माणामपि ज्ञाने समुच्चयाङ्गीकरणात् । किंच । अध्ययनविधिः कर्मविचारं प्रयुञ्जानो ब्रह्मविचारं किमिति न प्रयुङ्क्त इति वक्तव्यम् । श्रोतव्य इति विध्यन्तरश्रवणादिति चेत् । अयुतसीमांसावृत्तान्तो देवानांप्रियः धर्मविचारे * कृप्रप्रवर्तकभावेनानेनैवाध्ययनविधिना ब्रह्मविचारस्यापि प्रयोगसम्भवे श्रोतव्य इति विधे । विनियोगाधिकारप्रयोगविधिकल्पनया † प्रवर्तकत्वकल्पनायोगात् । ब्रह्मज्ञानस्य काम्यमानसाधनतया तद्विचारस्यापि काम्यत्वान्न नित्याध्ययनविधिप्रयुक्ततेति चेत् । कर्मविचारे काम्यमानकर्मवाक्यविचारस्याप्यसत्प्रयुक्तत्वप्रसङ्गः ।

स्यादेतत् । ब्रह्मविचारस्य वैराग्यशमदमोपसदनादिसाधनविशेषाणामङ्गत्वेन विधानादध्ययनविधेः कर्मविचारे शमाद्यङ्गशून्यस्य ब्रह्मविचारे तदङ्गानामाक्षेपकत्वानुपपत्तेः साङ्गविध्यन्तरं कल्प्यत इति । सोऽयमऽनुरूपितविधिव्यापारो बाबदूकः । स्वाध्यायविधिः खलु शिरोव्रतभूभोजनाद्यङ्गविकलमेव वाक्यान्तराध्ययनं विदधानो मुण्डकुकारीर्यादाध्ययनं शिरोव्रताद्यङ्गाक्षेपपुरःसरमेव विदधाति । विचारं च प्रयुञ्जानः प्रतिषाक्यं दृष्टतयैवाङ्गभूतान् न्यायभेदानाक्षिप्येव विचारं प्रयुङ्क्ते । दर्शपूर्णमासविधिश्च नित्याधिकारो यथागत्यङ्गानुष्ठानं प्रयुङ्क्ते काम्याधिकारस्तु सर्वाङ्गानुष्ठानमिति । तथा स एव विधिरुपांशुयाजे कर्मणयाज्याक्षेपणाद्यङ्गमाक्षिपति यागान्तरेष्वघातादाद्यङ्गमिति । एवमध्ययनविधिर्ब्रह्मविचारे शमाद्यङ्गमाक्षिपेन्नेतरचेति

* कृप्तप्रवर्तकभावेनैवाध्ययनेति १ पु०, कृप्तप्रवर्तकभावेन तेनैवेति ३ पु० ।

† विनियोगाधिकारविनियोगकल्पनयेति २ पु० ।

न विरुध्यते । नचाऽधिकारिविशेषणतया शमादीनामनुपादेयत्वादनाक्षेपो ऽध्ययनविध्यधिकारिण एव तत्प्रयुक्तविचारे ऽप्यधिकारित्वात् । तस्मात्प्रधानविधिर्दृष्टादृष्टाङ्गानामुपकारविशेषापेक्षया यच्च क्वचन यत्किञ्चिदङ्गं प्रयोजयतीति सर्वत्र समधिगतमेतत् । तस्मादेकाध्ययनविधिप्रयुक्तत्वाद्विचारद्वयस्य क्रमापेक्षायां ब्रह्मविचारानन्तरं धर्मविचारो युक्तः । विचारादीनामपि मोक्षसाधनत्वलाभात् । तस्मान्न फलैक्यादपि धर्मजिज्ञासानन्तरं ब्रह्मजिज्ञासेति ॥

प्रतिवाक्यं च तात्पर्य्यभेदात्प्रमेयभेदसिद्धिः । तत्र हेत्वन्तरमाह चोदनाप्रवृत्तिभेदादिति । एतद्विवृणोतीदमपरमित्यादिना । चोदनेति शब्दभावनां कुर्वञ्छब्दोऽभिधीयते । सा च चोदनांशत्रयविशिष्टामर्थभावनां कुर्वती तस्मिन्ननवबुद्धे पुरुषप्रवृत्त्ययोगादर्थभावनामपि प्रतिपादयतीति भावः । ननु ब्रह्मावबोधे भाव्ये पुरुषं प्रेरयन्ती चोदना ऽवबोधावृत्तव्यां भावनां प्रतिपादयतीति नेत्याह नावबोधे पुरुषः प्रेर्य्यत इति । नन्ववबोधः पुरुषप्रयत्नसाध्य इति नेत्याह अवबोधो हि यथावस्त्विति । अनिच्छतो ऽप्रयतमानस्यापि दुर्गन्धादिज्ञानदर्शनादित्यर्थः । ६२

उच्यते नित्यानित्यवस्तुविवेक इत्यतः प्राक्तनो ग्रन्थः स्वप्रार्थः । शास्त्रीयस्य विधेः शास्त्रीयमेवाधिकारनिमित्तं वक्तव्यमित्यभिप्रेत्याह नित्यानित्यवस्तुविवेक इत्यादि । सो ऽन्वेष्टव्य इति विधिप्रकरणे तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति नित्यानित्यवस्तुविवेको दर्शितः । परीक्ष्य लोकान् कर्मचितानाऽऽत्मनस्तु कामाय सर्वं प्रियं भवतीति च ज्ञानश्रवणविधिप्रकरणे इहामुत्रार्थभोगविरागो दर्शितः । शान्तोदान्त इति च दर्शनविधिप्रकरणे शमादयो दर्शिताः । तद्विजिज्ञासस्वेति विचारविधिप्रकरणे वरुणं पितरमुपससारेति गुरूपसदनं दर्शितम् । सर्वत्र च फलश्रुतयः कामनोत्पादनद्वारेण मुमुक्षोरधिकारप्रदर्शनार्थाः । अन्यथा साधनानुष्ठानादेव फलसिद्धौ सङ्कीर्त्तनवैफल्यात् । ज्ञानस्याविधेयत्वात्तद्विधयोपि तत्साधनविधिपराः । तत्र सर्वशाखाप्रत्ययन्यायेन विधीनामेकत्वोपपत्तेः । स चैको विधिरधिकारमीक्षमाणः प्रकरणसामर्थ्यात्सङ्कीर्त्तनवैफल्यपरिहाराच्च वर्णितं धर्मकलापमधिकारनिमित्तत्वेन स्वीकरोति निरधिकारस्य ,,

विधेः प्रवृत्तिपर्यन्तत्वायोगात् । ननु * तेषु वाक्येषु विचारो विधीयते इति कथमवगम्यते । उच्यते । विजिज्ञासितव्यो विजिज्ञासम्येति चान्तर्णीतो विचारो विधीयते इष्यमाणज्ञानस्येच्छायाश्च विधेयत्वायोगात् । श्रोतव्य इति च स्वयमेव विचारो विहितः तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति ज्ञानस्य साध्यतावगमात् । गुरूपसदनविधानाच्च तत्साधनश्रवणादिविधिः कल्प्यते । आत्मन्येवात्मानं पश्येदिति ज्ञानविधानायोगात् । तत्साधने विधिरुपादीयत इति सर्वत्र मननिदिध्यासनाभ्यां सह श्रवणं नामाङ्गि विधीयत इति सिद्धम् ।

ननु फलसाधनविधौ फलकामनैव पुष्कलाधिकारनिमित्तं भवति किमितरधर्मकलापेनेति । सत्यम् । † शास्त्रीयेधिकारनिमित्ते सङ्कीर्तनादेव जीवनगृहदाहादिवदधिकारनिमित्तमिति गम्यते । ननु साधनकलापस्यानुष्ठेयतया तत्र विधिं परिकल्प्य प्रयाजादिवद् ब्रह्मज्ञानफलोपकार्यङ्गत्वमेव कल्प्यताम् । सत्यम् । अङ्गस्यापि ‡ प्रदोषादिकालवदधिकारविशेषणत्वं न विरुध्यते । शान्त्यादिगुणो भूत्वा पश्येदित्यादिलिङ्गात् । दीक्षाया अप्युनरुक्त्वाधिकार-
६२ २१ निमित्ततादर्शनात् । तस्मादुक्तमुक्तम् नित्यानित्यवस्तुविवेक इति । तेषु हि सत्स्वित्युत्तरं भाष्यं साधनकलापस्य ब्रह्मानुभवपर्यन्तविचारादिसाधनप्रवृत्तेरन्वयव्यतिरेकसिद्धदृष्टहेतुतां प्रतिपादयति § तद्भावगीयितुं मुमुक्षुत्वमन्तरेण तावन्न प्रवृत्तिरित्याह उक्तं पुरस्तादधिकारार्थत्व इत्यादिना । तस्मान्मुमुक्षुत्वं तावदिष्यमाणसाधने प्रवृत्तिनिमित्तमित्यर्थः । ननु फलकामनायां सत्यामितरधर्माभावात्फलसाधने प्रवृत्त्यभावो न दृश्यते । सत्यम् पूर्वस्य पूर्वस्योत्तरोत्तरस्वरूपोपाधित्वेन प्रतिपन्नतया मुमुक्षुत्वोपाधित्वादधिकारनिमित्ततेत्याह तस्मादावदस्य हिरण्यगर्भावाप्तिपर्यन्तस्येत्यादिना । ननु सर्व-
६३ २ मनित्यमेव सत्त्वा ‖त्स्वप्नवदिति नेत्याह विनश्यदपीदमिति । नच निरु-

* येषु वाक्येष्विति २ पु० ।

† शास्त्रीय इति० यत्रान्वयव्यतिरेकसिद्धमधिकारनिमित्तमिष्यते, तत्र केवलव्यतिरेकापेक्षा-यत्र च शास्त्रादेवाधिकारनिमित्तावगमस्तत्र न व्यतिरेकोऽर्थ्यते, यथा जीयस्नुहुयाद्बृहदाहवान्यजेतेत्यादौ व्यतिरेकाविधुरस्य जीवनादेरधिकारनिमित्तत्वम्, तद्वदित्यर्थ इति तत्त्व० ।

‡ प्रदोषकालवतः कर्मविधानात्तत्प्रतीत्या कर्मकरणाच्चाङ्गस्यापि कालस्याधिकारविशेषणत्वं यथा, तद्वदत्राप्यङ्गत्वमधिकारविशेषणत्वं चाविरुद्धमित्यर्थ इति तत्त्व० ।

§ तद्गुणीयितुमिति ३ पु० । ‖ स्वप्नवदित्यस्य स्थाने घटादिवदिति वर्त्तते ३ पु० ।

पादानं किञ्चित्कार्य्यमवगम्यते । कार्यस्य च कार्यान्तरोपादानत्वे पूर्वेषां कृत्स्नकारणानामुत्तरस्मिन् कार्येऽन्वयः स्यादनन्वयिनो ऽनुपादानत्वात् । अतः प्रतिकार्य्यप्रवाहमनादित्वादनाद्यनेकोपादानकल्पनाद्वरमेकस्यैवानादेः सर्वकार्योपादानत्वकल्पनम् । तच्चाविकारि कूटस्थम् अन्यथा कार्यत्वप्रसङ्गात् । तथा सर्वं कार्यं कदाचित्कात्स्न्र्येन विनश्यति एकोपादानत्वात्सुषुप्तावात्मगतसुखादिवदिति सर्वस्य च विनाशस्तथाविधवस्तुपर्य्यन्त एव । अन्यथा पूर्वकल्पस्य शून्यतापर्य्यन्तं विनष्टस्य स्वोपादानशेषतया स्वसंस्कारावस्थानाभावात् तत्सजातीयाकारेण पुनर्जन्माभाववद्वर्त्तमानस्यापि निरुपादानतया जन्माभावप्रसङ्गादिति । भोगान् भुञ्जानस्य भोक्तुः सह भोगैरभिमुखविनाशदर्शनादिति योजना । अत्रैवमऽन्वयः । यावदनित्यत्वं नावैति तावन्नित्यं वस्तु न प्रतिपद्यत इत्यध्याहारः । यावच्च नित्यानित्यवस्तुविवेको न जायते तावद्विरक्तो न जायत इत्यध्याहारः । यावच्चाभिमुखविनाश इत्यत्र यावच्छब्दो नकारमध्याहृत्य विरक्तशब्देन संबध्यते यावच्च न विरक्त इति । तावन्मुमुक्षुत्वं नालम्बते इत्यध्याहारः । यावच्च मुमुक्षुत्वं नालम्बते तावद् ब्रह्मजिज्ञासां कः * प्रतिपद्येतेति साधनकलापाभावे न विचारप्रवृत्तिरिति व्यतिरेको ऽयं दर्शितः । ननु नास्ति व्यतिरेकः साधनकलापाभावेपि प्रवृत्तिदर्शनादित्याशङ्क्याह कथंचिद्वा दैववशादिति । शूद्रयागादिवत्फलपर्यन्तता न ६३
स्यादित्यर्थः । व्यतिरेकनियमादेवान्वयमपि सिद्धवत्करोतीत्याह तस्माद्वर्णितवस्तुकलापानन्तर्य्यमिति । उक्तार्थं भाष्यमवतारयति तदाह भाष्यकार इति ।

तदेवं साधनकलापस्य विधेयतया विज्ञानाङ्गत्वेपि शास्त्रयुक्तिभ्यामधिकारिविशेषणत्वलाभाद्वर्णितसाधनसंपत्त्यनन्तरं ब्रह्मविचारे सिद्धेपि कश्चित्प्रमाणव्यापारवार्त्तानभिज्ञो देवानांप्रियः शास्त्रार्थप्रद्वेषदोषदूष्यमानचेताः सर्वसंकरवादी यत्किञ्चिदत्र जल्पति विचारकर्त्तव्यतां प्रतिपद्यमानस्य किल सूचकारस्य शमादयो न बुद्धिसमारूढाः । नचाबुद्धिसमारूढमर्थमधिकारिविशेषणतया ऽथशब्देनोपादातुमर्हति । धर्मविचारस्तु बुद्धिगतो ऽधिकारिविशेषणतयोपादीयत इति । नेतदुक्तम् । नहि पूर्वापरवाक्यपरामर्शप्रज्ञाविकल-

* प्रतिपद्यत इति-इति ३ पु० ।

स्त्वमिव सूचकारः । तथाहि । श्रौतं विचारविधिं सूचयितुं प्रतिपद्यमाने विधिप्रयुक्तमधिकार्यनुबन्धमीक्षमाणः स्वप्रकरणपठितमन्वयव्यतिरेकप्रमाणगम्यं चाधिकारिविशेषणं प्रतिपद्याथशब्देन किमिति न सूचयेत् । किंच । साधनकलापस्याथशब्दोपादानत्वाभावेप्यवश्यं ब्रह्मणि प्रवृत्यङ्गता तावदुक्तव्या रागाद्यात्तिप्रस्य तच्च प्रवृत्त्यनुपपत्तेः । अवश्यापेक्षणीयत्वे च तदेवाधिकारिविशेषणं वक्तव्यम् । न च धर्मजिज्ञासा दृष्टद्वारेण वा शास्त्रीयतया वा ऽधिकारिविशेषणतामनुगच्छति प्रमाणाभावात् । अत एव न बुद्धिस्थापि सा ऽथशब्देन च नोपादानमर्हति । व्यवहिताच्च बुद्धिस्थात्स्ववाक्यगतमेव संनिहिततरं बुद्धिस्थं च साधनचतुष्टयमुपादानमर्हति । तस्माद्यत्किंचिदेतदिति ॥

६२ १५ अतःशब्दो हेत्वर्थः । नन्वथशब्द एवानन्तर्याभिधानमुखेन हेतुतया पूर्वनिर्वृत्तमेवार्थं गमयतीत्युक्तम् । ननु हेतुत्वमार्थिकम् तन्नाभिधेयमऽथशब्दस्य । सत्यम् आर्थिकार्थे तात्पर्यात् आनन्तर्य्यमात्रे वैफल्यात् यत्परः शब्दः स वाक्यप्रयोगे शब्दार्थ इत्यथशब्देनैव हेतुत्वसिद्धेर्न्नातःशब्दो ऽपेक्षत इत्यतःशब्दाभावे माङ्गल्यादीनामन्यतमार्थतायथशब्दस्य प्रसज्यत इति चेत् । न । निराकृतत्वात् । धर्ममीमांसायां सत्यप्यथशब्दे ऽतःशब्देना ऽपि तस्य हेतुत्वमुक्तमिति चेदऽन्धगोलाङ्गलन्यायैकशरणो ऽयं सर्वसंकरवादी । नह्यन्यच्च विद्यमानः * पुनरुक्तिदोषो ऽस्माभिरप्यनुसरणीयः । तस्मादतःशब्दवैयर्थ्यमिति प्राप्तमत्राथशब्दपरिगृहीतस्यैव हेतुत्वस्य हेत्वन्तरेणापवादाशङ्कायां तन्निराकरणं पुनरथशब्दोक्तहेतुत्वाभिधायिना ऽतःशब्देन क्रियत इति दर्शितम् यस्माद्वेद एवाग्निहोत्रादीनामित्यादिभाष्येण । तच्च तामाशङ्कां दर्शयति † स्यादेतत् कृतकत्वपरिच्छेदावित्यादिना । यदा तु कृतकत्वादनुमानमनैकान्तिकम् । तदा ‡ कर्मफलस्यापि कृतकस्यानित्यत्वनियमाभावान्नित्यपुरुषार्थकामिनस्तत्रापि प्रवृत्तिः स्यात् अतो नित्यानित्यवस्तुविवेको न ब्रह्मण्येव नियमेन प्रवृत्तिहेतुरित्यर्थः । ननु कर्मफलस्यै-

,, १७ कान्ततो ऽनित्यताऽभावेपि § नित्यत्वे न प्रमाणमिति तत्राह वेदेप्यक्षय्यं ह वै चातुर्मास्ययाजिन इति । नन्वेवमपि ब्रह्मणि प्रवृत्तेः किमायातमिति

* पुनरुक्तेति १ पु० । † स्यादेव कृतकत्वेति १ पु० ।
‡ अपिशब्दो ऽस्ति १, ३ पु० । § न नित्यत्वे प्रमाणमिति ३ पु० ।

तत्राह अतो विषयभोगान्न नियमेन विराग इति । * ततो न ब्रह्मणि प्रव- ६३
र्त्तत इत्यर्थः । विरज्यवाच्चातुर्मास्यादिव्यतिरिक्तविषयाद् विरक्तस्तत्र प्रव-
र्त्तत इति मा भूद् ब्रह्मण्येव प्रवृत्तिनियमस्तथापि ब्रह्मण्यपि विकल्पेन
प्रवृत्तिः स्यादिति नेत्याह नापि कूटस्थनित्यवस्त्ववष्टम्भेनेति । ननु वि-
रुद्धपदार्थतादात्म्याभावेपि संयोगलक्षणाद् ब्रह्मप्राप्तिः स्यादिति नेत्याह
तदवाप्तिरिति । ननु ब्रह्मानन्दोपभोगो विद्यते । न । स्वाश्रयमुखोपलब्धेरु-
पभोगत्वात् । न च ब्रह्मधर्मस्य सुखस्य जीवाश्रयतयोपलब्धिः संभवति । ननु †
सुखापरोक्ष्यमात्रमुपभोगो न स्वाश्रयसुखापरोक्ष्यम् विशेषणायोगात् तथापि भेदे-
नावस्थाने जीवब्रह्मणो‡लौके पुरुषान्तरसुखस्य पुरुषान्तरं प्रत्याऽपरोक्ष्याद-
र्शनान्नोपभोगः । नन्वात्मैव सुखसंवित्स्वभावस्तद्रूपावस्थानं च मोक्ष इति ।
न । योग्यानुपलब्धिविरोधात् । नच देवाद्यानन्दपरित्यागेन निरानन्दात्म-
नावस्थानं मोक्षं कश्चित्प्रार्थयते । तस्माच्च§ साधनचतुष्टयसंपन्नस्य ब्रह्मणि
प्रवृत्तिः किंतु कर्मफल इत्युपसंहरति अतो ऽजीर्णभयादित्यादिना । तत्रोक्ताश-
ङ्कानिराकरणहेतुवचनं भाष्यमवतारयितुमतःशब्देन साधनचतुष्टयस्य हेतुत्वा-
भिधायिना कथमाशङ्कानिराकरणहेतुभूतं प्रमाणं सूचितमिति पृच्छति कथ-
मिति । तदाह यस्माद्वेद एवाग्निहोत्रादीनामिति । ब्रह्मव्यतिरिक्तपुरुषार्थजा-
तस्य नित्यतां दर्शयतीत्यर्थः । ननु तद्यथेह ‖ कर्म्मचितो लोक इति सा-
मान्यप्रतिश्चातुर्मास्यादिविशेषादन्यत्रैव वर्त्ततामिति चोदयति ¶ ननु पुण्ये-
ति । तत्र तावच्चातुर्मास्यश्रुतिः सुकृतस्याक्षयत्वमाह न तत्फलस्य । सत्यपि
सुकृते फलस्यानुपभोगवत् क्षयोपपत्तेः । तत्र वाक्यस्य श्रुतार्थं परित्यज्य फला-
क्षयविषयत्वकल्पना प्रमाणविरुद्धेत्याह न तस्य वस्तुबलप्रवृत्तेति । व्याप्तिबल- ६४
प्रवृत्तेत्यर्थः । अनुमानानुगृहीतश्रुतिविरोध इति योजयितव्यम् । हिरण्यदा
अमृतत्वं भजन्त इति श्रुतिर्वर्त्तमानापदेशाद् योग्यानुपलब्धिविरुद्धा भवति ।
** भजिष्यन्त इति कल्पना पूर्ववत्प्रमाणविरुद्धा अनुमानानुगृहीतदेवसर्गप्रल-
यश्रुतिविरुद्धा । अपाम सोममिति श्रुतिः स य आत्मानमेव लोकमुपास्ते न हा

* ततःस्थाने अतः ९ पु० । † सुखापरोक्षमात्रं भोग इति ९ पु० ।
‡ लौकिकपुरुषान्तरेति ९ पु० । § साधनचतुष्टयाद् ब्रह्मणीति ३ पु० ।
‖ कर्मजितो लोक इति ९ पु० । ¶ ननु पुण्यस्येति ९ पु० ।
** भजिष्यन्तीतीति ९ पु०, भक्ष्यन्त इति तु न्याय्यं स्यात्, परं न क्वाप्यस्ति ।

ऽस्य कर्म क्षीयत * इति श्रुतिः न फलस्य नित्यतां दर्शयति । वाक्यस्य फलविषयत्वकल्पना तु पूर्ववत् प्रमाणविरुद्धा अविरोधापेक्षत्वात्कल्पनायाः । किञ्च । यदि † ह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्वा ऽस्यान्ततः क्षीयत इत्युपक्रम्य ‡ स य आत्मानमेव लोकमुपास्ते न हा ऽस्य कर्म क्षीयत इति वचना § दात्मोपासनात्कर्मण एवापरोक्षानुभवद्वारेणाक्षयाविद्यानिवृत्तिफलत्वान्न । कर्म क्षीयत इत्युपासनाकर्मप्रशंसामात्रमेतदुपादीयते । अनेवंविदः ‖ कर्मक्षयस्य श्रवणादेवंविदानुष्ठितस्याग्निहोत्रादेरेव मोक्षफलतया ऽक्षयो विधीयत इति चेत् । न । लिङ्गस्य नान्यः पन्था विद्यते क्षीयन्ते चास्य कर्माणीत्यादिनिषेधश्रुतिविरोधात् । तस्माद् ब्रह्मव्यतिरिक्त ¶ पुरुषार्थे ऽनित्यतया वैराग्यमुपपन्नमिति । ननु दोषस्य तुल्यत्वान्न ब्रह्मण्यपि प्रवृत्तिकारणमेतदित्युक्तम् तत्राह यत्पुनर्मुमुक्षुत्वाभाव इति । विरुद्धपदार्थतादात्म्यमनुपपन्नमित्यनुमानं ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतिविरुद्धम् । बिम्बप्रतिबिम्बयोरिव तादात्म्यमुक्तम् । नच सुखानुभवाभावादपुरुषार्थ इति युक्तम् । ब्रह्मानन्दानुभावात् । ननु तादात्म्ये ऽहं सुखमित्यनुभवः स्यान्नाहं सुखीति चानुभवो लोके पुरुषार्थ इति । नैष दोषः । सुखापरोक्ष्यमात्रस्य पुरुषार्थत्वात् । ननु स्वाश्रयं सुखमेव पुरुषार्थो न सुखापरोक्ष्यमिति । ** न । उपलब्धानामेव सुखसाधनानां पुरुषार्थत्वादिष्टत्वाविशेषात्सुखमप्युपलभ्यमानमेव पुरुषार्थ इति गम्यते । तच्च साधनपारतन्त्र्यानित्यत्वादिवद्विषयसुखस्यात्मनो भेदोप्यानुषङ्गिको †† न भासते ऽहं सुखीति न पुरुषार्थतयेत्यतो ब्रह्मानन्दोप्यपरोक्षावभासः पुरुषार्थ इति । ननु नास्ति नित्यं सुखमिति नैयायिकादयः । सत्यम् । नास्त्येव जन्यमपि सुखम् । ननु साधनोपादानाज्जन्यतावगम्यते । न । सिद्धस्यैव सुखस्याभिव्यक्तिहेतुत्वादन्यथा ‡‡ सुखसन्तानजन्मप्रतिभासयोग्यत्वयोः साधनाधीनताकल्पनागौरवात्साध्यान्तराऽशेषतया वा अव्यभिचारित्वेन वा §§ निरुपाधिकप्रेमास्प-

६४ ४

* इति श्रुतिः फलस्य नित्यताञ्च दर्शयतीति १ पु· । † ह्वाप्यनेवंविदिति ३ पु· ।
‡ स य-इति नास्ति १ पु· । § आत्मोपासनाकर्मण इति १ पु· ।
‖ कर्मक्षयश्रवणादिति १ पु· । ¶ पुरुषार्थेष्विति १ पु· । ** ननूपलब्धानामिति १ पु· ।
†† श्रवेत्युपरिष्टाच्चास्ति २ पु·, श्रवभासत इत्यस्य स्थाने 'भाप्यते'-इति पाठः २, ३ पु· ।
‡‡ सुखसत्ताजन्मेति १ पु· । §§ वास्थाने चः ३ पु· ।

दत्वेन * वा सुखदुःखावस्थयोरविशेषेण † सुखस्वरूप आत्मा प्रत्यक्षेणावभासते । यस्मादतःशब्देन शङ्कानिराकरणहेतुसूचनद्वारेण साधनकलापस्य हेतुत्वं सर्मार्थितम् । तस्माद्यथोक्तसाधनेत्युपसंहारः । तच्चेच्छाप्राधान्येन ६४
सूचवाक्यार्थो दर्शितः । साधनचतुष्टयस्यावश्यारम्भकत्वं व्यतिरेकमुखेन दर्शितमिदानीमन्वयमुखेन तदेव प्रतिपादयति यतो द्वैतानुषङ्गादित्यादिना । ननु साधनकलापवद्धर्मजिज्ञासापि नियमेनारम्भिकेति नेत्याह एवं सत्यऽर्थादिति । आगमार्थापत्तिभ्यामेव धर्मकलापस्यावश्यारम्भकत्वे ऽसिद्धे तदुभयप्रमाणविकलस्य धर्मविचारस्य न हेतुतेत्यर्थः ॥

ब्रह्मणो जिज्ञासेति भाष्यम् । ननु धर्माय जिज्ञासेतिवच्चतुर्थीसमासः किं न स्यादि ‡ त्यत्राह अन्तर्गीतविचारार्थान्वये हीति । इच्छाप्राधान्ये हीच्छायाः कर्मप्रयोजनयोरैक्यात् प्राधान्यात्कर्मणि षष्ठीसमासः स्याद्विचारप्राधान्ये तु कर्मप्रयोजनभेदात् । प्रयोजनविवक्षया तु चतुर्थीसमासोपि स्यादिति । ननु किं तद् ब्रह्म यदिच्छायाः § प्रयोजनतया कर्मत्वेन वर्त्तत इति तदाह ब्रह्मशब्दस्यार्थनिर्देशावसर इति । तच्च यदन्यैरित्यारभ्य ब्रह्मण इति ६४
कर्मणि षष्ठीत्यतः प्राक्तनेन ग्रन्थेन जातिजीवकमलासनशब्दराशीनां ब्रह्मशब्दाभिधेयतया जिज्ञासां प्रति कर्तृत्वेन कर्मत्वेन वा प्रतिपादनानुपपत्ते ‖ रस्मिन् प्रयोगे न ब्रह्मशब्दस्य जात्याद्यर्थतेति दर्शितम् । तच्च ब्रह्मण इति कर्मणि षष्ठीत्यारभ्य किञ्च शास्त्रप्रवृत्तिरेवेत्यतः प्राक्तनेन ग्रन्थेन अप्रधानविचारान् शब्देन मुख्यया वृत्त्योपादाय प्रधानस्यार्थाक्षेपकल्पनाद्वरं मुखतः प्रधानविचारमेवोपादायाऽप्रधानविचाराणामर्थाक्षेपकल्पनमिति कर्मणि षष्ठी दर्शिता । शेष इति संबन्धसामान्यमुच्यते न कारकपञ्चकव्यतिरिक्ताः संबन्धविशेषा उच्यन्ते । तच्च यथा देवदत्तस्य स्वमिति षष्ठी विशेषसंबन्धे-
¶ [प्यन्विताभिधानमर्हत्येवं देवदत्तस्य गच्छति देवदत्तस्य गम्यत इत्यादिकारकसंबन्धविशेषेप्यन्विताभिधानं नार्हति किंत्वभिहितसंबन्ध] सामा-

* वास्थाने चः ३ पु· ।
† सुखरूप इति २ पु· ।
‡ इत्यत आहेति १, ३ पु· ।
§ प्रयोजनं तथेति १ पु· ।
‖ अप्रयोगे नेति १ पु· ।
¶ [] ग्रन्थस्खलितः पाठः १ पु· नास्ति ।

न्यार्थं * सामर्थ्यात् क्वचित् कारकसंबन्धविशेषाश्चार्थतोऽवगम्यन्त इत्येतावति षष्ठी शेष इत्युक्तम् नार्थादपि कारकसंबन्धप्रतिभास इत्युक्तमिति पूर्ववादिनो मतम् । किंच शास्त्रप्रवृत्तिरेवेत्यारभ्य ज्ञातुमिच्छा जिज्ञासेत्यतः प्राक्तनेन ग्रन्थेन साधिकारविषयस्य विचारविधेः † प्रतिपादके वाक्ये ब्रह्मणः कर्मकारकत्वं निर्दिष्टं सूत्रस्य च तदेकार्थत्वात्तत्रापि ब्रह्मणः कर्मत्वमेव शब्देन वक्तव्यमिति दर्शितम् ॥

६६ १२ ज्ञातुमिच्छेत्यादि भाष्यम् । तत्रावगतविषयत्वादिच्छाया ‡ ब्रह्मण्यवगते तज्ज्ञानेच्छानुपपत्तेरनवगते सुतरामिति कथं ब्रह्मज्ञानेच्छेत्यत आह ततश्चेच्छायाः फलविषयत्वादिति । का चेयमिष्यमाणावगतिरिति तदाह साक्षादनुभव इति । ननु प्रथममेवावगतिरुत्पद्यते तत्राह ज्ञानं तु परोक्ष इति । शब्दात्परोक्षतया § वगते अपरोक्षज्ञानमिष्यत इत्यर्थः । यदा पुनः

६६ १६ शब्दादपरोक्षज्ञानमुत्पद्यते तत्राह सन्निहितेषीति । प्रमाणेनावगन्तुमिति अपरोक्षनिश्चयानुभवेनेत्यर्थः ॥

ननु किमिह ज्ञानमित्युच्यते । संवेदनमेव प्रमाणफलं विज्ञानमिति सुगतप्रभाकरवैशेषिकनैयायिकाः । नच संवेदनफलचतुष्टयसन्निकर्षादि ‖ सामग्र्यं चान्तरेण प्रमातृव्यापारो नाम ज्ञानमस्तीति । वार्त्तिककारीयाणां तु प्रमातृव्यापारः संविज्जनको ज्ञानमिति । क्षपणकलोकायतिकानां ¶ चात्मचैतन्यमेव ज्ञानम् । साङ्ख्यवेदान्तिनां करणव्युत्पत्त्या बुद्धिवृत्तिर्ज्ञानं भावव्युत्पत्त्या संवेदनमिति । तत्र न तावत्स्थायिन्यात्मनि संवित्फलोदयः कर्तृव्यापारमन्तरेणोपपद्यते । ननु यतः कारणात्कर्तृव्यापारजन्म तत एवानुभवजन्म स्यात् आत्मनः परिस्पन्दव्यापारानुपपत्तेरिति । अयमत्र वक्तव्यः । किं लोके कर्तृव्यापारात्फलजन्म प्रत्यक्षेणावगतं न वेति । नचेङ्गाप्रियहणाभावादप्रत्यक्षत्वाच्च न सर्वत्र कर्तृव्यापारावगमः स्यात् अवगम्यते च लोके कर्तृव्यापारः । अथ लोके फलहेतुतया प्रत्यक्षसिद्धः कर्तृव्यापारः । तर्ह्यात्मन्यपि तदनुमीयते व्याप्तिनियमात् । ननु न परिणामो नाम व्यापारो

* सामर्थ्यात् कारकेति २, ३ पु० । † प्रतिपादकवाक्यमिति १ पु० ।
‡ ब्रह्मण्यवगतत्वाज्ज्ञानेति १ पु० । § अवगतपरोक्ष्यमिति १ पु० ।
‖ सामग्र्यवान्तरेणेति १ पु० । ¶ चो नास्ति १ पु०

ऽस्त्यारम्भाभ्युपगमादिति वैशेषिकादयः । तर्हि प्रयत्नव्यापारजन्यं फलमस्तु कर्तृव्यापारव्याप्रियमात्फलस्य । ननु मनःसंयोगादेवासमवायिकारणाद्व्यापारमन्तरेण ज्ञानमुत्पद्यते न करणसंयोगव्यतिरेकेण फलजन्मनि * कर्तृव्यापारदर्शनात् । अत्र सर्वसङ्करवादी विलपति पाकादिषु फलस्य कर्तृव्यापाराधीनतादर्शनात्र तथावगम्यतामिह तु † तद्दर्शनाभावान्न कर्तृव्यापार इति । स चानुमानप्रक्रियायाम ‡ नभिज्ञ इत्युपेक्ष्यते । सुगतानामपि नित्यात्मसाधनादेव § संविदां कर्तृव्यापारापेक्षा ऽनुमीयते । क्षपणकानामपि स्वरूपचैतन्यस्य निरुपाधिकस्य विषयावभासित्वे सर्वदा सर्वविषयावभासः स्यात् । लोकायतस्य च जन्यसंवेदनत्वा ‖ त्तद्व्यापारानुमानम् । ननु सर्वगतस्य निरवयवस्यात्मनो न परिस्पन्दपरिणामो युक्तो । सत्यम् । अध्यासपरिनिष्पन्नान्तःकरणसम्पिण्डितस्यात्मनो ज्ञानाकारपरिणामात् । नच संवेदनाकारेण परिणामः । तस्य नित्यसिद्धत्वात् । अतोन्तःकरणपरिणामविशेषश्चैतन्यस्य विषयावच्छेदोपाधिः करणव्युत्पत्त्या ज्ञानं भावव्युत्पत्त्या तु संवेदनमेवार्थप्रकाशो ज्ञप्तिर्ज्ञानमित्युच्यते । तच्चार्थोपाध्यपरोक्षसंविदवच्छेदकं ज्ञानम ¶ परोक्षमित्यत्रावयवार्थव्युत्पादनेनापरोक्षावगमेच्छाया वाक्यार्थत्वमुक्तमिष्यमाणज्ञानफलोपदेशमुखेना ** न्तर्णीतं तत्साधनं विचारं कर्तव्यतया वाक्यार्थं प्रतिपादयत्युत्तरं भाष्यम् तस्य तात्पर्यं दर्शयितुमाशङ्कान्तरं निवर्तयति ॥

कथं †† नास्य सूचस्य वाक्यार्थो वर्णनीयः । तथाहि । अस्य सूचस्य शास्त्रान्तर्भूतत्वे विचारारम्भकर्तव्यता विचारसूचस्य केनारम्भः । क्रियते । स्वेनैव चेदात्माश्रयतापत्तिः सूचान्तरेण चेदनवस्थापातः । अथानन्तर्भूतं तर्हि प्रथमसूचस्याशास्त्रतया ‡‡ ऽनारम्भप्रसङ्ग इति तत्राह तदेतच्छास्त्रान्तर्भूतं सूचमिति । आपातप्रतिपन्नो §§ त्तरविचारविधिरेव स्वापेक्षितविचाराय प्रथमसूचमारम्भयति । विधौ च विचारिते ||| विधिविषयविचारसूचाणि पश्चादारम्भ- ६६

* कर्तृव्यापारनियमादिति १ पु० । † तदिति नास्ति १ पु० ।
‡ अनधिकृत इति २, ३ पु० । § संविदामिति २, ३ पु० ।
‖ तदिति नास्ति २ पु० । ¶ अपरोक्षज्ञानमिति तत्रावयवार्थेति १ पु० ।
** अन्तर्नीतं तत्साधनविचारामिति १ पु० । †† कथं नास्य विचारसूत्रस्येति १ पु० ।
‡‡ अनारम्भप्रसङ्गादितीति १ पु० । §§ उत्तरविधिरेवेति १ पु० ।
||| विधिविषयसूत्राणीति १ पु० ।

यतीत्येकशास्त्रत्वेपि नानवस्था । श्रोतव्यादिवाक्यानां स्वार्थे समन्वयद्वारेण विचार्यमाणवेदान्तवाक्यानामपि ब्रह्मणि समन्वयनिमित्तत्वात्समन्वये च
६६ १८ संबन्ध इति । अत्र च श्रुत्या किं प्रतिपादितम् इति तदाह अनेन चेति । प्रयोज्य इत्यधिकारी । एकस्या इति साधनकलापस्येति । तस्य कारणान्तरमदृष्टं यज्ञादि दृष्ट्वा व्याप्त्यनुसंधानाद्यर्थादुपनमित्यानन्तर्याभिधानसामर्थ्यादिति । अतःशब्दस्य मुखतो हेतुत्वाभिधायिनोप्यागङ्कान्तरनिवृत्तौ तात्पर्यादर्थाद्धेतुत्वमुक्तमित्यनुवादे प्रयोजनाभावात्कर्तव्यपदमध्याहृत्य जिज्ञासा * कर्तव्यता श्रुत्याभिहिता । नन्विच्छासंयोगाज्ज्ञानस्य साध्यताबगमानदेव कर्तव्यतास्त्विति नेत्याह तच्च जानात्येवेति । इष्यमाणस्य साध्यता स्वयंसिद्धा न शब्दमपेक्षते मुखसंवेदनत्वादित्यर्थः । किं तर्हि विधीयत इति तदाहोपायं तु न वेदेति । अनवगताभिलषितोपाय एव विधिशब्दैः प्रतिपाद्यत इत्यर्थः । अदृष्टोपायत्वेप्यपरोक्षानुभवं प्रत्यदृष्टोपायतापि दर्शिता श्रवणादिविधेः । ननु पदार्थव्याख्यानादेव स्वयमेव ‡ वाक्यार्थं प्रतिपद्यते किं वाक्यार्थकथनेन । सत्यम् । संबन्धादीनामर्थप्रतिभासो वाक्यार्थ § कथनेन भवतीत्याह शास्त्रस्य संबन्धाभिधेयप्रयोजनानानीति । मुमुक्षुणा ब्रह्मानुभवाय विचारः कर्तव्य इति वाक्यार्थः । कथमवार्थीसंबन्धादिप्रतिपत्तिः । तदाह यत्तदुक्तं भवतीत्यादिना । ननु ब्रह्मज्ञानद्वारेण काम्यमानमोक्ष ‖ साधनं विचार इति फलसंबन्धे सिद्धेपि कथं विषयादिसिद्धिरिति तत्राह अर्थाच्छास्त्रस्येति ॥ ¶

॥ ** इति विवरणे तृतीयं वर्णकं समाप्तम् ॥

* श्रुत्यावगतेति १ पु० । † उपाया एव विधिशब्दैः प्रतिपाद्यन्त इति १ पु० ।
‡ वाक्यार्थः प्रतिपाद्यत इति १ पु० । § कथने भवतीति १ पु० ।
‖ साधनः–इति २, ३ पु० ।
¶ "अत्रेदं विवक्षितम्–ब्रह्मज्ञानाय विचारः कर्तव्य इत्युक्ते ज्ञातुमधिगतस्य ब्रह्मणः प्रमेयत्वम् तस्यैव प्रमितस्य प्रयोजनत्वम् शक्यप्रतिपाद्यतया सम्बन्धः ज्ञानकाम्यस्याधिकारित्वं चेत्यनुबन्धचतुष्टयं लक्ष्यते· तस्मादनुबन्धचतुष्टयस्य सम्भवाद्विचारः कर्तव्य इति" ति तत्त्वदीपने प्रपञ्चकनिर्गलितार्थः समर्थाहि ।
** इति श्रीपञ्चपादिकायां विवरणे तृतीयवर्णकं समाप्तम् इति १ पु०, तृतीयं वर्णकं समाप्तमित्येतावन्मात्रं ३ पु० ।

तत्पुनर्ब्रह्म प्रसिद्धमित्यादिभाष्यस्य तात्पर्यमाह प्रयोजनविषयसंब- ६७ ६
न्धानाक्षिपतीति । ननु विधिसामर्थ्यादेव प्रयोजनादिष्ववगतेषु कथमाक्षेप इति चोदयति कथमिति । परिहरति प्रसिद्धशब्देनेत्यादिना । ननु प्रतिपन्नं शब्देनानूद्य प्रतिपादयितुं शक्यत्वात्कथमविषय इत्याह कस्मादिति । अनधिगतार्थताऽभावादिति परिहरति प्रतिपाद्यत्वेनेति । * विषयावगमद्वारा प्रयोजनस्य पूर्व्वावगमेनैव सिद्धत्वान्नास्य प्रयोजनमपीत्याह ततश्चानेनानवगमादिति । अथेत्यप्रसिद्धपक्षे संबन्धं प्रयोजनं चाक्षिपति । नन्वनधिगतार्थ एव प्रमाणेन प्रतिपाद्यते प्रयोजनं च † तत्रैवेति चोदयति कथमिति । परिहरति यत्र कदाचिदपीति । प्रत्यक्षादिप्रमाणैर्विचारानपेक्षैरत्यन्तानधिगत एव प्रतिपाद्यते यत्र विचारापेक्षया प्रमाणेन वस्तु प्रतिपाद्यते तत्राप्रतिपन्नमुद्दिश्य विचारानुपपत्तेः प्रतिपन्ने विमर्शदर्शनान्न विचारापेक्षप्रमाणेनानधिगतावगम इत्यर्थः । नन्वप्रसिद्धपक्षे संबन्धः कथमाक्षिप्तो न प्रसिद्धपक्ष इति तत्राह प्रसिद्धं पुनर्यदि नामेति । अविज्ञाते तत्त्वे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्क्क इत्यऽक्षपादसूत्रवचनात्सामान्यप्रतिपन्नस्य वा विशेषरूपेण विशेषतोऽप्यापातदर्शनगोचरस्य वा विशेषनिर्णयाय प्रमाणानुग्राहकस्तर्क्क इति ब्रह्मणोऽप्यनिश्चितविशेषप्रतिभासगोचरतया विचार ‡ योग्यत्वप्रदर्शनेन चिंतयमपि समाधत्ते इतिभाष्यस्य तात्पर्यमाह अस्ति तावद् ब्रह्मेत्यादिनेति । ननु समन्वयाध्यायनिरूपणेन ब्रह्मैव विषयः प्रतिपाद्यं चेति सिध्यति § फलाध्यायेन तु फलविशेष इति न चिंतयमत्र प्रतिपादनीयमिति तत्राह श्रोतृप्रवृत्त्यर्थमिति । ननु प्रेक्षावतेत्यादिचोद्यपरिहारौ स्पष्टौ ।

ननु प्रयोजनविशेष एव प्रवृत्त्यङ्गं भवति न विषयसंबन्धाविति चोदयति एवमपि प्रयोजनविशेष एवेति । ननु साधनमपि प्रवृत्तिविषयं ‖ शक्यसाध्यं चानवगम्य फलज्ञानात्कुत्र प्रवर्त्तत इति तत्राह नत्र विषयभावमनापन्नमिति । ननु फलसाधनं प्रवृत्तिविषयो न फलमिति तत्राह छिदिक्रियाविषय एवेति । ,, २
प्रयोजनसमवायिवस्तुकर्मकारकतया विषयो भवति । ततश्च प्रयोजनप्रति-

* विषयावगमद्वारेति १ पु· ।
‡ योग्यताप्रदर्शनेति १ पु· ।
‖ शक्यं साध्यं वेति १ पु· ।
† तत्रेतीति १, ३ पु· ।
§ फलासाध्ययेन फलेति २ पु· ।

पत्तौ विषयोऽप्यन्तर्भवतीत्यर्थः । ननु कुलालदण्डादिव्यापारो मृद्विषयो
६७ २२ घटश्च प्रयोजनमिति विषयप्रयोजनयोर्भेद इति तत्राह दण्डादेरपीति । सत्यम् प्रयोजनसमवायी विषयप्रयोजनद्वावन्तर्भवति किंतु प्रयोजनं प्रति करणलक्षणस्य पुरुषव्यापारविषयस्यानन्यसाधारणतया शक्यप्रतिपादतया च विषयभावे दर्शिते प्रयोजनसाधने नियमेन प्रवृत्तिर्भवति नेतरथेति परिहरति सत्यमेवम् तथापीत्यादिना । तच्च प्रवृत्तिनियमायानन्यसाधारणतया विचारतज्जन्यज्ञानयोरनुभूयमानतया प्रयोजनमपि ब्रह्मस्वरूपेण विषयतया पृथग्वक्तव्यमिति दर्शयितुं विपक्षे दृष्टान्तमाह यथा चिकित्साज्ञानस्येति । विषयस्य संबन्धिरूपतयाऽन्तर्गर्भितसंबन्धत्वान्न पृथक्संबन्धो वक्तव्य इति तत्राह संबन्धोऽपि वक्तव्य इत्यादिना । तत्रानन्यप्रतिपाद्यत्वात्साधनान्तरनिवृत्तिरूपादन्यत्वात्संबन्धस्य सोऽपि पृथग्वक्तव्य इति दर्शयितुं विपक्षे दृष्टान्तमाह यथा साधुशब्दपरिज्ञानमित्यादिना । अयमर्थः । व्याकरणारम्भात् प्राक्चिकित्साव्यापारा * द्व्यापारान्तरैरऽसाध्यमपि साधुशब्दज्ञानं न चिकित्साव्यापारस्य विषयः संबन्धाभावात् किंतु व्याकरणेन संबन्धानस्य विषयो भवति अतस्तदर्थी न क्वचिदिति चिकित्साव्यापार इत्यर्थः । नन्वेवमप्यन्यतमाभिधानेनान्यतमस्यार्थसिद्धत्वान्न पृथगभिधानेन कृत्यमिति नेत्याह तेन पुरुषार्थरूपतेत्यादिना । भिद्यन्त इति पृथग्वक्तव्यानीत्यर्थः । नचान्यतमेनान्यतमस्य सिद्धिः सत्यप्येकस्मिन्नितराभावस्य दर्शितत्वादिति । ननु स्वरूपभेदे पृथगभिधानापेक्षायामपि कथं विषयं सम्भूय † न प्रवृत्त्यङ्गमिति तत्र व्यतिरेकमुखेन प्रवृत्तिहेतुत्वं दर्शयति तानि च चोद्यमपि प्रवृत्त्यङ्गं नापुरुषार्थ इत्यादिना ।

ननु वक्तव्यमपि चिदयं प्रसिद्धाप्रसिद्धपक्षयोरनुपपन्नमित्युक्तमिति
६८ १३ तत्परिहारायोत्तरभाष्यस्याऽधिकरणपरिसमाप्तेस्तात्पर्यमाह तत्र विप्रतिपत्त्येकान्ततःप्रसिद्धतामित्यादिना । तत्र ‡ प्रसिद्धिमात्रेण विचारविधानोपपत्तिः उद्देशनसम्भवादेकान्तप्रसिद्ध्यभावाद्विचारजन्यज्ञानस्यानन्यसाधारणतेति विप्रतिपत्तिशब्दो ब्रह्मशब्दव्युत्पत्तेरप्युपलक्षणार्थः । नन्वेवमपि

* व्यापारान्तरैः साध्यमपीति २ पु· । † अयं नकारो नास्ति २, ३ पु· ।
‡ प्रसिद्धमात्रेणेति २ पु· ।

विचारशास्त्रस्य विषयसंबन्धो न समर्थितावितिं चोदयति ननु ब्रह्म ईट वेदान्तानामिति । ननु ब्रह्मजिज्ञासेति शास्त्रस्यापि स एव विषयो निर्दिष्ट: नेत्याह शास्त्रं तेषामिति । सूत्रवाक्यानि न्याया विषयाणि न्यायाश्च प्रमाणप्रमेयसम्भावनादिविषया: । ननु सम्भावानावगम एव तर्हि प्रयोजनमिति नेत्याह प्रयोजनं त्विति । प्रणाडे*ति परम्परयापीत्यर्थ: । धर्मार्थाभ्यां सुखमेव प्राप्यत इति तयोस्तत्परता ।

ननु करणेति † कर्तव्यतयोरेकमेव प्रयोजनमिति ‡ निर्णीतं § प्रथमे सन्त्रे । तथाहि । आग्नेयोऽष्टाकपाल: उपांशुयाजमन्तरा यजति आग्नीषोमीय ‖ मेकादशकपालमिति पौर्णमास्यां कर्मचयम् तथाग्नेयोऽष्टाकपाल ऐन्द्रं दधि ऐन्द्रं पय इति दर्शे चयमित्याग्नेयादय: षडागा: । तेषां करणभूतानां द्विविधान्यङ्गानि निरूपितानि ¶ अर्थकर्माणि संस्कारकर्माणि चेति । फलोपकार्यङ्गानि प्रयाजादीन्यारादुपकारकाण्यर्थकर्माणि । प्रोक्षणादीनि तु द्रव्यद्वारेण यागस्वरूपोपकारितया सन्निपत्योपकारकाणि संस्कारकर्माणि । तचोभयविधानामप्यङ्गानां प्रधानापूर्वद्वारेण स्वर्गसिद्धिरेव प्रयोजनमित्येवं शब्दशक्तितात्पर्यविचारस्य संस्कारकर्मवच्छब्दप्रमाणस्वरूपोपकारितयार्थस्वरूपब्रह्मविचारस्य च ब्रह्मावगमफलोपकारितयावगम्यमानब्रह्मविषमत्वमुभयविधविचारस्य युज्यत इत्यपसिद्धान्ती चोदयति नन्वाग्नेयादीनामित्यादिना ।

ननु वेदान्ता एव ** ब्रह्मावगतिसमर्थास्तच कथमितिकर्तव्यस्यावगमफलतया ब्रह्मविषयतेति तत्राह तेन यद्यपि वेदान्ता एवेति । ननु कथं संभावनाबुद्धिहेतुतया तद्विषयस्य विचारस्य ब्रह्मावगमजनकतया तद्विषयता नह्यन्यविषयो व्यापारोऽन्यविषय इति तत्राह नहि च्छेत्तुरिति । द्विविधं हि कर्म्म कारकम् †† किंचिदव्यवधानतया ‡‡ व्यापारजन्यातिशयवत् यथोद्यमननिपातनव्यापारस्योर्द्ध्वाधोदेशसंयोगविभागातिशय §§ विशिष्ट: कुठार: कर्तृ-

* इतिशब्दो नास्ति २ पु० । † इति कर्तव्ययोरिति १ पु० ।
‡ इति वर्णितं प्रथमतन्त्रे इति ३ पु० । § समास: १ पु० ।
‖ एकादशकपाल इतीति १ पु० । ¶ संस्कारकर्माण्यर्थकर्माणि चेति वैपरीत्यम् १ पु० ।
** ब्रह्मावगमेति २ पु० । †† किंचिद्व्यवधानेति ३ पु० ।
‡‡ व्यापारतया जन्येति २ पु० । §§ विशिष्टं कुठारइति २ पु० ।

८९ व्यापारस्याऽव्यवधानेन कर्मकारकं भवति । किंचिदुद्देश्यफलतया * करणव्यापारव्यवधानेन कर्म भवति यथा द्वैधीभूतो वृक्ष इति । तत्र कर्तृव्यापारः करणव्यापारव्यवहितोपि वृक्षद्वैधीभावफल † उच्यते वृक्षं छिनत्तीति कर्तृव्यापारस्य तत्कर्मतावगमात् स एव वृक्षः कुठारव्यापारस्य साक्षात्कर्म भवत्यऽव्यवधानात् । ननु करणस्य कुठारस्य कथं ‡ कर्तृतेति । उच्यते । सर्वाणि खलु स्वव्यापारापेक्षया कर्तृणि सर्वकारकव्यापाराणां च फलं कर्मतया साध्यम् । तत्र कर्तृकरणकर्मभेदो ऽवान्तरभेदापेक्षया भवति तत्र कर्त्ता साधननियोगेन वा धातुना विशेष्यव्यापारतया वा स्वतन्त्रव्यापारः । करणं फलं प्रति सन्निधत्योपकारकं फलसमवायि कर्मकारकमिति । काष्ठानि पचन्तीत्यादिव्यपदेशः स्वव्यापारकर्तृत्वापेक्षया नावान्तरभेदापेक्षयेति । तस्मात्कर्तृव्यापारस्य करणव्यापारव्यवधानेन वृक्षकर्मता । एवं विचारव्यापारस्यापि प्रमाणप्रमेयसम्भावनावगमद्वारेण § ब्रह्मावगमोद्देश्यत्वादवगमहेतोरवगम्यविषयत्वाद् ब्रह्मकर्मता
९८ २५ न विरुध्यते । ‖ अथाव्यवहितमेव ¶ कर्म्म नोद्देश्यमिति तत्राह अन्यथा ऽन्यच्च कर्तृव्यापार इति ।

अचेतनकर्तव्येषु द्विविधं प्रमाणमागमो ऽन्वयव्यतिरेको ** च । प्रयाजादीनामागमान्मृत्कुलालादीनां कर्तृव्यापारस्य †† चाक्षुरकुम्भद्वैधीभावाङ्गतान्वयव्यतिरेकाभ्याम् । अत्र तु शब्दोपलब्धिसंबन्धज्ञानसंस्कारसहकृताच्छब्दादर्थावगमे सति विचारस्याङ्गता नान्यतरप्रमाणेनाप्यवगता शब्दादेव विचारानपेक्षादवगमजननादित्यपसिद्धान्तिनं ‡‡ परिहरति पूर्ववादी विषम उपन्यास इति । ननु यथा चक्षुरादयः सम्यग्ज्ञानहेतवोपि §§ दोषसंयोगात्संशयविपर्यासौ जनयन्ति पुनः सम्यग्ज्ञानजन्मनि च दोषापकर्षमपेक्षन्ते । एवं शब्दः शक्तितात्पर्य्याज्ञान |||तद्विपर्ययज्ञानदोषात्संशयादिज्ञानमुत्पादयति तत्र दोषापनयनेन विपर्यासादिनिवृत्तये शक्तितात्पर्यविचारो ऽङ्गभावमश्नुत इति चोद-
९९ ४ यति ननु संशयविपर्यासनिरासद्वारेणेति ।

* कारणेति २ पु· ।
† इत्युच्यत इति ३, ३ पु· ।
‡ कर्तृतोच्यत इति २, ३ पु· ।
§ ब्रह्मावगमस्योद्देश्यत्वादिति १ पु· ।
‖ यथाव्यवहितेति २ पु· ।
¶ कर्मणोद्देश्यमिति १, ३ पु· ।
** चकारस्थाने वाशब्दः १ पु· । †† चाक्षुरद्वैधीभावेति १ पु·, चाक्षुरादिद्वैधीभावेति ३ पु·
‡‡ पूर्वेणावीपरिहरतीति १, ३ पु· ।
§§ दोषसङ्गादिति ३ पु· ।
||| तद्विपर्यासेति २ पु· ।

* तत्र किं शब्द एव दोषवशादन्यथाज्ञानं जनयति विचारश्च तदपनयनेन तथाप्रमितिहेतुतां प्रतिपद्यते । किं वा शब्दः सम्यग्ज्ञानस्यैव हेतुः कारणान्तरादन्यथाज्ञानम् विचारश्च प्रतिबन्धमात्रं निराचष्टे निवृत्ते च प्रतिबन्धे शब्दादेवार्थनिर्णय इति । तत्र न तावद्विपर्यासादिनिरासेनार्थनिर्णयहेतुता विचारस्येत्याह † नैतत्सारम् ‡ यत्र ह्यनेकमिति । अयमाशयः । न ६९ ५
शब्दसमवायी कश्चिद्दोषोस्ति पुरुषेन्द्रियसमवायित्वाद्दोषाणाम् अतः शब्दो न विपर्यासादिज्ञानहेतुः किंतु शब्दानां § प्रयोगान्तरेष्वन्यथान्यथाशक्तितात्पर्याऽन्वयनदर्शनादिहापि ‖ तथातथाविधत्व ¶ सामान्यतोदर्शनेनार्थविरोधबुद्ध्या च पुरुषदोषेणान्यथाज्ञानान्युत्पद्यन्ते शब्दाच्च तत्त्वज्ञानमेवोत्पद्यते । ततश्च शब्दात्पुरुषदोषाच्च बहुषु परस्परविरुद्धेषु ज्ञानेषु जातेषु ** शब्दशक्तितात्पर्यावधारणं पुरुषदोषापनयनेन प्रतिपत्तज्ञानान्तरमात्रं निवर्तयति निवृत्ते च प्रतिबन्धे शब्दादेव तत्त्वज्ञानं जायते । जातं वा निश्चलमवतिष्ठते । तस्मान्न विचारः प्रमाणेतिकर्तव्यतया ब्रह्मविषय इति ।

एवमपसिद्धान्ते निरस्ते पूर्ववादिना सिद्धान्तयति अत्रोच्यते यद्यपि ६९ १
वाक्यार्थज्ञानमित्यादिना । †† तत्र सामान्यतोदृष्टनिबन्धनेनेति प्रयोगान्तरेष्व
‡‡ न्यथान्यथाशक्तितात्पर्यदर्शनादिहापि तथाभावबुद्ध्या तथाविधार्थस्य च लोकेन्यथाभावदर्शनादिहाप्यन्यथाभावबुद्ध्येत्यर्थः । अयमाशयः । प्रतिबन्धनिवृत्तौ सत्यामेवार्थनिर्णयात् प्रतिबन्धनिरासिनोप्युपचारेण ब्रह्मनिर्णयहेतुत्वाद्विचारस्य ब्रह्मविषयतेति । अत्रेदं विचार्य्यम् । किं तात्पर्य्यमर्थप्रमितिहेतुः किं वा प्रतिबन्धनिरासहेतुरिति । केचित्प्रमितिहेतुतामाहुः तत्र किं विज्ञातं तात्पर्यं प्रमितिहेतुरविज्ञातं वा । न तावद§§विज्ञातं प्रमितिहेतुः । तात्पर्यावगमफलविचारानपेक्षत्वप्रसङ्गात् तात्पर्य्यविषयादन्यत्र बुद्ध्यनुत्पादप्रसङ्गाच्च । तथा च क-

* तत्र किमिति· दोषसहितस्य शब्दस्या ऽन्यथाज्ञानजनकत्वम् विचारस्य च दोषनिरासेन प्रमितिहेतुत्वमिति किं युक्तम्, उत शब्दस्य सम्यग्ज्ञानजनकत्वस्वाभाव्यात्, दोषाच्चान्यथाज्ञाने समुत्पन्ने विचारेण च निवृत्ते शब्दाच्चार्थनिर्णय इति चेति योज्यम· अन्यथा विकल्पानुत्थानात्, शब्दस्य दोषसहितस्यान्यथाबोधकतायास्तेना ऽभिहितत्वादित्यर्थ इति तत्त्व० ।

† नैतदिति, अयमाशय इति ३ पु· । ‡ यत्र ह्येकमिति २ पु· ।
§ प्रयोगान्तरेष्वन्यथाशक्तीति २ पु· । ‖ इहापि तथाविधार्थे २, ३ पु· ।
¶ सामान्यदर्शनेनेति १ पु· । ** शब्देति नास्ति १ पु· ।
†† इत्यादिना सामान्येति २ पु· । ‡‡ अन्यथेति सकृदेव २, ३ पु· ।
§§ अज्ञातमिति १, ३ पु· ।

श्चित् स्थानजिघृक्षया कञ्चिदुत्थापयन्नाह पित्रा त्वमाहूत इति । स च पितुराह्वानं प्रतिपद्य समुत्तिष्ठन्नीतरस्तु तच्च निबिशते । समुत्थितश्च सन्नितरो जानाति स्थानजिघृक्षयेदमुक्तमिति । ननु न पितुराह्वाने तात्पर्यहीने संसर्गबुद्धिरिति चेन्न । उत्थानादिप्रवृत्तिदर्शनात् । *प्रवृत्तेश्च संसर्गज्ञानपुरःसरत्वाभावे प्रवृत्त्या संसर्गे शब्दशक्तितात्पर्यकल्पनायोगात् । ननु शब्दो न मिथ्याज्ञानमुत्पादयति । नैष दोषः । सत्यपि पितुराह्वाने तथाभूतज्ञाने च तात्पर्यं वक्तुरन्यचेत्येतावद्दूषितम् । तस्माज्ज्ञाततया तात्पर्यं प्रमितिहेतुः । अथ ज्ञाततया । तर्हि कुत्र तात्पर्यमवगम्यते शब्दस्याच तात्पर्यमित्यभ्रयविषयसापेक्षत्वात्तात्पर्यस्य । न तावत्पदार्थेषु तात्पर्यं वाक्यार्थज्ञाने ऽनुपयोगात्संसर्गश्चानवगतो न तात्पर्यविशेषणतया ऽवगतुं शक्यते ।

स्यादेतत् । † पदावगतेषु पदार्थेषु परस्परान्वय ‡ योग्यतानिमित्तः संसर्ग उत्प्रेक्षयावगम्यते तद्विषया च तात्पर्यावगतिरिति । न तावत् स्मृतिसंशयविपर्यासानामन्यतमः संसर्गावबोधः । तच्च परिशेषाच्छब्दजन्यतया संसर्गबोधः प्रमाणमेव स्यात् । नच शक्तिरिव सामान्योपाधौ तात्पर्यम् । प्रतिवाक्यं § विशेषतात्पर्यभेदात् । किंच । पदार्थवत्संसर्गेपि शक्तिमात्रनिबन्धनो ऽवगमो न तात्पर्यनिबन्धन इत्यनुमातुं शक्यते । शब्दानां च पदार्थप्रदर्शनमुखेन तात्पर्योपाध्यु ‖ पयोगितयान्यथासिद्धत्वात् ¶ तात्पर्य्यमात्रावगमाधीनः संसर्गबोधो न शब्दनिबन्धनश्च स्यात् । तस्मात्पदानामेव संसर्गप्रतिपादनसामर्थ्यान्मुख्यलक्षणादिद्वारेण प्रमाणान्तराविरुद्धे संसर्गे प्रतिपन्ने दोषान्तरनिमित्तसंशयविपर्यासाविज्ञाननिराकरणाय तात्पर्यावगम इति सिद्धम् । तच्चेदं चयमप्यवश्यमित्यारभ्यालमतिविस्तरेणेत्यतः प्राक्तनेन ग्रन्थेनोक्तमर्थं
९० ५ निगमयति समर्थनं प्रदर्शयितुम् । अस्ति तावदिति स्पष्टार्थः ।

* प्रवृत्तेरिति- अर्भक समिधमाहरेत्याचार्यवाक्यश्रवणसमनन्तरमुपजायमानां मध्यमनरप्रवृत्तिं निरीक्ष्य व्युत्पित्सुरित्थमनुमिमीते अयं नरः संसर्गबोधवान् संसृष्टप्रवृत्तित्वात् संप्रतिपन्नवदिति संसृष्टप्रत्ययमनुमाय तस्य कारणविशेषायेक्षायां शब्दान्वयव्यतिरेकाभ्यां शब्दस्य तत्र सामर्थ्यं कल्पयति· तच्च न स्यात्· प्रवृत्तेः संसर्गज्ञानाऽव्याप्तत्वादित्यर्थ इति तत्व० ।

† पदार्थेषु पदावगतेष्वित्ति २, ३ पु· । ‡ योग्यतावगमेति शोधितम् १ पु· ।
§ विशेषेतात्पर्येति १ पु· । ‖ उपयोगितयैवान्येति २ पु· ।
¶ तात्पर्यावगमाधीन इति ३ पु· ।

ननु न ब्रह्म सामान्येनापि लोके प्रतिपत्तुं शक्यं प्रमाणान्तरागोचरत्वात् । नाप्यागमसामर्थ्यात् तच्च प्रयुज्यमानस्य ब्रह्मशब्दस्यानवधृतार्थत्वात् । न च पदमात्रादेवार्थान्तरसिद्धिः जात्यादयर्थान्तरेषु प्रसिद्धत्वात् । तस्मान्न प्रसिद्धमुद्दिश्य विचारविधानोपपत्तिरिति चोदयति कथमिति । तच्च श्रुतिसू- ७० ६
चयोर्ब्रह्मशब्दप्रयोगसामर्थ्यादेव जात्यादिव्यतिरिक्तं किंचिद्वस्तु प्रतिपत्तुं शक्यत इत्यत आह ब्रह्मशब्दस्तावदित्यादिना । नन्वर्थान्तरसद्भावे किं प्रमाणमिति * प्रयोगार्थापत्तौ इत्याह अतो नूनमन्यदेवेति । ननु श्रौतप्रयोगानुपपत्तिर्नापूर्वमर्थं गमयति लौकिकप्रयोगाधीनत्वाच्छ्रौतप्रयोगस्येति तत्राह † तेन ‡ स्वर्गापूर्ववदेव वेति । अपूर्वमिति तानि धर्माणि प्रथमान्यासन्नित्यादौ वेदे धर्मशब्दप्रयोगोऽभिप्रेयते । ननु वाक्ये प्रयुक्तं पदं प्रमाणान्तरानधिगतमर्थं न प्रतिपादयति पदार्थांशे ऽनुवादमात्रत्वादित्याह नैतत्सारमिति । न प्रत्यक्षवत् संबन्धग्रहणाभावान्नानुमानादिवच्चेत्यर्थः । ननु दर्शितं स्वर्गादिवदिति नेत्याह स्वर्गाद्यर्थापीति । सन्निहितानेकवाक्यार्थसामर्थ्यलभ्यः स्वर्गादिपदार्थ इत्यर्थः । तच्च वाक्यार्थप्रमितिविवक्षया प्रसिद्धार्थैः पदान्तरैः सहाऽप्रसिद्धार्थपदप्रयोगानुपपत्तिरेव प्रतिपादयेन संबन्धग्रहणानपेक्षया पूर्वपदार्थं पदवाच्यत्वेन प्रतिपादयतीति परिहरति यस्मिन् वाक्ये एकं पदमिति । विप्रलम्भभ्रान्त्यादिदोषरहितवेदसूक्तवाक्यार्थनिर्णयस्यावश्यलभ्यत्वादिति भावः । ननु सहप्रयोगानुपपत्तिर्न्नियामकाभावादयं कंचिदर्थमुपस्थापयतीति तत्राह तच्च निगमनिरुक्तेति । निगमो नाम प्रसिद्धार्थतदव- ,,
यवौ परित्यज्य शब्दस्य शब्दैकदेशानुगमेनार्थान्तरे वृत्तिः यथा देहात्मादिशब्दानामुपचितवस्तुसन्ततगमनवत्पदार्थादावेकदेशानुगमेन वृत्तिः । प्रसिद्धार्थतदवयवोपादानेनार्थान्तरवृत्तौ लक्षणागुणवृत्तिप्रसङ्गात् । निरुक्तं नाम शब्दस्य सर्वावयवार्थानुगमेन प्रसिद्धादर्थादर्थान्तरे वृत्तिः यथा सोमशब्दस्य पार्वतीसहितमहेश्वरे वृत्तिः । व्याकरणं प्रत्ययविधानसामर्थ्यादर्थनिश्चयः । यथा वादीति § ताच्छील्ये णिनिप्रत्ययविधानसामर्थ्याद्वदनशीलो गम्यते । ननु

* प्रयोगार्थापत्तीरित्याहेति १, पु·, प्रयोगार्थापत्तिरित्याहेति २, ३ पु· ।
† तेनेति अपूर्वमिति–इति ३ पु· । ‡ स्वर्गापूर्वदेवतेतीति १ पु· ।
§ ताच्छील्यप्रत्ययेति २ पु·, ताच्छील्येप्रत्ययेति ३ पु· ।

प्रसिद्धिबलेनाप्रसिद्धमुपादीयते नचाप्रसिद्धेन प्रसिद्धं त्यज्यत इत्यत्र को
७० १६ विशेष इति तत्राह नहि प्रसिद्धिरप्रसिद्धेति । अप्रसिद्धि * र्नैसर्गिकप्रागभावः प्रसिद्धपदार्थैः सह वाक्यार्थनिर्णयाय प्रयोगानुपपत्तिरेवागन्तुकी तस्य प्रागभावस्य निवृत्तिहेतुरिति भावः । नन्ववयवार्थसामान्यानुगमानां सर्वतोविप्रकृतिसम्भवादुपादेयार्थनियमायोगाद्वाक्यार्थप्रतिपत्तिनियमो न स्यादिति चोदयति ननु निगमादिवशेनेति ।

अत्र निगूढाभिसन्धिरुत्तरमाह न तर्हि निगमादीनामिति । रूढिसमार्थ्यादेव सर्वत्रवाक्यार्थनियमे लोकप्रसिद्धं वृत्त्यन्तरमनर्थकं स्यादिति भावः । पूर्ववादी निगमादीनामर्थवत्ता † माह भवत्यर्थवत्तेति । स्वार्थादन्यत्रेति अर्थान्तर ‡ विवक्षयेत्यर्थः । विनियोगादिति । वाक्यार्थसंसर्गं निमित्तीकृत्येत्यर्थः । अयं भावः । वाक्यार्थनिर्णयं निमित्तीकृत्य पदान्तरैः सह प्रयोगानुपपत्तिरेव निगमादिवशेनार्थ § मादधाना सन्निहितपदार्थसंसर्गयोग्यतया प्रयोजनपर्यन्तमेव पदार्थ ‖ मादत्त इति वाक्यार्थनियमसिद्धिरिति । सिद्धान्ती गूढाभिसन्धिं विवृणोति एवं तर्ह्येकार्थनियमायेति । ¶ प्रथमप्रयोगानुपपत्तिर्निगमाद्यनुगृहीता फलपर्य्यन्तवाक्यार्थान्वयिपदार्थाकाङ्क्षानुगृहीता च नियतपदार्थोपादानहेतुभावे रूढेर्न विशिष्यत इत्यर्थः । नन्वेवमपि कथं ब्रह्मशब्दस्य जात्यादिविलक्षणे निरतिशयपुरुषार्थे मुमुक्षोर्ज्जिज्ञासायोग्ये वस्तुनि निगमवशाद् वृत्तिरिति तदाह तदत्र ब्रह्मशब्दे व्युत्पाद्यमान इति । नन्वेवमपि यत्किंचिदापेक्षिकमहत्त्वसंपन्नं वस्त्वनुगम्यतामिति नेत्याह ** प्रयोगानुगमे चासतीति । तत्र हेतुर्वाक्यार्थान्वयीति । तत्राल्पत्वं नाम वस्तुनो देशकालवस्तुपरिच्छेदः तद्व्यावृत्तिर्निरतिशयमहत्त्वम् तत्रोपयदादिसङ्कोचकाभावे जिज्ञास्यस्य पुरुषार्थतया वाक्यार्थान्वयसम्भवे च तदपि
,, २६ ब्रह्मपदेनानुगम्यत इत्याह †† ततश्च कालकृतावच्छेदनिमित्तस्येत्यादिना । बृहत्त्वं चेत्यतः प्राक्तनेन ग्रन्थेन । भाष्ये नित्यशब्देन त्रिविधमपि महत्त्वं

* नैसर्गिको प्रागभाव इति १ पु· ।
‡ विवक्षयापीत्यर्थ इति १ पु· ।
‖ आददातीति १ पु· ।
** प्रयोगानुगमेऽसतीति १ पु· ।
† आह भवत्विति ३ पु· ।
§ आददानेति १, २ पु· ।
¶ प्रथमेति नास्ति १ पु· ।
†† ततश्चेतीति ३ पु· ।

दर्शितमित्यर्थः । ननु बुद्धुत्वादयो गुणा न ब्रह्मत्वोपयोगिनः * तत्कथं ब्रह्मपदादनुगम्यन्त इति चोदयति कथमिति । नैष दोषः । गुणतो † ऽपकृष्टेऽप्य- ७१
ल्पबुद्धिदर्शनात् । तथाहि । गुणहीनं दोषभूयिष्ठं च वस्त्वल्पमविद्यमानसमं मन्यन्ते । गुणभूयिष्ठं दोषहीनं च महान्तं कथयन्ति । अतो गुणतो ‡ ल्पत्वनिराकरणेन महत्त्वं दर्शयितुं बोधगुणहीनस्य गुणतो ऽपकृष्टतयाल्पत्वाद् बुद्धुत्वमनुगम्यत इत्याह अबोधात्मकं वस्त्वित्यादिना । तथा चेतनस्यापि संसारित्वे दोषभूयिष्ठत्वा § द्गुणतो ऽपकर्षान्निरतिशयमहत्त्वासिद्धेः । सर्वदोषरहिततया मुक्तत्वोत्कर्षोप्यनुगम्यत इत्याह ‖ मुक्तमिति चाविद्याकामकर्मपरतन्त्र इति । चेतनस्यापि मुक्तस्य सर्वविषयज्ञानाभावे सर्वकार्यनियमनादिशक्त्यभावे च परिशिष्टज्ञेयकार्यविषयज्ञाननियमनशक्त्यभावात्ततो ऽपकर्षादल्पता स्यात् तद्व्यावृत्त्यर्थमाह ¶ सर्वज्ञं सर्वशक्तिसमन्वितं च तदित्यादिना । ननु ब्रह्मशब्दप्रयोगेपि जातिजीवकमलासनशब्दराशिषु नैतावानर्थः प्रतीयते तच्च कथमनुगमादप्येतादृशस्यार्थस्य प्रतिपत्तिरिति तत्राह सिद्धे हि वस्तुनि प्रयोग इति । प्रमाणान्तरगृहीतेर्थे प्रयोगसामर्थ्यादेवार्थप्रतिपत्तावऽल्पं वा महद्वा यथा प्रमाणान्तरेण ** प्रतिपद्यते तथैव शब्दार्थः प्रतिपत्तव्यः । यदा पुनः प्रयोगसामर्थ्यमनपेक्ष्य शब्दावयवसामर्थ्यादेवार्थो ऽनुगम्यते । तदा प्रमाणान्तरोपपदप्रकरणानां सङ्कोचहेतूनामभावाद्यथासामर्थ्यं मुख्य एवार्थः प्रतिपत्तव्य इति भावः । उक्तमर्थं भाष्यमवतारयति तदेतदाहेति । ,,

ननु सौचस्य शब्दस्यार्थो ऽनुगम्यते किं वा श्रौतस्य । न तावत्सौचस्य । पौरुषेयप्रयोगस्य प्रमाणान्तरापेक्षत्वात्तदभावात् । नापि श्रौतस्य । सत्यं ज्ञानमित्यतो वा इमानीत्यादिशास्त्रे निर्णीयमानार्थत्वा ††दनुगमानपेक्षणादिति । नैष दोषः । श्रुतिप्रमाणावगतविषयतया तन्मूलस्यैव सौचस्य ब्रह्मशब्दप्रयोगस्योत्तरसूत्रप्रतिपाद्यश्रुतिप्रमाणगम्यब्रह्मस्वरूपमनपेक्ष्यैवार्थानुगममुखेनार्थापादनादुत्तरसूत्रसाध्यसिद्धवत्कारेणार्थापादानानुपपत्तेश्च । श्रौतस्य वा ऽयं ब्रह्मशब्द-

* ते कथमिति १ पु· ।
‡ अबोधत्वेति ३ पु· ।
‖ मुक्तमितीति ३ पु· ।
** प्रतिपाद्यते–इति २, ३ पु· ।
† अपकर्षेति १ पु· ।
§ गुणापकर्षादिति १ पु· ।
¶ सर्वज्ञेतीति ३ पु· ।
†† अनुगमानपेक्षत्वादिति ३ पु· ।

स्यार्थानुगमो वर्ण्यते । वाक्यार्थान्वयितया प्रयुक्तस्य ब्रह्मशब्दस्य वाक्यप्रमाणमनपेक्ष्यैवान्यतःसिद्धेर्वक्तव्यत्वादनुगमापेक्षणात् । ननु तर्हि पदानुगमस्य वर्णितविशिष्टार्थविषये सम्भावनामात्रबुद्धिहेतुत्वात्प्रमाणान्तरानधिगतस्य पदार्थस्य कथं वाक्यार्थान्वयितया * तत्र निर्णयहेतुत्वमिति चोदयति † नन्वेवमपि
३१ २० व्युत्पत्त्यनुसरणेनेति । तत्र जिज्ञासापदस्य ‡ सन्निहितस्या ऽनिर्णीतजिज्ञास्य वस्तुनापेक्षत्वाऽऽक्षदपेक्षितार्थसमर्पणस्य ब्रह्मशब्दस्यानिर्णीतप्रतिपन्नवस्तुमात्रसमर्पणेन वाक्यार्थनिर्णयहेतुत्वं न विरुध्यत इति परिहरति सत्यमेवम् ऋत एवेति । सर्वस्यात्मत्वाच्चेति भाष्यतात्पर्यार्थमाह इदमपरं ब्रह्मशब्दार्थस्येति । नन्वात्मन्यपि न प्रमाणम् । प्रत्यक्षादविषयत्वादप्रामाणिकस्य च द्विचन्द्रादिवदऽवस्तुत्वादिति तत्राह सर्वो ह्यात्मास्तित्वमिति § ननु शून्य एवायमात्मा प्रतिभासते कथ ¶ मात्मास्तित्वसिद्धिरिति शून्यवादमाशङ्क्याह यदि नात्मास्तित्वप्रसिद्धिः स्यादिति । नन्वात्मपदार्थे प्रत्यक्षावगते कथं ब्रह्मपदार्थस्य प्रसिद्धिरिति तदाह आत्मा च ब्रह्मेति । नन्वनादिवृद्धव्यवहारे ब्रह्मशब्दस्यात्मनि प्रयोगादर्शनात्कथं ब्रह्मशब्देनात्मा जिज्ञास्यत्वेनोपादीयत इति चोदयति कथं पुनरात्मा ब्रह्मेति । लौकिकप्रयोगाभावेपि वैदिकप्रयोगसामर्थ्यात्स वा अयमात्मा ब्रह्मेत्यादौ ब्रह्मशब्देनात्मा जिज्ञास्यत्वेनोपादीयत इति परिहरति वेदान्तेष्विति । ननु ब्रह्मशब्दाभिधेयो ऽयमात्मा नाहंप्रत्ययवेद्यः किंत्वागमैकसमधिगम्य इति नेत्याह आत्मानमेवेति । ततश्च प्रतिपन्नमुद्दि-
३२ १ श्य विचारसम्भवाच्छक्यप्रतिपादयता सिद्धेत्याह तदेवमहंप्रत्यय एवेति । ननु वेदान्तेषु सञ्ज्ञापरतया नात्मनि ब्रह्मशब्दः प्रयुज्यते किंत्वात्मनो ब्रह्मशब्दार्थतादात्म्याभिप्रायेण ततश्चातिरिक्तार्थत्वाद् ब्रह्मशब्देनात्मोपादीयत इत्ययुक्तमिति । नैष दोषः । अतिरिक्तब्रह्मस्वरूपानर्णयविवक्षया प्रसि-

* तंत्रिर्णयेति १, ३ पु· । † व्युत्पत्त्यनुसरणेतीति नन्वेवमितीति ३ पु· ।

‡ सन्निहितानिर्णीतवस्त्विति १ पु· ।

§ तेनापेक्षितस्यार्थस्य समर्पणं येन स तथोक्तः. प्रतिपन्नत्वे सत्य ऽप्रामाणिकत्वापराधेना ऽजिज्ञास्यत्वादर्शनात्प्रतिपन्नत्वमात्रं जिज्ञास्यत्वम्· इतरथा जिज्ञासावैयर्थ्यमित्यर्थ इति तत्त्व० ।

‖ योऽयमात्मा प्रतिभासते स शून्यएवेति संबन्धः· किमात्मनः शून्यत्वमनुभवबलात् उत प्रमाणान्तरात्· नाद्यः, तथाननुभवात्· न द्वितीयः, तदनिरूपणादिति समाध्यभिप्राय इति तत्त्व० ।

¶ आत्मास्तित्वप्रसिद्धिरिति १, २ पु· ।

द्वांशस्य ब्रह्मशब्देनोपादानादेकस्मिन्नप्यर्थे बिम्बप्रतिबिम्बादिवत् प्रतिभासाप्रतिभासोपपत्तेः ।

एवं तर्हि प्रत्यक्त्वगोचरतया ऽनन्यसाधारणत्वाभावा * द्विषयत्वं न सिध्यतीत्याक्षिपति यदि तर्हि लोके ब्रह्मात्मत्वेनेति । समाधत्त न तद्विशेषं प्रति विप्रतिपत्तेरिति । भाष्यार्थं विवृणोति सत्यम् अहमित्यात्मनि प्रत्यय इत्यादिना । नन्वन्यस्मिन्विप्रतिपन्ने कथमन्यन्निर्णीयत इति तदाह ताश्च वस्तुत इति । ननु प्रसिद्धे पदार्थे कथं विप्रतिपत्तिरिति † तत्राह ततः सामान्यतःप्रसिद्धमपीति । नन्वप्रतिपन्नविशेषं वस्तु स्वयमप्रतिपन्नमेवेति कथमुद्दिश्यविधानाभावे शक्यप्रतिपादयतेति तत्राह सामान्यतःसिद्धत्वाच्च शक्यत इति । ननु नास्ति ब्रह्मणि सामान्यविशेषभावः । सत्यम् । ‡ शरीरेन्द्रियमनोबुद्धिशून्यकर्तृभोक्तृसर्वज्ञब्रह्मात्मनां परागव्यावृत्तप्रत्यग्धर्मानुगमेन सिद्धिः सामान्यम् । तच्च प्रत्यग्धर्मानुगमेन सिध्यन् विशुद्धस्वरूपेणापि सामान्यतःसिद्ध इत्युच्यते । ततः प्रत्यक्त्वानुरक्तविशेषान्तरैर्विप्रतिपद्यते । तच्च विशेषान्तरानुरागविरोधिना ऽसाधारणस्वरूपेण निर्णीयत इति । कथं विप्रतिपत्तिः तां दर्शयति देहमात्रमित्यादिना । कथं पुनः प्रत्यक्त्वसिद्धे पदार्थे जायमानस्य प्रयुज्यमानस्याहंप्रत्ययस्य तच्छब्दस्य चानेकार्थसाधारण्याऽऽशङ्क्या विप्रतिपत्तिरिति तत्र दृष्टान्तमाह तद्यथा गोशब्दस्येति । जातिवैदकैः प्रतिपन्ना । व्यक्तिः सांख्यादिभिः । उभयं वैयाकरणैः । आकृतिरवयवसंस्थानमार्हतादिभिः । चितयमपि नैयायिकैः । क्रियागुणसंस्थानादयोपि यथादर्शनम् । इति यथा गोशब्दप्रयोगे जात्यादीनामन्वयव्यतिरेकनियमादेकस्यापि व्यभिचाराभावाच्छब्दार्थत्वाशङ्का तथा शरीरादीनामन्वयव्यतिरेकनियमादात्मत्वाशङ्केति भावः ।

स्थूलमूर्त्तनाकारतया स्थूलमूर्त्ततारतम्यान्निरासक्रमसिद्धेश्च शरीरमारभ्य विप्रतिपत्तिं दर्शयति तदाह देहमात्रं चैतन्यविशिष्टमिति । शरीरस्यात्मत्वश- ७२ ,,

* विषयत्वेनेति १ पु० । † तदाहेति २ पु० ।

‡ शरीरेति० परागव्यावृत्तश्च प्रत्यग्धर्मश्चेति परागव्यावृत्तप्रत्यग्धर्मः, तस्यानुगमेनेति० विभागः० धत्ते इति धर्मोऽधिष्ठानमर्हमिति प्रतीयमानं प्रत्यक्त्वं सामान्यम्, तदुल्लिखिततया शरीरादयो भासन्त इत्यर्थः० यथैकस्मिन्देवदत्ते प्रतियोगिभेदापेक्षं पितृत्वादिकं भासते, तथैकस्यां चिति अनात्मत्वेन व्यावर्त्यमानपरप्रभूतसापेक्षं प्रत्यक्त्वम्, तच्चं शरीरेन्द्रियादिसाधारणं प्रथते, शरीरादयस्तु व्यावृत्ता इति सामान्यविशेषभावासिद्धिरित्यर्थ इति तत्त्व० ।

७२ १५ ङ्कायां प्रत्यक्षं प्रमाणमाह तथाहि मनुष्योहमिति । देहशब्दार्थमाह देहमात्रमितीति । त्वगिन्द्रियस्य निरपेक्षाधारः शरीरं नाम । तत्रा* वयवान्तरेषु च्छिद्यमानेष्वपि प्रायेण त्वगिन्द्रियं तिष्ठति न शिरश्छेद इत्यभिप्रायेण † सशिरस्केत्युच्यते । ननु भूतचतुष्टयतत्त्ववादिनां पञ्चमं चैतन्यं तत्त्वमवशिष्यत इति तन्निवृत्त्यर्थमाह मात्रशब्देन देहातिरिक्तमित्यादिना ।

पक्षान्तरमाह इन्द्रियाण्येवेति । ननु यस्मिन्विज्ञानमुत्पद्यते स चेतनः । नहीन्द्रियाश्रयं विज्ञानमुत्पद्यते मनुष्योहं जानामीत्यवगमात् तत्र कथं तेषां चेतनत्वमिति तत्राह इन्द्रियाणां चक्षुरादिमनःपर्यन्तानामिति । अयमाशयः । सत्यपि शरीरे विषयज्ञानानामिन्द्रियैरन्वयव्यतिरेकवत्त्वात् करणतया ऽन्वयव्यतिरेकवत्त्वकल्पनादाश्रय त्रान्वयव्यतिरेककल्पनस्याभ्यर्हितत्वादिन्द्रियाण्येव ‡ विज्ञानाश्रयाणीति । § नन्वेकस्मिञ् शरीरे बहूनामिन्द्रियाणां चेतनत्वे रूपमद्राक्षमिदानीं शृणोमीति प्रत्यभिज्ञा न स्यात् । भोक्तृत्वं च रूपरसादिषु युगपत्स्यान्न क्रमेणेति तत्राह क्रमेण वरगोष्ठीवदिति । एकशरीराश्रयत्वमेव प्रत्यभिज्ञाक्रमभोगयोर्निमित्तं नैकत्वमित्यर्थः । ननु चेतनत्वेप्यहंप्रत्ययालम्बनस्यैवात्मत्वं तदभावान्नेन्द्रियाणामात्मत्वमिति तत्राह तथा चेन्द्रियधर्मसामानाधिकरण्यमहंप्रत्ययस्येति । शरीरस्याप्यहंप्रत्ययालम्बनत्वविज्ञानान्वयव्यतिरेकयोरिन्द्रियात्मनामाश्रयत्वेनाप्युपपत्तेरिति भावः ।

,, २५ पक्षान्तरमाह मन एव चेतनमिति । किमत्र प्रापकं प्रमाणमिति तदाह दृश्यते हि स्वप्न इति । अयमर्थः । स्वप्ने चक्षुराद्यभावेपि केवले मनसि विज्ञानालम्बनत्वाहंप्रत्ययविषयत्वयोरविकलयोर्दर्शनाद्रूपादिविज्ञानानां चक्षुराद्याश्रयत्वे तदभावे केवले मनसि रूपादिस्मृत्यनुपपत्तेराश्रयान्तरे चाऽसिद्धे चक्षुरादीनां ज्ञानान्वयव्यतिरेकयोः करणविषयतयाप्युपपत्तेरहंप्रत्ययस्य च देह इव करणे कर्तृत्वोपचारात्सिद्धेः प्रत्यभिज्ञयाः ‖ शरीरादाविवैकत्वनिबन्धनत्वात् एकाश्रयत्वात्प्रत्यभिज्ञायामेकप्रासादसमाश्रितानामपि तत्प्रसङ्गात् । तस्माच्चक्षुरादिकरणशरीराधारं मन एवात्मेति ।

* अवयवान्तरेषु भिद्यमानेति १ पु० । † सशिरस्कमित्युच्यत इति ३ पु० ।
‡ विज्ञानाश्रया इति तु युक्तं स्यात् । § नन्वेकशरीरे-इति १ पु० ।
‖ शरीरादावेकत्वेति ३ पु० ।

पक्षान्तरमाह विज्ञानमात्रं क्षणिकमित्येक इति । वर्णचयशब्देन वर्ण- ७३
चयाभिधेयं विज्ञानमात्रमुच्यते । * तेन विज्ञानाश्रयस्यात्मनो ऽभाव उच्यत इति । कथम् । शरीरेन्द्रियाणां तावद्विज्ञेयत्वादविज्ञानत्वाज्ज्ञानात्मत्वात् मनसश्च समनन्तरप्रत्ययव्यतिरेकिणो ऽभावादाश्रयान्तरादर्शनादिति । कस्तर्ह्यात्मेति तदाह तेन विज्ञानमेवेति । तर्हि सांख्यादीनामिव विज्ञानमेवानादिनिधनमात्मेति तत्राह स्वरसभङ्गुरमिति । कथं तर्हि प्रत्यभिज्ञानेनैकत्वावगम इति तदाह अविरतोदयमिति । ज्वालायामिव संततविज्ञानोदयसादृश्यात् प्रत्यभिज्ञेत्यर्थः । कथं तर्हि कर्मज्ञानबन्धमोक्षाद्याश्रयत्वं क्षणिकस्येति तदाह अखिललोकयात्रानिलयमिति । विज्ञानानां हेतुफलसन्तानमात्रादेव कर्मफलसम्बन्ध इत्यर्थः । ननु स्थायिन्यात्मन्येकस्मिन्सर्वमेतन्मुख्यमुपपन्नमिति तत्राह अनुभवभग्नपक्षान्तरमिति ।

पक्षान्तरमाह शून्यमिति । विज्ञानव्यतिरिक्तानां तावदात्मत्वं विज्ञेयत्वात्प्रत्याख्यातम् । न च विज्ञानस्यात्मत्वमस्ति सुषुप्ते शून्यतावगमात् । विद्यत एव तत्रापि विज्ञानप्रवाह इति चेन्न । विषयावभासाभावात् निरालम्बनज्ञानायोगाच्च । साकारज्ञानानामेव सालम्बनत्वं न सौषुप्तिकानामिति चेन्न । विशेषाभावात् अविशेषानुमानाच्च उत्थितेना ऽस्मर्यमाणविज्ञानत्वाच्च सुषुप्ते विज्ञानाभावः । किंच । † सविकल्पकस्य स्वविषयविपरीतनिर्विकल्पकालम्बनत्ववन्निर्विकल्पकस्यापि सत्प्रत्ययत्वा ‡ त्स्वविषयविपरीतशून्यालम्बनत्वानुमाना§दुत्थानप्रत्ययः शून्यालम्बन इति गम्यते तदेतदाह सुषुप्ते विज्ञानलेशस्याप्यभावादिति । मा भूद्विज्ञानलेशः ततः किमिति तदाह अकस्मादेवेति । ,,
उत्थानप्रत्ययस्य पूर्वसमनन्तरप्रत्ययशून्यतया कारणशून्यता स्यादिति भावः ।

* तेनेत्यस्य स्थाने नचेति । २ पु· ।

† सविकल्पकस्येति, संज्ञासंज्ञिसंबन्धविशिष्टवस्तुलक्षणो यो विषयः, तस्य विपरीतं यन्निर्विकल्पकं ज्ञानं वैपरीत्यं च वस्तुमात्रग्राहित्वेन, तदाऽऽलम्बनं कारणं यस्य तत्तथोक्तम्, तस्य भावः तत्त्वम्, तद्वदित्यर्थः ।

‡ स्वविषयविपरीत शून्येत्यस्यायमर्थः–निर्विकल्पकज्ञानस्य विषयः सन्मानम्, तस्य विपरीतं यच्छून्यं, तदालम्बनं कारणं यस्य तत्तथोक्तम्, तस्य भावस्तत्त्वम्, तदनुमानादित्यर्थः ।

§ उत्थानप्रत्यय इति· उत्थानसमनन्तरमुत्पद्यमानो निर्विकल्पप्रत्यय इत्यर्थः· तथा च प्रयोगः–यः सत्प्रत्ययः स स्वविषयविपरीतजन्यः, यथा सविकल्पकप्रत्ययः, सत्प्रत्ययश्चायमिति तत्त्व० ।

१३ ६ मा भूत्कारणमिति चेतदाह अकारणस्य कादाचित्कस्येति । तस्माच्छून्यालम्बनो ऽसदवभासो ऽयमिति ।

विप्रतिपत्त्यन्तरमाह अस्ति देहादिव्यतिरिक्त इति । कथं पुनर्वि-
, ८ ज्ञानशून्यव्यतिरिक्तस्यात्मनः सिद्धिरिति तदाह अहमुल्लेखशून्यस्य भोक्तृत्वस्येति । अयमाशयः । अहमित्यवभासमानो विषयसंविदाश्रयत्वेन भोक्ता न कदाचिदपि ममप्रत्ययालम्बनो भोक्तृत्वमनुभवति । स चा ऽबाधितप्रत्यभिज्ञागोचरो न सुषुप्ते ऽभावमनुभवितुमर्हति । ततः शून्यक्षणिकविज्ञानव्यतिरिक्तो भोक्ता प्रत्यभिज्ञया सुषुप्तेपि सत्तावगमात् । ज्ञानेच्छाद्वेषप्रयत्नसुखदुःखेषु चाश्रयैकत्वावगमात् । तथाहि । प्रवृत्तिनिमित्तभूतमभिलषितसाधनज्ञानमुत्पद्यमानमित्थमुत्पद्यते । प्रथमं वस्तुनि दृष्टे तदुपभोगानन्तरं सुखसंवेदने च द्वितीये संजाते पुनर्वस्त्वन्तरदर्शने तृतीये समुत्पन्ने चतुर्थे च दृष्टस्य वस्तुनः पूर्वसुखसाधनसामान्यानुसंधाने पञ्चम्यामवस्थायामिदं सुखसाधनमिति ज्ञानमुत्पद्यते । ततः पञ्चस्व ऽवस्थास्वेकमात्मानमन्तरेणेदं ज्ञानमनुपपन्नम् । अन्यदृष्टे ऽन्यस्य सुखानुभवाभावादन्यानुभूतेन्यस्य व्याप्त्यनुसंधानाभावादन्यानुसंहिते ऽन्यस्य सुखहेतुज्ञानाभावात् संतानभेदेष्वदर्शनात् । तथा दुःखहेतुताज्ञानमपि पञ्चावस्थमात्मानं कल्पयति । तथा हिताहितज्ञानपूर्वकौ रागद्वेषौ षष्ठावस्थौ षडवस्थमात्मानं कल्पयतः । रागद्वेषाभ्यां च हानोपादानप्रयत्नो जायमानः सप्तावस्थमात्मानं कल्पयति । तथा प्रयत्नानन्तरमष्टम्यामवस्थायां सुखदुःखे जायमाने अष्टावस्थमात्मानं कल्पयतः । नच क्षणिकेष्वात्मसु संतानभेदेष्विवायं व्यवहारः सम्भवति । तथा नाहं ज्ञानमित्यहमुल्लेखो विज्ञानेषु किं तु मम ज्ञानमिति । नच ममात्मेतिवदुपचारः बाधाभावात् । इतरच संबन्धप्रत्ययस्यात्मशब्देन बाधात् । तस्मादहमुल्लेखप्रत्यभिज्ञाभ्यां * शून्यविज्ञानव्यतिरिक्त आत्मा । तथा ताभ्यामेव हेतुभ्यां मनोपि नात्मा । सुषुप्ते मनसो ऽभावेप्यात्मनि प्रत्यभिज्ञानात् । अहं मन इत्यनवगमान्मे मन इति च प्रतिभासात् । ज्ञानायोगपद्येन करणतयैव तस्य कल्पनात् । तथा ताभ्यामेव हेतुभ्यां नेन्द्रियाण्यप्यात्मानः । रूपर-

* शून्यविज्ञानभेदव्यतिरिक्त इति १ पु० ।

सादविज्ञानपञ्चके द्रष्टुः प्रत्यभिज्ञानात् । स्वप्ने चक्षुरादिव्यवहाराभावेऽप्यहमित्यात्मनि परिपूर्णप्रत्ययात् । ममेन्द्रियाणीति चावगमादिन्द्रियाणामहमुल्लेखव्यतिरेकात् । तथा शरीरमपि नात्मा । स्वप्ने शरीराकारावभासाभावेऽप्यहमित्यात्मनि परिपूर्णप्रत्ययादहमुल्लेखव्यतिरेकात् । शरीराकारसंसर्गशून्येऽप्यहमिति द्रष्टरि प्रत्ययः शरीरादात्मनो भेदे प्रत्यक्षप्रत्ययो भवति । मम शरीरमिति च व्यतिरेकप्रत्ययात् । नन्वहं काणोऽहं मनुष्य इति च शरीरेन्द्रियेष्वहमुल्लेखादुपचारो भेदप्रत्ययः । अहमुल्लेख एवोपचारः किं न स्यात् । कस्तर्हि निर्णयः । अहमुल्लेखस्यै*वोपचारो युक्तः व्यतिरिक्तेऽप्यात्मन्यध्यासनिबन्धनत्वोपपत्तेः । नचाध्यासाद् द्विचन्द्रादिवद्भेदप्रत्ययः । द्वितीयेऽपि चन्द्रे चन्द्राकारवत् स्वप्नेऽपि पशुरहमिति प्रतिभासे मनुष्यशरीराद्याकारप्रत्ययप्रसङ्गात् । तथा जातमात्रस्य जन्तोर्भयहर्षशोकादिरुत्पद्यमानो दृष्टनिमित्ताभावे ऽस्मदादिवत्पूर्वानुभूतनिमित्तानुस्मृतिं कल्पयति ततश्चास्यैवात्मनो भयादिनिमित्तदर्शनवत्तया पूर्वजन्मसंबन्धसिद्धिः प्रत्यभिज्ञानात् । तदेवमहमुल्लेख † प्रत्यभिज्ञाभ्यां शरीरेन्द्रियमनोबुद्धिशून्यव्यतिरिक्त आत्मा सिद्धः ।

ननु स्थायित्वेऽपि कदाचिदभावः स्यात् । न तावत्परतो विनाशः । निरवयवस्य हेतूपरागाभावात्स्वसंसर्गिणश्च स्वकर्मफलसाधनतयोपात्तस्य फलहेतुतया ऽऽत्मनः स्थितिहेतुत्वादविनाशकत्वात् । नापि स्वत इत्याह स्थिरस्य चावधिहेतुत्वानुपलब्धेरिति । स्वसत्ताप्रयुक्तविनाशहेतुत्वानुपपत्तेः ७३
क्षणिकस्यैव तद्भावादित्यर्थः । कथं पुनस्तस्य कर्तृत्वभोक्तृत्वे इति तत्प्रतिपादयति निर्विकारस्य भोगासंभवादित्यादिना । कथं पुनस्तद्व्यतिरिक्तत्व- ,,
मिति स्पष्टार्थः ।

‡ तच्च नैयायिका मन्यन्ते । पार्थिवाऽऽप्यतैजसवायव्यानि भूम्यन्तरिक्षस्वर्गब्रह्मलोकेषु व्यवस्थया शरीराणि नाऽनेकैर्भूतैरेकं शरीरमारब्धमिति । तच्चास्मदादिशरीरं पार्थिवमेव पार्थिवगुणान्तरोपलब्धेरित्यत्रपादसूत्रात् । शरीरे गन्धविशेषोपलब्धेरित्यर्थः । नच रूपरसस्पर्शा भूतान्तरसमवायं गमयन्ति पार्थिवस्यापि तेषां गुणत्वात् । ननु क्लेदनपाचनव्यूहनावकाशानां शरीरे

* एवकारो ऽत्र नास्ति ९ पु० । † प्रत्ययाभ्यामिति ३ पु० । ‡ अत्रं नैयायिका इति ३ पु० ।

दर्शनाद् भूतपञ्चकारब्धत्वं शरीरस्येति । न । दूतिवस्त्रोदकादिवद्भूतान्तरसंयोगादपि व्यूहनाद्युपपत्तेः । श्रुतिश्च पृथिवीं शरीरमिति पार्थिवत्वमेव शरीरस्य दर्शयति । वैशेषिकास्तु प्रत्यक्षाप्रत्यक्षवृत्तेरप्रत्यक्षत्वात्पञ्चात्मकं न विद्यत इति । वाय्वाकाशयोरप्रत्यक्षत्वात् पञ्चात्मकं शरीरमप्रत्यक्षं स्यात् ।
१३ १४ तस्मात्पार्थिवमेव शरीरमिति कल्पयन्ति । तान्प्रत्याह भूतसंघातस्तावच्छरीरमिति । वस्त्रे क्लेदनस्य जले पाकस्य दूतौ व्यूहनस्य जलाग्निपवनविगमादपायेपि वस्त्रादीनामपचयादर्शनाच्छरीरस्य च जलादिविगमे तन्त्वपचयात्पटापचयवदपचयदर्शनात्सर्वतन्त्वारब्धपटवत्सर्वभूतारब्धं शरीरमिति गम्यते । अन्नमशितं त्रेधा विधीयत इत्यादिश्रुतिस्मृतिवादाश्च भूतपञ्चकं शरीरं कथयन्ति प्रत्यक्षाप्रत्यक्षवृत्तेरप्रत्यक्षत्वे सर्वावयविनां प्रत्यक्षाप्रत्यक्षावयववृत्तीनामप्रत्यक्षत्वापातः । तस्माद्भूतसंघातः शरीरमिति ।

अचावयव्यारम्भमनपेक्ष्य संघातमात्रस्य भोक्तृत्वाभावं दर्शयितुं विभजते तच्च व्यस्तानामिति । व्यस्तानां भोगेपि युगपत्क्रमेण वा भोगः । न तावद्युगपदित्याह यदि तावद्व्यस्तानामिति । तच्च दूषणमाह ततः स्वार्थप्रयुक्तत्वादिति । मा भूदङ्गाङ्गिभाव इत्यत आह न चाङ्गाङ्गिभावमन्तरेणेति । एकैकस्य भोक्तृत्वे संघातादन्यचापि भोगः स्यादित्याह तस्मान्न व्यस्तेषु भोग इति । अस्तु तर्हि क्रमः । ननु क्रमपक्षेपि भोक्तॄणां न संघातापत्तिरिति तत्राह विरोधाद्वरगोष्ठीवदिति । परिहर्तुं दृष्टान्ताद् वैषम्यमाह नैतदेवमिति । दार्ष्टान्तिकं विभजते इह पुनरिति । अयमत्राशयः । यदि तावद्परसगन्धस्पर्शानामन्यतमोपि चर्तुणां भोक्तॄणां विषयः तदा साधारणे विषये क्रमभोगे कारणं नास्ति । यदि रूपादिषु प्रत्येकं भूतानां भोक्तृ*त्वविषयव्यवस्था †तदापि युगपत्सर्वविषयसन्निधाने क्रमानुपपत्तिः । यथैकस्मिन्मुहूर्ते प्रत्येकं भोग्यकन्यावस्तुनि सन्निहिते वराणां गुणप्रधानतया संघाताभावः तद्वत् । भोक्तृषु च प्रत्यभिज्ञानुपपत्तिरिति । अस्तु तर्हि समूहस्य भोक्तृत्वम् । नन्वे-
२१ कस्मिन् भूते अविद्यमानं चैतन्यं कथं संघाते जन्यत इति तदाह तिलज्वालावदिति । तच्च वक्तव्यम् । किं संहतानां भोक्तृत्वमाहोस्विद् भोक्तॄणां सं-

* त्वप्रत्ययो नास्ति १ पु० । † तदपीति १ पु० ।

हतिरिति । संघातस्यावस्तुत्वाद् भोक्तृत्वानुपपत्तेः वस्तुत्वेपि भूतेभ्यो भेदे पञ्चमतत्त्वाभ्युपगमप्रसङ्गात् अभेदे भूतान्येव संघात इति तेषामेव * भोक्तृत्वात् तच्च संहतानां भोक्तृत्वे संहतिहेतुर्वक्तव्यः । आगामी भोग इति चेत् तं प्रति भूतानां समानत्वाद् गुणप्रधानभावेन संघातानुपपत्तिरित्याह † नैतदेवम् ७३ २
भोगेषु समूहाऽसम्भवादिति । ननु भोगान्वयात्प्राग् भूतानां कर्तृत्वात् कर्तृणां भोगे गुणभावेन संघातोपपत्तिरिति चोदयति कथमसम्भव इति । अन्योन्यं गुणप्रधानत्वाभावाद्भोगं प्रत्यपि प्राधान्याद् भोक्तृणां न संघात इति परिहरति भोक्तुर्भोगं प्रति प्राधान्यादिति । ननु भोगे शेषिणि तादर्थ्येन समूहो दृश्यत इति चोदयति ननु भोगेषीति । तच्च शरीरव्यतिरिक्तयोरेवात्मनोर्भोक्तोस्तादर्थ्येन शरीरयोर्गुणप्रधानभावेनान्वयो न भोक्तोरेवेत्यभिप्रेत्य परिहरति नैतत्सारमिति । ननु ज्वालायां तिलानां गुणभावबद्भोगे संघात इति ‡ नेत्याह तिलज्वालायां तु विपरीतमिति । अत एव भोक्तृणामेव संह- ,, २
तिपक्षो ऽनुपपन्नः ।

ननु कोऽयं संघातो नाम । § न च वनवदेकदेशतामात्रम् । तद्व्यापिनां भूतानां सर्वत्र विद्यत इति सर्वत्र चैतेन्यभोगयोः प्रसङ्गात् । नचावयव्यारम्भः । तस्य भूतेभ्यो भेदे तत्त्वसंख्यातिरेकात् अभेदे च भूतमात्रतया संघाताभावात् भेदाभेदानङ्गीकरणात् । ‖ ननु स्वतन्त्रं भूतचतुष्टयमेव अवयव्यादीनां पारतन्त्र्यात्संख्याऽतिरेकाभावात् । तर्हि न भूतानां भोक्तृत्वम् किंत्ववयविन एव । तच्च भूतव्यापारानपेक्षया स्वयमेव भोक्तुरवयविनः परतन्त्रताऽभावात् संख्यातिरेकः स्यात् जलादेश्च पृथिव्यादितन्त्रत्वा** न्यूना च संख्या स्यात् । नचे†† कद्रव्यबुद्ध्यालम्बनयोग्यतापत्तिः संघातः । अर्थस्वभावेनैकत्वापत्त्ययोगात् अनेकेष्वेकत्वबुद्धे‡‡ भ्रमत्वात् । न चैकार्थक्रियायां युगपदन्वयः संघातः । काष्ठाग्नयेण वह्निना वायु§§समुद्भूतेन जले दह्यमानेऽपि संघाताद्भोगप्रसङ्गात् । नचाग्न्ययःपिण्डवत्संश्लेषः संघातः । शरीरे वायोस्तथासं-

* भोक्तृत्वन्तस्येति २ पु० ।
† नैतदेवमितीति ३ पु० ।
‡ नेत्याह ज्वालायामितीति ३ पु० ।
§ न च वनवच्चैकेति १ पु० ।
‖ ननु भूतस्वतन्त्रभूतेति २ पु० ।
¶ अतिरेकाभाव इति ३ पु० ।
** न्यूना च तत्त्वसंख्येति १ पु० ।
†† एकद्रव्यतुल्यालम्बनेति १ पु० ।
‡‡ विभ्रममात्रत्वादिति १, ३ पु० ।
§§ समुद्भूतेनेति १ पु० ।

श्लेषाभावात् वह्निव्याप्ते चायःपिण्डे * समापीतजले वायुसंयुक्ते च भोगप्रसङ्गात् । तस्मान्नास्ति भोगनिमित्तः संघात इति ।

३३ २५ एवं † तर्ह्येकस्यैव भूतस्य भोग इत्याह अस्त्वेकस्य तर्हि ‡ नियत इति । रूपरसगन्धस्पर्शेषु भोग्येषु कठिनमृदुपाकचलनगुणवति भूतसंघाते च भोगान्वयिनि परिदृश्यमाने कस्यैकस्य भोग इत्यनवधारितो भोगः स्यादिति §दूषयति न तचापीति । ननु यस्य कस्य चिद्भोगः स्यात्तावतैव शरीरव्यतिरिक्तभोक्तुरभावो विवक्षितः सिद्ध इत्याह किमवधारणेनेति । परिहरति यद्येवमिति । चतुर्णां भोगान्वयदर्शनाद् विशेषनिर्द्धारणाभावाच्चतुर्षु भोक्तृषु संघातानुपपत्तेरयुक्तं ‖ शरीरात्मकेषु भूतेषु भोक्तृत्वमिति । इन्द्रियाण्येव भूतात्मकान्यात्मेति ¶ लोकायतभेदाः तचोक्तं दूषणजातमतिदिशति एवं करणात्मकेष्वपीति । यद्येकैकभूतारब्धान्येकैकेन्द्रियाणि तच प्रत्यभिज्ञानाभावादयो दोषाः । यदि भूतचतुष्टयारब्धमेकैकेन्द्रियं ** तदा संघातानुपपत्त्यादयो दोषा

३४ ४ इति कार्यकरणात्मकः संघातो भोक्तेत्यन्ये लोकायतिकाः तचाह तथोभयात्मक इति । प्रत्यभिज्ञा †† संघातानुपपत्तेरिति ।

ननु कानीन्द्रियाणि नाम । गोलकमाचाणीति ‡‡ सुगताः । तच्छक्तय इति मीमांसकाः । तद्व्यतिरिक्तानि द्रव्यान्तराणीत्यन्ये सर्वे । न तावद्गोलकमात्रम् । सर्पादीनां तद्विरहिणामपि शब्दाद्युपलब्धेः । शरीरजैः कर्मदोषैर्याति स्थावरतां नरः तस्मात्पश्यन्ति पादपा इत्यादिशास्त्राद् वृक्षादीनां गोलकविरहिणां कर्मफलभोगस्थानतावगमेन शब्दाद्युपलब्ध्यभ्युपगमात् वृक्षादिहिंसाप्रतिषेधाच्च प्राणित्वावगमात् । अत एव न तच्छक्तयः । शक्तिमद्द्रव्यान्तरकल्पनाल्लघीयः प्रतिपन्नस्थानेषु शक्तिकल्पनमिति चेत् । तर्ह्यात्मन §§ एव ||| सर्वज्ञानसामर्थ्यं क्रमकरि कल्प्यताम् ¶¶ । सर्वगतस्याप्यात्मनः शरीरप्रदेशे ज्ञानपरिणामवद्गोलकप्रदेशेषु ज्ञानपरिणामाद्गोलकानां ज्ञानान्वयव्यतिरे-

* समापितजले-इति २, ३ पु· ।
‡ नियतो भोग इतीति १ पु· ।
‖ कार्यात्मकेष्विति ३ पु· ।
** तत इति १ पु· ।
‡‡ सौगता इति ५ पु· ।
||| सर्वविज्ञानेति १ पु· ।
† तस्यैकस्यैवेति २, ३ पु· ।
§ दूषणमाहेति ३ पु· ।
¶ लोकायतभट्टा इति ३ पु· ।
†† संघाताद्यनुपेति १ पु· ।
§§ आत्मन एव विज्ञानसामार्थ्यमिति ३ पु· ।
¶¶ लाघवादिति अत्राधिकमस्ति १ पु· ।

कोपपत्तेः । अनिन्द्रियत्वेपि शरीरवत्सन्तु तर्हीन्द्रियाणि गोलकव्यतिरिक्तानि शक्तिमन्ति द्रव्याणि स्थानविशेषसम्बन्धाच्चक्षुरादिशब्दवाच्यानि । न । तेषु प्रमाणाभावात् । रूपादुपलब्धय एव कर्तृव्यापाराः करणानुमाने लिङ्गमिति चेन्न । स्वव्यापार*कर्तृषु करणेषु करणान्तराभावादनैकान्तिकत्वात्करणविषये च † तत्प्रेरणालक्षणे कर्तृव्यापारे करणान्तराभावात् । सर्वे प्राणा अनूत्क्रामन्तीत्यागमगम्यानीन्द्रियाणीति चेन्न । आगमसंस्कारविरहिणामपीन्द्रियप्रतिपत्तेः । न च मनोवत्साक्षिवेद्यानीन्द्रियाणि ‡ कार्यभावाभावव्यतिरेकेणेन्द्रियभावाभावानवगमात् । तस्मान्न सन्तीन्द्रियाणि ।

उच्यते । आगमावगमात्प्राक् स्थानविशेषेषु चक्षुरादीन्द्रियव्यवहारः प्रवर्त्तते मण्डलादिष्वादित्यादिव्यवहारवत् । आगमावगतौ तु स्थानविशेषाधिष्ठातॄणि चक्षुरादीन्द्रियाण्यादित्यादि § देवतात्मवदित्यवगम्यते । तानि पुन ‖ र्व्यतिरिक्तान्यप्याहङ्कारिकाणीति सांख्याः । तदयुक्तम् । प्रमाणाभावात् । न तावद ¶ ध्यात्माहङ्कारजन्यानीन्द्रियाणीत्यन्वयव्यतिरेकावाऽऽगमो वा दृश्यते । नच कृत्स्नकार्यव्यापी भूतेन्द्रियाणां प्रकृतिः कश्चिदहङ्कारो विद्यते मानाभावात् । आप्तवचनं मानमिति चेत् । न । अतीन्द्रियत्वात् । ननु पुराणवाक्यान्येव सन्ति । सत्यम् । अन्नमयं हि सोम्य मन इत्यादिभूतविकारार्थं मयट्श्रुतिविरोधादहङ्काराधीनतामात्रमिन्द्रियाणान्तच कथ्यत इति न विरोधः ।

भौतिकानीन्द्रियाणीति वैशेषिकादयः । तदप्ययुक्तम् । मानाभावात् । भौतिकानीन्द्रियाणि मध्यमपरिमाणत्वेन सावयवत्वात् घटादिवदिति चेन्न । हेतोरसिद्धत्वात् अणुपरिमाणत्वोपपत्तेरिन्द्रियाणाम् । तर्ह्यणुपरिमाण एव विषयावभासः स्यात् । न । अणुपरिमाणेन मनसा विस्तृतात्मादिवस्तुदर्शनात् । ननु भौतिकानीन्द्रियाणि रूपरसगन्धस्पर्शानां नियमेनाभिव्यञ्जकत्वात्प्रदीपास्योदकहिङ्ग्वादिद्रव्य ** व्यञ्जनवायुवदित्यनुमानान्तरेण प्रत्येकभूतारब्धानि प्रत्येकेन्द्रियाण्यनुमीयन्त इति । न । शब्दाभिव्यञ्जके श्रोत्रे शब्दगुणवदाका-

* कर्तृकरणेष्विति १ पु· ।
† तत्प्रेरणालक्षणे इति ३ पु· ।
‡ कार्यभावाभावेति १ पु·
§ देवतात्मवदवगम्यन्ते इति १ पु· ।
‖ व्यतिरिक्तान्यपीति नास्ति १ पु· ।
¶ अध्यात्ममहङ्कारेति १ पु· ।
** व्यञ्जनवायुवदिति ३ पु· ।

शानारब्धेनैकान्तिकत्वात् कर्णशष्कुल्यवच्छिन्नाकाशमात्रस्य श्रोत्रत्वाभ्युपगमादनारब्धत्वात् । मनसश्च भूतचतुष्ट्यारब्धत्व * प्रसङ्गः तदभिव्यञ्जकत्वात् । आत्माकाशादीनामपि साधारणत्वान्मनसो न भूतारभ्यत्वमिति चेत्संख्यापरिमाणसंयोगविभागजातिविशेषसमवायादीनामपि साधारणत्वादिन्द्रियाणां न भूतारभ्यत्वसिद्धिः । असाधारणविषयारभ्याणीन्द्रियाणीति चेत्तर्ह्यात्मारभ्यं मनः स्यादसाधारणविषयत्वात् । एक † द्रव्यारभ्यं न द्रव्यमिति चेत् । ‡ न सावयवमनेक † द्रव्यारभ्यमित्येतावत् निरवयवं तु मनो निरवयवात्मारभ्यं किं न स्यात् । तस्मादागमादेव भौतिकत्वसिद्धिः ।

तानि § सर्वगतानीति येागाः प्रतिपेदिरे । तदपि मानहीनम् । आत्मेन्द्रियमनांसि सर्वगतानि सर्वत्रदृष्टकार्यत्वादाकाशवदिति चेन्न । हेतोरसिद्धत्वात् । यत्र शरीरं तत्र सर्वत्र दृष्टकार्यत्वादिति चे ‖ च्छरीरे ऽनेकान्तः । परोपाधिगमनत्वादाकाशवदिति चेन्न । शरीरावयवानामपि परोपाधिगमनात्सर्वगतत्वे च ¶ युगपत्सर्वविषयोपलब्धिश्च स्यात् । शरीर एव वृत्तिलाभान्नेति चेत्तर्हि बहिरिन्द्रियसद्भावकल्पना न प्रमाणप्रयोजनवती ।

तान्यप्राप्यकारीणीति सुगताः । तदयुक्तम् । दूरत एव स्पर्शरसगन्धोपलब्धिप्रसङ्गात् । योग्यदेशावस्थान ** मपेक्षितमिति चेन्न †† इन्द्रियदेशप्राप्तिव्यतिरेकेण योग्यदेशानिरूपणात्स्पर्शरसघ्राणेन्द्रियवच्चक्षुःश्रोत्रयोरपि प्राप्यकारित्वमनुमीयते तेजसश्चातिदूरशीघ्रगमनदर्शनाच्चक्षुषो ध्रुवादिप्राप्तिरविरुद्धा । शब्दस्य च दूरदेशोपलब्धेर्न वीचीसन्तानवत्परम्परया श्रोत्रसमवायः । तस्माद्भौतिकानि परिच्छिन्नानि प्राप्यकारीणीन्द्रियाणीति सिद्धम् ।

किं तर्हि मनो नाम । ‡‡ नित्यं निरवयवमणुपरिमाणमिति वैशेषिका-

* प्रसङ्गादिति १ पु· । † द्रव्यारब्धमिति १ पु· ।

‡ ननु मनसो ऽकार्यत्वात्कथमारब्धत्वम्· नच हेत्वसिद्धिः, मनो ऽकार्यम् निरवयवद्रव्यत्वादात्मवदिति चेन्मैवम्· गुणवत्त्वादिलक्षणस्य द्रव्यत्वस्या ऽत्मन्यभावाद् दृष्टान्तस्य साधनविकलत्वम्, विशेषणासिद्धिश्चेति द्रष्टव्यम्–इति तत्त्व० ।

§ सर्वगानीति १ पु· । ‖ शरीरेष्वनैकान्तः–इति १ पु· ।

¶ युगपदिति नास्ति १ पु· । ** अपेक्षन्त इतीति १ पु· ।

†† इन्द्रियदेशव्याप्तिव्यतिरेकेणेति ३ पु· ।

‡‡ मनो नित्यं भावत्वे सति कारणशून्यत्वात् आत्मवत्· मनो निरवयवं मूर्तेना ऽप्रतिबध्यमानत्वात् गगनवत्· मनसो मध्यमपरिमाणत्वे स्थूलसूक्ष्मशरीरयोरविशेषेण वृत्तिर्न स्यात्· सर्वगतत्वे युगपज्ज्ञानोत्पादः स्यात्· तस्मादणुत्वमर्थ इति तत्त्व० ।

दयः संगिरन्ते। न तावन्नित्यम् * परिच्छिन्नत्वात्। निरवयवद्रव्यत्वादात्मवन्नित्यमिति चेन्न। † करणत्वेनेन्द्रियवद‡ सावयवत्वानुमानादन्नमयत्वश्रुतेश्च। मूर्तद्रव्यानभिघातान्निरवयवमिति चेन्न। मनसो बहिर्निर्गमनाभावादुत्क्रान्तिरिन्द्रियाणामपि समाना। संयोगविभागवत्त्वान्न घटादिवदणुपरिमाणता। सर्वगतत्वे च युगपत्सर्वेन्द्रियसंयोगात्सर्वज्ञानप्रसङ्गः। मध्यमपरिमाणत्वेन सावयवत्वेऽवयवोपचयापचय § सम्भवान्न स्थूलसूक्ष्म ‖ देहप्रतिपत्तिविरोधः। समनन्तरप्रत्यय एवोत्तरज्ञानकारणतया मन इति शाक्याः प्रतिपेदिरे। तन्न। ज्ञानस्य ज्ञानान्तरहेतुत्वे व्याप्तिसापेक्षत्वा ¶ च्छाब्दज्ञानमपि ** व्याप्तिजन्यमिति †† ते मतम्। ‡‡ विशिष्टज्ञानमपि संप्रयोगजन्यं न विशेषणज्ञानजन्यम्। §§ समनन्तरप्रत्ययादुत्तरस्य ज्ञानाकारलाभ इति चेन्न। वस्तुस्वभावस्यानन्याधीनत्वात्। तस्मात्सावयवमन्यदेव मन इति।

कश्चायमात्मा। सर्वगतो जड इति केचित्। न तावत्सर्वत्र दृष्टकार्यत्वं सर्वगतत्वे हेतुरित्युक्तम्। |||| व्यवहितदेशे ऽदृष्टनिमित्तनृत्यादिक्रियारम्भात् तस्य चादृष्टवदात्मसंयोगापेक्षत्वात्सर्वगत इति चेन्न। अत्र समवेतादृष्टस्य स्वर्गे भोगोदयाददृष्टवत्प्रदेशासंयोगात् केवलात्मप्रदेशसंयोगस्य फलाहेतुत्वात्। तस्मादागमादेव सर्वगतत्वसिद्धिः। न च जाड्यम् स्वयंप्रकाशतावगमात्। प्रत्यक्षस्तत्वमुषुप्ते ऽवभासः। अनुमानमपि स्वयंप्रकाशो ऽय-

* मनो ऽनित्यम् परिच्छिन्नत्वाद्घटादिवत्· न च परमाणुषु व्यभिचारः, तदसंप्रतिपत्तेः· नच मनो विभु सर्वदा स्पर्शरहितद्रव्यत्वात् कालवदित्यनुमानादपरिच्छिन्नत्वसिद्धिरित्यपि शङ्क्यम्, तर्मसि व्यभिचारादित्यर्थ इति तत्त्व०।

+ करणत्वादिन्द्रियवदिति १ पु·।

‡ मनः सावयवं द्रव्यत्वे सति करणत्वात् नयनवत्· न च व्यर्थं विशेषणम्, नयनार्थसंनिकर्षस्य व्यावर्त्यत्वात्· मनस्त्वं सावयववृत्ति मूर्तवृत्तित्वात् घटत्ववदित्यर्थ इति तत्त्व०।

§ असंभवादिति १ पु·। ‖ देहवृत्तिविरोध इति ३ पु·। ¶ शब्दज्ञानमपीति २, ३ पु·।

** व्याप्तिसापेक्षमिति १ पु·। †† ते मतम्· ज्ञानजन्यविशिष्टज्ञानमिति १ पु·।

‡‡ सुरभि चन्दनमित्यादौ विशेषणविशेष्ययोरेकेन्द्रियग्राह्यत्वात्च विशिष्टज्ञानं संप्रयोगजन्यमिति चेन्नैवम्, तत्र विशिष्टस्य साक्षिवेद्यत्वोपगमात्· विशेषणज्ञानसंस्कारसहितेन्द्रियसंप्रयोगाद्वा विशिष्टज्ञानजनिरित्यर्थ इति तत्त्व०।

§§ अधिपतिसहकारिसमनन्तरप्रत्ययालम्बनप्रत्ययानुरोधाज् ज्ञानजन्मोपयते· तत्र चक्षुर्लक्षणाधिपतिप्रत्ययाज् ज्ञानस्वरूपं निष्पद्यते, आलोकलक्षणसहकारिप्रत्ययात्तत्स्पष्टता, आलम्बनप्रत्ययाद् घटाद्याकारता, पूर्वप्रत्ययाद् बोधाकारता जायत इत्यर्थ इति तत्त्व०।

|||| "अयमर्थः—परसमवेतनृत्यादिक्रियया ऽन्यत्र सुखं तावज्जायते· नचैतददृष्टानार्जितत्वे नृत्यक्रियाया एतत्सुखहेतुत्वम्· एतददृष्टजन्यत्वं चैतत्सम्बन्धं विना ऽनुपपन्नमिति· नापि विना ऽदृष्टवदात्मसंयोगादन्यत्र क्रियोत्पाद इत्यनुपपत्त्या सर्वगतत्वमिति तत्त्व०।

मात्मा स्वसत्तायां प्रकाशव्यतिरेकाभावात्प्रदीपसंवेदनवत् । आत्मा स्वयंप्रकाशो विषयप्रकाशकर्तृत्वात्प्रदीपवत् । तथा आत्मा स्वयंप्रकाशो विषयप्रकाशाश्रयत्वादालोकवत् । अजन्यप्रकाशगुणश्चात्मा प्रकाशगुणत्वात् आदित्यादिवत् । आत्मा स्वयंप्रकाशः अनिन्द्रियगोचरत्वे सत्यऽपरोक्षत्वात्संवेदनवत् । आगमश्चाच दर्शितः । स चैकः सर्वशरीरेषु सर्वत्राहमित्येकाकारप्रत्यक्षवेदनीयत्वात् गोत्ववत् । शरीरभेदादेवातीतशरीरादाविव न भोगानुसन्धानप्रसङ्गः । नचैकस्मिन्नपि परिमाणभेदात्प्रतिक्षणं शरीर * भेदो युक्तः प्रत्यभिज्ञाविरोधादननुसन्धानप्रसङ्गाच्च । ज्वालायां सूक्ष्म † दर्शने प्रत्यक्षत एव भेददर्शनात् । तस्मा-
१४ ४ देकः स्वयंप्रकाश आत्मेति सिद्धम् । तस्मादित्युपसंहारः ।

पक्षान्तरमाह भोक्तैव केवलमिति । कर्तृत्वं हि क्रियावेशः न च सर्वगतस्य निरवयवस्यात्मनः परिस्पन्दपरिणामलक्षणक्रियान्वयः सम्भवति । न च बुद्धेः कर्तृत्वमात्मनो भवति तादात्म्याध्यासाभावात् अख्यातिवादित्वात् । हेत्वन्तरमाह ‡ करोमि भुञ्जे जानामि चेति । अयमर्थः । चैतन्यवत् क्रियावेशोऽप्यात्मनः स्वभावधर्मश्चेत् आत्म § प्रतिभासं न व्यभिचरेत् । न चागन्तुको निरवयव ‖ द्रव्यस्य हेतूपरागेण कश्चिद्धर्म उत्पादयितुं शक्यत इति । नन्वात्मप्रतिभासव्यभिचारात्कर्तृत्ववत् भोक्तृत्वमपि न स्यादिति चोदयति ननु भोक्तापीति । परिहरति नैतदेवमिति । दृश्यावभासमात्रं भोक्तृत्वं न सुखदुःखान्वयः । ततश्चावस्थाचयेपि दृश्यावभासव्यभिचाराभावाद् भोक्तैव केवल इति ।

पक्षान्तरमाह अस्ति तद्व्यतिरिक्त इति । भाष्यं ¶ व्याचष्टे तस्मादपि देहादिव्यतिरिक्तादन्यः सिद्ध ईश्वर इत्युत्तरेण सम्बन्धः ।

१३ अचेश्वरे वैशेषिकानुमानं दर्शयति शरीरिणां मनसापीत्यादिना । विवादगोचरापन्नं ** भूतभौतिकलक्षणं तनुभुवनविरचनकार्यं स्वरूपोपादानसंप्रदानप्रयोजनोपकरणादिविषयविज्ञानवत्कर्तृपूर्वकं विविधविन्यासरूपकार्यत्वा-

* भेद इति युक्तमिति १ पु० । † दर्शनेनेति १ पु० ।
‡ करोमि जानामि भुञ्जे चेतीति १ पु०, करोमीतीति ३ पु० ।
§ प्रतिभावचेति शोधितं १ पु०, प्रतिभासवद् नेति ३ पु० ।
‖ द्रव्ये-इति १ पु० । ¶ व्याचष्टे तस्मादपीति तस्मादपि देहेति १ पु० ।
** भूतभौतिकादिलक्षणभुवनरचनाकार्यमिति ३ पु० ।

त्प्रासादादिवदिति । कल्पना * लाघवेनैककर्तृकत्वोपादानात्सर्वज्ञत्वादिसि-
द्धिरिति । सांख्ययोगा † नुमानं दर्शयति सातिशयानां काष्ठाप्राप्तिरिति । ७४
विवादगोचरापन्ना ज्ञानैश्वर्यशक्तयः क्वचित्सर्वविषयज्ञानैश्वर्यशक्त्यऽविनाभूताः
तरतमभावेनोत्कृष्यमाणविषयव्यापिधर्मत्वात् स्वविषयदेशव्यापिपरिमाण-
धर्मवदिति काष्ठावाप्तिरसर्वविषयत्वेपि सम्भवतीति सर्वविषयमिति वेत्युक्तम-
नुमाने तथैवदर्शितत्वात्सदासिद्ध ईश्वर इति नैयायिकाद्यनुमानं दर्शयति
विवादगोचरापन्नानि धर्माधर्मफलानि कर्मतत्फलसंप्रदानोपकरणादिविज्ञान-
वता प्रदीयमानानि व्यवहितकर्मफलत्वात् सेवादिफलवदिति । तस्मात्सिद्ध-
ईश्वरः ।

ननु प्रत्यगात्मनो विप्रतिपत्त्यालम्बनस्य सम्बन्धितया स्कन्धभेद-
दर्शनं विप्रतिपत्तिः । न च व्यतिरिक्त ईश्वरः प्रत्यगात्मनो विशेषस्कन्धः ।
अतो ऽसौ न शरीरादिवत् स्कन्धविशेषतया प्रतिपादनीय इति चोदयति
नन्वहमिति सर्वो लोक इत्यादिना । उच्यत इत्यादिपरिहारस्यायमर्थः ।
ब्रह्म हि विप्रतिपत्त्यालम्बनम् । तच्च प्रत्यगात्मव्यतिरिक्तमव्यतिरिक्तं वेति
विप्रतिपत्तिं दर्शयितुं व्यतिरिक्तेश्वरपक्षोपि दर्शनीयः । किमिति तर्ह्यात्मनि
विप्रतिपत्तिः प्रदर्श्यत इति तदाह अहंप्रत्ययविषयविप्रतिपत्त्यापीति । किमिद- ,,
मुक्तं भवति । प्रत्यगात्मा तावत्प्रमाणान्तरेणोद्दिश्य शरीरेन्द्रियमनोबुद्धिशून्य-
कर्तृ ‡ त्वभोक्तृत्वादिविशेषपर्युदासेना § द्वितीयज्ञानानन्दस्वभावेन प्रतिपाद्यते ।
एवंप्रतिपादने संसारनिवृत्तेः पुरुषार्थलाभाच्च । अतः प्रत्यगात्मा सर्वज्ञत्वादि-
गुणकाद् ब्रह्मणो ऽन्यो ऽनन्यो वेति विप्रतिपत्तिं दर्शयितुं तद्व्यतिरिक्त ईश्वरः
साधितो विप्रतिपत्तिस्कन्धत्वात् ।

अत्र कश्चिदाह । ‖ नेह प्रत्यगात्मा ऽसाधारणस्वभावविवक्षया ब्रह्म-
शब्देन जिज्ञास्यत्वेनोद्दिश्यते किंत्वीश्वर एव ब्रह्मशब्देनोद्दिश्य विचार्यते
जन्मादिसूत्रे जगत्कारणत्वलक्षणाभिधानात् । न हि प्रत्यगात्मन्येतल्ल-
क्षणमुपपद्यते । तस्मादात्मविप्रतिपत्तिप्रदर्शनमसमञ्जसमिति । उच्यते ।

* लाघवात्कर्त्रैकत्वेति १ पु० । † अनुमाने–इति १ पु० ।
‡ अयं त्वप्रत्ययो नास्ति २, ३ पु० । § अद्वितीयेन ज्ञानानन्देति २, ३ पु० ।
‖ नन्वीति १ पु० ।

यदि ब्रह्मशब्देनेश्वरोभिधीयते किमिति तर्हि जगत्कारणे विप्रतिपत्तिं * दर्शयसि प्रधानमेके परमाणूनपर इत्यादिना । नहीश्वरे ऽर्थान्तरे जिज्ञासाकर्मणि ब्रह्मशब्दोपादाने ऽर्थान्तरे जगत्कारणे विप्रतिपत्तिर्युक्ता दर्शयितुम् । जगत्कारणादीश्वरस्याभिन्नत्वात्तद्विप्रतिपत्ति † रीश्वरविप्रतिपत्तिरिति चेत् । तर्हीश्वरः प्रधानं परमाणुर्वेति विप्रतिपत्तिर्दर्शिता स्यात् । न तथा संशेरते जनाः । युज्यते तु प्रत्यगात्मनो ब्रह्मशब्दाभिधेयविशेषस्वरूपस्य शरीरेन्द्रियादिषु संशयः तेषामात्मनि तादात्म्या ‡ वभासात् । किञ्च । प्रत्यगात् मानमुद्दिश्य तस्य विशेष § स्वरूपे ब्रह्मणि जिज्ञास्यमाने यज्जगज्जन्मादिकारणं तद् ब्रह्मेत्युक्ते विधूतशरीरादिभेदः प्रत्यगात्मा जगत्कारणतया सर्वात्मभूतः प्रतिपादितो भवति । जगत्कारणे तु विप्रतिपद्यमाने किं तज्जगत्कारणमिति वीप्सायां यद् ब्रह्म तज्जगत्कारणमिति ब्रह्मोद्देशेन जगत्कारणत्वं विधेयं स्यात् न जगत्कारणमुद्दिश्य ब्रह्मविधानमिति वैपरीत्यमापद्यते । ब्रह्मशब्देन जगत्कारणमभिधीयत इति चेन्न ईश्वरोभिधीयत इति स्ववचनेन विरोधात् । किञ्च । ईश्वरे जगत्कारणे प्रतिपादिते पुरुषस्य किमायातम् । उपासनमिति चेन्न । आरोपितरूपेणापि सम्भवात्प्रतिपादनवैयर्थ्यात् । तस्मात्प्रत्यगात्मानमुद्दिश्य तस्य वेदान्तविहितब्रह्मशब्दा ‖ भिधेयबुभुत्सायां यज्जगज्जन्मादिकारणं सत्यज्ञानानन्दादिलक्षणं तत्प्रत्यगात्मभूतं ब्रह्मेति प्रतिपादयितुमात्मनि विप्रतिपत्तिप्रदर्शनं युक्तमिति जगत्कारणे विप्रतिपत्तिः संप्रदायपरिचयशून्यतया शास्त्रार्थप्रद्वेषात्सर्वसङ्करवादिना दर्शितेति ।

७५ १ पक्षान्तरमाह आत्मा स भोक्तुरित्यपर इति । यथा ¶ सत्यज्ञानानन्दं निरवयवं ब्रह्म प्रत्यगात्मापि तथा । तच्च विवादगोचरापन्नो जीवो ब्रह्मैव सन्नुपाधिपरिच्छिन्नविभागः ब्रह्मणा समानस्वभावतया निरवयवद्रव्यत्वे सत्युपाधिपरामर्शाधानपरिच्छेदप्रतिभासत्वात् यद्येन समानस्वभावतया निरवयवद्रव्यत्वे सत्युपाधिपरामर्शाधीनपरिच्छिन्नप्रतिभासं तत्तदात्मकत्वे सत्युपाधिपरिच्छिन्नभेदं दृष्टम् यथा घटाकाशमिति भाष्यं व्याचष्टे योऽयमिति । ननु संसा-

,, २ रिणः कथमसंसारिणैकत्वमिति तच्चाह तस्याहंप्रत्ययसिद्ध इति । नन्वहमिति

* दर्शयतीति २, ३ पु० ।
† ईश्वरे विप्रतिपत्तिरिति १ पु० ।
‡ अवभासनादिति १ पु० ।
§ स्वेति नास्ति २, ३ पु० ।
‖ अभिधेयबुभुत्सया—इति १ पु० ।
¶ चशब्दोऽत्राधिकः १ पु० ।

सामान्यतःप्रतिपन्नस्य शरीरादिविशेषमिथ्यात्वे परमार्थभूतो विशेषो वक्तव्यो ऽहमित्थंभूत इति । तदाह परमार्थतस्त्विति । अहं ब्रह्मैवेति विशेषोप- ७५
संहारो न शरीरादीत्यत्र किं प्रमाणमिति * तदाह एवमसौ † बृहत्यर्थान्वया-
दिति । ननु जीवेभ्यो ‡ भेदेपि बृंहत्यर्थलाभो देशकालव्यापित्वादिति तदाह
इतरथा तदूपविकलस्येति ।

उपसंहरति § एवं बहव इति । किञ्चित् शरीरादि ब्रह्मेति प्रत्य-
गात्मेति विप्रतिपन्ना इत्यर्थः । ननु न विप्रतिपत्तिमात्रात् ‖ जिज्ञास्यं भवति
किन्तु प्रमाणयुक्तिमूला हि विप्रतिपत्तिर्निराकर्त्तव्येति तत्रोत्तरम् युक्तिवाक्ये-
त्यादि भाष्यम् तद्व्याचष्टे ¶ युक्तिं प्रमाणानामित्यादिना । कस्मिन्पक्षे युक्ति-
वाक्ये क्व वा ** तदाभासा इति विभजते युक्तिवाक्याभ्यामन्त्यं पक्षं निश्चि- ,,
तवन्त इति । ननु यथा बृंहत्यर्थान्वयादुक्तिवाक्याभ्यां च ब्रह्मैव भोक्ता
तथा सुखदुःखतत्साधनप्रपञ्चोपि ब्रह्मैवेत्यऽपुरुषार्थतया न जिज्ञास्यं ब्रह्म
स्यात् । नहि कतिपयसुखदुःखतत्साधनसंसर्गमप्यसहमानो निखिलदुःखादिम-
त्तामङ्गीकुर्य्यात् । ननु††वक्ष्यमाणेन ज्ञानानन्दादिलक्षणेन पुरुषार्थतया जिज्ञा-
स्यमेव किन्न स्यात् । न ‡‡ क्षुन्निवृत्तिसाधनतया पुरुषार्थे ऽपि विषमिश्रितेन्ने ऽन-
र्थहेतुतया प्रेक्षापूर्वकारिणामुपेक्षादर्शनात् । न लिप्यते लोकदुःखेन बाह्य इत्या-
दिशास्त्राच्चापुरुषार्थतेति चेन्न । आत्मैवेदमित्यादिसर्वतादात्म्यश्रुतेरुपादानका-
रणत्वाच्च । सर्वज्ञतया ऽज्ञानमिथ्याज्ञानाभावान्नानर्थसम्बन्ध इति चेन्न । तत्त्वत
एव प्रपञ्चतादात्म्यादज्ञानाद्यनपेक्षणात् । कर्म्मनिमित्तः सुखदुःखादिसम्बन्धस्त-
दभावान्न ब्रह्मण्यनर्थ इति चेन्न । कर्म्मव्यतिरेकेणापि स्वभावादेवाखिल §§सुख-
दुःखादितत्साधनानां स्वान्वयितया ब्रह्मणोऽपरोक्षत्वात्कर्म्मादीनामपि तावन्-
मात्रहेतुत्वात् । न हि ‖‖ दुःखाद्यापरोक्ष्यव्यतिरेकेण संसारो ऽन्यो दृश्यते । क-
र्म्माविद्यादीनामपि बृंहत्यर्थान्वयादेव ब्रह्मणि तादात्म्यात्तन्निमित्तोपि संसारः
सुतरामुपपन्न इति । ¶¶ ब्रह्मणि तत्त्वज्ञानेन बाधितत्वान्नानर्थसम्बन्ध इति

* तदाह एवमसाविति ३ पु० । † बृहतीत्यनुस्वाररहितः पाठः प्रायः पुस्तकेषूपलभ्यते ।
‡ भेदे ऽपि तर्हि बृहत्यर्थेति ३ पु० । § एवमितीति ३ पु० ।
‖ जिज्ञास्यं न भवतीति अत्र नकारः ३ पु० । ¶ युक्तिवाक्येत्यादिनेति ३ पु० ।
** तदाभासाविति ३ पु० । †† वक्ष्यमाणज्ञानेति ३ पु० ।
‡‡ क्षुन्निवृत्तिसाधनपुरुषार्थ इति २, ३ पु० । §§ सुखेति नास्ति २ पु० ।
‖‖ दुःखाद्यपरोक्षेति १ पु । ¶¶ ब्रह्मण इति १ पु० ।

चेन्न । प्रपञ्चात्मभावस्यापि तात्त्विकत्वात् । न च कारणाकारणब्रह्मभेदेन कार्यकारणब्रह्मभेदेन वा*संसारविमुक्तिव्यवस्था बृंहत्यर्थान्वयाभावप्रसङ्गात् । तस्माद् बृंहत्यर्थान्वयेना ऽद्वितीयसर्वज्ञत्वजीवत्वाद्यु†पगमेना ऽजिज्ञास्यं ब्रह्म प्राप्तम् ।

उच्यते । सत्यपि सर्वस्यापरोक्षतया ब्रह्म‡सम्बन्धे मायानिमित्ततया प्रतिबिम्बश्यामत्वादिवन्मायाविगत§ व्याघ्रत्वादिवच्च तत्त्वज्ञानेन बाधितत्वाद्बिम्बस्थानीयब्रह्मणो नित्यसर्वज्ञतया तत्त्वज्ञाननियमान्न तच्चात्मानुबन्ध इति । विशुद्धिवाक्यानामेव च बलवत्तरत्वं वक्ष्यामः । ‖ युक्तिवाक्याभासमूलता कस्येति
७५ १२ तदाह इतरे तु युक्तय इत्यादिना । कथं पुनर्युक्त्याभासता शरीराद्यात्मभावस्येति तदाह युक्त्याभासत्वमिति । ननु नैवतावता युक्त्याभासत्वसिद्धिर्देहादिष्विति तच्चाह इतरेषां च युक्त्याभाससिद्धत्वमिति । किञ्च । दर्शिता एव युक्त्याभासाः न तच्चान्यापेक्षेत्याह दर्शितं च लेशत इति ।

ननु स वा एष पुरुषो ऽन्नरसमयः स वा अयमात्मा ब्रह्म पृथिवीमय आपोमयस्तेजोमयो वायुमय इत्यादीनि ¶ शरीरात्मवादे वाक्यानि ते ह वाचमूचुः तेभ्यो वागुद** गायदित्यादीनीन्द्रियात्मवादे मन उदगायादिति मनोवादे कतम आत्मेति योयं विज्ञानमय इत्यादि विज्ञानवादे असद्वा इदमग्र आसीत् असदेवेदमिति शून्यवादे अनुमन्ता बोद्धा कर्त्ता विज्ञानात्मेति कर्त्रात्मवादे तयोरन्यः पिप्पलं स्वाद्वत्तीति बुद्धिविषयत्वादनश्नन्नन्य इति भोक्तात्मवादे य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति †† व्यतिरिक्तेश्वरवादे वाक्यानि विद्यन्ते कथं निर्मूलता
,, १६ पक्षान्तराणामिति तच्चाह ‡‡ वाक्याभासतां त्विति । नन्वेवमपि यस्य यस्मिन्

* संसारविशुद्धिव्यवस्थेति १ पु. ।
† उपगमेन जिज्ञास्यमिति १ पु. ।
‡ सम्बन्धमायेति १ पु. ।
§ व्याघ्रादिवदिति ३ पु. ।
‖ युक्तिवाक्यानां सशूलतेति १ पु. ।
¶ सन्तीति अत्राधिकं १ पु. ।
** उदगायदितीन्द्रियेति ३ पु. ।
†† व्यतिरिक्तात्मवाद इति १ पु. ।

‡‡ वाक्याभासतां विनेति १ पु०. "अयमर्थः-स्थूलबुद्धीनां देहव्यतिरिक्तात्मनि चित्तानवतारात्प्राकृतबुद्ध्यनुरोधेन स वा इत्यनेन देहस्यात्मत्वमुद्दिश्य रूपवत्त्वादिना तस्यानात्मत्वशङ्कायां तस्मादान्तरप्राणाद्यात्मत्वोपदेशपरम्परया पञ्चकोशविलक्षणात्मप्रतिपादने वाक्यस्य तात्पर्यं निर्धार्यते, अनरुन्धत्यास्तारायां अरुन्धतीत्वमुपदिश्य मुख्या ऽरुन्धती ययोपदिश्यते, तद्वदत्रापि· स वा अयमात्मेत्यादिष्वात्मनः पृथिव्याद्युपाधिकत्वं कथ्यते, न तद्विकारत्वम्, इतरथा ऽस्थूलमित्यादिवाक्यव्याकोपात्· ते ह वाचमूचुरित्यत्र चा ऽभिमानिनी देवतोच्यते न करणमात्रं प्रदीपादिवदा ऽऽत्मत्वासंभवात्· कतम आत्मेत्यत्र तु सुगताभिमतं ज्ञानं न विवक्षितम्, नहि द्रष्टुर्दृष्टेरित्यादिना माशप्रतिषेधात्· असद्वा इदमग्र आसीदित्यत्र त्व ऽनभिव्यक्तनामरूपत्वात्सत्येवाऽसच्छब्दः प्रयुक्तः न निरुपाख्ये, तत्सदासीदित्यनेन विरोधात्· अनुमन्ता बोद्धेत्यत्र किं पारमार्थिकं कर्तृत्वमुच्यत उत

* रुचिरुत्पद्यते स तं पक्षमाश्रित्य पुरुषार्थं साधयेत्किं विचारेणेति तत्राह तत्राविचार्य यत्किञ्चिदिति । भाष्यं व्याचष्टे तत्रैवंस्थित इत्यादिना । ननु ५७ १७
मा भूदन्त्यात्पक्षादर्वाचीनेषु पक्षेषु तत्त्वज्ञानाभावा † न्निः श्रेयसलाभः अनर्थः किमिति प्राप्यत इति तत्राह अन्धं तमः प्रविशन्तीति । नन्वात्महननं तत्रानर्थहेतुरुक्तो न तत्त्वाप्रतिपत्तिरिति तत्राह अनात्मदर्शनेनात्मनो ‡ ऽसत्कल्पत्वापादानरूपस्येति । सूचवाक्यार्थमुपसंहरति तस्माद् ब्रह्मजिज्ञासोपन्यासमुखेनेति । भाष्यं व्याचष्टे ब्रह्मजिज्ञासोपन्यासव्याजेनेति । जिज्ञासापदेनाऽन्तर्णीतं विचारमुपलक्ष्य तत्कर्तव्यतापरं सूत्रमित्युक्तं भवति । योजनान्तरमाह §अथ वेति । जिज्ञासा कर्तव्येत्युक्ते ज्ञानमिष्यमाणं साध्यतया कर्तव्यमिति सूत्रार्थः संपद्यते । तत्र ज्ञाने कर्तव्ये ऽप्यर्थात्तत्साधनकर्तव्यताप्यऽवगम्यते । अतोऽर्थसिद्धविचार ‖ कर्तव्यतापरसूत्रमिति । किंप्रयोजनेत्यादिः स्पष्टार्थः ।

कथं पुनर्विचारस्य निःश्रेयसं प्रयोजनम् । ¶ विचारजन्यब्रह्मावबोधसाध्यत्वादिति चेत् । किं तन्निःश्रेयसम् । कर्तृत्वभोक्तृत्वदोषसंयोगाध्यासप्रवाहोपादानस्याऽज्ञानस्य निवृत्तिः । न । निवृत्तेऽप्यज्ञाने द्वैतदर्शनस्यानपायात् । न हि पृथिव्यादिप्रपञ्चः कर्तृत्वाद्यध्यासनिवृत्तिमात्रान्निवर्तते । उच्यते । सत्स्वपि पृथिव्यादिष्वन्तःकरणाध्यासनिवृत्तौ प्रमातृत्वाभावादात्मचैतन्यस्य स्वतो विषयोपरागाभावाद् द्वैतदर्शनं न प्राप्नोति अनिन्द्रियस्येव रूपादिदर्शनमित्येकः पक्षः । इतरस्तु सर्वद्वैत** निवृत्तिपक्षः समन्वयसूत्रे वक्ष्यते । तस्मान्निरस्तसकलकर्तृत्वाद्यध्यासमऽपाकृतद्वैतदर्शनमऽनतिशयानन्दप्रकाशमानब्रह्मस्वरूपावस्थानं निःश्रेयसं वेदान्तविचारस्य प्रयोजनमिति रमणीयम् ॥

इति चतुर्थं वर्णकम् ।

†† इति श्रीमत्परमहंसपरिव्राजका ‡‡ चार्यानन्यानुभवपूज्यपादशिष्यस्य प्रकाशात्मभगवतः कृतौ पञ्चपादिकाविवरणे प्रथमसूत्रं समाप्तम् ॥

कात्यनिकम्· नाद्यः, मुक्त्यनुपपत्तेः· द्वितीयस्त्वङ्गीक्रियते, अनश्नन्नित्यत्र परमार्थतः कर्तृत्वभावे सिद्धसाध्यता· आरोपितकर्तृत्वाद्यभावेऽन्यस्य बन्धोऽन्यस्य मुक्तिरिति वैयधिकरण्यात्· न च बुद्धिगतावेव बन्धमोक्षौ, आत्मनि बन्धादिप्रतिपादकश्रुतिस्मृतिविरोधात्· आत्मनि तिष्ठन्नित्यादिभेदव्यपदेशस्य चौपाधिकभेदविषयत्वेनोपपत्तेरिति"–इति तत्त्व० ।

* ब्रह्मो–इति अत्राधिकं १ पु· । † निश्श्रेयसभाव इति १ पु·, निश्श्रेयसालाभ इति ३ पु· ।
‡ असत्त्वाल्पत्वापादनमितीति १ पु·, असत्कल्पत्वापादनेतीति ३ पु· ।
§ अयं चेतीति १ पु· । ‖ कर्तव्यतायां सूत्रेति १ पु· ।
¶ विचारजन्यं ब्रह्मावबोधेति ३ पु· । ** निवृतीति नास्ति १ पु· ।
†† चतुर्थं वर्णकं समाप्तमित्येतावन्मात्रं ३ पु· । ‡‡ आचार्यवर्येति १ पु· ।

जगज्जन्मस्थितिध्वंसा यतः सिध्यन्ति कारणात् ।
तत्स्वरूपतटस्थाभ्यां लक्षणाभ्यां प्रदर्श्यते ॥

जन्माद्यस्य यतः । वृत्तसङ्कीर्तनभाष्यस्यान्तर्गीतं विचारार्थोपादानेनार्थं कथयति ब्रह्म जिज्ञासितव्यमित्युक्तमित्यादिना । ननु ब्रह्मविचारप्रतिज्ञायां साधनादिविचाराणामप्रतिज्ञातत्वादसाध्यतेत्यत आह यदैवेद * मुक्तमित्यादिना । ननु पञ्चानां विचाराणां प्रतिज्ञातत्वे किमिति स्वरूपमेव प्रथमं विचार्यते । फलभूततया प्राधान्यादिति चेत् । न । साधनाद्यधीनत्वात्साध्यसिद्धेस्तेषामेव प्रथमं विचारः क्रियतामित्यत आह तच्च स्वरूपस्याभ्यर्हितत्वादिति । ब्रह्मप्रमाणं ब्रह्मयुक्तिर्ब्रह्मसाधनं ब्रह्मफलमिति विशिष्टविचाराणां ब्रह्मविशेषणसापेक्षत्वाद् ब्रह्मस्वरूपनिर्णयस्य चानन्यापेक्षत्वात्प्राधान्येन साध्यत्वाच्चेत्यर्थः ।

वृत्तं सङ्कीर्त्योत्तरेणाकाङ्क्षापुरःसरं सम्बन्धमाह किंलक्षणं तदिति । जिज्ञास्यपुरुषार्थब्रह्मस्वरूपप्रदर्शननिमित्तमाचार्यं पूजयति भगवानिति । नन्वस्येदं लक्षणमिदं वानेन लक्ष्यमिति लक्ष्यलक्षणयोरव्याप्त्यतिव्याप्तिपरिहारेणाऽविनाभावः प्रमाणयुक्तिव्यतिरेकेण न सिद्ध्यति तत्कथं स्वरूपलक्षणपरमेव सूत्रमिति तत्राह युक्तिरपि लक्षणनिर्णये ऽर्थादिति । अपिशब्दात् प्रमाणमपीत्यर्थः । अत्र च सूचितयोर्ब्रह्मणि प्रमाणयुक्त्योरध्यायद्वयेन निर्णयः क्रियते । † जन्मोत्पत्तिरित्यारभ्य ‡तृतीयलिङ्गेत्यतः प्राक्तनः स्पष्टार्थः । तद्गुणसंविज्ञान इति विशेष्यैकदेशमेव विशेषणं कृत्वा समास इत्यर्थः । नन्वेवमपि जन्मस्थितिभङ्गास्त्रयोपि विशेष्यास्तत्कथमेकत्वनिर्देश इत्यत आह तृतीयलिङ्गेति । जन्मादीनामादिमध्यावसानमाक्षिपति नन्वादिरिति । परिहरति जन्मनश्चादित्वमिति । भाष्यं व्याचष्टे यदनेन सूत्रेणेति । ननु सर्वं जनित्वैव नश्यति न किञ्चित्कालं तिष्ठति स्वसत्ताप्रयुक्तत्वाद्विनाशस्येत्यत आह क्षणिकत्वनिराकरणादिति । अतो जनित्वेत्यादिः स्पष्टार्थः । नन्विदंशब्दः किञ्चिदेव सन्निहितं गमयति नाखिलं जगदित्यत आह तथाहि सर्वचेति । ननु
३ ४ जन्मादीनां जगतश्च कः सम्बन्धः षष्ठ्या § विवक्षित इति तदाह सर्वस्यैवेति । ननु जगज्जन्मस्थितिभङ्गं किं सम्बन्धितया लक्षणं भवति । न

* उक्तमिति नास्ति १ पु० । † जन्मोत्पत्तीत्यारभ्येति ३ पु० ।
‡ तृतीयलिङ्ग इत्यतः प्राक्तनस्य इति १ पु० । § विवक्ष्यत इति तत्राहेति ३ पु० ।

तावत्काकवल्लक्ष्यसम्बन्धितया । जगदाश्रयत्वाद्भ्रमाणामिति कारणसम्बन्धितयेत्याह यत इति कारणनिर्देश इति । ११

ननु जन्मादिकारणत्वमपि लक्षणान्तर्गतमाहोस्विल्लक्ष्यस्वरूपान्तर्गतमिति वक्तव्यम् । ननु गृहस्य काकाधिकारणत्वं नाम धर्मः कस्मिन्नन्तर्भवति । लक्ष्य इति चेत् । काकाधिकरणत्वं च गृहशब्दार्थः स्यात् ततश्च काकविगमे गृहैकदेशभङ्गबुद्धिः स्यात् । लक्षणान्तर्गतमिति चेत् । कारणत्वमपि तथा । नहि नानाविधकार्यक्रियावेशात्मकत्वं तत्प्रसवशक्त्यात्मक*त्वं वा जिज्ञास्यविशुद्धब्रह्मान्तर्गतं भवितुमर्हति । तस्माज् जगज्जन्मादिकारणत्वमेवोपलक्षणमिति ।

ननु निमित्तकारणत्वमुपादानकारणत्वमुभयं वोपलक्षणत्वेनोच्यते । न तावन्निमित्तकारणत्वमेव ब्रह्मोपलक्षणम् । जगदभिन्नस्योपादानकारणस्य भेदेनावस्थानाद् ब्रह्मशब्दस्य स्वार्थान्वयाभावप्रसङ्गात् । नाप्युपादानकारणत्वमुपलक्षणम् । निमित्तकारणस्य सर्वज्ञस्य भेदेनावस्थानाद् यतः सर्वज्ञात् सर्वशक्तेरिति व्यपदेशो न स्यात् उपादानकारणस्य लोके ऽचेतनत्वात् । सत्यं ज्ञानमनन्तमिति च स्वरूपलक्षणस्योभयचायोगात् । नाप्युभयकारणत्वं ब्रह्मोपलक्षणम् । एकस्योभयकारणत्वे प्रमाणाभावात् । † प्रमाणान्तरसिद्धं हि लक्षणमनधिगतलक्ष्यस्व ‡ रूपाधिगमायाऽलम् । न तावदेकस्य जगन्निमित्तोपादानत्वमनुमानेना § वगन्तुं शक्यम् । दृष्टान्ते भेददर्शनात् । महाभूतपञ्चकव्यतिरिक्तेषु पदार्थेषु नानाविधनिमित्तोपादानदर्शनान्न तदनुवादेन ब्रह्म विधातुं शक्यम् । भूतपञ्चकनिमित्तोपादानत्वमेकस्याप्रसिद्धमिति तच्चाह प्रकृतित्वनिबन्धना पञ्चमीति । निमित्तत्वस्याप्युपलक्षणमेतत् उभयच पञ्चमीविधानात् । भूतपञ्चकस्य तावदेका प्रकृतिरनुमीयते सद्वस्त्वेकस्वभावानुगमात् ।

‖ तथाहि । महाभूतानि ¶ सद्वस्तुप्रकृतिकानि तत्स्वभावानुरक्तत्वे सति विविधविकारत्वान्मृदनुस्यूतघटादिवत् । द्रव्यत्वाद्यभेदा अपि प्रकृतिस्वभावा

* त्वप्रत्ययोऽत्र नास्ति ९ पु० । † प्रमाणान्तरप्रसिद्धं हीति २ पु० ।
‡ स्वरूपायालमिति ३ पु० । § साधयितुं शक्यमिति ३ पु० ।
‖ तथाहीति० महाभूतानि स्वानुगतोपादानानि भावत्वे सति विकारत्वात् घटादिवदिति विवक्षितम० प्रध्वंसव्यावृत्त्यर्थं भावत्वे सतीत्युक्तम० आत्मव्यावृत्त्यै विकारत्वादिति० विकारत्वं प्रतिपादयितुं विविधेत्युक्तम० विविधत्वम्, विभक्तत्वमित्यर्थः० किं तदनुगतमुपादानमिति वीक्षायां सन् घटः सन् पट इति सदनुरक्ततया घटादेः प्रतीयमानत्वात्सदेवानुगतमुपादानमित्यभिप्रायेण सद्वस्तुप्रकृतिकानीत्युक्तमाचार्येणेति द्रष्टव्यमिति तत्त्व० । ¶ सद्वस्तुप्रकृतानीति २ पु० ।

एव सामान्यवदऽवभासन्ते सद्वस्तु पुनः सर्वानुगमात्सर्वविकारप्रकृतिः । भौतिकानां च भूतोपादानत्वं दृश्यमानं मूलप्रकृत्यधीनतामेव सर्वस्य गमयति । अतः सर्वकार्योपादानमेकमेव लाघवादिति न्यायानुगृहीतानुमानेन सिद्धम् । तस्यैव च निमित्तकारणत्वमनुमानेन कल्प्यते । तथाच इदं जगदभिन्ननिमित्तोपादानं भवितुमर्हति प्रेक्षापूर्वजनितकार्यत्वात् आत्मगतसुखदुःखरागद्वेषादिवत् । नच घटादिष्वऽनैकान्तिकता । तत्राप्यभिन्ननिमित्तोपादानत्वकल्पनात् । अदृष्टादिनिमित्तभेदो दृश्यत इति चेन्न । उपादानाधिष्ठात्रोरेवैकत्वानुमानात् । तस्मादनुमानेनै * व प्रसिद्धमेकस्योभयकारणत्वं लक्षणत्वेन निर्दिश्यते । सृष्टिवाक्यप्रसिद्धं चैकस्योभयकारणत्वं लक्षणत्वेन निर्दिश्यते ।

तच्च केचित्परिणामवादमवतारयन्ति तैस्तच्च प्रमाणं वक्तव्यम् । सृष्टिश्रुतय इति चेन्न । तच्च परिणामशब्दाश्रवणात् । सत्यतोऽन्यथाभावः परिणामो ब्रह्मणोपि सत्यतः प्रपञ्चापत्तिं † प्रतिपादयतीति चेन्न । तासु सत्यशब्दाश्रवणात् । स्वतःप्रामाण्यात्तथाभूतैव सृष्टिरिति चेत् । किमिदं तथाभूतत्वं नाम । सत्यत्वमिति चेन्न । मिथ्येदं रजतमिति विशिष्टेर्थे प्रमाणगम्ये स्वप्नसृष्टावपि सत्यबुद्ध्यभावात् । स्वोपाधौ ‡ स्वविषयाभावविरोधितेति चेत् । मायात्मकत्वेऽपि समानम् । सृष्टेश्च स्वोपाधावऽभावव्यावृत्तत्वात्सर्वे च सोपाधिकधर्म्माः स्वाश्रयोपाधावबाध्यतया सत्या भवन्ति सृष्टिरपि स्वरूपेण न बाध्यते किन्तु परमार्थसत्यत्वांशेन ।

ननु मिथ्यासृष्टिविषयत्वे वाक्यस्याप्रामाण्यं स्यात् । न तत् प्रमाणव्यापारानभिज्ञो देवानांप्रियः । प्रमाणं हि प्रमेयाभावं न सहते नाऽप्रमेयाभावम् । नच सृष्टिश्रुतिः परमार्थसत्यतां प्रमिमीते तदभिधानाभावात् । यथा घट इत्युक्ते भावाभावयोः साधारणोऽवभासते अन्यतराभिधानाभावात् । तद्वत् । न हि स्वप्नविषया सृष्टिश्रुतिस्तत्सत्यतां प्रतिपादयति । प्रयोजनशून्यतया तात्पर्यहीनत्वाच्च न ब्रह्मणः प्रपञ्चापत्तिं प्रतिपादयति अनर्थहेतुत्वाच्च दुःखतत्साधनपरिणामस्य । न च कर्मकाण्डस्य प्रत्यक्षादेर्वा सिद्धिः प्रयोजनम् । जगन्नित्यतयाप्युपपत्तेः । सृष्टिश्रुत्यवगमात्प्रागेव सिद्धत्वाच्च । अभेदस्यापि सत्त्वादिरूपेण सिद्धत्वान्न शब्दापेक्षेति चेत् । केयमतिव्याकुलता सर्वसंकरवादिनः ।

* एवकारो नास्ति ३ पु० । † प्रतिपादयन्तीति १ पु० । ‡ स्वशब्दो ऽत्र नास्ति १, २ पु० ।

न हि नित्यशुद्धबुद्धमुक्तनिरतिशयानन्दप्रकाशमानं * सर्वज्ञाऽद्वितीयप्रत्यगात्मभूतं ब्रह्मा ऽवगमात्प्रागेव सिध्यति । किं तर्हि सृष्टिश्रुतेः प्रयोजनम् । प्रत्यक्षादिसिद्धप्रपञ्चस्य ब्रह्मण्येवोत्पत्तिविनाशवत्तयान्यथाभावमुपवर्ण्य तत्रापि † प्रतिषिध्य मिथ्यात्वापादनेन प्रमाणान्तराविरुद्धतया ऽद्वितीयब्रह्मस्वरूपसिद्धिः प्रयोजनम् तेनैकवाक्यत्वात् अन्यथा शेषिविरोधात् । सृष्ट्याभासत्वाद्रजताभासवत्तज्ज्ञानस्याप्रामाण्यमिति चेन्न । सत्यरजतवन्मुख्यसृष्ट्यन्तराभावात् तस्या एव मुख्यसृष्टित्वात् तज्ज्ञानस्य मुख्यरजतज्ञानवत् प्रामाण्यात् । देवदत्तो व्याघ्रो भवन्माया ह्येषा मया सृष्टेत्यादौ मिथ्याकार्येपि तद्भावसृष्टिशब्दयोः श्रवणात् ।

कुतः पुनः सत्यमिथ्या‡साधारण्यां सृष्टौ मिथ्यात्वे पक्षपातः । नाऽसदासीन्नो सदाऽऽसीत्तम आसीत् आसीदिदं तमोभूतम् मायां तु प्रकृतिमित्यादौ सदसद्विलक्षणानिर्वचनीयप्रकृतित्वश्रवणात् तदात्मकत्वाच्च विकारस्य तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मन इति स्मृतेः तमोऽविद्यामायानां पर्यायत्वात् । तदेवं श्रुत्यवगतायां मिथ्यासृष्टौ सत्यत्वकल्पनायां श्रुतिबाधप्रसङ्गात् । तथाच अस्ति घट इत्यस्त्यर्थोपाधौ प्रतिपन्नस्य घटस्य तदुपाधावेव नास्तीति प्रत्यक्षेणैव बाधो दृश्यते देशकालयोर्देशकालान्तराभावात्तयो § र्द्वयोर्निरुपाधिकनिषेधात् अस्त्यर्थस्यानुयायिनो निषेधाभावात् । अतो देशकालतदुपाधिघटानामस्त्यर्थे ब्रह्मस्वरूपे प्रतिपन्नोपाधौ प्रत्यक्षेणैव बाधान्मिथ्यात्वसिद्धिः । एवं ‖ सर्वभावप्रत्ययगोचरे ब्रह्मणि स्वरूपोपाधावऽस्त्यर्थे कालादुपाधिभिः सहाभावप्रत्यक्षेण बाधान्मिथ्यैवेति सिद्धम् । अन्याभावविशिष्टवस्त्वन्तरज्ञानस्य प्रत्यक्षत्वात् । अनुमानमपि । सर्वे विकाराः स्वानुस्यूत ¶एकस्मिन्वस्तुनि परिकल्पिताः । प्रत्येकमेकस्वभावानुविद्धत्वे सति विभक्तत्वाच्चन्द्रभेदवत् । जडत्वात् कार्यत्वात् **भेदत्वात् रजतवत् चन्द्रभेदवच्च । प्रतिपन्नब्रह्मोपाधावस्थूलादिवाक्यैः प्रतिषिध्यमानत्वाद्वैहात्मभाववत् । विरोधिकारणस्वभावानुपमर्देन विरोधिकार्यो-

* समासोऽत्र १, ३ पु० ।
† प्रतिषेध्येति २ पु० ।
‡ साधारणायामित्येव तु पुस्तकत्रयेऽपि पाठः ।
§ द्वयोरिति नास्ति ३ पु० ।
‖ सर्वस्वभावप्रत्ययेति २, ३ पु० ।
¶ समासोऽत्र ३ पु० ।
** भेदत्वादित्येव त्रिष्वपि पाठः ।

पत्तिलक्षणत्वात् मायाव्याघ्रवत् । प्रलयावस्थायां सहकालेन स्वोपाधौ शून्यत्वात् देहात्मभाववत् । अर्थापत्तिरपि । प्रपञ्चजन्मविनाशावनुपपन्नौ तस्य मिथ्यात्वमन्तरेण । अमिथ्याभूतयोर्ब्रह्मशून्ययो*रजन्मविनाशित्वात् । न च ब्रह्मज्ञानस्यापि प्रपञ्चज्ञानवन्मिथ्यात्वानुमानम् । तत्सत्यं स आत्मेतिवचनविरोधात् । न चास्थूलादिवाक्यैः स्थूलादिभ्यो ऽन्यत्वमात्रमुच्यते । कार्यकारणतादात्म्ये सत्येवंप्रतिषेधानुपपत्तेः । यथा शुक्लायां गव्यन्यत्वविवक्षयाप्य † ऽशुक्ला गौरिति प्रतिषेधो न दृश्यते तथा च प्रतिषेधे शुक्लतास्वरूपमात्रनिषेधदर्शनात् । तर्काप्रतिष्ठानान्न मिथ्यात्वानुमानमिति चेन्न । विचारशास्त्रानारम्भप्रसङ्गात् । शब्दमूलत्वाद् ब्रह्मणि न विरोधबुद्धिरिति चेत् । तर्ह्यऽसद्वा इदमग्र आसीत्सदेव सोम्येदमग्र आसीदित्यादिश्रुतिद्वयसामर्थ्यात् कारणस्य सदसत्त्वे स्याताम् । श्रुत्यर्थस्य तर्कागोचरत्वात्सर्वशक्तित्वाद्ब्रह्मणः सर्वमुपपन्नमिति चेत् न । ब्रह्मणि विरोधपरिहाराय विचारानारम्भप्रसङ्गात् । अत एवा ‡ ऽसत्यतापि ब्रह्मणः कदाचित् किं न स्यात् । तस्मात्प्रत्यक्षानुमानार्थापत्तिभिः प्रपञ्चस्य मिथ्यात्वावगमात् प्रशान्तत्वाच्च ब्रह्मणो निष्प्रयोजना च § सृष्टिश्रुतिर्विवर्त्त एवेति । न च सद्बुद्ध्यनुगमविरोधः । अधिष्ठानत्वात्तस्य । घटादिविशेषाणामेव ‖ मिथ्यात्वादिति सिद्धम् ।

७ लक्षणमनूद्य लक्ष्यस्वरूपं कथयितुमुत्तरं भाष्यमित्याह ¶ अस्य जगत इति । ननु न तावदिदं विशेषणलक्षणम् । प्रपञ्चजन्मादिकारणत्वस्य प्रपञ्चोपाधित्वात् निरुपाधिकब्रह्मस्वरूपलक्षणकथनमन्तरेण सोपाधिकधर्मप्रतिपत्त्ययोगात् । नाप्युपलक्षणमेतत् । लक्ष्यस्य ब्रह्मशब्दार्थत्वाऽयोगादवच्छेदादिति तत्राह ** द्विविधं हि लक्षणमित्यादि । उपलक्षणत्वे †† ऽपि नाद्वितीयस्वरूपलक्षणविरोधः यद्रजतमि ‡‡ त्यभात्सा §§ शुक्तिरितिवन्मिथ्याभूतेनापि प्रपञ्चकारणत्वेनोपलक्षणयोगात् । असाधारणसंबन्धो हि लक्षणनिमित्तम् न लक्षणसत्यत्वम् १० काकादीनामसंबद्धानां ||| गृहोपलक्षणत्वादर्शनादिति । कार्यप्रपञ्चं केचिदिति ।

* अजन्मविनाशत्वादिति १ पु० । † ऽशुक्लो गौरिति २ पु० । ‡ शून्यतापीति ३ पु० ।
§ सृष्टिः श्रुतिरिति २ पु० । ‖ मिथ्यात्वमितीति १ पु० । ¶ अस्येतीति ३ पु० ।
** द्विविधमितीति ३ पु० । †† उपलक्षणत्वे चेति २,३ पु०, अपिघटितस्तुतत्त्वदीपनसंमतः ।
‡‡ इति शब्दो नास्ति ३ पु० । §§ शुक्तिकेतिवदिति ३ पु० ।
||| गृहोपलक्षणत्वादर्शनादिति १ पु० ।

अयमर्थः । नामरूपकर्मात्मकमिति वेदान्तिनः । द्रव्यगुणकर्मसामान्यात्मकमिति वार्त्तिककारीयाः । कार्यकारणयोर्गविधिदुःखान्ताः पञ्चेति शैवाः । द्रव्यगुणकर्मसामान्यविशेषसमवायाः षडिति वैशेषिकाः । जीवाजीवास्रवसंवरनिर्ज्जरबन्धमोक्षाः सप्तेति क्षपणकाः । द्रव्यगुणकर्मसामान्यविशेषशक्तिपारतन्त्र्यनियोगा इत्यष्टौ प्राभाकराः । प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानि षोडशेति नैयायिकाः । ज्ञानेन्द्रियकर्मेन्द्रियभूततन्मात्रमहाभूतमनोहङ्कारमहदव्यक्तपुरुषा इति सांख्या इति । कस्तर्हि सिद्धान्तस्तदाह तद्व्युदासायेत्यादि । ७७ ११

यद्यपि रूप्यत इति रूपेणेत्थंभूतं जगद् व्याक्रियते कथं नाम्ना रूपितमुत्याद्यत इति तत्राह व्याक्रियमाणं हि वस्त्विति । अयमर्थः । लोके घटं चिकीर्षुः कुलालः प्रथमं घटशब्दविकल्पितं पृथुबुध्नोदराकाररूप * विकल्पितं च स्वबुद्धावाविर्भावयति पश्चाद्यथाविर्भूतं घटशब्दालम्बनयोग्यं पृथुबुध्नोदराकाररूपितं च घटं निर्वर्त्तयति । एवमेव मूलकारणमपि नामरूपाभ्यां स्वबुद्धावाविर्भूतमेव सर्वं पश्चाद्व्यनक्तीति नामरूपाभ्यामित्थं † भूतं व्याकृतमित्युच्यते । अनेककर्तृभोक्तृसंयुक्तस्येत्यारभ्य नन्वन्येपि ‡ परिणामादयो भावविकारा इत्यतः ,, ३ प्राक्तनः स्पष्टार्थः । ननु किमर्थोपलक्षितस्य ब्रह्मणः § स्वरूपलक्षणमुच्यते । न च स्वरूपलक्षणमन्तरेण कस्यचिद्वस्तुनः प्रतिपत्तिरस्ति । न च यच्च शाखायं स चन्द्र इत्येतावता प्रकृष्टप्रकाशात्मप्रतिपत्तिमन्तरेण चन्द्रावगतिरस्ति । न तावत्सर्वशक्तित्वं ब्रह्मासाधारणलक्षणम् प्रधानादीनामप्यविशेषात् । सर्वज्ञत्वमिति चेन्न । तस्य सर्वोपाधिक ‖ धर्मत्वान्निरुपाधिकब्रह्मस्वरूपा ¶ प्रतिपत्तिः ।

कथं चेदं सर्वज्ञत्वमिति वक्तव्यम् । न तावत्प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावप्रमाणैः सर्वं वेत्ति । तेषामयुगपत्प्रवृत्तेः सर्वस्य च प्रत्यक्षताहानात् सत्स्वपि तेष्वस्माकं सर्वज्ञाताऽभावात् इन्द्रियाणां च देशकालवस्तुविप्रकृष्टार्थग्राहित्वाभावात् । संयुक्तसमवायात् ** संयुक्तसंयोगात्संयुक्तविशेषणतया

* विकल्पितवस्तु बुद्धाविति १ पु० । † भूतेति नास्ति २ पु० । समास एव ३ पु० ।
‡ विपरिणामादय इत्यत इति २ पु०, परिणामविकारादयो भावा इत्यत इति ३ पु० ।
§ स्वरूपमुच्यत इति ३ पु० । ‖ धर्मेति २, ३ पु० नास्ति ।
¶ अप्रतिपत्तेरिति १ पु० । ** संयुक्तेति नास्ति ३, २ पु० ।

* वा सर्वार्थप्रत्यक्षत्वे ऽस्माकमपि प्रसङ्गात् । मानसमपि ज्ञानमात्मनो ऽन्यत्रेन्द्रियादिसापेक्षमिति सर्वं न मानसप्रत्यक्षगम्यम् । न च † धर्मातिशयवशादपीन्द्रियैरयोग्यं वस्तु गृह्यते । मार्जारादिदृष्टीनामपि योग्यरूपादिष्वेवातिशयवत्त्वदर्शनात् । न च कृत्स्नपरिभावनासंस्कारजन्यं मानसं सर्वज्ञज्ञानं कृत्स्नार्थं ‡ ग्राहयति । प्रथमं कृत्स्नार्थग्रहणाभावे तत्र परिभावनाऽयोगात् तज्जन्यकृत्स्नग्राहिज्ञानायोगात् । ऽपरिभावनायाः प्रागपि कृत्स्नार्थग्रहणेऽस्माकमपि प्रसङ्गात् । अतीतानागतवर्तमानार्थानामियत्तानवधारणाच्च सर्वग्रहणानुपपत्तिः एतावदिदं नातः परमस्त्यऽज्ञातमित्यनवधारणात् । न च स्वरूपज्ञानेनैव सर्वज्ञता तस्य प्रदीपप्रभावदऽतीतानागता § र्थग्राहित्वाभावात् । तस्मान्नास्ति सर्वज्ञ इति ।

उच्यते । सर्वस्य कर्तृत्वादेव वर्तमानस्वकार्यसर्वविषयज्ञता तावत्सिद्धा । एवं तत्तत्कालेतीतसर्वविषयावगमादनुभूतविषया ‖ ऽसंप्रमोषा स्मृतिः स्वमायापरिणामोपाधिरनावरणत्वात् सर्वविषया कल्प्यते । तथा सृष्टेः प्रागपि सृज्यमानपदार्थावधारणस्य कुलालादिषु दृष्टत्वात् आगामिसर्व ¶ विषयज्ञानं स्वमायापरिणामोपाधि कल्प्यत इति युक्ता सर्वज्ञता । यः सर्वज्ञः सर्ववित्तिति च जगत्कारणे सर्वज्ञपदप्रयोगात्सर्वविषयज्ञानं प्रमीयत इति श्रुतियुक्तिभ्यां युक्ता सर्वज्ञता । ननु सोपाधिकधर्मत्वान्न स्वरूपलक्षणमित्युक्तम् । न । अनेन सर्वज्ञशब्देन सर्वावभासकत्वं चित्प्रभाचमादित्यादिप्रकाशवदऽविषयोपाधिकं चिज्ञानमेव ब्रह्मस्वरूपलक्षणं विवक्ष्यत इत्यविरोधः । नन्वन्येपीत्यादिः स्पष्टार्थः ।

ननु निरुक्तवाक्यमेव मूलीकृत्य सूचेपि षड्भावविकारा गृह्यन्तामिति
२ चोदयति ननु षड्भावविकारा इति । यास्कपरिपठितानामि ** त्यादिपरिहारस्यायमर्थः । आर्षस्य वाक्यस्य मूलप्रमाणं †† प्रत्यक्षमागमो वा भवति । अनुमानादेरस्माकमपि प्रवृत्तेर्वाक्या ‡‡ नपेक्षणात् । तच्च प्रत्यक्षमूलत्वे यास्कवाक्यस्य भौतिकधर्मा एव भावविकाराः प्रत्यक्षेणावगन्तुं शक्यन्ते न महा-

* ऽशब्दो नास्ति २, ३ पु० ।
‡ दर्शयतीति ३ पु० ।
‖ असंप्रमोषेत्येव त्रिष्वपि पाठः ।
** इत्यादेः परिहारस्येति व्यासः १ पु० ।
‡‡ अनपेक्षत्वादिति ३ पु० ।
† धर्मातिशयादपीति १, ३ पु० ।
§ अर्थेति नास्ति १ पु० ।
¶ विषयत्वाज् ज्ञानमिति १ पु० ।
†† प्रत्यक्षं वागमो वेति १ पु० ।

भूतविषयाः । तच्च भौतिकविकारकारणे ब्रह्मणि गृह्यमाणे भूतपञ्चकमेव ब्रह्म गृहीतं स्यात् । श्रुतौ तु मूलप्रमाणानपेक्षत्वाद्यत्किञ्चिद्भवनधर्मवत् तस्य मूलकारणं ब्रह्म ग्रहीतुं शक्यत इति । किंच । श्रुत्यर्थपरत्वात् सूत्राणां श्रुतिरेव जन्मादिसूत्रमूलमित्याह तदर्थनिर्णयार्थत्वादिति । १८

ननु भूतभौतिकमूलकारणं न ब्रह्मेति प्रतिपत्तुं युक्तम् मायाया अपि मूलकारणत्वात् । मायां तु प्रकृतिमिति श्रुतेः । प्रक्रियते ऽनयेति प्रकृतिरिति करणमात्रं मायेति चेन्न । प्रकृतिशब्दस्योपादाने रूढत्वाद्भुत्पादनायोगात् । आत्मन आकाश इति प्रकृत्यन्तरश्रवणाद्भुत्पाद्यत इति चेन्न । तुल्यश्रुतित्वान्मायाप्रकृति-* त्वविरोधान्निमित्तेपि पञ्चमी † प्रयोगात् । दृश्यमान ‡ जाड्यानुसारेण च मायोपादानत्वनियमोपपत्तेः । इन्द्रो मायाभिरिति तृतीयैव श्रूयत इति चेत् । सत्यम् आत्मनो बहुत्वापत्तौ करणता भवति प्रपञ्चोपादानत्वे का हानिः । निरपेक्षप्रकृतित्वानुपपत्तिरिति चेत् । तर्हि परस्परविशिष्टतया द्विसूचरज्जुवत्प्रकृतिता स्यात् । अतो जगत्कारणे ब्रह्मणि मायाया अपि ब्रह्मत्वं लक्षितं स्यात् । मायेति प्रज्ञाभिधीयते सा च ब्रह्मचैतन्यमेवेत्यविरोध इति चेन्न अन्वयव्यतिरेकविरोधात् । परिदृश्यमानहस्त्यश्वरथादौ § प्रतिपन्नोपाधौ बाधिते च वृद्धव्यवहारेन्वयव्यतिरेकाभ्यां मायाशब्दः प्रयुज्यमानो दृश्यते । लोकसंवेदनविरोधाच्च । नहि प्रज्ञातिशयवन्तं मायाविनं वदन्ति गर्हन्ति च विदुषि मायाशब्दप्रयोगम् । बुद्धिविषयत्वान्मायाशब्दस्य न ब्रह्मचैतन्यप्रज्ञायां प्रसङ्गः स्वप्नादिविविधमायाकारप्रतिभासनाद्वा बुद्धेः ‖ कार्यवाचिनो मायाशब्दस्योपचारा ¶ त्कारणे प्रयोग इत्यनवद्यम् ।

अपि च । भूयश्चान्ते विश्वमायानिवृत्तिः मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते दैवी ह्येषा गुणमयी मम माया दुरत्यया माययाऽपहृतज्ञाना आसुरं भावमाश्रिता इति निवर्त्यत्वतत्त्वव्यत्वगुणमयत्वज्ञानावरणत्वलिङ्गाच्च न ब्रह्मचैतन्यं माया । बुद्धिरेव मायेति चेन्न । प्रकृतिशब्दविरोधात् । मन्त्रौषधादि मायेति चेन्न । दृश्यमानगन्धर्वनगरादौ मायाशब्दप्रयोगात् मन्त्रौषधादौ तदप्रयोगात् । तथापि जडात्मिका मायाशक्तिः पारमार्थिकीति चेन्न । नासदासीन्नो

* त्वप्रत्ययो नास्ति १ पु० ।
† प्रशब्दो नास्ति १, २ पु० ।
‡ दृश्यमानजाग्रदनुसारेणेति पश्चाच्छोधितं १ पु० ।
§ प्रतिपन्नोपाधिबाधित एव वृद्धेति १ पु० ।
‖ कार्यवादिन इति पश्चाच्छोधितं १ पु० ।
¶ करणे-इति १ पु० ।

सदासीत्तम आसीदिति जगत्प्रागवस्थायाः सदसद्विलक्षणानिर्वचनीयत्वश्रवणात् । लोके च हस्त्यश्वरथादिषु व्यभिचारिषु मिथ्यावस्तुमात्रे ऽनुयायिनि मायाशब्दप्रयोगात् । तरत्यऽविद्यां विततां हृदि यस्मिन्निवेशिते योगी मायामऽमेयाय तस्मै विद्यात्मने नम इति मायाऽविद्ययोः सामानाधिकरण्याच्च ।

८ ९ तस्मादनिर्वचनीयमायाविशिष्टं कारणं ब्रह्मेति प्राप्तम् तत्राह* अतो यदवष्टम्भो विश्वो विवर्त्तत इति । त्रैविध्यमत्र सम्भवति रज्ज्वाः संयुक्तसूत्रद्वयवन्मायाविशिष्टं ब्रह्म कारणमिति वा देवात्मशक्तिं स्वगुणैर्निगूढामितिश्रुतेर्मायाशक्तिम†त्कारणमिति वा जगदुपादानमायाश्रयतया ब्रह्म कारणमिति वेति । तत्र विशिष्टपक्षे तयैव ब्रह्मत्वेनोपलक्षितस्य ज्ञानानन्दादिस्वरूपलक्षणेन मायानिष्कर्षोल्लक्षणद्वयेन विशुद्धब्रह्मसिद्धिः । उत्तरपक्षयोस्तु मायाया ब्रह्मपरतन्त्रत्वात्तत्कार्यमपि ब्रह्मपरतन्त्रं भवति यथाऽशुतन्तुतन्त्वारब्धोपि पटोऽशुतन्त्वः प्रतीयते । ततश्चोत्पद्यमानकार्यस्य यदाश्रयो ‡ पाधिज्ञानानन्दलक्षणं च तद् ब्रह्मेति § शुद्धब्रह्म ‖ लाभ इति तदाह यदवष्टम्भ इति ।

केचि¶त्तु ब्रह्मैव जगदाकारेण परिणमते मृदिव घटाकारेणेति वदन्ति । तच्चावर्त्तयति विश्वो विवर्त्तत इति । एकस्य तत्त्वादप्रच्युतस्य पूर्वविपरीताऽसत्यानेकरूपावभासो विवर्त्तः । एकस्य पूर्वरूपपरित्यागेन सत्यरूपान्तरापत्तिः परिणामः । तत्र ** ब्रह्म न विवर्त्तते किंतु परिणमत एवेति तैस्तत्र प्रमाणं वक्तव्यम् । सृष्टिश्रुतेः परिणमत इति चेत् । सा खलु सृष्टिश्रुतिः ज्ञानानन्दसत्यनिरवयवापरिच्छिन्नब्रह्मस्वरूपस्य पूर्वसिद्धस्य परित्यागेन जडदुःखमिथ्यासावयवपरिच्छिन्नकार्यापत्तिं ब्रह्मणो ब्रवीति आहोस्वि †† त्पूर्वसिद्धरूपापरित्यागेनैव तद्विपरीतकार्यरूपापत्तिं ‡‡ ब्रह्मणो ब्रवीतीति वक्तव्यम् । तत्र पूर्वपरित्यागे ब्रह्मस्वरूपोच्छेदात्कार्यमात्रमेव वस्तु स्यात् । सृष्ट्यवस्थायां कार्यमात्रमेव पुनः प्रलयावस्थायां ज्ञानानन्दादिरूपेण परिणमत इति चेत् । अनिर्मोक्षप्रसङ्गात् । अज आत्मा महान् ध्रुवो न §§ जायते चेत्यादिश्रुतिविरोधश्च

* अत इत्यादीति ३ पु० । † ब्रह्मेत्यधिकं १ पु० । ‡ उपाधित इति १ पु० ।
§ विशुद्धेति १, ३ पु० । ‖ ज्ञानमिति १ पु० । ¶ तुशब्दो नास्ति १, २ पु० ।
** न ब्रह्म विवर्त्तते परिणमत एवेति १ पु०, ब्रह्म विवर्त्तते परिणमते वेतीति ३ पु० ।
†† पूर्वसिद्धविपरीतब्रह्मरूपेति २ पु० । ‡‡ ब्रह्मणइति नास्ति ३ पु० ।
§§ न जायते न म्रियते चेत्यादीति १, ३ पु० ।

स्यात् । अथ पूर्वविपरीतब्रह्मस्वरूपापरित्यागेनैव कार्यरूपापत्तिं ब्रूयात् सृष्टि-श्रुतिः । एवं तर्हि विवर्तं प्रतिपादयति शुक्तिकारजतमायाव्याघ्रादिषु विवर्तस्य तल्लक्षणत्वात् । अथ सृष्टिश्रुतिः सृष्टिमात्रविषया न पूर्व*स्वरूपपरित्यागापरित्यागयोर्व्याप्रियत इति चेत् † तथापि ‡ व्यवस्थितब्रह्मवाक्यैरेकवाक्यत्वात्तत्स्वरूपापरित्यागेनैव कार्यरूपापत्तिं ब्रह्मणो ब्रुवाणा विवर्तमेव दर्शयतीत्यनवद्यम् ।

योपि कश्चिदाह निरवयवमपि परिणमत इति । तथाहि । हेमद्रव्ये रुचकाकारेण परिणममाने तदवयवा अपि परिणमेरन् § नवेति वक्तव्यम् । यदि परिणमेरन् तर्हि तदवयवा अपि तथेति निरवयवपर्यन्तः परिणामः स्यात् । अथ न परिणमेरन् । न तर्ह्यवयवी परिणमेत आश्रयविकारमन्तरेणाश्रितविकारायोगात् । तस्मादाद्यसंयोगो ऽवयव्येकदेशसमवेतः परम्परया निरवयवपरमाणुसंयोगपुरःसरः तथा निरवयवपरिणामपुरःसरो ऽवयविपरिणाम इति । ‖ स वक्तव्यः ¶ कश्चायं परिणाम इति । यदि तावत् ** स्वावयवानां पूर्वसंयोगात् संयोगान्तरापत्त्या वा ऽवयावान्तरसंयोगेन वा संमूर्छितावयवत्वं परिणामः । न तर्हि निरवयवे परिणामः स्वावयवाभावान्निरवयवस्य । नचावयवानां संयोगान्तरेण संमूर्छितत्वमन्तरेणावयविनः परिणामो ऽवस्थान्तरं वा ऽन्यथाभावो वा निरूपयितुं शक्यते । नच वस्तुनो वस्त्वन्तरसंयोगो वा परिस्पन्दो वा गुणान्तरोदयो वा परिणामः । ब्रह्मणि तेषामभावात् । आकाशे च वस्त्वन्तरसंयोगिनि परिस्पन्दमाने च भ्रमरे लौहित्योदये च घटे द्रव्ये परिणामबुद्ध्यभावात् । अथ †† तदनुषक्तद्रव्यान्तरोत्पत्तिः परिणाम इति । तच्च किं हेमावयवानां रुचकरूपेणैव परिणामः किं वा द्रव्यान्तररूपेण । न तावद् द्रव्यान्तररूपेण तच्च रुचकद्रव्यातिरिक्तकार्यद्रव्यादर्शनात् ।

* पूर्वरूपपरीति ३ पु० । † चेच्छब्दो नास्ति १, २ पु० ।

‡ व्यवस्थिते ब्रह्मेति २, ३ पु० । § वाशब्दोऽत्राधिकः ३ पु० ।

‖ परिणाम एव दुर्निरूप इत्याह स वक्तव्य इति० किं पूर्वरूपे स्थिते परिणाम उत नष्टे० न तावदाद्यः, तथाभावविरोधात् द्वितीये, पूर्वस्य नष्टत्वात्कस्य परिणामः० किञ्च, संमूर्छितावयवत्वं परिणामः, आहो वस्त्वन्तरसंयोगः, उत परिस्पदः, उत गुणान्तरोदयः, किंवा पूर्वरूपानुषक्तद्रव्यान्तरोदय इति वाच्यम्० आद्येऽपि किं स्वावयवानां संयोगान्तरापत्त्या संमूर्छितावयवत्वम् उतावयवान्तरसंयोगेनेति विकल्योभयमप्यनूद्य दूषयति यदि तावदित्यादिनेति तत्त्व० ।

¶ कोऽयमिति १ पु० । ** स्वशब्दो नास्ति १ पु० । †† तदनुरक्तेति १, ३ पु० ।

नापि रुचकाकारेणैव । तस्यावयविपरिणामत्वात् । अवयवानां * च रुचकाकारेण † नुगमस्य रुचकानुगतावयव्यनुगमेनैवान्यथासिद्धत्वात् । नच रुचकावस्थाव्यतिरेकेण हेमावयवानामवस्थान्तराणि दृश्यन्ते येन परिणामभेदः स्यात् । नच संयोगभेद एवावयवपरिणाम इत्युक्तम् । नचावयवि ‡ द्रव्यं विना हेमावयवा रुचकाकारेण परिणमन्त इति युक्तम् । आरम्भवादप्रसङ्गात् । अथादृश्यमानोप्यवयवपरिणामोवयविपरिणामानुपपत्त्या कल्प्यते आश्रयविकारमन्तरेण आश्रितविकारा § नुपपत्तेः । नैतत्सारम् । अवयविजन्मविनाशयोरवयवाना मपि तत्तन्त्राणां जन्मविनाशप्रसङ्गात् । अवयविगमने ऽवयवानां गमनवत् ‖ परिणामोपि भविष्यतीति चेत् । न । अवयविनि घटत्वजातिसमवायिनि अवयवानां घटत्वजातिसमवायाभावात् । नन्ववयवानामन्यथाभावमन्तरेण कथमवयविनो ऽन्यथाभावः स्यात् । जातिगुणादिष्व ¶ ऽन्यथाभावरहितेषु द्रव्यपरिणामवदिति वदामः । न हि द्रव्यस्यावस्थान्तरद्रव्यान्तरापत्तिवद् ** नैल्यं गुणान्तरमापद्यते ऽवस्थान्तरं वा । न चावयविकार्यव्यतिरेकेणावयवानां कार्य्यं दृश्यत इत्युक्तम् । न हि पटे कार्यान्तरावभासे ऽपि तन्तवो ऽतन्त्वात्मनावभासन्ते । पटकार्यं तन्त्वनुगमः स्वानुगतानुगमादन्यथासिद्ध इत्युक्तम् । किं च । अवयविपरिणामोपाधावेवावयवपरिणामो दृष्ट इति न निरुपाधिनिरवयवात्मपरिणामसिद्धिः ।

यत्तु निरवयवसंयोगवत्परिणाम इति । तत्रापि दृश्यमानो ऽवयविसंयोगो न परमाणुसमवेतः तद्गतरूपादिवदऽप्रत्यक्षत्वप्रसङ्गात् । नाप्यवयव्येकदेशसंयोगेन †† निरवयवे संयोगः कल्पयितुं शक्यते अवयविन्येव जातिसमवायवदऽवयवसंयोगमन्तरेणावयविन्येव संयोगोपपत्तेः । अवयवानां संयोगानुगमस्यावयव्यनुगमेनान्यथासिद्धत्वात् । अवयवेष्वेव संयोगो नावयविनीति चेत् न । अवयविभ्यामसंयुक्ताभ्यां कार्यान्तरानारम्भप्रसङ्गात् । तस्मादवयविन्येव संयोगो नावयवेषु । अवयविसमवाये संयोगस्य कृत्स्नवृत्तिता संयोगस्य प्राप्नोतीति चेत् । तर्हि निरवयवसंयोगे ऽपि कृत्स्नवृत्तेः प्रचयाभावप्रसङ्गः‡‡इति । कथं पुनर्ब्रह्मणो निरवयवत्वलाभः । उच्यते । अवयवावयविनोः स्वयंप्रकाशत्वे

* च स्थाने तुः १ पु· । † अनुगमनस्येति १ पु· ।
‡ द्रव्यं विनाभ्य हेमेति १, ३ पु· । § अनुपपत्तिरिति २, ३ पु· ।
‖ परिणामेऽपीति १ पु· । ¶ अन्यथाभावविरहिष्विति १ पु· । ** नैर्मल्यमिति १ पु· ।
†† निरवयवाणुसंयोग इति १ पु· । ‡‡ इतिशब्दो नास्ति १ पु· ।

सतीतरेतराविषयत्वान्न सावयवत्वं ब्रह्मणा स्वात्मन्यनुभवितुं शक्यम् । अन्यतरस्यास्वयंप्रकाशत्वे ऽन्यतरेण वेद्यत्वात् घटात्मनोरिव नांशांशिभावसिद्धिः । श्रुतिश्च निष्कलं निष्क्रियं शान्तमिति क्रियावयवशून्यतामाह । नियन्तृत्वादिक्रियापि श्रूयत इति चेत् । तर्हि परस्परविरोधे सति मायया तत्त्वातत्त्वव्यवस्था कल्पनीया । * मायाभिः पुरुरूप ईयत इति प्रवृत्ते † म्मीयानिबन्धनत्वश्रवणात् चेतनस्य निर्व्यापारस्य सुषुप्ते पुरुषार्थत्वावगमात् ब्रह्मणः स्वतःप्रवृत्तिप्रयोजनाभावाच्च विपरीतस्वरूपापरित्यागेन विपरीतकार्यापत्तेश्च विवर्त्त एवेति सिद्धम् ।

ननु जगदुत्पत्तिकारणत्वं न सिद्धवद् ब्रह्मलक्षणत्वेनोपादातुं शक्यम् भूतपञ्चकस्य कार्यत्वात्सिद्धैर्भौतिकानां च भूतोपादानत्वादिति चोदयति ननु श्रुतिनिर्दिष्टग्रहण इत्यादिना । उच्यत इत्यादेः परिहारस्यायमर्थः । पृथिव्यग्नेजो ‡ वायवो विवादपदानि जन्मविनाशवन्तः पृथिव्यग्नेजोवायुबुद्धिगोचरत्वा § देकदेशपृथिव्यग्नेजोवायुवदिति । ननु प्रत्यनुमानमस्ति पृथिव्यादयो न जायन्ते महाभूतत्वादाकाशवदाकाशश्च न जायते निरवयवद्रव्यत्वादात्मवदिति । सत्यम् । ‖ महाभूतत्वादिति सामान्यतोदर्शनात् पृथिवीबुद्धिगोचरत्वात्तदेकदेशवदिति विशेषतोदर्शनमेव बलीय इत्यनवद्यम् । न यथोक्तविशेषणस्येत्यादिभाष्यतात्पर्यमाह युक्तिरपि ब्रह्मस्वरूपनिर्णयायेत्यादिना । अस्य जगत ¶ इत्यादि भाष्यं व्याचष्टे नान्यतः परपरिकल्पितात् ,, १९ **प्रधानादेरिति । अयमर्थः । सर्व एवाह्याध्यात्मिका भावाः सुखदुःखमोहसामान्यप्रकृतिकाः सुखदुःखमोहसामान्येन नियमेनान्वितस्वभावत्वात् । ये विकारा यदन्वितस्वभावास्ते तत्प्रकृतिका दृष्टाः यथा मृदन्विताः शरावादयः । तथा सर्वे विकारा अविभक्तैकप्रकृतिकाः परिमितानेकविकारत्वात् ये परिमितानेकविकारास्ते ऽविभक्तैकप्रकृतिकाः यथा मृत्पिण्डप्रकृतिकाः शरावादय इति जगन्मूलकारणं प्रधानमनुमिमते सांख्याः । तथाणुवादिनश्चानुमिमते सर्वं

* मायानित्यरूप इति १ पु॰ शोधितम् । † एवशब्दो ऽधिकः १ पु॰ ।
‡ वायवो ऽपि पदार्थाजन्म जन्मेति २ पु॰ । § तदेकदेशेति ३ पु॰ ।
‖ पृथिव्यादिनवद्रव्यपक्षीकारे आत्मनि बाधः, प्रत्येकपक्षे व्यभिचारः, पृथिव्यादिचतुर्णामन्यतमस्य पक्षत्वे विशेषतोदृष्टबाधः, अन्यान्यत्वेन पक्षत्वे श्रुतिबाध इति-भाव० ।
¶ इतिभाष्यमिति २, ३ पु॰ । ** प्रधानादिति अयमर्थः सर्वे च इति ३, ३ पु॰ ।

कार्यद्रव्यं स्वपरिमाणादणुतरपरिमाणसंयोगसचिवसमानजातीयानेकद्रव्यारब्धं कार्यद्रव्यत्वात् यत्कार्यद्रव्यं तत्तथा यथाऽनेकद्रव्यारब्धः पट इति निरवयवपरमाणुपर्य्यन्तमनुमानप्रवृत्तेः परमाणवो मूलकारणमिति । तथा शून्यवादिनश्च सर्वं कार्यमभावपुरःसरं भवितुमर्हति योग्यत्वे सत्यऽनुपलभ्यमानपूर्वावस्थत्वात् यदभावपुरस्सरं न भवति न तद्योग्यत्वे सत्यऽनुपलभ्यमान * पूर्वावस्थम् यथा परपरिकल्पित आत्मेति शून्यालम्बनत्वं सर्वत्र वदन्ति । योगाः शैवाश्च हिरण्यगर्भं पशुपतिं चागमसामर्थ्याज्जगत्कारणं कल्पयन्ति । तान् पक्षान् व्यावर्त्तयति † नान्यतः परपरिकल्पितादित्यादिना ।

७८ २१ तत्र प्रथमं तावत्प्रमाणदूषणं ‡ सम्भावयति अचेतनात्तावदित्यतः प्राक्तनेन § ग्रन्थेन । कथम् । सांख्यानुमाने तावत्सुखदुःखमोहान्वयो भावानामऽसंप्रतिपन्नः अन्तर्बहिर्भावेनोपलब्धेः । स्यादेतत् ‖ सर्वे विकाराः सुखदुःखमोहात्मकाः चित्तोपरक्तत्वे सति तत्र तदाकारप्रतिभासहेतुत्वात् दर्पणोपरक्ततया मुखाकारप्रतिभासहेतुबिम्बवदिति भावानां सुखदुःखमोहान्वयोऽनुमीयत इति । न । अन्तर्बहिर्भावभेदप्रत्यक्षविरोधात् एकं च शब्दमुपलभमानानां प्रत्येकं सुखदुःखमोहचितयोपलम्भप्रसङ्गात्च अदृष्टेन च वस्तुसामर्थ्यनियमायोगात् । अतोऽसिद्धो हेतुः अनैकान्तिकश्च गुणसामान्येष्वप्यप्रकृतिभि ¶ र्द्रव्याणां समन्वयात् । यत्तु परिमितत्वादिति तत्रापि वस्तुतः परिमितत्वे हेतोः गुणपुरुषेष्वनैकान्तिकता । देशकालपरिमितत्वे घटहिमकरकादिषु प्रत्यक्षदृष्टभिन्नप्रकृति ** ष्वनैकान्तः । वैशेषिकानुमाने ऽपि स्वपरिमाणादणुतरपरिमाणारभ्यत्वे ††दीर्घविस्तीर्णदुकूलैः क्रियमाणरज्जुद्रव्यस्य ह्रस्वस्यापि कार्यत्वदर्शना‡‡दनैकान्तिको हेतुः प्रत्यनुमानदुष्टश्च न किञ्चिदपि कार्यद्रव्यं निरवयवद्रव्यसंयोगपुरःसरं प्रचयात्मक-

* पूर्वावस्थं न भवतीति ३ पु० । † नान्यत इत्यादिनेति ३ पु० ।
‡ सूचयतीति ३ पु० । § ग्रन्थेनेति नास्ति १ पु० ।
‖ समासः २ पु० । ¶ द्रव्याणामन्वयादिति १ पु० । ** अनैकान्तिक इति १ पु० ।

†† न च तत्कार्यद्रव्यान्तरं न भवति किन्तु संयोगान्तरमिति वाच्यम्, नामरूपकार्यभेददर्शनेन पटवत्तस्या ऽपि भिन्नद्रव्यत्वात् · अन्यथा ऽवयविन एव विलोपप्रसङ्गात्, अनेकाणुसंयोगादेव प्रत्यक्षत्वोपपत्तेः· यत्तु संयोगान्तरमिति, तत्र तावत्पटस्य, एकमात्रवृत्तिसंयोगासंभवात्· नापि तदवयवानाम्, पूर्वसंयोगे सति तदयोगात्· पूर्वसंयोगनाशे च पटनाशप्रसङ्गात् किञ्च, पटादिकार्यस्य स्वकारणाद्ध्रस्वत्वं दृश्यते, नहि तन्तुभिरर्द्धप्रदेशारब्धं पटस्य तावदधिकं वा दैर्घ्यं भवति, एवं परिमाणान्तरेऽपि चेत्कारणाच्यूनं चेत्, न किञ्चिद्बाधकमिति भावः–इति भाव० ।

‡‡ अनैकान्तो हेतुरिति ।

त्वात् यत्प्रचयात्मकं न तन्निरवयवद्रव्यसंयोगपुरःसरम् यथा घटः । शून्यानुमाने ऽपि घटस्य पूर्वावस्था प्रत्यक्षदृष्टा मृदित्यनुपलभ्यमानपूर्वावस्थत्वादित्यऽसिद्धो हेतुरिति ।

इदानीमर्थदूषणमभिप्रेत्याह अचेतनात्तावदचेतनत्वादेवेत्यादिना । मा भून्निरीश्वरात्प्रधानाद्विचित्रकार्यरचना * परमाणुवादे तु पुनरधिष्ठातुरीश्वरस्य विद्यमानत्वात्तद्बुद्धिसामर्थ्यादेव विचित्रजगत्कार्यरचना भविष्यतीत्याशङ्क्याह चेतनादपीति । अयमर्थः । † कुलालादिदृष्टान्तेनानुमीयमानस्येश्वरस्य शरीरेन्द्रियपरिच्छिन्नज्ञानशक्तित्वात्तेनैव दृष्टान्तेन परिच्छिन्नज्ञानशक्तेश्च जगद्रचनानुपपत्तिरिति ‡ घटादिषु कर्तृद्वयप्रसङ्गान्मूलकारणे § ऽपि तदनुमानमिति ।

यत्तु शून्यालम्बनं जगदिति तच्चाह अभावात्पुनरिति । न च निरुपाख्योपादानता जगतः सदन्वयादिति । किं च । निरुपाख्यस्य कारणत्वे पूर्वकल्पस्य निरन्वयविनाशात्संस्काराभावात् पुनः सजातीयकार्योत्पादनियामकाभावाद्वि शिष्टसंस्थानपश्वादिकामितयानुष्ठितकर्मणां कल्पान्तरे तथाविधपश्वाद्यनुपपत्तेः । शब्दार्थसम्बन्धतद्व्यवहारिणां च नाकस्य पृष्ठे तं कालं दिवि सूर्य इव रोचते ततः कृतयुगस्यादौ ब्रह्मपूतो महायशाः सर्वज्ञो धृतिमानृषिः ॥ पुनराजायते स्मरन्नित्यादिश्रुतिप्रतिपन्नानां निरन्वयविनाशात्कल्पान्तरे पूर्वैककल्पव्यवहारानुसंधानेन व्यवहारप्रवृत्त्यभावात् अपूर्वसंकेते च धर्मस्य प्रमाणान्तरागोचरत्वाद्गोपदार्थस्यापूर्वसाधनत्वं प्रमीय तच्च च गोशब्दं प्रयुज्य गवा यजेतेति वाक्यरचनानुपपत्तेश्च कर्मतत्फलतत्प्रमाणव्यवहारो** च्छेद इत्याह अतीतकल्पसंस्काराभावादित्यादिना । ,,

* परमाणुवादे पुनरिति १ पु०, परमाणुवादेषु पुनरिति २ पु० ।

† यदि कुलालादिदृष्टान्तेन ज्ञानेच्छाप्रयत्नादि कल्प्येत, क्षित्यादिकार्येण कल्प्येत, तर्हि ज्ञानस्याऽनित्यत्वशरीरादिजन्यत्वनियमात्तादृशमेव कल्प्येत, व्याप्तेस्तुल्यत्वेन स्वाभिमतमात्रानुमानायोगादिति भाव० ।

‡ विवादाध्यासितं द्विकर्तृकं कार्यत्वात् घटादिवत्० न च जीवेश्वरकर्तृद्वयाङ्गीकारादिष्टापत्तिरित्यपि वाच्यम्, घटादौ जीवेश्वरकर्तृकत्वस्य तदतिरिक्तकुलालकर्तृकत्वस्य च दृष्टत्वात् पृथिव्यादावपि कर्तृत्रयप्रसङ्गात्० न चात्रोत्कर्षसमत्वं शङ्क्यम्, अव्याप्तधर्मप्रसङ्गस्योत्कर्षसमत्वात्० न चात्र तथात्वम्, घटादेः कर्तृत्रयव्याप्तत्वादित्यर्थ इति तत्त्व० ।

§ अपिकारो नास्ति २ पु० । || पुनराजयते इति २ पु० ।

¶ कल्पेति नास्ति १ पु० । ** उच्छेदप्रसङ्ग इत्याहेति ३ पु० ।

अत्र स्वभाववादी जल्पति । न कारणसापेक्षमिदमुत्पद्यते । * ननु स्वयमेव स्वस्य निमित्तमित्युक्तं भवति किं वा निर्निमित्तमुत्पद्यत इति । निर्निमित्तमिति ब्रूमः । ननु तर्हि घटस्य भावाभावौ युगपत्स्याताम् क्रमकारिनिमित्तनिरपेक्षत्वात् । उच्यते । कारणस्य क्रमकारित्वं स्वाभाविकं चेत् स्वभाववादप्रसङ्गः । निमित्तान्तरसापेक्षत्वे ऽनवस्थापातः । कालभेदेन क्रमकार्यव्यवस्थेति चेत् । स कालक्रमः स्वाभाविकश्चेत् स्वभाव†वादः निमित्तान्तरापेक्षत्वे ऽनवस्था । तस्मात् सर्वं कार्यं विचित्रं क्रमवर्ति च यथादर्शनं
२५ स्वभावेनैव जायत इति । तत्राह न च स्वभाव इत्यादिना । स्वतःसिद्धसामर्थ्यानामपि भावानां परस्परोपकार्योपकारभावः प्रत्यक्षसिद्ध इत्यर्थः । अत इत्युपसंहारः ।

नन्वनुमानेनैव यथोक्तविशेषणमीश्वरं तार्किका व्यवस्थापयन्ति किं
६ ३ युक्तिसहितेनागमेनेत्यत आह एतदेवानुमानमित्यादिना। युक्तिर्हि सम्भावनाबुद्धिमात्रमुत्पादयति अनुमानं पुनरर्थं निश्चापयति । व्याप्त्यनुपपत्या ‡ भास उदाहरणमात्रदर्शनं युक्तिः अव्यभिचारिणी च व्याप्तिरनुमानम् । § तत्र कुलालादिदृष्टान्तेन्न सर्वज्ञेश्वरकारणत्वं निश्चेतुं शक्यते विपरीतोदाहरणसम्भवात्किन्तु प्रमाणान्तरे सति कुलालादिदृष्टान्तैः सम्भावयितुं शक्यते । अतो युक्तिरेषा । तत्राज्ञानादर्थनिश्चायकमनुमानं ‖ मन्यन्त इति । किं तदनुमानमिति । उच्यते । सर्वं कार्यं स्वरूपोपादानोपकरणसंप्रदानप्रयोजन¶सामर्थ्यविषयविज्ञानवत्कर्तृकं विविधविन्यासकार्यत्वात् घटादिवदिति वैशेषिकानुमानम् । सांख्ययोगाः ज्ञानैश्वर्यशक्तयः क्रमेणोत्कृष्यमाणाः क्वचित्सर्वविषयज्ञानैश्वर्यशक्तिमति पर्यवस्यन्ति तरतमभावेनोत्कृष्यमाणधर्मत्वात्परिमाणवदित्यनुमिमते । ** नैयायिकादयस्तु सर्वं कर्मफलजातं कर्मतत्फलतद्भोक्तृदेशकालादिविषयविज्ञानवता प्रदीयमानं कर्मफलत्वात्सेवादिकर्मफलवदित्यनुमिमते ।

* कर्तृकर्मविरोधात्स्वस्य स्वनिमित्तत्वानुपपत्तेर्नाद्यो युज्यते, नान्योऽपि, कार्यस्यानुत्पत्तिप्रसङ्गादित्यभिसन्धिरिति तत्त्व० ।

† वादप्रसङ्ग इति ३ पु० । ‡ आभासादुदाहरणेति ३ पु० ।

§ न तत्र कुलालादिदृष्टान्तेन सर्वज्ञेति ३ पु० । ‖ मन्यत इति २, ३ पु० ।

¶ सामर्थ्येति नास्ति २, ३ पु० । ** नैयायिकास्त्विति ३ पु० ।

तच्च * वैशेषिकानुमाने जगतो बहुकर्तृत्वपरिच्छिन्नज्ञानैश्वर्यादिमत्कर्तृत्वा†नुमानेषूदाहरणसम्भवादयुक्तिमात्रमेतत् । योगानुमाने ऽपि ज्ञानैश्वर्यशक्तीनां क्वचित्काष्ठाप्राप्तिमात्रे ऽनुमीयमाने ‡ लक्ष्यपदार्थविषयज्ञानादिषु पर्यवसानसिद्धेः कुतः सर्वज्ञत्वादिसिद्धिः सर्वविषयज्ञानाद्यनुमाने गुरुत्वरागद्वेषदुःखभ्रान्त्यादिष्वनैकान्तिकतेति युक्तिमात्रमेतत् । नैयायिकानुमाने ऽपि कर्मफलस्य शरीरेन्द्रियादिमद्बहुदातृत्वदर्शनादेकेश्वरासिद्धेः श्रुतिप्रतिपन्नसर्वकारणसर्वज्ञसर्वेश्वरसर्वफलदात्र ऽद्वितीयब्रह्मप्रतिपत्तावुदाहरणमात्रेण सम्भावनाबुद्धिहेतुत्वादयुक्तिमात्रम् इत्यज्ञानान्निश्चायकमनुमानं मन्यन्ते ।

ननु वाक्येषु सत्सु किमित्यनुमानप्रयास इति अनुमानसिद्धार्थानुवादकत्वादित्याह § जन्मादीति । ननु सूत्रे ऽप्येतान्ये‖ वानुमानानि स्वातन्त्र्येणार्थनिश्चायकत्वेन सूचितानि तत्कथमागमगुणभूतेयं युक्तिरिति चोदयति नन्विहापि तदेवोपन्यस्तमित्यादिना । ¶ परिहरति न वेदान्तवाक्यग्रन्थनार्थत्वादित्यादिना । किञ्च । अनुमानमात्रात्कारणसद्भावमात्रं सिध्यति नाधिकमिह तु सत्य** ज्ञानानन्दानन्तसर्वज्ञप्रत्यगात्मब्रह्मावगतिर्विवक्षिता । नचागममन्तरेण सामान्यमात्र††विषयानुमानादेव विशिष्टार्थसिद्धिरित्याह समन्वयसूत्रप्रमुखोपात्तैरित्यादिना । न तर्हि युक्तिरत्र ‡‡ सूचिता आगमेनैव विशिष्टार्थसिद्धेरिति तत्राह सत्सु त्विति । न धर्मजिज्ञासायामित्यादिः स्पष्टार्थः । श्रुतिः पदान्तरनिरपेक्षः शब्दः । लिङ्गम् श्रुतस्यार्थस्यार्थान्तरेणाविनाभावः । अनेकपदसामर्थ्यं वाक्यम् । वाक्यद्वयसामर्थ्यमाख्याधीतविषयं प्रकरणम् । क्रमवर्तिनां पदार्थानां क्रमवर्तिभिः पदार्थैर्यथाक्रमं संबन्धः स्थानम् । संज्ञासाम्यं समाख्या । ननु शब्देन ब्रह्मस्वरूपे ऽवधारिते नानुभवेन कृत्यमस्ति न च शब्दप्रमेय§§मनुभवितुं च शक्य- ,,

* प्रासादादेर्बहुकर्तृकत्वं तावद्दृश्यते, ततश्च तद्वज्जगतोऽपि बहुकर्तृकत्वं स्यात्· न च लाघवादेककर्तृकत्वं जगतः शङ्क्यम्, निमित्तोपादानैक्यस्यापि तत एव प्रसक्तेरित्यतर्थ इति तत्त्व०।

† अनुमानेऽप्युदाहरणेति ३ पु· , ‡ लक्षेति २, ३ पु·।

§ जन्मादिसूत्रलक्षितान्यपीति ननु सूत्रेऽपीति १ पु·, जन्मादिसूत्रेऽपीति २ पु·।

‖ एवकारो नास्ति ३ पु·। ¶ परिहरति वेदान्तेत्यादिनेति ३ पु·।

** ज्ञानानन्तानन्देति ३ पु·। †† विषयादनुमानादिति ३ पु·।

‡‡ सूचितेति १ पु·। §§ अनुभवितुं युक्तमिति ३ पु·।

७९ २३ मिति तत्राह * अनुभवावसानत्वादित्यादिना । ननु धर्मजिज्ञासायामित्यादिः स्पष्टार्थः । किमिति धर्मस्यानुभवानपेक्षेति चोदयति कथमिति । धर्मस्यानुभवायोग्यत्वादनपेक्षितानुभवत्वाच्च न शब्दादन्यापेक्षेति दर्शयति कर्त्तव्ये हीत्यादिना । ननु सिद्धस्वभावस्यानुभवयोग्यत्वे ऽपि किमित्यनुभवो ऽपेक्ष्यत इति तत्राह इह तु सिद्धस्येति । ननु वेदप्रमेयत्वाविशेषान्मननिदध्यासनानुभवेषु धर्मवद् ब्रह्मण्यपि मा भूदपेक्षा ब्रह्मवद्वा धर्मे ऽपि स्यादपेक्षेत्यत आह न हि कर्त्तव्यसिद्ध्यर्थनिष्ठयोरिति । अस्तु पुरुषेच्छावशनिर्वर्त्यत्वमपीति तत्राह † ततो विधिप्रतिषेध इति । यजेत न भक्षयेदितिवद् ब्रह्मणो विधेयत्वं प्रतिषेध्यत्वं चे‡त्यर्थः । विकल्प इति । व्रीहिभिर्यवैर्वेतिवद् ब्रह्म वा स्थाणुर्वेतीच्छाविकल्पः § । समुच्चय इति षड्याग‖समुच्चयः इह ब्रह्म स्थाणुश्चेत्यर्थः । उत्सर्गापवाद इति । न हिंस्यात्सर्वा भूतानि अग्नीषोमीयं पशुमालभेत आहवनीये जुहोति पदे जुहोतीतिवत् सामान्यप्रतिपन्नब्रह्मणो विशेषे ऽपवादः । बाधाभ्युच्चय इति । प्रकृतेरतिदिष्टानां कुशमयबर्हिषां विकृतावुपदिष्टशरमयबर्हिर्भिर्बाधवद् ब्रह्मणो ऽपि क्वचित्प्राप्तस्य पदार्थान्तरेण बाधः । ¶ प्राकृतानां ** पञ्च†† [नारिष्टहोमानां वैकृतैरुपहोमैः समुच्चित्यानुष्ठानवद् ब्रह्मणो ऽप्यतिदिष्टस्योपदिष्टेन समुच्चित्यानुष्ठानमभ्युच्चयः]‡‡[प्रयाजान्यजतीति प्रकृतेर्विकृतावतिदिष्टानां विकृतावेकादश प्रयाजान्यजतीत्युपदिष्टेन समुच्चित्यावृत्त्या षोडशप्रयाजानुष्ठानवद् ब्रह्मणो ऽप्यतिदिष्टस्योपदिष्टेन समुच्चित्यानुष्ठानमभ्युच्चयः] §§ व्यवस्थितविकल्प इति । उदिते जुहोत्यनुदिते जुहोतीतिशाखाभेदव्यवस्थावत्क्वचिद् ब्रह्म भवति न भवतीति व्यवस्था अस्त्वेवं धर्मसाम्यं ब्रह्मण इति चेन्नेत्याह न वस्तुनीति । तदेव प्रपञ्चयति तथा चैकस्मिन्निति । परः परिचोदयतीत्यतः प्राक्तनः स्पष्टार्थः । पुनरनुमानवादिन-
८० १५ श्चोदयन्ति ननु भूतवस्तुविषयत्व इति । नन्वनुमानसूचनपरं सूत्रं न प्रति

* अनुभवेत्यादिनेति ३ पु. ।

† तत इति. यजेत न भक्षयेदितिवद् ब्रह्मणोऽपि विधेयत्वं प्रतिषेध्यत्वमिति ३ पु. ।

‡ वास्थाने चः २ पु. । § उच्यत इति अधिकमत्र ३ पु. । ‖ समुच्चयवद् ब्रह्मेति ३ पु. ।

¶ प्राकृतानां वाविशिष्टहोमानामिति ३ पु. । ** पञ्चेति नास्ति १ पु. ।

†† [] एतच्छृङ्खलान्तर्गतस्तु २ पु. टिप्पणीमुद्रयो परिष्टाल्लिखित आस्ते ।

‡‡ [] एतच्छृङ्खलान्तर्गतः पाठः ३ पु. नास्ति १ पु. च टिप्पणीमुद्रयो परिष्टाल्लिखित इति टिप्पणयेवेति द्रष्टव्यम् ।

§§ व्यवस्थितो विकल्प इति १ पु. ।

भातीति तचाह पूर्वसूचेणेति । ज्ञानानन्दप्रत्यग्भूतब्रह्मणश्चचुरादिना सामा- ८०
न्यमाचविषयानुमानैश्च भूतवस्तुत्वे ऽपि नानुभावः कर्तुं शक्यत इति परिहरति
*नेन्द्रियाविषय†त्व इत्यादिना । अत इत्युपसंहारः । नन्वेवं सतीति स्पष्टार्थः ।

उच्यत इत्यादेः परिहारस्यायमर्थः । ज्ञानानन्दसर्वज्ञप्रत्यगात्मभूतं ब्रह्म ‡ निश्चाययितुमसमर्था अपि युक्तयः शब्दावगते ब्रह्मणि सामान्यद्वारेण संभावनाबुद्धिहेतवो भवन्ति । कथम् । जगदुपादाने ऽद्वितीये शब्दावगते मृदादिदृष्टान्तैरुपादानव्यतिरेकेण कार्यस्यानिरूपणादऽद्वितीयता संभाव्यते स्फटिकलौहित्यप्रतिबिम्बरज्जुसर्पघटाकाशदृष्टान्तैरात्मनि कर्तृत्वादेरारोपितत्वं जीवब्रह्मैक्यं ब्रह्मव्यतिरिक्तप्रपञ्चस्वातन्त्र्याभावः असङ्गत्वद्वारेण विशुद्धाद्वितीयप्रत्यगात्मता संभाव्यत इति । किं पुनस्तद्वेदवाक्यमिति भाष्यस्याचेपार्थमाह सर्वच वेदान्तवाक्ये ब्रह्मपदस्येत्यादिना ।

येषां वेदान्तवाक्यानामित्यादेः परिहारस्यायमर्थः । सत्यज्ञानानन्दप्रत्यगात्मा § द्वितीयब्रह्मपदार्थे ऽप्रसिद्धे ऽपि बहुत्वमाचस्य प्रसिद्धत्वात्तदनुवादेन सन्निहितपदार्थसंसर्गसामार्थ्याद्विशिष्टब्रह्म प्रतिपत्तुं शक्यत इति ब्रह्मप्रतिपादनपरं सत्यादिवाक्यमर्थात्तदेव लक्षणमिति । न सत्यज्ञानानन्दब्रह्मस्वरूपलक्षणस्य सिद्धानुवादप्रसङ्ग इति । ननु स्वाध्यायपाठक्रमेण नार्थप्रतिपत्तिः किन्तु वैपरीत्येन प्रसिद्धानुवादेनाप्रसिद्धं प्रतिपादयत इतिन्यायात् । तथाच कारणस्य प्रसिद्धत्वाद् यस्मादाकाशः संभूतः स आत्मा सत्यं ज्ञान ‖ मनन्तं ब्रह्मेति ¶ वाक्यप्रवृत्तिस्तथा यस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते स सर्वज्ञः सर्वविदिति तथा यस्मात्प्राणादि जायते स दिव्यो ह्यमूर्तः पुरुष इत्यादि तथा यो भूतयोनिः ** तदद्रेश्यमग्राह्यमित्यादि यस्मात्तेजोबन्नानि जायन्ते तत्सदद्वितीयमणिमा तत्त्वमसीत्यादिकारणमाचानुवादेन तद्विशेषः प्रतिपाद्यत इति सत्यम् अधिकारिज्ञानकर्तव्यता ब्रह्मात्मप्रतिपादनानां क्रममभिप्रेत्येदमुक्तं तदाह तथैवोदाहरणमिति । ननु जगत्कारणे नानात्वस्या ऽपि प्रतिपत्तेः कथं तदनुवादेन ब्रह्म प्रतिपादनीयमिति चोदयति कथमिति । परिहरति पूर्वोक्तेनेत्यादिना ।

८१

* नेन्द्रियेतीति ३ पु· † स्वप्रत्ययेनास्ति १, २ पु· । ‡ निश्चापयितुमिति १ पु· ।
§ अद्वितीयेति नास्ति १ पु· । ‖ अनन्तब्रह्मेति वाक्यवृत्तिस्तथा यस्मदेव ब्रह्मेति १ पु· ।
¶ वाक्यवृत्तिरिति ३ पु· अपि ** तदृश्यमिति ३ पु·, यत्तदद्रेश्यमिति तु श्रोतः पाठः ।

अयमर्थः । जगत्कारणमाचानुवादे ऽपि तस्य नानात्वशङ्कायां यत इत्येकत्वनिर्देशादेकत्वमपि प्रमीयते । नन्वनुवादे प्रमितिरनुपपन्ना । न । जगत्कारणे*कत्वपुरोवादाभावादनुवादसामर्थ्यादेवैकत्वं प्रमीयते अन्यथानुवादवैयर्थ्यात् । नन्वेकत्वे ब्रह्मलक्षणे च प्रमीयमाणे वाक्यभेदः स्यात् नैकत्वस्य ब्रह्मप्रतिपत्तिगुणभूततयैकवाक्यत्वात् । अथवा एकत्वमपि लक्ष्यान्तर्गतमेव भवति न लक्षणान्तर्गतम् । तथाहि जगत्कारणमाचानुवादे-
८१ १३ नैकं ब्रह्म विधीयत इति ततः किमायातमिति तदाह अर्थात्सर्वज्ञमिति । न संज्ञासंज्ञिसंबन्धपरं वाक्यम् किंत्वर्थप्रतिपादनपरम् आर्थिकस्तु संज्ञासंज्ञिसंबन्ध इत्याह पुनस्तद्विजिज्ञासस्वेत्यादि । एकं सर्वज्ञं सर्वशक्ति सर्वतो ऽनवच्छिन्नं च जगत्कारणं तच्च ब्रह्मशब्दाभिधेयमित्यर्थः ।

ननु निरुपाधिकब्रह्मस्वरूपकथनमन्तरेण सोपाधिकानां सर्वज्ञत्वादीनां कस्यचिद् धर्मतया प्रतिपत्तिर्न युक्ता तच्च यत् सुषिरं तदाकाशं प्रकृष्टप्रकाशश्चन्द्र इत्यादिवत् स्वरूपलक्षणमेव किंचिद्वक्तव्यम् । ब्रह्मशब्दाभिधेयमेव स्वरूपलक्षणमिति चेन्न । बृहत्त्वधर्ममाचा†भिधानात् । महान् घट इत्युक्ते महत्त्वस्य निरुपाधिर्घटो धर्मितया प्रतीयते तथेहापि वक्तव्यं ‡ सच्छब्दाभिधेयं लक्षणमिति चेन्न । महासामान्यमाचाभिधानात् । सन्नित्युक्ते घट इत्यवान्तरसामान्यव्यक्तिर्महासामान्यपर्यवसानत्वेनाऽपेक्ष्यते तथेहाप्यवान्तरसामान्यव्यक्तिर्वक्तव्या । विज्ञानमेव बृहत्त्वसर्वज्ञत्वादिधर्मवत्तया निरुपाधि ब्रह्मस्वरूपलक्षणमिति चेत् । न । तस्य § सुखदुःखरागद्वेषादिमहासामान्यत्वात् तस्याप्यवान्तरसामान्यव्यक्तौ पर्यवसानं
१७ वक्तव्यमिति तदाह तस्य च निर्णयवाक्यमानन्दाद्भ्येवेति । आनन्द एव हि ब्रह्मत्वसर्वज्ञत्वकारणत्वादिधर्मवत्तया निरुपाधि ब्रह्मस्वरूपं निर्णीयते । तथाहि यच्च नान्यत्पश्यतीत्यारभ्य यो वै भूमा तत्सुखमिति सुखस्यैव बृहत्त्वधर्मवत्तामाह । विज्ञानं तर्हि निरुपाधिकब्रह्मगुण इति चेत् । किं विज्ञानानन्दयोः सामानाधिकरण्यं नीलोत्पलवद्गुणगुणिभावात् किंवा द्रव्यं घट इतिवत्परा-

* एकत्वे पुरोवादेति १, ३ पु० । अनन्तेत्यधिकमत्र १ पु० ।

† अभिधानात् यथा घटो महानिति १ पु०, अभिधानत्वात् यथा महाघट इति ३ पु० ।

‡ स शब्देति २ पु० ।

§ एतच्च मतान्तरमवष्टभ्योक्तम्, वस्तुतो ज्ञानत्वसामान्यस्यापि परोक्षापरोक्षरूपेणानेकाविधत्वाच्च तेनापि ब्रह्मस्वरूपनिर्णय इत्यर्थ इति भाव० ।

परसामान्यभावादिति । न तावद्गुणगुणिभावा * त्साक्षी चेता केवलो निर्गुणश्चेति श्रुतेः एकधैवानुद्रष्टव्यं नेह नानास्तीति गुणगुणिभावभेदप्रतिषेधात् गुणस्य गुणिनो ऽन्यत्वानन्यत्वाभ्यामनिरूपणात् । अत्र सर्वसङ्करवादी न निर्गुणं द्रव्यमस्तीति जल्पति । मा भून्निर्गुणं द्रव्यम् ब्रह्म तु न द्रव्यम् प्रमाणाभावात् । समवायिकारणत्वाद् द्रव्यमिति चेन्न आरम्भवादानभ्युपगमात् । उपादानकारणत्वाद् द्रव्यमिति चेन्न । गुणादानामपि ग्रहणकर्मत्वादिधर्मोपादानत्वात् । न निर्गुणं वस्त्विति चेत् † अन्त्यगुणे‡ष्वनेकान्तः । § तस्मा‖त्तत्त्वज्ञान¶प्रद्वेषमात्रमेतन्न निर्गुणं ब्रह्मेति । तस्माद् द्रव्यं घटः सन् घट इतिवत्परापरसामान्यनिबन्धनं विज्ञानमानन्दमिति सामानाधिकरण्यम् । तस्माद्विज्ञानसामान्यालम्बनमानन्दविशेषो ब्रह्मेति । तच्च ** सर्वज्ञाद्वितीयत्वादिधर्माणां प्रपञ्चोपाधितया ऽनिर्वचनीयत्वान्न तैर्ब्रह्म सगुणं सद्वितीयं वा भवति । विज्ञानसामान्यमपि दुःखरागादिप्रपञ्चोपाधितया ऽनिर्वचनीयं सद् ब्रह्मणि विज्ञानशब्दप्रवृत्तिमात्रहेतुर्भवति । विज्ञानगुणत्वाभावे न विज्ञानं ब्रह्मेति चेत् न । विज्ञानसामान्यालम्बनस्य विज्ञानव्यवहारगोचरत्वाद्विज्ञानप्रयुक्तार्थक्रियाकारित्वाच्च । सामान्यास्याभासत्वात्तदालम्बनं ब्रह्म††ज्ञानं मिथ्याज्ञानमिति चेन्न । मुख्यसामान्यान्तराभावादस्यैव च मुख्यत्वात् । तस्माद्विज्ञानस्वभाव आनन्दो ब्रह्मेत्यानन्दस्यैव ब्रह्मतां प्रतिपादयति प्रसिद्धावद्योतकेनेत्यादिना । तस्मात्सर्वेषु वेदान्तवाक्येषु पाठव्यत्यासेन जगत्कारणमाचानुवादेन तस्य ब्रह्मत्वं प्रतिपादयत इत्युपसंहरति तस्माद् ब्रह्मपर इति । ८१

‡‡ इति पञ्चपादिकाविवरणे पञ्चमं वर्णकम् ।
द्वितीयं जन्मादिसूत्रञ्च परिसमाप्तम् ॥

* साक्षी चेताः केवल इति ३ पु० ।

† गुणानामपि गुणवत्त्वेऽप्रामाणिकानन्तगुणप्रसङ्गाच्चिर्गुणं किञ्चिदङ्गीकर्तव्यम्, तत्र च वस्तुत्वहेतोरनैकान्तिकत्वमित्यर्थ इति भाव० । ‡ अनैकान्त इति २ पु० ।

§ किञ्च, गुणानां ब्रह्मणा न समवायः सम्बन्धः, नापि तादात्म्यम्, समानसत्ताके भेदाभेदात्मनस्तस्य विरोधेना ऽसम्भवात्· नापि सिद्धान्त्यभिमतः कल्पितो भेदसत्तासहिष्णु धर्मविशेषः, श्रुतेर्मिथ्यार्थे तात्पर्ये ऽप्रामाण्यप्रसङ्गात्· नचात्यन्ताभेदेऽपि गुणगुणिभावः, स्ववृत्तित्वाभावे तस्य पारिभाषिकत्वादिति· तस्माच्चिर्गुणमेव ब्रह्मेत्युपसंहरति तस्मादिति तत्त्व० ।

‖ तत्त्वदर्शनप्रद्वेषेति ३ पु० । ¶ प्रशब्दो नास्ति २ पु० । ** सर्वज्ञत्वाद्वितीयत्वादीति ३ पु० ।

†† ज्ञानमिति नास्ति २, ३ पु० ।

‡‡ इति श्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्यस्य• प्रकाशात्मभगवतः कृतौ पञ्चपादिकाविवरणे द्वितीयसूत्रं समाप्तमिति ५ पु० ।

शास्त्रयोनित्वात् ।

शब्दोपादानभावाद् ध्वनिगतविषयद्योतनाः शक्तयो ऽमू-
र्ब्रह्मण्येवासुरऽग्नेर्विषयविषयिणी दीपशक्तिः खलूच्चैः ।
द्रष्टुश्चज्ञानशक्तिर्न्ननु न करणता किन्तु दीपप्रभावत्
संयुक्तद्योतनैवेत्यपरमिह पुनः साध्यते सर्वविन्त्वम् ॥

ब्रह्मणो * लक्षणद्वयाभिधानपरे ऽपि सूत्रे सर्वज्ञत्वं प्रधानादिकारणवैलक्षण्यस्य सिद्धये जगद्विरचनोपपत्तये च श्रुतियुक्तिभ्यां प्राधान्येन प्रदर्शितम् तदेव हेत्वन्तरेण साधयति प्राधान्यात् अथवा सर्वजगत्कारणत्वेन सर्वज्ञत्वं न संभवति वेदानाम † कर्तृकत्वादित्याशङ्क्य संबन्धमाह अयमपर इति । वेदस्य तावत् सर्वविषयसामर्थ्यं दर्शयति । तदुपादानतया ब्रह्मणो ऽपि तद्दर्शयितुमनेकनानाविधविषयविद्यास्थानेति । ननु नास्ति वेदस्य सर्वज्ञता अर्थज्ञानकरणतयोपयोगादिति । सत्यमऽत एव कल्पप्रत्यय ‡ प्रयोग इति । ननु वेदस्य सर्वविषयज्ञानसामर्थ्ये ऽपि ब्रह्मणः कथं सर्वज्ञतेत्यत आह § ततश्च तस्य कारणमिति । दृश्यत इत्यादि दृष्टान्तः । अयं प्रयोगः । वेदः स्वविषयादधिकतरविज्ञानवत्प्रणीतो भवति वाक्यप्रमाणत्वात्पाणिन्यादिशास्त्रवदिति । ननु किमत्रानुमानेन ‖ प्रसाध्यते । यदि तावदुपाध्यायस्याध्यापनोच्चारणवच्छास्त्रशब्दोपलक्षितानां सर्वेषां शब्दानां ब्रह्मण्यप्युच्चारणं साध्यते । तदा नोपाध्यायवत् सर्वज्ञं ब्रह्म भविष्यति । अथ सकलवाक्यार्थं प्रमाणान्तरेणोपलभ्य तत्प्रतिपत्त्यर्थं परस्मै वाक्यं विरचयति । प्राप्तं तार्हं पौरुषेयत्वम्
८२ ७ तल्लक्षणत्वात्पुरुषवचसामिति चोदयति नन्वेवं सतीति ।

अत्र केचित्परिहारमाचक्षते । प्रमाणान्तरेणार्थमुपलभ्य विवक्षित्वा परस्मै विरचितः शब्दः पौरुषेय इत्युच्यते । तच्चेदमनेन कर्त्तव्यमिति वक्तुरभिप्रायभेदो रागः पुरुषवचसामर्थः । द्विविधश्च ¶ रागो नित्यो ऽनित्यश्च । तत्रानीश्वराणामभिलषितसाधनज्ञानस्यानित्यतया तज्जन्यरागस्य ** प्यनित्यत्वात् तद्विषयाणां पुरुषवचसां प्रमाणान्तरसापेक्षतया ††पौरुषेयत्वमङ्गीयते । ईश्वरस्य तु

* लक्षणतयेति २, ३ पु० । † अकर्तृत्वादिति २, ३ पु० ।
‡ प्रयोगोऽपीतीति १ पु० । § ततश्चेतीति ३ पु० । ‖ प्रशब्दो नास्ति १ पु० ।
¶ रागो नित्यश्चानित्यश्चेति १, ३ पु० । ** अपिशब्दो नास्ति २, ३ पु० ।
†† पौरुषेयत्वं संगीयते-इति १, २ पु० ।

पुनर्निखिलेष्टसाधनविषयज्ञानानां नित्यतया तन्मूलरागस्यापि नित्यत्वादीश्वरप्रणीतानामपि वैदिकवचसां * नित्यरागविषयतया पौरुषेयता न जेगीयत इति । नैतत्सारम् । ईश्वरे सकलाभिलषितसाधनज्ञाननित्यत्वे प्रमाणाभावात् अनुमानानां चाऽतद्गोचरत्वस्य दर्शितत्वात् । शब्द इति चेत् । न । † इतरेतराश्रयापातात् नित्यज्ञानमूलनित्यरागजन्यत्वे शब्दस्यानपेक्षं प्रामाण्यम् अनपेक्षे च शब्दे नित्यज्ञान‡सिद्धिरिति । § रागश्च नित्यो नित्याभिलषितसाधनज्ञानमूल इति च व्याहन्यते । कुतश्चेदं लब्धम् नित्यानित्याभिप्रायभेदेन पुरुषवचसामपि सतां ‖ सापेक्षत्वानपेक्षत्वविभागो विद्यत इति । न च पुरुषाभिप्रायः शब्दार्थ इति च वक्ष्यते । तस्मादसमञ्जसमेतत् ॥

अन्ये तु सङ्गिरन्ते । व्यासाद्यभिप्रायभेदतात्पर्यवतामपि भारतवचसामिदानीन्तनवाचकवदऽध्ययनविधितात्पर्यवतामेव वेदानां सृष्टिकाले समुच्चारणमीश्वरस्य वेदप्रणयनं नाम । ततश्च राग ¶ तात्पर्याभावाद्वेदप्रामाण्यमीश्वरस्य सर्वज्ञता चेति । अत्र वयं पृच्छामः । सृष्टिसमये किं प्रमाणान्तरेणार्थमुपलभ्य वेदवाक्यं व्यनक्ति यथा पाणिन्यादिः आहोस्विदुपाध्यायवत्पूर्वसिद्धवाक्यमुच्चारयति । तत्र पूर्वस्मिन्कल्पे पौरुषेयतापत्तिः । उत्तरस्मिन्नुपाध्यायवदेवासर्वज्ञतापत्तिः । अभिप्रायतात्पर्याभावादपौरुषेयतेति चेत् । उपलभ्यरचनायां कुतो रागतात्पर्याभावः । पूर्वमेव विधितात्पर्यादिति चेत् । तथापीतरन्न विहन्यते । न चोभयतात्पर्यमुपपद्यते । सत्यपि विधितात्पर्ये ऽवगम्यार्थे रचनैव सापेक्षत्वे निमित्तं समधिगतम् । न चोपलभ्यरचनायां विधितात्पर्य ** मुपपद्यत इति यत्किञ्चिदेतत् ।

अपरे तु मन्यन्ते । निर्विकल्पकज्ञानपूर्वकाणि किल वेदवाक्यानि न सापेक्षत्वदोषमश्नुवते ब्रह्मस्वरूपज्ञानस्य निर्विकल्पकत्वात् लौकिकवचसां तु सविकल्पज्ञानपूर्वं ††त्वात्सापेक्षतेति । नायमपि विभागः सिध्यति । उप-

* नित्यरागविषयवैदिकविषयतया पौरुषेयत्वचेति ३ पु· ।

† इतरेतराश्रयादिति १, ३ पु· । ‡ सिद्धेरिति १ पु· ।

§ रागो नित्यश्चेति व्याहन्यते लोके रागस्यानित्यत्वनियमादित्यर्थः· नित्यश्च ज्ञानकार्यश्चेत्येतद्व्याहतम्, नित्य इत्युक्ते सर्वकालसंबन्धित्वं प्रतीयते, कार्य इत्युक्ते कदाचिदऽसत्त्वसंबन्ध इति व्याघात इत्यर्थ इति तत्त्व० ।

‖ सापेक्षत्वनिरपेक्षत्वेति १ पु· । ¶ भेदशब्दौ ऽत्राधिकः १ पु· ।

** उपपद्यते तस्माद्यत्किंचिदेतदिति १ पु· । †† क्त्वप्रत्ययोऽत्राधिकः १, ३ ।

लभ्यरचनाया एव * सापेक्षत्वनिमित्तत्वात्स्वरूपज्ञानस्याप्यभिलषितसाधनोपरागे सविकल्पकत्वात् । तस्मान्नैते परिहाराः । † स्यात्तर्हि वेदानां पौरुषेयता । नन्वपौरुषेयो वेदः व्यवहाराविच्छेदे सत्य ऽस्मर्यमाणकर्तृकत्वादात्मवदित्यपौरुषेयतानुमीयत इति । न । चिरवृत्तेष्वपीदानीमनुमानप्रमीयमाणकर्तृकेष्वनैकान्तिकत्वात् । वेदानां च कर्तुरनुमानागमाभ्यां प्रमीयमाणत्वात् । तथाहि । विशिष्टबहुज्ञपुरुषप्रणीतो वेदः बह्वर्थविषयवाक्यप्रमाणत्वाद्भारतवत् । ‡ इदं सर्वमसृजत ऋचो § यजूंषि सामानीत्यागमः । तस्मात्पौरुषेयो वेद ‖ इति ।

अत्र पृच्छामः । कथं पौरुषेये वेदे प्रामाण्यं लभ्यते कपिलकणादाक्षपादानामिति । सर्वज्ञप्रणीततयेति चेत् । न तावदनुमेयः सर्वज्ञ इत्युक्तम् । आगमाच्चेत्सिद्धिः । न । इतरेतराश्रयात् सर्वज्ञे सिद्धे तत्प्रणीततया वेदप्रामाण्यम् ततश्च सर्वज्ञसिद्धिरिति । स्यादेतत् । महाजनपरिग्रहाद्वेदप्रामाण्यमिति । न । ¶ सुगताद्यागमानुसारिणामेव ** देशविशेषेष्वानन्त्यश्रवणात् । न च देहात्मभावचन्द्रप्रादेशत्वादीनां महाजन †† परिगृहीतानां प्रामाण्यं दृश्यते । न च महाजनपरिग्रहः प्रमाणपक्षपाती । तस्मान्न प्रामाण्यलाभः ।

किञ्च । पुरुषो वा केन प्रमाणेनोपलभ्य धर्माधर्मौ वेदवाक्यं विरचयेत् । न तावदिन्द्रियपञ्चकेन रूपरसगन्धस्पर्शशब्दवत्तत्समवेत‡‡तद्विशेषग्राहित्वात् वर्त्तमानग्रहणनियमाच्च धर्मस्य च साध्यत्वात् । नन्वात्मसमवायी धर्मस्तद्ग्रहणेनैव ज्ञानेन तद्गुणतया मनसैव चक्षुरादिना वा गृह्यत इति । किमिति त §§ हि तस्मिन्न गृह्णीमः । न च विशिष्टः पुरुषो गृह्णाति । तदिन्द्रियाणामप्येतादृशत्वात् । योगजधर्मसामर्थ्याद्विशिष्टानि तदिन्द्रियाणीति चेत् । तथापि मार्ज्जारादिदृष्टिवत्स्वविषये ऽतिशयमात्रं गृह्णीयुः नाविषयं धर्मम् । दिव्यं चक्षुर्ददाम्यहम् प्रादात्तेषां स भगवान् दिव्यं चक्षुर्ज्जनार्दन इति स्मरणादस्ति योगिनां दिव्यं चक्षुरिति चेन्न । तस्यापि विश्वरूपादिस्वविषयातिशयदर्शि-

* सापेक्षतेति ३ पु· ।
‡ इदꣳसर्वमिति ३ पु· ।
‖ इति शब्दो नास्ति ३ पु· ।
** देशविशेषविशिष्टत्वश्रवणादिति ३ पु· ।
‡‡ तद्विशेषग्राहित्वादिति १ पु· ।
† स्यात्तर्हि पौरुषेयता वेदस्येति १ पु·
§ यजूꣳषीति ३ पु· ।
¶ सुगताद्यनुसारिणामिति १, २ पु· ।
†† परिग्रहादीनामिति ३ पु· ।
§§ तर्हि इति नास्ति १ पु· ।

त्वात् । न चात्मसमवेततयापि धर्मो वर्त्तमानो भवति येन प्रत्यक्षः स्यात् । कल्पान्तरीयो ऽनुष्ठितो धर्मो ऽस्मिन्कल्पादौ वर्त्तत इति चेन्न । कल्पान्तरीयधर्मोपदेशायोगात् । ततो ऽपि कल्पान्तरा * नुष्ठितधर्मं प्रत्यक्षेणोपलभ्योपदिशतीति चेत् । अन्धपरम्परा स्यात् । तस्मान्न प्रत्यक्षमूलो वेदः । नापि शब्दमूलो ऽनवस्थानात् । तस्मात्प्रामाण्यहानान्न पौरुषेयो वेद इति ।

मा भूत्प्रामाण्यमिति सुगताहर्ताः । तैरिदं वक्तव्यम् । प्रत्यक्षानुमानदृष्टव्यतिरिक्तः कर्मफलसंबन्धो विद्यते नवेति । विद्यते चेत्कथमपौरुषेयागममन्तरेण तस्य सिद्धिः । सर्वज्ञ † सुगतप्रणीतागमादिति चेत् । किं कपिलादयः सर्वज्ञा न भवन्ति । सर्वे ‡ तीर्थकराः सर्वज्ञा इति चेत् । धर्माधर्मयोर्विवादः कथं स्यात् । न चैकः सर्वज्ञो नेतर इति प्रमाणमस्ति । न च सर्वे सर्वज्ञप्रणीता धर्मा एवेति युक्तम् । अन्योन्यधर्मनिराकरणात् । न चापौरुषेया एव सुगताद्यागमा इति युक्तम् अनुस्मर्यमाण§ कर्तृकत्वात् । अपौरुषेयत्वे‖ वा न विवदामः उदितानुदितहोमवद्व्यवस्थोपपत्तेः ।

आह लोकायतः । मा भूत्प्रत्यक्षदृष्टातिरिक्तः कर्मफलसंबन्धः पौरुषेयता तु वेदस्यानुमानसिद्धा न निवार्यत इति । स वक्तव्यः । किं लौकिकवचांसि प्रमाणानि न वेति । न चेत् । न मया ते वादो युक्तः शब्दैरेव परस्परविरुद्धार्थप्रतिपादनरूपत्वाद्वादस्य । अथ लौकिकवचांसि प्रमाणानि । वेदवचोभिस्तर्हि किमपराद्धम् । ¶ ननु पौरुषेयत्वं वेदस्यानुमानात् तस्य च मूलप्रमाणाभावादप्रामाण्यमुक्तम् । न । स्वाभाविकत्वाच्छब्दानामर्थावबोधसामर्थ्यस्य पुरुषप्रत्ययानुसारित्वाभावात् । अन्यथा सागरं विवक्षन्मेरुशब्दं ब्रूयात् । स्वभावसिद्धशब्दसामर्थ्यानुसारेण हि लौकिकाः शब्दं प्रयुञ्जते । सत्यम् । कदाचित्सर्वाभिधानसङ्केतसामर्थ्यादिदानीं व्यवस्थयाभिधानमिति चेत् । ** तन्न । विवादगोचरापन्नः †† पूर्वतनशब्दार्थसंबन्धव्यवहारस्तथाविधपूर्वपूर्वव्यवहारपरम्परानिबन्धनो ऽभिधानाभिधेयव्यवहारत्वादिदानीन्तनतद्व्यवहारवदित्यनादितानु-

* अनुष्ठितं धर्ममिति १ पु० ।
† सुगतादिप्रणीतेति ३ पु० ।
‡ तीर्थङ्करा इति १ पु०, तीर्थकारादिति २ पु० ।
§ कर्तृत्वादिति २ पु० ।
‖ वास्थाने चशब्दः १ पु० ।
¶ ननु पौरुषेयत्वानुमानात्तस्य चेति २ पु० ।
** तच्छब्दो नास्ति १ पु० ।
†† पूर्वतनेत्येव त्रिष्वपि पाठः ।

मानात् । साङ्केतिकशब्देष्वनैकान्तिक इति चेन्न । अभिधानाऽभिधेयविषयत्वादनुमानस्य । जातिमात्राभिधायिनो वा सर्वदेशेष्वभिधानतया * संप्रतिपन्ना वा यस्मिन्नुत्पद्यमाने क्वचिद्गृहीतसंबन्धा एवोपरज्यन्ते शब्दाः † तानि चाभिधानानि नैवं साङ्केतिकाः शब्दा इति । मा भूत्तर्ह्यभिधानसङ्केतः वेदवाक्यरचना तु पुरुषनिबन्धनैवेत्यत आह न स्याद् ब्रह्मवदऽनादित्वादिति । विवादगोचरापन्नं सृष्टिकालीनं वेदाध्ययनं पूर्वपूर्वतथाविधवेदाध्ययनानुस्मृतिनिबन्धनं भवितुमर्हति वेदाध्ययनत्वादिदानीन्तनवेदाध्ययनवदिति विशेषतोदृष्टानुमानेन वाक्यत्वाद्वारतवदिति सामान्यतोदर्शनाद्बलीयसा वेदस्यानादित्वसिद्धेः कुतः पौरुषेयता । ननु सर्वेष्वपि ग्रन्थेष्विदमनादित्वानुमानमनुविशति । न । तैरेव ग्रन्थैस्तत्तत्कर्तॄणां प्रतिपादनात्तदागमविरोधात् । इहापि श्रुत्यैव वेदस्य कर्त्ता प्रतिपाद्यत इति चेत् । न तावत्स तया वाचे ‡ दं § सर्वं मसृजत ऋचो ‖ यजूंषि सामानीति श्रुतिः प्रजापतिविषया ¶ सती तस्य प्रमाणान्तरेणार्थमुपलभ्य शब्दरचनां ब्रवीति । यो ब्रह्माणं विदधाति पूर्वं यो ** वेदांश्च प्रहिणोति तस्मा इति श्रुतौ प्रागेव वेदसद्भावावगमात् । अस्य महतो भूतस्येति श्रुतिरीश्वरविषयापि सती प्रकरणसामर्थ्याद्वेदोपादानत्वमेव ब्रवीति ।

किं चेदं पौरुषेयत्वं साध्यते । यदि तावत्पुरुषनिर्वर्त्यतामात्रम् । संप्रतिपन्नमेव तत् । क्रमविशिष्टानामेव वर्णानां वेदशब्दाभिधेयत्वात्क्रमस्य तूच्चारणोपलब्ध्यो††रन्यतरस्य ‡‡ प्रतिक्षणनिर्वर्त्यतया तद्विशिष्टवर्णानामपि प्रत्युच्चारणं जन्यत्वात्पूर्वपूर्वक्रमा§§नुस्मरणेन तत्सदृशोत्तरोत्तरक्रमनिवर्तनात्क्रमसादृश्यपरम्पराया ||| श्चानिदंप्रथमतया तद्विशिष्टवर्णनित्यत्वाभिधानात् । अथ वेदः ¶¶स्वार्थप्रवृत्तप्रमाणान्तरजन्यत्वात्पौरुषेय इति । तच्च प्रत्यनुमानमुच्यते । वेदः स्वार्थप्रवृत्तप्रमाणान्तरजन्यो भवति असर्वज्ञवचनत्वाभावे सति धर्मो ** धर्म-

* वाशब्दोऽन्याधिकः १ पु. ।
† तान्येवाभिधानानीति १ पु. ।
‡ इदꣳसर्वमिति ३ पु. ।
§ विश्वमसृजतेति १ पु. ।
‖ यजूꣳषीति ३ पु. ।
¶ सतीति तस्येति १ पु. ।
** यो वै वेदांश्चेति १ पु. ।
†† अन्यतरगतस्येति २, ३ पु. ।
‡‡ प्रतिक्षणं निवर्त्यतयेति २ पु. ।
§§ अनुसरणेनेति २ पु. ।
||| चस्था ᵃᵘ/तुशब्दः १ पु. । ¶¶ स्वार्थे प्रवृत्तेति १ पु. । ** अधर्मेति नास्ति १ पु. ।

ब्रह्मप्रमाणत्वात्परपरिकल्पितेश्वरबुद्धिवदिति। अथाध्ययनस्येदंप्रथमता वेदस्य पौरुषेयतेति न। अध्ययनस्यानादित्वानुमानस्य दर्शितत्वात्। तस्मान्नास्ति दस्य पौरुषेयत्वमिति।

* नन्वाप्तेन प्रमाणान्तरेणार्थमुपलभ्य परप्रतिपत्तये तच्च प्रयुज्यमानः शब्दः प्रमाणं भवति तदभावादनाप्तवाक्यवद ऽप्रमाणं वेदः प्रसज्यते। नन्वनाप्तेन भ्रान्त्योत्प्रेक्षया वा ऽर्थाभास † मुपगम्य परप्रवृत्तये तच्च प्रयुज्यमानः शब्दः प्रामाण्यात्परिहीयते तदभावादाप्तवाक्यवद्वेदः प्रमाणं किं न स्यात्। नन्वाप्तवाक्यमनाप्तप्रणीतत्वाभावात्प्रमाणं किं वाप्तप्रणीतत्वा ‡ दिति विवेक्तव्यम्। नोभयथापीति ब्रूमः। कथम्। शब्दानां तावं § त्संसृष्टार्थावबोधनसामर्थ्यं स्वारसिकमेव मध्यमवृद्धप्रयोगप्रत्ययाभ्यामाप्तानाप्तप्रत्ययव्यतिरेकेणावगतम्। तचानाप्तस्य भ्रान्त्युत्प्रेक्षाज्ञाने तन्मूलविरचित ‖ शब्दकारणदोषतया शब्दे ऽपि दोषं प्रसञ्जयतः। ततश्च दुष्टकारणजन्यविज्ञानमयथार्थमप्रमाणमिति। स्वतःसिद्धशब्दसामर्थ्यप्रयुक्तप्रामाण्यस्य प्रतिबन्धकतया ऽनाप्तज्ञानमवतिष्ठते आप्तप्रमाणं च प्रतिबन्धभ्रान्त्युत्प्रेक्षादिदोषनिरासितया संपद्यते। ततश्चाप्तज्ञानं न शब्दप्रामाण्यहेतुः। वेदे तु पुरुषसंबन्धाभावान्न प्रतिबन्धतन्निरासापेक्षेति नाप्तप्रणीतत्वमचोपयुज्यते। नन्वाप्तप्रयोगानपेक्षत्वे ऽग्निपर्वततत्सम्बन्धशब्देषु स्मर्यमाणेषु तेभ्य एवाग्निमान्पर्वत इति प्रमितिरुत्पद्येत। सत्यम्। पर्वतस्याग्निमत्तामात्रं प्रमीयत एव पुरोवर्त्तिनि तु प्रमाणान्तरविरोधान्न प्रमीयत इति। अथवा। द्विविधः प्रयोगः प्रामाण्यहेतुरर्थोपलब्धिनिबन्धनः पौरुषेये पूर्वप्रयोगानुस्मृति ¶ निमित्तो वेदे। ** तदुभयाभावात्सुप्तादिवाक्येष्वप्रामाण्यमिति। अथवा। तात्पर्याभावात्केवलेभ्यः शब्देभ्यो नार्थप्रमितिः। वेदे पुनरध्ययनविधितात्पर्यादाप्तप्रयोगाभावे ऽपि प्रमितिरुत्पद्यते। अध्ययनविधिवाक्यस्यापि स्वेनैव तात्पर्यसिद्धेः। अतो ऽनादिर्वेद इति। अनादित्वे ऽपि पुराणवाक्यवद †† न्यथासन्निवेशप्रणयनमाशङ्क्याह कूटस्थनित्यत्वादिति। ८२

* नन्वनेनेति शोधितं १ पु०। † अवगम्येति १ पु०, ‡ इति वक्तव्यमिति ३ पु०।
§ संसृष्टार्थप्रबोधेति २ पु०। ‖ शब्दस्य कारणेति १ पु०।
¶ निमित्ते वेदे-इति शोधितम् १ पु० ** तदुभयाभावादुन्मत्तादीति ३ पु०।
†† अन्यथेति द्विः १ पु०।

८२ ८ * अनादेर्वेदस्य कथं ब्रह्मकारणतेति शङ्कते कथं पुनरिति । अत्र शास्त्रशब्दोपलक्षितसर्वशब्दानां वर्णानामेकपदार्थबुद्ध्यवच्छेदकवर्णनियामक-क्रमविशिष्टपदानां वाक्यार्थबुद्ध्यवच्छेदक † वाक्यनियामकक्रमविशिष्टवाक्यानां महावाक्यार्थबुद्ध्यवच्छेदकवाक्यनियामकक्रमविशिष्टप्रकरणानां परिपूर्णपुरुषा-र्थसाधनबुद्ध्यवच्छेदकानेकप्रकरणनियामकक्रमविशिष्टशास्त्राणां च प्रवाहरू-पेण ब्रह्मोपादानतया कार्यत्वमस्तीत्याह तत्परतन्त्रत्वादित्यादिना ।

ननु रज्जुसर्पवदिति वेदस्य मिथ्यात्वं कथं निदर्श्यते । ननु को ऽयं वेदो नाम । न तावद्वर्णमात्रम् । क्रमविशेषवन्तो वर्णा इति चेत् । नास्ति देशकालनिबन्धनो वर्णक्रमः । नित्यतया सर्वगतत्वात् । नापि ‡ वस्तुनिब-न्धनक्रमो विरोधात् । न ह्येकदैव राजा जरेति जकारस्य रेफात्पूर्वापरीभावो युक्तः । उच्चारणसमवेत एव क्रमो वर्णेषूपरज्यत इति चेन्न । अप्रत्यक्षत्वादुच्चारण-तत्क्रमयोः । प्रत्यक्षस्तु क्रमविशिष्टवर्णात्मा वेदः । अथोपलब्धिक्रमवन्तो वर्णा वेदशब्दभाज इति । न । अन्यधर्मस्य क्रमस्यान्यधर्मत्वानुपपत्तेः । अथो-पलब्धिधर्म एव क्रमो वर्णेषु समारोप्यत इति § चेत् । तर्ह्यख्यातिवादिनः क्रममात्रस्य वर्णमात्रस्य वेदशब्दानर्हत्वाद्विशिष्टप्रत्ययाभावादऽविवेकमात्रमेव वेद इत्यर्थावबोधो न स्यात् । अन्यथाख्यातौ पुनर्विशिष्टप्रत्ययमात्रत्वाद्विशिष्टा-र्थाभावाद्विज्ञानातिरिक्तो वेदो न स्यात् । न चोपलब्धिक्रमोपलक्षिता वर्णा वेदः न ‖ विशिष्टा इति युक्तम् । क्रमविशिष्टवर्णप्रत्ययस्य प्रत्यक्षत्वात् । अनिर्वचनीये तु पुनर्विशिष्टार्थेतत्प्रत्यययोर्भावाद्विज्ञानव्यतिरेकेणार्थस्यानिर्वचनीयत्वेऽप्यर्थ-क्रियासमर्थतया तुच्छव्यावृत्तसत्ताभ्युपगमादस्त्येवार्थावबोधसमर्थो वेद इति निरवद्यम् ।

ननु ¶ पाणिन्यादिदृष्टान्तेन यदि सर्वशब्दोपादानतैव ब्रह्मणो वेदस्य पौरुषेयत्वपरिहाराय गीयते तदा कथं तावता सर्वज्ञत्वमिति चोदयति

* समासः १ पु० । † पदनियामकेति १, ३ पु० । ‡ वस्तुनिबन्धनः क्रमविरोधादिति १ पु० ।
§ चेच्छब्दो नास्ति २, ३ पु० । ‖ विशिष्टार्थ इति १ पु० ।
¶ वेदस्य पौरुषेयत्वपरिहाराय ब्रह्मणः सर्वशब्दोपादानता यदि गीयते, तदा पाणि-न्यादिदृष्टान्तेन यत्सर्वज्ञत्वमुक्तम्, तत्तावता कथं स्यादिति योजना· तावता उपादानत्वमात्रेणे-त्यर्थः· अर्थमुपलभ्य शब्दविरचयितरि पाणिन्यादौ शब्दविषयादधिकविषयज्ञानमुपलब्धम्, ब्रह्मण-श्चानीदृत्तत्वाच्च सर्वज्ञत्वसिद्धिरित्यर्थ इति तत्त्व० ।

नन्वेवं * सति कथं सर्वज्ञतेति । परिहरति तस्यैव ज्ञानशक्ति † विवर्तात्म- ८२
कत्वान्नामप्रपञ्चस्येति । अस्ति तावद्गुणानां क्रमसंख्यादिभेदभाजां मुख्य-
लक्षणादिद्वारेण सर्वार्थप्रकाशन ‡ सामर्थ्यमव्यपदेश्यस्य वस्तुनोऽभावात् । तच्च
कार्यगतमर्थप्रकाशनसामर्थ्यमुपादानकारणधर्म एव § भवति । प्रदीपगत-
प्रकाशन ‖ सामर्थ्यस्य वह्निधर्मत्वदर्शनात्कार्योपादानयोः शक्तिद्वयकल्पना-
ऽयोगात् । एवं सर्वार्थप्रकाशनसमर्थत्वात् सर्वज्ञं ब्रह्म । ननु समर्थस्यापि नित्य-
वज्ज्ञानसंयोगो न भवति । नैष दोषः । यथा प्रकाशद्रव्यस्य प्रदीपस्य
स्वसन्निहिताशेषवस्तुप्रकाशिता एवं प्रकाशस्वरूपस्य ब्रह्मणः सर्वोपादानतया
सर्वसंसर्गिणः स्वसन्निहिताशेषवस्तुप्रकाशिता नित्यवद्भवतीति युक्तं साम-
र्थ्यानुसारेण सर्वज्ञत्वम् । ¶ कथं करणसामर्थ्यानि कर्तृसामर्थ्यानि भवन्तीति
चे**न्न । ब्रह्मणो विषयावगमं प्रति शब्दस्य करणताऽभावात् । ननु स्वयंप्रकाश-
तया सर्वसंसर्गित्वादेव सर्वज्ञता सिध्यति । न । वाय्वाकाशरसगन्धादिव्यापिनो
ऽपि सवितृकिरणस्य तत्प्रकाशनाऽयोग्यत्वदर्शनात् । तस्मात्सर्वार्थप्रकाशनस-
मर्थसर्वशब्दोपादानतया सर्वज्ञं ब्रह्म । तदेतदाह नासतः प्रादुर्भावादिति ॥

॥ †† षष्ठं वर्णकं ‡‡ समाप्तम् ॥

—— ० ——

§§ अथवेत्यादिद्वितीयवर्णकविवरणं स्पष्टार्थम् । तस्माज्जन्मादिनिमि-

* सतीति· परीति ३ पु· । † विवर्त्तत्वादिति १ पु· ।

‡ सामर्थ्यव्यपदेश्यस्येति १ पु· । § संभवतीति १ पु· ।

‖ सामर्थ्यव्यपदेश्यस्य वस्तुनोऽभावात्तत्र कार्यस्य वह्निधर्मत्वदर्शनादिति १ पु· ।

¶ शब्दस्य ज्ञानं प्रति करणत्वादात्मनश्च कर्तृत्वात्कथं करणकर्तृसामर्थ्यैक्यमित्यर्थ इति तत्त्व० ।

** किं शब्दस्य ब्रह्म प्रति करणत्वमुत जीवं प्रति· नाद्य इत्याह न ब्रह्मण इति· नित्यबोधरूपत्वेन ब्रह्मणः कारणनिरपेक्षत्वादित्यर्थः· नापि द्वितीयः, शब्दब्रह्मणोरभेदाद् ब्रह्मगतप्रकाशशक्तिः शब्देऽप्यन्वेति· तथाच, जीवस्याऽगन्तुकज्ञानत्वात्प्रकाशनशक्तिमाऽशब्दस्तं प्रति करणतां भजत इति नावद्यमस्तीति द्रष्टव्यमिति तत्त्व० ।

†† इति वर्णकं समाप्तमिति १ पु· । ‡‡ समाप्तमिति नास्ति ३ पु· ।

§§ "अथवेत्यादिवर्णकान्तरस्यायमर्थः–तन्त्वोपनिषदं पुरुषं पृच्छामीत्यादि वाक्यं ब्रह्मणो वेदैकगम्यत्वं समर्थयति उतनेति विशयः, कार्यत्वलिङ्गस्य कारणविशेषे पर्यवसानाऽपर्यवसानाभ्यां संदिह्यते· तत्र, कार्यत्वलिङ्गस्य कारणविशेषे पर्यवसानाच्च ब्रह्मणो वेदैकगम्यत्वमिति प्राप्तम्· तथा हि, विमतं कल्पितकारणशक्तिकर्तृपुरस्सरं कार्यत्वात् घटवत्· स च कर्त्तैकः, कल्पनालाघवादिति प्राप्ते प्रतिविधीयते कार्यमात्रस्य कर्तृमात्रगमकत्वाच्च लाघवात्तदेकत्वानिश्चयः, विचित्रप्रासादादेरनेककर्तृकत्वस्य शरीरिकर्तृकत्वस्य च दृष्टत्वात् तथा च कार्यलिङ्गस्य सर्वज्ञे सर्वशक्तिमति एकस्मिंश्चाऽपर्यवसानात्कारणविशेषस्य वेदैकगम्यत्वमिती"ति तत्त्व० ।

८ तोपादानकारणं सर्वज्ञं ब्रह्मेति सिद्धम्। तच्च बिम्बस्थानीयं ब्रह्म मायाशक्तिमत्कारणं जीवाश्च प्रत्येक * मविद्यानुबद्धा इति केचित्। मायाविद्याप्रतिबिम्बितं ब्रह्म जगत्कारणम्। विशुद्धं ब्रह्मामृतत्वालम्बनम् जीवाश्चा * विद्याबद्धा इत्यन्ये। जीवा एव स्वाविद्यया प्रत्येकं प्रपञ्चाकारेण † ब्रह्माविर्भावन्ति। सादृश्याच्च प्रपञ्चैकतावभासो ‡ नकैरवगतद्वितीयचन्द्रवत्स्वरूपापेक्षया च ब्रह्मसर्वजगत्कारणमित्यपरे। ब्रह्मैकमेव स्वाविद्यया जगदाकारेण विवर्तते स्वप्नादिवदिति मतान्तरम्। तस्माद् ब्रह्मैव स्वमायया ऽविद्यया विवर्तत इति॥

॥ इति पञ्चपादिकाविवरणे § सप्तमं वर्णकम्॥
॥ परिसमाप्तञ्च शास्त्रयोनित्वसूत्रं तृतीयम्॥

॥ तत्तु समन्वयात्॥

ज्ञानानन्दैकरूपं निखिलजगदुपादानमीशं प्रभूणां
सर्वज्ञं ब्रह्म नित्यं विशदमतितरां निर्गुणं निष्क्रियं च।
एतत्कार्यावमृष्टिं निखिलभववतीं सम्यगुद्धूय ‖ विद्वा-
त्वऽप्रामाण्यं श्रुतीनां श्रुतिभिरिदमजं ज्ञेयमित्युच्यते ऽस्मिन्॥

जगतो जन्मादिकारणं ज्ञानानन्दं ब्रह्मेति च लक्षितम्। तच्च वेदान्ताः प्रमाणमिति ज्ञातम्। तच्चेदं निरूपणीयम्। किं भूतेष्यर्थे शब्दः प्रमाणं न वेति। नेति तावदाह कथं पुनर्ब्रह्मण इति। नन्वाक्षेपः किंनिबन्धनः सूत्रप्रामाण्यादित्याह यावतान्नायस्येति।

ननु वेदान्तानामानर्थक्यमुच्यते किं वा क्रियापरत्वमिति। न तावत्क्रियापरत्वम् आदिमध्यावसानेषु तात्पर्य्येण ब्रह्मैक्यपर्यवसानादिति तत्राह यद्यपि प्रदर्शितानीति। तथापि तच्च न सम्भवति प्रामाण्यमित्यर्थः। ननु यच्च शब्दस्य शक्तितात्पर्ये विद्येते तच्च शब्दः प्रमाणम् न विषयविशेषापेक्षं
८३ १० शब्दस्य प्रामाण्यम् विषयस्य शाब्दप्रमितिहेतुत्वाभावादिति तत्राह ¶ तच्च

* अविद्यानुबन्धा इति १ पु.।
† ब्रह्माविर्भावयन्तीति १ पु. शोधितम्, ब्रह्मविभाव्यतीति २ पु., ब्रह्म विभाव्यतीति ३ पु.। ‡ नचैकैरवगतेति १ पु.। § इति वर्णकसमाप्तिरिति १ पु.।
‖ विद्वान प्रामाण्यमिति ३ पु.। ¶ तत्रेतीति १ पु.।

परिनिष्ठिते वस्तुनीति । अभूदस्ति भविष्यतीत्य*वगम्ये वस्तुन्यसाध्यस्वभावे वा वस्तुनीत्यर्थः । † ननु परिनिष्ठितोऽपि रसो न चक्षुषा गृह्यते नापि जिह्वया गन्धः तद्वत्परिनिष्ठिते ब्रह्मणि प्रमाणान्तरानधिगम्यतया शब्दैकगम्यत्वं किं न स्यात् । न । चक्षुरादीनामितरेतरविषयव्यभिचारवदाऽऽगमव्यतिरिक्तप्रमाणानां परिनिष्ठिते वस्तुनि व्यभिचारादर्शनाद् भूतं चेत्प्रमाणान्तरगम्यमेवेति निश्चीयते । ननु तुच्छव्यावृत्तेऽपि वस्तुनि प्रमाणान्तरगम्यताया व्यभिचाराभावात् कार्यमपि ‡ प्रमाणान्तरगम्यं किं न स्यात् । न । साध्यस्वभावत्वात्प्रत्यक्षानधिगम्यतया सम्बन्धाग्रहणात् अनुमानादीनामनवगम्यत्वात् § तुच्छव्यावृत्तं प्रमाणान्तरयोग्यमिति च ग्रहणाद्वरं भूतं वस्तु प्रमाणान्तरयोग्यमिति ग्रहणं प्रयोजकस्य निरुपाधिकत्वलाभात् ।

ननु रूपादिहीनत्वाद् ब्रह्मापि प्रमाणान्तरानधिगम्यमेव तथापि परिनिष्ठितवस्तुत्वात्प्रमाणान्तरयोग्यत्वाशङ्का न व्यावर्तते । अस्ति च प्रमाणान्तरं ब्रह्मस्वरूपविज्ञानम् अतस्तत्संवादाद ऽप्रमाणं वेदान्ताः । ननु पुरुषवचांसि प्रमाणान्तरसापेक्षत्वात्तत्संवादविसंवादाभ्यां प्रामाण्यमप्रामाण्यं वा ऽश्नुवते वेदवचसान्तु पुरुषसम्बन्धाभावात्प्रमाणान्तरानधिगम्यविषयतया चक्षुरादिवदऽनपेक्षमेव प्रामाण्यमिति चोदयति नन्वपौरुषेयत्वादिति । परिहरति सत्यं तथापीति । ‖ अयमर्थः । अनपेक्षप्रमाणयोरपि चक्षुःस्पर्शनयोरर्थे विसंवादादन्यतरस्याप्रामाण्यवद् ब्रह्मैकत्वश्रुतेरहं मनुष्य इति प्रत्यक्षस्य च परस्परव्याघाताच्छब्दस्याप्रामाण्यमिति । किं चाप्रः खलु लोके प्रमाणान्तरेणार्थमवगम्य परस्मै शब्दं प्रयुञ्जानः श्रोतुः साक्षाद्वा परम्परया वा प्रयोजनपर्यन्तमर्थं विवक्षित्वा प्रयुङ्क्ते प्रयोजनानभिसंधाने तात्पर्यादर्शनात् । तच्च प्रयोजनं साध्यस्वभावमिति परिनिष्ठितं वस्तु स्वयं न प्रयोजनं नापि क्रियामन- ८३ १

* अवगम्यते वस्तुनीति २, ३ पु० ।

+ रसादीनां प्रतिनियतेन्द्रियग्राह्यत्वादिन्द्रियान्तरागम्यत्वे ऽपीन्द्रियान्तरविषयत्वं यथा, तद्वद्ब्रह्मणः प्रमाणान्तराविषयत्वेऽपि शाब्दत्वमविरुद्धमित्यर्थ इति तत्त्व० ।

‡ प्रमाणान्तराधिगम्यमिति १ पु० ।

§ तुच्छव्यावृत्तत्वस्य प्रतियोग्यधीनसिद्धित्वात्तस्य प्रयोजकत्वे गौरवम्, भूतत्वस्य प्रयोजकत्वेलाघवम् ततो भूतत्वमेव प्रयोजकमित्यर्थ इति तत्त्व० ।

‖ समताग्राहिणा स्पार्शनप्रत्यक्षेण विसंवादे चित्रनिम्नोन्नतग्राहिज्ञानं यथा बाध्यते, तथा ब्रह्मैकत्वश्रुतिरपि प्रतीचो ब्रह्मतां बोधयन्ती जाड्यजन्मादिधर्मवतो देहस्य प्रतीचैक्यं बोधयतोऽजीव्यजातीयकेन प्रत्यक्षेण बाध्यत इत्यर्थ इति तत्त्व०

. पेक्ष्य प्रयोजनसाधनमिति न तच्च तात्पर्यहीनः शब्दः प्रामाण्यमश्नुत इत्याह
१३ किंच पुरुषार्थशून्यत्वादित्यादिना । ततो न क्वचिदित्युपसंहरति । किञ्च ।
विधायकपदव्यतिरिक्तानां पदानां समूय प्रमाणान्तरानधिगतवस्तुप्रतिपादनं
न सम्भवति प्रमाणान्तरानधिगतविषये सम्बन्धाग्रहणात् यथासम्बन्धग्रहण-
मर्थप्रतिपादनात् । कार्यस्य तु प्रामाणान्तरानवसेयतया तत्संसृष्टपदार्थानाम-
तद्गोचरत्वादुक्ता शब्देभ्यः पूर्वार्थप्रमितिरिति दर्शयति किञ्च प्रत्यक्षाद्यवि-
षय इत्यादिना । यस्मात्सूचकारवचनाद्भूतवस्तुप्रतिपादनायोगात्प्रयोजनशू-
न्यत्वादनधिगतार्थताभावाच्च न ब्रह्मणि वेदान्ताः प्रमाणम् तस्मादनर्थका
वेदान्ता इत्युपसंहरति तस्मादिति ।

यत्पुनर्भाष्यकारेणेत्यादेरयमर्थः । न तावद्वेदान्ताः कस्यचित्क-
र्मविशेषस्य प्रकरणे समधिगताः । येन सो ऽरोदीदित्यादिवद् विधिस-
मन्वयः स्यात् । ननु सर्वकर्मविधायिवेदैकदेशत्वात्सर्वकर्मप्रकरणं स्यात् ।
न । सर्वेण वेदवाक्येनैकस्य वस्तुनः प्रतिपादनाभावादेकवाक्यतायोगा-
द्धर्मसामान्यास्याऽप्रतिपाद्यत्वात् । अस्तु तर्हि पर्णमयीवाक्यवत्कर्तृद्वारेण
सर्वक्रतुशेषभूतो ऽर्थवाद इति । नैतद्युक्तम् । स्तुतिप्रतिपादनयोरुपकारा-
भावाद्वैपरीत्याच्च । न हि कर्मणां कर्त्ता नित्यशुद्ध*बुद्धमुक्तस्वभावो निर्गुणो
निष्क्रियो ऽनश्नन्नन्यो अभिचाकशीति † स्तवप्रतिपादनं वा कर्मसु प्रवृ-
त्तावुपकरोति विपरीतं च स्यात् । तस्मान्न कर्मसु वेदान्तानां समन्वयः किं
तु स्वप्रकरणगतसगुणोपासनासु संबन्ध इति भाष्यार्थमनूद्याक्षिपति तदयु-
क्तमिति । ‡ तदापि विशिष्टब्रह्मस्वरूपा § सिद्धिरित्यर्थः । न खलूपासनाशेष-
तया ब्रह्मस्वरूपसिद्धिर्भाष्ये ऽभिप्रेता । किंतूपास्ये गुणप्रक्षेपद्वारेण वेदान्तानां
२४ समन्वयो विवक्षित इति परिहरति सत्यमनुमानेति । ननु वेदान्तवा-
क्यानां सगुणोपासनप्रकरणादपि व्युत्थितानां स्वरूपमात्रपर्यवसितानां नोपास-
नासंबन्धो ‖ नापि स्वात्मन्युपासना कल्पयितुं शक्यते ऽश्रुतत्वादिति तत्राह
२ एवं चाध्ययन ¶ विधीति । सूत्रं व्याचष्टे तद् ब्रह्म सर्वज्ञत्वादीत्यादिना ।

* बुद्धेति नास्ति १, २ पु· । † स्तवः प्रतिपादनमिति २ पु· ।
‡ तथापीति १ पु· । § अस्सिद्धेरित्यर्थ इति १ पु· ।
‖ द्रव्यदेवतासंबन्धस्य यागाविनाभूतत्वाद्यागस्य च नियोगाविनाभावाद्विधिपदं तत्र कल्प्यत इति युक्तम्· न च तथात्र किंचित्कल्पकं श्रुतमस्तीत्यर्थ इति तत्त्व० । ¶ विधिरितीति १ पु· ।

तच्च तात्पर्य्येणेति । अयमर्थः । तात्पर्यं नाम तदर्थप्रमितिशेषता शब्द-धर्मः । कथम् । विवक्षा तात्पर्यमिति चेत् अर्थप्रमितिं विवक्षित्वा तादर्थ्येन प्रयुज्यमानत्वं शब्दधर्म एव । * तत्रापि तात्पर्यं न विवक्षामात्रम् । तच्च तात्पर्य्यं यस्मिन्नर्थे वाक्यस्योपक्रमोपसंहारैकरूप्यम् यस्य चार्थस्य पुनःपुनरभ्यासो यस्मिन्नर्थे फलविशेषसङ्कीर्त्तनमपूर्वार्थप्रमेयता च यच्च चार्थवादोपादानमुपपत्तिभिरुपपादनं चेत्यादीनि लिङ्गानि भवन्ति तस्य वाक्यस्य तस्मिन्नर्थे तात्पर्यमिति गम्यते । न च प्रमेयस्य साध्यतैव तात्पर्यलिङ्गम् पुत्रस्ते जात इत्यादिषु तात्पर्य्यदर्शनात् साध्यस्य च प्रमेयत्वे तात्पर्यसिद्धिस्तात्पर्यं सिद्धे साध्यस्य प्रमेयतेतीतरेतराश्रयात् । साध्ये ऽर्थे प्रमिते † प्रतिबन्धनिरासितया पश्चात्तात्पर्य्यमवगम्यत इति चेत् । तथापिसाध्यता नतात्पर्यलिङ्गम् ‡ जर्त्तिलयवाग्वा § वा जुहुयादित्यादिष्वऽदर्शनात् । तस्मादुक्तानि तात्पर्यलिङ्गानि वेदान्तानां ब्रह्मणि दृश्यन्ते । तथाहि । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीय ‖ मैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्युपक्रमोपसंहारयोरैकरूप्येण प्रत्यगात्माद्वितीयरूपं ब्रह्मावगम्यते । तथैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीति नवकृत्वोऽभ्यस्यते प्रमाणान्तरेण चानधिगतमद्वितीय ¶ ब्रह्मात्मत्वं प्रतिपाद्यते । आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्य इति च निरतिशयपुरुषार्थावाप्तिर्ब्रह्म ** विज्ञानफलमवगम्यते । अनेन जीवेना †† त्मनानुप्रविश्य येनाश्रुतं श्रुतमित्यादि ‡‡ ब्रह्मण्यर्थवादश्चोपादीयते । मृल्लोहतप्रपरशुग्रहणादिदृष्टान्तैः स्वापितिनामनिर्वचनेन च सृष्टिस्थितिसंहारैश्च ब्रह्मात्म §§ कत्वं

* तत्र, लोक इति यावत्· लोकेऽपि तात्पर्यं न विवक्षामात्रम्, किन्तु तदर्थप्रमितिशेषत्वम्· इतरथा ऽपौरुषेयवचसि तात्पर्यासंभवादप्रामाण्यं दुर्वारं स्यादित्यर्थ इति तत्त्व० ।

† विषं भुङ्क्ष्वेत्यादेः स्वार्थे तात्पर्यं शून्याद्विषभोजनप्रमित्यनुत्पत्तिदर्शनात्सर्वत्रापि प्रमित्यनुत्पत्तिशङ्कायां तच्चिरासार्थं तात्पर्याधिगमो युक्त इति तत्त्व० ।

‡ जर्त्तिलयवाग्वेति, अरण्यतिलनिर्मितयवाग्वेत्यर्थः· अजक्षीरेण जुहोतीत्युपक्रमविरोधाज्जर्त्तिलयवाग्वा जुहुयादित्यादेर्न स्वार्थे तात्पर्यं किन्त्वर्थवादत्वमित्यर्थ इति तत्त्व० ।

§ वाशब्दो नास्ति १ पु· । ‖ ऐतदात्म्यमिति १ पु· ।

¶ ब्रह्मात्मतत्त्वमिति २ पु· । ** विशब्दो नास्ति ३ पु· ।

†† आत्मनेति नास्ति ३ पु· । ‡‡ ब्रह्मणो ऽर्थवादश्चेति ३ पु· ।

§§ ब्रह्मात्मैकत्वमिति १ पु·, कप्रत्ययो नास्ति २ पु· ।

प्रतिपाद्यत इति । तथा तैत्तिरीयके सत्यं ज्ञानमनन्तं ब्रह्म स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्युपक्रमोपसंहारयोः प्रत्यगद्वितीयं ब्रह्मावगम्यते । तथा * सच्च त्यच्चाभवद्यदिदं किंच तदा † त्मानं स्वयमकुरुत यतो वाचो निवर्तन्त इति च प्रत्यग ‡ द्वितीयं ब्रह्माभ्यस्यते प्रमाणान्तरेणानधिगतं च § प्रतिपाद्यते ‖ स सर्वान्कामान्समश्नुत इत्यादि च फलं ब्रह्मविज्ञाने ऽवगम्यते । सृष्टिश्रुतयश्चाद्वितीयब्रह्मप्रतिपत्त्यर्थवादभूता दृश्यन्ते । तथा कोशपञ्चकोपन्यासेन प्राणनादिव्यापारलिङ्गैश्च ब्रह्मात्मैकत्वं प्रतिपाद्यत इति । एवं सर्वेषु वेदान्तेषु ब्रह्मात्मैकत्वप्रमितौ तात्पर्यलिङ्गानि द्रष्टव्यानि । एवं तात्पर्येण समन्वयात् ब्रह्मैव वेदान्तप्रमेयमिति ।

४ ५ सम्यगन्वय इत्यादिना सूत्रभागं व्याचष्टे । पदानामन्वय इति संबन्धः । तच्च क्रियाकारकसंसर्गविषयविषयतया पदानामन्वयंव्यावर्तयति परस्परानवच्छिन्नार्थानामिति । तत्रो द्विदादिशब्दस्य यजतिसामानाधिकरण्येनोद्विद्यागमाचवर्तिनोरुद्विद्यागशब्दयोरनवच्छिन्नार्थत्वे ऽपि नियोगाकाङ्क्षा विद्यते तथेहापि स्यादिति नेत्याह अनन्याकाङ्क्षाणामिति ।

एवं शब्दानां क्रियावाक्येभ्यो वैलक्षण्यमुक्त्वा ऽर्थवैलक्षण्यं दर्शयति तच्च क्रियाकारकसंसर्गेभ्यो वैलक्षण्यमाह अव्यतिरिक्तेति । ननु नीलोत्पलवद्वेदाभेदविषयतयाप्यभिधेयाव्यतिरेक इति नेत्याह एकरस इति । तत्रोद्विद्यागशब्दयोर्यागविशेषैकरसार्थवर्तिनोरप्यर्थस्य नियोगाकाङ्क्षावदिहाप्यन्याकाङ्क्षेति ७ नेत्याह प्रातिपदिकार्थ इति । तत्रापि लिङ्गसंख्ययोरवश्याभ्युपगमनीयतेति नेत्याह माचान्वय इति । ¶ जगत्कारणसामान्यानुवादेन तत्र ज्ञानानन्दशब्दावानन्दविशेषं गमयतः । एकसत्यानन्तशब्दा भेदमिथ्याद्वैताभावाभिधानद्वारेण तत्र लक्षणया वर्तन्ते । सर्वज्ञः सर्वशक्तिरित्यादिशब्दाश्चानिर्वचनी-

* पृथिव्यादिभूतत्रयं सत्, वाय्वादिभूतद्वयं त्यत्· भावप्रत्ययवेद्यं सत्, नास्तिप्रत्यवेद्यं त्यदिति वा· तत्, ब्रह्म आत्मानं स्वरूपमायया जगदाकारेण परिणमयामासेति तत्त्व० ।

† आत्मान्२–इति ३ पु· । ‡ अद्वयमिति १ पु· ।

§ तच्छब्दो ऽत्राधिकः १ पु· । ‖ स इति नास्ति १ पु· ।

¶ तत्र वेदे ज्ञानानन्दशब्दौ जगत्कारणसामान्यानुवादेनानन्दविशेषं गमयत इत्यन्वयः· कारणत्वस्य लोकप्रदिद्धत्वाच्च श्रुतिप्रतिपाद्यत्वम्, ज्ञानत्वमानन्दनिष्ठं ज्ञानिनिष्ठत्वात्सत्तावदित्यनुमानाज् ज्ञानव्यक्तेरानन्दव्यक्त्यभेदप्रतिपत्तेरानन्दस्य च ब्रह्मस्वभावत्वाच्च समन्वयविरोध इत्यर्थ इति तत्त्व० ।

यप्रपञ्चोपाधितया तच वर्त्तन्ते । अयमात्मा तत्त्वमसीत्यादिशब्दाश्च * मुख्यल-
क्षणाभ्यां ब्रह्मण्येव वर्त्तन्त इति । सर्वे जगत्कारणविषयाः शब्दा † मुख्य-
लक्षणोपाधिभिरेकरसमेव ब्रह्म प्रतिपादयन्ति । न चानिर्वचनीयभेदाभा-
वयोः शब्दप्रवृत्तिनिमित्तयोः परमार्थसत्यैकरसभेदनिमित्ततेति । अनेकेषां
पदानां लक्षणादिद्वारेणैकरसवृत्तितायामुदाहरणमाह तच द्विविधा वाक्य-
‡ प्रवृत्तिरेका ब्रह्मात्मनोरेकत्वविषया अपरा सत्यज्ञानादिलक्षणब्रह्मविषया ।
तच प्रथमं ब्रह्मात्मैकत्वे दृष्टान्तमाह सोयमित्यादिवाक्यस्थपदानामिवेति । ८४
तच सो ऽयं देवदत्त इति पदत्रयस्यैकस्मिन्देवदत्ते पर्यवसानं दृश्यते । तथा-
हि । प्रत्यभिज्ञायामधिगतमेकत्वं परस्मै प्रतिपादयति सो ऽयं देवदत्त इति ।
तच न तट्टेशकालयोरेतट्टेशकालयोश्च परस्परैक्यं § प्रत्यभिजानाति भेदप्रत्य-
यात् । अत एव विशिष्टयोरप्यैक्यं न प्रत्यभिज्ञायते किन्तु सो ऽयमिति वि-
शिष्ट ‖ द्वयोपलक्षितः प्रत्यभिज्ञागोचरः । प्रत्यभिज्ञातं चार्थं परस्मै सो ऽयमिति
विशिष्टाभिधायिभ्यां पदाभ्यां स्वार्थैकदेशपरित्यागेनैकदेशलक्षणया देवदत्तस्व-
रूपैक्यमेव प्रतिपादयति । ननु सो ऽयमिति पदार्थयोर्यदैक्यम् तदेव वाक्ये-
नापि प्रतिपाद्यते चेदनुवादप्रसङ्गः । न च देवदत्तस्यैक्यद्वयमस्ति येन वा-
क्य ¶ प्रमेयमपरमैक्यं स्यात् । प्रत्यभिज्ञायां तर्हि कथम् । न ह्यभिन्नयोरवगत-
देवदत्ते** क्यव्यतिरिक्तं प्रत्यभिज्ञागम्यमपरैक्यमस्ति । एकस्य कालद्वयसंबन्धः
प्रत्यभिज्ञागोचर इति चेत् । कालद्वयसंबन्धिपदार्थौ ऽभिन्नयोरेव सिद्धः परि-
शेषात्तदैक्यं प्रत्यभिज्ञाविषयः । तच चानुवादो दर्शितः ।

स्यादेतत् । क्षणिकत्वपरिहाराय†† तत्प्रत्यभिज्ञाप्रामाण्यं तावदुक्तव्यम् ।
तच कालद्वयपरामर्शेन तत्संबन्धिपदार्थैक्ये प्रत्यभिज्ञाविषये ऽपि पदार्थभेद-
प्रतिभासविरोधितैव ‡‡ प्रमाणफलं नाज्ञातार्थाधिगतिः । अतः कालद्वयपराम-

* जहदजहल्लक्षणयेत्यर्थः· गङ्गाशब्दस्य तीरे जहल्लक्षणया वृत्तेरात्मादिशब्दानां च जहदजहल्लक्षणयेति वैषम्यमित्यर्थ इति तत्त्व० ।

† अयमर्थः—मुख्यवृत्त्या लक्षणावृत्त्या जहदजहल्लक्षणया उपाधिना चेति विभागो द्रष्टव्यः· ज्ञानानन्दशब्दौ व्यक्त्यंशापरित्यागेन मुख्यवृत्त्या वर्त्तेते, एकादिशब्दास्तु जहल्लक्षणया तत्त्वमसीत्यादयो जह [दजह] ल्लक्षणया, सर्वज्ञादयस्तूपाधित इत्यर्थ इति तत्त्व० ।

‡ प्रेति नास्ति १ पु· § न प्रत्यभिजानातीति पूर्वस्यो नञत्रास्ति १, ३ पु· ।
‖ पदेति अत्राधिकम् १ पु· । ¶ प्रमेयं परमिति २, ३ पु· ।
** ऐक्यातिरिक्तमिति १ पु· । †† तदिति नास्ति १ पु· । ‡‡ प्रामाण्यफलमिति १ पु· ।

शेन तत्संबन्धिपदार्थैक्यमेवावलम्बमाना पदार्थभेदप्रतिभासविरोधितया प्रामाण्यमश्नुते प्रत्यभिज्ञा । एवं तर्हि सो ऽयमिति वाक्यस्याप्येवमेव प्रामाण्यं भविष्यति । तथा तत्त्वमसिवाक्यस्यापि त्वंपदेनैकदेशपरित्यागेन लक्ष्यमाणद्रष्टृस्वरूपस्य पारोक्ष्यपरित्यागेन तत्पदाभिधेयब्रह्मस्वरूपैक्ये वाक्यजन्यज्ञानगोचरे ऽपि जीवब्रह्मपदार्थप्रतीतिसमये प्रतिपन्नैक्यविषयतयानुवादप्राप्तावपि भेदप्रतिभासविरोधितया प्रामाण्यमुपपद्यत इति । ननु पदार्थयोः प्रत्येकमसाधारणमैक्यं पदार्थप्रत्ययगोचरः पदार्थयोरितरेतरैक्यं * वाक्यगम्यमित्य † स्त्येव प्रमेयभेदः । नैतत्सारम् भिन्नद्रव्ययोरैक्यप्रतिपादने तथा स्यात् । यदेकमेव द्रव्यं भिन्नोपाधिपरिकल्पितभेदप्रतिभासव्युदासेन प्रतिपाद्यते । तदा निवर्त्यविशेषादेव प्रामाण्यं न प्रमेयविशेषात् । तदुक्तम् सिद्धं तु निवर्तकत्वादिति । इह तु कार्यकारणद्रव्यव्यतिरिक्तत्वे सति द्रव्याभिधायिपदयोः सामानाधिकरण्यम् सो ऽयमितिवदेकस्य द्रव्यस्योपाधिपरिकल्पितभेदव्युदासेनैकद्रव्यपर्यवसायीत्यवगम्यते । ननु तत्त्वंपदाभ्यां लक्ष्यमाणपदार्थयोरपि भेदो विद्यते न वा । विद्यते चेत् ऐक्यप्रमितिर्न स्यात् । न चेद्भेदो वाक्यार्थ एव पदार्थः स्यात् । सत्यम् । वाक्यार्थ एव पदार्थः स च लक्षणया प्रतिपाद्यते ‡ मुख्याभिधेयैक्यायोगात् । तस्मात्तत्त्वंपदाभ्यामेकमेव ब्रह्मोपाधिपरामर्शेन प्रतिपाद्यत इति सिद्धम् ।

अत्र केचिदाहुः । लक्ष्यमाणयोरपि जीवब्रह्मणोर्भेदाभेदविषयं सामानाधिकरण्यम् अन्ययापदार्थवाक्यार्थयोः साङ्कर्यात् । अस्ति जीवब्रह्मणोर्भेदो ऽपि य आत्मनि तिष्ठन्नित्यादिलिङ्गात् । नैतद्युक्तम् । भेदाभेदविषयेण वाक्यजन्यज्ञानेन तदभ्यासजन्यापरोक्षज्ञानेन वा स भेदो निवर्त्यते वा न वेति । निवर्त्यते चेत् । कथं विज्ञानस्य स्वविषयनिरासिता । तृतीयज्ञानेनाभेदमात्रविषयेण भेदो निवर्त्यत इति चेन्न । यथाप्रमाणमभ्यासजन्यस्यापि ज्ञानस्य भेदाभेदविषयत्वात् । अन्यथा प्रमाणे ऽन्यथाभ्यासजन्यज्ञाने च भेदाभेदप्रमाणवैकल्यात् । ज्ञाननिवर्त्यत्वेन भेदस्यापि विद्यावन्मिथ्यात्वमपि स्यात् । ज्ञानेनाज्ञानं निवर्त्यते भेदस्तु कर्मभिर्विनश्यतीति चेन्न । ब्रह्म वेद ब्रह्मैव भवतीति ज्ञानप्रयुक्त-

* वाक्यैकगम्यमित्यस्त्येवेति ३ पु० । † अस्त्वेवेति २ पु० ।

‡ त्वंपदस्य वाच्यार्थपरित्यागेन चिल्लक्षकत्वम् तत्पदसामानाधिकरण्ये सति घटते, तथा, तत्पदस्यापि वाच्यांशपरित्यागेन चिल्लक्षकत्वं त्वंपदसामानाधिकरण्य इति न पदद्वयवैयर्थ्यमित्यर्थ इति तत्त्व० ।

त्वादेवकाराभिधेयभेदनिरासस्य । येनैव चाकारेण जीवस्य भेदः तेनैव चेदभेदो ऽपि भेदनिवृत्तावभेदो ऽपि निवर्त्तेत । आकारान्तरेण चेदभेदः । तदा निरवयवद्रव्यस्यैकदेशो न कर्मणा निवर्त्तयितुं शक्यत इति भिन्नाभिन्न एव मुक्तावपि जीवः स्यात् । न च भेदाभेदौ शास्त्रेण प्रतिपादनीयौ लोकसिद्धसामान्यतोदर्शनेनैव सिद्धेः । यदि च भेदाकारविशिष्टो जीवः तन्नाशेन नश्येत् । अथ भेदविनिर्मुक्तो जीवः ब्रह्मस्वरूपमेव जीव इत्येकद्रव्यनिष्ठं सामानाधिकरण्यं स्यात् । अथ विशिष्टो जीवो विशेषणनाशे ऽपि स्वरूपावस्थानान्मुच्यत इति । तर्हि यो मुक्तिमनुभवति स एव पूर्वमपि जीवः संसारीत्येकमेव वस्तु सामानाधिकरण्यालम्बनमित्युक्तं स्यात् । तस्मादभिधेयपरामर्शनैकस्मिन्वस्तुनि लक्षणया वृत्तिः सामानाधिकरण्यमिति । यो ऽपि लक्ष्यमाणजीवब्रह्मणोरऽतिरेकनिमित्तं पदार्थाऽपौनरुक्त्यं कल्पयति तस्यातिरेको भेदवन्निराकर्त्तव्यः एकधैवानुद्रष्टव्यं नेह नानेति श्रुतेः । तस्मादेकस्य द्रव्यस्योपाधिजनितभेदावभासपरामर्शनैकद्रव्यपर्यवसायि सामानाधिकरण्यमित्येकरसं ब्रह्मेति सिद्धम् ।

इदानीं सत्यज्ञानादिवाक्यस्योदाहरणमाह प्रकृष्टप्रकाशशब्दयोरिवेति । ८४
तयोरेकार्थनिष्ठतामेव दर्शयति । तथा च व्यक्तिविशेष इति । अयमर्थः । प्रकाशशब्दः सामान्याभिधानमुखेन लक्षणया व्यक्तिविशेषे वर्त्तते प्रकृष्टशब्दश्च लक्षणया प्रकर्षगुणाभिधानमुखेन प्रकाशविशेषे वर्त्तते । तच गुणसामान्ययोश्चन्द्रपदाभिधेयत्वाभावाज्जहल्लक्षणया तदुभयं व्युदस्य तत्समवायिप्रकाशविशेष एव चन्द्रपदाभिधेयतया समर्प्यत इति प्रकृष्टप्रकाशचन्द्रशब्दानामेकार्थवृत्तिता सिद्धा । ननु गुणगुण्यन्वयः क्रियाकारकान्वयो वा किं न * स्यादिति तत्राह एवं च सति नीलोत्पलवदिति । एकमेवाद्वितीयमेकधैवानुद्रष्टव्यं नेह नानास्ति किञ्चन उदरमन्तरं कुरुते अथ तस्य भयं भवतीत्यादिप्रतिषेधादित्यर्थः । तथाविधान्युदाहरतीत्यारभ्य यत्पुनरित्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः ।

यत्पुनः सिद्धे वस्तुनीत्युक्तार्थमनुवदति । परिहरति † तदूपाद्य- ,,
संभवादिति । अयमाशयः । किं प्रमाणान्तरयोग्यत्वे सति तदनुत्पत्तौ

* स्यादित्यत आहेति १ पु· । † तदूपाद्यभावादिति मूलानुकूलः पाठः ।

विषयस्याभावे निश्चिते तच्च शब्दस्य मिथात्वमाशङ्क्यते किं वा प्रमाणान्तरसंभिन्नार्थविषयत्वात्पौरुषेयवचोवत्सापेक्षं प्रामाण्यमिति किं वा प्रमाणान्तरयोग्यार्थविषयत्वात्तत्सिद्ध्यर्थानुवादाशङ्केति । तच्च न तावत्प्रथमः कल्पः । प्रमाणेन हि प्रमीयमाणस्यार्थस्य प्रमाणान्तरानुत्पादो मिथ्यात्वं नावहति । सर्वप्रामाणानामनधिगतार्थगन्तृत्वात् । अन्यथा चक्षुषा गृह्यमाणस्य रूपस्य द्रव्यस्य वा स्पर्शेनाग्रहणान्मिथात्वशङ्का स्यात् । कथंचित्सापेक्षप्रमाणस्य पुरुषवचसः प्रमाणान्तराभावे मिथ्यात्वाशङ्का स्यात् न * त्वपौरुषेयस्य वेदवचसः अनपेक्षत्वात् ।

नापि द्वितीयः कल्पः प्रमाणान्तरसंभिन्नार्थताऽभावात् । भूतार्थविषयत्वेन नदीतीरफलसत्तावाक्यवत् प्रमाणान्तरसंभिन्नार्थतेति चेत् न । पौरुषेय † वचनप्रयुक्तत्वात् सम्भेदस्य । भूतार्थप्रयुक्तत्वे प्रत्यक्षादीनामपि संभेदः स्यात् । ननु भूतार्थस्मृतौ संभेदो दृश्यत इति चेत् । तर्हि स्वार्थप्रवृत्तज्ञानान्तरजन्यता संभेदहेतुः । कार्यभूतार्थनिष्ठ्योर्लौकिकवचसोस्तथादर्शनात् । पुरुषो हि प्रमाणान्तरेणार्थमुपलभ्य तन्निमित्तं परस्मै शब्दं विरचयति नतु वेदवचसः प्रमाणान्तरजन्यता इत्यनपेक्षता । किंच । तुच्छ ‡ व्यावृत्तमात्रं प्रमाणान्तरयोग्यमिति विधिवाक्यानामपि संभिन्नार्थतया सापेक्षता स्यात् । लौकिकविधीनां प्रमाणान्तरयोग्यतादर्शनात् । अयोग्यत्वे वा तच्च संबन्धाग्रहणाद्वेदेप्यर्थप्रतिपत्तिर्न स्यात् । ननु कार्यस्य साध्यस्वभावत्वान्न प्रमाणान्तरगम्यतेति । ब्रह्मापि तर्हि रूपादिहीनत्वान्न प्रामाणान्तरेण गम्यते । स्वरूपज्ञानमेव प्रमाणान्तरमस्ति अतस्तत्संभिन्नतया सापेक्षतेति चेन्न । शब्दजन्यज्ञानविषयस्यचैतन्य § तया प्रमाणफलरूपत्वाच्चैत्यन्यज्ञानसंभिन्ने वा ब्रह्मणि शब्दस्यानपेक्षप्रामाण्यसिद्धिः । पुरुषान्तरतत्संवेदनविषयं पुरुषान्तरानुमानं स्वयंप्रकाशविषयमपि ‖ संभिन्नार्थतया न सापेक्षमिति । तस्मादनपेक्षमपौरुषेयं वचः ।

नापि तृतीयः कल्पः । स्पर्शज्ञानयोग्यद्रव्यविषयस्य चक्षुषोऽनुवादकत्वादर्शनात् । शब्दविषयोऽयं नियम इति चेत् । विधिवाक्यस्यापि स्यात् तस्यापि लौकिकस्य मानान्तरयोग्यत्वात् । शब्दावगतस्य वा प्रमाणान्तरमनुवादः

* तुशब्दो नास्ति ९ पु० । † वचनत्वप्रयुक्तेति १ पु० । ‡ व्यावृत्तिमात्रमिति २ पु० ।
§ ज्ञानेति अधिकं ३ पु० । ‖ संभिन्नार्थविषयतयेति ३ पु० ।

किं न स्यात् । तस्माद् भूतार्थनिष्ठमपि वैदिकं वचो ऽनपेक्षं प्रमाणमिति ।
तच्च चोदयति नन्विन्द्रियागोचरत्वादिति । अत्र पृच्छामः । किं प्रमाणान्तरगृ- ८४
हीते ऽर्थे संबन्धग्रहणमात्रमुच्यते किं वा प्रमाणान्तरमपि शब्दार्थ इति । पूर्व-
स्त्वङ्गीकृत इत्याह यद्यपि शब्दमात्रस्येति । नापि द्वितीयः कल्प इत्याह
* व्युत्पत्ता तु कथमिति । ननु प्रमाणान्तरगृहीते ऽर्थे प्रयोगप्रत्ययदर्शनात-
त्संभिन्नार्थज्ञाने शब्दसामर्थ्यं गृह्यत इति नेत्याह † श्रोतृव्यवहारो हि
मूलमिति ।

अयमर्थः । ‡ शब्दादर्थं प्रतिपद्यमानः § श्रोता किं स्वकीयप्रमाण-
संभिन्नं प्रतिपद्यते किं वा व्युत्पित्तुः प्रमाणसंभिन्नमाहोस्विद्वक्तुः प्रमाणसं-
भिन्नमिति । न तावत्पूर्वो पक्षो शब्दादर्थप्रतिपत्तेः प्रागुभयोरपि तस्मिन्नर्थे
प्रमाणानुत्पादात् । प्रमाणान्तरेणोपलभ्य तच्च शब्दप्रयोगाद्वक्तुः प्रमाणसंभिन्ने
ऽर्थे श्रोतुः शाब्दप्रमितिरिति व्युत्पत्तापि तचैव शब्दसामर्थ्यं श्रोतुः प्रवृत्त्या
प्रतिपद्यत इति चेत् तचाह स च श्रोतु ‖ र्ज्ञानान्तरानिमित्ततापरिशुद्ध इति ।
अयमर्थः । व्युत्पत्ता तु प्रत्यक्षादिव्यवहारे प्रवर्तितव्यार्थमात्रज्ञानात्प्रवर्तमान-
मात्मानं पश्यति न प्रमाणान्तरसंभिन्नार्थज्ञानात् । ततश्च स्वेनैव दृष्टान्तेन श्रोतुः
प्रवृत्तिलिङ्गादर्थमात्रज्ञानमनुमिमीते न वक्तुः प्रमाणस्य विषयविशेषणतया ऽवग-
म्यत्वेन प्रवृत्तिहेतुतां कल्पयति दृष्टान्ताभावात् । अतः प्रमाणान्तरस्य विष-
यविशेषणत्वेनानवगम्यमानतया प्रवृत्तिं प्रत्यऽनिमित्ततया परिशुद्धः श्रोतुर्व्यव-
हारः ¶ केवलार्थज्ञानजन्य इत्यर्थः । **ततः शब्दस्यार्थमात्रज्ञाने सामर्थ्यप्रतिप-
त्तेर्न प्रमाणान्तरसंभिन्नः शब्दार्थ इत्याह अतो न प्रतिपत्तुर्ज्ञानान्तरसिद्धावबोध-
कत्वमिति । ननु मा भूच्छ्रोतुः प्रमाणान्तरसंभिन्नो ऽर्थः प्रतिपन्नस्तथापि व्यु-
त्पत्ता संभिन्ने ऽर्थे शब्दसामर्थ्यं प्रतिपद्यत इति नेत्याह तेनानवगम्यैव तद्वि- ८५
षयमिति । प्रवृत्तिहेतुज्ञानविषयतया स्वात्मानुमानेनानवगतस्य मानान्तरस्य

* व्युत्पत्त्येति २, ३ पु० । † श्रोतुर्व्यवहार इतीति ३ पु० ।
‡ शब्दार्थमिति ३ पु० । § श्रोता स्वकीयप्रमाणसंभिन्नमर्थं प्रतिपद्यते किं
वा व्युत्पत्तुः प्रमाणेति १ पु० । ‖ ज्ञानेति अयमर्थ इति ३ पु० ।

¶ इत्यर्थ इत्यत्र इतिपदं द्रष्टव्यम्· नदीतीरफलसत्ताविषयं यद्वक्तृज्ञानं तद्गोचरेण श्रोत्र-
समवायिना ज्ञानेन प्रवृत्तिर्न जन्यत इति टीकार्थः इति तत्त्व० ।

** तत इति, व्यवहारेणेत्यर्थः· ज्ञानान्तरसिद्धोऽयमर्थ इत्येवंविधमवबोधं शब्दः प्रतिप-
त्तुर्जनयतीति सामर्थ्यावगमकाले व्युत्पित्सुना नावगतमित्यर्थ इति तत्त्व० ।

न शब्दसामर्थ्यविषयता प्रतिपत्तुं शक्यत इत्यर्थः । नन्वर्थमात्रे संबन्धग्रहणे २ ऽपि व्युत्पत्त्युत्तरकालं संभिन्नो ऽर्थो बोध्यत इति नेत्याह यथावगमं चेति । ननु कार्यविषयाद्वाक्यादसंभिन्ने ऽर्थे युक्तः संबन्धग्रहः कार्यपदव्यतिरिक्तस्य तु शब्दमात्रस्य संभिन्ने ऽर्थे संबन्धग्रह इति न तेषामपि कार्यवाक्ये ऽर्थमात्रे संबन्धग्रहणात् । अत्र केचिदाहुः । अर्थासंस्पर्शी शब्द इति । * तथाहि । अङ्गुल्यग्रे हस्तियूथशतमास्त इत्यादौ न कश्चिदर्थः प्रमीयते । यत्र च प्रमीयते तत्रापि मानान्तरनिबन्धना प्रमितिर्न शब्दनिबन्धनेति ।

अत्र केचित्परिहारमाचक्षते । पुरुषवचसां तु नार्थसंसर्गः प्रमेयः किन्त्वेवमयं वेदेति वक्तृज्ञानमेव प्रमीयते प्रमीयमाणवक्तृज्ञानसामर्थ्यात्त्वार्थो निश्चीयते । सर्वत्र चाङ्गुल्यग्रादिवाक्येषु भ्रान्ति † मुत्प्रेक्षां प्रमाणं वा वक्तृज्ञानं शब्दः प्रमेयं न व्यभिचरति । तस्मा ‡ दर्थसंस्पर्शी शब्द इति । तदयुक्तम् । वक्तृज्ञानस्यानुमानगम्यत्वाच्छब्दप्रमेयत्वाभावादित्याह यदा पुनर्व्युत्पन्नः सन्निति । अयमर्थः । गृहीतसंबन्धो ऽपि सन् प्रमाणान्तरेणार्थमुपलभ्य विवक्षित्वा परस्मै शब्दं प्रयुञ्जानमात्मानं पश्यति § तेन दृष्टान्तेन ‖ पूर्वमपि मध्यमवृद्धेभ्यः प्रयोक्तारः प्रयुञ्जानाः प्रमाणान्तरेणोपलभ्य विवक्षित्वा प्रयुञ्जत इत्यनुमिमीते । नन्वेवमपि । शाब्दसामर्थ्यविषयतयैव प्रमाणान्तरमनुमिमीत ¶ इति नेत्याह केवलमिति । शब्दप्रयोगनिमित्ततामेव विवक्षामानान्तरयोः स्वात्मनि पश्यन्नन्यत्रापि तथैवानुमिमीत इत्यर्थः । प्रकरणार्थमनूद्योपसंहरति तस्मान्न ८ शब्दस्येत्यारभ्यापिचेत्यतः प्राक्तनेन ग्रन्थेन ।

किंच । यदि लौकिकवचांसि वक्तृज्ञानमेव गमयन्ति तदा संसृष्टार्थप्रतिपादनसामर्थ्याप्रतिपत्तेर्वेदे शब्दादर्थाधिगमो न स्यात् । किञ्च । न तावद्वक्तृज्ञानमात्रं शब्दार्थः । अर्थे व्यवहारानुदयप्रसङ्गात् । नाप्यर्थव्यावृत्तं ज्ञानम् । अर्थस्यैव शब्दप्रमेयत्वप्रसङ्गात् ज्ञानस्यानुमेयतयान्यथासिद्धेः । ज्ञानाभिधायिशब्दाभावाच्च** न तस्य वाक्यार्थता पदार्थस्यैव वाक्यार्थत्वात् । ननु पदेभ्यः पदार्थाः †† प्रतीयन्ते संसर्गश्चोत्प्रेक्षयावगम्यते तेन च व्यावृत्तं वक्तृज्ञानं शब्दार्थ इति ।

* तथापि हीति २ पु० । † उत्प्रेक्षाप्रमाणं वेति १ पु० ।
‡ अर्थासंस्पर्शीति १ पु० । § तद्दृष्टान्तेनेति १ पु० ।
‖ पूर्वमेव मध्यमेति १ पु० । ¶ इतिशब्दो नास्ति १ पु० ।
** अत्र नेति पञ्चाच्छिन्नं १ पु० । †† प्रमीयन्त इति ३ पु० ।

* तदिदं श्रोतुः संसर्गज्ञानं वक्तृज्ञानविशेषणार्थविशिष्टतया प्रथमोत्पन्नं स्मृतिसंशयविपर्य्यासायोगात्प्रमाणज्ञानमेव परिशिष्यते शब्दानां च पदार्थज्ञानोपचयाद्वक्तृज्ञानाधीनैव संसर्गप्रमितिरिति वेदे संसर्गः शब्दार्थो न स्यात् । तस्माच्छाब्दी संसर्गप्रमितिर्वक्तृज्ञानं त्वनुमेयमिति सिद्धम् । कस्तर्हि शब्दानामर्थासंस्पर्शस्य परिहार †इति ।

उच्यते । प्रत्यक्षे ऽपि तुल्यमेतद्दोद्यम् । शुक्तिरजतादिज्ञानानामर्थव्यभिचारात् । अदुष्टकारणजन्यज्ञानानामर्थसंस्पर्श इति ‡ चेत् । § शब्दे ऽपि योग्येतरसंसृष्टार्थाभिधायिन्यर्थनियमो विद्यते अङ्गुल्यग्रादीनां संसर्गायोग्यत्वा ‖ दिति । किञ्च अपौरुषेयस्य शब्दस्यानपेक्षप्रमाणत्वान्मानान्तरसंवादविसंवादाभ्यां न किञ्चित्परिहीयत इत्याह अपिचा अपौरुषेय इति । ननूक्तमिति स्पष्टार्थः । ८५

न तत्साधूक्तमिति परिहारग्रन्थस्यायमर्थः । निरपेक्षज्ञानयोरपि परस्परविरुद्धयोरन्यतरस्य कारणदोषसंभावनया बाधो निरूप्यते । तत्राद्वितीयप्रत्यगात्मप्रतिपत्तेरात्मनि द्वैतप्रत्यक्षस्य च विरोधे द्वैतावभासस्य देहात्मप्रत्ययवद् दुष्टकारणजन्यत्वं कल्प्यते । शब्दस्य स्वयंदोषरहितत्वात् द्वैतावभासहेतूनां चक्षुरादीनां संभावितदोषत्वात् इन्द्रो मायाभिर्मायां तु प्रकृतिमविद्यायामन्तर इत्यादिदोषजन्यत्वश्रवणाच्च । स्वप्नवद्दोषजन्यत्वे ऽपि व्यवहाराविसंवादात् प्रामाण्यलाभात् । शब्दे तु पुनर्दोषकल्पनायां व्यवहारातीतविषयत्वाद्दोषवत्तया च तत्त्वात्प्रच्युतेरुभयविधमपि प्रामाण्यं न स्यात् । न च द्वैतावभासस्य दोषजन्यत्वाच्छुक्तिरजतज्ञानवद्व्यवहारविसंवादः कल्पयितुं शक्यः प्रत्यक्षविरोधात् आगमेन च द्वैतस्य तत्त्वांशबाधाद्व्यवहारबाधाभावादद्वितीयात्मप्रतिपत्तेश्च शब्दादीनामर्थक्रियासामर्थ्यलभ्यत्वात् । तस्मादद्वितीयात्मप्रमितिरपरोक्षप्रत्ययरूपा च देहात्मप्रत्ययमिव द्वैतावभासं बाधते अन्यथा

* उत्पन्नज्ञानं किं स्मृति, रुत संशयः, आहो विपर्ययः, अथवा प्रमाणम्· तत्र तावच्च स्मृतिः, तद्विषयस्य प्रागनवगतत्वात्· नापि संशयः, कोटिद्वयाभावात्· नापि विपर्ययरूपत्वम्, बाधानुपलब्धेः· ततश्च प्रमितावन्तर्भावो वक्तव्यः, तत्राप्यज्ञादिकारणत्वे शब्दवैयर्थ्यम्· शब्दकारणत्वे चास्मन्मतसिद्धिरित्यर्थ इति तत्त्व० ।

† इतिशब्दो नास्ति २, ३ पु· । ‡ चेच्छब्दो नास्ति १ पु· ।

§ शब्दमात्रस्य संसृष्टप्रमित्यजनकत्वे ऽप्याकाङ्क्षासन्निधियोग्यतासहकृतस्य संसृष्टप्रमितिजनकत्वं युक्तमित्यर्थः· तत्त्व० ।

‖ तस्माच्छब्दानामर्थसंस्पर्शित्वात्तन्मात्रसंबन्धग्रहणं न मानान्तरसंभिन्न इत्युक्तं युक्तमितीतिशब्दार्थ इति तत्त्व० ।

देहात्मभावस्याप्यबाधप्रसङ्गादिति । ननु प्रमेयगतदोषादेव चिचनिम्नोन्नता-
१२ दिज्ञानवद् ब्रह्मज्ञानमपि मिथ्येति नेत्याह प्रमेयस्य पुनर्न्न ज्ञानहेतुत्व इत्या-
दिना । अत इत्युपसंहरति ।

अपि च । भूतार्थनिष्ठत्वात्प्रमाणान्तरविरोध उच्यते संवादो वापेक्ष्यत इति । विरोधे ऽन्यतरस्य बाधो दर्शितः । * संवादो ऽपेक्षित इति चेन्नेत्याह न संवादलक्षणमिति । अज्ञातार्थावगम एव प्रमाणलक्षणमित्यर्थः । ततः किमायातमिति तदाह अतो यथैव विधिवाक्यानामिति । ननु सूचवचनविरोध इति चोदयति ननु † वाक्यानामेवेति । ‡ नेतरेतराश्रयत्वादिति परिहारः । ननु सूचकारप्रामाण्यादेवाम्नायस्य क्रियार्थत्वं सिद्धमिति नेत्याह नह्येकमप्यन्यत इति । कस्तर्ह्याम्नायार्थ इति तदाह अतो यदवगमयतीति । ननु प्रमेयविशेषादेव प्रामाण्यं नावबोधात् न कार्यस्याप्यवबोधनिबन्धनत्वादित्याह तस्माद्यथाकार्यमिति । न तर्हि ब्रह्मणि शब्देभ्यः प्रतीतिरिति नेत्याह प्रतीतिश्चेति । ननु प्रवर्त्तनालक्षणं प्रामाण्यं न बोधलक्षणमिति नेत्याह प्रत्यक्षादिष्वपीति । ननु भिन्नमेव प्रमाणलक्षणं प्रत्यक्षादिषु वस्तुमात्रावबोधप्रामाण्यलक्षणं प्रवृत्तिनिवृत्ती तु वस्तुस्वभावानुरोधिन्यौ न प्रमाणफलम् । शब्दे तु पुनः प्रवृत्तिनिवृत्तिफलपर्यन्त एव प्रमाणव्यापारः श्रोतुः पुरुषार्थमुद्दिश्य शब्दप्रयोगात् । अतः प्रवृत्तिनिवृत्तिशून्ये भूते वस्तुनि न शब्दप्रामाण्यमित्याऽऽह युक्तमित्यादिना उच्यत इत्यतः प्राक्तनेन § ग्रन्थेन । उच्यत इत्यादिः परिहारः ।

इदं निरूपणीयम् । पुरुषः खल्विष्टानिष्टप्राप्तिपरिहारमात्रं प्रार्थयते किं वा तयोः प्रवृत्तिनिवृत्तिसाध्यतामपीति । तत्र प्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारप्रार्थनाकल्पना ‖ लघीयसी हितात्हितप्राप्तिपरिहारप्रार्थना ¶ कल्पनेत्याह पुरुषो ह्येतावदपेक्षत इति । ननु सर्वः साध्यस्वभावमेव पुरुषार्थं प्रार्थयत इति नेत्याह
७ नत्वित्थमन्यथा वेति । फलमेव हि मुख्यं प्रार्थयते** नान्तरायिका साधनप्रार्थनेत्यर्थः । ननु साध्यासाध्यावपि पुरुषार्थौ साध्यावेव करोतीति नेत्याह

* संवादोऽपेक्ष्यत इति ३ पु० । † विधीति अधिकमत्र १ पु० ।

‡ भूतवाक्यानामपि अप्रामाण्यपरिहारार्थं क्रियार्थत्वे प्रामाण्यं वक्तव्यम्, ततश्चेतराश्रयत्वमित्यर्थ इति तत्त्व० ।

§ ग्रन्थेनेति नास्ति२, ३ पु० । ‖ लघीयः-इति १ पु० ।

¶ कल्पनमिति १ पु० । ** नान्तरीयकेति १, २ पु० ।

न चास्य स्वयमीष्ट इति । ननु सर्वः साध्य एव पुरुषार्थः न तु सिद्धस्व- ८७
भावः प्रेप्सागोचरत्वाभावादिति तत्राह द्विविधं चेष्टमिति । ननु द्विविधेऽपि पुरुषार्थे साध्यस्वभावता न व्यावर्तत इति * नेतीति विभज्य दर्शयति तत्र प्राप्यपरिहार्ययोरिति । ननु ज्ञानमात्रसाध्यः पुरुषार्थो न लभ्यत इति तत्राह इतरयोस्तु भ्रान्तिमात्रव्यवहितत्वादिति । ननु हस्तगतविस्मृतसुवर्णस्य तत्त्वज्ञानात्प्राप्तिमारोपितसर्प्पादिभावस्य तत्त्वज्ञानान्निवृत्तिं पुरुषार्थतया नानुमन्यते क्रियासाध्यस्यैव पुरुषार्थताप्रसिद्धेरिति नेत्याह एवमपि लभ्यमानमिति । साधनसाध्याज्ज्ञानलभ्यस्यातिशयेन पुरुषार्थतामाह सुतरां चाभिनन्दतीति । ननु ब्रह्मात्मैकत्वे प्रतिपाद्यमाने न क्रियासाध्यः पुरुषार्थः नापि ज्ञानलभ्य इति तत्राह अनेकानर्थकलुषितमिवेति ।

किंच । शब्दस्य प्रामाण्यं प्रत्यक्षादिवत्प्रमेयमात्रावबोधनिबन्धनं किं न स्यात् । न च प्रवृत्तिनिवृत्ती साक्षात्फलम् अवगते वस्तुनि प्रयोजनाद्यनुस्मृतिनिबन्धनत्वात्प्रवृत्तिनिवृत्त्योः । न च ते पुरुषार्थतयाकाङ्क्षिते सुखदुःखप्राप्तिपरिहारलक्षणत्वात् प्रयोजनस्य । ततश्च नित्यनैमित्तिकवाक्यानां प्रयोजनशून्यतया प्रामाण्यं न स्यात् । अकरणे प्रत्यवायपरिहारः प्रयोजनमिति चेन्न । † प्रत्यवायस्यापि तन्निबन्धनत्वात् । ‡ ततश्च नित्यविधयोऽनुष्ठानाऽननुष्ठानयोरनर्थमेव प्रापयन्तीति न तद्वाक्यानां प्रामाण्यं युक्तम् । अतो बोधलक्षणमेव प्रामाण्यम् न प्रवृत्तिलक्षणमिति । § तस्मात्सिद्धं ब्रह्मणः शास्त्रप्रमाणत्वमिति ॥

॥ इति पञ्चपादिकाविवरणे ‖ अष्टमं वर्णकं ¶ समाप्तम् ॥

लोके पदानां योग्येतरसंसृष्टस्वार्थप्रतिपादने सामर्थ्यमङ्गीकृत्य भूतेऽप्यर्थे प्रामाण्योपगमेन लौकिकवचसां ** भूते ऽर्थे प्रमाणान्तरानुसारेण प्रयो-

* नेति विभज्येति १ पु० ।

† प्रत्यवायपरिहारस्यापीत्येवं परिहारेति पश्चात्प्रक्षिप्तं १ पु०, तन्निबन्धनत्वादिति, विधिनिबन्धनत्वादित्यर्थः· विहितत्वसिद्धौ तदकरणनिमित्तप्रत्यवायप्रवृत्तिलक्षणं फलं सिध्यति, तस्मिन्सिद्धे तदुद्देशेन विहितत्वसिद्धिरितीतरेतराश्रयत्वमित्यर्थ इति तत्त्व० ।

‡ प्रत्यवायनिवृत्त्यसंभवस्तच्छब्दार्थः· अनुष्ठाने बहुतरवित्तव्ययाद्यनर्थप्राप्तेरननुष्ठाने लोकबहिष्करणाद्यनर्थ इत्यप्रामाण्यं नित्यवाक्यानामित्यर्थ इति तत्त्व० ।

§ तस्मात्सिद्धं ब्रह्मणि वेदप्रामाण्यमित्युपसंहरति तस्मात्सिद्धमितीति ३ पु० । तस्मात्सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वमित्युपसंहरति तस्मात्सिद्धमितीति ३ पु० ।

‖ अयमिति नास्ति १ पु० । ¶ समाप्तमिति नास्ति २ पु० । ** चकारोऽन्याधिकः ३ पु० ।

जनपर्यन्तं प्रामाण्यमङ्गीकृत्य वेदवचसां तु प्रमाणान्तराभावाद्विध्यनुसारेणैव प्रयोजनपर्यन्तं प्रामाण्यं वक्तव्यमित्याशङ्क्य नेति प्रतिपादितम् । इदानीं कार्यसंसृष्टस्वार्थे शब्दसामर्थ्यमिति मन्वानाः कार्यशेषतयैव भूते ऽप्यर्थे प्रामाण्यमिति प्रत्यवतिष्ठन्त इत्याह अन्यापरे प्रत्यवतिष्ठन्त इति । ननु लौकिकवचसां भूते ऽप्यर्थे प्रयोगप्रत्ययदर्शनात्तदनुसारेण च योग्येतरसंसृष्टे शब्दसामर्थ्यप्र-
२१ तिपत्तेः कुतो विधिसंस्पर्श इत्याक्षिपति कस्मादेवमिति । परिहरति अन्यथा शब्दप्रयोगानुपपत्तेरिति ।

अयं भावः । श्रोतुः साध्यमेव किंचित्प्रयोजनमुद्दिश्य प्रवृत्तिं विवक्षित्वा प्रवर्तकज्ञानाय प्रयोक्ता शब्दं प्रयुङ्क्ते । ततः प्रवर्तकनिष्ठं वाक्यं श्रोतुः प्रवर्तकज्ञानमेव जनयति । प्रवर्तकज्ञानेन च शब्दसमनन्तरभाविना ऽनन्यथासिद्धान्वयव्यतिरेकाभ्यां शब्दस्य संबन्धं व्युत्पन्ना प्रतिपद्यते । तच्च प्रवर्तकं प्रत्यक्षादिव्यवहारेषु शब्दव्युत्पत्तेः प्राक्कार्यमिति ज्ञानात्सर्वत्र प्रवर्तत इति कार्यमेव * श्रोतुः शाब्दज्ञानगोचरं कल्पयति । तच्च कार्यसंसृष्टेषु पदार्थेषु पदसमुदायस्य प्रथमं सामर्थ्यं कल्पयित्वा पुनः प्रयोगान्तरेष्वा † वापोद्वापाभ्यामेकैकस्य पदस्य कार्यसंसृष्टस्वार्थेषु संबन्धं प्रतिपद्यते । ‡ प्रथमप्रयोगे कार्यसंसृष्टपदार्थेषु सामर्थ्यप्रतिपत्तेः । ननु बालस्य स्वव्यवहारे § ऽभिलषितसाधन ‖ ताज्ञानात्प्रवृत्तिः न कार्यज्ञानात् । ततश्च श्रोतुः शब्दसामर्थ्यविषयतयाभिलषितसाधनज्ञानमेव प्रवृत्त्यानु¶ मिमीते न कार्यज्ञानमिति । नैतदुक्तम् । अभिलषितसाधने ऽपि** कार्यमितिज्ञानस्य प्रवृत्त्यानन्तर्यात्तदेव प्रवर्तकमनुमीयते । न चेष्टसाधनज्ञानं प्रवर्तकम् अतीतानागतवर्तमानेष्टसाधनज्ञानानामप्रवर्तकत्वात् । तस्मात्कार्यसंसृष्टस्वार्थेषु शब्दसामर्थ्यमिति । ननु सर्वत्र कार्यव्यभिचाराभावे ऽपि संसृष्टस्वार्थेषु शब्दसामर्थ्यमिति युक्तं प्रतिपत्तुम् । कार्यसंसृष्टस्वार्थ इति†† विशेषणाऽयोगात् ।

* श्रोतुः शाब्दज्ञानगोचरं प्रवर्तकमपि कार्यमेवेति संबन्धः· स्वप्रवृत्तिहेतुत्वेन समधिगतं कार्यं विहायाऽन्यत्राऽन्यस्य हेतुत्वकल्पकानुपलब्धेरित्यर्थ इति तत्त्व० । † आवापोद्वाराभ्यामिति १ पु० ।

‡ प्रथमेति· समुदायस्य शक्तिग्रहणविलायामित्यर्थः· इतरान्वितमात्रे वा पदविशेषस्य शक्तिग्रहणपक्षे प्राथमिककार्यसंसृष्टस्वार्थप्रतिपत्तिविरोध इत्यर्थ इति तत्त्व० ।

§ अव्यवहितपूर्वक्षणवर्त्तिनः कारणात्वात्कार्यज्ञानस्य च तादृक्त्वादितरस्य चानीदृक्त्वात्कार्यज्ञानमेव प्रवर्तकमित्यर्थ इति तत्त्व० । ‖ तत्प्रत्ययो नास्ति २, ३ पु० ।

¶ अनुमिमीयते नेति उपकल्पितम् १ पु० । ** कार्यज्ञानस्येति ३ पु० ।

†† संभवे व्यभिचारे च स्याद्विशेषणमर्थवत्, अत्र चान्वितमात्रस्य व्यभिचाराभावाच्च तद्विरासाय विशेषणमुचितमित्यर्थ इति तत्त्व० ।

अन्यथा प्रमाणान्तरगृहीतकार्यसंसृष्टस्वार्थे इत्यव्यभिचारात्कल्प्येत । नैतदुक्तम् । संसृष्टस्वार्थे इत्युक्ते केन संसृष्ट इत्यपेक्षायां कार्यसंसृष्ट इति विशेषप्रतिपत्तिमन्तरेण प्रयोजकस्यानिरूपणात्प्रमाणान्तरगृहीतत्वस्य शब्दसामर्थ्यप्रतिपत्तिकाले ऽप्रतिपत्तेर्न तच्च शब्दसामर्थ्यमित्युक्तम् । ननु कार्यसंसृष्ट इत्युक्ते कार्यस्य कार्यान्तराभावात्कार्यपदस्यान्यसंसृष्ट इति प्रयोजकभेदो वक्तव्यः स्यात् । न । धात्वर्थस्यापि कार्यत्वात्तत्संसृष्टनियोगे कार्यपदसामर्थ्यात् । * ननु लोके ऽतीतानागतवर्त्तमानार्थनिष्ठवाक्येभ्यो ऽतीतादध्यर्थप्रतिपत्तिकार्यदर्शनात्तदनुसारेण संसृष्टस्वार्थे सामर्थ्यं नियम्यत इति । † न । संबन्धग्रहणाधीनत्वादर्थ ‡ प्रतिपत्तेस्तया संबन्धग्रहणनियमायोगात् । § अतीतादिवाक्यानां चैवमवधार्यतामिति नियोगनिष्ठत्वात् । तस्मान्न कार्यसंस्पर्शमन्तरेण भूते ऽप्यर्थे शब्दप्रामाण्यमिति ।

अपि च । प्रवृत्तिनिवृत्तिसाध्यप्रयोजनमन्तरेण वाक्यप्रयोगानुपपत्तेः प्रयोजनस्य नियोगसामर्थ्याधीनत्वान्नियोगपर्यवसितमेव वाक्यमित्याह पुरु- ८६
षेच्छासमुत्थापितो हीति । || ननु नेदं ¶ कालान्तरभावि ** नैयोगिकं फलं येन नियोगाधीना फलप्रतिपत्तिः स्यात्किन्तु सम्यग्ज्ञानफलं प्राप्तब्रह्मप्राप्तिलक्षणमविद्यानिवृत्तिलक्षणं च हस्तगतविस्मृतसुवर्णप्राप्तिवद †† ऽन्वयव्यतिरेकसिद्धमिति नेत्याह‡‡न च विस्मृतसुवर्णारोपितसर्पेरशनाप्रतिपत्ताविवेति । नन्वन्वयव्यतिरेकविरुद्ध §§ मेतद् यद् ब्रह्मात्मतत्त्वज्ञानाद् ब्रह्मप्राप्यनर्थनिवृत्ती न स्त इति न प्रत्यक्षविरोधादित्याह पूर्ववत्संसारित्वोपलब्धेरिति । अपि च । शाब्दज्ञानव्यतिरेकेण ||| ब्रह्मात्मनि ज्ञानसाधनान्तरविधानात्प्रयत्नान्तरसाध्यं प्रयोजनं न ज्ञानमात्रसाध्यमित्याह प्रतीत्युत्तरकालं चेति । ,,

* निधिमानेष भूभाग इत्यादिवाक्यार्थप्रतीतिस्तावत्सर्वजनीना· न च सिद्धे सामर्थ्यग्रहणमन्तरेण तदुपपत्तिरिति सिद्धे ऽपि सामर्थ्यमाश्रयणीयमिति प्रयोजकभेदापत्तिरित्यर्थ इति तत्त्व० ।

† सिद्धार्थे संबन्धग्रहणसिद्धौ गृहीतसङ्गतिकाच्छब्दादर्थप्रतिपत्तिः, तस्यां च तत्र सङ्गतिग्रहणमितीतरेतराश्रयत्वमित्यर्थ इति तत्त्व० ।

‡ प्रतिपत्तिस्तथा संबन्धेति १ पु· । § अतीतानागतादीति १ पु· ।

|| इदं वेदान्तोत्थज्ञानफलं न कालान्तरभावि, फलस्य क्रियाजन्यत्वसंभवात् नियोगाधीनत्वम्, इदं च न तथेत्यर्थ इति तत्त्व० ।

¶ कालान्तभावीति १ पु· । ** नैयोगिकमिति २ पु· ।

†† ब्रह्मसाक्षात्कारे अविद्यानिवृत्ति,रितरथा नेत्येवंलक्षणार्थप्रतिपादकं यत्र हि द्वैतमिवेत्यादि वाक्यं तत्सिद्धमित्यर्थ इति तत्त्व० । ‡‡ न च विस्मृतेति ३ पु· ।

§§ एतद् ब्रह्मात्मेति १ पु· । ||| ब्रह्मात्मविज्ञानेति १ पु· ।

ननु लोके * भूतार्थनिष्ठतया प्रयोजन † पर्यन्तता दृश्यते तद्वदिहापि स्या-
७ १ दिति नेत्याह तस्मात्सन्तु नाम लोक इति । ननु धर्मजिज्ञासा ब्रह्मजिज्ञासेति च जिज्ञास्ययोर्द्धर्मब्रह्मणोः सिद्धसाध्यभेदेन वैलक्षण्यं दर्शितम् न च ब्रह्मणि जिज्ञासाकर्मणि शब्दगृहीते प्रतिपत्तिविध्यादयः शास्त्रेण प्रतिपाद्या इति युक्तं प्रतिपत्तुम् सूत्रविरोधादित्यत आह तस्माद्यद्यपीति । तथापि प्रतिपत्त्यादिविधिशेषतयैव ब्रह्म जिज्ञास्यमित्यर्थः । कथं पुनर्ब्रह्मप्रतिपादनपराणां वाक्यानां ब्रह्मप्रतिपत्तिविधिशेषतया समन्वय इति तदाह सो ऽन्वेष्टव्य ‡ इत्यादि । यः पुनः तस्मादित्यादिः स्पष्टार्थः ।

तच्च नियोग § मुखेन ब्रह्मणो ऽवगतिमिच्छतो नियोगब्रह्मणी न प्रमाणेन प्रमातुं शक्येते इत्येतत्प्रथमं दर्शयति अत्रोच्यत ‖ इति । तच्च विधेयाभावात्तद्व्यावृत्तो विधिः प्रमातुं न शक्य इत्याह किमिदं ज्ञानमिति । तच्च तावच्छाब्दं ब्रह्मविषयं विज्ञानं विधातुं न शक्यत इत्याह न तावच्छब्दजन्यमिति । गृहीतपदपदार्थसंबन्धस्या ¶ धीयमानाद्वाक्याद्विधिवाक्यादिव विध्यर्थे ब्रह्मणि विज्ञानमुत्पद्यते तदेव च विचारेण प्रतिष्ठाप्यत इति । न चान्यथासिद्धकार्यमन्तरेण नियोग उपपद्यते शब्दावगते ब्रह्मणि तत्समानजातीयस्मृतिसन्तानो विधीयतामिति शङ्कते** अथ शब्दजन्यस्यैवेति । तच्च स्मृतिसन्तानविधेः प्रयोजनं न तावदऽदृष्टं स्वर्गादिवन्मोक्षस्य कर्मजन्यत्वप्रसङ्गात् दृष्टफलत्वे ऽपि न किञ्चित्फलं निरूप्यत इत्याह न तस्य प्रयोजनं पश्याम इति । ननु मर्दनसुखवत्प्रत्यक्षं सुखमित्याह नन्विष्टविषयस्येति । तर्ह्यन्वयव्यतिरेकसिद्धसाधनत्वान्मर्दनादिवत् स्मृतिसन्तानो न विधेय इत्याह यद्येवमिति । अस्तु तर्हि स्मर्यमाणस्य साक्षात्करणं स्मृतिसन्तानविधेः प्रयोजन-
१४ मिति शङ्कते अथ पुनरिति । किं साक्षात्करणं स्मृतिसन्तानस्यादृष्टं प्रयोजनम् दृष्टं वा भवति । न चादृष्टम् वस्त्वापरोक्ष्यस्य चक्षुरादिप्रमाणसामग्रीसाध्यत्वादऽदृष्टमाक्षाजन्यत्वात् । अदृष्टसहकृता †† ज्जन्मान्तरीयप्रमाणकारणाज्जन्यत

* कृतार्थेति २ पु० । † पर्यन्तानिवाक्यानि दृश्यन्ते इति १ पु०, पर्यन्तानि दृश्यन्त इति ३ पु० ।
‡ इत्यादयः पुनरिति ३ पु० । § मुखेनैवेति पश्चात्कृतम् १ पु० ।
‖ इतिशब्दो नास्ति २ पु० । ¶ अधीयमानवाक्यादिति ३ पु० । ** अथेतीति ३ पु० ।
†† समासो ऽत्र १ पु० ।

इति चेत् । तर्हि * जन्मान्तरे यथा शब्दादिप्रमाणकारणं विधिमन्तरेण ब्रह्मावगतिं जनयिष्यति तथेहापि स्यात् । अथ दृष्टमेव ब्रह्मसाक्षा † त्करणं प्रयोजनमिति न अनुपलब्धेरित्याह नैतदुक्तमिति । अनुपलब्धिविरोधमेव दर्शयति न हि लैङ्गिकोर्थ इति । शाब्दज्ञानस्मृतिसन्तानान्नापरोक्षज्ञानमाक्षमुत्पद्यते किं तु तज्जननसमर्थं विज्ञानान्तरमुत्पद्यते तद्विज्ञानफलाय स्मृतिसन्तानो विधीयत इति शङ्कते मा भूच्छाब्दज्ञानादेवेति । तदप्यपरोक्षफलं विज्ञानं नादृष्टतया विधिफलम् प्रमाणाधीनत्वादवगमस्य । नापि दृष्टतया । स्मृतिसन्तानस्य प्रमाण ‡ त्वाभावात् । नापि तद्विधविज्ञानफलत्वे प्रमाणमस्तीत्याह नेत्थम्भावे प्रमाणमस्तीति । मा भूत्स्मृतिसन्तानविधिः शब्दावगते ब्रह्मणि ध्यानं विधीयते । ननु को विशेषः § स्मृतिसन्तानाद् ध्यानस्य । तच्च स्मृतिसन्तानो नाम प्रमाणावगते वस्तुनि तत एव प्रमाणात्सजातीयप्रत्ययप्रवाहो वस्तुतत्त्वविषयः । ध्यानं नाम वस्तुतत्त्वमनपेक्ष्यारोपितविषयतयापि मनः ‖ संकल्पप्रवाहः स विधेय इत्याह अस्तु तर्हि शब्दात् प्रतिपन्नस्येति । ननु तस्याप्यदृष्टं दृष्टं वा प्रयोजनं वक्तव्यम् । न तावददृष्टम् नैयोगिकत्वेन स्वर्गादिवदनित्यत्वप्रसङ्गात् नापि दृष्टं दृश्यत इत्याक्षिपति किमर्थमिति । ननु ध्येयसाक्षात्करणाय । तदपि नादृष्टं फलम् प्रमाणजन्यत्वादर्थानुभवस्य । ¶ दृष्टं फलं चेत् न अनुपलब्धिविरोधादित्याह न तस्य सम्भव इत्यादि ।

ननु ध्यानाभ्यासप्रचयसामर्थ्याद्विनष्टपुत्राद्यापरोक्ष्यं दृश्यत इति चोदयति ननु दृष्टमिति । न हि विनष्टपुत्रादीनामिदानीमविद्यमानत्वात्तदापरोक्ष्यं सम्भवति किं तु यत्परोक्षदेशे पुत्राद्यवभासते तद्ध्यायमानत्वादविद्यात्मकम् । अतो न वस्त्वापरोक्ष्यमिति परिहरति ** मैवम् न तद्ध्यायमानमिति । ननु ब्रह्मात्मनि ध्यायमाने ध्यानप्रकर्षाद्ध्येयापरोक्ष्यं तावत् †† पुत्रादिवत्सिध्यति ध्येयस्य च वस्तुत्वं शब्दप्रमाणात्सिध्यति । अतो वस्त्वापरोक्ष्यं ध्यानात्फलिष्यति यथा स्वप्ने चतुष्पथे हस्तिज्ञानमुत्पन्नं तथाभूतजागरणसंवादेन सम्यग्ज्ञानं

* जन्मान्तरे यथेति नास्ति २ पु० । † कारणमिति ३ पु० ।
‡ कारणेति अत्राधिकं ३ पु० । § स्मृतिसन्तानाद्ध्यानस्येति नास्ति १ पु० ।
‖ मनःसंकल्पः प्रवाह इति व्यस्तं ३ पु० । ¶ दृष्टफलमिति समासः १ पु० ।
** नैवमिति १ पु० । †† पुत्रादिवदिति नास्ति ३ पु० ।

भवतीति । नैतत्सारम् । अपरोक्षज्ञानस्य शब्दप्रमाणसामर्थ्यात्तथाभूत * ज्ञानत्वेन संवादात्प्रामाण्यं स्यात् । न च स्वप्रज्ञानं प्रमाणम् अविद्यात्मकत्वात् । संवादस्तु सादृश्यभ्रमादिति । न हि चक्षुरादिप्रवृत्तिमन्तरेण वस्तुदर्शनं सम्भवति ।

नन्वु विध्युद्देशसामर्थ्यादेव ध्येयसाक्षात्करणं ध्यानफलं गम्यते किम-
:७ २४ न्वयव्यतिरेकाभ्यामित्याह ननु द्रष्टव्य इति । तत्रापि किं नैयोगिकं फलमाहोस्विद् दृष्टमिति । नैयोगिकत्वे स्वर्गादिवदुपचयापचयात्मको मोक्षः स्यात् । दृष्टफलं चेत्तदाह उक्तमेतदिति । विधेयसद्भावमङ्गीकृत्य शब्दानां ध्यानविधिपरत्वे ब्रह्मात्मैकत्वं न सिध्यतीत्याह अथापि भवतु ध्यानादिति । ननु शब्दो ब्रह्मात्मैकत्वं प्रति पादयतीति नेत्याह शब्दस्तावदिति । ननु ज्ञानविधिवाक्यव्यतिरिक्तानामवान्तरवाक्यानां ब्रह्मणि समन्वयाद्वस्तुसिद्धिरित्याह सत्यं तथापि तत्त्वं सिध्यतीति । परिहरति विषम उपन्यास इति । तस्माद्विधिपरत्वे नास्ति वस्तुसिद्धिरिति सर्वविधिभेदेष्वतिदिशति पूर्वोक्तेष्वपीति । स्मृतिसन्तानध्यानयोर्नियोगो निराकृतः इदानीं तृतीयज्ञाने ऽपरोक्षफले नियोगमाशङ्कते यत्पुनः कैश्चिदुच्यत इति ।

तच्च † वदामः । विधीयमानज्ञानस्य प्रत्यक्षानुमानशब्दजन्यत्वाभावाद्दर्शपूर्णमासवदलौकिककरणेतिकर्तव्य ‡ ताविषयविधानैः सह दर्शनं विधेयम् न तद् दृश्यत इत्याह तत्पुनः किंसाधनमित्यादिना । शङ्कते तमेतं वेदानुवचनेनेति । श्रवणमननिदिध्यासनैः करणैर्वेदानुवचन § यज्ञदानतपोऽनशनशमदमाद्यनुगृहीतैर्मोक्षकामो ब्रह्मण्यऽपरोक्ष ‖ फलज्ञानं कुर्यादित्यर्थः । परिहरति प्रमाणान्तरस्य तर्हि प्रमाणमिति । अयमर्थः । सेतिकर्तव्यं साधिकारं च ब्रह्मण्यपरोक्षफलं विज्ञानं प्रमाणान्तरं तत्कर्तव्यतया शब्दैः प्रमीयते चेत् । न ब्रह्मणि प्रमाणं शब्दः किं तु ब्रह्मप्रमाणे प्रमाणम् । ततश्च कल्पनालाघवाद् ब्रह्मण्येव प्रामाण्यं युक्तमिति । ननु विधिविषयमन्तरेण ब्रह्मबोधे
:८ १४ प्रामाण्यं न युक्तमिति नेत्याह कार्यगम्यमिति । गृहीतसम्बन्धस्य वेदान्तवाक्येभ्यो ब्रह्मणि निश्चितप्रमितिकार्यगम्यं वेदान्तप्रामाण्यम् । तच्च प्रमिति-

* ज्ञानत्वे न संवादादिति १ पु, ज्ञानत्वे संवादादिति २ पु· ।
† वदाम इति नास्ति १ पु· । ‡ तत् नास्ति २ पु· ।
§ यज्ञतपोदानानशनेति १ पु· । ‖ फलं ज्ञानमिति १, ३ पु· ।

जननाद्विषयस्य विधेयत्वगम्ये प्रामाण्ये ऽग्निहोत्रवाक्यं दर्शपूर्णमासविधिनिष्ठं किं न स्यात् । तच्च शब्दसामर्थ्याभावात्प्रमित्यनुदयादिति चेत् । इहापि सत्यं ज्ञानमनन्तं ब्रह्म तत्त्वमसीत्युक्तेन विधौ सामर्थ्यप्रमितिर्वा गम्यत इति ब्रह्मण्येव * प्रामाण्यं युक्तमिति । ननु लौकिकं प्रामाण्यं कार्यगम्यमेव शास्त्रीयं तु विधिगम्यमिति नेत्याह तदुक्तमिति । अत्र लौकिकानां शब्दानां मुख्यार्थाभिधानमुखेन वैदिकार्थप्रतिपादनासम्भवे किं वेदे पृथक्सम्बन्धं गृह्णीमः किंवा वृत्त्यन्तरद्वारेणापि लौकिकादेव सम्बन्धादर्थं प्रतिपाद्यामह इति विशये लौकिकमेव प्रतिपत्तुं युक्तम् अलौकिककल्पनादित्याह गुणाद्वाप्यभिधानं स्यादिति । एवं लौकिकमेव प्रामाण्यं युक्तमऽलौकिककल्पनादित्यर्थः । †तस्मान्न दृष्टफलतया नियोगपर्यवसितानि वेदान्तवाक्यानि ।

ननु कोयं नियोगो नाम । नन्वाचार्यनियोग इत्यादौ प्रसिद्धः । सत्यम् तच्चोत्कृष्टस्य पुरुषस्यावरपुरुषप्रेरणात्मको ऽभिप्रायभेदो नियोगः ‡ नासावऽपौरुषेये वेदे बालस्य प्रत्यक्षादिव्यवहारे च सम्भवति । ननु कार्यबुद्धिगम्यं वस्तु नियोग इत्याख्यायते प्रवर्तकत्वसामान्यादिति । § किमिदं कार्यं नाम । यदि ‖ कृतियोग्यतामात्रम् । न ततः प्रवृत्तिः प्रागभाववतां सर्वेषां कृतियोग्यत्वात् । अथ कृतिसंसृष्टं कार्यम् । ¶ न । कृतिसंसर्गस्यैव निमित्तत्वोपगमात्कार्यबुद्धेः । अथ कृतियोग्यमेवालौकिकं किञ्चिद्वस्तु कार्यमिति । ** तर्ह्यव्युत्पन्नस्य घटेनोदकाहरणं कर्तव्यमित्यादिप्रत्यक्षव्यवहारे क्रियाकारकव्यतिरिक्तमलौकिकं किंचित्प्रतिपन्नं न वेति वक्तव्यम् । प्रतिपन्नं चेत् । नालौकिकं किञ्चिदिति । निदर्शनीयं च शब्दान्तरेणेदमित्थमिति । ननु कार्यमिति प्रतिपद्य प्रवर्तते ततश्च प्रवर्तकाकारता कार्यस्य क्रियाकारकफलेभ्यो वैलक्षण्यमिति । न । धात्वर्थस्यैवाभिलषितसाधनतया प्रवर्तकत्वात् तस्यैव च कार्यबुद्धिगोचरत्वात् । नन्वन्यत्कार्यमन्यदभिलषितसाधनम् । सत्यम् । अभिल-

* प्रमाणमिति ३ पु० ।

† तस्माददृष्टेति पश्चात्कृतम् १ पु० । ‡ नास्यापौरुषेये–इति कृतम् १ पु० ।

§ किं कृतियोग्यमात्रं कार्यम्, उत कृतिसंसृष्टम्, आहो कृतियोग्यत्वे सत्यलौकिकम्, उत प्रवर्तकाकार इति किंशब्दार्थः, कृतियोग्यतामात्रज्ञानात्प्रवृत्तौ दुःखसाधनानामपि कृतियोग्यत्वात्तज्ज्ञानादपि प्रवृत्तिः स्यादित्यर्थ इति तत्त्व० । ‖ कृतियोगमात्रमिति २ पु० ।

¶ कार्यबुद्धौ जातायां तन्निबन्धनः प्रकृतिसंसर्गः, तस्मिन्सतीति कार्यबुद्धिरितीतरेतराश्रयत्वमित्यर्थ इति तत्त्व० । ** तर्हि अनुत्पन्नस्येति कृतम् १ पु० ।

षितसाधनमेव कृतियोग्यतया * प्रवर्त्तकं कार्यमुच्यते । न च श्रेयःकृतिप्रतियोगिभेदमाचादुभयबुद्ध्यालम्बनं साधनं भिद्यते । न च कृतियोग्येष्टसाधनव्यतिरिक्तं कार्यं नाम † प्रवृत्तिनिमित्तं पश्यामः ।

ननु फलमपि कार्यतया प्रवृत्तिसमर्थं दृश्यते । न । विशिष्टप्रवृत्तिहेतुत्वाभावात्फलकार्यत्वस्य । अभिलषित ‡ साधनं कार्यमेव सम्बन्धग्रहणलिङ्गभूतायाः प्रवृत्तेर्हेतुः । फलस्येच्छामाचहेतुत्वात् । न च कार्यन्नामाऽलौकिकं किञ्चिल्लोके दृश्यते । न तावत्प्रत्यक्षेणावगन्तुं शक्यम् असिद्धस्वभावत्वात् । सम्बन्धाग्रहणान्नानुमानेन । अव्युत्पन्नत्वान्नागमेन । अलौकिककार्यमन्तरेणानुपपत्त्यभावान्नार्थापत्त्या कार्यमवगन्तुं शक्यम् । प्रवृत्तिरनुपपन्नेति चेन्न । कृतियोग्यादभिलषितसाधनादपि प्रवृत्तेः । न च साधनत्वमपि कार्यवत्प्रमाणशून्यम् तत्फलोदयान्वयव्यतिरेकाभ्यामवगमात् । § अननुभूते ऽपि सामान्यतोदर्शनेन साधनत्वसिद्धेः । ‖ न चातीतादिसाधनेषु प्रवृत्तिप्रसङ्गः । कृतियोग्येष्टसाधन इति विशेषणात् । तस्मादव्युत्पन्नस्य व्यवहारे प्रमाणान्तरेण यत्प्रवर्त्तकतया ¶ वर्त्तते तदेव श्रोतुरपि शाब्दबुद्धिगोचरतया प्रवर्त्तकमनुमीयत इति सिद्धम् ।

तच्च ब्रह्मात्मैकत्वविज्ञाने विधिसम्बन्धो नाम फलसाधनसामर्थ्यम् । तच्चाविद्यानिवृत्तिव्यतिरेकेण मोक्षफलस्याभावात्तस्य चान्वयव्यतिरेकसिद्धत्वात्तत्त्वज्ञानस्य मोक्षसाधनत्वमन्वयव्यतिरेकगम्यं न शब्दप्रमेयमिति ब्रह्मण्येव प्रमाणं शब्द इति सिद्धम् । इदानीं जीवब्रह्मणोर्भेदमङ्गीकृत्य ब्रह्मणश्च प्रदेशान्तरवर्त्तित्वं सर्वगतत्वं चाभ्युपगम्याहं ब्रह्मास्मीत्यारोपितरूपेण विधीयमानादुपासनाद्यागादिव स्वर्गो मोक्षः फलिष्यतीति ये मन्यन्ते तन्निरासायोत्तरं भाष्यमित्याह अथाप्यथ यदतः परो दिवो ज्योतिरित्यादिना ।

 १७ नन्वेवमप्युपासनाविधिपरत्वे शब्दस्य ब्रह्मस्वरूपासिद्धिरित्यत आह ** देव-

* प्रवर्त्तकत्वात्कार्यमिति १ पु० ।

† प्रवृत्तिनिमित्तं सामर्थ्यम्पश्याम इति १ पु०, प्रकृतिनिमित्तं पश्याम इति २ पु०, प्रवृत्तिसमर्थम्पश्याम इति ३ पु० । ‡ साधनकार्यमेवेति २, ३ पु० ।

§ इदमेतत्साधनमेतज्जातीयत्वात्, अमुकवदित्यनुमानात्साधनत्वसिद्धिरित्यर्थ इति तत्त्व० ।

‖ संभवे व्यभिचारे च विशेषणमर्थवदितिन्यायाद्विशेषणकल्पनं न दोषाय । न च निर्विशेषणप्रयोजकसंभव इतरकल्पनमयुक्तमिति वाच्यम्, इष्टसाधनज्ञानं विना कार्यबुद्धिस्तावच्च संभवति, इष्टसाधनज्ञानमात्रस्य च कार्यज्ञानाहेतुत्वात् कृतियोग्येष्टसाधनस्य हेतुत्वं वक्तव्यम्, तथा च तादृगिष्टसाधनज्ञानस्थैव प्रवर्त्तकत्वमस्तु, किं तज्जन्यकार्यबुद्ध्येत्यर्थ इति तत्त्व० ।

¶ प्रमीयते इति ३ पु० । ** देवविषयेति ३ पु०

ताविग्रहवत्त्वन्यायेति । न च प्रमाणान्तरविरोधः * विकारासंस्पर्शित्वाद् ब्रह्मणः सद्वितीयत्वात् । ननु नैयोगिकफलत्वे मोक्षस्य स्वर्गादिवदऽनित्यतेति नेत्याह न च साध्यत्वे ऽपीति । ननु श्रुतिरनित्यत्वानुमानविरुद्धा- ८८
कथमनावृत्तिं साधयेदित्यत आह न ह्येष इति । नन्वनुमानागमयोर्विरुद्धा-
व्यभिचारित्वात्संशयहेतुत्वमिति तत्राह शब्द † गम्यस्येति । अनुमानादागमो
बलवानित्यर्थः । अस्य परिहारत्वेन भाष्यमवतारयति न कर्मब्रह्मविद्याफल-
योरि ‡ त्यादिना । भाष्यस्य तात्पर्यार्थमाह अस्यायमर्थः संक्षेपत इत्यादिना ।

ननु नास्ति फलवैलक्षण्यं मोक्षस्याप्युपासनासाध्यतया कर्मजन्यत्वात् । ततश्चोपचयापचयशरीरेन्द्रियादिमत्तापि स्यादित्यत आह श्रुतितो न्यायतश्चेति । ब्रह्म वेद ब्रह्मैव भवति विद्यया ऽमृतमश्नुते ब्रह्मसंस्थो ऽमृतत्वमेति अथायमशरीरो ऽमृतः प्राणो ब्रह्मैवेत्यादिश्रुतितो ब्रह्मात्मताऽशरीरामृतत्वलक्षणो मोक्षो दर्शितः । न्यायतश्च मोक्षस्य नित्यत्वं गम्यते पुनरावृत्तौ पुनर्बन्धान्मोक्षशब्दस्योपचरितार्थताप्रसङ्गादभ्युदयनिःश्रेयसयोश्च भेदप्रतिपत्तेः । अनादित्वमपि श्रुतिन्यायाभ्यामवगतम् विमुक्तश्च विमुच्यते ब्रह्मैवसन् ब्रह्माप्येतीति श्रुतेः । सादित्वे चान्तवत्त्वं स्यादिति न्यायात् । ततश्च न क्रिया साध्यो मोक्ष इति । क्रियासाध्यत्वे ऽभ्युदयफलवच्छरीरेन्द्रियादिसम्बन्धक्षयिष्णुतोपचयापचयवत्त्वं § च मोक्षस्य स्यादित्याह ‖ यदि सन्ध्योपासनवदित्यादिना । ननु यथैवोपचयापचयवत्क्षयिष्णुशरीरेन्द्रियादिभोग्यं ¶ च कर्म ** फलमेव तद्विपतमशरीरामृत†† ब्रह्मलक्षणं च निःश्रेयसं कर्मफलमेव स्यात्कर्मणां पश्वादिविविधफलहेतुत्वदर्शनादिति अत आह न चाशरीरत्वमेव धर्मकार्यमिति । ८९

किमिदं स्वाभाविकमशरीरत्वं किं वा नैमित्तिकमिति । शरीरात्मनोः मिथ्याज्ञानसम्बन्धव्यतिरिक्तस्य सर्वप्रकारसम्बन्धस्यात्यन्तिकाभावः स्वाभाविकमशरीरत्वं मिथ्याज्ञानसम्बन्धान्नैमित्तिकं शरीरत्वमिति । तच्च सम्यग्ज्ञानसाध्यस्य मिथ्याज्ञानसम्बन्धनिवृत्तिलक्षणस्याशरीरत्वस्य कर्मसाध्यत्वाभावात्

* अथ यतदः पर इत्यादिना ब्रह्मणो विकारेणा ऽसंबन्धोपलब्धेस्तस्य पृथक्त्वेनावस्थानम्, तथा च वेदान्तानामपि भेदपरत्वाच्च मानान्तरविरोध इत्यर्थ इति तत्त्व० ।

† शब्देतीति ३ पु० । ‡ इत्यादीति १ पु० । § चशब्दो नास्ति १ पु०
‖ यदीतीति ३ पु० । ¶ चशब्दश्चिह्नः १०पु० ।
** फलमेवमिति १ पु० । †† त्वप्रत्ययो ऽधिको ऽत्र १ पु० ।

सम्बन्धान्तरनिवृत्तिलक्षणस्याशरीरत्वस्य स्वाभाविकत्वान्न धर्मसाध्यो मोक्ष इति। ननु यदिदमशरीरामृतब्रह्मलक्षणं फलम् तद * न्यथा कर्मभिः परिणम्यत
८९ ४ इति नेत्याह † तथापि कथंचिदित्यादिना । ननु भवतु स्वाभाविकाशरीरामृत-
ध्रुव ‡ लक्षणो मोक्षः सदैकरूपः तथाप्युपासनासन्तानाद्विधीयमानाद्भविष्यति
,, ७ ज्ञानलक्षणत्वादुपासनस्येत्यत्राह तच्च यदि हस्तगतविस्मृतसुवर्णवदित्यादिना। नुन किमिति यागफलवदुपासनासाध्यत्वे मोक्षस्योपचयापचयवत्त्वयिष्णुताशरीर § सम्बन्धः स्यात् ।

उच्यते । मोक्षफलाय विधीयमानस्योपासनस्य स्वरूपतः कालतः सङ्ख्यातो वा परिमितिरस्ति वा न वेति वक्तव्यम् । अस्ति चेत् । साङ्गदर्शपूर्णमासपरिमितिवदेतावदिदमित्युपसनापरिमितिः प्रदर्शनीया । न च तथा दृश्यते। नापि सङ्ख्यातः परिमाणमस्ति । सहस्रं लक्षं वा प्रत्ययानां मोक्षसाधनमिति नियामकादर्शनात् । नापि कालतः परिणाममस्ति ‖ एकं शतं सहस्रं वा संवत्सराणामुपासीनस्य मोक्ष इति ¶ नियमे प्रमाणाभावात् । मरणमेवावधिरिति चेत् । तथापि दर्शपूर्णमासवदेकाकारसाधनपरिमितिर्न्न लभ्यते एकेन दशभिः शतेन सहस्रेण वा कालेन कस्यचिन्मरणात्पुरुषभेदेषूपासनोपचयापचयप्रसङ्गात्। उपास्यापरोक्ष्यमवधिरिति चेत् । तथापि कस्यचित्केनचित्कालेना ** परोक्षात्साधनोपचयापचयौ तदवस्थौ। अतो नोपासनलक्षणमोक्षसाधनैकरूप्यं लभ्यते। न ††-
चारोपिताऽपरोक्षानुभव एव ‡‡ मोक्षसाधनमविहितत्वा §§ न्मिथ्याज्ञानत्वाच्च ।

अथ मा भूदैकरूप्यम् देशकालसङ्ख्यापरिमाणभेदाद |||| ग्निहोत्राभ्यासवत्पुरुषभेदेषु साधनोपचयापचयात्मता भविष्यतीति । न तर्हि सर्वेषामेकरूपो मोक्षः स्यात्काष्ठोपचयाज् ज्वालोपचयवदग्निहोत्रोपचयात्स्वर्गोपचयव¶¶ च्चोपासनोपचयान्मोक्षोपचयापचयोपपत्तेः । अथ साधनवैषम्ये ऽपि फलैकरूप्यमुच्येत । अनुष्ठानवैफल्यं स्यात् । अथोपासना**ऽपि विधीयमाना नियामकाभावादुपचया-

* अन्यथाऽन्यथेति १ पु॰। † तत्रापि कथं चिदित्यादिनेतीति १ पु॰, तत्रापीत्यादिनेति ३ पु॰ ।
‡ ब्रह्मेति अधिकम् १ पु॰ । § संबन्धश्च स्यादिति १ पु॰ ।
‖ एकशतमिति २, ३ पु॰ । ¶ नियामकप्रमाणेति ३ पु॰ ।
** आपरोक्ष्यादिति १ पु॰ ।
†† आरोपितेति नास्ति २, ३ पु॰ । ‡‡ मोक्षं साधयतीति १ पु॰ ।
§§ प्रमाणजन्यस्याविद्यानिवर्त्तकत्वमन्वयव्यतिरेकसिद्धं नाप्रमाणस्येत्यर्थ इति तत्त्व० ।
|||| अग्निहोत्रस्याभ्यासेति १ पु॰ । ¶¶ चकारो नास्ति १॰ । * अपिशब्दो नास्ति १ पु॰ ।

पचयरूपिणी फलं च शास्त्रादेकरूपमिति । नैतत्सारम् । उपासनातो* ऽविद्या† तत्संस्कारकामकर्मसु क्षीयमाणेषु चित्तैकाग्र्यादपरोक्षसम्यग्ज्ञानोदयोपपत्तेः क्षीयमाणकर्मादिवैषम्यादेवोपासनावैषम्यादपरोक्षज्ञानोपपत्तेश्च । तस्मात्स्वर्गादिफलवदुपचयापचयरूपिणी मुक्तिः स्यादिति विधीयमानोपासनासाध्यत्वात्सु‡ खदुःखस्येव शरीरेन्द्रियादिदृष्टसामग्रीसाध्यत्वं साधनवत्त्वयात्वयिष्णुता च स्यादित्युपसंहरति अतो न कर्त्तव्यशेषत्वेनेति । ८९ १

ननु श्रुत्यनुमाने सामान्यावलम्बिनी §तद्यथेह कर्मजितः यत् कृतक्रम् तदनित्यमिति अपुनरावृत्तिश्रुतिस्तु मोक्षविषया बलीयसीत्युक्तार्थमनुवदति यत्पुनर्न्न च पुनरावर्त्तत इति । ‖ तच तावद्विधिपरत्वे वेदान्तानां फलश्रुतयो ऽर्थवादाः ¶पर्णमयीत्वादिवत् ।**नचार्थवादैरपुनरावृत्तिः††प्रमातुं शक्यते द्रव्य‡‡ गुणसंस्कारकर्मफलश्रुतिवत् । ननु नार्थवादत्वात्फलश्रुतयः प्रामाण्यं जहति किं तु वर्त्तमानापदेशित्वेन योग्यानुपलब्धिविरोधात् । इहापि तर्हि न च पुनरावर्त्तत इत्यप्राप्तप्रतिषेधान्नार्थवादानां प्रामाण्यम् । तथाहि । ब्रह्मलोकमभिसंपद्यते न च पुनरावर्त्तत इत्यभिसंपत्तिसमये पुन रावृत्तिरप्राप्ता प्रतिषिध्यते । न च पुनरावर्त्तिष्यत इति भाविनी पुनरावृत्तिः प्रतिषिध्यत इति वाक्यार्थः कल्प्यत इति चेत् । न । श्रुतार्थपरित्यागेनाश्रुतार्थकल्पनायां यत्कृतकं तदनित्यम् तद्यथेह कर्मजित इतिश्रुत्यनुमानविरोधात् । एवमपुनरावृत्तिवाक्यान्तरेषु योजयितव्यम् । तस्मादर्थवादमात्रमेतत् ।

सामान्यश्रुत्यनुमानाभ्यां साध्यस्य मोक्षस्यानित्यता दर्शिता इदानीम §§ पुनरावृत्ति |||| विशेषणसामर्थ्यादे ¶¶ वान्तवत्तामाह किञ्च तेषामिहेति । ,, इममिहेति विशेषणं मानवान्तरे स्वतःप्राप्तामावृत्तिं दर्शयति । नन्वस्मि-

* * मिथ्याज्ञानमविद्याशब्दार्थः· एकाग्रचित्तस्यापरोक्षं ज्ञानं जायते, ऐकाग्र्यं च मिथ्याज्ञानादिप्रतिबन्धनिवृत्तौ, निवृत्तिश्चोपासनाधीनेति प्रणाड्या मुक्त्युपायेगसंभवे न साक्षात्तस्यास्तत्साधनत्वं श्रुत्यादिविरुद्धं कल्प्यमित्यर्थ इति तत्त्व० ।

† तदिति नास्ति १ पु· ।

‡ सुखदुःखवदिति १ पु· ।

§ यथेहेति यत्कृतकमिति १ पु· ।

‖ वेदान्तानां विधिपरत्वे तत्र वेदान्तेषु याः फलश्रुतयस्ता अर्थवादा इति संबन्ध इति तत्त्व० ।

¶ पर्णमयीत्वादिवदितीति १ पु· ।

** अर्थवादत्वमस्मदनुकूलम्, अर्थं वदतीत्यर्थवाद इत्यर्थसाधकत्वादित्याशङ्क्याह न चेति· अर्थबोधकत्वमात्रं नार्थवादशब्दार्थः, किन्तु विध्यपेक्षितस्तुतिनिन्दार्थवादत्वम्· न च तादृशस्य प्रतीयमाने ऽर्थे प्रामाण्यसंभव इत्यर्थ इति तत्त्व० ।

†† प्रमाणयितुमिति कल्पितं १ पु· ।

‡‡ गुणेति नास्ति १ पु· ।

§§ अपुनरावृत्तिश्रुतिर्विशेषणेति १ पु· ।

|||| विशेषणश्रुतिसामर्थ्यादिति ३ पु· ।

¶¶ एवान्तवत्त्वमिति १, २ पु· ।

न्कल्पे ऽनावृत्तिं प्रतिपादयतो वाक्यस्य कल्पान्तरे पुनरावृत्तिप्रतिपादने द्वैयर्थ्याद्वाक्यभेदः स्यादिति । अनभिज्ञो ऽयं सर्वसङ्करवादी देवानाम्प्रियः यतः सर्वेषां सविशेषणवाक्यानामिदं चोद्यमवतरति । अथ सविशेषणं वाक्यं विशिष्टमर्थं मुखतः प्रतिपादयति अर्थात्तु विशेष्यान्तरव्यावृत्तिः प्रमीयत इति न वाक्यभेदः । तर्हीहाप्येतत्कल्पविशेषिता ऽनावृत्तिर्मुखतः प्रतिपाद्यते अर्थादपुनरावृत्तिरस्य कल्पान्तरे निवार्यत इति न वाक्यभेदः । ननु कल्पान्तरे ऽपि श्रुतिसामान्यादिह न पुनरावृत्तिरिति प्रतिषेधस्तुल्यः । सत्यमस्माकं तावदस्मिन्कल्पे प्रतिपन्नानां कल्पान्तरे पुनरावृत्तिर्विशेषणसामर्थ्यात्प्रमीयते इदानीं कल्पान्तरप्रतिपत्तॄणामपि तस्मिन्ननावृत्तिप्रमितिश्चेत्स्यात् इत्थं व्यवस्था कल्प्यते अस्मिन्कल्पे प्रतिपन्नानां कल्पान्तरे पुनरावृत्तिः कल्पान्तरे प्रतिपन्नानां तचानावृत्तिरिति । अन्यथा विशेषण*वैकल्यादिति ।

९ १९,२३ अपि च अभ्युपेत्येत्यारभ्य तथा तद्वैतदित्यतः प्राक्तनग्रन्थस्यायमर्थः । शब्दादवगते ब्रह्मणि सुखसंवेदनत्वादभ्यासेनाऽपरोक्षीकृते विधिमन्तरेण यत्साक्षात्कारणं तद् ब्रह्मवेदनमित्युच्यते । तस्मिन्नुत्पन्ने ऽनन्तरमेवाविद्यादिदोषनिवृत्तेर्युक्तं ब्रह्मसंवेदनेन समानकालत्वं फलस्य । यदा पुनरुपासनैवाऽध्यारोपितात्मविषया विधीयमाना ब्रह्मसंवेदनमुच्यते । तदा नैयोगिकफलस्य कालान्तरभावित्वान्न युक्तः समानकालतानिर्देशः । अतः शब्दादपि विदितस्य ब्रह्मणः स्वयमेवापरोक्षज्ञानाय प्रवृत्तेः फलजननात्प्राङ् न कार्यानुप्रवेश इति । तथा तद्वैतत्पश्यन्नृषिर्वामदेव † इत्यादिः किञ्चैत्यतः प्राक्तनो ‡ ग्रन्थः स्पष्टार्थः ।

अपि च । ब्रह्मविद्याफलमविद्यानिवृत्तिं § दर्शयन्ति । सा चापरोक्षाध्यासलक्षणा तत्त्वापरोक्षज्ञानमन्तरेण न निवर्तते । यदा पुनरुपासनैवारोपितरूपा तत्त्वज्ञानं स्यान्न तेनाविद्यानिवर्तेत । अतस्तत्त्वज्ञानमेव प्रमाणजनितमविद्यानिवर्तकमित्यविद्यानिवृत्तिफलश्रवणाद्ब्रह्मात्मनि वेदान्ताः प्रमाण-

० ७ मित्याह ‖ किंच तस्मै मृदित ¶ कषायायेत्यादि । नन्वविद्यानिवृत्तिरिह न

* वैयर्थ्यादिति १ पु· ।
‡ ग्रन्थ इति नास्ति ३ पु· ।
‖ किञ्चेत्यादीति ३ पु· ।
† इत्यादीति विसर्गरहितः १ पु· ।
§ दर्शयतीति १, ३ पु· ।
¶ कषायेत्यादिनेति १ पु· ।

श्रूयते । नैष दोषः । तरति शोकमात्मविदिति शोकतरणनिमित्तमात्मज्ञानं प्रक्रम्य तमसः पारं दर्शयतीत्युपसंहरन् यदि तमोनिवृत्तिमेव न ब्रवीति तदा शोकाद्यध्यासनिवृत्त्युपक्रमो न स्यात् । अतः शोकाद्युपादानानाद्यविद्यानिवृत्तिरेव तमसः पारं दर्शयतीत्युक्तेति गम्यते । तथा ऽविद्यायाः परं पारं तारयसीत्यऽविद्यातिक्रमेण ब्रह्मप्राप्तिं ब्रुवन्नतिक्रमानुपपत्तेर्निवृत्तिमेव दर्शयतीति श्रुत्यनुसारेणा ऽविद्यानिवृत्तिफलसिद्धये तत्त्वज्ञाननिष्ठं वेदान्तप्रमाणमित्युक्तम् ।

इदानीं तर्कशास्त्रानुसारेणा ऽपि मिथ्याज्ञाननिवृत्तिफलं तत्त्वज्ञानमिति दर्शयति इतश्चैतदेवमिति । अयमर्थः । दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञाना- ९०
नामुत्तरोत्तरापाये*तदनन्तराभावादपवर्ग इति । आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गेषु द्वादशसु पदार्थेषु यदिदमनादिप्रवृत्तं मिथ्याज्ञानम् तस्यात्मपरमात्मशरीरेन्द्रियादिद्वादशपदार्थतत्त्वदर्शनवैमल्यादपाये तेषु रागद्वेषमोहा नोत्पद्यन्ते । ततः प्रवर्तकाभावात्सुखदुःखफले प्रवृत्तिनिवृत्ती नोपजायेते । ततः प्रवृत्तिनिवृत्तिद्वारोपचितशुभाशुभव्यामिश्रकर्मशून्यतया ब्रह्मादिस्थावरान्तेषु योनिभेदेषु न जायते शरीरसम्बन्धं न प्रतिपद्यत इत्यर्थः । ततः शरीराभावे सुखदुःखे नोत्पद्येते इति मिथ्याज्ञानापायमेव मोक्षं दर्शयति । तथा वैशेषिकैरपि द्रव्यगुणकर्मसामान्यविशेषसमवायेषु सालक्षण्यवैलक्षण्याभ्यां तत्त्वाऽपरिज्ञानाद†नादिप्रवृत्तं मिथ्याज्ञानं तत्त्वपरिभावनया निवर्त्यते । ततश्चोत्तरोत्तराभावादपवर्ग इत्युक्तम् । तथा सांख्ययोगैरपि दर्शितम् । द्रष्टृदृश्याविवेकलक्षणा ऽविद्या ऽनादिप्रवृत्ता तत्त्वज्ञानेन निवर्त्यते । ततश्चाविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः प्रहीयन्ते । ततः प्रक्षीणक्लेशस्य प्रवृत्त्युदयादपवर्ग इति । सुगतैरप्युक्तम् । अनुसंधानकल्पनया रागद्वेषादिदोषैः प्रवृत्तितत्फलोदयपर्यन्तैर्विषयविभ्रमैश्च दूषितानि विज्ञानानि । तेषु च तत्त्वपरिभावनया निवृत्तेषु विभ्रमेषु विशुद्धविज्ञानचरमक्षणोदयो मोक्ष इति । तदेवमविद्यानिवृत्तौ मोक्षे प्रमाणजनितं तत्त्वज्ञानं विहाय कथमु‡पास्तिक्रिया मोक्षसाधनं कल्प्यत इति ।

* तदनन्तरापायादपवर्गइति पाठान्तरम् । † अनादिवृत्तमिथ्याज्ञानमिति ३ पु० ।
‡ उपासिक्रियेति २ पु० ।

ननु प्रदर्शितमन्यदन्यदेव मिथ्याज्ञाननिवर्त्तकं तत्त्वज्ञानम् । तथाहि । द्वादशपदार्थेषु तत्त्वपरिभावनाजनितेन सम्यग्ज्ञानेनाविद्या निवर्त्त्यते । पूर्वोपचितानि च कर्माणि तत्त्वपरिभावनाजनित * संक्लेशेन तत्प्रकर्षजनितेनानन्देन वर्त्तमानस्य चोपभोगेन निवर्त्त्यन्ते । ततश्च कैवल्यमिति नैयायिकैरुक्तम् । वैशेषिकैरपि पदार्थषट्कपरिभावनाजनितेन तत्त्वज्ञानेनेश्वराभिध्यानानुगृहीतेन मिथ्याज्ञानं † निवर्त्यते । ततो रागादयः क्रमेण परिहीयन्ते । ततश्च पूर्वोपचितदुरितानां ‡ पदार्थपरिभावनापरिक्लेशफलानामत्यन्तोच्छेदः सुकृतानां च तत्त्वदर्शनवैमल्यानन्देन निवृत्तिस्ततः कैवल्यमिति दर्शितम् । योगास्तु प्रतिपेदिरे । असंप्रज्ञातसमाधिजनितेन प्रकृतिपुरुषविवेकज्ञानेन पुरुषाकारमात्रपर्य्यवसितेनाविद्यास्मितारागद्वेषाभिनिवेशेषु क्षीयमाणेषु पूर्वोपचितकर्मसु § चैकभविकेन न्यायेन क्षीयमाणेष्वपवृज्यत इति । सुगतैः प्रतिपन्नम् । क्षणिकस्वलक्षणदुःखमार्गोऽसत्यभावनाजनितविशुद्धज्ञानलक्षणचरमक्षणोदयेन हीयमानेषु स्थायित्वाकार्यत्वप्रवृत्तिविषयविभ्रमेषु सन्तानो-
९० १० च्छेदो मोक्ष इति । तदेवं भिन्नविज्ञानसाध्यो मोक्ष इति तत्राह मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानादिति ।

ननु प्रदर्शिततत्त्वदर्शनेष्वपि मिथ्याज्ञाने प्रतिपन्नेषु ब्रह्मविज्ञानमेव किमिति निवर्त्तकं गृह्यत इति चोदयति कथं गम्यत इति । भेददर्शनस्य मिथ्याज्ञानविलसितत्वेन तत्प्रतिपन्नेऽद्वितीय ‖ ब्रह्मात्मदर्शनेनैव तन्निवृत्तिर्न्न यथोक्तभेददर्शनैरिति परिहरति इन्द्रो मायाभिरित्यादिना । नन्वद्वितीयब्रह्मात्मैकत्वपरं न शास्त्रम् । तच्च तात्पर्याभावात्किन्तु जीवविलक्षणे प्रमाणान्तराविरुद्धे ब्रह्मणि शास्त्रप्रतिपन्ने संपदादिविषयाणितादात्म्यवाक्यानीति पूर्व-
१–२४ पक्षयति अथापि स्यादित्यारभ्याचोत्तरमित्यत प्राक्तनेन ग्रन्थेन । ग्रन्थ ¶ स्तु स्पष्टार्थः । तचेदं वक्तव्यम् किं प्रमाणान्तरविरोधात्संपादादिपरः पदसमन्वयः किं वाऽर्थे तात्पर्याभावादिति । न तावत्प्रमाणान्तरविरोधस्तयोस्तदगो-

* समिति नास्ति ३ पु० । † निवर्त्तत इति २ पु० । ‡ चकारोऽत्राधिकः १ पु० ।
§ एकविवेकेनन्यायेनेति १ पु० शोधितम्, एकभविकन्यायेनेति ३ पु० ।
‖ ब्रह्मात्मैकत्वेति १ पु० । ¶ तुशब्दो नास्ति १ पु० ।

चरत्वात् । भेदावभासेऽपि * विम्बप्रतिविम्बन्यायावतारात् । न च तात्पर्या-
भावादर्थपरताभाव इत्याह संपदादिरूपे हीत्यादिना । ९०

तथाहि तत्त्वमसीति नवकृत्वोभ्यस्तस्यानेन जीवेनात्मनानुप्रविश्ये-
त्येकात्म्यसिद्धयेऽर्थवादो गृह्यते अथ येऽन्यथातो † विदुर ऽन्यराजानस्ते
क्षय्यलोका भवन्तीति भेददर्शनं निन्द्यते । तथाहं ब्रह्मास्मीत्यस्य स एष इह
प्रविष्ट इत्यादयर्थवादः । अथ यो ऽन्यां देवतामुपास्ते ऽन्यो सावऽन्यो ऽह-
मित्यादिभेदप्रतिषेधश्च तात्पर्यहेतु ‡ रुपादीयते । तथा एष त आत्मेति बहु-
कृत्वो ऽभ्यस्तस्य नान्यो ऽतो ऽस्ति द्रष्टेत्यादिभेदापवादेन तात्पर्यं §ज्ञाय-
ते । तथा स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्यस्य तत् सृष्ट्वा तदे-
वानुप्राविशदित्यादयर्थवादः । ‖ तथा उदरमन्तरं कुरुते ऽथ तस्य भयं भव-
तीति भेददर्शनापवादः । तथा एतमेव पुरुषं ब्रह्म ततमपश्यदित्यस्य स एत-
मेव सीमानं विदार्यैतया द्वारा प्रापद्यतेत्यर्थवादः ।

तदेवं सर्ववेदान्तेषु तच तचावस्याचयपर्युदासेन ब्रह्मात्मैकत्वं प्रति-
पाद्यमानं द्रष्टव्यम् । न हि भेददर्शनापवादेन ब्रह्मण एव जीवात्मना प्रवे-
शार्थवादेन च ब्रह्मात्मैकत्वं तच तचाभ्यस्यावस्थाचयसंबन्धविरोधनिराकर-
णेन च प्रतिपाद्यमानं तात्पर्यहीनमिति युक्तं वक्तुमिति । किंच । अविद्यानि-
वृत्तिर्ब्रह्मात्मभावश्च विद्याफलं श्रूयते । न च संपदादिपरत्वे तदुपपद्यते अन्य-
स्यान्यत्मताविरोधादप्रमाणत्वाच्च । अतः फलवचनसामर्थ्यादपि ब्रह्मात्मैक-
त्वपरः पदसमन्वय इत्याह तदवगमनिमित्तं चेति । उपसंहरति तस्मान्न सं- ९१
पदादिवदिति ॥

अत्र कश्चिदाह ब्रह्मणो भिन्नाभिन्नो ऽयं जीवः । ततश्च ब्रह्मणो
नित्यमुक्तता जीवस्य च नित्यबद्धता व्यवस्थामश्नुते । अत्यन्ताभेदे तु ब्र-
ह्मैव स्वसंसाराय कथं जगदुत्पादयेत् । विरुद्धा च विशुद्धस्याऽशुद्धताप्रति-
पत्तिरिति । अत्रोच्यते । किमात्मिकेयं भिन्नाभिन्नता । न तावज्जातिव्यक्ति-
गुणगुणिकार्यकारणविशिष्टस्वरूपांऽशांशिभावनिबन्धना । जीवब्रह्मणोस्तेषा-

* तयोरिति अधिकमत्र १ पु० ।
‡ उपोपसर्गो नास्ति १ पु० ।
‖ तन्नोदरमिति श्रोधितम् १ पु० ।
† विदुरराजान इति ३ पु० ।
§ ज्ञाप्यते इति १ पु० ।

मभावात्प्रकारान्तरेण भेदाभेदादर्शनात् । ममैवांशो जीवलोक इतिस्मृतेरंशांशितेति चेन्न । निष्कलं निष्क्रियमितिश्रुतिविरोधात् । पादो ऽस्य सर्वा भूतानीति चाऽल्पतामाचविवक्षयोक्तम् । * वाक्यस्य ब्रह्मानन्त्यप्रतिपादनपरत्वात् । सांशत्वे च पटादिवदवयवारभ्यत्वप्रसङ्गात् । ननु स्वाभाविकी निरवयवता बुद्ध्यादुपाधिनिमित्तं सांशत्वमिति चेत् । न तावदुपाधिना विदार्य पृथक्क्रियते जीवः । खड्गधारासमाविद्वेष्याकाशे निरवयवे † भेदनादर्शनात् । उपाधिभिश्च स्वात्मानं विदार्य संसारमनुभावयता ब्रह्मणा स्वात्मनि व्यामोह एव प्रकटितः स्यात् । न चोपाधीनामन्यार्थतया सृष्टिः । अन्याभावात्प्रागभिन्नानां जीवानामन्यत्वाभावात् । द्रव्येणैव द्रव्यविदारणात्कर्माविद्यासंस्काराणां ‡ सतामप्यनुपाधित्वात् ॥

अथ भेदो ऽनिष्पन्नो ऽप्योपाधिको § व्यज्यत इति । तर्ह्यनादिरेव भेदः स च जातिव्यक्तिभावादिनिबन्धनो ब्रह्मणि जीवे च न स्यात् । नीलपीतादिवत्स्वाभाविको भेदो द्रव्यत्वादिजातिनिबन्धनश्चाभेद इति चेत्तर्हि तद्वदेवायमात्मा ब्रह्मेति सामानाधिकरण्यं न स्यात् तस्यैव प्रवेशश्रुतयश्च बाध्येरन् । एकत्वानुमानं च दर्शितम् । न निष्पन्नो नाप्यनादिः किंतूपाधिनिबन्धन ‖ स्तच्च प्रकाशते भेद इति चेत् । स तर्ह्यऽतस्मिंस्तदारोपो विभ्रम एव स्यात् । न च प्रत्यक्षादिभिर्जीवब्रह्मभेदो गृह्यत इत्युक्तम् । आगमश्च नान्यो ऽतो ऽस्ति द्रष्टेति भेदं ¶प्रतिषेधत्यभेदवचनानि तानीति चेन्नैवम् । एष त आत्मेत्यादिनाऽभेदं प्रतिपाद्यैव पुनर्भेदस्य तत्रैव प्रतिषेधात्कथं वा सत्यप्यभेदे ऽविद्याकामकर्मव्यवस्था । न ह्याकाशं घटेनावच्छिद्य तदन्तर्धूमादि ** समावेशने सत्याकाशस्य धूमादियोगः परिहर्तुं शक्यते । ननु भेदाद्व्यवस्थापि विद्यते । तर्हि ब्रह्मण्यऽविद्यादिसंसर्गो ऽसंसर्गश्चेतित्युभयमपि स्यात् । †† ननु विरुद्धमिदमापद्यते । को ऽयं भेदाभेदवादिनो विरोधो नाम ।

* गायत्री वा इदं सर्वं भूतमित्युपक्रम्य ब्रह्मणः पूर्णतापतिपादनाच्च भागभागिता· पुरुषसूक्ते उताऽमृतत्वस्येशान इति अनवच्छिन्नवस्तु प्रतिपत्तेर्नांशांशिभावविवक्षेत्यर्थ इति तत्त्व० ।

† भेदादर्शनादिति १ पु· ।

‡ सतामपि तत्रानुपाधित्वादिति १ पु· ।

§ विद्यत इति १ पु· ।

‖ भेदस्तत्र प्रकाशत इति चेदिति १, ३ पु· ।

¶ प्रतिषेधयतीति १ पु· ।

** समावेशे-इति १ पु· ।

†† ननुस्थाने तच्चेति शोधितम् १ पु· ।

एकोपाधावेकस्यैव भावाभावोपगमादभेदो नाभावः किन्त्वैक्यमेव धर्मान्तरमिति चेत् । तथाप्यहं मनुष्यो द्वौ चन्द्रावित्यादावैक्यभेदयोर्भेदैक्यज्ञानाभ्यां बाधदर्शनाद्भेदाभेदौ विरुद्धावेकत्राभ्युपगच्छता किमिति * भावाभावावविद्यादीनां ब्रह्मणि नाभ्युपगम्येयाताम् ।

किंच । प्रत्येकं देहपटावयवेषु मलसंसृष्टेषु मलिनः पटोऽहं मलिन इति वाऽवयविनि मलसंसर्गनिश्चयात्फलवचनानां च वर्त्तमानापदेशिनां प्रत्यक्षविरुद्धतयार्थवादत्वात् सत्यपि भेदे जीवसमवायिभिर्मलैरवयवि ब्रह्म मलभूयिष्ठमेवेति निश्चीयेत । किंच । ब्रह्मण्यऽविद्यादिमलसंसर्गमप्यसहमानो ऽतिभक्तिविलसितान्तःकरणः कथं तैरेव मलैरभेदं सहते । निरवद्यश्रुतिविरोधान्नाभेद इति चेन्न । † सर्वात्मत्वश्रुतेः । अत एव पापीयानयं पक्ष इत्युक्तम् । ननूपाधिभेदेन व्यवस्थाप्यते न । अर्थतो ‡ भेदनाभावे परमार्थसत्यस्य संसारसंबन्धस्याभेदे सति व्यवस्थानुपपत्तेः । मिथ्याभेदेन तु मिथ्यासंसारव्यवस्था युज्यते बिम्बप्रतिबिम्बयोस्तथादर्शनात् । किंच । ब्रह्म सर्वाज्ञं जीवानात्मत्वेन पश्यति § वा न वा । न चेत्सर्वज्ञताहानिः । पश्यति चेत्स्वात्मन्येव संसारं पश्येत् । ननु भेदमपि पश्यति । तर्हि ‖ ब्रह्माऽऽत्मनि संसारं पश्यति न पश्यतीति स्यात् । किंच । सत्यपि भेददर्शने मिथ्यातादात्म्याभिमानाद्दृढधर्मानात्मनि पश्यति किमु वक्तव्यं सत्येनाभेदाभिमानेनेति । न ह्यभेदा ¶ परोक्षे सति भेदोऽप्यपरोक्षो ऽवभासमानो दृष्टः ।

किं च । ** सर्वं च सत्यतयैवात्मन्यऽपरोक्षतया सर्वाधारस्य सर्वज्ञस्य पश्यतो ब्रह्मणः सर्वसंसारसंबन्धः स्यात् । किंच । ज्ञानध्यानसमाधिभिरेकस्मिन्नुपाधावेकस्य जीवस्य प्रलीयमाने ऽपि न किंचित्प्रयोजनमस्ति परिशिष्टसर्वोपाधितद्धर्मसंबन्धप्रतिभासनात् । न च सर्वोपाधिविनिर्मोक्षः केनचिदपि कर्तुं शक्यते । मम पुनरेकोपाधिपरित्यागेन बिम्बभूतब्रह्मात्मता-

* भावाभावविद्येति २, ३ पु· ।
† सर्वात्मेति श्रुतेरिति १ पु· ।
‡ भेदाभावे इति १ पु· ।
§ वाशब्दो ऽयं नास्ति १ पु· ।
‖ ब्रह्म स्वात्मनिति १, २ पु· ।
¶ अपरोक्षेऽप्रतीति १ पु· ।
** सर्वाधारस्य सर्वज्ञस्य सर्वं सत्यतयेति १ पु· ।

परोक्षावभासिनो ऽपि प्रतिबिम्बश्यामत्वादिभिरिव * जीवसंसारैर्न संबन्धः मिथ्यात्वेन तत्त्वज्ञानप्रतिहतत्वात् । स्वप्नादिवच्च तत्त्वज्ञानेन सर्वोपाधिविनिर्मोक्षश्च युज्यते वामदेवादिमुक्त्येदानीं संसारानुपलब्धिः स्यादिति चेत् । एकैकमुक्तावप्यनन्तैरेव युगैरनन्तानां जीवानां मुक्तत्वात्तुल्येदानीं† संसारानुपलब्धिः । इदानीं संसारदर्शनं तु परस्यापि तुल्यम् अनुपपत्तिश्चावयोः समाना । ‡ अतो निरुपाधिकचैतन्ये त्वयि ब्रह्मणि प्रत्यक्षे बन्धावभासे सोपाधिकचैतन्येषु तव मुक्तताभासो विभ्रमः । तद्विषयश्रुत्यादीनां प्रत्यक्षविरुद्धतयार्थवादत्वात् § निरुपाधिक‖चैतन्यप्रतिभासे त्वयि सोपाधिकचैतन्यभेदानां कल्पितत्वात् कस्यैकस्य बन्धमोक्षाविति तव तावत्संदेहो न जायते सोपाधिकचैतन्येषु मुक्तताभ्रमात् तद्वचनानां चार्थवादत्वात् । ¶ एवं प्रत्येकमात्मनो न संदेहः । तस्मात्सर्वसङ्करवादिनो विभ्रमो ऽयम ऽस्मत्पक्षे व्यवस्थेति ।

तदेवं ब्रह्मावगमे विधिमन्तरेणैवापरोक्षफलपर्यन्ते साध्यान्तराभावान्न
९१ ६ विधिसंबन्ध इत्याह तचैवं सतीति । किं तर्हि प्रमाणफलमिति तदाह अतो मिथ्यैवेति । ननु प्रयोजनाभावाद् ब्रह्म न विधिकर्म भवत्याहोस्वित्कारकत्वाभावादिति । प्रयोजनं तु साध्यो मोक्षो वक्ष्यते न कारकत्वाभावाद्विदिक्रियाकारकत्वादित्याह ननु ** च विदिक्रियाकर्मेति भाष्यमेव परिहारः । ननु विदिक्रियाकर्मत्वाभावे शास्त्रजन्यज्ञानं व्यावर्त्तकत्वाभावान्न शास्त्रगम्यं
१२ ब्रह्मेति चोदयति सोऽयं शान्तिकर्मणीति । स्वयंप्रकाशमानतया स्वविषयप्र-

* जीवस्य जीवसंसारैरिति १ पु· । † अनुपलब्धिरिति १ पु· ।

‡ अत इति नास्ति २, ३ पु०· निरुपाधिकेति· अनवच्छिन्नचैतन्यं ब्रह्माऽविद्यातत्कार्यानुरागाद्बुद्धम्· तथात्रोपाधिभेदाज्जीवरूपं भिन्नत्वेन व्यवह्रियते, यथोदभाजने भेदेन सूर्यप्रतिबिम्बम्· ततश्चाविद्यानिवृत्तिमन्तरेण वामदेवादेर्मुक्त्यनुपपत्तेः साऽप्रयाणीया· न च स ऽस्थातुं शक्यते, इदानीन्तनसंसारोलम्भविरोधात्· तथा च वामदेवादेर्मुक्तिप्रतिभासो विभ्रम इत्यर्थ इति तत्त्व० ।

§ चैतन्यावभासइति १ पु· ।

‖ निरुपाधिकेति· प्रष्टुस्तव तावदज्ञत्वम्, त्वदज्ञानपरिकल्पिताश्चेतरे चैतन्यभेदाः, स्वप्नद्रष्टुरविद्यापरिकल्पितनरान्तरवत्· ततश्च मुक्त्यवस्थानुपायिनस्तवैव बन्धो नेतरेषामित्यर्थ इति तत्त्व० ।

¶ एवमिति· अन्यशब्देन किं निरुपाधिकं चैतन्यं विवक्षितं, मुताऽवच्छिन्नम्· आद्ये तस्यैकत्वाच्च संशीतिः, द्वितीये त्वदवच्छिन्नस्य तत्संशयादेश्च चिदविद्यामूलत्वाच्च मुक्त्यादिसंदेह इत्यर्थ इति तत्त्व० ।

** चशब्दो नास्ति १, ३ पु· ।

काशजननानपेक्षस्यापि ब्रह्मणः शास्त्रजन्यज्ञानाकारतया तद्व्यावर्तकस्याविद्यादिदोषनिवृत्तिफलवत्तया शास्त्रप्रमेयं ब्रह्मेति प्रतिपादयति ।

अत्रोत्तरं नाविद्याकल्पिते * त्यादि । नन्वनधिगतार्थप्रकाशनमन्तरेण न प्रमाणव्यापारस्य फलवत्तेत्यत्राह शास्त्रं हि सो ऽयमित्यादीति । ननु तत्र वा † विषयाधिगममन्तरेण कथं निवर्त्यमाचे प्रमाणव्यापार इत्यत आह तथाहीति । उक्तमेतत् ‡ देवदत्तैक्यस्याभिज्ञायामेव सिद्धत्वात्तदाकारेण प्रत्यभिज्ञावाक्याभ्यामुपजनितेन ज्ञानेनोपाधिपरिकल्पितभेदनिरासेन प्रत्यभिज्ञावाक्ययोः प्रामाण्यमिति । ननु ब्रह्मात्मनि विपर्ययाभावान्न तन्निरासेनापि प्रामाण्यमित्यत आह § तथा त्वंपदार्थो ऽपीति । केन तर्हि प्रमाणाकारेण विपर्यासनिरास इति तदाह तत्पदार्थैकतामुपगच्छन्निति । तत्त्वंपदाभ्यां ‖ लक्ष्यमाणं ब्रह्मात्मैकत्वं विज्ञानाकार इत्यर्थः । किं तर्हि तदाकारज्ञानेन निवर्त्यत इति तदाह अहमात्मकेदमंशोपाधिकृतेति । प्रमाणव्यापारो विषयाकारोदय एव प्रमीयमाणवस्तुसामर्थ्याद्विपर्यासनिरास इत्याह अर्थादिति ।

ननु ज्ञातृसमवायिनी ज्ञेयाकारा संवित्प्रमाणफलम् अनेन च विपर्यासो निरस्यते प्रकाशस्यैवाप्रकाशविरोधित्वान्नित्ये च चैतन्यप्रकाशे न प्रमाणफलमस्तीत्यत आह अवच्छिद्यमानानिदंप्रकाशः प्रमाणफलमिति । प्रमाणेन विषयीकृतार्थे ¶ गतं चैतन्यं प्रमाणफलमुच्यते न प्रमाणजन्यम् लोके ऽप्यजन्यत्वात् अतः प्रमातृप्रमाणप्रमेयावच्छिन्नं चैतन्यं प्रमाचादि निवर्तयति । ** अवच्छेदनिवृत्त्योः पूर्वोत्तरक्षणतया विरोधाभावादिति । ननु फलं चेन्निवर्तकं निवर्त्यानन्तर्भूतत्वात् । तर्हि फलं यावत्कालमेव स्थास्यतीति नेत्याह तदप्यवच्छेकविनाश इति । ननु शास्त्रजन्यज्ञानेन न प्रकाश्यते चेद् ब्रह्म ,, ६१

* इत्यादिनेति ३ पु० । † विषयाधिगतिमिति १ पु० ।
‡ देवदत्तैक्येति ३ पु० । § तथाच त्वमिति १ पु० ।
‖ उपलक्ष्यमाणब्रह्मेति १ पु० । ¶ गतचैतन्यमिति १ पु० ।

** ब्रह्माकारवृत्युत्पत्तेः पूर्वमवच्छेदः, उत्तरक्षणे निवृत्तिरित्यवच्छेदोपपत्तिरित्यर्थः । इदमत्र विवक्षितम्—यद्यपि वृत्तेर्जडत्वम्, चैतन्यस्य च सदनन्तत्वम्, तथाप्यागन्तुकवृत्तिविशिष्टस्य निवर्त्तकत्वं कथ्यते, नच विशिष्टस्यानिरूपणाच्च तस्य निवर्त्तकत्वमित्यपि शङ्क्यम्, वास्तवविशिष्टासम्भवेऽनुभवानुरोधेन समारोपितस्य विशिष्टस्येष्टत्वादितीति तत्त्व० ।

६१ २०. न शास्त्रगम्यं स्यादित्यत आह तेन * प्रमाणादिचतुष्टयस्येति । ननु किमित्यविद्यानिवृत्तिरेव प्रमाणफलमुच्यते विषयप्राकाश्यो ऽपि प्रमाणफलमुच्यतामिति तत्राह तथा चैवंविधस्येति । अविज्ञातं विजानतां यतो वाचो निवर्तन्त इत्यादि । ननु मनसैवानुद्रष्टव्यं तन्त्वौपनिषदं † पुरुषमिति ‡ ज्ञानक्रियाकर्मत्वमपि श्रूयते । नैष दोषः । वेदान्तजनितापरोक्षज्ञानस्याकारसमर्पकतया व्यावर्त्तकत्वं शास्त्रप्रमेयत्वं नाम ज्ञानजन्यप्रकाशातिशयशून्यत्वमविषय § तानामेति व्यवस्थोपपत्तेः नहि प्रकाशगुणे पुनः प्रकाशगुणान्तरोदय इति । नन्वविद्यानिवृत्तेरपि ज्ञानसाध्यत्वान्मोक्षस्यानित्यतेति नेत्याह एवं च नित्यमुक्तेति ।

६१ २३ ननु को ऽयं जीवो नाम यस्य स्वरूपं त्वंपदेन लक्ष्यमाणं ब्रह्मैव वाक्यार्थः संपद्यते । ब्रह्मैवा ‖ विद्याप्रतिबिम्बितमिति वदामः । ततश्च त्वंपदेनाशेषोपाधिनिराकरणेना ¶ ऽऽत्मस्वरूपमेव लक्ष्यमाणं तत्पदोपलक्ष्यं ब्रह्मैव पदद्वयसामर्थ्यात्संपद्यते । नचैतदुपाधिद्वयनिराकरणेन विशुद्धब्रह्मात्मज्ञानमेकेनैव पदेन लभ्यते विरोधानुत्पत्तेः । ननु भिन्नाभिन्नता वाक्यार्थः किन्न स्यात् । न । तथा सति शरीरेन्द्रियविशिष्टस्यैव त्वंपदार्थस्य ब्रह्मणो भिन्नाभिन्नत्वात्तथैव वाक्यार्थसिद्धेर्लक्षणया ब्रह्मात्मज्ञानेनाध्यासबाधो न स्या ** द्वर्त्तमानापदेशिनां फलवचनानां योग्यानुपलब्धि †† बाधात्सत्यपि तत्त्वज्ञानेन शास्त्राद्बन्धनिवृत्त्यवगमः भिन्नाभिन्ने च वाक्यार्थे न तत्त्वज्ञानाद्भेदांशनिवृत्तिः । तस्य ‡‡ स्वविषयानाशकत्वात्कर्मोपासनापरोक्षानुभवान्निवृत्तिकल्पना भिन्नाभिन्नविषयागमविरुद्धा आगमस्य सर्वकालं §§ भेदाभेदविषयत्वात्। यत्त्वभेदांशेन ज्ञानमोक्षादिव्यवहारो भेदांशेन कर्माविद्यादिव्यवहार इति व्यवस्था कल्प्यते । तन्मन्दचेतनोपच्छन्दनमात्रम् । तथाहि । यदि भेदाभेदाभ्यामंशी जीवो ऽभेदांशश्च ब्रह्मैव स्यात् तदा सावयवो जीवो जीवांशश्च ब्रह्मेति पण्डितम्मन्यस्य ||| विपरीतो ऽर्थः संपद्येत । भेदांशस्याब्रह्मत्वे ऽत्यन्तभेद एव

* प्रमात्रादीति १ पु० । † पुरुषमिति नास्ति २ पु० ।
‡ चशब्दोऽधिकः १ पु० । § तलः स्थाने त्वम् १ पु० ।
‖ अविद्यादीति १ पु० । ¶ आत्मेति २, ३ पु० ।
** वर्त्तमानेति० ज्ञानमात्रस्य शरीराद्यध्यासनिवर्त्तकत्वं न ब्रूमः किन्त्वन्यावस्थायामुत्पन्नज्ञानेनेति चेत्, तत्र प्रमाणाभावाज्जीवन्मुक्तिप्रतिपादकशास्त्रविरोधाच्चेत्यर्थ इति तत्त्व० ।
†† विरोधादिति ३ पु० । ‡‡ स्वविषयनाशकत्वादिति २, ३ पु० ।
§§ भेदाभेदेति १ पु० । ||| इष्टविपरीतार्थ इति १ पु० ।

स्यात् । न चांशद्वयसमुदायो जीवः अवस्तुत्वप्रसङ्गात् । न चामेदांश एव जीवः ब्रह्मण एव जीवत्वप्रसङ्गात् । न चोभावंशौ जीवद्वयप्रसङ्गात् । न च भेदांश एव जीवः * अत्यन्तभेदप्रसङ्गात् । तच्च तत्त्वज्ञानमोक्षादिव्यवहाराऽसिद्धिः । भेदाभेदांशावभिन्नौ जीव इति चेत् । यद्यभिन्नावेव जीवः तर्हि ब्रह्मैव जीव इति कुतो बन्धमोक्षव्यवहारव्यवस्था । अथ भेदाभेदांशौ † परस्परं भिन्नाभिन्नाविति मतम् ‡ नैवम् । भेदाद्यनवस्थाप्रसङ्गात् । § किंचांशिनो वांशद्वयसमुदायस्य वा ‖ परस्पराभिन्नांशद्वयस्य वा जीवत्वे ¶ ब्रह्मणो जीवांशत्वं परिहर्तुं न शक्यते । किंच । कस्यायं शास्त्रोपदेशः । न तावदभेदांशस्य । तस्य ब्रह्मस्वरूपतयोपदेशानपेक्षत्वात् । नापि भेदांशस्योपदेशः अहं ब्रह्मास्मीतिप्रतिपत्त्ययोगात् । न च भेदांशस्य पुनरभेदः सम्भवति विरोधाद् ब्रह्मण्येव संसारप्रसङ्गाच्च । कस्य चायमविद्यादोषः । न तावदभेदांशस्य ब्रह्मण्येव प्रसङ्गात् । नापि भेदांशस्य उपाधिजननात्प्राग् भेदाभावात् । स्वत एव ** भेदांशेऽंशिनि वा ††जीवे बन्धदोष इति चेत् । तद्विनाशे जीवनाशः स्यान्मोक्षे भेदांशविनाशादभेदांशस्य नित्यमुक्तत्वात्कस्यायं मोक्ष उप‡‡दिश्येत । तत्रापि भिन्नाभिन्नं चेत् ब्रह्म वेद ब्रह्मैव भवतीत्येवकारविरोधः संसारादविशेषश्च स्यात् ।

किंचायं सर्वत्र संकीर्णं वस्तु प्रतिपद्यमानः स्वर्गनरकबन्धमोक्षादीन् सांकर्येण व्यवस्थापयितुं प्रवृत्तः कथं व्युत्पन्नमतिषु नापचपेत । भेदेनैव सर्वं §§ व्यवस्थाप्यते चेत् । किमनेनाभेदेन बन्ध्यायमानेन । ‖‖ स्वप्रयुक्तकार्यानिमित्तेन कल्पितेन ¶¶ धर्मिप्रतियोगिव्यतिरेकेण भेदोपाधेरभावात् । उपाधिभे-

* अत्यन्तेति नास्ति १ पु० । † समासः १ पु० ।

‡ नैवमिति १ पु० "भेदाभेदनिर्वाहकभेदाभेदयोर्यौ भेदाभेदावास्थितौ तत्रापि भेदांशनिर्वाहकत्वेनाभेदांशनिर्वाहकत्वेन च भेदाभेदौ कल्प्यौ, एवमितरत्रापीति प्रमाणयुक्तिहीनमनन्तभेदादिकल्पनं स्यादित्यर्थः तयोर्भेदाभेदांशयोः [यौ] भेदाभेदौ तावपि किं भिन्नौ, उताऽभिन्नौ अथवा भिन्नाभिन्नौ० प्रथमद्वितीययोः पूर्वसमानयोगक्षेमत्वमित्यभिप्रेत्य तृतीयं दूषयति नैवमिती"ति तत्त्व० ।

§ किन्त्विति २ पु० । ‖ परस्परं भिन्नेति ३ पु० ।

¶ ब्रह्मणो जीवांशत्वं जीवस्य च सांशत्वं परिहर्तुमिति १ पु० ।

** भिन्नांशे-इति १ पु० । †† जीवे-इति नास्ति १, ३ पु० ।

‡‡ लद् १ पु० । §§ व्यवस्थाप्यत इति चेदिति ३ पु० ।

‖‖ स्वप्रयुक्तेत्यस्य स्थाने स्वप्रयुक्तेति शोधितं ३ पु० । ¶¶ धर्मेति २ पु० ।

देन भेदाभेदव्यवस्था त्वेकस्य भेदाभेदौ निवारयति*धर्मिप्रतियोगिभेदात् । शास्त्रं पुनर्न्नान्यो ऽतो ऽस्ति द्रष्टेति भेदोपमर्दैनैवाभेदं प्रतिपादयत्येष त आत्मेति च । † न च सत्त्वादिसामान्यद्वारेण जीवब्रह्मणोरभेदः अनुमानेनैव तत्सिद्धेः शास्त्रानपेक्षणात् । नन्वत्यन्ताभेदवादिनस्तवैव ‡ सर्वं संकीर्येत न मम भेदस्याभ्युपगमात् । नैवम् । कार्यप्रपञ्चस्यानिरूपितस्वभावतया यथावभासभेदादिव्यवस्थोपगमादात्मन एवाऽभेदोपगमात् । तस्मान्मन्द§-मतिसन्तोषमात्रप्रयोजनतया बहुवेणुभारपीडितचेतसाऽयं भेदाभेदपक्षः समादीयत इति । तस्मादेकमेव ब्रह्म देवदत्तवदुपाधिभेदनिमित्तविभागपरामर्शेन प्रत्यस्तमितविभागं वाक्येन प्रतिपाद्यत इति शोभनम् ॥

यस्य‖ तूत्पाद्यो मोक्ष इत्यादिनोत्तरस्य भाष्य ¶ समुदायस्य तात्पर्यमाह ननु ब्रह्मणो ऽपि कारकत्वसम्भवात्कथं न सम्भवति क्रियेत्याह कथमिति । तत्रेदं वक्तव्यम् किं यागादिवत्कर्तृसमवेतापूर्वादि **फलदानाय ज्ञानं विधीयते किं वा कर्मकारकातिशयफलायेति । न तावत् पूर्वः कल्पः । न कर्मब्रह्मविद्याफलयोर्वैलक्षण्यादित्यारभ्य निरस्तत्वात् । नाप्युत्तरः कल्प इत्याह यदि तावत्† दुत्पाद्यत इत्यादिना । अत्र केचिदाहुः । उत्पाद्यत्वे ऽपि मोक्षस्य ‡‡ नानित्यतादोषः । क्रियासाध्यस्यैवाऽनित्यत्वान्मोक्षस्य ज्ञानमात्रसाध्यत्वात् । न च ज्ञान§§ मात्रसाध्यस्यानित्यत्वं दृष्टम् । न चाविद्यानिवृत्तिमात्रमेव ज्ञानसाध्यम् ||| ब्रह्मभावस्यापि साध्यत्वात् । ननु जीवस्य ब्रह्मभावः स्वाभाविको न साधनीयः । न । तादात्म्यस्यैव स्वाभाविकत्वात् । ¶¶भेदतावन्मात्रविरोधस्तादात्म्यं नाम । तद्भावस्तु ब्रह्मतावन्मात्रता***जीवस्य ज्ञानेन साध्यते

* धर्मिप्रतियोगिनोर्भेदादिति विग्रहः· एकस्मिन्धर्मिप्रतियोगिभावासम्भवाद्भिन्नयोर्भेदस्थितिरिति भाव इत्यर्थ इति तत्त्व० ।

† कनककटकादिषु सामान्याकारेणाभिन्नत्वं चेत्येतल्लोकप्रसिद्धम्, तेन दृष्टान्तेन प्रत्यग्ब्रह्मणोस्तादृक्त्वसिद्धेः शास्त्रवैयर्थ्यमित्यर्थ इति तत्त्व० । ‡ सर्वमिति नास्ति २ पु· ।

§ मात्रसन्तोषेति विपरीतं ३ पु· । ‖ यस्य रूपाद्यो मोक्ष इति २ पु· ।

¶ समुदायेति नास्ति ३ पु· । ** फलोदयायेति १ पु· ।

†† उत्पाद्य इत्यादिनेति १ पु· । ‡‡ नानिवर्त्यतादोष इति २ पु· ।

§§ मात्रेति नास्ति १ पु· । ||| ब्रह्मभावसाध्यत्वादिति १ पु· ।

¶¶ भेदसहाभेदस्तादात्म्यम्, भेदासहाभेदस्तादृभाव इति भेद इति तत्त्व० ।

*** तावदिति अधिकमत्र ३ पु· ।

तरति शोकमात्मवित् ब्रह्म वेद ब्रह्मैव भवतीत्युभयविधश्रुतिसामर्थ्यादिति । अत्रोच्यते । किं शास्त्र * जनितसम्यग्ज्ञानेन तादात्म्यविषयेण मोक्षः साध्यते किं † वा तद्भावविषयेणेति । न तावत्तद्भावविषयेण तस्य नित्यसिद्धताप्रसङ्गात् । यदि तादात्म्यविषयेण । तत्रापि निवृत्ते तादात्म्ये तद्भावः साध्यते न वेति वक्तव्यम् । निवृत्ते चेत् ज्ञानस्य स्वविषयविनाशकत्वं दर्शितं स्यात् । ज्ञाननिवर्त्यत्वे चाज्ञानमेव तादात्म्य ‡ मापद्येत । अनिवृत्ते तु तादात्म्ये तद्भावो नोपपद्यते । न हि तावन्मात्रता तद्विरोधिता च युगपत्§स्यातामिति ।

किंच । तादात्म्यनिवृत्तिरेव तद्भावः किं वान्य इति वक्तव्यम् । ‖ निवृत्तिरेव चेत् अविद्यानिवृत्तिरेव मोक्ष इत्युक्तं स्यात् । अन्यश्चेत् तर्हि तादात्म्यं तद्भावं चान्तरेण रूपान्तरं वक्तव्यम् । न हि जीवब्रह्मणोस्तादात्म्यतद्भावव्यतिरेकेणात्यन्तभेदादन्यद्रूपान्तरं शक्यते निरूपयितुम् । कश्चायं तद्भावो नाम । न तावद् ब्रह्मैव असाध्यत्वात् । अत एव न जीवोऽपि । न च तृतीयश्चेतनोऽचेतनो वा तद्भावो निरूपयितुं शक्यः । ¶ किंच । यदि तादात्म्यलक्षणातिरेकविशिष्टश्चेज्जीवः तद्विनाशे विनाशमियात् । निष्कृष्टतादात्म्यश्चेज्जीवः ब्रह्ममात्रमेव स्यात् अत्यन्तभेदानङ्गीकारात् । तस्मात्तत्तादात्म्यस्य तद्भावः शास्त्रयुक्तिहीनः । न च तत्त्वंपदाभ्यां लक्ष्यमाणयोर्जीवब्रह्मणोस्तादात्म्यं प्रतीयते । भिन्नोपाधिपरामर्शेनैकस्य वस्तुनो लक्ष्यमाणत्वात् । नचैकेनैव पदेन तस्य लक्षणायां भेदावभासो**निवर्तते फलश्रुतयश्चाविद्यानिवृत्तौ योजयितुं शक्यन्ते । न च ज्ञानसाध्यस्य नित्यतालाभः । संस्कारस्य तज्जन्यस्याऽनित्यतादर्शनात् । न च संस्कारस्यापि क्रियाजन्यता । संस्कारान्तरवत्स्मृतिहेतुत्वायोगात् अन्वयव्यतिरेकविरोधाच्च । अब्रह्मज्ञानस्य साध्यत्वात् क्रियाजन्यतेति चेत् । न । क्रियायामनैकान्तिकत्वात् । तस्मादभूत्वाभवनमेवानित्यताहेतुरिति ।

तर्हि तृतीयं फलं क्रियासाध्यमिष्यतामिति शङ्कते अथानित्यत्वप- ६२
रिहारायेति । तचेदं वक्तव्यम् किं ब्रह्म प्रत्यगात्मभूतं व्यतिरिक्तं वा । व्यतिरेके ऽपि सर्वगतं वा प्रदेशान्तरवर्त्ति वा ब्रह्मेति । तादात्म्ये दूषणमाह

* जनितविज्ञानेनेति १ पु० । † वाशब्दो नास्ति १ पु० । ‡ उपपद्येतेति १ पु० ।
§ स्यादितीति १ पु० । ‖ निवृत्तिरेवत्येतावन्मात्रम् २,३ मोक्ष इति १ पु० ।
¶ किं चेति १ पु० । ** निवर्त्यते इति १ पु० ।

१२ ५ तदपि नेति । व्यतिरेके सर्वगतं चेत्संयोगव्यतिरिक्तप्राप्यभावात्संयोगो नित्यसिद्ध * इत्याह व्यतिरेकेऽपीति । प्रदेशवर्तित्वं शङ्कते † अथ विकारावर्तिन इति । तच्च वक्तव्यम् ‡ किं विकारसंस्पर्शपरिहाराय प्रदेशवर्तित्वमुच्यते किं वा शास्त्रसामर्थ्यादिति । शास्त्रं पुनः सर्वगतत्वमेव दर्शयति न च सर्वगतत्वे ऽपि विकारसंस्पर्श इत्याह न विकारदेशे ऽपीति । अथ सर्वगतत्वस्यौपचारिकत्वात्प्रदेशविशेषवर्त्येव ब्रह्मेति शङ्कते अथ विकारावर्त्येवेति । न । मध्यमपरिमाणस्य वस्तुनः पृथिव्यादिवत्सावयवत्वात् । दूषणविभागज्ञानाय विकल्पयति सा तर्हि तत्प्राप्तिरिति । प्रथमे कल्पे दूषणमाह तदा स्वरूप § नाश इति । कथं तच्च तावज्जीवस्य ब्रह्मभावः । ब्रह्मैव वा जीवो वा न संभवति असाध्यत्वात् । नापि जीवब्रह्मभ्यामारभ्यमाणं द्रव्यान्तरम् । विनाशित्वप्रसङ्गात्सर्वगतस्य ब्रह्मणो ‖ ऽवयवत्वायोगात् । नापि जीवब्रह्मणोस्तादात्म्यं नाम कश्चित्संबन्धः । ¶ भिन्नद्रव्ययोः संयोगातिरिक्तसंबन्धाभावात् । नापि जीवे ऽणुपरिमाणे ऽवस्थिते ब्रह्मस्वरूपापत्तिविरोधात् । अनवस्थिते ** च परिमाणे द्रव्यस्वरूपनाश इति । द्वितीये †† ऽपि कल्पे दूषणमाह संयोगस्येति । ननु शास्त्रसामर्थ्यादपुनरावृत्तौ कथं तर्केण पुनरावृत्तिः साध्यते ‡‡ तत्राह न च पुनरावृत्तिश्रुतिरिति । यथा §§ श्रुतार्थे ऽप्राप्तप्रतिषेधात् । नावर्तिष्यत इति कल्पनायाः कृतकत्वानुमानविरोधात् । तस्यैव च स्वरूपेणावस्थाने स स्वराड् भवतीतिश्रुतेरनेकेश्वरप्रसङ्गात् । तस्मान्न प्रदेशान्तरवर्तिब्रह्मप्राप्तिरिति ।

ननु तयोर्द्वमाऽऽमायन्नमृतत्वमेतीति श्रूयते । तर्हि प्रतीकालम्बनानामपि मूर्द्धन्यनाड्यैवामानवपुरुषाद्गच्छतामृतत्वं स्यात् अविशेषश्रवणात् । ननु स एतान् ब्रह्म गमयतीत्यर्चिरादिना गच्छतां ब्रह्मप्राप्तिः श्रूयते । न । कार्यब्रह्मविषयत्वात् । ननु ब्रह्मशब्दार्थस्य मुख्यत्वात्परमेव

* इत्यत आहेति १ पु० । † अथ विकारेतीति ३ पु० । ‡ किमिति नास्ति २ पु० ।
§ नाशेति नास्ति १ पु० । ‖ अवयवित्वायोगादिति १ पु० ।
¶ मद एव घटत्वोपगमाच्च दृष्टान्तसिद्धिरित्यर्थः, न च संयोग एव संबन्धः, तस्य स्वरूपेणावस्थाने इत्यत्र निरसिष्यमाणत्वादित्यर्थ इति तत्त्व० । ** चशब्दो नास्ति १ पु० ।
†† अपिशब्दो नास्ति २ पु० । ‡‡ अत्राह न चेतीति ३ पु० ।
§§ श्रुतेरर्थे–इति व्यासः १ पु० ।

ब्रह्म गम्यते । न । यदि तावद्रूढ्या व्यवहारे प्रयोगान्मुख्यता ऽभिधीयते । तर्हि कार्यब्रह्मण्यपि रूढ एवायं शब्दो भवति । अथावयवार्थानुगमेनार्थमुख्यता ऽभिधीयते । * नैवम् । एकस्य शब्दस्य युगपद्रूढियोगवृत्तिद्वयोपादानायोगात्प्रयोगमुख्यत्वे कार्यब्रह्मैव गम्यते । किंच । स एतान् ब्रह्मलोकान् गमयतीति ब्रह्मलोकशब्दाद्बहुवचनान्तेषु परापरवतो वसन्तीत्यधिकरणाधिकर्त्तव्यताश्रवणात् । तस्मिन्वसन्ति शाश्वतीः समा इति कालपरिच्छेदश्रवणात् तृतीयस्यामितो दिवीति संख्यादुशब्दयोः श्रवणात् तथैरंमदीयस्य सरसः अश्वत्थस्य सोमसवनस्याऽपराजितायाश्च पुरो † हिरण्मयस्य च वेश्मनो ‡ ऽरस्य ण्यस्य चार्णवस्य पर्यङ्कादेश्च § भोग्यवस्तुभेदस्य श्रवणात्प्रजापतेः सभां वेश्म ‖ प्रपद्य इति प्रजापतिसभावेश्मनां श्रवणाच्च कार्यब्रह्मैवार्चिरादिना गम्यत इति प्रतीयते । न च ब्रह्मैव लोक इति समासः । ब्रह्मलोकशब्दस्य सत्यलोके रूढत्वात् । यौगिकत्वे ऽपि तच्च प्रथमतरबुद्धिहेतुत्वाद् ब्रह्मणि लोकशब्दविरोधात् । न चैतेषां कार्यब्रह्मलिङ्गानामपबाधया ब्रह्मशब्दस्यैकस्य प्रयोगमुख्यत्वातिरिक्तमर्थमुख्यत्वमप्युपादातुं युक्तम् । प्रजापतिशब्दस्य कार्यब्रह्मणि रूढत्वाल्लोकशब्दस्य च भोगभूमिविशेषवाचित्वात् ।

किंच पञ्चाग्निविदामपि परब्रह्मप्राप्तिरस्मिन्पक्षे स्यात् । न च स ¶ एनान्ब्रह्म गमयतीत्येतच्छब्दः पञ्चाग्निविदऽतिरिक्तान् परामृशतीति युक्तम् । पञ्चाग्निविदामेव प्राधान्येन प्रकृतत्वात्तेषामनिर्दिष्टफलत्वप्रसङ्गात् । किञ्च गायत्री शाण्डिल्यषोडशकलोपकोशलवैश्वानरभूमदहरपर्यङ्कविद्यानामेकरूपैव ब्रह्मप्राप्तिः फलमाहो स्विदुपचयापचयरूपमिति वक्तव्यम् । एकरूपफलत्वे गुणोपचयापचयादुपासनोपचयापचयौ व्यर्थौ स्याताम् । न ह्यग्निहोत्रादयनुष्ठानोपचयात् फलोपचयो न जायते । अथ फलोपचयापचयावपीष्येयाताम् । तर्हि न विकारासंस्पर्शब्रह्मप्राप्तिः । तच्च तदभावात् । किंच । वैश्वानरोपासनाफलं ** त्रैलोक्यापत्तिरिष्यते वा न वेति वक्तव्यम् । इष्यते चेत् विकारासंस्पृष्टे ब्रह्मणि कथं त्रैलोक्यात्मताफल प्राप्तिः । न चेदिष्यते

* मैवमिति १ पु० । † हिरण्ययस्येति २ पु० । ‡ अन्यस्यार्णवस्येति ३ पु० ।
§ भोगवस्त्विति १ पु० । ‖ प्रपद्यत इति ४, २ पु० ।
¶ एतान्ब्रह्मेति १ पु० । ** त्रैलोक्यशरीरापत्तिरिति १ पु० ।

तं यथायथोपासत इतिश्रुतिविरोधः स्यात् । किं च । पिचादिसंकल्पे विकारासंसृष्टे ब्रह्मण्युपभोगः स्यान्न वेति वक्तव्यम् । न चेत्पिचादि* कसंकल्पश्रुतिविरोधः । स्याच्चेद्विकारावर्त्ति ब्रह्म पिचादियुक्तं स्यात् । किंच । विकारावर्त्तिब्रह्मप्राप्तो † ऽपि ब्रह्मैवेति मनसैतान्कामान् पश्यन् रमते तेन पितृलोकेन संपन्नो महीयत इति ब्रह्मण एव साधनैर्भोगो दर्शितः स्यात् । ततश्चाप्रकामताविरोधः स्वार्थप्रयुक्ता च सृष्टिः स्यात् ।

किञ्च । विकारावर्त्तिब्रह्मप्राप्तस्य लिङ्गशरीरमस्ति वा न वेति वक्तव्यम् । अस्ति चेत्कलाप्रलयश्रुतिर्बाध्येत । न चेल्लिङ्गशरीरम् । मनसैतान्कामानिति श्रुतिर्बाध्येत । किं च । ‡ तच्च लिङ्गशरीरविलये निमित्तं वक्तव्यम् । विद्यैव चेदुत् क्रान्तिकाले स्यात् । तदारम्भककर्मक्षयात् । अमानवकरस्पर्शश्चेत् । विद्युत्स्थाने स्यात् । न चोपरिष्टात्कला § विलयननिमित्तं श्रूयते । किं च । औपाधिकजीवपक्षे न जीवस्य विकारावर्त्तिब्रह्मगमनं सम्भवति । निरवयवावच्छेदस्य घटाकाशस्येवोद्धृत्य नयनायोगात् । उद्धरणे च ब्रह्मशून्योऽयं प्रदेशः स्यात् । उपरिष्टाच्च ‖ ब्रह्मोपचयं प्राप्नुयात् । तस्मादुपाधिगमनादात्मनि गमनविभ्रमः । ननूपाधेरपि गमनं न सम्भवति तदुपादानस्य ब्रह्मणश्चलनशून्यत्वात् । न हि मृदि निश्चलायां घटस्य गमनमस्तीति । एवं तर्हि स्वप्नगमनवन्मायाविजृम्भितो गमनादिप्रतिभासः । ननु न पिचादिसंकल्पे ब्रह्मणि भोगोऽभिधीयते किन्तु यावांस्तच्च भोगः तस्य नित्यानन्दप्राप्तावन्तर्भावादैश्वर्यभेदः कथ्यत इति । न । एकस्य ब्रह्मशब्दस्य यौगिकार्थभङ्गभयाद्रूढीनां फलश्रुतीनामुपचारकल्पनायोगाच्छास्त्रान्त्यपादवैफल्यप्रसङ्गाच्च । तस्मात्प्रदेशान्तरवर्त्तिब्रह्मप्राप्तये क्रियाविधानमित्यनुपपन्नम् ॥

१३ संस्कारपक्षे दूषणमाह ¶ संस्कार्यत्वमपीति । दोषापनयनेन विद्यमानस्य ब्रह्मभावस्याऽभिव्यक्तिः संस्कार इत्याशङ्कते अथ विद्यमानस्येति । तच्च वक्तव्यम् किमात्माश्रयक्रियया दोषा ** पनयः किं वान्याश्रययेति । न तावदा-

* कप्रत्ययो नास्ति १ पु० ।
‡ तस्येति ३ पु० ।
‖ ब्रह्मोपचयः—इति ३ पु० ।
** अपनयनम् १ पु० ।
† अपिकारो नास्ति १ पु० ।
§ विलयनिमित्तमिति ३ पु० ।
¶ संस्कार्यत्वमिति० दोषापनयेनेति ३ पु० ।

त्मनो निरवयवस्य परिस्पन्दपरिणामावित्याह नात्मनः क्रियारहितत्वा- ९२
दिति । * न चाश्रयक्रियया क्रियावद्द्रव्यैः संयोगा † भावात्तचातिशयायो-
गादित्याह प्रत्ययरूपत्वादिति । ननु मन्त्रदेवताभिध्यानाद्विषनिरासवदीश्वरा-
भिध्यानाद्विषापनयः स्यादिति चोदयति नन्वीश्वराभिध्यानादिति । उच्यत
इत्यादि परिहारः स्पष्टार्थः । ननु शास्त्रीयकर्मभिरात्मनो गुणाधानलक्षणः
संस्कारः श्रूयत इति नेत्याह न च स्नानादिक्रिययेवेति । अयमर्थः । यः
साधनानि शरीरेन्द्रियमनांसि प्रेरयति स कर्त्ता भोक्ता ‡ संस्कार्यश्च । स च
चैतन्यसंवलितोऽहङ्कारः विज्ञानं यज्ञं तनुत इति श्रुतेः । स चाऽऽसंसार-
समाप्तेरविच्छिन्नो वर्त्तत इति भोगश्च संभवति तच च धर्माधर्मातिशय
उत्पद्यते न निर्विकारात्मनि । ततस्तस्य न § संस्कार्यत्वमुपपद्यत इति ।
तस्मान्न संस्कार्य इत्यादि । नन्वित्यतः प्राक्तनः स्पष्टार्थः । ननु ज्ञानस्यापीत्या-
रभ्येदमपरमित्यतः प्राक्तनौ चोद्यपरिहारौ पूर्वोक्तावप्यवसरप्राप्तत्वात्पुनरि-
हानीतौ स्पष्टार्थौ ।

जन्याजन्यफलत्वेन क्रियाज्ञानयोर्वैलक्षण्यमुक्तम् । इदानीं पुरुषेच्छाप्रय-
त्नसाध्या हि क्रिया तदनपेक्षमात्मज्ञानमिति कारणतो ‖ वैलक्षण्यमाह इद-
मपरं वैलक्षण्यमिति । चोदनाजन्यं पुरुषेच्छाप्रयत्नजन्यं न भवति ज्ञानम-
मिच्छतोऽपि दुर्गन्धादिज्ञानदर्शनादित्यर्थः । ¶ ननु शब्दजन्य**स्य ज्ञानस्य
विषयजन्यत्वाभावान्न वस्तुपरतन्त्रता ततश्चोदनाजन्यत्वमिति शङ्कते अथा-
पीति । तत्रापि विधिजन्यपुरुषेच्छाप्रयत्ननिरपेक्षमेव ††लिङादिजन्यमेवेति
परिहरति तत्रापीति ॥ ९३

ननु संयोगविभागप्रचयातिरेकिणी केयं क्रिया नाम । ननु चलतीति ‡‡
§§ प्रत्यक्षमेवैतच्चलनम् । सत्यम् तदपि संयोगाविभागालम्बनमेव चलनम् । ननु

* नवान्याश्रयया क्रिययेव द्रव्यैरिति १ पु० । † अभावे–इति १ पु० ।
‡ चकारोऽत्राधिकः १ पु० § नशब्दो नास्ति १ पु० । ‖ वैलक्षण्यमाहेति १ पु० ।
¶ शब्दलिङ्गादिकमऽवर्त्तमानबोधजनकमपि दृष्टम्, न च तत्र विषयस्य जनककोटावन्त-
र्भावः, वर्तमानस्यैव जनकत्वसंभवात्· तथाच न प्रत्यक्षेतरस्य विषयजन्यत्वमित्यर्थ इति तत्त्व० ।
** समासः १ पु० । †† लिङ्गादीति २ पु० ।
‡‡ प्रत्यक्षमेव तत्सत्यमिति २ पु०, प्रत्यक्षमेतत्सत्यमिति ३ पु० ।
§§ तदपि चलतीति प्रत्यक्षं संयोगविभागालम्बनमिति संबन्धः, पादसंयोगविभागयोश्चल-
तीतिबुद्धिदर्शनात्, इतरथा चाऽदर्शनात्संयोगाद्यालम्बनमित्यर्थ इति तत्त्व० ।

स्थाणावपि श्येनसंयोगविभागवति चलतीति प्रसङ्गः । न । * स्वदेशसंयोगविभागालम्बनत्वात्प्रत्ययस्य स्थाणोश्च श्येनदेशत्वाभावात् । सर्वस्य चाकाशदेशत्वादिति चेन्न । बहलान्धकारावृते नभस्यऽप्रतीयमाने ऽपि खद्योते चलनबुद्धिदर्शनात् । न च देशमप्रतीत्य तत्संयोगविभागाः प्रतीयन्त इति । तस्मात्संयोगविभागातिरिक्तक्रियालम्बनश्चलतीति प्रत्ययः । यस्तु स्वदेशसंयोगविभागाभ्यां क्रियामनुमिमीते । कथम् । † द्रव्यजनितौ संयोगविभागौ स्वाश्रये कादाचित्कातिशयपुरस्सरौ व्यवस्थितद्रव्ये कादाचित्कत्वात्संयोगविभागजन्यकार्यवदिति । तस्य मकरादिषु जलप्रवाहाधारेषु स्थिराचलावयवेषु स्वदेशजलसंयोगविभागयोः सतोरपि तेषु क्रियाज्ञानाभावादनैकान्तिकता हेतोरिति । किंच । संयोगविभागहेतुरतिशयः क्रियाभिधानीयः स्थिरादेव द्रव्यादुत्पद्यते ऽतिशयान्तरवतो वा पूर्वस्मिन्नऽव्यवस्थितद्रव्यादेव क्रियाजन्मवत्तत एव संयोगविभागजन्म स्यादित्य ‡ नैकान्तिकः । अतिशयान्तरकल्पनायामनवस्थापातः । पादाश्रयस्य कर्मणो हि स्वाश्रयासंबन्धिभूतलसमवायिपादसंयोगारम्भवत्प्रयत्नवदात्मपादसंयोगस्यापि भूपादसंयोगारम्भसिद्धेर्न पादाश्रयकर्मातिशयावकाशः । तस्मात्प्रत्यक्षः क्रियाप्रत्ययः । ननु क्षणिकस्य कर्मणः कथमिन्द्रियसंयोगज्ञानलक्षणक्षणद्वयावस्थानम् । शब्दविद्युदादिवदित्यविरोधः । तस्मादस्ति क्रिया ज्ञानविलक्षणेति । किंचेति स्पष्टार्थः । § किंच वेदान्तविज्ञानसुनिश्चितार्था इति निश्चितार्थविषयतत्त्वज्ञानमेव मोक्षसाधन ‖ मुक्तम् तच्च प्रमाणजन्यत्वे संभवतीत्याह एवं सम्यग्ज्ञानत्वोपपत्तेरिति । दार्ष्टान्तिकमाह एवं सतीति ।

* स्वस्याश्रयभूतो यो देशः स स्वदेशस्तेन संयोगविभागावालम्बनं यस्य प्रत्ययस्य स स्वदेशसंयोगविभागालम्बनस्तस्य भावस्तत्त्वम्, तस्मादित्यर्थ इति तत्त्व० ।

† द्रव्येति, संयोगविभागवत्त्वेन सिद्धसाधनत्वम्, तदर्थं कादाचित्केति· एतावत्युक्ते पूर्वक्षणातिशयपुरस्सरत्वेन सिद्धत्वम्, तदर्थं स्वाश्रयेति· नचात्मगतसंयोगविभागयोस्तद्गताद्रष्टजन्यतया सिद्धसाध्यत्वमित्यपि शङ्क्यम्, अव्यवहितपूर्वक्षणोत्पन्नत्वस्य कादाचित्कत्वादितिशब्देन विवक्षितत्वादित्यर्थः, व्यवस्थितद्रव्यनिष्ठत्वे सति कादाचित्कत्वादित्यर्थः· कादाचित्कत्वादित्युक्ते कारणेन सहोत्पन्नधर्मेषु व्यभिचारः, तदर्थं व्यवस्थितेति· एतावत्युक्ते गगनमहत्त्वादौ व्यभिचारः, तद्व्युदासार्थम् कादाचित्कत्वादिति इति तत्त्व० ।

‡ अनैकान्तिकतेति १ पु· ।

§ किंच, वेदान्तविज्ञान इति· सुनिश्चितार्थविषयं तत्त्वेति २ पु· ।

‖ इतिरत्राधिकः १ पु· ।

ननु ब्रह्मज्ञाने विधयः श्रूयन्ते तत्कथं तर्केण* निरस्यन्त इति तत्राह अतः श्रूयमाणा अपीति । नन्वनुष्ठेयाभावाद्विधेरभावे शब्दस्य वैयर्थ्यं स्यादिति नेत्याह† अतोऽर्थवादतयैवेति । नन्वर्थवादान्तरवत्स्तावकत्वे विधिपदमर्थशून्यं स्यादिति नेत्याह तदुन्मुखीकरणादिति । तथा च श्रवणं नामेत्यादिना यैः श्रवणादिभिरात्मा‡ संस्तूयते तान्विभज्य दर्शयति । ननु श्रवणादिभिः किं श्रेयः क्रियते येनोत्कर्षवद्विरेतैर्विषयीकरणा§ दात्मा स्तुतः स्यादिति तदाह अतो वाक्यार्थे स्थैर्यादिति । ननु विधेयस्यैवार्थवादसंबन्धः स्तुतेः प्रवृत्तिफलत्वान्न सिद्धवस्तुन इत्याक्षिपति कः पुनरिति । ‖ फलप्रशंसाया अपि प्रवृत्त्युपयोगित्वात् फलभूतात्मप्रशंसाया अपि श्रवणादिप्रवृत्त्युपयोगित्वमुपपद्यत इत्यभिप्रेत्याह इदमत्र प्रस्तुतमित्यादि¶ । ग्रन्थस्तु स्पष्टार्थः ।

९३

ननु सम्यग्दर्शनस्य फलरूपत्वात् प्रमाणाधीनत्वाच्चाविधेयतेति युक्ता तस्यार्थवादता श्रवणादयस्तु क्रियारूपत्वात्सम्यग्दर्शनस्य दृष्टादृष्टोपकारितया विधेया एवेति तदाह एतच्च सर्वं प्रथमसूत्रेणैवेति । मननिदिध्यासनोपबृंहितस्य श्रवणस्य सम्यग्दर्शनाय विधेयत्वमङ्गीकृत्य प्रथमसूत्रं प्रवृत्तमित्यर्थः । विधीनामपि सतां स्तावकत्वमुक्तम् इदानीं शब्दस्यार्थान्तरमाह अपि च नैवायमिति । ननु मा भूवञ् ज्ञानविधयः उपासनाविधिस्तु श्रूयत इति नेत्याह तेना**त्मेत्येवोपासीतेत्यादि । सर्वत्रैवकारविशेषणश्रवणादहमिति-स्वभावप्राप्तप्रत्ययावृत्त्यनुवादेन विषयविशेषः††प्रतिपाद्य इति अतो हानोपादानशून्य इत्युपसंहरति भाष्यं विवृणोति तस्यायमर्थ इति ।

९४

उक्तमेतन्मोक्षफलविधेयज्ञानब्रह्मस्वरूपनिरूपणायां विधिनिरपेक्षमेव ब्रह्मणि वेदान्ताः प्रमाणमिति द्वितीयेन वर्णकेन प्रथमेन च वर्णकेन प्रमाणान्तरानपेक्षं‡‡ब्रह्मणि प्रामाण्यमुक्तम् इदानीं तदुभयवर्णकार्थमाक्षिप्य समाधत्ते

* एकवचनं २ पु० । † अत इति नास्ति २ पु० ।
‡ स्तूयत इति श्रूयत इति च पाठान्तरे । § आत्मनः स्तवः स्यादिति १, ३ पु० ।
‖ फले प्रशस्ते तत्साधने प्रवृत्तौन्मुख्यं दृश्यते· तथाचात्मनोऽपि फलत्वात्प्रशस्तत्वेन तत्स्तवे तदवगतिहेतुश्रवणादौ प्रवृत्तिसंभवात्सिद्धस्यार्थवादसंबन्धो युक्त इत्यर्थ इति तत्त्व० ।
¶ आदिशब्दो नास्ति १ पु० । ** आत्मन्येवोपासीतेति १ पु० ।
†† प्रतिपाद्यत इति १ ३, पु० । ‡‡ ब्रह्मणः प्रामाण्यमिति १ पु० ।

१६ यदपि * केचिदाहुरित्यादिना । कथम् । किमिहंप्रत्ययावसेय एवात्मा वेदान्तैः प्रतिपाद्यते † [किं वा तद्व्यतिरिक्तः । यद्याद्यः] तदा तस्य ‡ क्रियायामङ्गत्वाद्विधिवाक्यैर्वेदान्तानामेकवाक्यता स्यात् । अथ तद्व्यतिरिक्तः प्रतिपाद्यते तदा किंचिदुद्दिश्य किंचित्प्रतिपाद्यमित्युद्देशनाभावात्प्रतिपादनं न स्यात् । तस्यापि चेतनत्वे कर्माङ्गतैव स्यात् । तस्मात्क्रियायामेव वेदान्ताः प्रमाणम् । तथा च कर्मण्येव कृत्स्नस्य वेदस्य प्रामाण्यमापस्तम्बो दर्शयति चैवित्तवृद्धानां तु वेदाः प्रमाणमिति निष्ठा तत्र यानि श्रूयन्ते व्रीहियवपश्वाज्यपयःकपालपत्नीसंबन्ध्यान्युच्चैर्नीचैः कार्यमिति तैर्विरुद्ध आचारो ऽप्रमाणमिति मन्यन्ते इति । तथाचाग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतमिति ।

तत्रोत्तरमाह तन्नो § पनिषदस्येत्यादिना । अहंप्रत्ययावसेयाद्विशिष्टात्मनो ऽन्य एव क्रियाकारकसंसर्गशून्यः न स कर्माङ्गतया वेदान्तानां विधिशेषतां नयतीत्यर्थः । नन्वसावपि चेतनश्चेदहंप्रत्ययगम्यतया कर्माङ्गमिति नेत्याह न स केनचिदिति । ननु शास्त्रगम्यस्यापि कर्माङ्गता किं न स्यादित्यत आह न हि प्रमाणान्तरासिद्ध इति । अधिकारिणं कर्तारं च प्रमाणान्तरसिद्धावनूद्य ‖ विधिमात्रप्रतिपादनादन्यथा वाक्यभेदादिति । ननु चेतनः प्रमाणान्तरागम्यत्वाच्छास्त्रेणापि न गम्यत इति नेत्याह न ¶ च स न प्रतीयत इति । ननु सर्वो वेदो धर्मे विनियुक्तः स्मृतिकारैरित्युक्तमत आह अत एवोपनिषद**त्वेति । ††औपनिषद इति तद्धितप्रत्ययो ब्रह्मणि वेदान्तान्विनियुङ्क्ते ‡‡ तथा सर्वे वेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृदितिश्रुतिस्मृतिभ्यां ब्रह्मपरा वेदान्ता इति गम्यते । ननु पदसमन्वयाद् ब्रह्मणि प्रतीयमाने ऽपि प्रत्यक्षादिभिर्बाधान्मिथ्याज्ञानमिति नेत्याह

२५ नैष प्रतीयमानो ऽपीति । §§ ननूद्देश्याभावादुपादेयं प्रमातुं न शक्यत इत्यत

* केचिदित्यादिनेति १ पु० । † [] एतच्चिह्नखलान्तर्गतः पाठः २, ३ पु० नास्ति ।
‡ क्रियाङ्गत्वादिति १ पु० । § औपनिषदस्य पुरुषस्येत्यादिनेति १ पु० ।
‖ विधिमात्रं प्रतिपाद्यते अन्यथेति १ पु० । ¶ चशब्दोनास्ति २ पु० ।
** त्वमितीति १ पु० । †† औपनिषद इतीति १ पु० नास्ति ।
‡‡ कर्मकाण्डस्याप्यन्तःकरणशुद्धिद्वारा ज्ञानजननाद् ब्रह्मणि तात्पर्यस्य विवक्षितत्वमित्यर्थः० अत एवेतिटीकाया अयमर्थः-अत एवाऽनन्यविषयत्वादौपनिषदत्वविशेषणम्० ततः किमित्यत आह तच्चेति० वेदान्तानां विधिपरत्वे औपनिषदत्वनिर्देशो न स्यात्० न चौपनिषदा ऽनूद्यमानत्वाद्विशेषणोपपत्तिरिति शङ्क्यम्, मानान्तरागोचरत्वे ऽनूद्यमानत्वानुपपत्तेरित्यर्थ इति तत्त्व० ।
§§ नन्वुद्देश्येति १ पु० ।

आह इतश्च न शक्यत इति । नन्वहम्प्रत्ययगम्यमात्मानमुद्दिश्य तस्याऽद्वि- ९५
तीयनिरतिशयज्ञानानन्दब्रह्मात्मप्रतिपादनेप्यात्मनो वस्तुत्वान्निरालम्बनत्व-
मिति नेत्याह आत्मनश्चानिराकार्यत्वादित्यादिना । प्रकरणार्थमुपसंहरति
* अतो ऽवच्छेदत्रयशून्य इत्यादिना ।

ननु सूचकारवचनसामर्थ्यात्कृत्स्नो वेदः क्रियायामेव विनियुक्त इति चोदयति नन्वाम्नायस्येति । ननु पौरुषेयवचनात्कथमनादेर्वैदिकपदसमन्व-यस्यार्थनिर्णयः । उच्यते अनादिप्रवृत्तात्क्रियार्थतयैव प्रयोगप्रत्ययव्यवहारादे-तदवगम्यत इत्याह † तस्मात्प्रवृत्तिनिवृत्तीति । ननु ‡ शब्दश्रवणानन्तरं भूते ऽप्यर्थे § प्रतीतिरुपजायत इति नेत्याह न ततो वस्त्ववगम इति । नन्वऽ-ज्ञातब्रह्मावगमः कथं विभ्रमः स्यादिति तत्राह अत एव तन्मिथ्येति । शब्दसामर्थ्याभावात्संवादाभावाच्चेत्यर्थः । ननु भूतेऽप्यर्थे प्रमितिरुपजायते चेत्तेनैव तत्र शब्दसामर्थ्यं कल्प्यतामिति चोदयति कथं पुनरिति । परिह-रति शब्दस्य तत्रेति । ननु धूमस्य सामान्येन गृहीतसंबन्धस्य विशेषबो-धकत्ववत्क्रियार्थे गृहीतसंबन्धो ऽपि भूतमर्थं गमयेदिति नेत्याह न चागृ-हीतसामर्थ्य इति । ‖ तर्हि भूते ऽप्यर्थे संबन्धो गृह्यतामिति नेत्याह सा-मर्थ्यग्रहणं चेति । ननु भूते ऽप्यर्थे प्रवृत्त्या ज्ञानानुमानेन सामर्थ्यं गृह्यता-मिति नेत्याह तदभावे कुत इति । साध्ये प्रवृत्तिर्न भूतार्थे इति । उच्यते नैव सूचकारेत्यादिः परिहारः । कथम् । लौकिकन्यायमनुसरता वार्त्तिककारे- ,,
णेदं प्रतिपादितम् । अभिहितान्वय इति । पदेभ्यः प्रतिपन्नानां पदार्थानां संसृष्टपरस्परार्थावबोधनमभिहितान्वयो नाम । तत्र श्रोतुः प्रवृत्त्या विशि-ष्टसंसर्गज्ञानं शब्दकार्यत्वेनानुमाय शब्दसमुदायस्यार्थसमुदाये सामर्थ्यं प्रति-पद्यते । तत्र गामानय गां बधानेत्यादिप्रयोग ¶ भेदेष्वावापोद्वाराभ्यामानय-नतत्संसर्गव्यभिचारे ऽपि गोमाचान्वयाद्बन्धने ऽपि गोशब्दस्य गोमात्रे संब-न्धः प्रतिपद्यते नानयनतत्संसर्गयोर्व्यभिचारात् । एवं सर्वपदानां ** पदार्थ-स्वरूपमात्रेषु सामर्थ्यप्रतिपत्तेः संसर्गबोधः किंनिबन्धन इति वीक्षायामन-

* अत इत्यादिनेति ३ पु० । † तस्मादितीति ३ पु० । ‡ शब्देति नास्ति २ पु० ।
§ प्रमितिरिति १ पु० । ‖ साध्ये प्रवृत्तीति अत्र ह्यधिकं १ पु० ।
¶ भेदादावापोद्धाराभ्यामिति १ पु० । ** पदार्थेति नास्ति १ पु० ।

न्यथासिद्धान्वयव्यतिरेकाभ्यां शब्दावगतपदार्थनिबन्धन इति कल्प्यते । ततः पदेभ्यः पदार्थाः पदार्थेभ्यः संसर्ग इत्यभिहितान्वयवादिनां मतम् ।

तच्च यद्याऽक्रियाभिधायिनां पदानामालम्बनाभाव उच्यते किं वा प्रयोजनाभाव इति । यद्यालम्बनाभावस्तच्चाह पश्यतु भवान् देवदत्त गामभ्याजेति । अथ नालम्बनाभावः किं तु प्रयोजनाभाव इति वक्तव्यमित्याह प्रतीयते चेदिति । अथाऽक्रियार्थानां प्रयोजनाभाव इति न क्रियायाः प्रयोजनत्वाभावादित्याह प्रयोजनं चानन्तरमिति । अथ क्रियाद्वारमेव प्रयोजनमिति सत्यम् केषांचिदित्याह * अतस्तदर्थक्रियानुपयोग्य † र्थवादिनामिति । ननु सर्वं क्रियाद्वारमेव प्रयोजनमिति नेत्याह ब्रह्मात्मत्वावगतीति । अतो ऽभि ‡ हितानां पदार्थानां प्रयोजनवदर्थसंसृष्टस्वार्थप्रतिपादने ऽपि भूतवस्तु § प्रतिपादनं संभवतीति । अत्र प्राभाकरः प्रत्यवतिष्ठते कार्यसंसृष्टस्वार्थे पदसामर्थ्यं न पदार्थमात्र इत्याह स्यादेतदद्यपीति । ननु भूतार्थे सामर्थ्यं ‖ प्रमीयते चेद्भूतसंसर्गो ऽपि ¶ प्रमीयतामिति नेत्याह तथापि नाप्रतिपन्न इति । भूतार्थविशिष्टं ** कार्यमेव प्रमीयत इत्यर्थः । ननु संसृष्टस्वार्थे शब्दसामर्थ्यं चेद्भूते संसर्गः प्रमीयतामिति नेत्याह क्रियार्थतयैवेति । नियोगसंसृष्टतयैवेत्यर्थः । ननु कार्यसंसृष्टस्वार्थसामर्थ्ये ऽप्यन्वितस्वार्थस्य तच्चान्तर्भावात्तेनैव †† प्रयोजकेन भूते ऽपि संसर्गः प्रतीयतामिति नेत्याह न हि गोपदात्तदर्थ इति ॥

अयमाशयः । गामानय शुक्लां दण्डेनेति शब्दश्रवणानन्तरं श्रोतुर्गवानयने प्रवृत्तिमुपलभ्य गवानयनकर्तव्यताऽनेन शब्दात्प्रतिपन्नेति भूतार्थसंसृष्टे कार्ये शब्दसमुदायस्य सामर्थ्यं प्रतिपद्यते । पुनश्च गां ‡‡ [बधानाश्वमानयेति] प्रयोगान्तरेषु गोशब्दस्यान्वये कार्यसंसृष्टगवाकृतेरन्वयात्तदुद्धारे च कार्यं §§ संसृष्टगवाकृतेरेवोद्धारात्कार्यसंसृष्टायां गवि पदसामर्थ्यं कल्प्यते आनयनतत्संसर्गव्यभिचारे ऽपि कार्यसंसर्गाव्यभिचारात् । एवं च प्रथमावगतसंसर्गबुद्धि-

* अतस्तदर्थेतिति ३ पु· । † अर्थवाचिनामिति २ पु· ।
‡ अभिहितानां प्रयोजनपदार्थेति २ पु· । § ब्रह्मेति अत्राधिकं २ पु· ।
‖ प्रतीयत इति १ पु· । ¶ प्रतीयतामिति १ पु· । ** समासः २ पु· ।
†† प्रयोजकेन भूतेऽपीति नास्ति १ पु·, प्रयोजने भूतेऽपीति ३ पु· ।
‡‡ [] एतदन्तर्गतं नास्ति १ पु· । §§ कार्येति नास्ति २ पु· ।

* हेतुत्वानपवादाच्छब्दानां मध्ये च पदार्थतच्छक्तिव्यवधानकल्पनागौरव-. परिहारात् पदानामेव संसर्गप्रतिपादनसामर्थ्यकल्पना लाघवाच्च । तस्मात्कार्यसंसृष्टस्वार्थेषु शब्दसामर्थ्यमिति । तदेतन्निराचष्टे † विषम उपन्यास इति । ९६
‡ न हि प्रयोगभेदेषु कार्यसंसर्ग एव गवाकृतेर्नियमेन प्रतीयते किन्तु गुण § व्यक्तिक्रियाकारकसंसर्गश्च । तथाहि ‖ शुक्लां गामानयेत्युक्ते गुणकारकक्रियासम्बधाः प्रतीयन्ते क्रियाद्वारश्च कार्यसम्बधः । तचाव्यवहितसम्बन्धोपादानसिद्धये ऽन्यान्वितस्वार्थे सामर्थ्यं ¶ गृह्यते ** क्रमेण च गुणक्रियादिसंसर्गो यथायोगमवभासमानो यावदन्त्यपदोच्चारणसमाप्तिः पश्चात्संभूय सर्वैरेव पदैरेक†† प्रयोजनावच्छिन्नो महावाक्यार्थः‡‡ प्रमीयत इति नान्योन्यसंसर्गविरोधः । §§ |||| प्रमाणान्तरग्राह्यत्ववत्कार्यमपि ¶¶ प्रवृत्तिलिङ्गहेतुतया नियमेनान्वेति न सर्वशब्दसामर्थ्यविषयतया । तस्माल्लाघवादन्वितस्वार्थे सामर्थ्यमित्यन्यथानुवादप्रसङ्गात्कार्यान्वितस्वार्थेषु प्रमाणान्तरेण शब्दसामर्थ्यप्रतिपत्तौ शब्दादपि तावन्माचबोधे ऽनुवादः स्यात् । *** न च कार्येण सर्वपदार्थानामव्यवहितः सम्बन्धः येन तत्संसृष्टे सामर्थ्यं स्यात् । अस्ति शेषशेषिता ††† लक्षणसम्बन्ध इति । केयं शेषशेषिता नाम । न तावत्स्वस्वामिता चेतनविषयत्वात् तस्याः । नापि देवदत्तवदङ्गाङ्गिता‡‡‡ तदवयवत्वाभावादितरेषाम् । अथ साध्यतैव शेषिता । क्रियैव तर्हि गुणकारकसाध्येति सैव शेषिणी स्यात् । अथ परमसाध्यता स्वर्ग एव तर्हि शेषीति किमनेन कार्येणान्तर्गडुना । तस्माद्-

* हेतुकार्यसंसृष्टानपवादादिति १ पु· । † विषमशिष्ट उपन्यास इति १ पु· ।

‡ कार्यसंसृष्टस्वार्थे गोपदस्य संसर्गग्रहणात्तत्प्रतिपत्तिवद् गुणादिसंसर्गस्यापि प्रतिपत्तेः कथं सामर्थ्यग्रहणं कार्यसंसृष्ट एवेत्यर्थ इति तत्त्व० । § व्यक्तिस्थाने द्रव्येति १, ३ पु· ।

‖ शुक्लामिति गुणसंसर्गः, गामितिद्वितीयोविभक्त्यभिहितकर्मकारकेण संसर्गः, धात्वभिहितानयनक्रियया च संसर्गः, ततः कार्यसंसर्ग इत्यर्थ इति तत्त्व० ¶ गृह्णातीति ३ पु· ।

** यथायोगं योग्यतानुसारेणेत्यर्थः· यावदन्त्यपदोच्चारणपरिसमाप्तिः, तावत् क्रमेण गुणादिसंसर्गोऽवभासमान इति संबन्धः इति तत्त्व० । †† प्रयोजनारब्धिजो महावाक्यार्थ इति । कल्पितं १ पु· । ‡‡ प्रतीयत इति १ पु· । §§ प्रयोगान्तरेति ३ पु· ।

|||| प्रमाणान्तरप्रतिपन्ने शब्दप्रयोगान्यथानुपपत्त्या मानान्तरग्राह्यत्वस्यान्वयवत्कार्यस्यापि प्रवृत्तिहेतुत्वेनानुगति,र्न शक्तिविषयत्वेन· एतच्च परमतमाश्रित्योक्तमित्यर्थ इति तत्त्व० ।

¶¶ प्रवृत्तिहेतुतयेत्यत्र प्रवृत्तिलिङ्गहेतुतयेति शोधितं ३ पु· ऽपि ।

*** कार्यान्वितस्वार्थे सकलपदसामर्थ्यप्रतिपत्तावपि कालान्तरे तद्विशेषसिद्धिरित्येतदयुक्तम्, पदानां कार्येण संसर्गानिरूपणादित्यर्थ इति तत्त्व० । ††† तन्न नास्ति १ पु· ।

‡‡‡ तदवयवत्वात्तदिति १ पु· ।

गुणानां द्रव्यैरन्वयो द्रव्याणां विभक्त्यर्थसंसृष्टानां क्रिययान्वयस्तस्याश्च कार्येणेति व्यवधानादन्यान्वित * स्वार्थे सामर्थ्यं समञ्जसम् । किंच कार्यस्य कार्या † न्तरान्वयाभावादन्यान्वयो वक्तव्यः । धात्वर्थेन कार्येण कार्यस्यान्वय इति चेन्न ‡ । नियोगान्वयनिमित्तत्वाद्धात्वर्थं § कार्यतायाः । नियोगस्य तु धात्वर्थेन केवलेनान्वयो न कार्येण उत्तरकालत्वा ‖ त्तत्कार्यत्वस्य । ¶ अतोऽप्यन्यान्विते शब्दसामर्थ्यमिति ।

किंच । प्रमाणान्तरग्राह्यत्वमपि ** अर्थस्य शब्दसामर्थ्यविषयः ††स्याद्व्यभिचारात् । प्रयोगनिमित्ततयान्यथासिद्धिरन्वयस्येति चेत् कार्यत्वस्यापि प्रवृत्तिलिङ्गहेतुतयैवान्वयनियमो न सर्वपदसामर्थ्यविषयतयैवेति । किंच ‡‡ भूतसंसर्गेऽपि शाब्दी प्रमितिरनुभूयते लोके देवदत्तो भुक्त्वा निर्गत इत्यादौ । तच्च किं प्रतिवाक्यं कार्यपदमध्याह्रियताम् शब्दव्यतिरिक्तप्रमाणान्तरं वा कल्प्यताम् भ्रान्तित्वं वोपेयतामाहोस्विदन्यान्विते शब्दसामर्थ्यं प्रतिपद्य प्रामाण्यं वा व्यवस्थाप्यतामिति । अबाधितभूतार्थव्यवहारात्कल्पनालाघवाच्चागृहीत §§ प्रयोजनानां विप्रतिपन्न §§ प्रयोजनानां च सम्बन्धग्रहणादेर्वार्थप्रतिपत्तेर्निरूपणीयमेतत् । किंच । ‖‖ निघण्टुव्याकरणोपदेशैः कार्यपदार्थमप्रतिपद्यैवार्थान्तरसंसृष्टस्वार्थेष्वव्यभिचाराच्छब्दसामर्थ्यं ¶¶ प्रतीयते क्वचित्कार्यसंसर्गदर्शना *** दन्यत्रापि तदनुमीयते इति चेन्न †††। अन्यत्रान्यसंसर्गमात्रदर्शनेन कार्यसंसृष्टे ऽप्यन्यसंसर्गमात्रप्रयोजककल्पनोपपत्ते ‡‡‡ रदृष्टप्रयोजकोपसंहाराद् दृष्ट §§§ प्रयोजनस्यैव युक्तत्वात् । तस्मादन्यसंसृष्टस्वार्थे शब्दसामर्थ्यमिति सिद्धम् ।

* स्वार्थसामर्थ्यं सामञ्जसमिति ३ पु० । † अन्तरेति नास्ति १ पु० ।

‡ यागविषयनियोगे लिङादिना प्रतिपन्ने तस्य साक्षात्कृतिसाध्यत्वानुपपत्तेस्तत्र वाक्षक्त्वेन यागः कृतिसाध्यत्वं भजते तव च नियोगान्वयादर्वाग् यागस्य न कार्यत्वम्, न च तत्रियोगान्वयोत्तरकालीनमित्यपि शङ्क्यम्, परस्पराश्रयप्रसङ्गादित्यर्थ इति तत्त्व० ।

§ कार्यस्येति १ पु० । ‖ तदिति नास्ति १ पु० । ¶ इतोऽपीति ३ पु० ।

** अर्थस्येति नास्ति २ पु० । †† स्यात्-व्यभिचारेति १ पु० ।

‡‡ पदसंसर्गे-इति १ पु० । §§ प्रयोजकानामिति १, २ पु० ।

‖‖ निघण्टेति शोधितं १ पु० । ¶¶ प्रमीयत इति १ पु० ।

*** अत्रापीति १ पु० । ††† नकारो नास्ति १ पु० ।

‡‡‡ देवदत्तो भुक्त्वा निर्गत इत्यादावन्यत्र प्रमाणता दृष्टस्य प्रयोजकस्योपसंहरणाद्वरं गामानयेत्यत्र दृष्टार्थान्वितस्वार्थलक्षणस्य प्रयोजकत्वस्योररीकरणमुचितमित्यर्थ इति तत्त्व० ।

§§§ प्रयोजकस्यैवेति १, २ पु० ।

ननु गोपदस्याप्यानयनसंसर्गादिबहूर्थप्रतिपादकत्वादा*नयनपदस्यापि गोससंर्गाद्यनेकार्थाभिधायित्वात्पदाभ्यां प्रतिपाद्यसंसर्गनियमो न स्यात् । नैष दोषः । एकैकपदोच्चारणे यावानर्थः प्रतीयते † तावतामेव संसर्गः संभूयोच्चारणे ऽपि प्रतीयत इति नियमोपपत्तेः । नह्येकैकपदोच्चारणात्सर्वे संसर्गाः प्रतीयन्ते सहकारिपदान्तरनिमित्तत्वात्संसर्गप्रतीतेः । नन्वेवं पर्यायता स्यात् । तथाहि । गोपदस्याप्यानयनसंसृष्टं ‡ गोत्वमर्थः आनयेतिपदस्यापि गोसंसृष्टमानयनमर्थ इति । नैतत्सारम् । एकस्मात्पदाद्यावानर्थः प्रतीयते तावानेव चेत्पदान्तरादपि § प्रतीयात् स्यादेव पर्य्यायत्वम् । यदा पुनरितरेतरसंसृष्टौ पदार्थौ पदाभ्यां संभूय ‖ प्रतीयेते तदा कुतः पर्यायतेति । ननु गोपदोच्चारणे गवाकृतिरेव किमिति प्रतीयते न सामर्थ्यविषयभूतं सर्वमिति । अव्यभिचारात्संस्कारभूयस्त्वाद्गवाकृतेरितरेषां व्यभिचारादित्यनवद्यम् ।

नन्वभिहितेन पदार्थान्तरेण संसृष्टं गोत्वं प्रतिपादयति चेत् गोपदमानयति ¶ पदमप्यभिहितेनैव गोपदेन संसृष्टं स्वार्थं प्रतिपादयतीतीतरेतराश्रयता स्याद्गोत्वे ऽभिहिते तत्संसृष्टानयनाभिधानं तस्मिन्नभिहिते तत्संसृष्टगोत्वाभिधानमिति । नैष दोषः । क्रमेण पदेषूच्चार्यमाणेषु क्रमेणैव पदार्था अव्यभिचारिणः प्रतीयन्ते अन्त्यपदोच्चारणानन्तरं च संभूयैकस्मृतिगम्यानि पदान्यभिहितानेव पदार्थान् संसृष्टतया प्रतिपादयन्तीत्यभिहितेनैवान्वयोपपत्तेः पदार्थेषु च संसर्ग ** प्रतिपादकेषु तुल्यो चोद्यपरिहारौ । पदानामेव संसृष्टस्वार्थप्रतिपादनमन्विताभिधानं नाम । तदेवं कार्यमनपेक्ष्यैव भूते ऽप्यर्थे शब्दसामर्थ्यं सिद्धम् । तदेतत्सर्वमभिप्रेत्याह गोपदस्याभिधेयसम्बन्ध इत्यादिना । ९६

वेदे ऽपि कार्यमनपेक्ष्यैव संसर्गप्रमितिरङ्गीकृतेत्याह तथा च वषट्कर्तुरित्यादिना । ननु कर्तव्य इति पदं तचाप्य †† ध्याहृत्य तेनैकवाक्यत्वोपगमेन वाक्यार्थः ‡‡ प्रमीयत इति तचाह यस्तु कर्तव्य इति । ननु सूचकारेणैव ,, वृद्धव्यवहारानुसारिणा कार्यान्वितस्वार्थे शब्दसामर्थ्यं दर्शितम् । तद्भूतानां

* आनयतिपदस्यापीति १ पु० । † तावता संसर्ग इति १ पु० । ‡ समासः १ पु० ।
§ प्रतीयते इति ३ प्रतीयेत इति च १ पु० । ‖ प्रमीयेते इति १ पु० ।
¶ पदमव्यवहितेनैवेति ३ पु० । ** व्यासः १ पु० । †† अध्याह्रियते इति १ पु० ।
‡‡ प्रतीयते इति ३ पु० ।

९६ १३ क्रियार्थेनेति तच्चाह यत्तु तद्भूतानामित्यादि । भाष्यकारेणैव गुणगुण्यादीनां विशेषणविशेष्यादिभावेन समन्वयो दर्शित इत्यर्थः । ननु क्रियार्थेनेति-वचने कथं गुणगुण्यादिसामानाधिकरण्यसम्बध इत्यत आह क्रियार्थेनेति । तथाच भाष्यकारो ऽपीत्यारभ्यात एवेत्यतः प्राक्तनः स्पष्टार्थः । किंच । * जैमिनीयसूत्रवचनाद्वेदान्तानां कार्यनिष्ठत्वमिष्यते बादरायणसूत्रैर्ब्रह्मनि-ष्ठत्वमिष्यतामित्याह अत एव पूर्वेण तन्त्रेणेति । नन्वर्थभेदाभावे कथं पृथ-गारम्भ इति तच्च विभागमाह तच्च हि वेदस्येत्यारभ्य मुख्यः प्रदर्शित इत्य-न्तेन ग्रन्थेन ।

ननु प्रातिपदिकार्थानामेकरसब्रह्मपरतयान्वये ऽपि प्रथमाविभक्तेर-व्यभिचारात्तदर्थकारक † त्वान्वय इति नेत्याह तथाच भगवान् पाणिनिर-व्यतिरिक्त इति । तच्च लिङ्गसंख्याद्यस्त्वर्थात्प्रतीयमाना अपि प्रज्ञानघन एवाद्वितीयमित्यादिशब्दविरोधादनिर्वचनीया भविष्यन्तीत्यर्थः । ननु क्रि-यान्तर ‡ विरहे ऽपि प्रातिपदिकार्थान्वये ऽस्ति § भवन्तीपरः प्रयोक्तव्यः प्रथम ‖ पुरुषे ऽगम्यमान इति कात्यायनस्मरणादस्त्यर्थनिष्ठः समन्वय इति नेत्याह नास्तिक्रियाकर्तर्यवेति । नन्वस्तिक्रियामप्यपहाय समन्वयो न दृश्यत इति तच्चाह दृश्यन्ते च फलिता इति । ननु तचाप्यस्तिक्रियान्वयः कल्प्यतामिति नेत्याह नाचापि ये फलिता इति । कुच तर्हि वाक्यं पर्यव-सितमिति संबन्धमाच इत्याह अपित्वेते द्रुमा इति । कथं पुनरच क्रिया-मपहा¯ संबन्धमाचपर्यवसितं वेदान्तवाक्यमिति तदाह एवं सामान्यतः-सिद्धस्येति । उक्तं तावत्पदानामर्थान्तरसंसर्गमाचे सम्बन्धग्रहणात् क्रियाम-पहायाव्यतिरिक्तैकरसप्रातिपदिकार्थान्वयो युक्त ¶ इति । इदानीं क्रियान्व-याभिधानवादिनामपि भूते ऽर्थे निषेधवाक्यसमन्वयो वक्तव्य इत्याह किंच ब्राह्मणो न हन्तव्य इति । ननु ब्राह्मणहननाभावो ऽपि स्वयं क्रिया क्रियार्थो
० वेति नेत्याह **न क्रिया क्रियार्थो वेति । प्राप्तक्रियानिवृत्तिलक्षणत्वादित्यर्थः । ननु नेच्चेतोद्यन्तमादित्यमित्यादावीक्षणविरोधिनी †† नेच्च इति संकल्पक्रिया

* किमिति श्रत्राधिकमस्ति १ पु· । † त्वेति नास्ति १ पु· । ‡ रहिते इति ३ पु· ।
§ भवन्तीतिपर इति २ पु· । ‖ पुरुषे गम्ये इति १ पु· ।
¶ इतीति पदं नास्ति १ पु· । ** नहि क्रियेति ३ पु· । †† नेच्चे इतीति नास्ति १ पु· ।

विधीयते* एवं न हन्यामिति हननविरोधिनी संकल्पक्रियैव विधीयतामिति. नेत्याह व्रतशब्दसमन्वयादिति । अयमर्थः । संसृज्यमानाऽभावमेव † मुख्य- ९७
या वृत्त्या नञ्शब्दः प्रतिपादयति अनुष्ठेयाभिधायिव्रतशब्दोपक्रमात्संसृज्य-मानविरोधिनि क्रियान्तरे लक्षणया वर्त्तते । न तथेहापवादकं किंचिदस्ति येन नञ्शब्दस्य संसृज्यमानविरोधिसंकल्पक्रियायां लक्षणा स्यादिति । ननु संसृज्यमाना‡तदन्यतद्विरोधिनोरपि मुख्य एव नञ्शब्द इति नेत्याह § न नञ्समन्वयमात्रादिति ।

‖ अत्र प्राभाकरः प्रत्यवतिष्ठते । अत्र त्रयो ऽर्थाः प्रतीयन्ते ब्राह्मणो हननं प्रत्ययार्थश्चेति तत्र न ब्राह्मणेन प्रतिषेधान्वयः प्रत्यक्षविरोधात् । न च हननाभावं प्रतिपादयति तस्य प्रवृत्तत्वात् । नापि प्रत्ययार्थाभावम् फलप्रार्थनायाः प्रवृत्तिहेतोः कार्यबुद्धेर्वा प्रत्यक्षत्वात्ततः स्वभावप्राप्तहन्त्यर्थानुरागेण तद्विरोधिनी संकल्पक्रियैव नञा प्रतिपाद्यते । सा च प्रत्ययेन विधीयते । न चाभावो नाम भावान्तरव्यतिरेकेण कश्चिदस्ति येन तत्पर्यवसितं वाक्यं स्यात् । अतो भावान्तरविधिपरं वाक्यमिति तदेतदाह स्वभावत एव रागादिनिमित्तेत्यादिना ।

परिहरति ¶ न चैतदुक्तमिति । न चाभावस्तद्बुद्धिगोचरो निवर्त्तयितुं शक्यः न च भावान्तरमेवाभावस्तस्य सप्रतियोगिकत्वात् । ** अभाव एव †† च नञो मुख्यो ऽर्थः अर्थान्तरविरोधिनोरभावसम्बन्धिनोर्लक्षणयाऽपि ‡‡ प्रवृत्तिसंभवे रूढिकल्पनायोगात् । ननु नामधात्वर्थे §§ योगे तु नैव नञ् प्रतिषेधकः । ||| वदत्य ऽब्राह्मणाधर्मावन्यमात्रविरोधिनावित्यर्थान्तरे ऽपि नञ्शब्दो दर्शितः । सत्यम् तत्रापि मुख्यार्थान्वयेन लक्षणयार्थान्तरे ¶¶ ऽपि बुद्धिनियमो दर्शित इत्यविरोधः ।

आह प्राभाकरः हननाभावे नियोगः ततश्च नियोगपर्यवसितं वाक्यमिति तदाह ननु नञर्थं नियोग इति । दूषयति वार्तमेतदिति । भावार्थो ,,

* इत्येतदितीति अधिकम् १ पु· । † मुख्यवृत्त्येति १,२ पु· ।
‡ तच्छब्दोऽयं नास्ति १ पु· । § न नञः समन्वयादितीति २ पु·, न नञ्शब्देतीति ३ पु· ।
‖ तत्रेति १ पु·, अत्र प्राभाकराः प्रत्यवतिष्ठन्त इति ३ पु· । ¶ नचैतदुक्तमितीति १ पु· ।
** अभाव एव चो नञो मुख्योऽर्थ इति २ पु· । †† चशब्दो नास्ति ३ पु· ।
‡‡ प्रशब्दोनास्ति १ पु· । §§ योगी त्विति १ पु· । ||| वदन्तीति १,३ पु· ।
¶¶ अपिशब्दो नास्ति १ पु· ।

दध्यादिगुणो वा विधिविषयतया तन्निवृत्तिहेतुः न हननप्रागभावः अनादिसि-
९७ २३ द्धतया नियोगस्याननुष्ठेयत्वात् । दूषणान्तरमाह एवं प्रतिषेधस्येति । विधिप्रति-
षेधविभागव्यवहारो लौकिको न स्यादित्यर्थः । तस्मान्न कार्यपर्यवसितमित्यु-
पसंहरति तस्मात्संसृज्यमानेति ।

प्रकृत्यर्थस्य हननस्यैव नञ्शब्दान्वयमङ्गीकृत्य भावो ऽर्थान्तरं वा न विधेयमित्युक्तम् इदानीं प्रत्ययार्थ एव नञा सम्बध्यते प्रकृत्यर्थ-स्यान्योपसर्जनत्वात्प्रधानेन चेतरेषामन्वयादित्याह तच्च संसृज्यमानमिति । प्रत्यक्षादिव्यवहारेषु पुरुषान्तरनिबन्धनत्वाभावाद्विध्यादीनामसंभवे प्रतिपाद्यधर्म इत्यनुष्ठेयधात्वर्थधर्म इत्यर्थः । प्रतिषिध्यमानक्रियाफलेति निवर्त्यमानक्रियाफलेत्यर्थः । प्रत्ययार्थनिषेधे ऽपि प्रकृत्यर्थो * निवर्त्तत इति । प्रार्थ्यत इति प्रार्थना फलसाधनमित्यर्थः । ततश्च हननस्य यदिष्टसाधनत्वं प्रवर्त्तकम् तदेव प्रत्ययेनानूद्य प्रतिषिध्यते ब्राह्मणहननमिष्टसाधनं न भवतीति ।

ननु प्रत्यक्षमिष्टसाधनत्वं हननस्य नादृष्टाविरोधि † [दृष्टप्रयोजनस्येष्टश-ब्दत्वादिदमदृष्टाविरोधि] दृष्टसाधनं न भवतीत्यर्थः सर्वत्र चार्थानर्थसंयोगा-दनर्थादधिको ऽर्थः पुरुषार्थ इत्युच्यते अर्थाच्चाधिको ऽनर्थात् पुरुषार्थ इति तच्च पुरुषार्थसाधनं न भवति हननमित्युक्ते ऽनर्थादधिको ऽर्थो नास्तीत्युक्तं भवति ततश्चार्थादनर्थस्याधिक्यादर्थो ‡ दनर्थमित्युक्तम् । तदेवं प्रत्ययार्थप्रति-षेधस्याननुष्ठेयत्वं सिद्धमित्याह स च प्रागभाव इति । किं तर्ह्यनुष्ठेयमिति । § पुनः पुरुषार्थसाधनविभ्रमाद्रागाद्युद्बोधप्रसक्तौ तन्निमित्तप्रध्वंसो ऽनुष्ठेय इत्याह तत्संस्कारोद्बोध इति । स एव तर्हि वाक्येन विधीयतामिति नेत्याह स च यद्यपि साध्य इति । हननमिष्टं न भवत्यनिष्टं चेत्यवगतौ हननोद्बोधनिमित्त-निरोधस्यान्वयव्यतिरेकाभ्यामेवानुष्ठेयत्वान्न तच्च शब्दापेक्षेति निमित्तनिरोधक-र्त्तव्यतायां वाक्यस्यासामर्थ्यात्नेत्याह ‖ तत्प्रतिपादकेति । नन्वनिष्टसाधनविष-
८ यशब्दसामर्थ्यान्नेन्निमित्तनिरोधः सो ऽपि तर्हि शब्दार्थ इति नेत्याह यश्चा-

* निवर्त्यत इतीति १ पु० । † [] एतच्चक्षुःखलान्तर्गतः पाठः १ पु० नास्ति ।
‡ अर्थादनर्थसाधनमित्युक्तमिति १ पु० । § पुनरितिद्विः १ पु०, न पुनः पुरुषार्थेति ३ पु० ।
‖ तत्प्रतिपादक इतीति १ पु० ।

अङ्गीकरोति अथ पुनरिति । दूषयति भवतु तथापीति । तथाप्य- ९८ ११
व्यतिरेकसिद्धत्वाच्छब्दो नानुष्ठेयनियोगपर्यवसित इत्यर्थः ।
यथेनापूर्वं प्रतिपाद्यते तत्कथमननुष्ठेयं स्यात् । क्रतुदृष्टौतसम्ब
तावल्लोके तस्यादर्शनात् । ननु † स्वर्गकामिनो यागकर्त्त-
धनमन्तरेणानुपपन्ना । तच्च साधनत्वं क्षणभङ्गिनः कर्मणो
मन्तरेणानुपपन्नमिति ‡ श्रुतार्थापत्त्या ऽपूर्वं गम्यते तच्च शब्दस्य
। इति सोऽयम्बकबन्धः । शब्दाल्लौकिकसामर्थ्यानुसारेण क्रिया-
ुता चेत्पुनस्तत्सामर्थ्यलभ्ये ऽपूर्वे किमिति सम्बन्धो गृह्यते ।
ता क्रियाकर्त्तव्यता न तर्ह्यपूर्वमेव लभ्यत इति कुतः सम्ब-
नु यागकर्त्तव्यताऽभिहिताऽनुपपन्ना सा ऽपूर्वाभिधानमन्तरेणेति
ुपपन्नं शरीरेन्द्रियविषयसम्बन्धमन्तरेण स्वर्गस्यासिद्धेः । अतः
रादयभिधानं स्यादर्थापत्तिगम्यत्वान्न शब्दापेक्षेति चेत् अपूर्वेऽपि
स्माद्धात्वर्थकर्त्तव्यतालक्षणमिष्टसाधनमेव प्रत्ययार्थ इति । तदेवं
नुसारेणेत्यारभ्याचोत्तरमित्यतः प्राक्तनः स्पष्टार्थः ।

ात्पन्नं शाब्दज्ञानं तावन्न विधीयते तत्सन्तानश्च सुखानुभवकामस्य
ाभ्यामेव च स्वयंप्रवृत्ताभ्यामपरोक्षज्ञानमुत्पद्यते । तदेवमुत्पन्नाप-
यकृत्योत्तरमाह नावगतब्रह्मात्मभावस्येति । ननु कर्मादिनिमित्तः
थस्ततश्च संसारः किमपरोक्षज्ञानेनेत्यत आह न कर्मनिमित्त-
दिना सुखदुःखानुभव इत्यन्तेन ग्रन्थेन । उक्तमन्वयव्यतिरेकाभ्यां
ाविद्यानिवृत्तौ संसारनिवृत्तिरिति अथेदानीं तत्रैवागमप्रमाणमाह
श्रुतिस्मृतिवादा इति । ते हि ब्रह्मात्मैकत्वं साक्षादनुभवन्तोऽपि ९९
ासं दर्शयन्ति ।

परोक्षज्ञानान्मिथ्याज्ञाने निवृत्ते कुतो द्वैतदर्शनमिति तत्राह वैषयि-
। ननु कर्मणामपि निवृत्तत्वात् कथं तन्निमित्तं द्वैतदर्शनम् । नैष
स्य तावदेव चिरमिति ज्ञानव्यतिरिक्तावध्यन्तरकरणात्कंचित्कालं

ब्दो विलुप्तः १ पु० । + स्वर्गकामवाक्ये स्वर्गकामिनीति १ पु०, स्वर्गकामवाक्ये
योगेति ३ पु० । ‡ श्रुत्यर्थापत्त्येति १ पु० ।

शरीरेन्द्रियाद्यवस्थानकल्पनया तन्निमितकर्मावस्थानकल्पनात् । ननु सर्वकर्म क्षयश्रुतेः श्रुत्यर्थापत्तिः कथमेकदेशबाधिका स्यात् । अर्थापत्त्यनुदये श्रुतस्यै बाधप्रसङ्गादिति वदामः । तस्माच्छ्रुत्यादेरेव सामान्यविशेषभावेन व्यवस्थेति

नन्वपरोक्षज्ञानेन कृत्स्नाऽविद्यानिवृत्तौ कुतः कर्मणामवस्थानमिति उच्यते । तत्त्वज्ञानमेव स्वकारणेभ्यो जायमानं श्रुत्यवगतारब्धकर्मावस्थानाः तिबन्धात्तदपेक्षितद्वैतप्रतिभासनिवर्तनपाटवशून्यमितरकर्माविद्यारागादेर्निव र्तकं चोत्पद्यते । ननु ब्रह्मात्मानुभवद्वैतदर्शनयोः कुतः साहित्यमुच्यते । वयं साहित्यं ब्रूमः कदाचिदसंप्रज्ञातात्मैकत्वदर्शनं कदाचिदारब्धकर्मोपस्थ पितदोषनिमित्तद्वैतदर्शनं चेति । ननु नास्त्येव सशरीरस्यापरोक्षदर्शनम् । * आरम्भककर्मव्यतिरिक्तपूर्वोत्तरकर्मविनाशनिमित्तदर्शनाभ्युपमात् । न चाप रोक्षदर्शनमन्तरेण कृत्स्नकर्मविनाशः † प्रारब्धकर्मवतश्च तत्त्वदर्शनं स शरीर स्थैव संभवति व्यासादीनां च सशरीराणामेवापरोक्षदर्शनं श्रूयते ।

ननु तत्त्वदर्शिनोऽपि द्वैतदर्शनं चेन्नियोगानुष्ठानमपि स्यात् । न नियतदेशकालाधिकारकर्तृ ‡ त्वप्रतिपत्त्यधीनत्वादनुष्ठानस्य । तत्त्वदर्शिनस्त्वा रब्धकर्मनिमित्तदोषाद्भवस्य देशकालनियमाभावात् प्रारब्धानुष्ठानपरिसमाप्रिप र्यन्तमवस्थानायोगात्पुनःपुनस्तत्त्वदर्शनेनानुष्ठितकर्मणां बाधा § दनुष्ठाने प्रयो जनाभावात्प्रत्यवायस्य च तत्त्वदर्शनेनैव ‖ निवृत्तेः । ननु तत्त्वदर्शिनः शा स्त्रनियमाभावे यथेष्टाचरणं स्यात् । न । हिताहितप्राप्तिपरिहारप्रार्थनानि मित्तत्वादाचरणस्य स्वात्मन्येव निरतिशयानन्दमशेषानर्थनिवृत्तिं च साक्षाद नुभवतः साध्यपुरुषार्थप्रार्थनाभावात्कुतो यथेष्टाचरणप्रसङ्गः । कथं तर्हि शरी रयात्रेति चेत् । आरब्धकर्मदोषवशादित्युक्तम् । न चापूर्वकर्मोपचयस्याविद्या रागादिनिमित्तं संभवति निवृत्तत्वात् । आरब्धकर्मणां च स्वफलमाचहेतु त्वात् । तस्मात्तत्त्वदर्शिनोऽपि द्वैतदर्शनाभास उपपद्यत इति ।

ननु श्रवणज्ञानव्यतिरेकेण मननंनिदिध्यासनविधानात्साध्यान्तरम स्तीत्युक्तमिति नेत्याह मननंनिदिध्यासनयोश्चेति । उक्तं च मननंनिदिध्या

* आरम्भककार्येति ३ पु० । † आरब्धेति २ पु० । ‡ त्वप्रत्ययो नास्ति १, ३ पु० ।
§ अनुष्ठानप्रयोजनेति २ पु० । ‖ निवृत्तिरिति २ पु० ।

सनयोस्तत्त्वदर्शनहेतुत्वम् इदानीं वर्णकद्वयोक्तमर्थमनुवदति तदेवं सिद्धस्य ९९ २१
वस्तुन इत्यारभ्य अतो विधिनिरपेक्षं स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं
वेदान्तसमन्वयादित्यन्तेन ग्रन्थेन । अपिच विधिनिरपेक्षभूतवस्तुप्रतिपादने
शास्त्रारम्भभेदसिद्धिरित्याह एवं च सति पदानामिति । ननु प्रवर्त्तकविशेष
एव पृथक्शास्त्रारम्भनिमित्तमिति नेत्याह अन्यथा चेति । * नन्वन्यदेव भेद-
कमस्ति शरीरेन्द्रिय † निर्वर्त्त्यो विधिभेदाः कर्मकाण्डे निरूपिताः इह तु
केवलमानससाध्यो विधिर्निरूप्यत इति तदाह अथाप्यबहिःसाधन इति ।
दूषयति तथाप्यथातः परिशिष्टधर्मजिज्ञासेति । अधिकरणार्थमुपसंहरति
तदेवं ब्रह्मा ‡ त्मावगमात्प्रागिति । ब्रह्मात्मापरोक्षदर्शनादुत्तरकालमन्तः- १००
करणसंपिण्डितप्रमातृबाधात्प्रमेयसम्बन्धासिद्धेर्निवर्त्तत एव प्रमातृप्रमाणप्रमे-
यकर्तृकर्मकार्यभोक्तृभोग्यभोगलक्षणो व्यवहार इति ।

ननु भेदाभेदरूपत्वान्नाद्वैतदर्शनेन द्वैतदर्शन § बाधः न तर्हि देहात्म-
भावः सुखदुःखादिरपि बाध्येत भेदाभेदरूपत्वात् ‖ भेदाभेद इति च स्ववचन ¶
विरोधः पूर्वपक्षसिद्धान्तनियमाभावश्च सर्वसाङ्कर्यात् । ननु तवाप्यद्वैते सर्वसा-
ङ्कर्यं **समानम् । न । प्रपञ्चस्य यथादर्शनमेव भेदेन व्यवस्थितत्वात् ब्रह्मण एवा-
द्वितीयत्वात् । ननु दृश्यते भिन्नाभिन्नं वस्तु प्रत्यक्षेण । किं तत् प्रत्यक्षम् । न
तावत् खण्डो गौरिति भिन्नाभिन्नविषयं प्रत्यक्षम् तथाप्रतिभासाभावात् । नन्वि-
तरेतरात्मनैवाभेदः प्रतिभासते । तर्हि †† तरेतरानात्मना भेदोऽप्यवभासेत ।
ननु रूपभेदेन भेदोऽवभासते तर्हि रूपैक्यादभेदो वक्तव्यः । अथेतरेतरा-
त्मत्वादभेदो रूपभेदाद्भेद इति । क्व दृष्टमितरेतरात्मत्वमभेद इति । न
तावदेको घट इत्यत्र दृश्यते । तस्मात्खण्डो गौरिति न भेदाभेदावभासः ।

स्यादेतत् । खण्डो गौर्मुण्डो गौरिति प्रत्ययाभ्यां भेदाभेदावभास इति ।
न । ज्ञानयोः संभूयप्रमापकत्वाभावात्प्रत्यभिज्ञामन्तरेणैकस्योभयसम्बन्धा-
सिद्धेः । तर्हि प्रत्ययचयेनार्थाद् भेदाभेदसिद्धिरिति । प्रत्यक्षं तावत्पराहतम्

* नन्वन्यदेवेति १ पु. । † निर्वर्त्या इति २ पु. । ‡ आत्मेति नास्ति १ पु. ।
§ विरोध इति १ पु. । ‖ एवकारपक्षान्नाधिकः १ पु. ।
¶ व्याघात इति १ पु. । ** तुल्यमिति १ पु. ।
†† इतरेतरात्मनेति १ पु. ।

खण्डश्च गौश्च तदुभयालम्बनपिण्डस्य च चयाणां प्रत्यक्षे ऽवभासनात्सामानाधिकरण्यस्य च तदुभयाश्रयपिण्डालम्बनत्वात् । न चार्थापत्तिरपि ह्रस्वोऽकारो दीर्घो ऽकारः स एवायमकार इति प्रत्ययचयेणापि भेदाभेदासिद्धेर्भ्रान्तिमात्वोपगमात् । तस्मान्न भिन्नाभिन्नं वस्तु । * नाप्यात्मनि भेदः प्रमातुं शक्यः विवादगोचरापन्नाः स्थावरजङ्गमशरीरव्यक्तयः प्रतिवादिशरीरव्यक्त्यात्मनैवात्मवत्यः शरीरव्यक्तित्वात्प्रतिवादिशरीरव्यक्तिवदित्ये † कात्मत्वानुमानात् । युगपज्जननमरणादिविरुद्धधर्माश्रयत्वादग्न्युदकादिवद्धर्मिभेदो ऽनुमीयत इति चेन्न । शरीराश्रयतया व्यधिकरणासिद्धत्वात् । प्रतिशरीरं सखदुःखाद्यनुभवानुभवानुसंधानाननुसंधानैर्दृष्टभेदैः कल्प्यत इति चेन्न । शरीरभेदे सत्येकस्याप्यात्मनो जन्मान्तरीयाननुसंधानादिदर्शनात् सत्य ऽप्येकत्वे प्रतिविम्बभेदेषु ‡ वर्णसंकरादर्शनात् । न च जीवब्रह्मभेदो ऽपि प्रत्यक्षसिद्धः । विरुद्धधर्माश्रयत्वाद्भेदानुमाने विम्बप्रतिविम्बयोरनैकान्तिकत्वात् । नियन्तृनियन्तव्यशिचीशितव्यद्रष्टृदृश्यादीनां भेदलिङ्गत्वाज्जीवब्रह्मभेद इति चेन्न । नान्यो ऽतो ऽस्ति द्रष्टेत्यादिश्रुत्यैव भेदप्रतिषेधे लिङ्गाद्भेदप्रमिते § रयोगात् । अतुल्यप्रमाणत्वाच्च भेदाभेदकल्पनायोगात् । द्वा ‖ सुपर्णा इति द्वित्वसंख्या श्रूयत इति चेन्न । स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्येकत्वसंख्याश्रवणाद् भ्रान्तिसिद्धद्वित्वानुवादादे ¶ कत्वं नानात्वे प्रमाणाभावात् । प्रत्यक्षेण भेदग्रहणे भेदस्य धर्मिप्रतियोगि ** त्वव्यवस्थापेक्षत्वात्तद्व्यवस्थायाश्च भेदापेक्षत्वादितरेतराश्रयत्वात् । तस्मान्न भेदाभेदावित्यद्वैतदर्शनेन द्वैत †† दर्शनबाधः प्रत्यक्षभ्रमस्य चाप्तवचनेन बाधदर्शनात्फलवचनानां च वर्त्तमानापदेशितया योग्यानुपलब्धिविरोधाद्दृष्टद्वारेण बन्धनिवृत्तिरेव मोक्ष इति ।

२ अपि चाहुरिति श्लोकचयस्य तात्पर्यमाह ‡‡ गौणमिथ्यात्मन इत्यादिना । श्लोकं व्याचष्टे तदेव द्रढयन्नाहेति । द्वितीयश्लोकस्य तात्पर्यमाह कथमिदानीमस्य प्रामाण्यमित्यादिना । तृतीयश्लोकं व्याचष्टे अद्वितीय-

* नचात्मनीति १ पु० । † एकत्वेति १ पु । ‡ वर्णासाङ्कर्यादर्शनादिति १ पु० ।
§ रयोगात्तुल्यप्रमाणत्वाच्चेतीति १ पु० । ‖ सुपर्णावितीति २ पु० ।
¶ एकत्वनानात्वे इति १ पु०, एकत्वाचानात्वे-इति ३ पु० । ** त्वप्रत्ययो नास्ति ३ पु० ।
†† दर्शनस्य बाध इति १ पु० । ‡‡ गौणमुख्यात्मन इति २ पु०, गौणेत्यादिनेति ३ पु० ।

रतिशयानन्दचैतन्यैकतानसर्वज्ञसर्वेश्वरसर्वशक्तिनिरवयवस्वच्छासङ्गप्रत्य-
ातब्रह्मात्मन्यपरोक्षानुभवात्प्राग्देहात्मप्रत्ययवत्सर्वो व्यवहारो यथादर्शनमु-
द्यते तस्मिंश्चापरोक्षे ऽवभासमाने प्रमातृत्वादिबाधात्सर्वो व्यवहारो नि-
र्तत इति श्लोकार्थः ॥

* इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्यानुभवपूज्यपादशिष्यस्य
काशात्मभगवतः कृतौ पञ्चपादिकाविवरणे समन्वयसूत्रं समाप्तम् ॥


परिसमाप्तश्चायं पञ्चपादिकाविवरणाख्यो निबन्धः ॥

* श्रीपरमहंसपरिव्राजकाचार्यानन्दानन्यानुभवपूज्यपादशिष्यप्रकाशानुभवभगवतः कृतौ पञ्चपा-
दिकाविवरणे समन्वयसूत्रं समाप्तम् ॥ इति ३ पुस्तके पाठो वर्त्तते ॥

4021



R66,5x1,1,1
M91


VERIFIED